पञ्चतन्त्रम् ।

श्रीविष्णुशर्म्मणा सङ्कलितम् ।

पण्डितकुलपतिना

वि. ए. उपाधिधारिणा

श्रीमज्ज्ञानानन्दविद्यासागरभट्टाचार्य्येण विरचितया

तदात्मजाभ्यां

पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमच्चित्तबोध-

विद्यारत्नाभ्यां प्रतिसंस्कृतया च व्याख्यया

समलङ्कृतं प्रकाशितञ्च ।

कलिकातामहानगर्य्याम्

वाचस्पत्ययन्त्रे

मुद्रितम

ई १८३०

सर्व्व स्वत्व सरक्षितम

प्रकाशक— { पण्डित-श्रीआशुबोध-विद्याभूषण
तथा
पण्डित-श्रीनित्यबोध-विद्यारत्न ।

प्राप्तिस्थान— { २न०, रमानाथ मजुमदार ष्ट्रीट्, आल्बार्ट-
ष्ट्रीट् पोष्ट-अफिस । कलिकाता ।

प्रिण्टर—वि, वि, मुखर्जी ।
२ न०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता ।

पञ्चतन्त्रेऽभिनवावतरणिका ।

श्रूयते किल पुरा समस्तशास्त्रपारदृश्वानः क्षतिनो नीतिशास्त्रेषु सुराचार्य-भार्गवादयः खट्टजनुरूढं पञ्चशततमशरदादौ आविर्भूय भुवि पृथुलं प्रतनतममेतन्नयशास्त्रं विरचय्याभिनवपद्धत्या क्षत्स्ननिर्णिक्तां श्रियमेवास्य विधातुं परिपोषयितुञ्चैतदलमैशतेति। अथ विष्णुगुप्तापरनामधेयो धीरधिषणः कौटिल्यः, मौर्यवंशावतंसं क्षितितलं शासतं नृपमणिं चन्द्रगुप्तं सरित्पतिप्रतीकाशां दण्डनीतिं सुखमवबोधयितुमेव षड्भिः सहस्रेण श्लोकैः संक्षिप्य सारभूतमेकं नीतिशास्त्रं प्राणैषीत्। ततस्तस्यैव अन्तेसदा कामन्दकेनापि नीतिसारनामकमपरमेकं नीतिशास्त्रं प्राणायि। गते चेत्थं बहुतिथे काले क्रमादेतदाचार्यपरम्परया अधीतिबोधाऽऽचरणप्रचारणादिदोषेण दुर्बोधत्वं विषमत्वञ्च नीतम्।

अथ कोऽपि धीमान् लोकाचारसुचारुविचारचतुरः अतिकठोरं शास्त्रमेतदतिसरलं सुगमञ्च संविधातुं मृगविहङ्गमादिकथामिषेण सुकुमारधियां पृथुकानां मृणालपेलवावदातचेतांसि समाकृष्यार्धजिगार्पयिषयेव च पञ्चभिस्तन्त्रैर्नियन्त्रितं प्रत्ययमिमं नयग्रन्थं विरचितवान्। को हि नामासौ कोविदः ग्रन्थमिमं प्राणेष्ट, तदधुनाऽपि केऽपि विग्रहीकर्त्तुं नेहन्ते; परन्त्वेतद्ग्रन्थप्रस्तावनायामालोक्यते यत्, विष्णुशर्मनामा कश्चिन्नयचणः नियतमुन्मार्गगामिनामविदुषां राजतनयानां सरलेनैवोपायेन विपश्चित्प्रतिपत्तये प्रवर्त्तनाय ग्रन्थमिमं रचयामासेति। सहस्राधिकसंवत्सरतममयमेतिह्यञ्चैतत् प्रचरति, पश्चाच्चायि चैवमेव ग्रन्थारम्भे ग्रन्थकृता। तल्लिपिकर्त्रा केनचिद्विदुषा विष्णुशर्मनाम्नि कस्मिंश्चित् नीतिनिष्णाते विपश्चिति तद्ग्रन्थकर्तृत्वं किमारोपितम्? इत्यनिशं विभावयतां विपर्य्यासग्राहग्रासः

प्रस्तान्यत्यर्थं समाकुलानि च भवन्ति नवीनप्रन्नतत्त्वविदां मनांसि । सत्यप्येवं, विष्णुशर्मैव एतस्य ग्रन्थस्य रचयिता मङ्गाङ्कश्च, तत्र नास्ति किमपि तथ्यमवदातं तोषकरञ्च प्रमाणम् ।

दृश्यते हि महाकविकुलपुङ्गवविशाखदत्तविरचितनाटके मुद्राराक्षसे गृहीतनटशरीरः कौटिल्यः स्वयमेवाह—"अस्ति चास्माकं सहाध्यायि मित्रं विष्णुशर्मा नाम ब्राह्मणः ; स चौशनसदण्डनीतौ, चतुःषष्ट्यङ्गे ज्योतिःशास्त्रे च परं प्रावीण्यमुपगतः" इति । असौ विष्णुशर्मा एव पञ्चतन्त्रस्य रचयितेति मन्यन्ते केचित् । तेषां मतं असौ हि महामनाः खृष्टाविर्भावात् पूर्वं तृतीयस्य शतसंवत्सरस्यान्ते चतुर्थस्यादौ वोदियाय ; यतो महाबलमौर्यवंशप्रतिष्ठापकः नृपवरः चन्द्रगुप्तः खृष्टजननात् प्राक् द्वादशाधिकत्रिशततमाब्दे सुमहायकं नयाभिज्ञचाणक्यमवाप्यैव तदोजसा नव नन्दान् पराजित्य तदीयसिंहासनमधिचकारेति । चाणक्यसुहृत् विष्णुशर्माऽपि तदैव समजनीति ।

अपरे च मुद्राराक्षसोक्तसंवादः न प्रमाणमिति मन्यन्ते, न स्वीकुर्वन्ति च चाणक्यमित्रं विष्णुशर्मैव पञ्चतन्त्रस्य रचयितेति । पर्य्यालोचयैतं विवदमानानां विविधवादमस्माभिः क एव पञ्चतन्त्रस्याद्य रचयितेति नैव सम्यक् निर्णीयते ; को हि महात्मा कदैवैतत् व्यरचयत्, तदपि न सुष्ठु कैरपि स्थिरीकृतम् ; वयमिह कथञ्चिदेव तत् आलोचयिष्यामः ।

केषाञ्चिदेव ग्रन्थानां रचनासमयनिर्णयावसरे अविसंवादिनौ बाह्याभ्यन्तरप्रमाणरूपौ द्वावप्येतावुपायौ सम्यगपेक्षणीयौ परिग्रहणीयौ च, यावेवेदानीमनुमन्यन्ते नवीनाः प्रन्नतत्त्वनिर्णयनिपुणाः । तत्र बाह्यप्रमाणं यथा,—

पञ्चतन्त्ररचनासमये सुस्फुटमविज्ञातेऽपि गौणेनैवानेनाभ्युपायेनैतस्य कियदेवावगन्तुं शक्यते एव । पारसीकाधिराजः नसिर्वानः खृष्टीयैकत्रिंशदधिकपञ्चशततमसमायाः प्रभृति

एकोनाशीत्यधिकपञ्चशततमाब्दं यावत् नृपासनमलञ्चकार। तदानीं तदादेशत एव वुज्जेरत्तुमिराभिधेयः कश्चित् महीभृद्भिषक् पारदीयापरनामपेच्चवीति-भाषया पञ्चतन्त्रमेतदन्ववादीत्।

दृष्टश्च पुरा राजतनयान् सुशिक्षयितुमेव मन्त्रिवृद्धैस्तेष्वेव मयत्नं ममगोपायि; यतश्चैतत् तन्त्रं राजनीति-दण्डनीतिप्रभृति-भूयिष्ठमेवामोत्। प्रोक्तभिषग्वरेणातिमहतैवायासेनैतत् सङ्कलितम्; अतश्चार्वाचीनाश्चानुमिन्वन्ति यत्, एतत् खृष्टाविर्भावात् परं पञ्चमशताब्दे प्रचरति स्म, नो चेत् खृष्टीयषष्ठशताब्दे वैदेशिकैरस्यानुवादः कृत इत्यसम्भावित एवाऽऽभाति।

कथं हि तत्त्वानुमन्यित्वभिः कमपि कालमनिर्णीय केवलं पञ्चमशताब्दे एव रचितमेतदिति निरणायि, तत्रास्त्येतदेवाधो-लिखितम् आभ्यन्तरिकं प्रमाणम्; यथा.—

पञ्चतन्त्रे तु मौहूर्त्तिकवरेण्यवराहमिहिरस्य कृतेः ज्योतिषां निचयात् कियन्तः श्लोकाः समुद्धृत्य विनिवेशिता इति दृश्यन्ते। पूर्वाभवाश्च सुधियः दृष्टैतन्निश्चिन्वन्ति यत, वराहमिहिरोदयस्य अधस्ताटेवैतत् काव्यं निरमायीति। अमी हि ज्यौतिषिकप्रधानं खृष्टीयषट्सप्तत्यधिकचतुःशततमाब्दे आविरासीदिति निरधारि।

ततश्च बाह्यान्तरप्रमाणाभ्याम् एवं स्थिरीभवति यत् खृष्टीयैकोनाशीत्यधिकपञ्चशततमाब्दात् परतः षट्सप्तत्यधिक-चतुःशततमाब्दात् पुरतः एव नैतद्विरचितमिति।

माघप्रभृतीनां तत्रभवतां महाकवीनामत्र कियन्तः श्लोकाः दृश्यन्ते। महाकविः माघस्तु खृष्टीयनवमशताब्दे एव प्रादुर्बभूव स्म इति निर्द्धारितम्; तस्मात् य एव हि प्राक् पञ्चतन्त्ररचनाकालः निर्णीतः, तेनैव सह महान् विरोधः आपतति, तत्तु सुधोभिर्धार्य्यम।

अत्र हि विदत्तमवरः म्याक्डोनेल इत्यमभिदधाति,—न हि भवति पञ्चतन्त्रं मूलीभूतं काव्यम्; अस्य हि मूलं पञ्चभि-स्तन्त्रैर्न हि पुरा तन्त्रितमासीत्; यतश्चैतदतीव प्रान्नतममन-

दितं द्राद्शात्मकतन्त्रेरुपलक्षितं दृश्यते ; न हि भवति तस्य काव्यस्याभिधेयं पञ्चतन्त्रमेव, पञ्चसङ्ख्यारूपमङ्केतेनैवाख्यापिता वा न भवति अस्यान्यविधा काऽप्यपराख्येति । सत्यं हि एतत्, पञ्चतन्त्रम् असम्पूर्णं सदेव समाप्तिमागतम् ; नास्ति नयशिक्षितानां नृपसुतानामपि विनेयत्वज्ञापनं, ग्रन्थकृत उपसंहारवचनं, भरतवाक्यम आशीःसंसूचकञ्च ग्रन्थसमाप्तौ ।

काव्यमेतत् पारसीक-ग्रीसीय-आरबीय-सिरियकभाषाभिः तत्रत्यैर्गावद्दाश्चानूदितम् ; तत्र चारबीयानुवादस्य नाम "कालीलदमना" सिरियकानुवादस्य च "कालिलग् दमनग्" इति । दृष्ट्वैतद्विद्वत्प्रवरः म्याक्डोनल्डोऽनुमन्यते यत्, इमे अपि एते नामनी नूनं करटक-दमनकयोरपभ्रंशभूते ; अन्यदप्याह यत्, पञ्चभ्योऽप्यधिकानि अत्र तन्त्राण्यासन् ; अतोऽस्यैतस्यैवाभिधानमज्ञानं, संस्कृतमूलग्रन्थस्तु विलुप्तः ; तस्य तु किन्नामासीत्, को वाऽस्य रचयितेति कैरपि न ज्ञायते ।

किञ्चासौ इदमप्याह, तस्मिन् हि विलुप्ते संस्कृतमूलग्रन्थे बौद्धभावव्यूढा विशेषतस्य प्रामरन् ; ततश्च तान्त्रिकाः वैदाविदः द्विजातयः तांस्तांश्च भावान् स्वधर्माननुकूलान् मतविशेषांश्च पर्य्यहार्षुः ; तेनैवातिमहतो द्राद्शभागमितस्य नीतिशास्त्रस्य शरीरं स्वल्पमेवावाशिषत्, पञ्चतन्त्रे एव पर्य्यणंसीच्च ; तदेतदेवाधुनातनं नीतिशास्त्रं पञ्चतन्त्रं प्रचरति, बौद्धभावावेशिताः विविधाः कथास्तस्मादेवात्रानुश्रूयन्ते ।

हुयेङ्माङ्नामकः चीनदेशीयः परिव्राजकः स्वीयभारतभ्रमणवृत्तान्तावलोकिनौ एवमेवाभ्यधात् । यदाऽसौ स्वयमेव भारतभूमौ शाक्यसिंहसिद्धिस्थलीं बुद्धगयां बौद्धमहातीर्थं नालन्दादिविद्यालयं विहारादिकञ्चावलोकयितुम् उपागमत्, तदा भिक्षुकागाराणि विहारतीर्थप्रभृतीनि विगतप्रभाणि चाद्राक्षीदिति ।

एतेन, बौद्धधर्मस्यावनतिस्तदागमनात् पुरत एव भवितुमारब्धेति प्रतीयते; काले चैतस्मिन्नेव पञ्चमशताब्दशेषार्द्धमारभ्य षष्ठशताब्दं यावत् व्यरचि पञ्चतन्त्रम्, इति निरधारि प्राचीनाभिः; अतस्तस्मिन् किल काले बौद्धभावबहुलेषु पुस्तकेषु सम्यगनादरो न पुनर्विस्मृतम्; तथापि मूलमेतद्ग्रन्थस्यातीव मनोरमं, बालजनाभिरुचिगुणानुकूलं, सुकुमारमतिधियामन्तेवासिनामत्यातीव उपकारकमेवेति विभाव्यास्यैमिश्राः सनातनधर्मगरिष्ठा गुरवः कुर्वाचित् पारिवर्त्यं परिवर्द्धयं चैतत् अत्यक्षा स्वेषां शिष्याणां पाठनार्हमकार्षुः। भूयसायासेन परिवर्त्तितेऽप्येतस्मिन् बौद्धधर्मप्रभावः तत्समयप्रथितश्च सर्वथैव न व्यलुपत्।

पञ्चतन्त्रे बौद्धप्रभावपारम्पर्य्यादागता बहूनां च्यवनाकादीनाञ्च विविधाः कथा उपवर्णिताः, बौद्धानुभाववशादेवैते शब्दाश्चात्र व्यवहारिषत; नो चेत् तत्सामाजिकशब्दानामत्र ग्रन्थे प्रयोगस्य नास्ति कोऽप्यन्यथा हेतुः।

अपि चास्माभिश्चात्र जिनार्चनरातिः ५०८ पत्राङ्कतः १२। १३।१४ सङ्ख्यकश्लोकेषु मधुरमुपवर्णिता दृश्यते, परिवर्त्तितेऽपि पञ्चतन्त्रे तेषां तेषाञ्च बौद्धभावसमुदायानां दर्शनात् मूलभूतस्यैतस्य बौद्धभावभूयिष्ठतामीषदिति अनुमीयते।

मठशब्दानाञ्च भूरिशः प्रयोगात् मठश्चात्र बौद्धसम्प्रदायसिद्धमठ एवेति कैश्चित् अबोधि; "मठस्काचार्यनिलयः" कथं न भवतीति कैरपि नाघ्राङ्कतम; अवादि च यत् भगवतोऽर्हतवादप्रचारैकगुरोः शङ्करस्य जननात् प्राक् बौद्धेभ्यः ऋते भारतेऽन्येषां केषामपि सम्प्रदायिकानां मठो नामीदिति, पञ्चतन्त्रञ्च भगवच्छङ्करादिभावात् प्रागेव विरचितम; अतश्चात्र ग्रन्थे व्यवहृताः मठशब्दा बौद्धमठमेव प्रत्याययन्तीति वेदितव्यम्।

अपि चात्र धृतानि वीरबलाद्युपाख्यानानि वेतालपञ्चविंशतिग्रन्थेऽन्यत्रापि च दृश्यन्ते; अतः 'वेन्फे' इत्याख्यः

सुधीवर्य्यो बौद्धजातकग्रन्थत एतानि सङ्कलितानीत्यन्वमिनोत्, यत् आख्यायिकाश्चैताः बौद्धजातकग्रन्थेषु दृश्यन्ते इति।

इत्थमेवात्र समादधति अर्वाचीनाः प्रच्छन्नतत्त्वानुसन्धित्सवः यत्,—केनापि महता परमविदुषा नयकुशलेन विविधेभ्यो नीतिशास्त्रेभ्यः धर्मसंहिताभ्यश्चैतानि श्लोकरत्नान्यनर्घ्याणि सङ्कलितानि। रचनापाटवभङ्गीषु निरीक्ष्यमाणास्वपि चानुशीलितासु सुसूक्ष्मधिया कैरपि निर्णेतुं न शक्यते यत्, केन हि महात्मना कदैतद्विरचितमिति।

यावदेवात्र प्रमाणमधिगतं, तत्र तत्र तु विश्रब्धं एतावन्मात्रमेवाभिधातुं शक्यते यत,—खृष्टीयषट्समशत्यधिकचतुःशततमाब्दादारभ्य एकोनाशीत्यधिकपञ्चशततमशरदं यावत् तत् समाऽभ्यन्तरं एवैतद्विरमायोति। यावच्चैतस्मिन् किमपि समीचीनं विरुद्धमानसामोदकरञ्च प्रमाणान्तरं न सङ्कृष्यते, तावदिदमेव वक्तुं शक्यते यत्, उक्तसंवत्सराभ्यन्तरत एवैतत् केनापि कारुणिकेन कवित्वकीर्त्तिसम्पदेऽपि अस्पृहयता स्वनामाप्रदायैव प्रथितादिनयविष्णुशर्मनाम्नैवैतत् प्रकाशीकृतमिति। किञ्चात्र विभिन्नमतानां बहुधा विवादे प्रचरत्यपि,—

"सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम्।
तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम्" ॥

इति ग्रन्थादौ ग्रन्थकृत्परिचयदर्शनात् प्राचीनसंवादं संरक्ष्य चास्माभिर्विष्णुशर्मनाम्नैवैतत् प्रचारीकृतमित्यलमनल्पजल्पनेनेति। शं भूयात्।

इं संवत् १८१८
कलिकाता।

श्रीमज्जीवानन्दविद्यासागरपौत्रः
एम, ए, बि, एल्, चैत्युपाधिकः
श्रीपञ्चानन शर्मा।

पञ्चतन्त्रस्य कथानां सूची।

विषयाः				पृष्ठाङ्काः
ग्रन्थकृन्मङ्गलाचरणम्	...	...	...	१
ग्रन्थावतरणिका	...	...	...	२
कथामुखम्	...	...	...	४

मित्रभेदे—

कथाप्रस्तावना	...	...	...	७
वणिग्-वृषभ-सिंह-शृगालानां कथा		...	...	७
कौलीन्याटिवानरकथा	...	...	...	१४
शृगाल दुन्दुभिकथा	...	...	...	५०
नृपति टिटिभ-गीरम्भकथा	...	...	...	५१
देवशर्माध्यापित-आषाढभूतिकथोः, वृध्यमानहृदय-जम्बुकाना, द्विज-समार्थ्यकौलिक दृतिका-पापितामाश्च कथा			...	६५
विष्णुरूपधारिकौलिक-राजकन्याकथा		...	...	७८
वायसी-कृष्णसर्प-जरत्कारुवकथा	...	...	...	१००
बक-कुलीरककथा	...	...	...	१०१
सिंह-शशककथा	...	...	...	१०८
मत्कुण-मन्दविसर्पिण्योः कथा	...	...	...	१२२
नीलवर्णशृगाल-सिंहादीनां कथा		...	...	१२५
उष्ट्र-काक-सिंह-दीपि-शृगालादीनां कथा		...	...	१३९
समुद्र-टिटिभयोः कथा	...	...	...	१४८
हंसहय-कच्छपानां कथा	...	...	...	१५९
वयाणां मत्स्यानां कथा	...	...	...	१५३
चटका-काष्ठकूट-मक्षिका-दर्दुर-कुञ्जराणां कथा		...	...	१५९
सिंह-वक शृगालानां कथा	...	...	...	१७३

विषयाः				पृष्ठाङ्काः
वानरयूथ-सुखीमुखपक्षिकथा	...	...	...	१८४
वानर-वलचटकाकथा	...	...	...	१८६
धर्मबुद्धि-पापबुद्धिकथा	...	...	...	१८९
नक्र-नकुल कृष्णसर्पकथा	...	...	..	१९४
वणिक्पुत्र-तुलादण्ड बालकानां कथा		...	...	१९६
नरपति-वानरयोः, चौरवणिग्-धनिकचतुर्विप्र-किरातानाञ्च कथा			...	२००

मित्रसम्प्राप्तौ—

काक कूर्म-मृग मूषिककथा	...	...	...	२०६
लघुपतनक-चित्रग्रीव-हिरण्यककथा	...	...	...	२०८
हिरण्यक तामचूड-डहल्मिककथा	...	...	...	२३४
शुचितातिलोलिक्यपण्डितकं ब्राह्मण-ब्राह्मणीकथा		...	...	२३९
शूकर-पुलिन्द-मृगालानां कथा	...	...	...	२४३
धान्यधनार्थ-कन्यावितयानां कथा	...	...	...	२५७
कालिलक-दैवपुरुषदयकथा	...	...	...	२६९
लघुपतनक मृगाल-मृगालीकथा	...	...	...	२७६

काकोलूकीये—

वायसराजमेघवर्ण घलुकराजारिमर्दनयोः कथा			...	३०४
काकोलूकानां निसर्वैरतोत्पत्तिकथा			...	३२९
दन्ति-शशकानां कथा	...	...	...	३३४
शश-कपिञ्जल मार्जाराणां कथा	...	...	...	३४०
ब्राह्मण-छागल-धूर्तत्रयकथा	...	...	...	३५३
महामर्ष-पिपीलिकानां कथा	...	...	...	३५७
ब्राह्मण-तत्पुत्र-सर्प-दौनारकथा	...	...	...	३६४
सुवर्णपिच्छहंस सौवर्णपक्षि-नरपतीनां कथा		...	...	३६९
व्याध-कपोत-कपोतीनां कथा	...	..	...	३७८
ब्रह्मदत्तिक तत्पत्नी-चौराणां कथा	...	...	...	३८१
चौर-राक्षस-ब्राह्मणानां कथा	...	...	...	३८३
स्त्रीकक्षसर्प-चुदरक्षसर्पयोः कथा		...	...	३८७

विषयाः				पृष्ठाङ्काः
रथकार-तत्पत्नी-तज्जाराणां कथा	...	...	...	३९१
रमणीकपिमूषिका तपस्विब्राह्मणयोः कथा		...	...	३९७
सुवर्णविष्ठकपक्षि नरपत्यादीनां कथा		...	...	४०६
शृगाल-महिषगतभिन्दकथा	...	...	...	४०८
मण्डूक-सर्पकथा	...	...	...	४२१
अष्टचारित्रब्राह्मणी-घृतान्धब्राह्मणकथा		...	...	४२५

लब्धप्रणाशे—

वानर-मकरकथा	...	...	...	४३९
गङ्गदत्त प्रियदर्शनकथा	...	...	...	४५१
सिंह-शृगाल-रासभकथा	...	...	...	४६१
नरपति-यूथिष्ठिराख्यकृकलासकथा		...	..	४६८
सिंह-सिंहशिशु-शृगालवत्सकथा	...	...	...	४७०
ब्राह्मण तत्पत्नी तज्जारपङ्गुना कथा		...	...	४७४
नन्द वररुचि-तद्भार्याणां कथा		...	..	४७९
व्याघ्रचमरीवृकरासभकथा	...	..	...	४८१
कालिकपत्नी-तज्जार शृगालीकथा		...	...	४८९
रथकार घण्टायुक्तदासेरककथा	...	...	...	४९०
सिंह व्याघ्र दीपि-मृतहस्ति शृगालकथा		..	...	४९९
चित्राङ्गलामकुसारसेयकथा		...	...	५०२

अपरीक्षितकारके—

श्रेष्ठिसचिवभट्ट-लालित चपणकरूपिपद्मनिधि चपणक धर्माधिकरणिकानां कथा	५०४
ब्राह्मण तत्पत्नी-नकुलानां कथा	५१५
चतुर्णां ब्राह्मणपुत्राणां कथा	५१८
सिंहकारकब्राह्मणपुत्राणां कथा	५२९
पण्डितमूर्खाणां चतुर्णां ब्राह्मणवटूना कथा	५३१
एकबुद्धि-शतबुद्धि-सहस्रबुद्धीना कथा	५३६
शृगाल गायकगर्दभयोः कथा	५४०

विषया:				पृष्ठाङ्का:
चतुर्भुजसत्यरकौशिककथा	...	...	...	५४४
सोमशर्मतात शतभाण्डयो: कथा	...	...	...	५५१
बालर-चन्द्राक्षयृषयो: कथा	...	...	...	५५३
विक्राल-राक्षस-बालरामां कथा	...	...	...	५६२
विलसीकथा-अन्ध-कुब्जालां कथा	...	...	...	५६७
राक्षस-प्रच्छकलाक्षयो: कथा	...	...	...	५६८
एकोदरपृथग्ग्रीवभारद्वाजयो: कथा	...	...	...	५७५
सर्प-कर्कट-ब्राह्मणानां कथा	...	...	...	५७८

श्लोकोक्तविषयाणाम् अकारादिक्रमेण निघण्टुः ।

विषयाः	श्लोकाङ्काः
अक्षमता	मि-भे० १४३
अतिथिः (सत्कारः)	मि-भे० १८१—१८३, २११। का० १५३, १६३। सु० २—५
अतिलोभः	... ५० २२
अत्यल्पस्वीकारनिन्दा	... मि-भे० ३१६
अदृष्टम्...मि-भे० ३५१।	मि-सु० ८५, १८४। ५० ३०, ४२, ४३
अनाधिकारचर्चा	... मि-भे० ४२२
अनित्यता	... मि-सु० १८२
अनिर्वृतिः	.. मि-भे० २२८
अनुशोचना	मि-भे० ३६२—३६४
अपकारिणः दूषणम्	मि-भे० ३६५, ३८७
अपरितोषपात्रम्	... मि-भे० ३०५
अप्राप्ते कथनम्	मि-भे० ३३, ३४, ४२३। का० ४
अबध्यः	... मि-भे० ३१४
अभक्ष्यनिन्दा	... मि-भे० ३१८
अभयदानम्	... मि-भे० ३१२
अमृततत्त्वम्	... मि-भे० १३८
अराजकता	... का० ७१
अर्थः	मि-भे० २—१०, १७४। मि-सु० ९२—९४, १२४, १२५
अर्थमानर्थम्	... मि-सु० ७१, ८८, ९०
अल्पगुणवतां निन्दा...	मि-भे० ३०८
अविवेकः	... मि-भे० ४४०। ल० २०
अविश्रामभूमिः	... मि-भे० २८३। का० १
असज्जनसङ्गता सतां निन्दा	मि-भे० ४४७, ४४८
असती, तल्लक्षणं तद्दोषश्च...मि-भे० १८४—	१८७, १९०
असन्तोषः	... सु० १५
अस्थाने पाण्डित्यम्	... मि-भे० ४२८
अस्पृश्यता	... का० ११६—११८
अहङ्कारः	मि-भे० ३२९, ३३७—३४०, ३४८
आहिंसा	... सु० ४८
आत्मगुप्तिः	... मि-भे० २८७
आत्मपापत्यागः	... मि-भे० २२६,
आत्मरक्षा	...मि-भे० ३८५—३८८। का० ८२—८४
आत्मीयता	मि-भे० ११० मि-सु० १७७
आयुः	... मि सु० ८५
आवश्यकता	... मि-भे० ७७
आश्रयः	... मि-भे० १३, ११९
आसनम्	... का० ४४—५०
इन्द्रियं, तद्दमनफलञ्च	मि-सु० १९

विषयाः	श्लोकाङ्काः
उद्वेजनलक्षणम् ...	मि-भे० ६०
उत्तरम् ...	मि-भे० ६४
उत्साहः	मि-सु० १४६—१४८। का० २८
उदरशीर्षरुजम् ...	मि-भे० २७८
उपदेशः ...	मि-भे० ४२१। मि-सु० १८६। का० २४५—२४८। सु० ७७। अ० ५१, ७२, ७५, ९८।
उपभोगविधिः ...	मि-सु० ८४
उपायकौशलम्	मि-भे० २२८, २३०, ३५८
एकता ...	मि-भे० ३६०
कन्याजननदुःखम्	...मि-भे० २२२—२२४
कन्यादान-पात्रनिर्णयः...	का० २१०
कन्यालक्षणम् ...	अ० ८९, ९०
कर्णेजप-दोषवर्णनम् ...	मि-भे० ३२५
कर्तव्यता	मि-भे० १४१, ३९०। अ० १७,१८
कलह-दोषवर्णनम् ...	अ० ७०, ७१
कापुरुष	मि-भे० २६, ३५०। अ० ३३, ७६
कामिता ...	मि-भे० २२०,२२१
काव्यम् ...	का० १३०
काव्याकरणे काव्यैर्हानिः	का० २१९, २२०
कीर्तिः ...	मि-भे० ३२०
कृतघ्नफलम् ...	का० १५५
कृतघ्ननिन्दा	... मि-भे० ४५३। अ० ११
कृपणता	... मि-सु० ७६, ७७, ७८
क्रोधः ...	मि-भे० ३३०
क्षमता	मि-भे० १, १६१, ३२८, ४१९। मि-सु० १२०। अ० ५५
क्षेत्रः	मि-सु० १९९। का० १४४—१४६, १७५, १७६। अ० ३१
गानलक्षणम् ...	अ० ५३—५५
गार्हस्थ्य-सुखाभाव-वर्णनम् ...	अ० ५०
गीतम् ...	अ० ५२, ५६
गुरुः ...	मि-भे० १०३—१०६
गृहमेधि-धर्मः ...	मि-भे० ४०५
गोपनीयविषयाः ...	मि-भे० १०९
घरः (तन्त्रलक्षणम्) ...	का० ६५—६९
चिन्ता ...	अ० २७
जन्मसाफल्यम्	मि-भे० १९०, ४२५—४२७। मि-सु० १८१। अ० १७
जीवनस्य नश्वरता ...	मि-भे० २०
जीवितम् ...	मि-भे० २४
तारुण्यम् ...	मि-भे० १६
तृष्णा ...	अ० १५, १६, ७७—७९
तेजः ...	मि-भे० ३२, ३५४—३५७। का० ७८
दक्षः ...	मि-भे० ४०७, ४०८
दया ...	मि-भे० २५
दरिद्रता	मि-सु० ८५—९९, १०२—११०, १६८। अ० २—७, २३—२६
दरिद्रतायां दोषः	मि-भे० ४४२, ४४३। मि-सु० ९१
दाहता ...	मि-सु० ७६— ७५, ७९
दासनम् ...	मि-सु० ५३—५५, १६७
दासत्वम् ...	मि-भे० ८७—१०२
दीर्घसूत्रता ...	का० २१९, २२०
दुःखम् ...	मि-सु० १८७
दुर्वृत्तम्	मि-सु० २१—२३, ८८। का० १५४। अ० ८५

विषया:	श्लोकाङ्का:
दुर्ग: (तल्लक्षणम्) ...	मि-मे० २५०—२५४। मि-स० १४—१६। का० १२१, १२५
दुर्जनता ...	मि मे० ३८६। का० ८१
दूत: (तल्लक्षण-कर्त्तव्ये)	का० ८६—८८
दृष्टता	मि-मे० ११६
दैवकृत:	का० २१८
दैवीभाव:	का० ६०—६४
धन धनसञ्चयौ	मि मे० ४३१, ४३२। मि-स० १२१, १४२, १४३, १५५—१५८, १६६
धननिन्दा ...	मि-स० १२२, १२३
धनवत्ता ...	अ० ८—१०
धन्यानां प्रशंसा ...	मि मे० २८४। (?) मि-स० ५७—५८। अ० ७४
धर्म्म:	मि-मे० ४३७। का० ८५—१०४। स० ४१
धार्म्मिकता ...	का० १७०—१७२
धीरता ...	मि मे० ११२, ११३, २१६
धीरत्व मनस्विन:	कर्म्म मि-स० १२६। अ०२८
धूर्त्तता ...	का० ७४। अ० १२—१४
धैर्य्यरक्षणे उपायप्राप्ति: ...	मि-मे० ३४४
नरकम	मि-स० २६। का० १०५—१०७। अ० ८२
निर्लोभलक्षता	मि-मे० ११५, ३५२, ३५३
नीचता ...	मि-मे० ३८३
नीति: (सामान्यरूपी)	मि-मे० १०७, १५७, १५८, १६६—१७०, १७५, १८०, २६८, ३००, ३७१, ४००—४०२, ४१३, ४३४, ४४४, ४५०, ४५५, ४५६। मि-स० ६३, १२७, १४४, १७०, १८८। का० ८५, ११०, ११८, १२७, १८२, २२१, २३१, २४१। अ० ६, १८, १८, ३०, ६४, ६५, ६७। अ० ५७, ७३, ८१, ८५।
नीतिभेद: ...	मि-स० ४७
पाण्डितलम्	मि-मे० ३६८, ४६०। मि-स० ८६। अ० ४१
पराभवहानि:	मि-मे० ३३६, ३७०, ४१८
परोपकार:	का० १५६—१५८, १६१, १६२, १६५—१६७
पातकाभाव: ...	मि-मे० ४५६
पापम् ...	का० १६८, १६९
पिशुनता ...	मि-मे० ३२७
पुत्र: (तल्लक्षणञ्च)	मि-मे० कथासु० ४—८, २७—३१, ११४, १४२। अ० १९—२१
पुरुषकार: ...	मि-मे० २१७, ३५८। मि स० १३५—१४०। अ० २९, ३२
पृच्छा ...	अ० ८७, ८८
प्रजापालनफलम् ...	मि-मे० ३७६—३७९
प्रजापीडनफलम् ...	मि-मे० ३६५
प्रज्ञाप्रशंसा ...	का० २४२, २४३
प्रधानपुरुषलक्षणम्	मि-मे० ३१३
प्रभुभक्ति: ...	मि-मे० १२०
प्रमाणम् ...	का० ९३, ९४
प्राणत्यागप्रशंसा ...	मि-स० ११०, १११
प्रियता ...	मि स० ५६
प्रियताहेतु: ...	मि-मे० ४४४
प्रीतिलक्षणम्	मि-स० ५१, ५२। अ० १३
बाणिज्यम् ...	मि मे० ११—१८
बान्धव: ...	अ० ३०

विषया:	श्लोकाङ्का:
वृत्ति:	मि-मे० १३५, २१५, २१९, ३९९। मि-स० ६। का० १२६। ग० ४६
वृद्धिलाभ:	... मि स० ५, १८३
वृद्धिमत्कर्त्तव्यम्	... मि-मे० ३४५
वृद्धिमत्ता	...मि मे० १९, ४४, ४५, ६५ ४११। ल० २७। ग० ४७
व्रह्मघाती	... मि-स० ११४, ११५
भक्ष्याभोग्यत्वनिर्णय:	... ल० २३
भयम	...मि-स० १७२। का० २१४
भवितव्यता	मि-स० १०, ११, ८२, ८३, १३०—१३४। का० २५३ —२५६। ल० ३७, ६२ ६३
भृत्यत्वम	मि-मे० ७९, ८०, १६३—१६५, २१७, ३८१, ३८४, ४५४
भृत्यस्य दोषगुणौ	... मि-मे० १२१, ३१४, ३१५, ३८२
भेद:	... ल० ७३, ७४
भोग्यस्थाननिर्णय:	... का० ९२
मद्यम	... मि-मे० १८९, १९०
मन्त्रणा	मि-मे० १०८, १११। मि-स० १९७। का० ७५। ग० ६०, ६४
मन्त्रणास्थाननिर्णय:	... का० ६
मन्त्रिदोष:	मि मे० २९४, २९५। का० १९८
मन्त्रिलक्षणम	मि मे० १३७, १३८, १७१, १७२, ४०६
मर्म्मस्थम् (तल्लक्षणम्)	मि-स० ७, ८। का० २३९, २४०। ग० ३५, ३८
मायावलेन ग्रहणं बधसाधनम्	का० २९
मित्रता	मि मे० ३६८। मि-स० १२, २८, ३०, ३७—४०, ४९, ११७, ११९, १७८, १८२। का० २०९। ल० २०, ६६
मित्रताकरणफलम्	... मि-स० १९७
मित्रतालक्षणम्	... मि-स० ४९, ११९
मित्रदूषणम्	... ल० १२
मित्रद्रोह:	... मि-मे० २९७, ४५३
मित्रप्रशंसा	मि स० ६१, ६२, ६४, १७९, १८५, १८६, १९९, १९४, २००
मिथ्याचरण-फलम्	... मि-मे० १३०
मृत्यु:	मि-मे० ४००, ४५१, ४५२। मि-स० १९९
यानम्	... का० ३४, ३५
युद्धप्रतिषेध:	... २४९
युद्धम्	... का० १२—२२
योग्यायोग्यता-विचार:	मि-मे० ७८, ८१, ८६, १०९। का० ११४। ग० ८०
राजदोष:	मि मे० ३२३, ४१५। का० ७९, ७७, ८९, २५०
राजधर्म:	मि-मे० २३७, २३९, २४२, २४४, २४५
राजनिन्दा	... का० ७०
राजनियम:	मि-मे० १३७, १४०, ३१९, ३७३, ३७४। का० १२२, १२३। ल० ४३
राजरोषफलम्	... मि-मे० ७१, ७२, १३९
राजलक्षणम्	... मि-मे० १३१, २४९, २४७, २७०, ३७६। मि-स० २४, २७। का० २१६, २५१। ग० ५९
राजपदूषणप्रकार:	... मि-मे० ५१

विषया:	श्लोकाङ्का:
राजसंश्रय:	मि-भे० २२, ३५—४३, ५४—६३, ६८—७०, ७३, १५६, १६०
राजसंश्रयाकरणम्	मि भे० ४१४
राज्ञां नीतिभेदोक्ति:	मि-भे० ४५८
राज्ञामकर्तव्यम्	मि-भे० २४१, २४३
राज्यम्	च० ६५—६७
राज्यरक्षोपाय:	मि-भे० २३८, २४०
लक्ष्मी:	... मि-स० १२८, १४१। का० ७२। च० ३७
लोकसमाचार:	... मि-भे० ३७२। मि स० ६७—६९
लोभ:	... मि स० ३
वक्रताऽऽनयनम्	मि-भे० ७४—७६। का० १२४
वाक्यम्	... मि-भे० ६६, ६७। का० १११—११३। स० ४८
विदुषामनादर:	मि-स० ३६
विनाश:	का० २, ३
विपदां विपदनुगमनम्	मि-स० १८३
विरक्तानुरक्त-रक्षणम्	का० ७
विरुद्धधर्मता	मि-भे० १४२
विवाद:	मि भे० ४३५। मि-स० ८
विश्वास: तत्पात्रापात्रनिर्णयश्च	मि-स० १८०। का० १
विश्वासे दोषोक्ति:	... मि-भे० १२३—१२६, २८६। मि-स० ४५, ४६, ४८। स० १४
वृथा	मि-भे० ४२८, ४३०। मि-स० १०१। का० ३१, ३३। स० ९
वृद्धत्वम्	का० १८६, १८७
व्यसनम्	मि-स० १८५। स० २५
व्यसनोद्धरणोपाय:	मि-स० १८६
शठता	मि-स० ४१—४३
शत्रु: (लक्षणम्)	मि-भे० ३८५। मि-स० ३४, ४४, ५०। का० ५, २६, २७, १८७
शत्रुमित्रबलोपाय:	मि-भे० २८८, २८९
शत्रौ: नाशकालनिर्णय:	... मि भे० २५५। मि-स० ३३। का० २५, २८—३०, १२९
शत्रौ: पृष्ठगमशक्ति:	... मि-भे० ३४७, ३८४
शत्रौ: समीपे प्रणतिस्वीकार:	स० २२, २६। का० १२८
शरणम्	मि-स० ६५, ६६। का० १४०, १४१
शरणागतरक्षणे विघ्नपात:	... मि-भे० २२७
शास्त्रम्	मि-भे० कथामु० ९
शुभाशुभावेदकभाव:	मि स० ८७
श्लोक:	मि भे० ३९२
श्लाघा	... मि-भे० ४०३, ४०४। मि-स० २
संजय:	... का० ५५—५९
संसर्ग:	... मि-भे० २७१—२७३। स० ४२
संसर्गकरणोपदेश:	...मि-भे० ४१७—४२०, ४५७। मि-स० ६१। का० ७१, ७२
संग्रामप्रतिपक्षनिर्णय:	... मि-भे० ३३५
संचयाश्रयकाल:	... मि-भे० १२७—१२९
सज्जनसंगति:	... मि-भे० १६२
सतीषु स्त्रीषु उपदेश:	... का० १४८, १५०
सत्यादिदानप्रशंसा	... मि-स० ८०
सत्यस्य गौरवम्	... का० १०८, १०९
सदोषादोषलक्षणम्	...मि-भे० २१०—२१२
सत्याप:	... मि-भे० ११८

विषया:	श्लोकाङ्का:
सन्तोष:	मि-सु० १६०—१६२
सन्धि: सन्धेयश्च	मि सु० ३२, ३४। का० ८, ११, २३, २४
सफलता ...	मि-सु० १५३
सम्मानम् ...	मि-सु० २४
सर्वसुखसाधनहानिनिर्णय:	ल० २५
साख्यम् ...	मि भे० १८३, ४३६, ४३७
साधुलक्षणम् ...	मि-भे० १७६, १७७, २६९ ल० ६८
साम	मि-भे० ४०८, ४१०। का० ७, २६, २७
सारत्वम् ...	का० २४४
सारूप्यिकता ...	अ० ३१, ३४
सिद्धुपाय: ...	का० २३३।
सुख-सुखिनौ ...	मि-सु० १७४
सुभाषितम् ...	मि-सु० १७५, १७६
सुहृद्गुण: ...	मि-भे० २६६, २६७। मि-सु० १७—१९, १७१
सेवकलक्षणम्	मि भे० २८५—२८३, ३०८, ३२१, ३२२, ३२४, ३८३।

विषया:	श्लोकाङ्का:
सेवा	मि-भे० ४६—५२, ३०६, ३०७, ३८०। मि सु० ७५
स्त्रीकौशलम् (तत्र यथायोग्य-व्यवहारोपदेश:)	मि भे० १८४—२०८
स्त्रीचरित्रम्	मि-भे० १४६—१५६। का० १८४। ल० ३४—३६। अ० ८५
स्त्रीणां परिणयकालनिर्णय:	का० २००—२०८
स्त्रीनिन्दा	ल० ५१—५३, ५५—५८। अ० ६३
स्त्रीवश्यता-फलम्	मि-सु० १५०, १५१। ल० ५४। अ० ६१, ६२
स्वदेशत्यागिदेशौ	का० ६१। ल० ७८। अ० ४८
स्वप्न: ...	मि-भे० १४४, १४५। अ० ११
स्वभाव: ...	मि भे० १३३, १३४, २७८, २८०, २८२। ल० ७१, ७२
स्वर्गगामिता ...	मि-भे० ३३१—३३४। मि-सु० १११
स्वल्पानलघटता ...	मि-भे० १२२
स्वाख्यम् ...	मि-सु० १६४
स्वित-स्विसैविणौ ...	का० १५१, १५२

पञ्चतन्त्रम्।

यन्त्रतन्त्रकथाभारम्भः।—

ब्रह्मा रुद्रः कुमारो हरि-वरुण-यमा वह्निरिन्द्रः कुबेर-
चन्द्रादित्यौ सरस्वत्युदधियुगनगा वायुरुर्वी भुजङ्गाः।
सिद्धा नद्योऽश्विनौ श्रीदितिरदितिसुता मातरश्चण्डिकाद्याः
वेदास्तीर्थानि यज्ञा गणवसुसुनयः पान्तु नित्यं ग्रहाश्च ॥१॥

मनवे वाचस्पतये शुक्राय पराशराय सबुताय।
चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्यः ॥२॥

ग्रन्थस्य परमात्मानं योजीवानन्दशर्मणा।
क्रियते बालबोधाय टीकैषा बालबोधिनी ॥

ग्रन्थारम्भे ग्रारिप्सितपरिसमाप्तिकामो ग्रन्थकृत् दुरदृष्टप्रशमनाय देवादीन् सङ्कीर्त्य तदाशिषं कामयते, ब्रह्मेति।—ब्रह्मा हिरण्यगर्भः, रुद्रः शिवः, कुमारः कार्त्तिकेयः, हरिर्विष्णुः, वरुणः जलदेवः, यमः शमनः, वह्निः अग्निः, इन्द्रः देवराजः, कुबेरः धनपतिः, चन्द्रः सोमः, आदित्यः सूर्यः, सरस्वती वाग्देवी, उदधिः समुद्रः, युगानि कृतादीनि, नगाः पर्वताः, ("ग्रैवेयको नगावगौ" इत्यमरः) वायुः पवनः, उर्वी पृथिवी, भुजङ्गाः पन्नगाः, सिद्धाः देवयोनिविशेषाः, नद्यः सरितः, नद्यश्चत्वारः इत्यर्थः, अश्विनौ आश्वनीकुमारौ, श्रीः लक्ष्मीः, दितिः कश्यपपत्नी, दैत्यजननी इत्यर्थः, अदितिसुता देवा इत्यर्थः, चण्डिकाद्याः चण्डीप्रभृतयः, मातरः मातृवर्गाः, वेदाः ऋक्सामयजुरथर्वरूपाश्चत्वारः, तीर्थानि पुण्यक्षेत्राणि काश्यादीनि, यज्ञाः दर्शपौर्णमासादयः, गणाः प्रमथा गणेशानुचरविशेषाः इत्यर्थः, वसवः अष्टसङ्ख्काः गणदेवताः, सुनयः आसाद्यः, ग्रहाश्च नवसङ्ख्काः रव्यादयश्च, नित्यं सततं, पान्तु रक्षन्तु, अस्मानिति शेषः। सग्धरा वृत्तम्,—"सर्वर्यानाभ्रयेण विसुनियतियुता सग्धरा कीर्तितेयम्" इति लक्षणात् ॥१॥

मान्यं नीतिशास्त्रकारान् प्रणमति, मनवे इति।—मनवे स्वायम्भुवाय, वाचस्पतये बृहस्पतये, शुक्राय दैत्याचार्याय, सबुताय सपुत्राय, व्यासमहितायेत्यर्थः, पराशराय, विदुषे चाणक्याय च एतेभ्यः, तथा नयशास्त्रकर्तृभ्यः नीतिशास्त्ररचयितृभ्यः, पूर्वोक्तेभ्य इत्यर्थः इति भावः, नमः प्रणतिरस्तु। आर्या वृत्तम्,—"यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये पञ्चदश चतुर्थके साऽऽर्या ॥" इति लक्षणात् ॥२॥

सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मा सः।
तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम् ॥ १ ॥

कथामुखम् ।

तद्यथा श्रूयते,—अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्। तत्र (क) सकलार्थिकल्पद्रुमः प्रवरनृपतिमुकुट-मणिमरीचिमञ्जरीचर्चितचरणयुगलः (ख) सकलकलापार-दृश्वनोऽमरशक्तिर्नाम राजा बभूव। तस्य त्रयः पुत्राः (ग) परम-दुर्मेधसो बहुशक्तिरुग्रशक्तिरनन्तशक्तिश्चेति नामानो बभूवुः।

अथ राजा तान् शास्त्रविमुखान् आलोक्य सचिवान् आहूय प्रोवाच,—"भोः! श्रुतम् एतत् भवद्भिः यत्, ममैते पुत्राः शास्त्रविमुखा विवेकरहिताश्च। तत् एतान् पश्यतो मे मच्छदपि राज्यं न सौख्यम् आवहति; अथवा साधु इदम् उच्यते,—

अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम्।
यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् ॥ ४ ॥

सकलेति।—सः प्रसिद्धः, विष्णुशर्मा जगति सकलानाम अर्थशास्त्राणां नीति-शास्त्राणां, सारं समालोक्य समालोच्येत्यर्थः, पञ्चभिः तन्त्रैः भागविशेषैः, एतत् सुमनो-हरं शास्त्रं नीतिशास्त्रमित्यर्थः, चकार। आर्या वृत्तमिदम् ॥ १ ॥

(क) सकलेति।—सकलानां—समग्राणाम् अर्थिनां—याचकानां, कल्पद्रुमः इव—कल्पपादप इव, [उपमितसमासः] कामप्रद इति भावः। प्रवरेति।—प्रवराणां—महतां, नृपतीनां—राज्ञां, पराजिततया प्रणतानामिति भावः, मुकुट-मणीनां—किरीटरत्नानां, या मरीचिमञ्जर्यः,—मयूखावल्यः, ताभिः चर्चितं—दृब्धितं, चरणयुगलं यस्य तथोक्तः।

(ख) सकलेति।—सकलाः,—समग्राः, याः कलाः,—चतुःषष्टिप्रकारा विद्याः, तासां पारः,—अन्तः तं, गतः,—प्राप्तः, सकलकलापारदर्शी इत्यर्थः। अमरेति।—अमरस्य शक्तिरिव शक्तिः यस्य सः तथोक्तः।

(ग) परमेति।—परमा दृष्टा मेधा येषां ते, अतिदुर्बुद्धय इत्यर्थः।

अजातेति।—अजातमृतमूर्खेभ्यः, पुत्रेभ्य इति शेषः, [अपेक्षायां पञ्चमी] मृता-

वरं गर्भस्रावो वरमृतुषु नैवाभिगमनं
वरं जातः प्रेतो वरमपि च कन्यैव जनिता।
वरं वन्ध्या भार्या वरमपि च गर्भेषु वसतिः
न चाविद्वान् रूपद्रविणगणयुक्तोऽपि तनयः॥ ५॥
कोऽर्थः पुत्रेण जातेन यो न विद्वान् न भक्तिमान्?।
किं तया क्रियते धेन्वा या न सूते न दुग्धदा?॥ ६॥
वरमिह वा सुतमरणं मा मूर्खत्वं कुलप्रसूतस्य।
येन विबुधजनमध्ये जारज इव लज्जते मनुजः॥ ७॥

जातौ ऋतुश्च जातश्च तौ, सुतौ. वरं मनाक्प्रियौ, ("ईषदृते वरः श्रेष्ठे विधु क्लीबे मनाक्प्रिये" इत्यमरः) यतः यस्मात्, तौ ऋताजातौ, खल्वदुःखाय, भवत इति शेषः; जडः मूर्खः पुत्रः; यावज्जीवम् आजीवनं, दहेत् सन्तापयेत्; मूर्खः पुत्रः यावज्जीवं क्लेशप्रद इति भावः। पथ्यावक्त्रं वृत्तं,—"युजोषतुर्थतो जेन पथ्यावक्त्रं प्रकीर्त्तितम्" इति लक्षणात्॥ ४॥

वरमिति।—गर्भस्रावः अकाले गर्भनिःसरणं, वरं मनाक्प्रियः, ऋतुषु रजोनिर्गमादारभ्य षोडशसु निशासु इत्यर्थः, अभिगमनं स्त्रीसङ्गमः, नैव वरम्, ऋतौ यद्यपि चाजनितपापमपि स्त्रीकार्य्यमित्यर्थः, जातः उत्पन्नः पुत्रः, प्रेतः मृतः, वरं, कन्या तनया, एव जनिता उत्पन्ना, वरं, वन्ध्या अप्रसवा, भार्य्याऽपि वरं, गर्भेषु वसतिः स्थितिः, गर्भादपि:सरणमित्यर्थः, अपि वरं, रूपद्रविणगणयुक्तः रूपवान् धनवान्, अपि तनयः अविद्वान् मूर्खः, चेदिति शेषः, न च, वरमिति शेषः। शिखरिणी वृत्तं,—"रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति लक्षणात्॥ ५॥

कः इति।—कः पुत्रः, न विद्वान् न पण्डितः, न भक्तिमान् मातृया मातृभक्तिमान्, पितृादिष्विति शेषः, ["न धार्मिकः" इति पाठान्तरम्] तेन पुत्रेण सुतेन, जातेन उत्पन्नेन, कोऽर्थः? किं प्रयोजनम्? या धेनुः, न सूते न सन्तानप्रसवं करोति, न दुग्धदा न पयस्विनी, तया धेन्वा गवा, किं क्रियते? दुग्धदानासनर्थया अप्रसविन्या धेन्वा इव अविद्वान्मूर्खपुत्रेण नास्ति प्रयोजनमित्यर्थः। "या न दोग्ध्री न गुर्विणी" इति हलायुधधृतपाठः। दृष्टान्तालङ्कारः॥ ६॥

वरमिति।—इह जगति, सुतमरणं पुत्रनिधनं, वरं वा, कुलप्रसूतस्य सत्कुलोद्भवस्य, मूर्खत्वम्—अविद्वत्त्वं, मा न, भवतु इति शेषः। येन मूर्खत्वेन, मनुजः मानवः, विबुध-

गुणिगणगणनाऽऽरम्भे न पतति कठिनी समम्भसं यस्य।
तनाम्बा यदि सुतिनी, वद वन्ध्या कीदृशी भवति ? ॥८॥

तदेतेषां यथा (घ) बुद्धिप्रकाशो भवति, तथा कोऽपि उपायोऽनुष्ठीयताम्। अत्र च महत्तां वृत्तिं भुञ्जानानां पण्डितानां पञ्चशती तिष्ठति। (ङ) ततो यथा मम मनोरथाः सिद्धिं यान्ति, तथा अनुष्ठीयताम्" इति। तत्रैकः प्रोवाच,—"देव! द्वादशभिर्वर्षैर्व्याकरणं (च) श्रूयते, ततो धर्मशास्त्राणि मन्वादीनि, अर्थशास्त्राणि चाणक्यादीनि, कामशास्त्राणि वात्स्यायनादीनि; एवञ्च ततो धर्मार्थकामशास्त्राणि ज्ञायन्ते। ततः (छ) प्रतिबोधनं भवति"। अथ तच्छ्रुत्वा सुमतिर्नाम सचिवः प्राह,—(ज) "अशाश्वतोऽयं (झ) जीवितव्यविषयः, प्रभूतकालसाध्यानि शब्दशास्त्राणि; तत् सङ्क्षेपमात्रं शास्त्रं किञ्चिदेतेषां प्रबोधनार्थं चिन्त्यतामिति। उक्तञ्च, यतः,—

जनमध्ये पण्डितसभिनी. जारात् जायते इति जारजः स इव उपपतिज इव, ("जार-उपपतिः समौ" "अश्नते जारजः कुण्डः" इति चामरः) लज्जते लिङ्गेति, प्रकाशितजन्मरहस्यः जारजो यथा सभामध्ये लज्जया अधोमुखमूर्धा तिष्ठति, तथा पण्डितसमाजे मूर्खोऽपीति भावः। उपमालङ्कारः। आर्या छन्दः ॥ ७ ॥

गुणेति।—गुणिगणानां विद्वद्वृन्दानां, गणनाऽऽरम्भे सङ्ख्यामध्ये, यस्य, नाम्नीति शेषः, कठिनी खडीति यस्याः प्रसिद्धिः, समम्भसं समौरवं, न पतति गौरवपूर्वकं यत्नाम न लिख्यते इति भावः, तेन पुत्रेण, अम्बा माता, यदि सुतिनी पुत्रवती, भवेदिति शेषः, तदा वन्ध्या अपुत्रा, कीदृशी भवति वद कथय; वन्ध्या तादृशपुत्र-जननी च तुल्येति भावः। आर्या छन्दः ॥ ८ ॥

(घ) बुद्धिप्रकाशः,—ज्ञानोदयः। वृत्तिं—जीवनोपायभूतां भृतिमाप्तिमित्यर्थः।

(ङ) ततः,—तस्मात्, पण्डितानां पञ्चशत्या इत्यर्थः। मनोरथाः,—कामाः।

(च) श्रूयते—पठ्यते इत्यर्थः।

(छ) प्रतिबोधनं—ज्ञानं, पाण्डित्यमित्यर्थः।

(ज) अशाश्वतः,—अनित्यः, क्षणभङ्गुर इत्यर्थः।

अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथाऽऽयुर्बहवश्च विघ्नाः।
सारं ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाम्बुमध्यात् ॥९॥

तदत्रास्ति विष्णुशर्मा नाम ब्राह्मणः सकलशास्त्रपारङ्गमः (अ) क्षत्रसंसदि लब्धकीर्त्तिः, तस्मै समर्पयतु एतान्, स नूनं द्राक् प्रबुद्धान् करिष्यति" इति। स राजा तदाकर्ण्य विष्णुशर्माणमाहूय प्रोवाच,—"भो भगवन्! मदनुग्रहार्थमेतान् अर्थशास्त्रं प्रति द्राग् यथा (ट) अनन्यसङ्क्रान् विदधासि, तथा कुरु। तदा अहं त्वां (ठ) शासनशतेन योजयिष्यामि"। अथ विष्णुशर्मा तं राजानमूचे,—"देव! श्रूयतां मे तथ्यवचनम्। नाहं विद्याविक्रयं शासनशतेनापि करोमि। पुनरेतांस्तव पुत्रान् मासषट्केन यदि नीतिशास्त्रज्ञान् न करोमि, ततः स्वनामत्यागं करोमि। किं बहुना?—श्रूयतां ममैषः (ड) सिंहनादः,—(ढ) नाहमर्थलिप्सुरेवं ब्रवीमि, ममाशीतिवर्षस्य व्यावृत्तसर्वेन्द्रियार्थस्य न किञ्चिदर्थेन प्रयोजनं, किन्तु त्वत्-

(भ) जीवितव्यविघ्नः,—जीवनकाल इत्यर्थः। प्रभूतकालसाध्यानि—बहुकालवेद्यानि। शब्दशास्त्राणि—व्याकरणशास्त्राणि।

अनन्तेति।—शब्दशास्त्रं व्याकरणम्, अनन्तपारम् अशेषं, किल निश्चितम्; तथा आयुः जीवनकालः, स्वल्पं क्षणस्थायि, तवापि बहवः अनेके, विघ्नाः व्याघाताः, शास्त्रालोचने इति शेषः, ततः तस्मात्, यथा हंसैः अम्बुमध्यात् मिलिताभ्यन्तरात्, क्षीरमिश्रितजलादिति भावः, सारमिव क्षीरं, गृह्यते इति शेषः, तथा अनेरपीति भावः, फल्गु असारम्, अपास्य त्यक्त्वा, क्षीरमिव दुग्धमिव, सारम् उत्कृष्टं वस्तु, यावद् गृहीतव्यमिति तात्पर्यम्। उपमालङ्कारः। उपजातिः छन्दः ॥ ९ ॥

(अ) क्षत्रसंसदि—क्षत्रसमाजे। द्राक्—झटिति। प्रबुद्धान्—ज्ञानसम्पन्नान्।

(ट) अनन्यसदृशान्—असाधारणान्।

(ठ) शासनशतेन—शतसङ्ख्यकयाभसम्पादनपत्रैरित्यर्थः।

(ड) सिंहनादः,—सिंहवद्गर्जनम्; सदर्पोक्तिरिति भावः।

(ढ) अर्थलिप्सुः,—धनलालसः। अशीतिवर्षस्य—अशीतिवर्षवयस्कस्य। व्यावृत्तसर्वेन्द्रियार्थस्य—इन्द्रियभोग्यवस्तुषु निःस्पृहस्येत्यर्थः।

प्रार्थनासिद्ध्यर्थं (ण) सरस्वतीविनोदं करिष्यामि। तच्छिक्ष्यतामद्यतनो दिवसः, यदि अहं षण्मासाभ्यन्तरे तव पुत्रान् नयशास्त्रं प्रति अनन्यसदृशान् न करिष्यामि, ततो (त) नार्हति देवो देवमार्गं मन्दर्शयितुम्"। अथासौ राजा तां ब्राह्मणस्य असम्भाव्यां प्रतिज्ञां श्रुत्वा समचिवः प्रहृष्टो विस्मयान्वितः तस्मै सादरं तान् कुमारान् समर्प्य परां (थ) निर्वृतिमाजगाम। विष्णुशर्मणाऽपि तानादाय (द) तदर्थं मित्रभेदमित्रप्राप्ति-काकोलूकीय-लब्धप्रणाश-अपरीक्षितकारकाणि चेति पञ्च तन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः। तैऽपि तानि अधीत्य मासषट्केन (ध) यथोक्ताः संवृत्ताः। ततः प्रभृति एतत् पञ्चतन्त्रकं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रवृत्तम्। किं बहुना ?—

अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च।
न पराभवमाप्नोति शक्रादपि कदाचन ॥ १० ॥

[इति कथामुखम्]।

(ण) सरस्वतीविनोदं—सरस्वत्या वाग्देव्या, आत्मचर्चया इत्यर्थः, विनोदं—मनोरञ्जनं, भवत्पुत्राणामिति भावः। अनन्यसदृशान्—असाधारणान्।

(त) देवः,—जगदीश्वरः, देवमार्गं—स्वर्गपथं, परलोकमित्यर्थः, सन्दर्शयितुम्—अवलोकयितुं, माम् इति शेषः। न अर्हति—न युज्यते, परलोके मम सद्गतिं न विदधातु इति भावः।

(थ) निर्वृतिं—सन्तोषम्।

(द) तदर्थं—तेषां राजपुत्राणां कृते इत्यर्थः।

(ध) यथोक्ताः,—यथाकथिताः, पण्डिता इत्यर्थः। प्रवृत्तं—प्रचारितमित्यर्थः।

एतत्पठनप्रयोजनमाह, अधीते इति।—यो हि जनः इदं पञ्चतन्त्रं नाम नीतिशास्त्रं ग्रन्थं पठति आकर्णयति च, स कदाऽपि वासवसमबलात् रिपोरपि पराभवं नाधिगच्छति इति समुदितार्थः ॥ १० ॥

अथ मित्रभेदो नाम प्रथमं तन्त्रम् ।

अथातः प्रारभ्यते मित्रभेदो नाम प्रथमं तन्त्रम् । यस्यायमादिमः श्लोकः,—

वर्द्धमानो महान् स्नेहः सिंहगोवृषयोर्वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ॥ १ ॥

तद्यथा अनुश्रूयते,—अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तत्र (क) धर्मोपार्जितभूरिविभवो वर्द्धमानको नाम वणिक्पुत्रो बभूव । तस्य कदाचिद्रात्रौ शय्याऽऽरूढस्य चिन्ता समुत्पन्ना यत्, प्रभूतेऽपि वित्ते अर्थोपायाश्चिन्तनीयाः कर्त्तव्याश्चेति । यत उक्तञ्च,—

न हि तद्विद्यते किञ्चित् यदर्थेन न सिध्यति ।
यत्नेन मतिमांस्तस्मादर्थमेकं प्रसाधयेत् ॥ २ ॥
यस्यार्थास्तस्य मित्राणि, यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके, यस्यार्थाः स च पण्डितः ॥ ३ ॥
न सा विद्या न तद्दानं न तच्छिल्पं न सा कला ।
न तत् स्थैर्य्यं हि धनिनां याचकैर्यन्न गीयते ॥ ४ ॥

वर्द्धमान इति ।—वने सिंहगोवृषयोः सिंह-श्रेष्ठवृषभयोः, ("गोवृषं श्रेष्ठवृषभम्" इति रत्नाकरः) वर्द्धमानः वृद्धिं गच्छन्, महान् स्नेहः वक्ष्यमाणरूपः प्रणयः, अतिलुब्धेन अतिलोलुपेन, पिशुनेन खलेन, जम्बुकेन शृगालेन, विनाशितः विध्वंसितः ॥ १ ॥

(क) धर्मेति ।—धर्मेण—धर्मशास्त्रोक्तमार्गेण, उपार्जितः,—सञ्चितः, भूरिः,—महान्, विभवः,—सम्पद् येन तथाभूतः ।

न हीति ।—यत् अर्थेन न सिध्यति, तत् किञ्चिदपि वस्तु न हि विद्यते ; सर्वमेव अर्थसाध्यमिति भावः । तस्मात् मतिमान् प्राज्ञो जनः, यत्नेन एकं केवलम्, अर्थं प्रसाधयेत् अर्जयेत् ॥ २ ॥

यस्येति ।—लोके—जगति । अन्यत् सुगमम् ॥ ३ ॥

नेति ।—याचकैः अर्थार्थिभिः, धनिनां समीपे इति शेषः, यत् विद्यादिकं, न गीयते न कीर्त्यते, तल्लोकेऽपि नेति शेषः । तथा हि, सा विद्या न, तद्दान

इह लोके हि धनिनां परोऽपि स्वजनायते ।
स्वजनोऽपि दरिद्राणां सर्वदा दुर्जनायते ॥ ५ ॥
अर्थेभ्योऽपि हि हृद्येभ्यः संवृत्तेभ्यस्ततस्ततः ।
प्रवर्त्तन्ते क्रियाः सर्वाः पर्वतेभ्य इवापगाः ॥ ६ ॥
पूज्यते यदपूज्योऽपि यदगम्योऽपि गम्यते ।
वन्द्यते यदवन्द्योऽपि सं प्रभावो धनस्य च ॥ ७ ॥
अश्नुतादिन्द्रियाणीव स्युः कार्य्याण्यखिलान्यपि ।
एतस्मात् कारणाद्वित्तं सर्वसाधनमुच्यते ॥ ८ ॥
अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते ।
त्यक्त्वा जनयितारं स्वं निःस्वं गच्छति दूरतः ॥ ९ ॥

न, तत् श्रित्यं न, सा कला न, तत् स्थेर्य्यं मर्य्यादाशालित्वं, हि न । अयं भावः,—धनिसमीपे तदुपासनार्थिना याचकेन धनलाभार्थं तस्य धनिनः सर्वा विद्या, सर्वं दानं, सर्वं शिल्पज्ञानं, सर्वा च चतुःषष्टिप्रकारा वृत्त्यादिविद्या, सर्वप्रकारा मर्य्यादाशालिता च अस्तीति ज्ञात्वा प्रशस्यते इति ॥ ४ ॥

इहेति ।—इह अस्मिन्, लोके संसारे, परोऽपि जनः, धनिनां स्वजनायते स्वजन इवाचरति । दरिद्राणान्तु स्वजनोऽपि सर्वदा दुर्जन इव आचरति ॥ ५ ॥

अर्थेभ्य इति ।—पर्वतेभ्यः आपगा इव नद्य इव, हृद्येभ्यः हृद्यं गतेभ्यः, उपायेनेति भावः, संवृत्तेभ्यः सम्भृतेभ्यः, रक्षितेभ्य इत्यर्थः, ततस्ततः तेभ्यस्तेभ्यः, अर्थेभ्यः, सर्वाः क्रियाः संसारयात्रोपयोगिनी व्यापाराः, प्रवर्त्तन्ते । उपमालङ्कारः ॥ ६ ॥

पूज्यते इति ।—अपूज्यः पूजानर्होऽपि, यत पूज्यते, अगम्यः अलभ्योऽपि, यत् गम्यते लभ्यते, अवन्द्योऽपि अनभिवाद्योऽपि, यत् वन्द्यते प्रणम्यते, स च धनस्य प्रभावः ; धनेनैव सर्वे पूज्या गम्या वन्द्याश्च भवन्तीति भावः ॥ ७ ॥

अश्नुतादिति ।—अश्नुतात् भोजनात्, विषयोपभोगाद्वा, इन्द्रियाणीव अखिलानि सर्वाणि, अपि कार्य्याणि स्युः, चरितार्थं भजन्ते इत्यर्थः ; वित्तादेवेति भावः ; एतस्मात् कारणात् वित्तं धनं, सर्वसाधनं सर्वकार्य्येनिष्पादकम्, उच्यते कथ्यते, बुधैरिति शेषः ॥ ८ ॥

अर्थार्थीति ।—अर्थार्थी धनलुब्धः, अयं जीवलोकः श्मशानमपि सेवते आश्रयति ; तथा निःस्वं निर्धनं, स्वम् आत्मीयं, जनयितारं पितरमपि, त्यक्त्वा दूरतः गच्छति ॥ ९ ॥

गतवयसामपि पुंसां येषामर्था भवन्ति ते तरुणाः।
अर्थेन तु ये हीना वृद्धास्ते यौवनेऽपि स्युः॥ १०॥

स चार्थः पुरुषाणां षड्भिरुपायैर्भवति,—भिक्षया, नृपसेवया, कृषिकर्मणा, विद्योपार्जनेन, (ख) व्यवहारेण, वणिक्कर्मणा वा। सर्वेषामपि तेषां वाणिज्येन (ग) अतिरिक्ततोऽर्थलाभः स्यात्। उक्तञ्च यतः;—

कृता भिक्षाऽनेकैर्वितरति नृपो नोचितमहो!
कृषिः क्लिष्टा विद्या गुरुविनयदुष्प्रातिविषमा।
कुसीदाद्दारिद्र्यं परकरगतग्रन्थिशमनात्
न मन्ये वाणिज्यात् किमपि परमं वर्त्तनमिह॥ ११॥

गतेति।—गतं वयो येषां, वृद्धानामित्यर्थः, अपि येषां पुंसाम् अर्था भवन्ति, ते प्राप्तधना वृद्धा अपि, तरुणाः युवानः, तरुणवत् उत्साहसम्पन्नाः इत्यर्थः; ये तु अर्थेन हीनाः, ते यौवनेऽपि वृद्धाः स्युः, निरुत्साहा भवन्तीत्यर्थः। आर्या छन्दः॥ १०॥

(ख) व्यवहारेण—कुसीदविधिना इत्यर्थः।

(ग) अतिरिक्ततः,—धनाच्छादितः, अतिन्दितत्वात् सर्वसम्मत इत्यर्थः।

कृतेति।—अनेकैः, जनैरिति शेषः, भिक्षा कृता, किन्तु तेषां भिक्षायां न उन्नतिर्जातेति भावः। नृपः प्रभुः, उचितं न वितरति ददाति, तस्मात् राजसेवायां न विशेषलाभ इति भावः; अहो इति खेदे। कृषिः क्लिष्टा क्लेशदायिनी, तस्मात् कृषिकर्मणः बहुक्लेशसाध्यतया अल्पदक्षतया च न विशिष्टलाभहेतुरिति भावः। विद्या गुरुषु विनयदुष्प्रा शिष्टाचारसाध्यत्वेन, अतिविषमा अतिदुर्लभेति भावः। परेषां करगतस्य, धनस्य इति भावः, यः ग्रन्थिः बाधाविशेषः इति यावत्, तस्य शमनात् शान्तिविधानात् हेतोः कुसीदात् धनव्यवहारात्, अधमर्णे धनलियोगादित्यर्थः, अपीति शेषः, दारिद्र्यं सम्भवतीति शेषः; कुसीदजीविभिः परहस्तगतस्य धनस्य आदानसमये प्रायशोऽशेषा बाधा प्राप्यते, किमधिकं, धनाधिकारप्राप्तावप्यु[illegible]यते, तथापेऽपि फलसिद्धिर्बहुधायासकरीति तस्मात् दारिद्र्यसम्भव इति निष्कर्षः। तस्मात् इह संसारे, वाणिज्यात् परमम् उत्कृष्टं, किमपि वर्त्तनं जीवनोपायः, न, वर्त्तते इति शेषः, इत्यहं मन्ये। अत्रुटिरियं छन्दः,—"रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति लक्षणात्॥ ११॥

उपायानाञ्च सर्वेषामुपायः पण्यसङ्ग्रहः ।
धनार्थं प्रस्थितैः श्लोकस्तदन्यः संशयात्मकः ॥ १२ ॥

तच्च वाणिज्यं (घ) सप्तविधमर्थागमाय स्यात्, तद्यथा—गान्धिक-व्यवहारः, निक्षेपप्रवेशः, गोष्ठिककर्म, परिचितयाढकागमः, मिथ्याक्रयकथनं, कूटतुलामानं, देशान्तराद्भाण्डानयनञ्चेति ।

उक्तञ्च,—पण्यानां गान्धिकं पण्यं किमन्यैः काञ्चनादिभिः ।
यत्रैकेन च यत् क्रीतं तच्छतेन प्रदीयते ॥ १३ ॥
निक्षेपे पतिते हर्म्ये श्रेष्ठी स्तौति स्वदेवताम् ।

उपायानामिति ।—सर्वेषाम् उपायानाम् उपार्जनविधीनां मध्ये, एकः केवलः, पण्यसङ्ग्रहः पण्यानां विक्रेयद्रव्याणां, सङ्ग्रहणः, उपायः, धनार्थं प्रस्थितैः प्रयत्नतः क्रीयते, तत् तस्मात्, पण्यसङ्ग्रहरूपवाणिज्यादित्यर्थः, अन्यः पूर्वोक्तभिक्षादिरूपः उपायः, संशयात्मकः सन्देहसङ्कुलः, फलसिद्धाविति शेषः ॥ १२ ॥

(घ) अर्थानामाय—धनोपार्जनाय । गान्धिकव्यवहारः,—गन्धद्रव्यव्यवसायः । निक्षेपप्रवेशः,—मह्यं प्रत्यक्षम् एतावत् वस्तु देयं, त्वयि प्रभूतमेतत् द्रव्यं निक्षिपामि, इत्यभिधाय निक्षेपिणा व्यवसायिदत्ते यत् बहुमूल्यिकमूल्यस्वरूपं वस्तु निक्षिप्यते, स निक्षेपः, तस्य प्रवेशः,—स्वायत्तीकरणमित्यर्थः । गोष्ठिककर्म—गवां स्थानं गोष्ठं, तत्सम्बन्धि कर्म, एकस्थानस्थितानां बहूनां गवां भक्षणीययवसादीनां भारशतपूर्वकं तत्समाधानम् ; यद्वा,—गोष्ठिककर्म—समानकर्म, समानौ बहूनां लोकानां समावेशयत्नात् तेषां सर्वेषामपि भारशतपूर्वेण तत्समाधानम् । परिचितयाढकागमः,—परिचितो हि याढकः क्रेयद्रव्याणां मूल्यं प्रति विवक्षां न करोति, तस्मात् तत्सकाशे प्रचुरलाभसम्भव इति भावः । मिथ्याक्रयकथनम्—अल्पेन मूल्येन क्रीतं वस्तु मया इदं बहुना मूल्येन क्रीतमिति याढकसमीपे मृषाकथनम् । कूटतुलामानं—कपटतौल-दण्डादिना द्रव्याणां तोलनम् । देशान्तरेति ।—देशान्तरात्—भिन्नदेशात्, भाण्डानां —द्रव्याणाम्, आनयनं, स्वल्पमूल्येनेति भावः ।

पण्यानामिति ।—पण्यानां विक्रेयाणां द्रव्याणां मध्ये, गान्धिकं पण्यं गन्धसम्बन्धि विक्रेयं वस्तु, श्रेष्ठमिति शेषः ; अन्यैः काञ्चनादिभिः, पण्यैरिति शेषः, किम् ? काञ्चनादिकं गान्धिकेन तुल्यं नेति भावः । यत्र यतः, एकेन, मूल्येन इति शेषः, यत् गन्धद्रव्यं, क्रीतं तत् शतेन, मूल्येनेति शेषः, प्रदीयते ॥ १३ ॥

निक्षेप इति ।—हर्म्ये स्वगृहे इति भावः, निक्षेपे पतिते केनचित् निक्षिप्ते इति

निक्षेपो म्रियते तुभ्यं प्रदास्याम्युपयाचितम् ॥ १४ ॥
गोष्ठिककर्मनियुक्तः श्रेष्ठी चिन्तयति चेतसा हृष्टः।
वसुधा वसुसम्पूर्णा मयाऽद्य लब्धा किमन्येन ? ॥ १५ ॥
परिचितमागच्छन्तं याचकमुत्कण्ठया विलोक्यासौ।
हृष्यति तद्धनलुब्धो यद्वत् पुत्रेण जातेन ॥ १६ ॥

अन्वयः।—पूर्णापूर्णे माने परिचितजनवञ्चनं तथा नित्यम्।
मिथ्याक्रयस्य कथनं प्रकृतिरियं स्यात् किरातानाम् ॥ १७ ॥

अन्वयः।—द्विगुणं त्रिगुणं वित्तं भाण्डक्रयविचक्षणाः।
प्राप्नुवन्त्युद्यमाल्लोका दूरदेशान्तरं गताः ॥ १८ ॥

इत्येवं सम्प्रधार्य्य मथुरागामीनि भाण्डानि आदाय शुभायां तिथौ गुरुजनानुज्ञातः सुरथाधिरूढः प्रस्थितः, तस्य च

यावत्, श्रेष्ठी वणिक्, स्वदेवतां स्वव्यवसायाधिष्ठात्रीं देवतां, स्तौति, निक्षेपो निक्षेपाः, म्रियते, चेदिति शेषः, तुभ्यम् उपयाचितं प्रदास्यामि; अस्मिंस्तेन वसुना त्वां पूजयिष्यामीति भावः ॥ १४ ॥

गोष्ठिकेति।—गोष्ठिककर्मणि पूर्वोक्ते, नियुक्तः श्रेष्ठी चेतसा हृष्टः सन् चिन्तयति, मया वसुसम्पूर्णा धनपूर्णा, वसुधा पृथ्वी, अद्य लब्धा, अन्येन किम् ? अन्येन मे प्रयोजनमित्यर्थः। गोष्ठिकव्यवहारे एव मया प्रभूतं लभ्यते, अन्यद् भवतु न वा इति भावः। आर्य्या छन्दः ॥ १५ ॥

परिचितमिति।—असौ श्रेष्ठी, परिचितं याचकमागच्छन्तम् उत्कण्ठया औत्सुक्येन, विलोक्य तस्य धनलुब्धः सन् पुत्रेण जातेन यद्वत् यथा, हृष्यति, तथा आनन्दमनुभवति। आर्य्या छन्दः ॥ १६ ॥

पूर्णेति।—माने पूर्णापूर्णे कदाचित् पूर्णे कदाचिन् अपूर्णे, क्रयं द्रव्यक्रये पूर्णे विक्रये अपूर्णमिति भावः; नित्यं सततं, परिचितानां जनानां वञ्चनं प्रतारणम्; तथा मिथ्याक्रयस्य कथनम् इयं किरातानां व्याधानां, प्रकृतिः स्वभावः, स्यात्। आर्य्या छन्दः ॥ १७ ॥

द्विगुणेति।—भाण्डानां विक्रेयद्रव्याणां, क्रये विचक्षणाः निपुणाः, लोकाः वणिज इत्यर्थः, उद्यमात् उत्साहात, दूरदेशान्तरं गताः सन्तः द्विगुणं त्रिगुणं, मूल्यधनादिति शेषः, वित्तं धनं, प्राप्नुवन्ति, लाभमश्नुवन्तीति भावः ॥ १८ ॥

(ङ) मङ्गलवृषभो सञ्जीवकनन्दकनामानौ गृहीत्वान्यौ धूर्वोढारौ स्थितौ। तयोरेकः सञ्जीवकाभिधानो (च) यमुनाकच्छम् अवतीर्णः सन् (छ) पङ्कपूरम् आसाद्य कलितचरणो युगभङ्गं विधाय निषसाद। अथ तं तदवस्थम् आलोक्य वर्द्धमानः परं विषादम् अगमत्। तदर्थञ्च स्नेहार्द्रहृदयः चिरात्तं (ज) प्रयाणभङ्गम् अकरोत्। अथ तं विषण्णमालोक्य सार्थिकैरभिहितं,—"भोः श्रेष्ठिन्! किमेकवृषभस्य (झ) कृते सिंहव्याघ्रसमाकुले वङ्कपाये ऽस्मिन् वने समस्तसार्थः त्वया सन्देहे नियोजितः? उक्तञ्च,—

न स्वल्पस्य कृते भूरि नाशयेत् मतिमान् नरः।
एतदेवात्र पाण्डित्यं यत् स्वल्पाद्भूरिरक्षणम्॥ १८॥

अथासौ तदवधार्य्य सञ्जीवकस्य रक्षापुरुषान् निरूप्य अशेषसार्थं नीत्वा प्रस्थितः। अथ रक्षापुरुषा अपि वङ्कपायं तद्वनं विदित्वा सञ्जीवकं परित्यज्य पृष्ठतो गत्वा अन्येद्युस्तं सार्थ-

---

(ङ) मङ्गलवृषभो—माङ्गलिकवृषौ। गृहीत्वान्यौ—गृहजातौ। धूर्वोढारौ—भारवाहकौ।

(च) यमुनाकच्छं—यमुनानद्याः अन्तर्गतमनूपं, ("जलप्रायमनूपं स्यात् पुंसि कच्छजलाविधः" इत्यमरः)।

(छ) पङ्कपूरं—कर्दमनिकरम्। कलितचरणः,—प्रोथितपादः। युगभङ्गं—युगस्य शकटायवर्त्तिकाष्ठस्य, भङ्गम्।

(ज) प्रयाणभङ्गं—गमनस्थगनम्। सार्थिकैः,—सङ्घचरैः, वणिग्भिरित्यर्थः।

(झ) कृते—निमित्तम्। वङ्कपाये—वहुविपदि। सन्देहे—प्राणसंशये इत्यर्थः। नियोजितः,—निपातितः।

नेति।—मतिमान् नरः स्वल्पस्य सामान्यस्य, वस्तुन इति शेषः, कृते निमित्तं, भूरि प्रभूतं, वस्तु इति शेषः, न नाशयेत्। अत्र स्वल्पं वस्तु एकौ हय इति बोध्यम्। स्वल्पात् स्वल्पमपेक्ष्येत्यर्थः [ल्यब्लोपे पञ्चमी] यत् भूरिरक्षणं प्रभूतत्राणम्, अत्र संसारे, एतदेव पाण्डित्यं वैचक्षण्यम्॥ १८॥

वाहमित्याहुः,—"स्वामिन्! मृतोऽसौ सञ्जीवकोऽस्माभिस्तु सार्थवाहस्याभीष्ट इति मत्वा वह्निना संस्कृतः" इति। तच्छ्रुत्वा सार्थवाहः कृतघ्नतया स्नेहार्द्रहृदयस्तस्य और्ध्वदेहिकक्रियाः हर्षोत्सर्गादिकाः सर्वाश्चकार। सञ्जीवकोऽप्यायुःशेषतया यमुनासलिलमिश्रैः शिशिरतरवातैः आप्यायितशरीरः कथञ्चिदुत्थाय यमुनातटमुपपेदे। तत्र (ञ) मरकतसदृशानि बालदूर्वाग्राणि भक्षयन् कतिपयैः अहोभिर्हृष्टपुष्ट इव पीनः ककुद्मान् बलवांश्च संवृत्तः, प्रत्यहं वल्मीकशिखराग्राणि शृङ्गाभ्यां विदारयन् गर्ज्जमान आस्ते। साधु चेदमुच्यते,—

अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्ज्जितः
कृतप्रयत्नोऽपि गृहे विनश्यति ॥ २० ॥

अथ कदाचित् पिङ्गलको नाम सिंहः सर्वमृगपरिवृतः पिपासाऽऽकुल उदकपानार्थं यमुनातटमवतीर्णः सञ्जीवकस्य (ट) गम्भीरतररावं दूरादेव अशृणोत्। तच्छ्रुत्वा अतीवव्याकुलहृदयः (ठ) ससाध्वसमाकारं प्रच्छाद्य वटतले

(ञ) मरकतसदृशानि—हरिद्वर्णमणिविशेषतुल्यानि। पीनः,—स्थूलः। गर्ज्जनानः,—["ताच्छील्यवयोवचनशक्तिषु चानश्" (३।२।१२९ पा०) इति सूत्रेण शक्त्यर्थविवक्षायां परस्मैपदिनोऽपि चानशि रूपं सिद्धम्]।

अरक्षितमिति।—अरक्षितम् अप्रतिपालितं वस्तु, दैवरक्षितं दैवेन पालितं, चेत् तिष्ठति जीवतीत्यर्थः; सुरक्षितं, वस्तु इति शेषः, दैवहतं दैवेन नाशितं सत्, विनश्यति। वने विसर्ज्जितः परित्यक्तः, अनाथोऽपि निराश्रयोऽपि, जीवति, दैवानुकूल्यादिति भावः; गृहे कृतप्रयत्नोऽपि, रक्षणार्थमिति भावः, विनश्यति, दैवप्रतिकूल्यादिति भावः। वंशस्थविलं वृत्तम् ॥ २० ॥

(ट) गम्भीरतररावं—सुगभीरगर्ज्जनम्।

(ठ) ससाध्वसं—सभयम्। प्रच्छाद्य—गोपायित्वा, निःशङ्कभावं प्रकाशयेति भावः।

चतुर्मण्डलावस्थानेन अवस्थितः। (ङ) चतुर्मण्डलावस्थानं त्विदम्—सिंहः सिंहानुयायिनः काकरवाः किंवृत्ता इति। अथ तस्य करटकदमनकनामानौ द्वौ शृगालौ मन्त्रिपुत्रौ (ङ) भ्रष्टाधिकारौ सदानुयायिनौ आस्ताम्। तौ च परस्परं मन्त्रयतः। तत्र दमनकोऽब्रवीत्,—"भद्र करटक! अयं तावदस्मत्स्वामी पिङ्गलक उदकग्रहणार्थं यमुनाकच्छमवतीर्य्य स्थितः। स किं निमित्तं पिपासाऽऽकुलोऽपि निवृत्य (ण) व्यूहरचनां विधाय दौर्मनस्येन अभिभूतोऽत्र वटतले स्थितः?" करटक आह,—"भद्र! किमावयोः (त) अनेन व्यापारेण? उक्तञ्च यतः,—

अव्यापारेषु व्यापारं यो नरः कर्त्तुमिच्छति।
स एव निधनं याति कीलोत्पाटीव वानरः" ॥ २१ ॥

दमनक आह,—"कथमेतत्?" सोऽब्रवीत्,—

कथा १।

"कस्मिंश्चित् (थ) नगराभ्यासे केनापि वणिक्पुत्रेण तरुषण्डमध्ये देवतायतनं कर्त्तुमारब्धम्। तत्र च ये कर्मकराः

चतुर्मण्डलावस्थानेन—चतसृषु दिक्षु सहचरैर्मृगेर्वेष्टितः सन् वक्ष्यमाणरूपेण यदवस्थानं तेनेत्यर्थः।

(ङ) सिंहः सिंहानुयायिनः,—सिंहसहचराः, किंवृत्ताः इति—किमिदमुपस्थितमिति इङ्गिताकृतीक्षिणः सन्त इत्यर्थः, काकरवाः,—काकवत् रवं कुर्वाणाः, तिष्ठन्तीति शेषः, इदं चतुर्मण्डलावस्थानम्।

(च) भ्रष्टाधिकारौ—व्याधिकाराच्युतौ।

(ण) व्यूहरचनां—स्वसैन्येन मण्डलावस्थानं, ("व्यूहस्तु बलविन्यासः" इत्यमरः)। दौर्मनस्येन—उद्वेगेनेत्यर्थः।

(त) अनेन व्यापारेण—स्वामिनः व्यूहरचनादिकार्यविषयया इत्यर्थः, अनधिकारचर्चयेति यावत्।

अव्यापारेष्विति।—यो नरः, अव्यापारेषु अनधिकारेषु प्रवृत्तेषु, व्यापारं प्रवृत्तं, कर्त्तुम् इच्छति, स कीलोत्पाटी मूलोत्पाटनारम्भी, वानरः इव, निधनम् एव याति गच्छति ॥ २१ ॥

(थ) नगराभ्यासे—नगरान्तिके। तरुषण्डमध्ये—वृक्षसङ्घमध्ये।

(द) स्नपत्वादयः, ते मध्याह्नवेलायाम् आहारार्थं नगरमध्ये गच्छन्ति। अथ कदाचित् तत्र (ध) यानुषङ्गिकं वानरयूथमितश्चेतश्च परिभ्रमत् आगतम्। तत्र एकस्य कस्यचित् गिल्पिनः (न) अर्द्धस्फाटितोऽग्रनष्टश्चदारुमयः स्तम्भः खदिरकीलकेन मध्यनिहितेन तिष्ठति। एतस्मिन् अन्तरे ते वानराः (प) तद्गिखरप्रासादभूकुट्टदारुपर्य्यन्तेषु यथेच्छया क्रीडितुमारब्धाः। एकस्य तेषां (फ) प्रत्यासन्नवर्त्तुः चापल्यात् तस्मिन्नर्द्धस्फाटितस्तम्भे उपविश्य पाणिभ्यां कीलकं सकृत् यावत् उत्पाटयितुमारेभे, तावत् तस्य (ब) स्तम्भमध्यगतदृषणस्य (भ) स्तम्भानात् चलितकीलकेन यद्वृत्तं तत् प्रागेव निवेदितम्। अतोऽहं ब्रवीमि,—"अव्यापारेषु" इति। भावयोः भक्षितशेष आहारोऽस्त्येव, तत् किमनेन व्यापारेण ?" दमनक आह,—"तत् किं भवान् आहारार्थी केवलमेव ? तन्न युक्तम्; उक्तञ्च,—

सुहृदामुपकारकारणाद् द्विषतामप्यपकारकारणात्।
नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्त्ति केवलम् ॥ २२ ॥

(द) स्नपत्वादयः,—स्नित्यिप्रभृतयः, सूत्रधारादय इत्यर्थः।

(ध) यानुषङ्गिकम्—अन्यकर्मेव खज्ञातीयव्यापारकर्मेव आयातम्।

(न) अर्द्धस्फाटितः,—अर्द्धविदारितः। अग्रनष्टश्चदारुमयः,—पौतशाखश्चस्य काष्ठमयः। खदिरकीलकेन—खदिरतरुकाष्ठनिर्मितशङ्कुना। मध्यनिहितेन—अन्तःप्रोतेन।

(प) तद्गिखरेति।—तरुणां—द्रुमाणां, गिखराणि—अग्राणि, तथा प्रासादानां—हर्म्याणां, भूकुट्टाः, दारुणां—काष्ठानां, पर्य्यन्ताः,—प्रान्ताश्च तेषु।

(फ) प्रत्यासन्नवर्त्तुः,—आसन्नसरणेः। चापल्यात्—चाञ्चल्यात्।

(ब) तस्मिन्नेति।—तस्मिन्—तद्गतकाष्ठदण्डे, दारितस्तेति भावः, मध्ये गतौ दृषणौ—अन्तर्लीनौ यस्य तथाभूतस्य।

(भ) स्तम्भानात्—दारितभागादित्यर्थः। वृत्तं—समुत्पन्नं, घटितम् इति यावत्।

सुहृदामिति।—बुधैः विदग्धैः, सुहृदां बन्धूनाम्, उपकारकारणात् उपकार-

किञ्च,—यस्मिन् जीवति जीवन्ति बहवः सोऽत्र जीवतु।
वयांसि किं न कुर्वन्ति चञ्चा स्वोदरपूरणम् ? ॥ २३ ॥

तथा च,—यज्जीव्यते क्षणमपि प्रथितं मनुष्यैः
विज्ञानशौर्य्यविभवार्य्यगुणैः समेतम्।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः
काकोऽपि जीवति चिरञ्च बलिञ्च भुङ्क्ते ॥ २४ ॥
यो नात्मना न च परेण च बन्धुवर्गे
दीने दयां न कुरुते न च मर्त्यवर्गे।
किं तस्य जीवितफलं हि मनुष्यलोके
काकोऽपि जीवति चिरञ्च बलिञ्च भुङ्क्ते ॥ २५ ॥

विधानार्थमित्यर्थः, द्विषतां शत्रूणाम्, अपकारकारणात् अपकारविधानार्थमपि, नृपसंश्रयः राजसेवा, इष्यते अभिलष्यते ; राजसहाय्येन हि लोका निराशामुपकारमनिराशामपकारञ्च कुर्वन्तीति भावः। को जनः, केवलं जठरम् उदरं, न बिभर्त्ति ? न पुष्णति ? सर्व एव स्वोदरं बिभर्त्तीत्यर्थः। सुन्दरी उक्तम्,—"वयुत्रोर्यदि सौ जनौ युत्रोः समरा स्त्री यदि सुन्दरी तदा" इति लक्षणात् ॥ २२ ॥

यस्मिन्निति।—यस्मिन् एकस्मिन् बदान्ये जने इति भावः, जीवति सति बहवः, जना इति शेषः, जीवन्ति, अत्र जगति, सः जीवतु। वयांसि पक्षिणः, ("वयः पक्षिणि बाल्यादौ" इति मेदिनी) किं चञ्चा स्वोदरपूरणं न कुर्वन्ति ? ॥ २३ ॥

यदिति।—मनुष्यैः इह संसारे, प्रथितं प्रख्यातं यथा तथा, क्षणमपि यत् जीव्यते, तज्ज्ञाः तद्विदः जनाः, विज्ञानादिभिश्चा इत्यर्थः, विज्ञानशौर्य्यविभवार्य्यगुणैः विज्ञानादिभिः श्रेष्ठगुणैः, समेतं तत् एव जीवितं प्रवदन्ति नाम, नामेति प्रसिद्धौ। काकोऽपि चिरं दीर्घकालं, जीवति, बलिं पूजाद्रव्यविशेषञ्च, भुङ्क्ते। वसन्ततिलकं वृत्तं,—"ज्ञेयं वसन्ततिलकं तभजा जगौ गः" इति लक्षणात् ॥ २४ ॥

य इति।—यः जनः, आत्मना स्वयं, तथा परेण अन्येन द्वारेण च, दीने दुःखे, बन्धुवर्गे मर्त्यवर्गे च मनुष्यसमूहे च, सामान्ये दुःखे नरे इति यावत्, दयां न कुरुते, मनुष्यलोके तस्य जीवितफलं जीवनप्रयोजनं, किम् ? नैव किञ्चिदित्यर्थः। अन्यत् पूर्ववत्। वसन्ततिलकं वृत्तम् ॥ २५ ॥

सुपूरा स्यात् कुनदिका सुपूरो मूषिकाञ्जलिः ।
सुसन्तुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ॥ २६ ॥

किंच,—किं तेन जातु जातेन मातुर्यौवनहारिणा ? ।
आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा ॥ २७ ॥
परिवर्त्तिनि संसारे मृतः को वा न जायते ? ।
जातस्तु गण्यते सोऽत्र यः स्मरेत्र श्रियाधिकः ॥ २८ ॥

किंच,—जातस्य नदीतीरे तस्यापि तृणस्य जन्मसाफल्यम् ।
यत्सलिलमज्जनाकुलजनहस्तालम्बनं भवति ॥ २९ ॥

तथा च,—क्षमितोन्नतसत्कारा जनसन्तापहारिणः ।
जायन्ते विरलं लोके जलदा इव सज्जनाः ॥ ३० ॥

सुपूरेति ।—कुनदिका क्षुद्रा नदीत्यर्थः, सुपूरा अनायासेन पूरणीया स्यात् ; मूषिकाञ्जलिः मूषिकस्य क्षुद्रोन्दुरोः, अञ्जलिः वृक्षदलसंपुटमित्यर्थः, ("तौ पुटावञ्जलिः पुमान्" इत्यमरः) सुपूरः अनायासेन पूरयितुं शक्यः ; सुसन्तुष्टः सदा हृष्टः, कापुरुषः क्षुद्रप्रकृतिः, स्वल्पकेनापि अल्पेन वस्तुनाऽपि, तुष्यति तुष्टो भवति ॥ २६ ॥

किमिति ।—यः जातु कदाचित्, स्वस्य वंशस्य अग्रे ध्वजो यथा पताकेव, न आरोहति न तिष्ठति, मातुः जनन्याः, यौवनहारिणा यौवनध्वंसिना, तेन तादृशेन जनेन, जातेन उत्पन्नेन, किम् ? न किमपि फलं, भवतीति शेषः ॥ २७ ॥

परिवर्त्तिनीति ।—परिवर्त्तनशीले, संसारे को वा जनः, मृतः सन् न जायते ? अपि तु सर्व एव मृतः पुनर्जायते इत्यर्थः । अत्र जगति, यः श्रिया लक्ष्म्या, अधिकः समुज्ज्वलः सन्, स्मरेत् श्रीमेत, स तु जातः गण्यते लोक्यते, प्रशस्यते इति यावत्, लोकैरिति शेषः ॥ २८ ॥

जातस्येति ।—यत् तृणं, सलिले जले, मज्जनेन आकुलस्य कातरस्य, जनस्य हस्तालम्बनं भवति, नदीतीरे जातस्य तस्य तादृशस्य तृणस्य अपि, जन्मसाफल्यं, ज्ञातव्यमिति शेषः ; सलिलादुत्तरणे सहायीभूतत्वात् इति भावः । आर्या छन्दः ॥ २९ ॥

क्षमितेति ।—लोके जगति, क्षमिताः क्षिराः, धीराः इत्यर्थः, उन्नताश्च सत्काराः आदरस्थानीत्यर्थः, यैर्यां तथोक्ताः, तथा जनानां सन्तापं हरन्ति नाशयन्तीति तथाभूताः, सज्जनाः साधवः, जलदा इव मेघा इव, विरलं यथा तथा जायन्ते ॥ ३० ॥

निरतिशयं गरिमाणं तेन जनन्याः स्मरन्ति विद्वांसः ।
यत्क्षमपि वहति गर्भं महतामपि यो गुरुर्भवति ॥३१॥
अप्रकटीकृतशक्तिः शक्तोऽपि जनस्तिरस्क्रियां लभते ।
निवसन्नन्तर्दारुणि लङ्घ्यो वह्निर्न तु ज्वलितः" ॥३२॥

करटक आह,—"आवां तावदप्रधानौ, तत्किमावयोरनेन व्यापारेण ? उक्तञ्च,—

अपृष्टोऽत्राप्रधानो यो ब्रूते राज्ञः पुरः कुधीः ।
न केवलमसम्मानं लभते च विडम्बनम् ॥३३॥

तथा च,—वक्तव्यं तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलम् ।
स्थायी भवति चात्यन्तं रागः शुक्लपटे यथा" ॥३४॥

दमनक आह,—"मा मा एवं वद,—

अप्रधानः प्रधानः स्यात सेवते यदि पार्थिवम् ।
प्रधानोऽप्यप्रधानः स्याद् यदि सेवाविवर्जितः ॥ ३५॥

निरतिशयमिति ।—यः गर्भः, महतां मान्यानामपि, गुरुर्मान्यतीयः, भवति, यत्, यदि तादृशं क्षमपि अनिर्वचनीयं लोकोत्तरसिद्धं, गर्भं वहति, जननी इति शेषः, तदा तेन विद्वांसः जनन्याः मातुः, निरतिशयं समधिकं, गरिमाणं गौरवं, स्मरन्ति मन्यन्ते । आर्या छन्दः ॥३१॥

अप्रकटीकृतेति ।—शक्तोऽपि समर्थोऽपि, जनः अप्रकटीकृता अप्रकाशिता, शक्तिर्येन तथाभूतः, चेष्टित इति शेषः, तदा तिरस्क्रियां अवमाननां, लभते । अन्तर्दारुणि दारुमध्ये, निवसन् वह्निः लङ्घ्यः अवज्ञेय इति यावत्, भवतीति शेषः, न तु नैव, ज्वलितः ज्वलन् अग्निः, स केनापि न लङ्घ्यते इति भावः । आर्या छन्दः ॥ ३२ ॥

अपृष्ट इति ।—अत्र संसारे, यः अप्रधानः हीनपदस्थः, कुधीः दुर्बुद्धिः नरः, अपृष्टः अजिज्ञासितः सन्, राज्ञः पुरः अग्रतः, ब्रूते कथयति, स केवलम् एकम्, असम्मानम् अनादरं न, अपि तु विडम्बनञ्च ताडनं, तिरस्कारञ्चेत्यर्थः, लभते ॥ ३३ ॥

वक्तव्य इति ।—शुक्लपटे श्वेतवसने, रागो रञ्जनरसः, यथा अत्यन्तं स्थायी भवति, तथा यत्र उक्तं कथितं, वचः फलं लभते, वाक्यरचा भवतीति भावः, तत्र वचः प्रयोक्तव्यं वक्तव्यम् । उपमालङ्कारः ॥ ३४ ॥

अप्रधान इति ।—यदि पार्थिवं राजानं, सेवते तदा अप्रधानोऽपि प्रधानः स्यात्,

यतश्चैवम्,—आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसंस्कृतं वा।
प्रायेण भूमिपतयः प्रमदा लताश्च
यत् पार्श्वतो भवति तत् परिवेष्टयन्ति ॥३६॥

तथा च,—कोपप्रसादवस्तूनि ये विचिन्वन्ति सेवकाः।
आरोहन्ति शनैः पश्चाद्धुन्वन्तमपि पार्थिवम् ॥३७॥
विद्यावतां महेच्छानां शिल्पविक्रमशालिनाम्।
सेवाहत्तिविदाञ्चैव नाश्रयः पार्थिवं विना ॥३८॥
ये जात्यादिमहोत्साहात्तरेन्द्रान्नोपयान्ति च।
तेषामामरणं भिक्षा प्रायश्चित्तं विनिर्मितम् ॥३९॥

राजानुग्रहेणेति भावः। यदि सेवाविधर्ज्ञितः, राज्ञ इति शेषः, तदा प्रधानोऽपि अप्रधानः स्यात्, राज्ञः प्रतिकूल्यादिति भावः ॥ ३५ ॥

आसन्नमिति।—नृपतिः विद्याविहीनम् अकुलीनम् असंस्कृतं वेषभूषादिसंस्कार रहितं वा, आसन्नमेव निकटस्थमेव, मनुष्यं भजते आश्रयति, स्वकार्यसम्पादनार्थमिति भावः। भूमिपतयः राजानः, प्रमदाः लताश्च यत् वस्तु, पार्श्वतः भवति वर्त्तते, प्रायेण तत् परिवेष्टयन्ति आश्रयन्ति। अत्र प्रस्तुतानां भूमिपतीनाम् अप्रस्तुतानां प्रमदानां लतानाञ्च एकपरिवेष्टनक्रियाभिसम्बन्धात् दीपकालङ्कृतिः। तदुक्तं दर्पणे,—"अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते" इति। केचित् तुल्ययोगितामिच्छन्ति। वसन्ततिलकं वृत्तम् ॥ ३६ ॥

कोपेति।—ये सेवकाः कोपप्रसादयोः वस्तूनि विषयान्, विचिन्वन्ति राज्ञः कोपकारणं प्रसादकारणञ्च अन्विष्यन्तीत्यर्थः, ते पश्चात् शनैः क्रमेणेत्यर्थः, धुन्वन्तं विरज्यन्तमपीत्यर्थः, पार्थिवं राजानम्, आरोहन्ति प्राप्नुवन्ति; राज्ञः प्रसादं लभन्ते इति भावः ॥३७॥

विद्यावतामिति।—विद्यावतां शिल्पविक्रमशालिनां शिल्पनिपुणानां विक्रमिणाञ्च, सेवावृत्तिविदां राजसेवाचतुराणां, महेच्छानां महाशयानां, ("महेच्छस्तु महाशयः" इत्यमरः); पार्थिवं विना, आश्रयो गत्यन्तरं, नैव, अस्तीति शेषः; विद्या शिल्पं विक्रमः सेवावृत्तिज्ञत्वञ्च राजाश्रयं प्राप्य एव सफलीभवन्तीति भावः ॥ ३८ ॥

ये इति।—ये जनाः, जात्यादीनां महोत्साहात् महाभिमानात्, जात्यादिभिर्महोन्नतान् वा, नरेन्द्रान् राज्ञः, न उपयान्ति न सेवन्ते इत्यर्थः, तेषाम् आ मरणं मृत्युकालपर्य्यन्तं, भिक्षा याचनमेव, प्रायश्चित्तं विनिर्मितं विहितं, विधातेति शेषः ॥३९॥

ये च प्राहुर्दुरात्मानो दुराराध्या महीभुजः ।
प्रमादालस्यजाड्यानि ख्यापितानि निजानि तैः ॥४०॥
सर्पान् व्याघ्रान् गजान् सिंहान् दृष्ट्वोपायैर्वशीकृतान् ।
राजेति कियती मात्रा धीमतामप्रमादिनाम् ॥४१॥
राजानमेव संश्रित्य विद्वान् याति परां गतिम् ।
विना मलयमन्यत्र चन्दनं न प्ररोहति ॥४२॥
धवलान्यातपत्राणि वाजिनश्च मनोरमाः ।
मदा मत्ताश्च मातङ्गाः प्रसन्ने सति भूपतौ" ॥४३॥

करटक आह,—"अथ भवान् किं कर्त्तुमनाः ?" सोऽब्रवीत्,—"अद्य अस्मत्स्वामी पिङ्गलको भीतो भीतपरिवारश्च वर्त्तते । तत् एनं गत्वा भयकारणं विज्ञाय (म) सन्धिविग्रह-यानासनसंश्रयद्वैधीभावानामेकतमेन संविधास्ये" । करटक

ये इति ।—ये च दुरात्मानः दुर्वृत्ता जनाः, महीभुजः नृपाः, दुराराध्याः दुःसेव्याः, इति प्राहुः वदन्ति, तैः, निजानि स्वानि, प्रमादालस्यजाड्यानि ख्यापितानि प्रकटितानि, क्रियन्ते इति शेषः ; ये हि प्रमादिनः अलसाः जडाश्च तेषामेवेदृगुक्तिरिति भावः ॥४०॥

सर्पानिति ।—उपायैः सर्पान् व्याघ्रान् गजान् सिंहान् वशीकृतान् दृष्ट्वा, स्थितानिति शेषः, अप्रमादिनाम् अवधानवताम्, धीमतां बुद्धिमतां जनानां, राजा इति कियती मात्रा मात्र इत्यर्थः ; अनायासेनैव तादृशैः पुरुषैः राजा वशीकर्तुं शक्यते इति मन्यन्ते इति भावः ॥ ४१ ॥

राजानमिति ।—विद्वान् जनः, राजानमेव संश्रित्य सेवित्वेत्यर्थः, परां मङ्गलीं, गतिम् उन्नतिमित्यर्थः, याति प्राप्नोति । चन्दनं मलयं तदाख्यपर्वतं, विना अन्यत्र न प्ररोहति उद्भवति । अत्र प्राप्तिप्ररोहयोः साधारणधर्मयोः प्रतिबिम्बनात् दृष्टान्तालङ्कारः ; तदुक्तं दर्पणे,—"दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्" इति ॥ ४२ ॥

धवलानीति ।—भूपतौ प्रसन्ने सति धवलानि श्वेतानि, आतपत्राणि छत्राणि, मनोरमा रम्याः, वाजिनः अश्वाः, मदा मत्ताः मदस्राविणः, मातङ्गाः हस्तिनश्च, भुज्यन्ते इति शेषः ; राजानुग्रहे नाना सम्भोगः इति भावः ॥ ४३ ॥

(म) सन्धीति ।—सन्धिः,—विरोधिनोरुभयोः सम्बोधनं, विग्रहः,—युद्धं, यानं—अन्यं प्रति यात्रा, आसनं—समयप्रतीक्षणं, संश्रयः,—बलवताऽभियुक्तस्य

आह,—"कथं वेत्ति भवान् यद्वयाविष्टोऽयं स्वामी ?" सोऽब्रवीत्,—"श्रेयं किमत्र ? येन उक्तञ्च,—

उदीरितोऽर्थः पशुनाऽपि गृह्यते
हयाश्च नागाश्च वहन्ति नोदिताः।
अनुक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः ॥४४॥

तथा च मनुः,—

आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च।
नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः ॥४५॥

तदद्यैनं भयाकुलं प्राप्य स्वबुद्धिप्रभावेण निर्भयं कृत्वा वशीकृत्य च निजां (य) साचिव्यपदवीं समासादयिष्यामि"। करटक

प्रबलाश्रयणं, द्वैधीभावः,—बलिनोर्वैरिणोर्मध्ये आकाशिवदलक्षितंतया स्थितः "इदं राज्यमहञ्च तवैव" इत्युभयत्र वाचा आत्मानं समर्पयन् द्वैधीभावेन दुर्गमध्ये अवस्थानं, अन्तर्भेद वा सन्धिविग्रहादिहेतोर्दुर्गाश्रयव्यापारः इति विविधः; एतेषामुपायानाम् एकतमेन—अन्यतमेन, योऽत्र युज्यते तेनेति भावः; संविधास्ये—संविधानं करिष्यामि।

उदीरित इति।—उदीरितः व्यक्तमुच्चारितः, अर्थः विषयः, पशुनाऽपि गृह्यते बुध्यते, हया अश्वाश्च, नागाः हस्तिनश्च, नोदिताः चालिताः, संज्ञां प्रापिता वा, वहन्ति गच्छन्तीत्यर्थः। पण्डितः प्राज्ञो जनः, अनुक्तम् अकथितमपि अर्थम्, ऊहति तर्केण बुध्यते; हि यतः, बुद्धयः परेङ्गितज्ञानफलाः परेषाम् इङ्गितज्ञानं सङ्केतबोधः, फलं यासां तथाविधाः। सामान्येन विशेषसमर्थनरूपोऽयमर्थान्तरन्यासोऽलङ्कारः। यदुक्तं दर्पणे,—"सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते। साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः॥" इति। वंशस्थविलं वृत्तम् ॥ ४४ ॥

आकारैरिति।—आकारैः अवयवैः, विषादप्रसादभावापन्नैरिति भावः; इङ्गितैः अभिप्रायव्यञ्जकशारीरिकचेष्टाविशेषैः, गत्या गमनेन, चेष्टया क्रियया, भाषणेन वचनेन च, तथा नेत्रयोः लोचनयोः, वक्त्रस्य मुखस्य च, विकारैः विकृतभावैः, अन्तर्गतं मनः मानसो भावः इत्यर्थः, लक्ष्यते प्रतीयते ॥ ४५ ॥

(य) साचिव्यपदवीं—मन्त्रिपदम्। समासादयिष्यामि—लप्स्ये।

आह,—"अनभिज्ञो भवान् सेवाधर्मस्य, तत्कथमेनं वशीकरिष्यसि ?" सोऽब्रवीत्,—"कथमहं सेवानभिज्ञः ? मया हि नातीत्यैव क्रीडता अभ्यागतसाधूनां नीतिशास्त्रं पठतां मुखात् यच्छ्रुतं सेवाधर्मस्य सारभूतं हृदि स्थापितम्। श्रूयतां तदेतम्,—

सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति नरास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥४६॥
सा सेवा या प्रभुहिता यात्मा वाक्यविशेषतः।
आश्रयेत् पार्थिवं विद्वांस्तद्वारेणैव नान्यथा ॥४७॥
यो न वेत्ति गुणान् यस्य न तं सेवेत पण्डितः।
न हि तस्मात् फलं किञ्चित् सुक्षेत्रादूषरादिव ॥४८॥
द्रव्यप्रकृतिहीनोऽपि सेव्यः सेव्यगुणान्वितः।
भवत्याजीवनं तस्मात् फलं कालान्तरादपि ॥४९॥
अपि स्थाणुवदासीनः क्षुधन् परिगतः क्षुधा।
न त्वेवानात्मसम्भावाद् वृत्तिमीहेत पण्डितः ॥५०॥

सुवर्णेति।—शूरः विक्रमी कृतविद्यः, कृतविद्यं, यश्च सेवितुं जानाति स च, एते त्रयो नराः सुवर्णपुष्पितां सञ्जातसुवर्णपुष्पां, पृथ्वीं विचिन्वन्ति सङ्कलयन्ति, लभन्ते इत्यर्थः; सर्वसम्पदधिगच्छन्तीति फलितार्थः ॥ ४६ ॥

सेति।—या प्रभुहिता प्रभोर्हितकारिणी, मनोरञ्जनी इत्यर्थः, सा एव सेवा, सा च वाक्यविशेषतः प्रभोर्वाक्यविशेषात्, यात्मा चतुरया, विद्वान् जनः, तद्वारेणैव प्रभोर्हितकरसेवाद्वारेणैव पार्थिवम् आश्रयेत्, अन्यथा अन्येन प्रकारेण, न ॥ ४७ ॥

य इति।—यः यस्य गुणान् स्वभावानित्यर्थः, न वेत्ति, स पण्डितः, चैदिति शेषः, तम् अविदितस्वभावं प्रभुमिति भावः, न सेवेत नाश्रयेत्। हि यतः, सुक्षेत्रात् उर्वरात् धारभूमेरिव, तस्मात् तादृशप्रभोः, किञ्चित् किमपि, फलं न, भवतीति शेषः ॥ ४८ ॥

द्रव्येति।—सेव्यश्च सेवनीयश्च, ये गुणाः दयादाक्षिण्यादयः, तैरन्वितः युक्तः, प्रभुरिति शेषः, द्रव्यप्रकृतिहीनोऽपि धनजनरहितोऽपि, सेव्यः; यतः कालान्तरादपि कियत्कालं प्राप्येत्यर्थः, तस्मात् प्रभोः, आजीवनं जीवनोपायरूपं, फलं भवति ॥ ४९ ॥

अपीति।—पण्डितः प्राज्ञो जनः, क्षुधा बुभुक्षया, परिगतः आक्रान्तः, क्षुधितः

सेवकः स्वामिनं हेष्टि कृपणं परुषाक्षरम् ।
आत्मानं किं स न हेष्टि सेव्यासेव्यं न वेत्ति यः ॥५१॥
यमाश्रित्य न विश्रामं क्षुधार्त्ता यान्ति सेवकाः ।
सोऽर्कवन्नृपतिस्त्याज्यः सदापुष्पफलोऽपि सन् ॥५२॥
राजमातरि देव्यां च कुमारे मुख्यमन्त्रिणि ।
पुरोहिते प्रतीहारे सदा वर्त्तेत राजवत् ॥५३॥
जीवेति प्रब्रुवन् प्रोक्तः कृत्याकृत्यविचक्षणः ।
करोति निर्विकल्पं यः स भवेद्राजवल्लभः ॥५४॥

इत्यर्थः, अत एव शून्यम् आधाराभावेन शीघ्रं गच्छन्, स्थाणुवत् आस्थापनादिरहितशुष्कतरुवत्, आसीनः उपविशन् अपि, तिष्ठेदिति शेषः; तथाऽपि अनात्मसम्पन्नात् आत्मानात्मविवेकशून्यात्, प्रभोरिति शेषः, वृत्तिं जीविकां, न लेप्सेत् चेष्टेत, खल्वृत्तिमिति शेषः ॥ ५० ॥

सेवक इति।—यः सेवकः भृत्यः, सेव्यासेव्यं न वेत्ति न जानाति, केवलं कृपणं परुषाक्षरं कर्कशभाषिणं, स्वामिनं हेष्टि निन्दति, स किम् आत्मानं न हेष्टि ? [अस्मिन्नर्थे नञ्] अपि तु हेष्ट्येव। सेव्यासेव्यविवेकपूर्वकमेव सेवाप्रवृत्तिरुचिता, तद्विवेकेन सेवाप्रवृत्तौ स्वस्यैव निन्दा उचितेति भावः ॥ ५१ ॥

यमिति।—सेवकाः भृत्याः, यं प्रभुमाश्रित्य क्षुधार्त्ताः सन्तः, अपीति शेषः, विश्रामं न यान्ति न प्राप्नुवन्ति, उदरभरणं विना अविश्रामं प्रभुकार्य्यं कुर्वन्तीत्यर्थः, सः नृपतिः सदापुष्पफलः धनजनसमृद्धोऽपीति भावः, सन्, सदापुष्पफलः अर्कवत् सदाऽस्त्यज्यः ("आकन्द" इति भाषा) इव, त्याज्यः ; यथा अर्कोऽपि सदा पुष्पफलसमन्वितोऽपि लोकैर्नाद्रियते, तथा तादृशः प्रभुः अपि न सेव्यते इति भावः ॥ ५२ ॥

सामान्यं राजपरिजनानामपि सेव्यत्वमाह, राज्ञीति।—राजमातरि, देव्यां राजमहिष्यां, कुमारे राजपुत्रे, मुख्यमन्त्रिणि प्रधानसचिवे, पुरोहिते तथा प्रतीहारे द्वौवारिके, सदा राजवत् वर्त्तेत विशिष्टसम्मानना कुर्य्यात् इत्यर्थः ॥ ५३ ॥

जीवेति।—यः कृत्याकृत्यविचक्षणः कार्य्याकार्य्यज्ञः भृत्यः, प्रोक्तः आप्तैः सन्, जीव आयुष्मान् भव, ("यी हुकुम" इति हिन्दीभाषा) इति प्रब्रुवन् वदन्, निर्विकल्पम् अविचारितं यथा तथा, करोति राज्ञां प्रतिपादयति, स राजवल्लभः राजप्रियः, भवेत् ॥ ५४ ॥

प्रभुप्रसादजं वित्तं सुप्राप्तं यो निवेदयेत् ।
वस्त्राद्यञ्च दधात्यङ्गे स भवेद्राजवल्लभः ॥५५॥
अन्तःपुरचरैः सार्द्धं यो न मन्त्रं समाचरेत् ।
न कलत्रैर्नरेन्द्रस्य स भवेद्राजवल्लभः ॥५६॥
द्यूतं यो यमदूताभं हालां हालाहलोपमाम् ।
पश्येद्दारान् वृथाकारान् स भवेद्राजवल्लभः ॥५७॥
युद्धकालेऽग्रगो यः स्यात् सदा पृष्ठानुगः पुरे ।
प्रभोर्द्वाराश्रितो हर्म्ये स भवेद्राजवल्लभः ॥५८॥
सम्मतोऽहं विभोर्नित्यमिति मत्वा व्यतिक्रमेत् ।
क्लेशेष्वपि न मर्य्यादां स भवेद्राजवल्लभः ॥५९॥

प्रभुप्रसादजमिति ।—यः प्रभोः प्रसादात् जातम् अनुग्रहलब्धमित्यर्थः, वित्तं धनं, सुप्राप्तं यथेष्टं प्राप्तम्, इति निवेदयेत् राजसमीपे प्रकाशयेदित्यर्थः, तथा वस्त्राद्यं वसनाभरणादिकं, प्रभुप्रसादलब्धमिति शेषः, अङ्गे दधाति स राजवल्लभः भवेत् ॥ ५५ ॥

अन्तरिति ।—यः नरेन्द्रस्य नृपस्य, अन्तःपुरचरैः कञ्चुक्यादिपरिजनैः, सार्द्धं मन्त्रं मन्त्रणां, गूढभाषणमित्यर्थः, न समाचरेत् कुर्य्यात्, तथा नरेन्द्रस्य कलत्रैः भार्य्याभिः, सार्द्धं मन्त्रमिति शेषः, न, समाचरेदिति शेषः, स राजवल्लभो भवेत् ॥ ५६ ॥

द्यूतमिति ।—यः द्यूतम् अप्राणिवस्तुभिः क्रीडनम्, ("अप्राणिभिः यत् क्रीडति तल्लोके द्यूतमुच्यते" इति स्मरणात्) यमदूताभं यमनकिङ्करसदृशं, हालां सुरां, ("सुरा हलिप्रिया हाला" इत्यमरः) हालाहलोपमां कालकूटसदृशीं, तथा दारान् राजस्त्रियः, वृथाकारान् कुत्सिताकृतीनित्यर्थः, पश्येत्, ["अकि लिङ् च" (३।३।१७२ पा०) इति लिङ्] द्यूतमद्यादिकासु न प्रसक्तो भवेदित्यर्थः, स राजवल्लभो भवेत् ॥ ५७ ॥

युद्धेति ।—यः युद्धकाले प्रभोरिति सर्वत्र सम्बध्यते, अग्रगः अग्रगामी, पुरे नगरे, सदा पृष्ठानुगः पार्श्वचरः, तथा हर्म्ये राजभवने, द्वाराश्रितः द्वारस्थः, आज्ञाः पालनार्थमिति भावः, स राजवल्लभो भवेत् ॥ ५८ ॥

सम्मत इति ।—अहं विभोः प्रभोः, नित्यं सततं, सम्मतः अभिमतः, प्रिय इति यावत्, इति मत्वा यः क्लेशेष्वपि कष्टेष्वपि, मर्य्यादां स्थितिं, स्वकर्त्तव्यमिति यावत्, न व्यतिक्रमेत् न उल्लङ्घयेत्, स राजवल्लभो भवेत् ॥ ५९ ॥

द्वेषिद्वेषपरो नित्यमिष्टानामिष्टकर्मकृत् ।
यो नरो नरनाथस्य स भवेद्राजवल्लभः ॥ ६० ॥
प्रोक्तः प्रत्युत्तरं नाह विरुद्धं प्रभुणाऽपि यः ।
न समीपे वसत्युच्चैः स भवेद्राजवल्लभः ॥ ६१ ॥
यो रथं अरथं तद्वन्मन्यते भयवर्जितः ।
प्रवासं स्वपुरावासं स भवेद्राजवल्लभः ॥ ६२ ॥
न कुर्य्यान्नरनाथस्य योषिद्भिः सह सङ्गतिम् ।
न निन्दां न विवादञ्च स भवेद्राजवल्लभः ॥ ६३ ॥

करटक आह,—"अथ भवान् तत्र गत्वा किं तावत् प्रथमं वक्ष्यति, तत् तावदुच्यताम्"। दमनक आह,—

"उत्तरादुत्तरं वाक्यं वदतां सम्प्रजायते ।
सुदृष्टिगुणसम्पन्नाद्बीजाद्बीजमिवापरम् ॥ ६४ ॥
अपायसन्दर्शनजां विपत्तिमुपायसन्दर्शनजाञ्च सिद्धिम् ।
मेधाविनो नीतिगुणप्रयुक्तां पुरः स्फुरन्तीमिव वर्णयन्ति ॥ ६५ ॥

देवीति ।—यः नरः नित्यं नरनाथस्य राज्ञः, द्वेषिषु शत्रुषु, द्वेषपरः शत्रुनाशसाधननिरतः, तथा इष्टानां प्रियाणाम्, इष्टकर्मकृत् प्रियकारी, स राजवल्लभो भवेत् ॥६०॥

प्रोक्त इति ।—यः प्रभुणा विरुद्धम् अप्रियमित्यर्थः, प्रोक्तोऽपि प्रत्युत्तरं नाह न ब्रवीति, तथा समीपे उच्चैः न वसति स राजवल्लभो भवेत् ॥ ६१ ॥

य इति ।—यः भयवर्जितः सन् रथं युद्धं, अरथं गृहं, गृहं यथा सुखावस्थितिस्थानं रथश्चेवमपि तथा इति भावः, रक्षितारं वा, एकनाथमयमित्यर्थः, शत्रुदलनेन आत्मरक्षणसाधनत्वादिति भावः, ("अरथं गृहरक्षिणोः" इत्यमरः) तद्वत् तथा, प्रवासं विदेशवासं, स्वपुरावासं स्वगृहावस्थानं, ("नगरे नगरे पुरम्" इत्यमरः) मन्यते स राजवल्लभो भवेत् ॥६२॥

नेति ।—यः नरनाथस्य, योषिद्भिः स्त्रीभिः, सह सङ्गतिं सम्पर्कं न, निन्दां न, विवादञ्च न कुर्य्यात्, स राजवल्लभो भवेत् ॥ ६३ ॥

उत्तरादिति ।—वदतां परस्परमालपतां, कथां कथयतां वा जनानाम्, उत्तरात् उत्तरप्रबन्धात् परं, सुदृष्टिरेव गुणः तेन सम्पन्नात् युक्तात्, बीजात् अपरं बीजमिव उत्तरं वाक्यं सम्प्रजायते ; कथां कथयत एव श्रमेण सदुत्तरं निःसरतीति भावः ॥६४॥

उपायेति ।—मेधाविनो बुद्धिमन्तो जनाः, नीतिगुणप्रयुक्तां नीतेः पुरुषदुर्नय-

एकेषां वाचि शुकवदन्येषां हृदि मूकवत्।
हृदि वाचि तथाऽन्येषां वस्तु वल्गन्ति सूनृताः ॥ ६६ ॥

न च अप्राप्तकालं (र) वक्ष्ये। आकर्णितं मया नीतिसारं पितुः पूर्वम् (ल) उत्सङ्गं हि निषेवता,—

अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन्।
लभते बहुवज्ञानमपमानञ्च पुष्कलम्" ॥ ६७ ॥

करटक आह,—

"दुराराध्या हि राजानः पर्वता इव सर्वदा।
श्वापदाकीर्णाः सुविषमाः कठिना दुष्टसेविताः ॥ ६८ ॥

सूनृतोभयरूपाया इति भावः; गर्वेण प्रभावेण, प्रयुक्तां विहिताम्, अपायसन्दर्शनजां दुर्लक्षणदर्शनानुमितामिति यावत्, विपत्तिम्, उपायसन्दर्शनजां सुलक्षणदर्शनानुमितां, सिद्धिं फलावाप्तिञ्च, वाङ्मात्रप्रयोगस्येति शेषः, पुरः अग्रतः, क्षुरकौलिव प्रकाशमानामिव, तत्त्वज्ञानापत्तौलिवेति भावः; वर्णयन्ति कीर्तयन्ति। उपजातिः इत्तम् ॥ ६५ ॥

एकेषामिति।—सूनृताः सुवचनानि, एकेषां केषाञ्चिज्जनानां, वाचि वाक्ये, शुकवत् शुकपक्षिणामिव, वल्गन्ति प्रकाशन्ते; शुका यथा यदेव शिक्षयन्ति, तदेव कालाकालविचार्यैव वाचा प्रकाशयन्ति, केचन तथेति भावः; अन्येषाम् अपरेषां, मूकवत् वाक्शक्तिरहितानामिव, हृदि चेतसि, ता: वल्गन्ति, न तु वाचीति भावः; मूकास्तु हृद्गतमपि भावं वचसा नैव प्रकाशयितुं क्षमाः, केचित्तथैवेति भावः। तथा अन्येषा वाग्मिनां, कालाकालज्ञानवतामित्यर्थः, वाचि हृदि च, वस्तु शोभनं यथा तथा, वल्गन्ति स्फुरन्ति; प्राप्तकालमेव वाग्मिनः हृद्गतभावं वाचा प्रकाशयन्तीति भावः ॥ ६६ ॥

(र) अप्राप्तकालम्—असामयिकम्, अप्रासङ्गिकमित्यर्थः।

(ल) उत्सङ्गं—क्रोडम्। निषेवता—अधितिष्ठता, निषेवमाणेनेति यावत्।

अप्राप्तेति।—अप्राप्तकालं वचनं ब्रुवन् वदन्, बृहस्पतिरपि बहु अवज्ञानम् अवहेलनं, पुष्कलं प्रभूतम्, अपमानं तिरस्कारञ्च, लभते। देवगुरुरपि चेत् देशकालादिक्षमविचार्य प्राकृतवत् यदृच्छं वदति, तर्हि सोऽपि विडम्बनमाप्नोति, का कथा मादृशानामित्याशयः ॥ ६७ ॥

दुराराध्या इति।—श्वापदैः खलजनैः श्वापदैश्च, ("श्वापदः दुष्टजन्तौ स्यात् नीचवत् खले" इति मेदिनी) आकीर्णाः परिवृताः सङ्कुलाश्च, सुविषमा दारुणाः उन्नतावनताश्च, कठिना निर्दयाः पाषाणप्रकृतित्वात् कठोरस्वभावाश्च, दुष्टैः दुर्जनैः

तथा च,—भोगिनः कञ्चुकाविष्टाः कुटिलाः क्रूरचेष्टिताः ।
सुदुष्टा मन्त्रसाध्याश्च राजानः पन्नगा इव ॥ ६८ ॥
द्विजिह्वाः क्रूरकर्म्माणोऽनिष्ठाश्छिद्रानुसारिणः ।
दूरतोऽपि हि पश्यन्ति राजानो भुजगा इव ॥ ७० ॥
स्वल्पमप्यपकुर्व्वन्ति येऽभीष्टा हि महीपतेः ।
ते वङ्काविव दह्यन्ते पतङ्गाः पापचेतसः ॥ ७१ ॥
दुरारोहं पदं राज्ञां सर्व्वलोकनमस्कृतम् ।
स्वल्पेनाप्यपकारेण ब्राह्मण्यमिव दुष्यति ॥ ७२ ॥

विषधरादिभिश्च, सेविताः भक्षिताः अधिष्ठिताश्च, राजानः पर्वता इव सर्वदा सततं, दुराराध्याः दुःसेव्याः ; द्विजह्वीऽवधारणे । राजसेवा अतिदुष्करेति भावः ॥ ६८ ॥

भोगिनः इति ।—भोगिनः सुखभोगरताः फणवन्तश्च, ("भोगः सुखे स्त्र्यादिफणावतोश्च फणकाययोः" इत्यमरः) कञ्चुकाविष्टाः वर्म्मधारिणः निर्म्मोकवन्तश्च, कुटिलाः कपटिनः वक्रगामिनश्च, क्रूरं निष्ठुरं, चेष्टितं क्रिया येषां तथोक्ताः, सुदुष्टा दोषवन्तः ; उभयत्र समानमेतत् ; राजानः पन्नगाः भुजङ्गा इव, मन्त्रसाध्याः मन्त्रेण सत्परामर्शेन उपायेन वा गारुडादिना च, साध्याः वशीकार्य्याः ॥ ६९ ॥

द्विजिह्वा इति ।—द्विजिह्वा हे जिह्वे येषां तथोक्ताः, खले खले मिथ्यावाच इति भावः ; अन्यत्र,—रसनाद्वयवन्तः ; सर्पाणां द्विजिह्वत्वं प्रसिद्धम् ; क्रूरकर्माणः निष्ठुरव्यापाराः, अनिष्ठाः निष्पत्तिरहिताः ; प्रजाहितसंवेनारब्धं किमपि कार्य्यं निष्पाद्य प्रजा निरुद्वेगाः न कुर्वन्तीति भावः ; अन्यत्र,—अनिष्ठाः अनन्ताः, असङ्ख्या इति यावत्, ("निष्ठानिष्पत्तिनाशान्ताः" इत्यमरः) छिद्रानुसारिणः दोषानुसन्धिनश्च ; अन्यत्र,—बिलानुसारिणः, राजानः भुजगा इव दूरतः दूरात् अपि, पश्यन्ति सर्वमवश्यञ्चारैः, अन्यत्र—दूरप्रसारिदृष्टित्वात् इति भावः ; "चारैः पश्यन्ति राजानः" इति अमरात् । भुजगाश्च तीक्ष्णदृष्टित्वात् दूरप्रसारिदृष्टित्वाच्च दूरादेव सर्वं दृष्ट्वा गर्हन्तीति प्रसिद्धिः ॥७०॥

स्वल्पमिति ।—ये अभीष्टा यत्नं महीपतेः प्रियाः, इति श्लेषेति भावः, महीपतेः स्वल्पमपि अपकुर्वन्ति, ते पापचेतसः वह्नौ पतङ्गा इव दह्यन्ते । [अनंकमरि सट्] ॥७१॥

दुरारोहमिति ।—दुरारोहम् आरोढुमशक्यं, दुष्प्रापमित्यर्थः, अत एव सर्वलोकनमस्कृतं सर्वलोकवन्द्यं, राज्ञां पदं राजत्वं, ब्राह्मण्यमिव ब्रह्मतेजोवत्, स्वल्पेनापि अपकारेण अत्याचारेण, दुष्यति । उपमालङ्कारः ॥ ७२ ॥

दुराराध्याः श्रियो राज्ञां दुरापा दुष्परिग्रहाः ।
तिष्ठन्त्यपि ह्यधारे चिरमात्मनि संस्थिताः" ॥ ७३ ॥

दमनक आह,—"सत्यमेतत् परं, किन्तु,—

यस्य यस्य हि यो भावस्तेन तेन समाचरेत् ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ ७४ ॥
भर्तुश्चिन्ताऽनुवर्त्तित्वं सुहृत्तं चानुजीविनाम् ।
राजसाद्यापि गच्छन्ते नित्यं छन्दानुवर्त्तिभिः ॥ ७५ ॥
सकृषि नृपे स्तुतिवचनं तदभिमते प्रेम तद्विषि द्वेषः ।
तद्दानस्य च शंसा अमन्त्रतन्त्रं वशीकरणम्" ॥ ७६ ॥

करटक आह,—(ब) "यद्येवमभिमतं, तर्हि शिवास्ते

दुराराध्या इति ।—राज्ञां दुराराध्याः दुःसेव्याः, अत एव दुरापाः दुर्लभाः, दुष्परिग्रहाः यद्दीतुमशक्याः, अरक्ष्या इत्यर्थः, श्रियः सम्पदः, आधारे पात्रे, आप्तः जलादीव, आत्मनि स्वस्मिन्, संस्थिताः सावधानं रक्षिताः, यत्नेन स्थापिताः सत्य इत्यर्थः, चिरं तिष्ठन्ति ; स्वल्पेनापि प्रमादेन नश्यन्तीति भावः। उपमाऽलङ्कारः ॥ ७३ ॥

यस्येति ।—यस्य यस्य जनस्य, यो यादृशः, भावः आशयः, तेन तेन, भावेन इति शेषः, [तं तमित्यध्याहार्यं] समाचरेत् व्यवहरेत्, सेवेत वा। मेधावी बुद्धिमान् जनः, अनुप्रविश्य प्रभोराशयं बुद्ध्वा इत्यर्थः, क्षिप्रं शीघ्रम्, आत्मवशं तत्तदभिमताचरणेन तस्य आत्माधीनमिति यावत्, नयेत् प्रापयेत् ॥ ७४ ॥

भर्तुरिति ।—अनुजीविनां भृत्यानां, भर्तुः स्वामिनः, चिन्ताऽनुवर्त्तित्वं चिन्तितानुसारित्वं, [चित्तानुवर्त्तित्वमिति वा पाठः] सुहृत्तं सुहृत्त्वम्, आवश्यकमिति शेषः, यतः नित्यं सततं, छन्दानुवर्त्तिभिः आशयानुसारिभिः जनैः, राजसाद्यापि राजसात्कर्मणि गच्छन्ते वशीक्रियन्ते, का कथा नानुवर्त्तनीयमित्यपेरर्थः ॥ ७५ ॥

सकृषीति ।—नृपे सकृषि कुपिते सति इत्यर्थः, स्तुतिवचनं स्तुत्या कोपशमनमित्यर्थः, तस्य नृपस्य, अभिमते सुहृदि, प्रेम प्रणयः, तस्य नृपस्य, द्विषि अरौ, द्वेषः, तस्य नृपस्य, यत् दानम् अनुजीविभ्यः वितरणं, तस्य शंसा प्रशंसा वयमनुग्रहदानेन प्रसादीकृता इत्यं कीर्त्तनम्, एतत् अमन्त्रतन्त्रं मन्त्रतन्त्ररहितं, वशीकरणं, नृपस्येति शेषः ; तद्वशीकरणे स्तुत्यादय एव हेतव इति भावः। आर्या छन्दः ॥ ७६ ॥

(ब) एवं—राजवशीकरणमित्यर्थः। अभिमतं—प्रियम्। शिवाः,—शुभाः।

पत्वात: सन्तु। यथाऽभिलषितम् अनुष्ठीयताम्"। सोऽपि प्रणम्य पिङ्गलकाभिमुखं प्रतस्थे। अथ आगच्छन्तं दमनकमालोक्य पिङ्गलक: (ग) हा:स्थमब्रवीत्,—"अपसार्यतां वेत्रलता। अयमस्माकं चिरन्तनो मन्त्रिपुत्रो दमनक: (घ) अव्याहतप्रवेश:। तत्प्रवेश्यतां (ङ) द्वितीयमण्डलभाक्" इति। स आह,—"यथा आदीत् भवान्" इति।

अथोपसृत्य दमनको निर्दिष्टे आसने पिङ्गलकं प्रणम्य प्राप्तानुज्ञ उपविष्ट:। (च) स तु तस्य नखकुलिशाक्रान्तं दक्षिणपाणिमुपरि दत्त्वा मानपुर:सरमुवाच,—(छ) "अपि शिवं भवत:? कस्माच्चिरात् दृष्टोऽसि?" दमनक आह,—(क) "न किञ्चित् देवपादानामस्माभि: प्रयोजनम्; (ख) परं भवतां प्राप्तकालं वक्तव्यं, यत उत्तममध्यमाधमै: सर्वैरपि राज्ञां प्रयोजनम्; उक्तञ्च,—

दन्तस्य निष्कोषणकेन नित्यं कर्णस्य कण्डूयनकेन वाऽपि।
क्षणेन कार्यं भवतीश्वराणां किमङ्ग! वाग्घस्तवता नरेण? ॥७७॥

(ग) हा:स्थं—द्वौवारिकम्। अपसार्यतां—अपनीयतां, मा व्यवधीयतामिति भाव:

(घ) अव्याहतप्रवेश:,—अनिवारितगति:, अस्य प्रवेशे निषेधो नास्तीत्यर्थ:।

(ङ) द्वितीयेति।—मन्त्रिण एव प्रथममण्डलमधिकुर्वन्ति, अयन्तु तत्पुत्रतया द्वितीयमण्डलाधिकारीत्यर्थ:। मण्डलम्—अनुजीविनामुपवेशनस्थानभेद इति बोध्यम।

(च) स:,—पिङ्गलक:। तस्य—दमनकस्य। नखेति।—नखा: कुलिशानीव वज्राणीव, तै: अलङ्कृतम्। उपरि, अङ्गस्येति शेष:। मानपुर:सरं—समादरपूर्वकम्।

(छ) अपीति—प्रश्नपूर्वकमव्ययम्। शिवं—कुशलम्। चिरात्—दीर्घकालात्परम्।

(क) न किञ्चिदिति।—यस्मात् देवपादानां प्रयोजनाभावात् चिरात् दर्शनमिति भाव:।

(ख) परं—किन्तु। प्राप्तकालं—कालोचितं, किञ्चिदित्यध्याहार्यम्।

दन्तस्येति।—दन्तस्य निष्कोषणकेन दन्तान्तःप्रविष्टवस्तुनि:सारकेण, ("खड्के" इति यस्य प्रसिद्धिः) दन्तघर्षकेण वा, वा अथवा, कर्णस्य कण्डूयनकेन कण्डूयनकारिणा, क्षणेनापि ("कानखुज्जी" इति प्रसिद्धेनेति यावत्) नित्य सततम्, ईश्वराणां प्रभूणां, कार्यं प्रयोजनं, भवति। अङ्गेति सम्बोधनपूर्वकमव्ययं, भो:! मूर्ख!, वाग्घस्तवता

तथा वयं देवपादानाम् (ग) अन्वयागताः भृत्या आपत्स्वपि पृष्ठगामिनो वयम्। स्वमधिकारं न लभामहे, तथाऽपि देवपादानाम् (घ) एतत् युक्तं न भवति। उक्तञ्च,—

स्थानेष्वेव नियोज्यन्ते भृत्याश्चाभरणानि च।
न हि चूडामणिः पादे प्रभवामीति बध्यते ॥ ७८ ॥

यतः,—अनभिज्ञो गुणानां यो न भृत्यैरनुगम्यते।
धनाढ्योऽपि कुलीनोऽपि क्रमायातोऽपि भूपतिः ॥७९॥

उक्तञ्च,—असमैः समीयमानः समैश्च परिहीयमाणसत्कारः।
धुरि यो न युज्यमानस्तिभिरर्थपतिं त्यजति भृत्यः ॥८०॥

वचनकरविशिष्टेन, नरेण मनुष्येण, किम्? यदा तृणेनापि प्रभूणां प्रयोजनसिद्धिः दृश्यते तदा चेतनेन नरेण तत्सिद्धिविषये किं वक्तव्यम्? तस्मादत्यर्थं प्रयोजनमवश्यं स्वीकार्यमिति भावः। अत्र कार्यकारणतया कथितात् तृणरूपात् वस्तुनः, द्रव्यत्वरूपसामान्यधर्मेण तत्सदृशस्य नरस्य निषेधश्रुतेः परिसङ्ख्यालङ्कारः। उपजातिः वृत्तम् ॥७७॥

(ग) अन्वयागताः,—कुलक्रमागताः। स्वमधिकार—निजानात्यपदम्।

(घ) एतत्—सर्वथा निराकरणमिति भावः।

स्थानेष्विति।—भृत्याश्च आभरणानि च स्थानेषु, योग्येष्विति शेषः, एव नियोज्यन्ते सन्निवेश्यन्ते, प्रभवामि प्रभुरहमिति, मत्वेति शेषः। [अत्र प्रभावान् इति पाठः समीचीनतया प्रतिभाति। उज्ज्वलकारैः इति हेतोरित्यर्थः] चूडामणिः शिरोरत्नं, माननीयो जनयेति ध्वनिः, पादे चरणे, न हि बध्यते धार्यते, केनापीति शेषः। यदि चाहं स्वाधिकारं न लभे, तथाऽपि सर्वथा मत्परित्यागो नोचित इति भावः। अत्र प्रस्तुतस्य भृत्यस्य अप्रस्तुतस्य आभरणस्य एकनियोजनक्रियाऽभिसम्बन्धात् दीपकालङ्कारः, अपि च भृत्यानां गण्यचूडामणिसाम्यानां योग्यस्थाननियोगरूपैकस्यैव धर्मस्य "न बध्यते" इति अयोग्यस्थानबन्धनाभावरूपत्वेन पृथक्कृतया निर्देशात् वैधर्म्येण प्रतिवस्तूपमालङ्कारः, तयोश्च परस्परसापेक्षतया अवस्थानात् सङ्करः ॥ ७८ ॥

अनभिज्ञ इति।—यः भूपतिः, धनाढ्योऽपि कुलीनोऽपि क्रमायातः कौलिकोऽपि सन्, गुणानाम् अनभिज्ञः अगुणज्ञ इत्यर्थः, स भृत्यैः न अनुगम्यते न सेव्यते; अगुणत्वाद्धिक्त्वात् तत्सेवनमकिञ्चित्करमिति भावः ॥ ७९ ॥

असमैरिति।—यः भृत्यः, असमैः अतुल्यैः, भृत्यैरिति भावः; समीयमानः समी-

यश्च अविवेकितया राजा भृत्यानुत्तमपदयोग्यान् हीनाधमस्थाने नियोजयति, न (ङ) ते तत्रैव तिष्ठन्ति ? तत् भूपतेर्दोषः, न तेषाम्। उक्तञ्च,—

कनकभूषणसङ्कटणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते।
न स विरौति न चापि स शोभते भवति योजयितुर्वचनीयता॥८१॥

यच्च स्वामी एवं वदति "चिरात् दृश्यते" तदपि श्रूयताम्;—

सव्यदक्षिणयोर्यत्र विशेषो नास्ति हस्तयोः।
कस्तत्र क्षणमप्यार्य्यो विद्यमानगतिर्वसेत् ? ॥ ८२ ॥
काचे मणिर्मणौ काचो येषां बुद्धिर्विकल्पते।
न तेषां सन्निधौ भृत्यो नाममात्रोऽपि तिष्ठति ॥ ८३ ॥

क्रियमाणः, समैः तुल्यगुणविशिष्टैश्च, भृत्यैरिति शेषः, परिक्षीयमाणः निराक्रियमाणः, सत्कारः समादरः यस्य तादृशः, तथा धुरि कार्य्यभारे, न युज्यमानः, स विभिः, एतैः दोषैरिति शेषः, अधःपतिं प्रभुं, त्यजति। आर्य्या वृत्तम् ॥ ८० ॥

(ङ) ते—हीनाधमस्थाननियोजिता भृत्या इत्यर्थः, तत्रैव—प्रभुनिर्दिष्टे स्थाने इत्यर्थः, न तिष्ठन्ति ? किमिति शेषः, अपि तु तिष्ठन्त्येव, परं तत् भूपतेः प्रभोरेव, दोषः।

कनकेति।—कनकभूषणे सुवर्णालङ्कारे, यत् सङ्कटणं सङ्कटनं, संयोजनमित्यर्थः, तत्र उचितः योग्यः, मणिः रत्नं, यदि त्रपुणि निकृष्टधातुविशेषे, "सीसके" इति यावत्, प्रतिबध्यते संयुज्यते, तदा स मणिः, न विरौति न शब्दायते, नापि स शोभते च, किन्तु योजयितुः योग्यायोग्यविचाराक्षमस्य योजकस्य, तथाकर्तुरित्यर्थः, वचनीयता निन्दा, भवति। द्रुतविलम्बितं वृत्तम् ॥ ८१ ॥

सव्येति।—यत्र यस्मिन् देशे, सव्यदक्षिणयोः वामदक्षिणयोः, हस्तयोः विशेषः भेदः, नास्ति, तत्र तस्मिन् देशे, कः आर्य्यः साधुः, विद्यमानगतिः उपायवान् सन्, [गतिरिति पाठे—सुबोधः इति वा] क्षणमपि वसेत् ? न कोऽपि इत्यर्थः। निरुपायैः अवश्यं वक्तव्यमेवेति ध्वनिः ॥ ८२ ॥

काचे इति।—येषां काचे मणिः, मणौ काचः इत्येवं-प्रकारा बुद्धिः विकल्पते विकल्पं कल्पते, परिवर्त्तते वा, उत्कर्षापकर्षज्ञानं येषां नास्तीति भावः; तेषां सन्निधौ नाममात्रोऽपि केवलं भृत्य इति नाम्ना परिचितः कोऽपि भृत्यः न तिष्ठति; योग्यायोग्यभृत्यस्य का कथा ? तादृशप्रभुसन्निधौ कोऽपि न तिष्ठतीति फलितार्थः ॥ ८३ ॥

परीक्षका यत्र न सन्ति देशे नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं विभिर्वराटैर्विपणन्ति गोपाः ॥८४॥

लोहिताख्यस्य च मणेः पद्मरागस्य चान्तरम् ।
यत्र नास्ति कथं तत्र क्रियते रत्नविक्रयः ? ॥ ८५ ॥

निर्विशेषं यदा स्वामी समं भृत्येषु वर्त्तते ।
तत्रोद्यमसमर्थानामुत्साहः परिहीयते ॥ ८६ ॥

न विना पार्थिवो भृत्यैर्न भृत्याः पार्थिवं विना ।
तेषाञ्च व्यवहारोऽयं परस्परनिबन्धनः ॥ ८७ ॥

भृत्यैर्विना स्वयं राजा लोकानुग्रहकारिभिः ।
मयूखैरिव दीप्तांशुस्तेजस्व्यपि न शोभते ॥ ८८ ॥

अरैः सन्धार्यते नाभिर्नाभौ चाराः प्रतिष्ठिताः ।
स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्त्तते ॥ ८९ ॥

परीक्षका इति ।—यत्र देशे परीक्षकाः सदसद्विचारकाः, न सन्ति, तत्र समुद्रजानि महामूल्यानीति भावः, रत्नानि, न अर्घन्ति न मूल्यमर्हन्तीत्यर्थः । किलेति वार्त्तायां, श्रूयते इत्यर्थः, आभीरदेशे गोपजनपदे, गोपाः विभिः वराटैः कार्षापणैः, चन्द्रकान्तं मणिं, विपणन्ति क्रीणन्ति विक्रीणते च । उपजातिः वृत्तम् ॥८४॥

लोहिताख्यस्येति ।—यत्र देशे, लोहिताख्यस्य लोहितवर्णगोमेदनाम्नः, पद्मरागस्य च मणेः अन्तरं प्रभेदः, नास्ति, तत्र कथं रत्नविक्रयः क्रियते ? ॥ ८५ ॥

निर्विशेषमिति ।—यदा स्वामी भृत्येषु, सर्वेष्विति शेषः, समं युगपत्, एकस्मिन्नेव समये इत्यर्थः, निर्विशेषं वर्त्तते अधमे धमे च तुल्यम् आचरति इत्यर्थः ; तत्र तादृशप्रभोरधिकारे, उद्यमसमर्थानाम् उत्साहिनां, कार्यक्षमाणामित्यर्थः, भृत्यानामिति शेषः, उत्साहः परिहीयते नश्यति । [कर्मकर्तरि लट्] ॥ ८६ ॥

नेति ।—पार्थिवः राजा, भृत्यैः विना न, तिष्ठेदिति शेषः, भृत्याश्च पार्थिवं विना न, तिष्ठेयुरिति शेषः ; अतः तेषां प्रभुभृत्यानाम्, अयम् दृष्टः, व्यवहारः आचरणं, स्वामिभृत्यधोरन्योन्यापेक्षिता इत्यर्थः, परस्परनिबन्धनः अन्योन्यकार्यसाधको भवतीत्यर्थः ॥ ८७ ॥

भृत्यैरिति ।—राजा स्वयं तेजस्वी अपि लोकानुग्रहकारिभिः जगद्धितैः, राज्यहितैश्च, मयूखैः दीप्तांशुरिव सूर्य इव, भृत्यैः विना न शोभते । उपमालङ्कारः ॥८८॥

अरैरिति ।—अरैः चक्रस्य काष्ठाद्यैः, अवयवविशेषैः, नाभिः चक्रमध्यवर्ती अव-

शिरसा विधृता नित्यं स्नेहेन परिपालिताः।
केशा अपि विरज्यन्ते निस्नेहाः किं न सेवकाः? ॥९०॥
राजा तुष्टो हि भृत्यानामर्थमात्रं प्रयच्छति।
ते तु सम्मानमात्रेण प्राणैरप्युपकुर्वते ॥ ९१ ॥
एवं ज्ञात्वा नरेन्द्रेण भृत्याः कार्या विचक्षणाः।
कुलीनाः शौर्यसंयुक्ताः शूराः भक्ताः क्रमागताः ॥ ९२ ॥
यः कृत्वा सुकृतं राज्ञो दुष्करं हितमुत्तमम्।
लज्जया वक्ति नो किञ्चित्तेन राजा सहायवान् ॥ ९३ ॥
यस्मिन् कृत्यं समावेश्य निर्विशङ्केन चेतसा।

वर्धविशेषः, सन्धार्यते भार्यीयते, अराश्च नाभौ प्रतिष्ठिताः ग्रथिताः, तिष्ठन्तीति शेषः, अराः नाभिम् अवलम्बन्ते, नाभिश्च अरानाश्रयति इत्यर्थः। एवं स्वामिसेवकार्थाः प्रभुभृत्यथोः, इतिचक्रं व्यापाररूपं चक्रं, प्रवर्तते, स्वामी भृत्यानवलम्बते, भृत्याश्च स्वामिनमाश्रयन्ति इत्यर्थः; भृत्याः प्रभुं विना, प्रभवश्च भृत्यं विना मुहूर्तमपि न स्थातुमर्हन्तीति भावः॥ ८९ ॥

शिरसेति।—नित्यं शिरसा मस्तकेन, विधृताः, तथा स्नेहेन तैलेन, परिपालिताः परिपोषिताः, केशा अपि निस्नेहाः तैलवर्जिताः, अयत्नीकृतसंस्कारादित्यर्थः, विरज्यन्ते विवर्णतां भजन्ते; सेवकाः भृत्याः, किं न? तथाभूताः प्रभुस्नेहशून्याश्चेत् किं न विरज्यन्ते? इत्यर्थः, अपि तु विरज्यन्ते एव इति भावः। स्नेहानुप्राणितं दीपकम् ॥९०॥

राजेति।—राजा तुष्टः सन् भृत्यानाम्, अर्थमात्रं केवलं धनं, प्रयच्छति ददाति, ते तु भृत्याः पुनः, सम्मानमात्रेण राजकृतसत्कारेणैव, प्राणैः जीवनत्यागेन अपि, उपकुर्वते प्रभोः उपकारं कुर्वन्ति, हि निश्चये ॥ ९१ ॥

एवमिति।—नरेन्द्रेण एवम् उक्तरूपं प्रभुभृत्यव्यवहारं, ज्ञात्वा विधार्य, विचक्षणाः ज्ञानिनः, कुलीनाः सदंशजाः, शौर्यसंयुक्ताः शूराः, भक्ताः सर्वकर्मनिपुणाः, भक्ताः अनुरक्ताः, क्रमागताः कुलक्रमायाताः, भृत्याः कार्याः विधेयाः, नियोज्या इत्यर्थः॥९२॥

य इति।—यः राज्ञः दुष्करम् अन्यदुःसाध्यम्, उत्तमं हितं महाकल्याणकरं, सुकृतं शोभनकार्यं, कृत्वा लज्जया आत्मश्लाघाभङ्गया इति भावः; किञ्चित् किमपि, नो वक्ति नवैतत् कृतमिति नो वदति, तेन भृत्येन, राजा सहायवान् भवति ॥ ९३ ॥

यस्मिन्निति।—यस्मिन् भृत्ये, कृत्यं कार्यभारं, समावेश्य समर्प्य, निर्विशङ्केन मनसा-

आत्मते सेवकः स स्यात्कलत्रमिव चापरः ॥ ९४ ॥
योऽनाकृतः समभ्येति द्वारि तिष्ठति सर्वदा ।
पृष्टः सत्यं मितं ब्रूते स भृत्योऽर्हो महीभुजाम् ॥९५॥
अनादिष्टोऽपि भूपस्य दृष्ट्वा हानिकरञ्च यः ।
यतेत तस्य नाशाय स भृत्योऽर्हो महीभुजाम् ॥९६॥
ताड़ितोऽपि दुरुक्तोऽपि दष्टितोऽपि महीभुजा ।
यो न चिन्तयते पापं स भृत्योऽर्हो महीभुजाम् ॥९७॥
न गर्वं कुरुते माने नापमाने च तप्यते ।
स्वाकारं रचयेद्यस्तु स भृत्योऽर्हो महीभुजाम् ॥९८॥
न क्षुधा पीड्यते यस्तु निद्रया न कदाचन ।
न च शीतातपाद्यैश्च स भृत्योऽर्हो महीभुजाम् ॥९९॥

शून्येन, चेतसा आत्मते श्लीयते, राज्ञेति शेषः ; स एव सेवकः स्यात्, अपरः अन्यः, सेवकः इति शेषः, कलत्रमिव भार्येव, केवलं पोष्य इति भावः ॥ ९४ ॥

य इति ।—यः अनाकृतः अनाकारितः सन्, समभ्येति समीपे उपतिष्ठते इत्यर्थः, सर्वदा द्वारि तिष्ठति, तथा पृष्टः जिज्ञासितः सन्, सत्यम् ऋतं, मितं परिमितञ्च, ब्रूते, स भृत्यः महीभुजां राज्ञाम्, अर्हः योग्यः ॥ ९५ ॥

अनादिष्ट इति ।—यः अनादिष्टोऽपि अनाज्ञप्तोऽपि, भूपस्य राज्ञः, हानिकरम् अनिष्टकरं, विषयमिति शेषः, दृष्ट्वा तस्य हानिकरस्य व्यापारस्य, नाशाय यतेत चेष्टेत, स भृत्यः महीभुजाम् अर्हः योग्यः ॥ ९६ ॥

ताड़ित इति ।—यः महीभुजा, ताड़ितोऽपि प्रहृतोऽपि, दुरुक्तोऽपि दुर्वाक्येनोक्तोऽपि, दष्टितोऽपि क्षतदण्डोऽपि, पापम् अनिष्टं, महीभुजः इति शेषः, न चिन्तयते, स भृत्यः महीभुजाम् अर्हः योग्यः ॥ ९७ ॥

नेति ।—यस्तु माने सम्मानलाभे, गर्वं न कुरुते, अपमाने तिरस्कारे च, न तप्यते सन्तप्तः भवति, इत्थं स्वाकारं स्वस्य आकारं, मानापमानयोर्भावनिमित्तमर्थः, रचयेत् गोपायितुं शक्नुयात्, स भृत्यः महीभुजाम् अर्हः योग्यः ॥ ९८ ॥

नेति ।—यस्तु कदाचन क्षुधा बुभुक्षया, न, निद्रया च न, शीतातपाद्यैश्च न पीड्यते न क्लिश्यते, क्षुधानिद्राशीतातपादिजनितं खेदमनवगच्छन् नित्यं प्रभुकार्ये खिन्नादयति इत्यर्थः, स भृत्यः महीभुजाम् अर्हः योग्यः ॥ ९९ ॥

श्रुत्वा साङ्ग्रामिकीं वार्त्तां भविष्यां स्वामिनं प्रति।
प्रसन्नास्यो भवेद्यस्तु स भृत्योऽर्हो महीभुजाम् ॥१००॥
सीमा हर्षिं समायाति शुक्लपक्ष इवोडुराट्।
नियोगसंस्थिते यस्मिन् स भृत्योऽर्हो महीभुजाम् ॥१०१॥
सीमा सङ्कोचमायाति वक्रो चर्म इवाहितम्।
स्थिते यस्मिन् स तु त्याज्यो भृत्यो राज्यं समीहता ॥१०२॥

तथा शृगालोऽयमिति मन्यमानेन समीपरि स्वामिना यदि अवज्ञा क्रियते, तदपि अयुक्तम्। उक्तञ्च यतः,—

कौशेयं कृमिजं सुवर्णमुपलात् दूर्वाऽपि गोरोमतः
पङ्कात् तामरसं शशाङ्क उदधेरिन्दीवरं गोमयात्।
काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना
प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना? ॥१०३॥

श्रुत्वेति।—यस्तु भविष्यां भाविनीं, साङ्ग्रामिकीं वार्त्तां युद्धवृत्तान्तमित्यर्थः, श्रुत्वा स्वामिनं प्रति प्रसन्नास्यः प्रसन्नमुखः, योद्धुमुत्साहवानिति यावत्; भवेत्, युद्धे विपत्तिशङ्कया न विरक्तिं प्रकाशयेदिति भावः; स भृत्यः महीभुजाम् अर्हः योग्यः॥ १०० ॥

सीमेति।—यस्मिन् भृत्ये, नियोगसंस्थिते कर्म कुर्वति सतीत्यर्थः, शुक्लपक्षे उडुराडिव—उडूनां तारकाणां, ("तारकाऽऽडुडु वा स्त्रियाम्" इत्यमरः) राजा स इव चन्द्र इव इत्यर्थः, सीमा मर्यादा, अधिकारः वा, प्रमोदरिति शेषः; हर्षिं विस्फूर्तिं पूर्णतां च, समायाति प्राप्नोति, स भृत्यः महीभुजाम् अर्हः योग्यः॥ १०१ ॥

सीमेति।—यस्मिन् स्थिते तु कर्म कुर्वतीति भावः, वक्रो आहितं निक्षिप्तं, चर्म इव सीमा अधिकारः, सङ्कोचं ह्रासतामित्यर्थः, आयाति गच्छति, राज्यं समीहता (समीहमानेनेति साधु) राज्यवृद्धिकामिनेत्यर्थः, राज्ञेति शेषः, स भृत्यः त्याज्यः॥१०२॥

कौशेयमिति।—कौशेयं पट्टवस्त्रं, कृमिजं कीटविशेषोत्पादितमित्यर्थः, ("कौशेयं कृमिकोशोत्थम्" इत्यमरः) सुवर्णम् उपलात् पाषाणात्, पर्वतखनेरित्यर्थः, दूर्वाऽपि गोरोमतः गवां रोमण इत्यर्थः, प्रसिद्धिरियमिति बोध्यम्; तामरसं कमलं, पङ्कात्, शशाङ्कचन्द्रः, उदधेः समुद्रात्, इन्दीवरं नीलोत्पलं, गोमयात्, अग्निः काष्ठात्, अहिरपि सर्पः, फणात्, रोचना गोरोचना, गोपित्ततः

मूषिका गृहजातापि हन्तव्या स्वापकारिणी ।
भक्ष्यप्रदानैर्मार्जारो हितकृत् प्रार्थ्यते जनैः ॥१०४॥
एरण्डभिण्डार्कनलैः प्रभूतैरपि सञ्चितैः ।
दारुकृत्यं यथा नास्ति तथैवाल्पैः प्रयोजनम् ॥१०५॥
किं भक्षेणासमर्थेन ? किं भक्षेणापकारिणा ? ।
भक्षं भक्षं च मां राजन् ! नावज्ञातुं त्वमर्हसि" ॥१०६॥

पिङ्गलक आह,—"भवतु एवं तावत् । असमर्थः समर्थो वा चिरन्तनः त्वम् अस्माकं मन्त्रिपुत्रः, तदिदम्बं ब्रूहि यत् किञ्चिदत्रकामः" । दमनक आह,—"देव ! विज्ञाप्यं किञ्चिदस्ति" । पिङ्गलक आह,—"तद्विवेदय अभिप्रेतम्" । सोऽब्रवीत्,—

यथा पित्रात्, सर्वत्र जायते इति शेषः, तथा हि गृध्रिनः गृध्रवहस्तनीत्यर्थः, स्वगृध्रोदयेन स्वगृध्राणामुदयेन चाविचारितेत्यर्थः, प्राकाश्यं ख्यातिं, गच्छन्ति, जन्मना उत्पत्त्या, किम् ? यद्येते केवलं स्वगृध्रेन, न तु उत्पत्तितः उत्कर्षं लभमानाः, तथा सर्वः एव स्वगृध्रेन, न तु वंशगृध्रेन औत्कर्ष्यं लभते इति भावः । आर्दूलविक्रीडितं वृत्तं,—"सूर्याश्वैर्यदि मः सजौ सततगाः आर्दूलविक्रीडितम्" इति लक्षणात् ॥ १०३ ॥

मूषिकेति ।—मूषिका उन्दुरः, गृहजातापि स्वस्य गृहिण इत्यर्थः, अपकारिणी अनिष्टविधायिनी, अत एव हन्तव्या विनाश्या । हितकृत् मूषिकहननात् श्रेयोविधायकः, मार्जारः बिडालः, जनैः गृहिभिः, भक्ष्यप्रदानैः खाद्यद्रव्याणां दानैः, प्रार्थ्यते याच्यते इत्यर्थः ; गृहजाता अपि दुश्चरित्राः परिहर्तव्याः, हितैषिणस्तु सर्वथा परिपालनीयाः, नावाक्योपपरिचारणा इति भावः ॥ १०४ ॥

एरण्डेति ।—सञ्चितैः सङ्गृहीतैः, प्रभूतैः बहुभिरपि, एरण्डभिण्डार्कनलैः एरण्डः भिण्डः अर्कः नलः एते असारवृक्षभेदाः वै:, दारुकृत्यं काष्ठकार्यं, यथा नास्ति न भवति, तथैव अल्पैः मूढैः, बहुभिरपि इति भावः, प्रयोजनं, नास्ति इति शेषः ॥१०५॥

किमिति ।—असमर्थेन अक्षमेण, कार्यासाधनक्षमेण इत्यर्थः, अक्षं च भक्षेन अन्नदानेन, हत्येनेति शेषः, किम् ? भक्षेन कार्यक्षमेण, किन्तु अपकारिणा प्रतीपरक्षितानुष्ठानपरेण, हत्येनेति शेषः, किम् ? नाशेनात्मा प्रयोजनमित्यर्थः ; हे राजन् ! त्वं भक्षम् अन्नदानं, भक्षं कार्यक्षमञ्च, मां प्रजावर्गं न अर्हसि ॥ १०६ ॥

"अपि खल्पतरं कार्यं यद्ब्रवेत् पृथिवीपतेः ।
तत्र वाच्यं सभामध्ये प्रोवाचेदं बृहत्स्फुटिः ॥ १०७ ॥
तत् (क) ऐकान्तिके महिन्नाप्यमाकर्ण्यतु देवपादाः ।
यतः,—षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णः स्थिरो भवेत् ।
तस्मात् सर्वप्रयत्नेन षट्कर्णं वर्ज्जयेत् सुधीः" ॥ १०८ ॥

अथ (ख) पिङ्गलकाभिप्रायज्ञा व्याघ्रद्वीपिदकपुरःसराः सर्वेऽपि तद्वचः समाकर्ण्य संसदि तत्क्षणादेव दूरीभूताः । ततश्च दमनक आह,—"उट्टकयट्टणार्थं प्रहृत्तस्य स्वामिनः किमिह निहत्यावस्थानम् ?" पिङ्गलक आह (ग) सविलक्षस्मितं,—"न किञ्चिदपि" । सः अब्रवीत्,—"देव ! यदि (घ) अनाख्येयं, तत्तिष्ठतु । उक्तञ्च,—

दारेषु किञ्चित् स्वजनेषु किञ्चित् गोप्यं वयस्येषु सुतेषु किञ्चित् ।
युक्तं न वा युक्तमिदं विचिन्त्य वदेद्विपश्चिन्नहतोऽनुरोधात् ॥ १०९ ॥

अपीति ।—पृथिवीपतेः यत् कार्यं खल्पतरमपि अतिसामान्यमपीत्यर्थः, किं पुनर्महत् इति भावः, भवेत्, तत् सभामध्ये न वाच्यम्, इदं बृहत्स्फुटिः प्रोवाच ॥ १०७ ॥

(क) ऐकान्तिके—विजने ।

षट्किति ।—षट्कर्णः,—षड्भिः कर्णैः श्रूयमाणः इत्यर्थः, तृतीयगामी इति यावत्, मन्त्रः कर्त्तव्यावधारणाय गोपनीयः, ("वेदमेदे गुप्तिवादे मन्त्रः" इत्यमरः) भिद्यते स्वयमेव प्रकाश्यते इत्यर्थः, चतुष्कर्णः चतुर्भिः कर्णैः श्रूयमाणः, द्वाभ्यां इत्यर्थः, मन्त्रः स्थिरः दृढः, भवेत् ; तस्मात् सुधीः बुद्धिमान् नरः, सर्वप्रयत्नेन षट्कर्णं वर्ज्जयेत् त्यजेत् ; षट्कर्णगते मन्त्रे कार्यसिद्धिर्दुर्लभेति भावः ॥ १०८ ॥

(ख) पिङ्गलकस्य—सिंहस्य, आशयज्ञाः,—भावविदः, राज्ञाभिप्रायं विदित्वेति भावः । व्याघ्रेति ।—व्याघ्रः,—उट्टदाढारुदाढाः श्वापदविशेषः, द्वीपी—चित्रकः, दकः,—क्षुद्रव्याघ्रविशेषः, ते पुरःसराः,—अग्रगा येषां तथोक्ताः । संसदि—सभायाम् ।

(ग) सविलक्षस्मितं—सलज्जं समन्दहासञ्च ।

(घ) अनाख्येयम्—अवाच्यं, गोप्यमिति यावत् । तत्—तदा ।

दारेष्विति ।—दारेषु स्त्रीषु, किञ्चित् किमपि वस्तु, गोप्यम् अप्रकाश्यमित्यर्थः, "शरीरार्द्धं स्मृता भार्या" इति वचनात् आत्मनाऽभिन्नत्वे सत्यपि सर्वं वस्तु दारेषु न

तच्छ्रुत्वा पिङ्गलकश्चिन्तयामास,—"योग्योऽयं दृश्यते। तत् कथयामि एतस्य अग्रे आत्मनोऽभिप्रायम्। उक्तञ्च,—

सुहृदि निरन्तरचित्ते गुणवति भृत्येऽनुवर्त्तिनि कलत्रे।
स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखी भवति ॥ ११० ॥

भो दमनक! शृणोषि शब्दं दूरात् महान्तम्?" सोऽब्रवीत्,—"स्वामिन्! शृणोमि, ततः किम्?" पिङ्गलक आह,—"भद्र! अहमस्मात् वनात् गन्तुमिच्छामि"। दमनक आह,—"कस्मात्?" पिङ्गलक आह,—"यतोऽद्य अस्माभिः किमपि अपूर्वं (ङ) सत्त्वं प्रविष्टं, यस्य अयं महाशब्दः श्रूयते, तस्य च शब्दानुरूपेण पराक्रमेण भाव्यम्" इति। दमनक आह,—"यत् शब्दमात्रादपि भयमुपगतः स्वामी, तदपि अयुक्तम्। उक्तञ्च,—अश्मसा भिद्यते सेतुस्तथा मन्त्रोऽप्यरक्षितः।
पैशुन्याद्भिद्यते स्नेहो भिद्यते वाग्भिरातुरः ॥ १११ ॥

प्रकाश्यमिति भावः; स्वजनेषु आत्मीयेषु, किञ्चित् गोप्यं, न हि सर्वं स्वजनेषु प्रकाश्यमीयमिति भावः; बयस्येषु तुल्यवयस्केषु बन्धुषु, सुतेषु पुत्रेषु च, किञ्चित, गोप्यं वस्तु वक्तीति शेषः, तत् तेषु न वक्तव्यमिति भावः; किन्तु विपश्चित् विद्वान् जनः, इदं युक्तं प्रकाश्यार्हं, वा न युक्तम् इति विचिन्त्य महतः अनुरोधात् महाकार्य्यापेक्षया, वदेत् प्रकाशयेत्; यदि युक्तं स्यात्, तदा गोप्यमपि वदेत्, अन्यथा नेति भावः। उपजातिः वृत्तम् ॥ १०९ ॥

सुहृदीति।—निरन्तरचित्ते अभिन्नचेतसि, सुहृदि मित्रे, गुणवति भृत्ये, अनुवर्त्तिनि भर्तृरते, कलत्रे भार्य्यायां, तथा सौहृदयुक्ते अनुरागिणि इत्यर्थः, स्वामिनि दुःखं निवेद्य सुखी भवति, लोक इति शेषः। आर्य्या वृत्तम् ॥ ११० ॥

(ङ) सत्त्वं—प्राणिविशेषः। शब्देति।—यादृशः शब्दः तादृशः पराक्रम इत्यर्थः।

अश्मसेति।—सेतुः आलिः, अश्मप्रतिरोधी सुदृढः इत्यर्थः, अश्मसा अश्मना, अतिप्रबलेन इति भावः, तथा अरक्षितः गोपनार्थमकृतप्रयत्नः इत्यर्थः, मन्त्रः अपि भिद्यते स्वयमेव विनश्यति। स्नेहः पैशुन्यात् कर्णेजपत्वसंयोगात्, भिद्यते स्वयमेव नश्यति, स्नेहेषु स्नेही न तिष्ठतीत्यर्थः, आतुरः भयार्त्त इत्यर्थः, वाग्भिः वचोभिः, शब्दैरित्यर्थः, भिद्यते क्लेदं प्राप्नोति, स्नेहं आतुरः कैश्चरो, तत्तथा शब्दश्रवणादेव विभेतीति भावः ॥ १११ ॥

तत्र युक्तं स्वामिनः पूर्व्वोपार्ज्जितं धनं त्यक्तुं, यतः (च) भेरी-वेणुवीणामृदङ्गतानपटहशङ्खकाहलादिभेदेन शब्दा अनेकविधा भवन्ति ; तत् न केवलात् शब्दमात्रादपि भेतव्यम् ।

उक्तञ्च,—अत्युत्कटे च रौद्रे च शत्रौ प्राप्ते न क्षीयते ।
धैर्य्यं यस्य महीनाथो न स याति पराभवम् ॥ ११२ ॥
दर्शितभयेऽपि धातरि धैर्य्यध्वंसो भवेन्न धीराणाम् ।
शोषितसरसि निदाघे नितरामेवोद्धतः सिन्धुः ॥ ११३ ॥

तथा च,—विपदि न यस्य विषादः सम्पदि हर्षो रणे न भीरुत्वम् ।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ॥११४॥

तथा च,—शक्तिवैकल्यनस्य निःसारत्वान्नघोषमः ।

(च) भेरीति ।—भेर्य्यादयः,—वाद्यविशेषाः, तेषां भेदेन—आकारादिगत-तारतम्येन, शब्दाः,—ध्वनयः, अनेकविधाः,—बहुप्रकाराः ।

अत्युत्कटे इति ।—अत्युत्कटे अतिदारुणे च, रौद्रे युद्धे च, घोरदर्शने इत्यर्थः, शत्रौ प्राप्ते आगते सति, यस्य धैर्य्यं न क्षीयते न नश्यते [कर्त्तरीकर्मणि क्त] स महीनाथः राजा, पराभवं न याति न प्राप्नोति इत्यर्थः ॥ ११२ ॥

दर्शितेति ।—धातरि विधातरि, दैवे इति भावः, दर्शितभयेऽपि भयं दर्शित-वत्यपि, प्रतिकूलीभूतेति भावः, धीराणां मनीषिणां, सत्त्वाधिक्यानामित्यर्थः, धैर्य्यध्वंसो न भवेत्, एतेन अल्पसत्त्वानान्तु ध्वंसो भवेदित्यायातम् ; तथा हि, शोषितसरसि जलानि शोषितवति, ("सरो नीरतडागयोः" इति मेदिनी) निदाघे ग्रीष्मे, [नि+दह+घञ्] सिन्धुः सागरः, प्रचण्डातपेन शोषणात् स्वल्पजल इति भावः, नितराम् अतिमात्रम्, उद्धतः चञ्चलः, तरङ्गसङ्कुल इत्यर्थः, भवतीति शेषः ; यथा शोषे स्वल्पजलः एव सागरः अतिमात्रं तरङ्गचञ्चलो भवति, वर्षासु परिपूर्णः सागरस्तु न तथा, एवम् अल्पसत्त्व एव भयकारणात् चञ्चलो भवति, न तु महासत्त्वः कृतोऽपीति भावः । पूर्व्वार्द्धे विशेषोक्तिः, समुदये च अर्थान्तरन्यासः । आर्य्या छन्दः ॥११३॥

विपदीति ।—यस्य जनस्य, विपदि विपत्काले, विषादः दुःखं, न, सम्पदि सम्पत्ति-लाभकाले च, हर्षः प्रीतिः, न, तथा रणे भीरुत्वं भयशीलता, न, स्वादिति शेषः ; जननी माता, भुवनत्रयतिलकं तं तादृशमित्यर्थः, सुतं पुत्रं, विरलम् अल्पं, जनयति प्रसूते ; तादृशी जनीऽतिदुर्लभ इति भावः । आर्य्या छन्दः ॥ ११४ ॥

शक्तीति ।—शक्तिवैकल्येन सामर्थ्याभावेन, नखस्य विनतस्य अवनतस्य च,

जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥ ११५ ॥

अपि च,—अन्यप्रतापमासाद्य यो दृढत्वं न गच्छति ।

जतुजाभरणस्येव रूपेणापि हि तस्य किम् ? ॥ ११६ ॥

तदेवं ज्ञात्वा स्वामिना (ङ) धैर्यावष्टम्भः कार्यः । न शब्दमात्रात् भेतव्यम् । उक्तञ्च,—

"पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा ।
अनुप्रविश्य विज्ञातं यावच्चर्म च दारु च" ॥११७॥

पिङ्गलक आह,—"कथमेतत् ?" सोऽब्रवीत्,—

कथा २ ।

"कस्मिंचित् गोमायुर्नाम मृगालः (च) क्षुत्क्षामकण्ठः इतस्ततः परिभ्रमन् वने सैन्यद्वयसङ्ग्रामभूमिम् अपश्यत् ; तस्याञ्च दुन्दुभेः पतितस्य वायुवशात् वल्लीशाखाग्रैः हन्यमानस्य शब्दम्

निःसारत्वात् दुर्बलत्वात् शिरांसरहितत्वाच्च, ("सारो बले शिरांशे च" इत्यमरः) खधीयसः गौरवहीनस्य गौरवस्य च इत्यर्थः, मानहीनस्य जन्मिनः देहिनः, तृणस्य च, गतिः दशा, समा तुल्या ; यथा नम्रत्वादियुतं तृणं लोकैः पदा विदल्यते, तथा ताद्दशो मानवोऽपि लोकैः पराभूयते, अतः मानः न त्याज्य इति भावः। श्लेषानुप्राणितदीपकालङ्कारः। मल्लिनाथमतेन तु श्लेषानुप्राणिता अनेकार्थदीपिका उपमा ॥ ११५ ॥

अन्येति।—यो हि अन्यस्य प्रतापं तेजः, आसाद्य, अपरतेजसा आक्रान्त इति भावः, दृढत्वं दार्ढ्यं, स्थैर्यमिति यावत ; न गच्छति न प्राप्नोति, जतुजाभरणस्येव लाक्षानिर्मितालङ्कारस्येव, तस्य रूपेण सौन्दर्येणापि हि, किम् ? नैव किमपि प्रयोजनमित्यर्थः ; वीरः पुमान् परधर्षणेनापि न सहसा पराभूयते, अपि तु यथार्थात्मा स्वपराक्रमनाविष्करोतीति भावः। जतुजाभरणस्येवेति सादृश्यसङ्गावादुपमालङ्कारः ॥११६॥

(ङ) धैर्यावष्टम्भः,—धैर्यस्य अवष्टम्भः रोधनं, धैर्यापरित्याग इत्यर्थः ।

पूर्वमिति।—एतत् मेदसा वसया, पूर्णम् इति मया पूर्वं ज्ञातम् अनुमितं, ततः अनुप्रविश्य एव विज्ञातं विशेषेण ज्ञातं, दृष्टमित्यर्थः, यावत् सावयवेन, सर्वांशेनेत्यर्थः, चर्म च, दारु च। "यावत्तावच्च सावयवे" इत्यमरः ॥ ११७ ॥

(च) क्षुत्क्षामकण्ठः,—क्षुधया क्षामकण्ठः। तस्याः—सङ्ग्रामभूमेः। दुन्दुभेः,—रणवाद्यविशेषस्य। वल्लीशाखाग्रैः,—लताप्रतानाग्रैः, हन्यमानस्य—ताड्यमानस्य।

अमृणोत्। अथ (भ) क्षुभितहृदयश्चिन्तयामास,—'अहो! विनष्टोऽस्मि !! तदयावत् न अस्य प्रोच्चारितशब्दस्य दृष्टिगोचरे गच्छामि, तावत् अन्यतो व्रजामि। अथवा नैतत् युज्यते सहसैव पिङ्गपैतामहं वनं त्यक्तुम्। उक्तञ्च,—

भये वा यदि वा हर्षे सम्प्राप्ते यो विमर्शयेत्।
कृत्यं न कुरुते वेगान्न स सन्तापमाप्नुयात् ॥ ११८ ॥

तत् तावत् जानामि कस्य अयं शब्दः' इति धैर्यमालम्ब्य विमर्शयन् यावत् मन्दं मन्दं गच्छति, तावत् दुन्दुभिम् अपश्यत्; स च तं परिज्ञाय समीपं गत्वा स्वयमेव कौतुकात् अताड़यत्, भूयश्च हर्षात् अचिन्तयत्,—'अहो! चिरादेतत् अस्माकं महत् भोजनम् (अ) आपतितम्; तत् नूनं प्रभूतमांसमेदोऽस्थिभिः परिपूरितं भविष्यति'। ततः (ट) परुषचर्मावगुण्ठितं तत् कथमपि विदार्य एकदेशे छिद्रं कृत्वा संहृष्टमना मध्ये प्रविष्टः; परं चर्मविदारणतो (ठ) दंष्ट्राभङ्गः समजनि। अथ (ड) निराशीभूतः तत् दारुशेषमवलोक्य श्लोकमेनमपठत्,—'पूर्वमेव मया ज्ञातम्' इति। ततो न शब्दमात्रात् भेतव्यम्"।

(भ) क्षुभितहृदयः,—भीतचित्तः। पिङ्गपैतामहं—पिङ्गपितामहस्येदं आगतम् [इदम्, उत्तरपदवृद्धिश्च] पिङ्गपितामहक्रमेण भक्षयितमित्यर्थः।

भये इति।—यः जनः, भये वा भयहेतौ वा इत्यर्थः, यदि वा अथवा, हर्षे हर्षकारणे इत्यर्थः, सम्प्राप्ते उपस्थिते सति, विमर्शयेत् विवेचयेत्, वेगात् सहसा इत्यर्थः, कृत्यं कार्यं, न कुरुते, सः सन्तापं न आप्नुयात्; विमृश्य कर्तव्यमिति भावः ॥११८॥

(अ) आपतितम्—उपस्थितम्। नूनं—निश्चितम्। प्रभूतेति।—प्रभूतैः,—प्रचुरैः, मांसैः,—विग्रितैः, मेदोभिः,—वसाभिः, अस्थिभिः,—रक्तैश्च इत्यर्थः।

(ट) परुषेति।—परुषेण—कर्कशेन, चर्मणा अवगुण्ठितम्—आच्छादितम्।' संहृष्टमनाः,—सन्तुष्टचित्तः।

(ठ) दंष्ट्राभङ्गः,—दन्तभङ्गः।

(ड) निराशीभूतः,—नास्ति आशा आशीर्वादः यस्य सः। दारुशेषं—काष्ठमात्रावशिष्टम्।

पिङ्गलक आह,—"भोः! पश्य, भयं मम सर्वोऽपि (ढ) परिजनो भयव्याकुलितमनाः पलायितुमिच्छति, तत् कथमहं धैर्यावष्टम्भं करोमि?" सोऽब्रवीत्,—"स्वामिन्! नैषामेष दोषः, यतः स्वामिसदृशा एव भवन्ति भृत्याः। उक्तञ्च,—

अम्बः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च।
पुरुषविशेषं प्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥ ११९ ॥

तत् (ण) पौरुषावष्टम्भं कृत्वा त्वं तावत् अत्र एव प्रतिपालय, यावत् अहम् एतत् शब्दस्वरूपं ज्ञात्वा आगच्छामि, ततः पश्चात् यथोचितं कार्यम्" इति। पिङ्गलक आह,—"किं तत्र भवान् गन्तुम् उत्सहते?" स आह,—"किं (त) स्वाम्यादेशात् सङ्कल्पस्य कृत्याकृत्यमस्ति?

उक्तञ्च,—स्वाम्यादेशात् सुभृत्यस्य न भीः सञ्जायते क्वचित्।
प्रविशेत् मुखमार्हेयं दुस्तरं वा महार्णवम् ॥ १२० ॥

(ढ) परिजनः,—पारजनः, सहचरः इत्यर्थः, ("पारयङ्" परिजने" इति मेदिनी)। भयव्याकुलितमनाः,—भयेन—शब्दश्रवणजनितत्रासेन, व्याकुलितं—विचलितं, मनः,—चित्तं यस्य सः।

अम्ब इति।—अम्बः वाक्, शस्त्रम् अस्त्रं, शास्त्रं मन्त्रादिप्रणीतः, ग्रन्थनिचयः, वीणा वल्लकी, वाणी वचनं, नरः पुरुषः, नारी स्त्री च, एते सर्वे [पुंस्त्वेन विवक्षिताः] पुरुषविशेषं प्राप्ताः सन्तः, अयोग्याः योग्याश्च भवन्ति, प्रभुणा यथा एते व्यवह्रियन्ते, तथैव अधार्यपुरुषाधिकृताः, अयोग्याः, योग्याधिकृताश्च योग्या भवन्ति इति भावः ॥११९॥

(ण) पौरुषावष्टम्भम्—पराक्रमावलम्बनम्। प्रतिपालय—अपेक्षस्व।

(त) स्वाम्यादेशात्—स्वामिनः आदेशात्। कृत्याकृत्यं—कर्त्तव्याकर्त्तव्यम्; सङ्कल्पानां कृत्याकृत्यविचारो न कार्यः, प्रभोरादेशमात्रेणैव तदाज्ञा पालनीयेति भावः।

स्वाम्यादेशादिति।—स्वामिन आदेशात् आदेशं प्राप्य क्षितस्येत्यर्थः, [ल्यब्लोपे पञ्चमी] सुभृत्यस्य सुसेवकस्य, क्वचित् कुत्रापि, [अपिरत्र अध्याहार्यः] भीः भयं, न सञ्जायते, यः आदेयम् अदिसम्बन्धं, मुखं सर्पमुखमित्यर्थः, दुस्तरं दुस्तरं, महार्णवं समुद्रं वा, प्रविशेत् गच्छेदित्यर्थः, अनायासेनेति भावः ॥ १२० ॥

तथा च,—स्वाम्यादिष्टस्तु यो भृत्यः समं विषममेव च ।
मन्यते न स सन्धार्य्यो भूभुजा भूतिमिच्छता" ॥ १२१ ॥

पिङ्गलक आह,—"भद्र ! यदि एवं, तत् गच्छ, शिवास्ते पन्थानः सन्तु" इति । दमनकोऽपि तं प्रणम्य सञ्जीवकशब्दानुसारी प्रतस्थे । अथ दमनके गते भयव्याकुलमनाः पिङ्गलकः चिन्तयामास,—"अहो ! न शोभनं कृतं मया, यत् तस्य विश्वासं गत्वा आत्माभिप्रायो निवेदितः । कदाचित् दमनकोऽयम् (थ) उभयवेतनो भूत्वा ममोपरि दुष्टबुद्धिः स्यात् भ्रष्टाधिकारत्वात् । उक्तञ्च,—ये भवन्ति महीपस्य सम्मानितविमानिताः ।

यतन्ते तस्य नाशाय कुलीना अपि सर्व्वदा ॥ १२२ ॥

तत् तावदस्य (द) चिकीर्षितं वेत्तमन्यत् स्थानान्तरं गत्वा प्रतिपालयामि ; कदाचित् दमनकः (ध) तमादाय मां व्यापादयितुमिच्छति । उक्तञ्च,—

न बध्यन्ते ह्यविश्वस्ता बलिभिर्दुर्बला अपि ।

स्वाम्यादिष्ट इति ।—यः भृत्यः, स्वामिना आदिष्टः आज्ञप्तः सन्, समं सुकरं कार्य्यं, विषममेव दुष्करं कार्य्यमेव च, मन्यते विचारयति, भूतिं सम्पदम्, इच्छता अभिलषता, भूभुजा, स भृत्यः, न सन्धार्य्यः न रक्षणीयः ; अपि तु दूरीकर्त्तव्य इति भावः ॥१२१॥

(थ) उभयवेतनः,—यः स्वामिनः अन्यस्य वेतनं गृह्णाति स उभयवेतनः, "घुस्खोर" इति वङ्गभाषा । दुष्टबुद्धिः,—दुर्म्मतिपरः । भ्रष्टाधिकारत्वात्—च्युतामात्यपदत्वात् ; पूर्वं मया अयममात्याधिकारात् निरस्त इति प्राग्वैरानुस्मरणादिति भावः ।

ये इति ।—महीपस्य ये भृत्याः, सम्मानितविमानिताः पूर्वं सम्मानिताः आदृताः, पश्चात् विमानिताः अवज्ञाताः, भवन्ति, ते कुलीना अपि सत्कुलजाता अपि, तस्य महीपस्य, नाशाय सर्व्वदा यतन्ते चेष्टन्ते ॥ १२२ ॥

(द) चिकीर्षितं—कर्त्तुमिष्टम् । वेत्तुं—ज्ञातुम् । [वेत्तुमिति ग्रामादिकम् ; वेदितुमिति साधु] । प्रतिपालयामि—प्रतीक्षे इत्यर्थः ; अथ्यामननमिति भावः ।

(ध) तं—मामपि प्रबलं पूर्वश्रुतत्वात् सत्त्वमित्यर्थः । व्यापादयितुं—हन्तुम् ।

नेति ।—दुर्बलाः औषधत्राणाः अपि, जना इति शेषः, अविश्वस्ताः अकृतविश्वासाः,

विश्वस्तास्त्वेव बध्यन्ते बलवन्तोऽपि दुर्बलैः ॥ १२३ ॥
बृहस्पतेरपि प्राज्ञो न विश्वासे व्रजेन्नरः ।
य इच्छेदात्मनो वृद्धिमायुष्यञ्च सुखानि च ॥ १२४ ॥
अपथैः सन्धितस्यापि न विश्वासे व्रजेद्रिपोः ।
राज्यलाभोद्यतो ह्यत्रः शक्रेण अपथैर्हतः ॥ १२५ ॥
न विश्वासं विना अत्रौ देवानामपि सिध्यति ।
विश्वासात् त्रिदशेन्द्रेण दितेर्गर्भो विदारितः" ॥ १२६ ॥

चेदिति शेषः, तदा बलिभिः बलवद्भिः, न बध्यन्ते न हन्यन्ते । तु पुनः, विश्वस्ताः एव विश्वासं कुर्वन्त एव, बलवन्तः अपि दुर्बलैः बध्यन्ते ॥१२३॥

बृहस्पतेरिति ।—यः प्राज्ञः नरः आत्मनः वृद्धिसन्नतिम्, आयुष्यञ्च जीवनञ्च, सुखानि च इच्छेत्, स बृहस्पतेरपि विश्वासे विश्वासजनकवचसि इत्यर्थः, न व्रजेत् न गच्छेत्, बृहस्पतिमपि विश्वासं न कुर्यादित्यर्थः ; आत्मवृद्धिजीवनसुखाभिलाषिभिः अन्यापि वचसि न विश्वसितव्यमिति भावः ॥१२४॥

अपथैरिति ।—अपथैः दिव्यैः, सन्धितस्यापि कृतसन्धानस्यापि, उत्पादितविश्वासस्यापीत्यर्थः, रिपोः अरेः, विश्वासे न व्रजेत् तद्वचसि विश्वासं न कुर्यादित्यर्थः ; तथा हि,—राज्यस्य त्रिभुवनैश्वर्यस्य, लाभे उद्यतः, ह्यत्रः तदाख्योऽसुरः, शक्रेण इन्द्रेण, अपथैर्हतः अपथेन विश्वास्य विनाशित इत्यर्थः ॥१२५॥

नेति ।—अत्रौ रिपौ, विश्वासं प्रत्ययं, विना विश्वासजनकैरित्यर्थः, देवानां त्रिदशानामपि, का कथाऽन्येषामिति भावः ; कार्यमित्यूह्यं, न सिध्यति न निष्पद्यते ; देवा अपि विश्वास्यैव अवन् परानतवन्त इति भावः ; तथा हि,—त्रिदशेन्द्रेण देवेन्द्रेण, विश्वासात् विश्वासमुत्पाद्य, दितिं परिचर्येति भावः ; दितेः कश्यपपत्न्याः, विमातुरिति यावत्, गर्भः कुक्षिस्थः पुत्रः, खलिनाशार्थमाहित इति भावः ; विदारितः खण्डितः । पुरा देत्यराजनिधनजातशोका दैत्यमाता इन्द्रजयिनं पुत्रं जातयमाना स्वामिनं कश्यपं परिचचार । कश्यपस्तु तद्भक्त्या नितरां वशंवदतां सान्त्वयन् तस्यां महाबीर्यं सुतमुत्पाद्य सावधानया भवितव्यमिति तामुक्त्वा तपश्चर्यायामगमत् । देवराजस्तु तत् विदित्वा छिद्रान्वेषणपरः तां विमातरं परिचरन्, एकदा दिवा निद्रायां तां बीभत्सं तदीय छलनाश्रित्य तत्कुक्षौ प्रविष्टस्तं गर्भमेकोनपञ्चाशता खण्डैः विदारयामास । अनीषदौर्बल्यात् स गर्भः खण्डितोऽपि एकोनपञ्चाशद्वायुरूपेण प्रभूतः देवराजमेवान्वगच्छदिति पौराणिकी गाथा ॥१२६॥

एवं सम्भाष्य स्थानान्तरं गत्वा दमनकमार्गमवलोकयन् एकाकी तस्थौ। दमनकोऽपि सञ्जीवकमकाशं गत्वा वृषभोऽयमिति परिज्ञाय हृष्टमना व्यचिन्तयत्,—"अहो! शोभनमापतितम् अनेन, एतस्य सन्धिविग्रहद्वारेण मम पिङ्गलको वश्यो भविष्यति इति। उक्तञ्च,—

न कौलीन्यान्न सौहार्दात् नृपो वाक्ये प्रवर्त्तते।
मन्त्रिणां यावदभ्येति व्यसनं शोकमेव न ॥१२७॥
सदैवापद्गतो राजा भोग्यो भवति मन्त्रिणाम्।
अत एव हि वाञ्छन्ति मन्त्रिणः सापदं नृपम् ॥१२८॥
यथा नेच्छति नीरोगः कदाचित् सुचिकित्सकम्।
तथाऽऽपद्रहितो राजा सचिवं नाभिवाञ्छति" ॥१२९॥

एवं विचिन्तयन् पिङ्गलकाभिमुखः प्रतस्थे। पिङ्गलकोऽपि तमायान्तं प्रेक्ष्य स्वाकारं रचयन् यथापूर्वमवस्थितः। दमनकोऽपि पिङ्गलकसकाशं गत्वा प्रणम्य उपविष्टः। पिङ्गलक आह,—"किं दृष्टं भवता तत् सत्त्वम्?" दमनक आह,—दृष्टं स्वामिप्रसादात्"। पिङ्गलक आह,—"अपि सत्यम्?" दमनक आह,—"किं स्वामिपादानामग्रेऽसत्यं विज्ञाप्यते? उक्तञ्च,—

नेति।—नृपः राजा, यावत् व्यसनं विपदं, तथा शोकम् दृष्टनाशदुःखं च, नैव अभ्येति प्राप्नोति, तावत् कौलीन्यात् सत्कुलजातत्वात् न, तथा सौहार्दात् सख्यादपि न, मन्त्रिणां वाक्ये प्रवर्त्तते प्रवृत्तिमान् भवति, न अधीनो भवतीत्यर्थः ॥१२७॥

सदेवेति।—आपन्नतः विपन्नात्, राजा नृपतिः, सदैव मन्त्रिणां भोग्य उपभोगार्हः, भवति, अधीनतां प्राप्नोतीत्यर्थः, अत एव एतस्मात् कारणादेव, मन्त्रिणः नृपं सापदम् आपद्युक्तमेव, द्रष्टुमिति शेषः, वाञ्छन्ति हि ॥१२८॥

यथेति।—नीरोगः रोगरहितो जनः, यथा यदाचित् कस्मिन्नपि काले, सुचिकित्सकं प्रशस्तवैद्यं न इच्छति न आद्रियते इत्यर्थः, तथा आपद्रहितो राजा सचिवं मन्त्रिणं, न अभिवाञ्छति प्रयोजनाभावात् न आद्रियते इत्यर्थः ॥ १२९ ॥

अपि स्वल्पमसत्यं यः पुरो वदति भूभुजाम् ।
देवानाञ्च विनश्येत स द्रुतं सुमहानपि ॥१३०॥

तथा च,—सर्वदेवमयो राजा मनुना सम्प्रकीर्त्तितः ।
तस्मात्तं देववत् पश्येन्न व्यलीकेन कर्हिचित् ॥१३१॥
सर्वदेवमयस्यापि विशेषो नृपतेरयम् ।
शुभाशुभफलं सद्यो नृपात् दैवात् भवान्तरे" ॥१३२॥

पिङ्गलक आह,—"सत्यं दृष्टं भविष्यति भवता। न (न) दीनोपरि महान्तः कुप्यन्ति, इति न त्वं तेन निपातितः ; यतः,—

दृषानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
स्वभाव एवोन्नतचेतसामयं
महान् महत्स्वेव करोति विक्रमम् ॥१३३॥

अपीति ।—यः जनः भूभुजां राज्ञां, दैवानाञ्च पुरः अग्रतः, स्वल्पं लोकमपि, असत्यं मिथ्या, वदति, सः सुमहान् लोकपूज्योऽपि, द्रुतं क्षिप्रं, विनश्येत । [अत आत्मनेपदं चिन्त्यम्] ॥१३०॥

सर्वेति ।—राजा सर्वदेवमयः निखिलामरस्वरूपः, इति मनुना सम्प्रकीर्त्तितः कथितः ; तस्मात् कारणात्, तं राजानं, देववत् देवमिव, पश्येत्, कर्हिचित् कदाचन, व्यलीकेन वैपरीत्येन, अन्यथाभावेन इत्यर्थः, मनुष्यबुद्ध्या इति भावः; न पश्येत् ॥१३१॥

सर्वेति ।—सर्वदेवमयस्य "अष्टानां लोकपालानां वपुर्धारयते नृपः" इति शास्त्रात् देवस्वरूपस्यापि, नृपतेः अयं वक्ष्यमाणः, विशेषः प्रभेदः, दैवादिति शेषः, नृपात् सद्यः तत्क्षणमेव, प्रसादाप्रसादवशे एव इत्यर्थः, शुभाशुभफलं, भवतीति शेषः, दैवात् भवान्तरे अन्यस्मिन् जन्मनि, शुभाशुभफलमित्यनुषङ्गः ; राजा सद्य एव लोकान् दण्डयति अनुगृह्णाति वा, देवता तु परत्र शुभाशुभकर्मणां फलं विदधातीति राजदेवयोर्विशेष इति भावः ॥१३२॥

(न) दीनेति ।—दीनानां—दुःखितानां, दुर्बलानामित्यर्थः, उपरि महान्तः,—महासत्त्वाः, जनाः इति शेषः । तेन—सत्त्वेन ।

दृषानीति ।—प्रभञ्जनः महावायुः, दृषानि न उन्मूलयति न उत्पाटयति, यतः मृदूनि कोमलानि वस्तूनि, सर्वतः सर्वथा, नीचैः अतिप्रयत्नेन ततस्तथा इत्यर्थः, प्रणतानि

अपि च—गण्डस्थलेषु मदवारिषु बद्धरागै-
मत्तभ्रमद्भ्रमरपादतलाहतोऽपि।
कोपं न गच्छति नितान्तबलोऽपि नाग-
स्तुल्ये बले तु बलवान् परिकोपमेति" ॥१३४॥

दमनक आह,—"अस्तु (प) एवं स महात्मा, वयं क्षुद्राः; तथापि स्वामी यदि कथयति, ततो भृत्यत्वे नियोजयामि"। पिङ्गलक आह (फ) सोच्छ्वासं,—"किं भवान् शक्नोत्येवं कर्त्तुम्?" दमनक आह,—"किमसाध्यं बुद्धेरस्ति?। उक्तञ्च,—

न तच्छस्त्रैर्न नागेन्द्रैर्न हयैर्न पदातिभिः।
कार्य्यं संसिद्धिमभ्येति यथा बुद्ध्या प्रसाधितम्" ॥१३५॥

पिङ्गलक आह,—"यदि एवं, तर्हि (ब) अमात्यपदे अध्यारोपितस्त्वम्। अद्य प्रभृति (भ) प्रसादनिग्रहादिकं त्वयैव

नितरां प्रह्वाणि, भवन्तीति शेषः; अतस्तेषामुत्पाटनं न उचितमिति भावः। उन्नतचेतसां महात्मनाम्, अयमेव स्वभावः, यत महान् जनः, महत्सु एव जनेषु, विक्रमं करोति; न दुर्बलेष्विति भावः। अर्थान्तरन्यासोऽलङ्कारः। वंशस्थवृत्तं छन्दः ॥१३३॥

गण्डस्थलेष्विति।—नितान्तबलोऽपि अतिबलोऽपि, नागः गजः, गण्डस्थलेषु कपोलदेशेषु स्थितेषु, मदवारिषु मदजलेषु, बद्धरागैः जातानुरागैः, मदवारिपानासक्तैरित्यर्थः, अत एव मत्तैः श्रमन्तिः भ्रमरैः पादतलाहतोऽपि चरणतलताडितोऽपि, कोपं न गच्छति न कुप्यति; तथा हि,—बलवान् जनः, तुल्ये बले तु समानबलवति जने एव, परिकोपम् एति प्राप्नोति। अर्थान्तरन्यासः। वसन्ततिलकं छन्दः ॥ १३४ ॥

(प) एवं—बलवानित्यर्थः। सः,—सत्त्वः। क्षुद्राः,—दीनाः, दुर्बला इत्यर्थः।

(फ) सोच्छ्वासं—सनिश्वासं साश्वासं वा, किञ्चिदाश्वस्तः सन्नित्यर्थः।

नेति।—बुद्ध्या प्रसाधितं निष्पादितं, कार्य्यं यथा संसिद्धिम् अभ्येति आगच्छति, तथा तत् कार्य्यं, शस्त्रैः न, नागेन्द्रैः गजेन्द्रैः, न, हयैः अश्वैः, न, पदातिभिः पादचारिभिः सैन्यैः, न, संसिद्धिम् अभ्येति इति अन्वयः; अनुरक्तबलापेक्षयापि बुद्धेरुत्कर्षं इति भावः ॥ १३५ ॥

(ब) अमात्यपदे—मन्त्रिपदे, त्वम् अध्यारोपितः,—अधिष्ठापितः, नयेति शेषः।

(भ) प्रसादनिग्रहादिकं—पुरस्कारदण्डादिकम्, अनुशीलना प्रजानासेति शेषः।

कार्यम् इति निश्चयः"। अथ दमनकः सत्वरं गत्वा (म) साक्षेपं तम् इदमाह,—"एह्येहि दुष्टवृषभ! स्वामी पिङ्गलकः त्वाम् (य) आकारयति। किं निःशङ्को भूत्वा मुहुर्मुहुर्नर्दसि वृथा?" इति। तच्छ्रुत्वा सञ्जीवकोऽब्रवीत्,—"भद्र! कोऽयं पिङ्गलकः?" दमनक आह,—"किं स्वामिनं पिङ्गलकमपि न जानासि? तत् क्षणं प्रतिपालय, फलेनैव ज्ञास्यसि। ननु अयं सर्वमृगपरिवृतो वटतले स्वामी पिङ्गलकनामा सिंहस्तिष्ठति"। तच्छ्रुत्वा (र) गतायुषमिवात्मानं मन्यमानः सञ्जीवकः परं विषादमगमत्, आह च,—(ल) "भद्र! भवान् साधुसमाचारो वचनपटुश्च दृश्यते। तत् यदि मामवश्यं तत्र नयसि, तदभयप्रदानेन स्वामिनः सकाशात् प्रसादः कारयितव्यः"। दमनक आह,—"भोः! सत्यमभिहितं भवता, नीतिरेषा। यतः,—

पर्य्यन्तो लभ्यते भूमेः समुद्रस्य गिरेरपि।
न कथञ्चिन्महीपस्य चित्तान्तः केनचित् क्वचित् ॥१२६॥

तत् त्वमत्रैव तिष्ठ, यावदहं तं (व) समये दृष्ट्वा ततः पश्चात् त्वामानयामि" इति; तथा अनुष्ठिते दमनकः पिङ्गलकसकाशं गत्वा इदमाह,—"स्वामिन्! न तत् प्राकृतं सत्त्वं, स हि भगवतो महेश्वरस्य वाहनभूतो वृषभ इति मया

(म) साक्षेपं—क्षतिरस्कारम्।

(य) आकारयति—आह्वयति, ("क्षतिराकारणाह्वानम्" इत्यमरः)।

(र) गतायुषमिव—मृतमिव।

(ल) भद्र!—साधो। साधुसमाचारः,—सदाचारसम्पन्नः। वचनपटुः,—वाग्मी।

पर्य्यन्त इति।—भूमेः पृथिव्याः, समुद्रस्य, गिरेः पर्वतस्यापि, पर्य्यन्तः प्रैषसीमा, लभ्यते प्राप्यते, जनैरिति शेषः; किन्तु केनचित् जनेन, क्वचित् कुत्रापि, महीपस्य राज्ञः, चित्तान्तः मनसो भावविशेष इत्यर्थः, कथञ्चित् न, लभ्यते इति अनुषङ्गः ॥१२६॥

(व) समये—नयनयोग्यकाले, स्वामिनः प्रसादकाले इत्यर्थः; यद्वा,—समये—प्रत्यये, स्थितनिति शेषः। प्राकृत—नीच, सामान्यमित्यर्थः, स्वल्पबलमिति यावत्।

पृष्ट इदमूचे,—'मदीश्वरेण परितुष्टेन (ग) कालिन्दीपरिसरे ग्रष्यान्याधि भक्षयितुं (घ) समादिष्टः। किं बहुना? मम प्रदत्तं भगवता क्रीडार्थं वनमिदम्' इति"। पिङ्गलक आह सभयं,—"सत्यं ज्ञातं मया अधुना। न (ङ) देवताप्रसादं विना ग्रष्यभोजिनो व्यालाकीर्णे एवंविधे वने निःशङ्का नदन्तो भ्रमन्ति। ततस्त्वया किमभिहितम्?" दमनक आह,—"स्वामिन्! एतदभिहितं मया यत्, 'एतद्वनं (च) चण्डिकावाहनभूतस्य मत्स्वामिनः पिङ्गलकनाम्नः सिंहस्य (छ) विषयीभूतं, भवान् अभ्यागतः प्रियोऽतिथिः; तत् तस्य सकाशं गत्वा भ्रातृस्नेहेन एकत्र भक्षणपानविहरण-क्रियाभिः एकस्थानाश्रयेण कालो नेयः' इति। ततः (क) तेनापि सर्वमेतत् प्रतिपन्नम्, उक्तश्च सहर्षं,—'स्वामिनः सकाशात् अभयदक्षिणा दापयितव्या' इति। तदत्र स्वामी प्रमाणम्"। तच्छ्रुत्वा पिङ्गलक आह,—"साधु सुमते! साधु, (ख) मन्त्रिश्रेष्ठिन्! साधु। मम हृदयेन सह समाख्या भवता इदमभिहितम्; तद्दत्ता मया तस्य अभयदक्षिणा। परं सोऽपि मदर्थे अभयदक्षिणां याचयित्वा द्रुततरमानीयताम् इति। (ग) अथ साधु चेदमुच्यते,—

(ग) कालिन्दीपरिसरे—यमुनातीरप्रान्तदेशे। ग्रष्यान्याधि—अभिनवहरिणान्याधि।

(घ) समादिष्टः,—आज्ञप्तः।

(ङ) देवताप्रसादं—देवताऽनुग्रहम्। व्यालाकीर्णे—श्वापदबहुले।

(च) चण्डिकेति।—चण्डिकायाः,—गौर्याः, वाहनभूतस्य—यानस्वरूपस्य।

(छ) विषयीभूतम्—अधिकारस्थितम्। ज्ञेयः,—यापनीयः।

(क) तेन—दमनेन। प्रतिपन्नं—स्वीकृतम्। अभयदक्षिणा—अभयदानलिखनं।

(ख) मन्त्रिश्रेष्ठिन्!—मन्त्रिपण्डित! [छन्दोऽधीत्रे इति कः, ततः कर्मधारयः]।

(ग) अथेति।—अथ—पश्चात्, इदं—वक्ष्यमाणं वचनं, साधु—सम्यक् यथा तथा, उच्यते—कथ्यते, लोकैरिति शेषः।

अन्तःसारैरकुटिलैरच्छिद्रैः सुपरीक्षितैः।
मन्त्रिभिर्धार्य्यते राज्यं सुस्तम्भैरिव मन्दिरम् ॥१३७॥

तथा च,—मन्त्रिणां भिन्नसन्धाने भिषजां सान्निपातिके।
कर्मणि व्यज्यते प्रज्ञा स्वल्पे को वा न पण्डितः?" ॥१३८॥

दमनकोऽपि तं प्रणम्य सञ्जीवकसकाशं प्रस्थितः सहर्षं-मचिन्तयत्,—"अहो! प्रसादमुखः (घ) नः स्वामी, वचनश्रवणश्च संवृत्तः, तन्नास्ति धन्यतरो मम। उक्तञ्च,—

अमृतं शिशिरे वह्निरमृतं प्रियदर्शनम्।
अमृतं राजसम्मानममृतं क्षीरभोजनम्" ॥ १३९ ॥

अथ सञ्जीवकसकाशमासाद्य (ङ) सप्रश्रयमुवाच,—"भो मित्र! प्रार्थितोऽसौ मया भवदर्थे स्वाम्यभयप्रदानम्। तत् (च) विश्रब्धं गम्यतामिति; परं त्वया राजप्रसादमासाद्य मया सह (छ) समयधर्मेण वर्त्तितव्यम्; न गर्वमासाद्य स्वप्रभु-

---

अन्तरिति।—अन्तःसारैः सारवद्भिः, अकुटिलैः अवक्रैः, अच्छिद्रैः निर्दोषैः, सुपरीक्षितैः साधुरसाधुर्वेति कृतपरीक्षैः, सम्यक् विदितैरित्यर्थः, मन्त्रिभिः सुस्तम्भैः दृढस्तम्भैरिव, मन्दिरमिव गृहमिव, राज्यं धार्य्यते पाल्यते। उपमाऽलङ्कारः ॥१३७॥

मन्त्रिणामिति।—भिन्नस्य पृथग्भूतस्य, सन्धाने मिलने यत्र तादृशे, कर्मणि, कलहेन वियुक्तानां योजने इत्यर्थः, मन्त्रिणाम्; सान्निपातिके त्रिदोषजे त्रिकारे, कर्मणि चिकित्साव्यापारे, भिषजां वैद्यानां, प्रज्ञा बुद्धिः, व्यज्यते प्रकाश्यते इत्यर्थः, स्वल्पे जने, को वा जनः, न पण्डितः? अपि तु सर्व्व एवेत्यर्थः ॥ १३८ ॥

(घ) नः,—अस्मान् प्रति। मम—मम इत्यर्थः, [सम्बन्धविवक्षया षष्ठी]।

अमृतमिति।—शिशिरे शीतकाले, वह्निः अग्निः, अमृतं सुधावत् सुखप्रदः, प्रियदर्शनं प्रियवस्तुनः साक्षात्कारलाभः, अमृतम्; राजसम्मानं नृपादरः, अमृतम्; क्षीरभोजनं दुग्धपानम्, अमृतम्। अत्र अमृतशब्देन सुखसाधनं वस्तु उच्यते इति क्षीरस्वामी ॥ १३९ ॥

(ङ) सप्रश्रयं—सविनयम्। अथो—अनन्तरम्।

(च) विश्रब्धं—निःशङ्कम्। परं—किन्तु। राजप्रसादं—राजानुग्रहम्।

(छ) समयधर्मेण—भवता विस्रब्धं कदाऽपि नाचरितव्यमीदृशेनेदृशमित्यादिरूपेण।

तया विचरणीयम्। अहमपि तव सङ्केतेन सर्वां राज्यधुरममात्यपदवीमाश्रित्य उद्धरिष्यामि। एवं कृते द्वयोरपि आवयोः राजलक्ष्मीर्भोग्या भविष्यति। यतः,—

आखेटकस्य धर्मेण विभवाः स्युर्वधे नृणाम्।
नृप्रजाः प्रेरयत्येको हन्त्यन्योऽत्र मृगानिव ॥ १४० ॥

तथा च,—यो न पूजयते गर्वादुत्तमाधममध्यमान्।
भूपसम्मानमान्योऽपि भ्रश्यते दन्तिलो यथा" ॥ १४१ ॥

सञ्जीवक आह,—"कथमेतत्?" सोऽब्रवीत्,—

कथा २।

"अस्त्यत्र धरातले वर्द्धमानं नाम नगरम्। तत्र दन्तिलो नाम (ज) नानाभाण्डपतिः सकलपुरनायकः प्रतिवसति स्म। तेन पुरकार्यं नृपकार्यञ्च कुर्वता तुष्टिं नीताः तत्पुरवासिनो लोका नृपतिश्च। किं बहुना? न कोऽपि तादृक् केनापि चतुरो दृष्टो नापि श्रुतो वेति। अथवा साधु चेदम् उच्यते,—

आखेटकस्येति।—आखेटकस्य मृगयायाः, धर्मेण न्यायेन, आचारेण वा, ("धर्मात् पुरुषमन्यायलक्षणाचारलोपयोः" इत्यमरः) विभवाः सम्पदः, वृधा नराणां, वधे स्युः, तथा च, अत्र संसारे, एकः मृगानिव नृप्रजाः नररूपाः प्रजाः, प्रेरयति प्रेषयति, अन्यः हन्ति नाशयति। यथा कश्चित् मृगयूथं प्रविश्य आलोड्य च सर्वान् मृगानाकृष्य एकत्रानयति, अन्यश्च मृगयुः सुखेन तान् हन्ति, एवं त्वमपि विप्रलम्भेन सर्वं सम्पाद्य सर्वमेव राजकार्यं मदायत्तं कुरु, अहमपि तेन च सर्वाः प्रजाः शोषयित्वा विपुलमर्थमर्जयिष्यामि, ततस्तेनैवार्थेनावां सुखं कालं नेष्याव इत्यभिसन्धिः ॥ १४० ॥

य इति।—यः जनः, गर्वात् दर्पात्, उत्तमाधममध्यमान् विविधान् जनान् न पूजयते यथोचितं न सत्करोति, स भूपसम्मानमान्योऽपि राजसम्मानितोऽपि, दन्तिलो यथा दन्तिल इव, भ्रश्यते स्वयमेव स्खलितो भूयते, स्वाधिकारादिति शेषः ॥ १४१ ॥

(ज) नानाभाण्डपतिः,—बहुविधधनपतिः, राज्ञः कोषरक्षक इत्यर्थः।

नरपतिहितकर्त्ता द्वेष्यतां याति लोके
जनपदहितकर्त्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्त्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्य्यकर्त्ता ॥ १४२ ॥

अथ एवं गच्छति काले दन्तिलस्य कदाचिद्विवाहः सम्प्रवृत्तः । तत्र तेन सर्वे पुरनिवासिनो (झ) राजसन्निधिलोकाश्च सम्मानपुरःसरमामन्त्र्य भोजिता वस्त्रादिभिः सत्कृताश्च । ततो विवाहानन्तरं राजा (ञ) सान्तःपुरः स्वगृहमानीय अभ्यर्चितः । अथ तस्य नृपतेः गृहसम्मार्जनकर्त्ता गोरम्भो नाम राजसेवको गृहायातोऽपि (ट) तेन अनुचितस्थाने उपविष्टोऽवज्ञया अर्द्धचन्द्रं दत्त्वा निःसारितः । सोऽपि ततःप्रभृति निःश्वसन् अपमानात् न रात्रौ अपि अधिशेते । 'कथं मया तस्य भाण्डपतेः राजप्रसादहानिः कर्त्तव्या' इति चिन्तयन् आस्ते । पुनश्चाचिन्तयत्,—'अथवा किमनेन वृथा शरीरशोषणेन ? न किञ्चित् मया तस्य अपकर्त्तुं शक्यमिति । अथवा साधु इदमुच्यते,—

नरेति ।—लोके जगति, नरपतेः राज्ञः, हितकर्त्ता, नरः इति शेषः, द्वेष्यताम् अप्रियता, प्रजानामिति शेषः, याति प्राप्नोति ; तथा जनपदानां तत्रत्यनिवासिनां प्रजानामित्यर्थः, हितकर्त्ता जनः, पार्थिवेन्द्रैः नरपतिभिः, त्यज्यते अधिकारात् दूरीक्रियते इत्यर्थः ; राजहितचिन्तकैः प्रजाऽनिष्टकरणस्य अवश्यानुष्ठेयत्वात् तथा प्रजाहितचिन्तकैः राजाप्रीतिसम्पादनस्य च अवश्यविधेयत्वात् इति भावः ; इति इत्थं, महति प्रबले, समाने तुल्यरूपे, विरोधे वैपरीत्ये, वर्त्तमाने विद्यमाने सति, नृपतिजनपदानां राजप्रजानामित्यर्थः, कार्य्यकर्त्ता उभयहितकर इत्यर्थः, दुर्लभः दुष्प्राप इत्यर्थः ॥ १४२ ॥

(झ) राजसन्निधिलोकाः,—नृपतिपार्श्वचराः, अमात्यादयः इत्यर्थः ।

(ञ) सान्तःपुरः,—अन्तःपुरैः,—अन्तःपुरिकाभिः नारीभिरित्यर्थः, सहितः ।

(ट) तेन—दन्तिलेन । अनुचितस्थाने—अभ्रजनोपवेशनार्हे आसने इत्यर्थः । अर्द्धचन्द्रं—गलहस्तं, ("तर्जन्यङ्गुष्ठविस्तारे गलहस्तार्द्धचन्द्रकौ" इति कोषः) ।

यो ह्यपकर्त्तुमशक्तः कुप्यति किमसौ नरोऽत्र निर्लज्जः ? ।
उत्पतितोऽपि हि चणकः शक्तः किं भ्राष्ट्रकं भङ्क्तुम् ?' ॥१४३॥

अथ कदाचित् प्रत्यूषे (ठ) योगनिद्रां गतस्य राज्ञः शय्यान्ते मार्ज्जनं कुर्वन् इदमाह,—'अहो ! दन्तिलस्य महत् (ड) दृप्तत्वं यत् राजमहिषीमालिङ्गति' । तच्छ्रुत्वा राजा सम्भ्रममुत्थाय तमुवाच,—'भोः ! भोः ! गोरम्भ ! सत्यमेतत्, यत् त्वया जल्पितम् ? किं देवी दन्तिलेन समालिङ्गिता ?' इति । गोरम्भः प्राह,—'देव ! रात्रिजागरणेन (ढ) द्यूतासक्तस्य मे बलात् निद्रा समायाता, तत् न वेद्मि, किं मया अभिहितम्' । राजा सेर्ष्यं स्वगतमचिन्तयत्,—'एष तावदस्मद्गृहे (ण) अप्रतिहतगतिः, तथा दन्तिलोऽपि । तत् कदाचित् अनेन देवी समालिङ्ग्यमाना दृष्टा भविष्यति । तेन इदमभिहितम् । उक्तञ्च,—

यद्दाञ्छति दिवा मर्त्यो वोच्यते वा करोति वा ।
तत् स्वप्नेऽपि तदभ्यासात् ब्रूते वाऽथ करोति वा ॥१४४॥

य इति ।—अत्र जगति, यो हि जनः, अपकर्त्तुम् अनिष्टमाचरितुम्, अशक्तः अक्षमः सन्, अधीति शेषः, कुप्यति क्रुध्यति, असौ निर्लज्जः किं नरः ? मनुष्यपदवाच्यः किम् ? न मनुष्यः, किन्तु गोमेषादिवज्जीवविशेषः इति भावः । हि यतोहि, उत्पतितोऽपि मर्जनसमये अग्निसन्तापात् ऊर्ध्वमुत्क्षिप्तोऽपि, चणकः "छोला" इति प्रसिद्धः शस्यविशेषः, भ्राष्ट्रकं भर्जनपात्रं "खोला" इति प्रसिद्धं, भङ्क्तुं भेत्तुं, शक्तः समर्थः, किम् ? यथा हि भ्राष्ट्रकाधिस्थचणकः वह्निसन्तापात् क्रुध्यन् उत्पतन्नपि पुनः तत्रैव पतति तद्भ्राष्ट्रकञ्च भङ्क्तुं न शक्नोति, अपि तु वह्नितापेन दह्यते, तद्वत् समाप्यवस्था जातेति भावार्थः । आर्य्या छन्दः ॥ १४३ ॥

(ठ) योगनिद्रां—योगेन—छलेन, निद्रां कपटनिद्राम् इत्यर्थः ।

(ड) दृप्तत्वं—गर्व्वितत्वं, धृष्टता इति यावत् ।

(ढ) द्यूतासक्तस्य—द्यूतक्रीड़ायां निरतस्य ।

(ण) अप्रतिहतगतिः,—अनिवारितसञ्चारः ।

यदिति ।—मर्त्यः मनुष्यः, दिवा 'दिवसे, यत् वाञ्छति अभिलषति, वोच्यते

तथा च,—शुभं वा यदि वा पापं यद्वृणां हृदि संस्थितम्।
सुगूढमपि तज्ज्ञेयं स्वप्नवाक्यात् तथा मदात् ॥१४५॥

अथवा स्त्रीणां विषये कोऽत्र सन्देहः ?

जल्पन्ति सार्द्धमन्येन पश्यन्त्यन्यं सविभ्रमाः।
हृदयं चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ?॥१४६॥

अन्वयः,—एकेन स्मितपाटलाधररुचो जल्पन्त्यनल्पाक्षरं
वीक्षन्तेऽन्यमितः स्फुटत्कुमुदिनीफुल्लोल्लसल्लोचनाः।
दूरोदारचरित्रचित्रविभवं ध्यायन्ति चान्यं धिया
कैनेत्थं परमार्थतोऽर्थवदिव प्रेमास्ति वामभ्रुवाम् ?॥१४७॥

पश्यति वा, करोति वा, स्वप्नेऽपि निद्राऽवस्थायामपि, तदभ्यासात् तेषामभिलाषादीनाम्, अभ्यासात् पुनःपुनरालोचनवशात्, तत् ब्रूते वा अथ करोति वा ॥ १४४ ॥

शुभमिति।—नृणां मानवानां, शुभं हितं वा, यदि वा अथवा, पापम् अशुभं, यत् किञ्चित् हृदि संस्थितं वर्त्तमानं, व्यादिति शेषः, तत् तत् सर्वं, सुगूढमपि नितरां गुप्तमपि, अप्रकाशमपीत्यर्थः, स्वप्नवाक्यात् निद्राकालोद्भवितवाक्यात्, तथा मदात् मद्यपाननिमित्तात् विकारादित्यर्थः, ज्ञेयं वेद्यं, भवति लोकानामिति शेषः ॥ १४५ ॥

जल्पन्तीति।—स्त्रियः इति सर्व्वत्र अध्याहार्य्यम्; अन्येन सार्द्धं जल्पन्ति आलपन्ति, सविभ्रमाः सविलासाः सत्यः, अन्यं पश्यन्ति तथा अन्यं पुरुषं, हृदयं हृदयस्थितं कृत्वा इत्यर्थः, चिन्तयन्ति, तस्मात् को जनः योषितां नारीणां, प्रियः ? नामेति सम्भावनायाम्; न कोऽपि प्रियः इति सम्भावयामीति भावः ॥ १४६ ॥

एकेनेति।—स्मितेन ईषद्धास्येन, पाटला रक्ता, रक्षिता इति यावत्, अधररुक् ओष्ठकान्तिः यासां तथोक्ताः सत्यः, एकेन केनापि पुरुषेण सहेत्यर्थः, अनल्पाक्षरं बहुभिः इत्यर्थः, जल्पन्ति विविधाः कथाः कथयन्तीत्यर्थः, वामभ्रुव इति शेषः; स्फुटन्ती विकसन्ती, या कुमुदिनी सैव फुल्ले विकसिते, उल्लसन्ती स्फुरन्ती, लोचने यासां तथाविधाः सत्यः, इतः अस्मात्, येन सह जल्पन्ति तस्मादित्यर्थः, अन्यं पुरुषं, वीक्षन्ते पश्यन्ति, तथा दूरम् अत्यन्तम्, उदारं महत्, चरित्रं यस्य तादृशश्च तत् चित्रं विविधः, विभवः सम्पत् यस्य तथाभूतश्च, (विशे-कर्मधा०) अतुलार्थमित्यर्थः, अन्यं पुरुषञ्च, धिया बुद्ध्या, मनसा इत्यर्थः, ध्यायन्ति चिन्तयन्ति; अतः वामभ्रुवां नारीणाम्, इत्थं कैनेव केन वा पुरुषेण सह, परमार्थतः यथार्थतः, अर्थवत् सभिलाषं, सानुरागमित्यर्थः, प्रेम प्रणयः, अस्ति ? न केनापि सहेत्यर्थः। आर्द्धजरतीकोक्तिरियम् ॥ १४७ ॥

तथा च,—नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।
नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥ १४८ ॥
रहो नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः।
तेन नारद! नारीणां सतीत्वमुपजायते ॥ १४९ ॥
यो मोहान्मन्यते मूढो रक्तेयं मम कामिनी।
स तस्या वशगो नित्यं भवेत् क्रीड़ाशुकुन्तवत् ॥ १५० ॥
तासां वाक्यानि क्लृप्तानि स्वल्पानि सुगुरूण्यपि।
करोति यः क्षितौ लोके लघुत्वं याति सर्वतः ॥ १५१ ॥
स्त्रियञ्च यः प्रार्थयते सन्निकर्षञ्च गच्छति।
ईर्षाञ्च कुरुते सेवां तमेवेच्छन्ति योषितः ॥ १५२ ॥

नेति।—अग्निः काष्ठानां काष्ठैः, बहुकाष्ठभक्षीकरणेनापीत्यर्थः, न तृप्यति न तृप्यति; महोदधिः समुद्रः, आपगानां नदीनां, बहुनदीसमागमेनापीत्यर्थः, न; अन्तकः यमः, सर्वभूतानां सर्वप्राणिकवलनेनापीत्यर्थः, न; तथा वामलोचना कामिनी, पुंसां बहूनां पुरुषाणां संभोगेनापीत्यर्थः, न, तृप्यतीति सर्वत्रानुषङ्गः। [काष्ठादीनां करणत्वेऽपि तृप्यर्थानां वेति नियमात् वैकल्पिकी षष्ठी, क्रियासम्बन्धसामान्ये विवक्षया षष्ठीति पक्षनाभाद्यः] ॥ १४८ ॥

रह इति।—नारदं प्रति श्रीकृष्णस्योक्तिरियम्। हे नारद! रहः विजनं, नास्ति न लभ्यते इत्यर्थः, ["स्थानम्" इति वा पाठः]; क्षणः समयः, कार्य्यव्यापृतत्वादिति भावः, नास्ति; प्रार्थयिता सुरतार्थी इत्यर्थः, नरः नास्ति, तेन हेतुना, नारीणां सतीत्वं पातिव्रत्यम्, उपजायते तिष्ठति इत्यर्थः; एतेषां सङ्गाभावे तर्हि तासां सतीत्वं नैव तिष्ठेदिति भावः ॥ १४९ ॥

य इति।—इयं कामिनी मम मयीत्यर्थः, रक्ता अनुरागिणी, इति यः मूढः अविवेकी, मोहात् अज्ञानात्, मन्यते बुध्यते, सः मूर्खः, क्रीड़ाशुकुन्तवत् क्रीड़ार्थं योषितपक्षीव, नित्यं तस्याः कामिन्याः, वशगः तदायत्त इत्यर्थः, भवेत् ॥ १५० ॥

तासामिति।—लोके जगति, यः क्षितौ कृशत्वः पुरुषः, तासां नारीणां, स्वल्पानि अतितुच्छानि, सुगुरूण्यपि महान्त्यपि वा, अर्थवन्तीत्यर्थः, वाक्यानि क्लृप्तानि कार्य्याणि वा, करोति पालयतीत्यर्थः, स सर्वतः सर्वप्रकारेण, लघुत्वं क्षुद्रत्वं, याति गच्छति ॥ १५१ ॥

स्त्रियमिति।—यश्च स्त्रियं प्रार्थयते कामयते, सन्निकर्षं सदा सान्निध्यञ्च, गच्छति,

अनर्थित्वात् मनुष्याणां भयात् परिजनस्य च ।
मर्य्यादायाममर्य्यादाः स्त्रियस्तिष्ठन्ति सर्वदा ॥ १५३ ॥
नासां कश्चिदगम्योऽस्ति नासाञ्च वयसि स्थितिः ।
विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते ॥ १५४ ॥
रक्तो हि जायते भोग्यो नारीणां भाटको यथा ।
हृष्यते यो दशालम्बी नितम्बे विनिवेशितः ॥ १५५ ॥
अलक्तको यथा रक्तो निष्पीड्य पुरुषस्तथा ।
अबलाभिर्बलाद्रक्तः पादमूले निपात्यते' ॥ १५६ ॥
एवं स राजा बहुविधं विलप्य (त) तत्प्रभृति दन्तिलग्नं

ईषत् अल्पं यथा तथा, सेवाञ्च कुर्वते, योषितः नार्यः, तमेव इच्छन्ति कामयन्ते इत्यर्थः ॥ १५२ ॥

अनर्थित्वादिति ।—मनुष्याणां नराणां, सर्वदा अनर्थित्वात् याचकत्वाभावात्, परिजनस्य परिवारवर्गस्य, भयाच्च अमर्य्यादाः मर्य्यादाबोधरहिताः, विषयं गन्तुमुत्सुका इत्यर्थः, स्त्रियः मर्य्यादायां न्यायमार्गे, पातिव्रत्ये इति भावः, तिष्ठन्ति ॥१५३॥

नासामिति ।—नासां नारीणाम्, अगम्यः अप्राप्तनीयः, कश्चित् कोऽपि पुरुषः, नास्ति, नासां नारीणां, वयसि यौवने, स्थितिश्च आस्था च, नास्ति, तरुणातरुणविचारो नास्तीति भावः; पुमान् पुंस्त्ववान् अयम्, इति हेतोरेव, विरूपं कुरूपं, रूपवन्तं सुरूपं वा, सर्वमेव पुरुषमिति शेषः, भुञ्जते भजन्ति, रमन्त इति शेषः ॥१५४॥

रक्त इति ।—रक्तः अनुरक्तः पुरुषः, अन्यत्र,—वर्णचित्रितः, भाटको यथा वस्त्रमिव, नारीणां भोग्यः जायते भवति, हि इति अवधारणे । यः रक्तः, दशालम्बी दशया उत्कृष्टावस्थया, अन्यत्र,—वस्त्रप्रान्तभागेन, आलम्बते वर्त्तते, अन्यत्र,—लम्बमानो भवतीति तथोक्तः, सः नितम्बे विनिवेशितः अध्यारोपितः सन्, हृष्यते सन्तुष्यते इत्यर्थः । उपमालङ्कारः ॥ १५५ ॥

अलक्तक इति ।—अबलाभिः नारीभिः, रक्तः रक्तगुणः, अलक्तको यथा, बलात् निष्पीड्य पादमूले निपात्यते, तथा रक्तः अनुरक्तः, पुरुषः अपि निष्पीड्य आकृष्य, पादमूले चरणतले, निपात्यते निधाप्यते ; यथा रक्तम् अलक्तकं नार्यः पादमूलमारोपयन्ति,तथा अनुरागिणं कान्तं प्रणयापराधेन चरणानतं कुर्वन्तीति भावः ॥१५६॥

(त) तत्प्रभृति—तदारभ्य ।

प्रसादपराङ्मुखः सञ्जातः। किं बहुना? राजद्वारप्रवेशोऽपि तस्य निवारितः। दन्तिलोऽपि अकस्मादेव प्रसादपराङ्मुखमवनिपतिमवलोक्य चिन्तयामास,—'अहो! साधु चेदम् उच्यते,—

कोऽर्थान् प्राप्य न गर्वितः? विषयिणः कस्यापदोऽस्तङ्गताः?
स्त्रीभिः कस्य न खण्डितं भुवि मनः? को नाम राज्ञां प्रियः?।
कः कालस्य न गोचरान्तरगतः? कोऽर्थी गतो गौरवम्?
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान्? ॥१५७॥

तथा च,—काके शौचं द्यूतकारे च सत्यं
सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः।
क्लीवे धैर्यं मद्यपे तत्त्वचिन्ता
राजा मित्रं केन दृष्टम्? श्रुतं वा? ॥ १५८ ॥

अपरं, मया अस्य भूपतेः अथवा अन्यस्यापि कस्यचित् राजसम्बन्धिनः स्वप्नेऽपि न अनिष्टं कृतम्। तत् किमेवं

क इति।—को जनः, अर्थान् प्राप्य न गर्वितः न अहङ्कृतः? भवेदिति शेषः; कस्य विषयिणः धनिनः, आपदः अस्तं गताः? के विषयिणः निरापदः सम्पदः इति भावः; भुवि पृथिव्यां, स्त्रीभिः नारीभिः, कस्य जनस्य, मनः न खण्डितम्? न विदारितम्? न व्यथापीडितं कृतमिति भावः, अपि तु सर्वस्यैवेत्यर्थः; को जनः, राज्ञां प्रियः? नाम सम्भावनायां, कोऽपि राज्ञां प्रियो नेति सम्भावयामीत्यर्थः; को जनः, कालस्य यमस्य, न गोचरान्तरगतः? न कवलमध्यपतितः? अपि तु सर्व एव कालायत्ता भवन्ति इति भावः; कः अर्थी याचकः, गौरवं सम्मानं, गतः? प्राप्तः? न कोऽपीत्यर्थः; याच्ञायां गौरवं नास्तीति भावः; को वा पुमान्, दुर्जनानां धूर्तानां, वागुरासु कापट्यरूपजालेषु, पतितः संबद्धः सन्, क्षेमेण कुशलेन, निर्विघ्नमिति भावः; यातः? निष्क्रान्तमिति शेषः, न कोऽपीत्यर्थः। आर्दूलविक्रीडितं छन्दः ॥१५७॥

काके इति।—काके जनेन, काके शौचं निष्कुण्ठिता, द्यूतकारे च सत्यं, सर्पे क्षान्तिः क्षमा, अपराधसहिष्णुतेत्यर्थः, स्त्रीषु कामोपशान्तिः कामदमनं, क्लीवे धैर्यम् अचापल्यं, मद्यपे सुरापायिनि जने, तत्त्वचिन्ता परमार्थानुध्यानं, तथा राजा मित्रं, कस्यापीति शेषः, दृष्टं वा श्रुतम्? न केनापीत्यर्थः; एतत् सर्वमसम्भवीति भावः। शार्दूलविक्रीडितं छन्दः ॥ १५८ ॥

पराङ्मुखो मां प्रति भूपतिः ?' इति। एवं तं दन्तिलं कदाचित् राजद्वारे (थ) विष्कम्भितं विलोक्य सम्मार्जनकर्त्ता गोरम्भः विहस्य द्वारपालान् इदमूचे,—'भो भो द्वारपालाः! राजप्रमादाधिष्ठितोऽयं दन्तिलः, स्वयं निग्रहानुग्रहकर्त्ता च। तदनेन (द) निवारितेन यथा अहं तथा यूयमपि अर्द्धचन्द्रभागिनो भविष्यथ'। तच्छ्रुत्वा दन्तिलश्चिन्तयामास,—'नूनमिदमस्य गोरम्भस्य (ध) चेष्टितम्। अथवा साधु इदमुच्यते,—

अकुलीनोऽपि मूर्खोऽपि भूपालं योऽत्र सेवते।
अपि सम्मानहीनोऽपि स सर्वत्र प्रपूज्यते ॥ १५९ ॥
अपि कापुरुषो भीरुः स्याच्चेन्नृपतिसेवकः।
तथाऽपि न पराभूतिं जनादाप्नोति मानवः' ॥ १६० ॥

एवं स बहुविधं (न) विलप्य विलक्षमनाः सोद्वेगो गतप्रभावः स्वगृहं गत्वा निशामुखे गोरम्भमाहूय वस्त्रयुगलेन सम्मान्य इदमुवाच,—'भद्र! मया न तदा त्वं (प) रागवशात्

(थ) विष्कम्भितं—प्राप्तप्रतिबन्धं, पुरप्रवेशे द्वारपालैर्निवारितमित्यर्थः, ("विष्कम्भो द्वीपभेदे स्यात् विस्तारप्रतिबन्धयोः" इति मेदिनी)।

(द) निवारितेन—प्रतिरुद्धेन, राजभवनप्रवेशात् युष्माभिरिति शेषः। यथा अहमिति।—अहं यथा पूर्वमनेन खगृहात् अर्द्धचन्द्रं दत्त्वा निःसारितः, तथा यूयमपि अनेन कदाचित् अर्द्धचन्द्रं दत्त्वा निःसारणीया इति भावः।

(ध) चेष्टितं—कार्य्यम्।

अकुलीन इति।—अत्र संसारे, यः भूपालं राजानं, सेवते, अपि सम्मानहीनोऽपि, सः अकुलीनः असत्कुलप्रसूतोऽपि, मूर्खोऽपि सम्मानहीनोऽपि, सर्वत्र प्रपूज्यते, राजाश्रितत्वादिति भावः ॥१५९॥

अपीति।—नृपतिसेवकः मानवः चेत् यदि, कापुरुषः भीरुः, तथा भीरुः जातस्वभावोऽपि, स्यात्, तथाऽपि जनात् पराभूतिं पराभवं, नाप्नोति ॥ १६० ॥

(न) विलप्य—वितर्क्येत्यर्थः। विलक्षमनाः,—लज्जितः। गतप्रभावः,—सम्मानहीनः, सम्प्रति राज्ञानुग्रहाभावादिति भावः। निशामुखे—प्रदोषे।

(प) रागवशात्—मात्सर्य्यात्, क्रोधादित्यर्थः, ("रागस्तु मात्सर्य्ये" इति मेदिनी)।

निःसारितः। यतस्त्वं ब्राह्मणानामग्रतोऽनुचितस्थाने समुपविष्टो दुष्ट इति अपमानितः; तत् क्षम्यताम्'। सोऽपि स्वर्गराज्योपमं तद्वस्त्रयुगलमासाद्य परं परितोषं गत्वा तमुवाच,—'भोः श्रेष्ठिन्! क्षान्तं मया ते तत्। तदस्य सम्मानस्य कृते प्रश्य मे बुद्धिप्रभावं राजप्रसादञ्च' एवमुक्त्वा सपरितोषं निष्क्रान्तः। साधु चेदम् उच्यते,—

श्लोकेनोन्नतिमायाति श्लोकेनायात्यधोगतिम्।
अहो! सुसदृशी चेष्टा तुलायष्टेः खलस्य च॥ १६१॥

ततश्च अन्येद्युः स गोरम्भो राजकुले गत्वा योगनिद्रां गतस्य भूपतेः सम्मार्ज्जनक्रियां कुर्वन् इदमाह,—'अहो! (क) अविवेकोऽस्मद्भूपतेः, यत् पुरीषोत्सर्गमाचरन् चिर्भटीभक्षणं करोति!!' तच्छ्रुत्वा राजा सविस्मयं तमुवाच,—'रे रे गोरम्भ! (ख) किमप्रस्तुतं लपसि? गृहकर्मकरं मत्वा त्वां न व्यापादयामि। किं त्वया कदाचिदहमेवंविधं कर्म समाचरन् दृष्टः?' सोऽब्रवीत्,—'देव! द्यूतासक्तस्य रात्रिजागरणेन सम्मार्ज्जनं कुर्वाणस्य मम बलात् निद्रा समायाता। तया अधिष्ठितेन मया किञ्चिज्जल्पितं, तच्च वेद्मि; तत् प्रसादं करोतु स्वामी निद्रापरवशस्य' इति। एवं श्रुत्वा राजा चिन्तितवान्,

श्लोकेनेति।—अहो! आश्चर्यम्! तुलायष्टेः तुलादण्डस्य, खलस्य च सुसदृशी सदृशैव अभिन्ना इत्यर्थः, चेष्टा क्रिया, ["इत्तिः" इति पाठान्तरम्] तथा हि,—तुलादण्डः खलश्च श्लोकेन अल्पेनैव ऊर्ध्वतेत्यर्थः, उन्नतिम् आयाति, श्लोकेन अल्पेनैव, अधोगतिम् अवनतिमित्यर्थः, आयाति च॥ १६१॥

(क) अविवेकः,—विवेकशून्यत्वम्। अस्मद्भूपतेः,—अस्माकं भूपतेः। पुरीषोत्सर्गे—मलत्यागम्, आचरन्—कुर्वन्, चिर्भटी—फलविशेषः, ("कांकुड" इति ग्रन्थभाषा) तस्याः भक्षणम्; शौचादिसमनन्तरमेवेति भावः।

(ख) अप्रस्तुतम्—अप्रासङ्गिकम्, अयुक्ततमित्यर्थः। लपसि—जल्पसि।

—'यन्मया जन्मान्तरे पुरोधोत्सर्गं कुर्वता कदाऽपि चिर्भटिका न भक्षिता ; तत् यथा अयं (भ) व्यतिकरो ममाभाव्यो मम अनेन मूढेन व्याकृतः, तथा दन्तिलस्य अपि इति निश्चयः। तत् मया न युक्तं कृतं, यत् स वराकः सम्मानेन वियोजितः। न तादृक्पुरुषाणामेवंविधं चेष्टितं सम्भाव्यते। तदभावेन राजकृत्यानि पौरकृत्यानि च सर्वाणि शिथिलतां व्रजन्ति'। एवमनेकधा विमृश्य दन्तिलं समाकार्य निजाङ्गवस्त्राभरणादिभिः संयोज्य स्वाधिकारे नियोजयामास। अतोऽहं ब्रवीमि,—'यो न पूजयते गर्वात्' इति"।

सञ्जीवक आह,—"भद्र! एवमेवैतत्। यद्भवता अभिहितं, तदेव मया कर्त्तव्यम्" इति। एवमभिहिते दमनकः तमादाय पिङ्गलकसकाशमगमत्, आह च,—"देव! एष मया आनीतः स सञ्जीवकः। अधुना देवः प्रमाणम्"। सञ्जीवकोऽपि तं सादरं प्रणम्य अग्रतः सविनयं स्थितः। पिङ्गलकोऽपि तस्य (म) पीनायतककुद्मनो नखकुलिशालङ्कृतं दक्षिणपाणिमुपरि दत्त्वा मानपुरःसरमुवाच,—"अपि शिवं भवतः? कुतः त्वमस्मिन् वने विजने समायातोऽसि?" तेनापि आत्मवृत्तान्तः कथितः। यथा वर्द्धमानेन सह वियोगः सञ्जातः, तथा सर्वं निवेदितम्। तच्छ्रुत्वा पिङ्गलकः सादरतरं तमुवाच,—"वयस्य! न भेतव्यम्; (य) मद्भुजपञ्जरपरिरक्षितेन यथेच्छं त्वया अधुना वर्त्तितव्यम्; अन्यच्च,—नित्यं मत्समीपवर्त्तिना भाव्यं

(भ) व्यतिकरः,—व्यसनं, मत्पक्षेव शौचाशौचविचारराहित्यरूप इति भावः।

(म) पीनेति।—पीना—स्थूला, आयता—दीर्घा, या ककुद्—अंसोपरिस्थकीलसदृशमांसपिण्ड इत्यर्थः, सा यस्मिं यस्येति तथाभूतस्य। अपि—प्रश्ने।

(य) मदिति।—मम भुजः,—बाहुरेव, पञ्जरः तेन तस्मिन् वा परिरक्षितः तेन।

यतः कारणात् (र) बहुपायं रौद्रमत्त्वनिषेवितं वनं (ल) गुरूणामपि सत्त्वानामसेव्यं, कुतः क्षुद्रभोजिनाम् ?" एवमुक्त्वा सकलमृगपरिवृतो यमुनाकच्छमवतीर्य्य उदकमवगाहनं कृत्वा स्वेच्छया तदेव वनं प्रविष्टः। ततश्च करटकदमनकनिक्षिप्तराज्यभारः सञ्जीवकेन सह (व) सुभाषितगोष्ठीसुखमनुभवन् आस्ते। अथवा साधु इदमुच्यते,—

यदृच्छयाऽप्युपनतं सकृत् सज्जनसङ्गतम्।
भवत्यजरमत्यन्तं नाभ्यासक्रममीक्षते" ॥ १६२ ॥

सञ्जीवकेनापि (श) अनेकशास्त्रावगाहनात् उत्पन्नबुद्धिप्रागल्भ्येन स्तोकैरेवाहोभिर्मूढमतिः पिङ्गलको धीमान् तथा कृतः, यथाऽऽरण्यधर्म्मादियोज्य ग्राम्यधर्म्मेषु नियोजितः। किं बहुना,—प्रत्यहं पिङ्गलकमञ्जीवको एव केवलं रहसि मन्त्रयतः, शेषः सर्व्वोऽपि मृगजनो दूरीभूतस्तिष्ठति। करटकदमनकौ

(र) बहुपायं—बहुविघ्नम। रौद्रेति।—रौद्रैः,—भयङ्करैः, सत्त्वैः,—जन्तुभिः, श्वापदादिभिरित्यर्थः, ("द्रव्यासुत्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः) निषेवितम्—अध्युषितम्।

(ल) गुरूणां—महताम। सत्त्वानां—प्राणिनाम। असेव्यम—अनाश्रयणीयम। क्षुद्रभोजिनां—जन्तुहन्तॄणाम। यमुनाकच्छं—यमुनातीरमित्यर्थः।

(व) सुभाषितेति।—सु—शोभनं, भाषितम्—आलापो यत्र, तादृशी या गोष्ठी—सभा, ("गोष्ठीसभासमितिसंसदः" इत्यमरः) तया सुखम्। अनुभवन्—भुञ्जानः।

यदृच्छयेति।—यदृच्छया दैवात्, अकस्मात इत्यर्थः, उपनतम उपस्थितं, सकृदपि एकवारमपि, सज्जनसङ्गतं साधुसङ्गः, अत्यन्तम् अजरम अक्षयम, अक्षयफलम् इत्यर्थः, भवति, अभ्यासक्रमं पुनरावृत्तिं, न ईक्षते नापेक्षते इत्यर्थः; सङ्गस्यः अपि बहूपकारक इति भावः॥ १६२॥

(श) अनेकशास्त्रावगाहनात्—बहुशास्त्रपर्य्यालोचनात्। उत्पन्नेति।—उत्पन्नं—जातं, बुद्धेः,—धियाः, प्रागल्भ्यं—नैपुण्यं यस्य तादृशेन। स्तोकैः,—अल्पैः। तथा धीमान् कृतः इत्यन्वयः। आरण्यधर्मात्—पशुस्वभावात्। ग्राम्यधर्मेषु—ग्रामवासिसुखभोगादिषु।

अपि प्रवेशं न लभेते। अन्यच्च, सिंहपराक्रमाभावात् सर्वोऽपि मृगजनः तौ च शृगालौ क्षुधाव्याधिबाधिताः एकां द्विपमाश्रित्य स्थिताः। उक्तञ्च,—

फलहीनं नृपं भृत्याः कुलीनमपि चोन्नतम्।
मन्यध्वान्यत्र गच्छन्ति शुष्कं वृक्षमिवाण्डजाः ॥१६३॥

तथा च,—अपि सम्मानसंयुक्ताः कुलीना भक्तितत्पराः।
वृत्तिभङ्गान्महीपालं त्यजन्त्येव हि सेवकाः ॥ १६४ ॥

अन्यच्च,—कालातिक्रमणं वृत्तेर्यो न कुर्वीत भूपतिः।
कदाचित् तं न मुञ्चन्ति भर्त्सिता अपि सेवकाः ॥१६५॥

तथा न केवलं सेवका इत्थम्भूताः, यावत् समस्तमपि एतज्जगत् परस्परं भक्षणार्थं (घ) सामादिभिः उपायैः तिष्ठति। तद्यथा,—

देशानामुपरि क्ष्माभृदातुराणां चिकित्सकाः।
वणिजो ग्राहकाणाञ्च मूर्खाणामपि पण्डिताः ॥ १६६ ॥

फलहीनमिति।—अण्डजाः पक्षिणः, फलहीनं फलरहितं, शुष्कं [शुष + क्त. तस्य कः] वृक्षमिव भृत्याः कुलीनमपि सत्कुलजमपि, उन्नतञ्च उन्नतमपि, फलहीनं फलं सेवाविनिमयेन वृत्तिदानं, तेन हीनं च्युतं, नृपं, सन्त्यज्य अन्यत्र गच्छन्ति ॥ १६३ ॥

अपीति।—सेवकाः भृत्याः, सम्मानसंयुक्ताः राजसम्मानभाजः, कुलीनाः सत्कुलप्रसूताः, तथा भक्तितत्पराः अनुरागवन्तोऽपि, वृत्तेः जीविकायाः, भङ्गादेव क्षेदादेव, अलाभादेव इत्यर्थः, महीपालं नृपं, त्यजन्ति हि परिहरन्त्येव ॥ १६४ ॥

कालेति।—यः भूपतिः, वृत्तेः जीविकायाः, वेतनादेः इत्यर्थः, कालातिक्रमणं समयपातं, न कुर्वीत यथाकालं वृत्तिं विदध्यात् इत्यर्थः, सेवकाः भृत्याः, भर्त्सिताः तिरस्कृताः, अपमानिताः इत्यर्थः, अपि कदाचित् तं नृपं, न मुञ्चन्ति न त्यजन्ति ॥१६५॥

(घ) सामादिभिः,—सामदानभेददण्डनामभिः चतुर्भिः, उपायैः,—फलसिद्धिसाधनभूतैः इत्यर्थः।

देशानामित्यादि।—क्ष्माभृत् नृपतिः, देशानां जनपदानां, चिकित्सकाः वैद्याः, आतुराणां रोगिणां, वणिजः पण्यविक्रेतारः, ग्राहकाणां तत्तत्पण्यार्थिनां, पण्डिताः

प्रमादिनां तथा चौरा भिक्षुका गृहमेधिनाम्।
गणिकाः कामिनाञ्चैव सर्वलोकस्य शिल्पिनः ॥१६७॥
सामादिसज्जितैः पाशैः प्रतीक्षन्ते दिवानिशम्।
उपजीवन्ति यत्नान् हि जलजा जलदानिव ॥ १६८ ॥

अथवा साधु इदमुच्यते,—

सर्पाणाञ्च खलानाञ्च परद्रव्यापहारिणाम्।
अभिप्राया न सिध्यन्ति तेनेदं वर्त्तते जगत् ॥१६९॥

अत्तुं वाञ्छति शाम्भवो गणपतेराखुं क्षुधार्त्तः फणी
तञ्च क्रौञ्चरिपोः शिखी गिरिसुतासिंहोऽपि नागाशनम्।
इत्थं यत्र परिग्रहस्य घटना ब्रह्मोरपि स्याद्गृहे
तत्रान्यस्य कथं न भावि? जगतो यस्मात् स्वरूपं हि तत् ॥१७०॥

मूर्खाणां, चौराः प्रमादिनाम् अनवधानपराणामित्यर्थः, भिक्षुकाः गृहमेधिनां गृहस्थानां, गणिकाः वेश्याः, कामिनां कामुकानां, शिल्पिनः कारवः, सर्वलोकस्य उपरि, एतान् लक्ष्यीकृत्य इत्यर्थः, सामादिसज्जितैः सामादिभिः सामदानभेददण्डैः उपायैः, सज्जितैः कल्पितैः, सामादिरूपैरित्यर्थः, पाशैः जालैः, चातुर्थ्यैः इत्यर्थः, दिवानिशं रात्रिन्दिवं, प्रतीक्षन्ते कैनोपायेन एतेभ्यः अर्थं साधयिष्याम इति चिन्तनपराः समयं प्रतिपालयन्ति। [देशाद्यामित्यादिषु अतनर्थप्रत्ययप्रथीगे षष्ठी] हि तथाहि, जलजाः जलजाताः, जलजीविनः शौण्डिप्रभृतयः इत्यर्थः, जलदानिव मेघानिव, यत्नात् उपजीवनक्षमान् देशादीन्, उपजीवन्ति उपजीव्य तिष्ठन्ति इत्यर्थः, जीविकार्थिनो जना इति शेषः। विशेषकम् ॥ १६६—१६८ ॥

सर्पाणामिति।—सर्पाणां भुजङ्गानां, खलानां पिशुनानाञ्च, तथा परद्रव्यापहारिणां परस्वापहारिणाञ्च, अभिप्रायाः मनोरथाः, न सिध्यन्ति सौख्यानिष्टकरत्वान्न फलन्ति, तेन कारणेन, इदं जगत् वर्त्तते तिष्ठति, रक्षो प्राप्नोति इत्यर्थः ॥ १६९ ॥

अत्तुमिति।—शाम्भवः शैवः, फणी सर्पः, क्षुधार्त्तः सन् गणपतेः शाम्भवदातुः पुत्रस्य गजाननस्य, आखुं मूषिकं, वाहनभूतमिति भावः; अत्तुं भक्षयितुं, वाञ्छति कामयते। क्रौञ्चरिपोः क्रौञ्चपर्वतदारिणः, कुमारस्येत्यर्थः, ("कुमारः क्रौञ्चदारणः" इत्यमरः) शिखी मयूरः, वाहनभूत इति भावः; तं फणिनञ्च, अत्तुं वाञ्छतीत्यनेनानुषङ्गः। गिरिसुतासिंहोऽपि देवीवाहनमपि, नागाशनम् अयजन्मन इव गुरुत्वं मयूरम्, अत्तुं वाञ्छतीत्यनेनान्वयः। यत्र यस्मिन् इत्तिविषये, ब्रह्मोरपि गृहे परिग्रहस्य परि-

ततः स्वामिप्रसादरहितौ क्षुत्क्षामकण्ठौ परस्परं करटक-दमनकौ मन्त्रयेते। तत्र दमनको ब्रूते,—"आर्य्य करटक! आवां तावदप्रधानतां गतौ। एष पिङ्गलकः सञ्जीवकानुरक्तः (स) स्वव्यापारपराङ्मुखः सञ्जातः। सर्वोऽपि परिजनो गतः। तत् किं क्रियते?" करटक आह,—"यद्यपि त्वदीयवचनं न करोति, तथाऽपि स्वामी (ह) स्वदोषनाशाय वाच्यः। उक्तञ्च,—

अप्रयच्छन्नपि बोद्धव्यः मन्त्रिभिः पृथिवीपतिः।
यथा स्वदोषनाशाय विदुरेणाम्बिकासुतः॥ १७१॥

तथा च,—मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः।
उन्मार्गं वाच्यतां यान्ति महामात्राः समीपगाः॥१७२॥

यत् त्वया एष शष्पभोजी स्वामिनः सकाशमानीतः, तत् स्वहस्तेन (च) अङ्गाराः कर्षिताः"। दमनक आह,—"सत्य-मेतत्। मम अयं दोषः, न स्वामिनः। उक्तञ्च,—

जनस्य, इत्यनेन एवं घटना परम्पराक्रमव्यापारः, स्यात्, तत्र तस्मिन् इत्तिविषये, अन्यथा, गर्हे इति शेषः, कथं न भावि? न भविष्यति? सर्वस्यैव गर्हे इत्थं घटना अवश्यम्भाविनीति भावः; यस्मात् जगतः स्वरूपं स्वभाव इत्यर्थः, तद्धि तादृशमेव; परस्परोपजीव्यजीवकरूपमिति भावः। शार्दूलविक्रीडितं वृत्तम्॥ १७०॥

(ग) स्वव्यापारपराङ्मुखः,—निजकार्य्यविमुखः।

(घ) स्वदोषनाशाय—स्वदोषः,—स्वकर्तव्याकरणं, तस्य स्वामिने सदुपदेशा-दानरूपं, तस्य नाशाय—शोधनाय, क्षालनाय इत्यर्थः। वाच्यः, हित इति शेषः।

अप्रयच्छन् इति।—अप्रयच्छन् अपि हितवचनमनाकर्णयन् अपि, पृथिवीपतिः मन्त्रिभिः स्वदोषनाशाय विदुरेण अम्बिकासुतः धृतराष्ट्रः, यथा, तथा बोद्धव्यः विज्ञापयितव्यः, हितवचनं श्रावयितव्यः इत्यर्थः॥ १७१॥

मदोन्मत्तस्येति।—मदोन्मत्तस्य मदोद्धतस्य, अत एव उन्मार्गे विपथगमित्यर्थः, गच्छतः भूपस्य नृपतेः, कुञ्जरस्य द्विपस्य, समीपगाः सन्निहिताः, महामात्राः अमात्याः, द्विपपकाश्च, ("महामात्रः सहस्रे चामात्ये द्विपपकाधिपे" इति मेदिनी) वाच्यतां निन्द्यतां, हितानुशासनादिति भावः, यान्ति प्राप्नुवन्ति॥ १७२॥

(ङ) अङ्गाराः,—ज्वलदुल्मुका इत्यर्थः। कर्षिताः,—गृहीताः।

जम्बुको हुडुयुद्धेन द्विजषाषाढभूतिना ।
दूतिका परकार्य्येण त्रयो दोषाः स्वयंकृताः" ॥ १७३ ॥

करटक आह,—"कथमेतत् ?" सोऽब्रवीत्,—

कथा ४ ।

"अस्ति कस्मिंश्चिद्विविक्तप्रदेशे (क) मठायतनम् ; तत्र दैवशर्म्मा नाम (ख) परिव्राजकः प्रतिवसति स्म । तस्य (ग) अनेकसाधुजनदत्तसूक्ष्मवस्त्रविक्रयवशात् कालेन महती (घ) वित्तमात्रा सञ्जाता । ततः स न कस्यचित् विश्वसिति, (ङ) नक्तन्दिनं कक्षान्तरात् तां मात्रां न मुञ्चति । अथवा साधु च इदमुच्यते,—

अर्थानामर्जने दुःखमर्जितानाञ्च रक्षणे ।
आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ॥ १७४ ॥

जम्बुक इति ।—जम्बुकः कश्चित् शृगालः, हुडुयुद्धेन मेषविशेषमङ्गीकृत्य, इत इति शेषः, षाषाढभूतिना तदाख्यप्रतारकेण, द्विजः कश्चित् परिव्राजकविप्रश्च, प्रतारित इति शेषः, तथा दूतिका परकार्य्येण, इतेति शेषः, त्रयो दोषाः येन येन दोषेणैवं विपत्तिः, ते दोषाः, स्वयम् आत्मना कृताः, तैरिति शेषः ; न त्वन्यस्य दोषैरेवं भवतीति भावः ॥ १७३ ॥

(क) मठायतनं—मठः,—सन्न्यासिनामाश्रमः, स एव आयतनं—स्थानम् ।

(ख) परिव्राजकः,—पर्य्यटकः, सन्न्यासी इत्यर्थः ।

(ग) अनेकेति ।—अनेकैः साधुजनैः दत्तानां सूक्ष्मवस्त्राणां विक्रयवशात्—विक्रयात् इत्यर्थः ।

(घ) वित्तमात्रा—धनपरिमाणम् ।

(ङ) नक्तन्दिनं—रात्रिन्दिवम । कक्षान्तरात्—कक्षस्य—बाहुनिम्नदेशस्य, अन्तरात्—मध्यात् बाहुमूलात् इत्यर्थः । मात्रां—वित्तं, ("मात्रा···वित्ते मानें···" इति मेदिनी) ।

अर्थानामिति ।—अर्थानां धनानाम्, अर्जने उपार्जने, दुःखम् ; अर्जितानाञ्च अर्थानां रक्षणे दुःखम् ; आये कुतश्चित् प्रदेशात् आगमने, ("लाभे" इति पाठान्तरं साधु) ; दुःखं, पथि दस्युभयादिति भावः ; व्यये विनियोगे, दुःखं, तस्मात् अर्थाः कष्टसंश्रयाः क्लेशावहाः, अतः तान् धिक् ! ["धिगर्थान् कष्टसंश्रयान्" इति वा पाठः, तथापि,—कष्टसंश्रयान् अर्थान् धिक् ! निन्दामीत्यर्थः, "धिक् निर्भर्त्सननिन्द्ययोः" इत्यमरः ।] ॥ १७४ ॥

अथ आषाढ़भूतिर्नाम (च) परवित्तापहारी धूर्त्तः तामर्थमात्रां तस्य कक्षान्तरगतां लक्षयित्वा व्यचिन्तयत्,—'कथं मया अस्य इयमर्थमात्रा हर्त्तव्या इति। तदत्र मठे तावत् (छ) दृढ़शिलासञ्चयवशात् भित्तिभेदो न भवति, उच्चैस्तरत्वाच्च (ज) अद्वारि प्रवेशो न स्यात्, तदेनं मायावचनैः विश्वास्य अहं छात्रतां व्रजामि, येन सः विश्वस्तः कदाचित् विश्रामम् एति। उक्तञ्च,—निःस्पृहो नाधिकारी स्यान्नाकामी मण्डनप्रियः।

नाविदग्धः प्रियं ब्रूयात् स्फुटवक्ता न वञ्चकः' ॥१७५॥

एवं निश्चित्य तस्यान्तिकम् उपगत्य 'ओम् नमः शिवाय' इति प्रोच्चार्य्य साष्टाङ्गं प्रणम्य च सप्रश्रयमुवाच,—'भगवन्! (झ) असारः संसारोऽयं,गिरिनदीवेगोपमं यौवनं,(ञ) तृणाग्निसमं जीवितं, (ट) शरदभ्रच्छायासदृशाः भोगाः, स्वप्नसदृशो

(च) परवित्तापहारी—चौरः इत्यर्थः।

(छ) दृढ़ेति।—दृढ़ः,—कठिनः, यः शिलासञ्चयः,—प्रस्तरराशिः, तदभात्, दृढ़ेन प्रस्तरसञ्चयेन निर्म्मितत्वादिति भावः। भित्तिभेदः,—भित्तिना कुड्यच्छेदः इत्यर्थः।

(ज) अद्वारे—द्वारातिरिक्तपथे। मायावचनैः,—कपटवाक्यैः।

निःस्पृह इति।—निःस्पृहः अर्थादिसमागमोपायचिन्तने निराकाङ्क्षः, पुमान् इति शेषः, अधिकारी अर्थादीनाम् इति शेषः, न स्यात् न भवेत्; अतः अर्थोपार्जनाकाङ्क्षया तदर्जनविषये स्पृहावता भवितव्यमिति भावः। अकामो अकामुकः, मण्डनप्रियः भूषणप्रियः, न स्यात्; भूषणप्रियश्च सर्व्वथा भोगाभिलाषीति भावः। तथा अविदग्धः मूढ़ः, प्रियं न ब्रूयात्; प्रियभाषी तु विदग्ध एव इति भावः। तथा स्फुटवक्ता स्पष्टभाषी, वञ्चकः प्रतारकः, न स्यात्। भूषणप्रियत्वादिहेतुभिः अकामुकत्वम् अविदग्धत्वम् अवञ्चकत्वञ्च अनुमेयं, तानि च यथा आषाढ़भूतौ सन्ति, तथा तत्र मायावचनैः प्रतिपादनीयानि इत्यभिप्रायः एतेन समर्थितः ॥१७५॥

(झ) असारः,—नास्ति सारः,—उत्कर्षः यत्र तथोक्तः, तुच्छ इत्यर्थः।

(ञ) तृणाग्निसमं—तृणाग्निः यथा क्षणेनैव निर्व्वाणत्वमेति तद्वदित्यर्थः।

(ट) शरदिति।—शरदि—शरत्काले, या: अभ्रच्छायाः,—मेघच्छायाः, तद्वदृश्याः, क्षणविध्वंसिनः इति भावः। भोगाः,—सुखानि।

मित्रपुत्रकलत्रभृत्यवर्गसम्बन्धः, एवं मया संम्यक् परिज्ञातम् ; तत् किं कुर्वतो मे संसारसमुद्रोत्तरणं भविष्यति ?' तच्छ्रुत्वा देवशर्मा सादरमाह,—'वत्स ! धन्योऽसि, यत् प्रथमे वयसि एवं (ठ) विरक्तिभावः। उक्तञ्च,—

पूर्वे वयसि यः शान्तः स शान्त इति मे मतिः।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ? ॥१७६॥
आदौ चित्ते ततः काये सतां सम्पद्यते जरा।
असतान्तु पुनः काये नैव चित्ते कदाचन ॥१७७॥

यच्च मां संसारसागरोत्तरणोपायं पृच्छसि, तत् श्रूयताम् ;—

शूद्रो वा यदि वाऽन्योऽपि चण्डालोऽपि जटाधरः।
दीक्षितः शिवमन्त्रेण स भस्माङ्गी शिवो भवेत् ॥१७८॥
षडक्षरेण मन्त्रेण पुष्पमेकमपि स्वयम्।
लिङ्गस्य मूर्ध्नि यो दद्यात् न स भूयोऽभिजायते' ॥१७९॥

(ठ) विरक्तिभावः,—संसारे वीतरागत्वम्।

पूर्वे इति।—यः पूर्वे प्रथमे, वयसि यौवने इत्यर्थः, शान्तः शमपरः, स एव शान्त इति मे मम, मतिः ज्ञानं, विश्वास इत्यर्थः ; धातुषु रसरक्तादिषु, क्षीयमाणेषु क्रमेण वयोवाहुल्यात् स्वयं क्षीणतां व्रजत्सु इत्यर्थः, [कर्मकर्तरि क्तच्] कस्य जनस्य, शमः संसारवैराग्यं, न जायते ? अपि तु सर्वस्यैव जायते इत्यर्थः॥ १७६ ॥

आदाविति।—सतां साधूनाम्, आदौ प्रथमं, चित्ते मनसि, ततः अनन्तरं, काये शरीरे, जरा वार्द्धकजनितचर्मशैथिल्यतादिरूपावस्थाविशेषः, सम्पद्यते जायते ; असतान्तु दुर्जनानान्तु, पुनः काये जरा सम्पद्यते, आदाविति भावः, कदाचन चित्ते मनसि, नैव जायते ॥१७७॥

शूद्र इति।—शूद्रः वा, अन्योऽपि शूद्रभिन्नो निकृष्टजातिरपि वा, चण्डालोऽन्यजोऽपि वा, यदि शिवमन्त्रेण दीक्षितः संस्कृतः सन्, जटाधरः तथा भस्माङ्गी भूतिभूषिताङ्गः इत्यर्थः, भवेदिति शेषः, तदा स शिवः शिवेनाभिन्नः, भवेत ॥ १७८ ॥

षडक्षरेणेति।—यः जनः, स्वयम् आत्मना, षडक्षरेण "ओं नमः शिवाय" इत्यनेन, मन्त्रेण, एकमपि पुष्पं लिङ्गस्य लिङ्गमूर्तिधरस्य शिवस्य, मूर्ध्नि शिरसि, दद्यात्, सः भूयः पुनः, न अभिजायते नास्य पुनर्जन्म स्यात् इत्यर्थः॥ १७९ ॥

तत् श्रुत्वा आषाढभूतिः तत्पादौ गृहीत्वा सप्रश्रयमिदमाह,—'भगवन्! तर्हि दीक्षया मे अनुग्रहं कुरु'। देवशर्मा आह,—'वत्स! अनुग्रहं ते करिष्यामि, परन्तु रात्रौ त्वया मठमध्ये न प्रवेष्टव्यं, (ङ) यत्कारणं निःसङ्गता यतीनां प्रशस्यते, तव ममापि च। उक्तञ्च,—

दुर्मन्त्रात् नृपतिर्विनश्यति यतिः सङ्गात् सुतो लालनात्
विप्रोऽनध्ययनात् कुलं कुतनयात् शीलं खलोपासनात्।
मैत्री चाप्रणयात् ममृद्धिरनयात् स्नेहः प्रवासाश्रयात्
श्रीर्गर्वात् अनवेक्षणादपि कृषिः त्यागात् प्रमादाद्धनम् ॥१८०॥

तत् त्वया व्रतग्रहणानन्तरं मठद्वारे (ढ) तृणकुटीरके शयितव्यम्' इति। स आह,—'भगवन्! भवदादेशः प्रमाणम्। (ण) परत्र स्थितेन मे प्रयोजनम्'। अथ (त) कृतशयनसमये

(ङ) यत्कारणं—यतः इत्यर्थः; यद्वा,—यत्—यस्य अप्रवेशस्य कारणम्। निःसङ्गता—सङ्गराहित्यम्। यतीनां—सन्यासिनाम्। तवेति।—तव ममापि च उभयोरपि, सन्यासित्वादिति भावः; सन्यासिनः विजने प्रदेशे एव तिष्ठन्तीति निष्कर्षः।

दुर्मन्त्रादिति।—नृपतिः दुर्मन्त्रात् दुष्टमन्त्रणाकरणादित्यर्थः, विनश्यति, [एवं सर्वत्र विनश्यतीत्यनेनान्वयः] यतिः तापसः, सङ्गात् अपरसंसर्गात्, सुतः पुत्रः, लालनात् केवलम् आदरातिशयेन प्रतिपालनात्, विप्रः अनध्ययनात् अध्ययनवर्जनात्, वेदपाठाकरणादित्यर्थः, कुलं कुतनयात् कुपुत्रात्, शीलं खलानां दुर्जनानाम्, उपासनात् सेवनात्, मैत्री सौहृदम्, अप्रणयात् प्रीतिविरहात्, समृद्धिः सम्पत्, अनयात् दुर्नीतिवशात्, स्नेहः प्रणयः, प्रवासाश्रयात् भिन्नदेशावस्थानात्, श्रीः लक्ष्मीः, गर्वात् अहङ्कारात्, कृषिः कृषिकार्य्यम्, अनवेक्षणात् स्वयम् अदर्शनात्, धनं त्यागात् अपात्रेऽर्पणात्, व्यापदः, तथा प्रमादात् अनवधानतावशात्, विनश्यति। आर्यूलविक्रीडितं वृत्तम् ॥ १८० ॥

(ढ) तृणकुटीरके—तृणनिर्मिते कुटकुटीरे इत्यर्थः, [अस्यार्थे कन्]।

(ण) परत्र—परस्मिन् लोके, स्थितेन—सङ्गतेन, केवलं परलोकसङ्गतस्यैव ज्ञानस्य, नान्यदिति भावः।

(त) कृतशयनसमये—विहितशयनसमये; मठपतिः शयनरूपमिति भावः।

देवशर्मा अनुग्रहं कृत्वा शास्त्रोक्तविधिना शिष्यताम् अनयत्। सोऽपि (थ) हस्तपादावमर्दनादिपरिचर्यया तं परितोषमनयत्। तथाऽपि स मुनिः कक्षान्तरात् मात्रां न मुञ्चति। अथ एवं गच्छति काले आषाढ़भूतिः चिन्तयामास, —'अहो! न कथञ्चिदेष मे विश्वासमागच्छति' तत् किं दिवाऽपि शस्त्रेण मारयामि? किं वा विषं प्रयच्छामि? किं वा (द) पशुधर्मेण व्यापादयामि?' इत्येवं चिन्तयति तस्मिन् देवशर्मणः शिष्यपुत्रः कांश्चित् ग्रामात् (ध) आमन्त्रणार्थं समायातः, प्राह च,—'भगवन्! (न) पवित्रारोपणक्रते मम गृहम् आगम्यताम्' इति। तत् श्रुत्वा देवशर्मा आषाढ़भूतिना सह प्रहृष्टमनाः प्रस्थितः।

अथ एवं तस्य गच्छतोऽग्रे काचित् नदी समायाता। तां दृष्ट्वा मात्रां कक्षान्तरात् अवतार्य्य, कन्थामध्ये सुगुप्तां निधाय, स्नात्वा देवार्चनं विधाय, तदनन्तरम् आषाढ़भूतिम् इदमाह, —'भो आषाढ़भूते! यावदहं पुरीषोत्सर्गं कृत्वा समागच्छामि, तावदेषा कन्था (प) योगीश्वरस्य सावधानतया रक्षणीया' इत्युक्त्वा गतः; आषाढ़भूतिरपि तस्मिन् अदर्शनीभूते मात्रामादाय सत्वरं प्रस्थितः। देवशर्माऽपि (फ) क्षावगुणानुरञ्जितमनाः सुविश्वस्तो यावदुपविष्टः तिष्ठति, तावत्

(थ) हस्तेति।—हस्तपादस्य अवमर्दनादिपरिचर्यया—संवाहनादिशुश्रूषया।

(द) पशुधर्मेण—मस्तकच्छेदादिप्रकारेणेति भावः।

(ध) आमन्त्रणार्थं—कस्मैचित् कार्य्याय आह्वानविशेषः आमन्त्रणं, तदर्थम्।

(न) पवित्रारोपणक्रते—उपनयनसंस्कारसम्पादनार्थं, यज्ञोपवीतदानार्थम् इत्यर्थः।

(प) योगीश्वरस्य—सिद्धयोगस्य। तस्मिन्—देवशर्मणि।

(फ) क्षावेति।—क्षावस्य—आषाढ़भूतेः, गुणेन—परिचर्य्यादिना इत्यर्थः, अनुरञ्जितम्—आप्यायितं, मनो यस्य तथाभूतः। उपविष्टः, पुरीषोत्सर्गार्थमिति शेषः।

(ब) सुवर्णरोमदेहयूथमध्ये हुडयुद्धमपश्यत्। अथ रोषवशात् हुडयुगस्य (भ) दूरमपसरणं कृत्वा भूयोऽपि समुपेत्य ललाटपट्टाभ्यां प्रहरतो भूरि रुधिरं पतति। (म) तच्च कश्चित् जम्बुको जिह्वालौल्येन रङ्गभूमिं प्रविश्य आस्वादयति। देवशर्माऽपि तदालोक्य व्यचिन्तयत्,—'अहो! मन्दमतिः अयं जम्बुको यदि कथमपि अनयोः (य) सङ्घट्टे पतिष्यति, तन्नूनं मृत्युमवाप्स्यतीति वितर्कयामि'। क्षणान्तरे च तथैव (र) रक्तास्वादनलौल्यात् मध्ये प्रविशन् तयोः शिरःसम्पाते पतितो मृतश्च शृगालः। देवशर्माऽपि (ल) तमनुशोचन् मात्राम् उद्दिश्य शनैः शनैः प्रस्थितः तत्र आषाढभूतिं न पश्यति, ततश्च औत्सुक्येन शौचं विधाय यावत् कन्यामालोकयति, तावत् मातां न पश्यति। ततश्च 'हा! हा! मुषितोऽस्मि' इति जल्पन् पृथिवीतले मूर्च्छया निपपात। ततः क्षणात् चेतनां लब्ध्वा भूयोऽपि समुत्थाय (व) फूत्कर्तुम् आरब्धः,—'भो आषाढभूते! क्व मां वञ्चयित्वा गतोऽसि? तत् देहि मे प्रतिवचनम्'। एवं बहु विलप्य तस्य (श) पदपद्धतिम् अन्वेषयन् शनैः शनैः प्रस्थितः।

अथ एवं गच्छन् सायं समये कञ्चित् ग्रामम् आससाद।

(ब) सुवर्णेति।—सुवर्णरोमयुक्तः देहो येषां तादृशानां, जन्तुावयवेषामित्यर्थः, यत् यूथं—वर्गः, तन्मध्ये। हुडयुद्धं—सशृङ्गमेषभेदयोः युद्धम्।

(भ) दूरेति।—दूरं—विप्रकृष्टम्, अपसरणं—गमनम्।

(म) तत्—रुधिरमित्यर्थः। जिह्वालौल्येन—रसनाचापल्येन, रुधिरलालसया इति भावः। रङ्गभूमिं—युद्धस्थानम्। आस्वादयति—लेढि, पिबतीत्यर्थः।

(य) सङ्घट्टे—सङ्घर्षे।

(र) रक्तेति।—रक्तस्य आस्वादने यत् लौल्यं—चापल्यं तस्मात्।

(ल) तमनुशोचन्—जम्बुकार्थे शोकं कुर्वन्। मातां—पितरम्, अर्थाधारम् इत्यर्थः।

(व) फूत्कर्तुं—विरोतुम्, आक्रोशितुम् इति वा।

(श) पदपद्धतिं—पदचिह्नम्।

'अथ तस्मात् ग्रामात् कश्चित् (ग) कौलिकः सभार्य्यो मद्य-पानकृते समीपवर्त्तिनि नगरे प्रस्थितः। देवशर्माऽपि तमालोक्य प्रोवाच,—'भो भद्र! वयं (स) सूर्य्योढ़ाः अतिथयः तवान्तिकं प्राप्ताः, न कमपि अत्र ग्रामे जानीमः। तत् गम्यताम् (ङ) अतिथिधर्मः। उक्तञ्च,—

सम्प्राप्तो योऽतिथिः सायं सूर्य्योढ़ो गृहमेधिनाम्।
पूजया तस्य देवत्वं प्रयान्ति गृहमेधिनः ॥१८१॥

तथा च,—तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥१८२॥
स्वागतेनाग्नयस्तृप्ता आसनेन शतक्रतुः।
पादशौचेन पितरः अर्घाच्छम्भुस्तथाऽतिथेः' ॥१८३॥

कौलिकोऽपि तच्छ्रुत्वा भार्य्यामाह,—'प्रिये! गच्छ त्वम्

(ग) कौलिकः,—तन्तुवायः, अधमजातिविशेषो वा।

(स) सूर्य्योढाः,—सूर्य्यास्तगमनकालोपगताः इत्यर्थः, तादृशरात्रातिथेः परिचर्य्यया फलाधिक्यं भूयते इति भावः।

(ङ) अतिथिधर्मः,—अतिथिसत्कारपुरस्सरम्।

सम्प्राप्त इति।—य सूर्य्योढ़ आतिथ्य, सायं गृहमेधिना, गृहे इति शेषः, सम्प्राप्तः उपस्थितः, गृहमेधिनः गृहिणः, तस्य पूजया सत्कारेण, देवत्वं प्रयान्ति ॥१८१॥

दरिद्राणामपि अतिथिपरिचर्य्या स्वल्पायाससाध्या इत्याह, तृणानीति।—तृणानि आसनार्थमोषधीरीति भावः, भूमिः, तृणाभावेऽपि उपवेशनार्थं भूतलम्, उदकं जलम्, तृणाद्यभावेऽपि पादप्रक्षालनार्थं पानार्थञ्चेति भावः, चतुर्थी सूनृता सत्यमधुरा, वाक् च, सर्वाभावे इति भावः, एतानि सतां साधूनां, गेहेषु गृहेषु, कदाचन न उच्छिद्यन्ते न विलुप्यन्त इत्यर्थः; भक्ष्यद्रव्याद्यभावे एतैरपि अतिथिः पूजनीय इति भावः ॥१८२॥

स्वागतेनेति।—अतिथे, स्वागतेन शुभागमनप्रश्नेन, अग्नयः गार्हपत्याद्याः, तृप्ताः, भवन्तीति शेषः, आसनेन आसनदानेन इत्यर्थः, शतक्रतुरिन्द्रः, तृप्तः भवति, पादशौचेन पादप्रक्षालनेन, पितरः गृहस्थस्येति भावः, अग्न्याधानादयः पितृगणा वा, तृप्ताः भवन्ति, तथा अर्घात् पूजनात्, शम्भुः शिवः, तृप्तो भवति, सर्वत्रातिथिरिति सम्बध्यते ॥ १८३ ॥

अतिथिम् आदाय गृहं प्रति। पादशौचभोजनशयनादिभिः सत्कृत्य त्वं तत्रैव तिष्ठ, अहं तव कृते प्रभूतं मद्यमानेष्यामि' एवमुक्त्वा प्रस्थितः। साऽपि भार्या (च) पुंश्चली तमादाय प्रहसितवदना देवदत्तं मनसि ध्यायन्ती गृहं प्रति प्रतस्थे। अथवा साधु च इदमुच्यते,—

दुर्दिवसे घनतिमिरे दुःसञ्चारासु घनवीथीषु।
पत्युर्विदेशगमने परमसुखं जघनचपलायाः ॥१८४॥

तथा च,—पर्य्यङ्केष्वास्तरणं पतिमनुकूलं मनोहरं शयनम्।
तृणमिव लघु मन्यन्ते कामिन्यश्चौर्यरतलुब्धाः ॥१८५॥

तथा च,—केलिं प्रदर्शति लज्जा शृङ्गारोऽस्योनि चाटवः कटवः।
बन्धक्याः परितोषो न किञ्चिदिष्टं भवेत् पत्यौ ॥१८६॥

(च) पुंश्चली—कुलटा। प्रहसितवदना—इसन्मुखी, स्वाभिप्रायसिद्धेः सौकर्य्यात इति भावः। देवदत्तं—तदाख्यं जारम।

दुर्दिवसे इति।—दुर्दिवसे दुर्दिने, मेघाच्छन्नेऽह्नीत्यर्थः, ("मेघाच्छन्नेऽह्नि दुर्दिनम्" इत्यमरः) घनतिमिरे अत्यन्तमसे, निविडान्धकारे इत्यर्थः, घनासु वीथीषु नगरमार्गेषु, दुःसञ्चारासु सञ्चरितुमशक्यासु, तथा पत्युः विदेशगमने विदेशप्रस्थाने, जघनचपलायाः सुरतोत्सुकायाः स्त्रिया इति भावः; परमसुखम अत्यन्तं सुखं, भवतीति शेषः; अविघ्नेन मनोरथसिद्धेरिति भावः। आर्य्या वृत्तम ॥ १८४ ॥

पर्य्यङ्केष्विति।—चौर्यरतलुब्धाः गुप्तसुरतार्थिन्यः इत्यर्थः, कामिन्यः, पर्य्यङ्केषु खट्वासु, आस्तरणम् आच्छादनवसनम्, अनुकूलं वशंवदं, पतिं, मनोहरं शयनं शय्याच, तृणमिव लघु अकिञ्चित्करमित्यर्थः, मन्यन्ते; सर्वं सुखसाधनं गृहगतं वस्तु परित्यज्य अन्यानपतिताः सारं रमयन्तीति भावः। आर्य्या वृत्तम् ॥ १८५ ॥

केलिमिति।—बन्धक्याः कुलटायाः, पत्यौ पतिसमीपे, लज्जा, केलिं क्रीडां, सुरतसुखमित्यर्थः, प्रदर्शति नाशयति; पत्या सह सुरते समधिकां लज्जां प्रदर्शयति, तेन क्रीडादिकं न निःसङ्कोचं करोतीति भावः; शृङ्गारः पतिकर्तृकसुरतलीला इत्यर्थः, अस्योनि प्रदर्शति, न तेन सा सन्तुष्यतीति भावः; चाटवः प्रियवचनानि, पत्युरिति भावः, कटवः कर्कशाः, भवन्तीति शेषः; तस्मात् पत्यौ बन्धक्याः परितोषः किञ्चिदिष्टञ्च न शेषं, भवेत्; पत्यावेव तासां लज्जा, न पुनरन्यत्र इति भावः। आर्य्या वृत्तम् ॥१८६॥

कुलपतनं जनगर्हां बन्धनमपि जीवितव्यसन्देहम् ।
अङ्गीकरोति कुलटा सततं परपुरुषसंसक्ता ॥ १८७ ॥

अथ कौलिकभार्यां गृहं गत्वा देवशर्मणे (क) गतार्द्रस्तरणां भग्नाञ्च खट्वां समर्प्य इदमाह,—'भो भगवन् ! यावदहं स्वसखीं (ख) ग्रामादभ्यागतां सम्भाष्य द्रुतमागच्छामि, तावत् त्वया मद्गृहे (ग) अप्रमत्तेन भाव्यम्' एवमभिधाय (घ) शृङ्गारविधिं विधाय यावद्देवदत्तमुद्दिश्य व्रजति, तावत् तद्भर्त्ता मन्मुखो मदविह्वलाङ्गो मुक्तकेशः पदे पदे प्रस्खलन् गृहीतमद्यभाण्डः समभ्येति । तञ्च दृष्ट्वा सा द्रुततरं (ङ) व्याघुट्य स्वगृहं प्रविश्य मुक्तशृङ्गारवेशा यथापूर्वम् अभवत् । कौलिकोऽपि तां पलायमानां (च) कृताद्भुतशृङ्गारां विलोक्य, प्रागेव कर्णपरम्परया तस्याः (छ) श्रुत्यपवादक्षुभितहृदयः (ज) स्वाकारं निगूहमानः सदैवास्ते । ततश्च तथाविधं चेष्टितम् अवलोक्य (झ) दृष्टप्रत्ययः क्रोधवशगो गृहं प्रविश्य ताम् उवाच,—

कुलपतनमिति ।—परपुरुषसंसक्ता कुलटा बन्धकी, सततं कुलपतनं वंशकलङ्कमित्यर्थः, जनगर्हां लोकनिन्दां, बन्धनं मरणे; गृहे अवरोधनं, जीवितव्यसन्देहमपि जीवनसंशयञ्च, अङ्गीकरोति स्वीकरोति ; पुंश्चल्यो हि कुलनाशादिकं किमपि न गणयन्तीति भावः । आर्या वृत्तम् ॥ १८७ ॥

(क) गतार्द्रस्तरणाम्—आच्छादनशून्यां, प्रच्छदपटविहीनामित्यर्थः ।

(ख) ग्रामात्—तस्याः श्वशुरावासात् पितुरावासात् वा । सम्भाष्य—अभिनन्द्य ।

(ग) अप्रमत्तेन—सावधानेन । भाव्यं—स्थातव्यमित्यर्थः ।

(घ) शृङ्गारविधिं—सुरतोचितमनुष्ठानम् । सम्मुखः,—अभिमुखवर्त्तीत्यर्थः ।

(ङ) व्याघुट्य—प्रत्यावृत्य ।

(च) कृताद्भुतशृङ्गाराम्—अनुचितविचित्रशृङ्गारवेशामित्यर्थः ।

(छ) श्रुतेति ।—श्रुतेन अपवादेन—अश्रद्धेन, क्षुभितं—सन्दिग्धं, हृदयं यस्य सथाभूतः ।

(ज) स्वाकारं—निजनाकारं, हृदयभावमिति भावः । निगूहमानः,—रक्षन्निवत् ।

(झ) दृष्टप्रत्ययः,—असन्दिग्धः इति भावः । ["दृढप्रत्ययः" इति पाठान्तरम्] ।

'आः पापे! पुंश्चलि! क्व प्रस्थिताऽसि?' सा प्रोवाच,—'अहं त्वत्सकाशात् आगता न कुत्रचिदपि निर्गता। तत् कथं मद्य-पानवशात् (अ) अप्रस्तुतं वदसि? अथवा साधु चेदमुच्यते,—

वैकल्यं धरणीपातमयथोचितजल्पनम्।
सन्निपातस्य चिह्नानि मद्यं सर्वाणि दर्शयेत्॥ १८८॥
करस्पन्दोऽम्बरत्यागस्तेजोहानिः सरागता।
वारुणीमङ्गजावस्था भानुनाऽप्यनुभूयते'॥ १८९॥

सोऽपि तच्छ्रुत्वा प्रतिकूलवचनं वेशविपर्ययञ्च अवलोक्य तामाह,—'पुंश्चलि! चिरकालं श्रुतो मया तव अपवादः; तदद्य स्वयं सञ्जातप्रत्ययः तव यथोचितं निग्रहं करोमि' इति अभिधाय लगुडप्रहारैः तां जर्जरितदेहां विधाय, (ट) स्नूषया सह दृढबन्धनेन बद्ध्वा, सोऽपि मदविह्वलो निद्रावशम् अगमत्। अत्रान्तरे तस्याः सखी नापितो कौलिकं निद्रावश-गतं विज्ञाय तां गत्वा इदमाह,—'सखि! स देवदत्तः तस्मिन् स्थाने त्वां प्रतीक्षते, तत् शीघ्रमागम्यताम्' इति। सा च आह,—'पश्य मम अवस्थाम्; तत् कथं गच्छामि? तत् गत्वा

(अ) अप्रस्तुतम्—अयुक्तम्।

वैकल्यमिति।—मद्यं सुरा, वैकल्यम् अवयवाकुलत्वमित्यर्थः, धरणीपातं भूमौ पतनम्, अयथोचितजल्पनम् अयुक्तं प्रलपनमित्यर्थः, एतानि सर्वाणि सन्निपातस्य त्रिदोषजनितविकारस्य, चिह्नानि दर्शयेत् प्रकाशयेत्, पोषणस्य जने इति शेषः॥१८८॥

करस्पन्द इति।—करस्पन्दः हस्तकम्पनं, अम्बरत्यागः वस्त्रत्यागः, आवाशात् पवनस्य, तेजोहानिः प्रकाशः, दीप्तिनाशस्य, तथा सरागता नेत्रवक्त्रादीनां रक्तवर्णता रक्तवर्णता च, वारुणी सुरा, वरुणपालिता पश्चिमा दिक् च, अङ्गजा तत्कालजा, तदाश्रयजा च, पूर्वोक्ता अवस्था भानुनाऽपि सूर्येणापि, अन्येषां का कथेति भावः, अनुभूयते श्रूयते। अस्तगमनसमये सूर्यस्य वाहनवस्था भवति, रोहितमश्वादि तथा इति भावः। श्लेषानुप्राणितेयमुपमा॥१८९॥

(ट) स्नूषया—स्नुषेव, स्नुषाचरवदाचरितेयेव वा।

ब्रूहि तं कामिनं यत्, अस्यां रात्रौ न त्वया सह समागमः'। मापितो प्राह,—'सखि! मा मैवं वद। न वयं (ठ) कुलटाधर्मः। उक्तञ्च,—

विषमस्थस्यादृष्टफलवृक्षस्योद्यमव्यवसायनिश्चयो येषाम्।
उष्ट्राणामिव तेषां मन्येऽहं शंसितं जन्म ॥ १८० ॥

तथा च,—सन्दिग्धे परलोके जनापवादे च जगति बहुचित्ते।
स्वाधीने पररमणे धन्यास्तारुण्यफलभाजः ॥ १८१ ॥

अन्यच्च,—यदि भवति दैवयोगात् पुमान् विरूपोऽपि बन्धकीरहसि।
न तु कृच्छ्रादपि भद्रं निजकान्तं सा भजत्येव' ॥१८२॥

(ठ) कुलटाधर्मः,—कुलटायाः रीतिः।

विषमस्थेति।—उष्ट्राणामिव येषां दुष्प्रापस्थानस्थं यत् स्वादुफलं तत्र यद्यत्ने यः व्यवसायः उद्यमः, तत्र निश्चयः अवश्यमेव तादृशं फलं लभे इति दृढता इत्यर्थः, वर्त्तते इति शेषः, तेषां जन्म शंसितं धन्यम्, इति अहं मन्ये; दुर्लभलाभार्थी जनः प्रशस्यः, त्वमपि तथेति तव प्रशस्तिरिति भावः। आर्या छन्दम् ॥१८०॥

सन्दिग्धे इति।—जगति लोके, परलोके लोकान्तरे, सन्दिग्धे संशययुक्ते, स्वर्ग-नरकादि अस्ति न वा इति सन्देहयुक्ते इत्यर्थः, जनापवादे लोकनिन्दायाञ्च, बहुचित्ते विविधप्रकारे इत्यर्थः, नियतवर्त्तमाने इति शेषः, जनानामयं स्वभावो यत् प्रायशः ते परकृतकार्य्येषु किमपि छिद्रमाविष्कृत्य तदपवदन्तीति भावः; तथा पररमणे परच्छन्दानुवर्त्तने, परपुरुषे वा, स्वाधीने निजायत्ते सति, तारुण्यफलभाजः तारुण्यस्य यौवनस्य, फलं यदृच्छासम्भोगः, तत् भजन्ते इति तादृशाः, युवतय इति भावः, धन्याः साधुवादभाजनाः, भवन्ति इति शेषः; याः शरीरान्तरे अनिश्चिते नरकभोगभयम्, इह-लोके च सर्वदा सुलभं विविधलोकनिन्दाभयञ्चापहाय परपुरुषैरेवेच्छं विहरन्ति, ताः नितरां सुखिन्यः इति भावः। आर्या छन्दम् ॥ १८१ ॥

बन्धकीरहसि इति।—बन्धक्याः कुलटायाः, रहसि विश्वासस्थाने देशे, यदि विरूपः कुत्सितोऽपि, पुमान् पुरुषः, दैवयोगात् विधिवशात्, भवति आगच्छतीत्यर्थः, अथवा—बन्धकी इति छेदः; तत्र—बन्धकी पुमानिति च वर्त्तमानपदम्; दैवात् उभयत्रापि रहसि उपतिष्ठते यदि इत्यर्थः, तदा सा कृच्छ्रादपि कथञ्चिदपि, बलात्कारनिच्छयाऽपीति भावः, भद्रं सुन्दरमपि, निजकान्तं स्वपतिं, न तु भजत्येव। आर्या छन्दम् ॥ १८२ ॥

सा अब्रवीत्,—'यदि एवं, तर्हि कथय, कथं दृढबन्धनबद्धा सती तत्र गच्छामि ? सन्निहितश्च अयं पापात्मा मत्पतिः'। नापितो आह,—'सखि ! मदविश्वस्तोऽयं (ड) सूर्य्यकरस्पृष्टः प्रबोधं यास्यति ; तदहं त्वाम् उन्मोचयामि ; माम् आत्मस्थाने बद्ध्वा द्रुततरं देवदत्तं सम्भाष्य आगच्छ'। सा अब्रवीत्,—'एवमस्तु' इति। तदनु सा नापितो तां स्वसखीं बन्धनाद्विमोच्य तस्याः स्थानं यथापूर्वमात्मानं बद्ध्वा तां देवदत्तसकाशे (ढ) सङ्केतस्थानं प्रेषितवती। तथाऽनुष्ठिते कौलिकः कस्मिंश्चित् क्षणे समुत्थाय किञ्चिद्गतकोपः (ण) विमदस्खलामाह,—हे परुषवादिनि ! यदि अद्य प्रभृति गृहात् निष्क्रमणं न करोषि, न च परुषं वदसि, ततः त्वाम् उन्मोचयामि'। नापितो अपि (त) स्वरभेदभयात् यावन्न किञ्चित् जल्पे, तावत् सोऽपि भूयोभूयस्तां तदेव आह। अथ सा यावत् प्रत्युत्तरं किमपि न ददौ तावत्, सः प्रकुपितः तीक्ष्णशस्त्रमादाय तस्याः नासिकाम् अच्छिनत्, आह च,—'रे (थ) पुंश्चलि ! तिष्ठ इदानीं, न त्वां भूयस्तोषयिष्यामि' इति जल्पन् पुनरपि निद्रावशमगमत्। देवशर्मा अपि वित्तनाशात् (द) क्षुत्क्षामकण्ठो नष्टनिद्रस्तत् सर्वं स्त्रीचरित्रमपश्यत्। साऽपि कौलिकभार्या यथेच्छया देवदत्तेन सह सुरतसुखमनुभूय कस्मिंश्चित् क्षणे स्वगृहमागत्य तां नापितोमिद-

(ड) सूर्य्यकरेत्यादि।—सूर्य्यकिरणस्पर्शेनायं जागरिष्यति। सम्भाष्य—सन्तोष्य।

(ढ) सङ्केतस्थानम्—अभिसारोचितगृहप्रदेशम्।

(ण) विमदः,—नष्टतारुण्यः। परुषवादिनि !—निष्ठुरभाषिणि !।

(त) स्वरभेदभयात्—स्वरस्य कण्ठध्वनेः, भेदः विभिन्नता, तस्मात् भयं तस्मात् ; कुलटायाः तस्याः स्वस्य च स्वरौ भिन्नः, तेन चसौ ज्ञास्यतीति भयादिति भावः।

(थ) पुंश्चलि—पुंसः भर्तुः सकाशात्, चलति पुरुषान्तरं गच्छतीति [चल्, गौरादित्वात् ङीष्] तत्सम्बोधने। जल्पन्—कथयन्।

(द) क्षुत्क्षामकण्ठः,—क्षुधया शुष्ककण्ठः। नष्टनिद्रः,—नष्टा—विगता, निद्रा—स्वापः यस्य सः।

माह,—'अयि ! (ध) शिवं भवत्याः ? नायं पापात्मा मम गतायाः उल्लिखतः ?' नापितो माह,—'शिवं नासिकया विना शिवस्य शरीरस्य ; तत् द्रुतं मां मोचय बन्धनात्, यावन्नायं मां पश्यति, (न) येन सुखेन गच्छामि'। तथा अनुष्ठिते भूयोऽपि कौलिकः उत्थाय तामाह,—'पुंश्चलि ! किमद्यापि न वदसि ? किं भूयोऽप्यतो दुष्टतरं निग्रहं कर्णच्छेदेन करोमि ?' अथ सा सकोपं (प) साधिक्षेपमिदमाह,—'धिक् धिक् महामूढ ! को मां महासतीं धर्षयितुं व्यङ्गयितुं वा समर्थः ? तत् शृण्वन्तु सर्वेऽपि लोकपालाः,—

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम् ॥१६३॥

तत् यदि मम सतीत्वमस्ति, मनसाऽपि परपुरुषो न अभिलषितः, ततो देवाः भूयोऽपि मे नासिकां तादृग्रूपामस्तां कुर्वन्तु ; अथवा यदि मम चित्ते परपुरुषस्य भ्रान्तिरपि भवति, मां भक्षसात् नयन्तु'। एवमुक्ता भूयोऽपि तमाह,—'भो दुरात्मन् ! पश्य मे सतीत्वप्रभावेण तादृशी एव नासिका

(ध) शिवं—मङ्गलम्। भवं—मत्सकाशात्। गतायाः,—इतः प्रस्थितायाः।

(न) येन—वक्ष्यमाणोचितेनेत्यर्थः।

(प) साधिक्षेपं—सतिरस्कारम्। धर्षयितुम्—भक्षयितुम्। व्यङ्गयितुम्—अङ्गविहीनां कर्तुमित्यर्थः ; [विगतमङ्गं यस्याः सा व्यङ्गा,तां करोतीति विजन्तात् तुमुन्]।

आदित्येति।—आदित्यचन्द्रौ सूर्याचन्द्रमसौ, अनिलो वायुः, अनलः अग्निः, द्यौः आकाशं, भूमिः क्षितिः, आपो जलानि, हृदयं मनः,अन्तरात्मा, यमः धर्मराजः, अहः दिवसः, रात्रिः रजनी, उभे द्वे, प्रातःसायंरूपे इत्यर्थः, सन्ध्ये सन्धिवेले च, तथा धर्मश्च, नरस्य वृत्तं चरितं, जानाति अवगच्छति, प्रत्यक्षीकरोतीत्यर्थः, आदित्यादय एव मां जानन्ति, तव का शक्तिर्माम् अवगन्तुमिति भावः। उपजातिः वृत्तम्॥ १६३॥

संवृत्ता'। अथ असौ (फ) उल्मुकमादाय यावत् पश्यति, तावत् तद्रूपां नासिकाञ्च भूतले रक्तप्रवाहञ्च महान्तमपश्यत्। अथ स विस्मितमनास्तां बन्धनाद्विमुच्य शय्यायामारोप्य च (ब) चाटुशतैः पर्य्यतोषयत्। देवशर्मा अपि तं सर्ववृत्तान्तमालोक्य विस्मितमनाः इदमाह,—

'असुरस्य च या माया या माया नमुचेरपि।
बलेः कुम्भीनसेयैव सर्वास्ता योषितो विदुः ॥१८४॥
हसन्तं प्रहसन्त्येता रुदन्तं प्ररुदन्त्यपि।
अप्रियं प्रियवाक्येश गृह्णन्ति कालयोगतः ॥१८५॥
उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः।
स्त्रीबुद्ध्या न विशिष्येत तस्माद्रक्ष्याः कथं हि ताः ॥१८६॥

(फ) उल्मुकम्—अर्द्धदग्धकाष्ठखण्डम्, अङ्गीकरिष्यन् इत्यर्थः। तद्रूपां—पूर्ववत् सुन्दराकाराम्।

(ब) चाटुशतैः,—प्रियवचनसमूहैः।

असुरस्येति।—असुरस्य असुरभेदस्य, या माया: चातुर्य्याणि, नमुचेरपि तदाख्यस्य असुरविशेषस्य च, या मायाः, बलेः बलिराजस्य, कुम्भीनसेः कुम्भीनस्याः, तदाख्यायाः कन्यायाः इत्यर्थः, [भारतादिपर्वणीडिक्यम् स्त्रीके कुम्भीनसीति दीर्घान्तस्यापि दृश्यः आर्षः] यद्वा,—कुम्भीनसीपुत्रस्य बलेश्च, या मायाः, ताः सर्वाः एव योषितः नार्य्यः, विदुः जानन्ति; स्त्रियः सर्वा एव कपटिन्य इति भावः॥ १८४॥

हसन्तमिति।—एताः नार्य्यः, कालयोगतः समयवशात्, उपयुक्तसमये इत्यर्थः, हसन्तं पुरुषं, प्रहसन्ति, रुदन्तं प्ररुदन्त्यपि अनुरुदन्ति च, अपि समुच्चये। अप्रियं विरक्तिभाजनं जनं, प्रियवाक्यैः मोहनवचनैः, गृह्णन्ति वशीकुर्वन्ति च; न कोऽपि पुरुषः मायया स्त्रियं वशीकर्तुं शक्नुयात्, अपि तु तासामेव मायायाऽसौ वशीभूतो भवतीति भावः॥१८५॥

उशना इति।—उशनाः शुक्राचार्य्यः, यत् शास्त्रं, वेद जानाति, बृहस्पतिः सुरगुरुश्च, यत् शास्त्रं, वेद, तत् शास्त्रं, स्त्रीबुद्ध्या नारीबुद्धिमपेक्ष्य, न विशिष्येत न अतिशय्येत; स्त्रीबुद्धिमसंमतिमत्य वर्त्तते इति भावः; तस्मात् ताः स्त्रियः, कथं हि रक्ष्याः, केनोपायेन रक्षणीयाः? नैव निरोद्धुं शक्या इति भावः॥ १८६॥

अनृतं सत्यमित्याहुः सत्यं चापि तथाऽनृतम् ।
इति यास्ताः कथं धीरैः संरक्ष्याः पुरुषैरिह ? ॥१९७॥

अथवापि उत्तम ;—

नातिप्रसङ्गः प्रमदासु कार्यो नेच्छेत् बलं स्त्रीषु विवर्द्धमानम् ।
अतिप्रसक्तैः पुरुषैर्यतस्ताः क्रीडन्ति काकैरिव लूनपक्षैः ॥१९८॥
सुमुखेन वदन्ति वल्गना प्रहरन्त्येव शितेन चेतसा ।
मधु तिष्ठति वाचि योषितां हृदये हालहलं महद्विषम् ॥१९९॥
अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते ।
पुरुषैः सुखलेशवञ्चितैर्मधुलुब्धैः कमलं यथाऽलिभिः ॥२००॥

अनृतमिति ।—याः रमण्यः, अनृतम् असत्यं, सत्यमिति, तथा सत्यमपि अनृतमिति, आहुः, इह अत्र संसारे, धीरैः प्रवीणैः, पुरुषैः ताः नार्यः, कथं संरक्ष्याः ? यदि एव व्यापयितुं शक्याः ? नैव रक्षितुं शक्या इति भावः ॥ १९७ ॥

नेति ।—यतः ताः प्रमदाः, लूनपक्षैः छिन्नपक्षैः, खण्डयनासमर्थैः इत्यर्थः, काकैरिव अतिप्रसक्तैः अत्यनुरक्तैः, पुरुषैः [करणे हतीया] क्रीडन्ति यथाऽभिलषितं व्यवहरन्तीत्यर्थः ; ततः प्रमदासु नारीषु, अतिप्रसङ्गः अत्यासक्तिः, न कार्यः, विप्रयोगाऽसहिष्णुत्वं न कर्त्तव्यमित्यर्थः, तथा स्त्रीषु विवर्द्धमानं विशेषेण वृद्धिं गच्छत् बलं तेजः इत्यर्थः, प्रभावमिति यावत्, न इच्छेत्, धीर इति शेषः । उपजातिः वृत्तम् ॥ १९८ ॥

सुमुखेनेति ।—एताः वल्गना मनोहरेण, सुमुखेन सुप्रसन्नेन मुखेन, वदन्ति आलपन्ति, किन्तु शितेन तीक्ष्णेन, चेतसा मनसा, प्रहरन्त्येव, पुंसांसमिति शेषः ; मधुरालापिन्योऽपि रमण्यः हृदयकाठिन्येन नितरामत्यन्तमेवाहि पाषाणसदृश्यो भवन्तीति भावः । यतः योषितां स्त्रीणां, वाचि आलापे, मधु मधुवत् सुमधुरं वाक्यजातं, हृदये मनसि तु, महत् तीव्रं, हालहलं कालकूटं, विषं विषवद्दुःखदं वर्त्तिष्यते, तिष्ठति विद्यते । सुन्दरी वृत्तम् ।—"यद्यभीर्यदि सौ जगौ युजौ: सजरा स्त्री यदि सुन्दरी तदा" इति लक्षणात् ॥१९९॥

अत इति ।—अत एव यस्मादेव कारणात्, मुखे मधुसद्भावात् हृदये च विषसद्भावादिति भावः, सुखलेशेन यत्किञ्चिन्मुखरागमात्रेणापीति भावः, वञ्चितैः विप्रलब्धैः, नारीणां नियतकपटव्यवहारेण नितरामुद्विजितैरिति भावः, मधुलुब्धैः मधुरालापलोलुपैः, पुरुषैः, मधुलुब्धैः मधुपिपासुभिः, अलिभिः भ्रमरैः, कमलं यथा पद्ममिव, अधरः, तासामिति शेषः, निपीयते निःशेषेण आस्वाद्यते, चुम्ब्यते इति यावत्, हृदयन्तु मुष्टिभिरेव ताड्यते कुचमर्दनेन प्रक्रियते । अथवापि सुन्दरी वृत्तम् ॥ २०० ॥

अपि च,—

आवर्त्तः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतगृहं चेत्रमप्रत्ययानाम् ।
दुर्वार्ह्यं यन्महद्भिर्नरवरऋषभैः सर्वमायाकरण्डं
स्त्रीयन्त्रं केन लोके विधमसृतयुतं धर्मनाशाय सृष्टम् ? ॥२०१॥
कार्कश्यं स्तनयोर्दृशोस्तरलताऽलीकं मुखे दृश्यते
कौटिल्यं कचसंचये प्रवचने मार्दवं त्रिके स्खलता ।
भीरुत्वं हृदये सदैव कथितं मायाप्रयोगः प्रिये
यासां दोषगणो गुणा मृगदृशां ताः किं नराणां प्रियाः ? ॥२०२॥

एता हसन्ति च रुदन्ति च कार्यहेतोः
विश्वासयन्ति च परं न च विश्वसन्ति ।

आवर्त्त इति ।—स्त्रीकं जगति, केन विधात्रा, धर्मनाशाय सर्वासां मायानां कपटव्यवहाराणां करण्डं पात्रविशेषः, तथा अमृतयुतं सुधामिश्रितं, विषं तत्स्वरूपमित्यर्थः, स्त्रीयन्त्रं नारीरूपं यन्त्रं, सृष्टं, तत्तु न ज्ञाने इति शेषः, यत् यन्त्रं, संशयानां सन्देहानाम्, आवर्त्तः भ्रमिस्थानं, ("स्यादावर्त्तोऽम्भसां भ्रमः" इत्यमरः) अविनयस्य दुर्नयस्य, भवनम् आश्रयः, साहसानां पत्तनं नगरस्वरूपं, दोषाणां सन्निधानं निकेतनं, कपटशतानां चातुरीसमूहानां, गृहम् आश्रयस्वरूपम्, अप्रत्ययानाम् अविश्वासानां, क्षेत्रं स्थानं, महद्भिः नरवरऋषभैः मानवश्रेष्ठैः इत्यर्थः, (अपिरवाच्याढ्यार्थः) दुर्वार्ह्यं यद्दोतुमशक्यं, यन्नीकर्तुमशक्यमित्यर्थः । रूपकालङ्कारः । वसन्ततिलका वृत्तम् ॥२०१॥

कार्कश्यमिति ।—यासां मृगदृशां, मृगयोः कुरङ्गयोः, कार्कश्यं काठिन्यं, दृशोः नेत्रयोः, तरलता चञ्चलता, मुखे अलीकं सदा असत्यवाक्यं, कचसंचये केशनिचये, कौटिल्यं वक्रता, भङ्गिमत्ता इत्यर्थः, प्रवचने आलापे, मार्दवम् मृदुता, त्रिके नितम्बे इति यावत् ("पृष्ठवंशाधरे त्रिकम्" इत्यमरः) स्खलता विभ्रान्तता, हृदये सदैव भीरुत्वं भयशीलता, तथा प्रिये स्वामिनि, कथितं वचनं, मायाप्रयोगः छाद्मव्यवहृतिमित्यर्थः ; दृश्यं दोषगणः दोषसमूहः, उपपीति शेषः, यासां गुणाः, भवन्तीति शेषः, मृगत्वेन दृष्टान्ते लोकैरिति भावः, ताः ताहृश्यः स्त्रियः, किं कथं, केन प्रकारेणेत्यर्थः, नराणां प्रियाः ? प्रीतिजनक्यः, भवितुमर्हन्ति इति शेषः ; नैव प्रियतामर्हन्ति, सर्वदोषाकरत्वादिति भावः । आर्यावृत्तम् ॥ २०२ ॥

तस्मात् नरेण कुलशीलवता सदैव
कार्यः श्मशानवटिका इव वर्जनीयाः ॥ २०३ ॥
व्याकीर्णकेसरकरालमुखा मृगेन्द्रा
नागाश्च भूरिमदराजिविराजमानाः ।
मेधाविनश्च पुरुषाः समरेषु शूराः
स्त्रीसन्निधौ परमकापुरुषा भवन्ति ॥ २०४ ॥
कुर्वन्ति तावत् प्रथमं प्रियाणि यावन्न जानन्ति नरं प्रमत्तम् ।
ज्ञात्वा च तं मन्मथपाशबद्धं यस्तामिषं मीनमिवोद्धरन्ति ॥२०५॥

एता इति ।—एताः नार्यः, कार्यैकैनीः स्वकार्यसाधनार्थं, ["वित्तैकैनीः" इति सञ्जकटिके पाठः] कदाचित् हसन्ति च, कदाचित् रुदन्ति च, परम् अपरञ्जनं, ["पुरुषम्" इति वा पाठः] विश्वासयन्ति विश्वासं नयन्ति च ; किन्तु न च विश्वस्यन्ति, स्वयमिति शेषः ; तस्मात् कुलशीलवता कौलीन्यचारित्रयुक्ता, ["कुलशीलसमन्वितेन" इति वा पाठः] नरेण, नार्यः श्मशानवटिका इव श्मशानस्था वटतरव इव, मूलांशसत्त्वेन भयप्रदत्वादिति भावः ; ["वेश्याः श्मशानसमनाः" इति पाठोऽपि दृश्यते] सदैव वर्जनीयाः परिहरणीयाः इत्यर्थः । वसन्ततिलकं वृत्तम् ॥ २०३ ॥

व्याकीर्णेति ।—व्याकीर्णैः विशेषेण इतस्ततो विलुलितैः, केसरैः सटाभिः, ("सटा संटाकेसरयोः" इत्यमरः) करालानि भीषणानि, मुखानि येषां ते तथोक्ताः, मृगेन्द्राः सिंहाः, भूरिभिः बहुभिः, मदराजिभिः दानधाराभिरित्यर्थः, विराजमानाः विशेषेण शोभमानाः, मदस्रविणः इत्यर्थः, नागाः हस्तिनश्च, तथा मेधाविनो बुद्धिमन्तः, समरेषु सङ्ग्रामेषु, शूराः महावीराः, पुरुषाश्च, स्त्रीसन्निधौ नारीसमीपे, परमकापुरुषाः पौरुषविहीनाः, भवन्ति ; दुर्दान्तेभ्यो येभ्यः सर्वेऽपि बिभ्यति, ते पुनः रमणीसन्निधिम् आसाद्य किमुता विचित्रा इव जायन्ते इति भावः । वसन्ततिलकं वृत्तम् ॥२०४॥

कुर्वन्तीति ।—रमण्यः इति कर्तृपदमवाध्याहार्यम् । प्रथमं, यावत् नरं पुरुषं, प्रमत्तं प्रकटानुरागिणं, न जानन्ति न बुध्यन्ते, तावत् प्रियाणि कुर्वन्ति प्रियकार्यैश्च पुरुषं रञ्जयन्तीति भावः ; ततः तं पुरुषं, मन्मथपाशेन कामबन्धनरज्वा, बद्धं नियन्त्रितम्, अत एव यं गृहीतं, निर्चितम् इति यावत्, आमिषं बडिशविद्धमांसखण्डं येन तथाभूतं, मीनमिव मत्स्यमिव, ज्ञात्वा उद्धरन्ति प्रियव्यवहारं त्यजन्ति इत्यर्थः ; गृहीतानिर्वेश मत्स्येन यथा यत्रेच्छं क्रीडन्ति, तद्वत् तैनापीति भावः । इन्द्रवज्रा वृत्तम् ॥२०५॥

समुद्रवीचीव चलस्वभावाः सन्ध्याभ्ररेखेव मुहूर्तरागाः ।
स्त्रियः कृतार्थाः पुरुषं निरर्थं निष्पीड्य निर्भर्त्स्य वदन्त्यजस्रम् ॥ २०५ ॥

अनृतं साहसं माया मूर्खत्वमतिलोभता ।
अशौचं निर्दयत्वञ्च स्त्रीणां दोषाः स्वभावजाः ॥ २०६ ॥

सम्मोहयन्ति मदयन्ति विडम्बयन्ति
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।
एताः प्रविश्य सरलं हृदयं नराणां
किं वा नु वामनयना न समाचरन्ति ? ॥ २०७ ॥

समुद्रेति ।—समुद्रस्य वीचीव तरङ्ग इव, चलस्वभावः, स्वभावो यासां ताः, समुद्रतरङ्गवत् अस्थिरप्रकृतयः, [समुद्रपदेन सर्वथा चञ्चलत्वं ध्वन्यते । अत्र गमकत्वात् समासः] सन्ध्याभ्ररेखेव सायङ्कालिकनभोलक्ष्म इव, [इवेन नित्यसमासः] मुहूर्तरागाः क्षणमात्ररक्ताः, [अत्र सन्ध्यापदेन तथैव रागहानिः ध्वन्यते] स्त्रियः, कृतार्थाः सिद्धकामाः सत्यः, स्वाभिलाषपूर्त्यनन्तरमेवेत्यर्थः, निरर्थं निर्धनं, पुरुषं, निष्पीड्य निःशेषेण निर्गालितरसं, यत् अलक्तकं तदत् त्यजन्ति ; त्यक्ताः यथा अलक्तस्य क्षरसं रसं निःशेषेण संहृत्य दैन्यं त्यजन्ति, तथा धनिभ्यः कामुकेभ्यः अशेषमेव धनं गृहीत्वा तान् गृहान्निःसारयन्तीति भावः । उपजातिः छन्दः ॥२०५॥

अनृतमिति ।—अनृतम् असत्यभाषणं, साहसम् अविमृश्यकारित्वं, माया कपटता, मोहनमन्त्रवद्वारविशेषः इत्यर्थः, मूर्खत्वं ज्ञानम्, अज्ञानतेत्यर्थः, अतिलोभता अतिलोलुपत्वम्, अशौचम् अपवित्रता, मलिनत्वमित्यर्थः, मनस इति भावः ; निर्दयत्वं निष्ठुरत्वञ्च ; एते स्त्रीणां स्वभावजाः स्वाभाविकाः, दोषाः, भवन्तीति शेषः ॥२०६॥

सम्मोहयन्तीति ।—एताः वामनयनाः वामः कामः, नयने दर्शने यासां ताः अटाक्षेण पुरुषान् कामसुग्धान् कुर्वत्य इत्यर्थः, यद्वा,—वामे प्रतीपे, प्रतिकूले इत्यर्थः, वामे वक्षुषी, मनोज्ञे इत्यर्थः वा, ("वामो वक्षुपत्योपौ हो" इत्यमरः) नयने यासां ताः, प्रतीपदर्शिन्यः सुलोचना वा, नार्यः, नरान्या सरलम् अकपटं, सुकोमलमित्यर्थः, हृदयं प्रविश्य, नु इति प्रश्ने, किं वा न समाचरन्ति ? न कुर्वन्ति ? तथा हि, सम्मोहयन्ति सम्यक् मुग्धं कुर्वन्ति, पुरुषमिति शेषः, मदयन्ति उन्मत्तां नयन्ति, विडम्बयन्ति प्रतारयन्ति, लोकमेन सर्वं इदन्नीत्यर्थः, निर्भर्त्सयन्ति तिरस्कुर्वन्ति, रमयन्ति सुरतादिना क्रीडयन्ति, तथा विषादयन्ति विषण्णं कुर्वन्ति, अविद्याचरत्वेन खीणां नयन्तीति भावः ; अहो यत् कर्तुमिच्छन्ति, तदा तदेव कुर्वन्तीति निष्कर्षः । वसन्ततिलकं छन्दः ॥२०७॥

अन्तर्विषमया क्षीता बहिरेव मनोरमाः।
गुञ्जाफलसमाकारा योषितः केन निर्मिताः?' ॥२०९॥

एवं चिन्तयतः तस्य परिव्राजकस्य सा निशा महता क्लेशेन अतिचक्राम। सा च दूतिका छिन्ननासिका स्वगृहं गत्वा चिन्तयामास,—'किमिदानीं कर्त्तव्यम्? कथमेतत् (भ) मच्छिद्रं स्वगयितव्यम्?' अथ तस्याः एवं विचिन्तयन्त्या भर्त्ता कार्य्यवशात् राजकुले (म) पर्य्युषितः प्रत्यूषे च स्वगृहमभ्युपेत्य द्वारदेशस्थः (य) विविधपौरकृत्योत्सुकतया तामाह,—'भद्रे! शीघ्रमानीयतां क्षुरभाण्डं, येन क्षौरकर्मकरणाय गच्छामि'। साऽपि छिन्ननासिका गृहमध्यस्थितैव कार्य्यकरणापेक्षया क्षुरभाण्डात् क्षुरमेकं समाकृष्य, तस्य अभिमुखं प्रेषयामास। नापितोऽपि (र) उत्सुकतया तमेकं क्षुरमवलोक्य कोपाविष्टः सन् तदभिमुखमेव तं क्षुरं प्राहिणोत्। एतस्मिन् अन्तरे सा दुष्टा ऊर्द्ध्वबाहुं (ल) विधाय फूत्कर्त्तुमना गृहात् निरक्रामः; आह च,—'अहो! पापेन अनेन मम सदा-

अन्तरिति।—अन्तर्विषमयाः अन्तः अभ्यन्तरे, हृदयावच्छेदे इति भावः, विषमयाः गरलप्रचुराः, विषमयहृदयाः इत्यर्थः, बहिरेव शरीरबहिःप्रदेशे, मनोरमाः लावण्यवत्यः, वचसा मनोहारिण्या इत्यर्थः, विषकुम्भं पयोमुखमिवेति भावः; अत एव गुञ्जाफलैः "कुँच" इति प्रसिद्धैः फलविशेषैः, समाः आकारा यासां तथाविधाः, एताः योषितः केन जनेन, निर्मिताः सृष्टाः? गुञ्जाफलं बहिरतिरम्यं हसति, परन्तु अन्तर्विषमयं यत्तत्सदृशितं विषवत पीड़यन्तीति बोद्धव्यम् ॥२०९॥

(भ) छिद्रं—नासारन्ध्रं, क्षतञ्च वा। स्वगयितव्यं—गोपायितव्यम्।

(म) पर्य्युषितः,—निशायां स्थितः, क्षतरात्रिर्यापन इत्यर्थः।

(य) विविधपौरकृत्योत्सुकतया—बहुनागरिकक्षौरकार्य्यव्याकुलतया।

(र) उत्सुकतया—शीघ्रगमनौत्सुक्यतया। प्राहिणोत्—अक्षिपत्।

(ल) विधाय—कृत्वा इत्यर्थः। फूत्कर्त्तुमनाः,—फूत्कारेण शोकावाप्तदुःखा इत्यर्थः।

चरवर्त्तिन्या: पश्यत नासिकाच्छेदो विहित:, तत् परित्रायध्वं परित्रायध्वम्'। अत्रान्तरे राजपुरुषा: समभ्येत्य तं नापितं बहुप्रहारै: जर्जरीकृत्य दृढबन्धनैर्बद्ध्वा तया छिन्ननासिकया सह धर्माधिकरणस्थानं नीत्वा सभ्यान् ऊचु:,—'शृण्वन्तु भवन्त: सभासद: ! अनेन नापितेन अपराधं विना स्त्रीरत्नमेतत् (व) व्यङ्गितम् ; तदस्य यत् युज्यते तत् क्रियताम्' इति अभिहिते सभ्या ऊचु:,—'रे नापित ! किमर्थं त्वया भार्या व्यङ्गिता ? किमनया परपुरुषोऽभिलषित: ? (ग) उतस्वित् प्राणद्रोह: कृत: ? किंवा चौर्यकर्म आचरितम् ? तत् कथ्यताम् अस्या: अपराध:'। नापितोऽपि प्रहारपीडिततनुर्वक्तुं न शशाक। अथ तं तूष्णीभूतं दृष्ट्वा पुन: सभ्या: ऊचु:,—'अहो ! सत्यमेतत् राजपुरुषाणां वच:, पापात्मा अयम्। अनेन इयं निर्दोषा (घ) वराकी दूषिता। उक्तञ्च,—

भिन्नस्वरमुखवर्ण: शङ्कितदृष्टि: समुत्पततितेजा: ।
भवति हि पापं कृत्वा स्वकर्मभिर्लक्षित: पुरुष: ॥२१०॥

तथा च,—आयाति स्खलितै: पादैर्मुखवैवर्ण्यसंयुत: ।
ललाटस्वेदभाक् भूरि गद्गदं भाषते वच: ॥ २११ ॥

(ङ) व्यङ्गितम्—भङ्गविकीर्णं कृतमित्यर्थ:। यत्—याद्दशं दण्डमित्यर्थ:।

(ग) उतस्वित्—अथवा। प्राणद्रोह:,—जीवनाशश्चेद:।

(घ) वराकी—कातरा, दीना इत्यर्थ:।

भिन्नेति।—पापं कृत्वा, स्वकर्मभि: स्वेन पापकर्मणा, लक्षित: सम्यक् ज्ञातं नीत:, पुरुष:, भिन्न: पृथग्भूत:, विकृतिं गत इत्यर्थ:, स्वर: कण्ठध्वनि:, मुखवर्णश्च मुखस्य गौरश्यामादिरूप: स्वाभाविकवर्णश्च यस्य तथाभूत:, शङ्किता चलिता, दृष्टिर्यस्य तादृश:, तथा समुत्पतितं विनष्टमित्यर्थ:, तेजो यस्य तथाभूत:, निष्प्रभ इत्यर्थ:, भवति हि, हिशब्दोऽवधारणार्थ:। आर्या इयम् ॥२१०॥

आयातीति।—पापी नर इति वाक्यार्थ:, स्खलितै: पदे पदे स्रोतद्भि:, पादै: उपलक्षित:, आयाति आगच्छति, तथा मुखवैवर्ण्यसंयुत: विवर्णमुखकान्ति:, ललाट-

अधोदृष्टिर्भवेत् कृत्वा पापं प्राप्तः सभां नरः।
तस्मात् यत्नात् परिक्षेयश्चिह्नैरेतैर्विचक्षणैः॥ २१२॥
अन्यच्च—प्रसन्नवदनो हृष्टः स्पष्टवाक्यः सरोषदृक्।
सभायां वक्ति सामर्षं सावष्टम्भो नरः शुचिः॥ २१३॥

तदेषः (स) दुष्टचरित्रलक्षणो दृश्यते, स्त्रीधर्षणात् वध्यः इति; तत् शूलेऽयमारोप्यताम्' इति।

अथ वध्यस्थाने नीयमानं तम् अवलोक्य देवशर्मा ताम् (ह) धर्माधिकृतान् गत्वा प्रोवाच,—'भो भोः! अन्यायेन एषः वराको बध्यते, नापितः साधुसमाचार एषः। तत् श्रूयतां मे वाक्यं,—जम्बुको हुड्युद्धेन' इति। अथ ते सभ्याः ऊचुः,—'भो भगवन्! कथमेतत्?' ततो देवशर्मा तेषां त्रयाणामपि वृत्तान्तं विस्तरेण अकथयत्। तदाकर्ण्य सुविस्मितमनसस्ते नापितं विमोच्य मिथः प्रोचुः,—'अहो!—

अवध्यो ब्राह्मणो बालः स्त्री तपस्वी च रोगभाक्।
विज्ञिता व्यक्तिता तेषामपराधे महत्यपि॥ २१४॥

श्वेदभाक् खिन्नललाटश्च सन्, भूरि बहु, गद्गदम् अस्पष्टं, वचः भाषते॥२११॥

अधोदृष्टिरिति।—पापं कृत्वा सभां धर्माधिकरणं, प्राप्तो नरः, अधोदृष्टिः अधोमुख इत्यर्थः, भवेत्; तस्मात् विचक्षणैः निपुणैः, पुरुषैरिति शेषः, एतैः पूर्वोक्तैः, चिह्नैः लक्षणैः, यत्नात् प्रयत्नात्, परिक्षेयः बोद्धव्यः, पापीति शेषः॥२१२॥

प्रसन्नवदन इति।—शुचिः निर्दोषः, नरः प्रसन्नवदनः सौम्यानन, हृष्टः पुलकितः, स्पष्टवाक्यः अस्खलितवचः, सरोषदृक् क्रोधपूर्णदृष्टिः, मिथ्याऽभियोगजाभ्रमणादिति भावः, सावष्टम्भः सगर्वः, भवतीति शेषः, अत एव सभायां धर्माधिकरणे इत्यर्थः, सामर्षं सक्रोधं, वक्ति कथयति, निर्दोषः सर्वं निवेदयतीति फलितार्थः॥२१३॥

(स) दुष्टेति।—दुष्टचरित्रस्य लक्षणं—चिह्नं यत्र तथोक्तः। स्त्रीधर्षणात्—स्त्रियाः अवमाननात्, नासाच्छेदकरणादिति यावत्।

(ह) धर्माधिकृतान्—विचारकान्। वराकः,—निर्दोषः।

अवध्य इति।—महति अपराधेऽपि ब्राह्मणः, बालः शिशुः, स्त्री, तपस्वी,

तदस्या नासिकाच्छेदः (च) स्वकर्मणा हि संवृत्तः ; ततो राजनिग्रहस्तु कर्णच्छेदः कार्यः'। तथाऽनुष्ठिते देवशर्माऽपि वित्तनाशसमुद्भूतशोकरहितः पुनरपि स्वकीयं मठायतनं जगाम। अतोऽहं ब्रवीमि,—'जम्बुको हुडुयुद्धेन' इति"।

करटक आह,—"एवंविधे (क) व्यतिकरे किं कर्त्तव्यमावयोः ?" दमनकोऽब्रवीत्,—"एवंविधेऽपि समये बुद्धिस्फुरणं भविष्यति, येन सञ्जीवकं (ख) प्रभोः विश्लेषयिष्यामि। उक्तञ्च—

एकं हन्यात् न वा हन्यादिषुर्मुक्तो धनुष्मता।
बुद्धिर्बुद्धिमता सृष्टा हन्ति राष्ट्रं सनायकम् ॥ २१५ ॥

तदहं (ग) मायाप्रपञ्चेन गुप्तमाश्रित्य तं स्फोटयिष्यामि"।

करटक आह,—"भद्र! यदि कथमपि तव (घ) मायाप्रवेशं पिङ्गलकः ज्ञास्यति, सञ्जीवको वा, तदा नूनं विघातः एव"। सोऽब्रवीत्,—"तात! नैवं वद, (ङ) गूढबुद्धिभिः आपत्काले विधुरेऽपि दैवे बुद्धिः प्रयोक्तव्या, नोद्यमस्त्याज्यः, कदाचित्

रोगभाक् रोगी च, भवध्यः न हन्तव्यः। तेषां व्यङ्गिता विकृताङ्गता, विहिता, येन केनचिदङ्गेन एतेषां वियोगः कार्यः इति आख्तनियमः इत्यर्थः ॥२१४॥

(च) स्वकर्मणा—निजकृतपापेनेत्यर्थः। राजनिग्रहः,—राजदण्डः।

(क) व्यतिकरे—व्यसने,("अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयोः" इति मेदिनी)।

(ख) प्रभोः,—पिङ्गलकात्। विश्लेषयिष्यामि—वियोजयिष्यामि।

एकमिति।—धनुष्मता धानुष्केण, मुक्तः निक्षिप्तः, इषुः शरः, एकं लक्ष्यमित्यर्थः, हन्यात् हन्तुं शक्नुयात्, न वा हन्यात् हन्तुं न शक्नुयाद्वा, किन्तु बुद्धिमता सृष्टा प्रयुक्ता, बुद्धिः विलक्षणकारित्वमित्यर्थः, सनायकं स्वामिसहितं, राष्ट्रं राज्यं, हन्ति। अत्र इषोरपि बुद्धेरुत्कर्षात् व्यतिरेकालङ्कारः। तदुक्तं दर्पणे,—"आधिक्यमुपमेयस्योपमानाद्यूनताऽथवा। व्यतिरेक एक उक्ते हेतौ नीते स च त्रिधा ॥" इति ॥२१५॥

(ग) मायाप्रपञ्चेन—चातुरीविस्तारेण। स्फोटयिष्यामि—वियोजयिष्यामि।

(घ) मायाप्रवेशं—कपटाचरणमित्यर्थः। विघातः,—व्याघातः, विपदित्यर्थः।

(ङ) गूढबुद्धिभिः,—कूटबुद्धिभिरित्यर्थः। विधुरे—प्रतिकूले। उद्यमः,—

घुणाक्षरन्यायेन बुद्धेः सामान्यं भवति। उक्तञ्च,—

त्याज्यं न धैर्यं विधुरेऽपि दैवे
धैर्यात् कदाचित् स्थितिमाप्नुयात् सः।
जाते समुद्रेऽपि हि पोतभङ्गे
सांयात्रिको वाञ्छति कर्म एव ॥ २१६ ॥

तथा च,—उद्योगिनं सततमत्र समेति लक्ष्मीः
दैवं हि दैवमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ २१७ ॥

उद्योगः, पुरुषकार इत्यर्थः। घुणाक्षरन्यायेनेति।—घुणो नाम काष्ठभक्षकः कीटविशेषः, तेन कृतमक्षरं, तस्य न्यायः, तेन, स यदा काष्ठं प्रविशति, तदा क्रमेण काष्ठं कृन्तन् कृन्तन् यत खननवर्त्म करोति, तदेव कदाचिदक्षरवत् प्रतीयते चेत् तदा लोकैर्घुणकृतमेतदक्षरमिति मन्यते; इत्थनेन प्रकारेणेव: न्यायः घुणाक्षरः इति प्रसिद्धः। बुद्धेः,—बुद्धिवशात्। सामान्यं भवति—सामान्यलाभो भवति इत्यर्थः।

त्याज्यमिति।—दैवे विधुरे विपरीतेऽपि, धैर्यं न त्याज्यं न हातव्यम; यतः सः प्रतिकूलदैवी जनः इत्यर्थः, धैर्यात् कदाचित् अस्मिन्नपि काले, स्थितिं स्थानं, यथाऽभिमतमिति भावः, आप्नुयात् लभेत। तथा हि, समुद्रे जलधौ, पोतभङ्गे नौकाभङ्गे, वाणिज्यद्रव्यपूर्णयानभङ्गे इत्यर्थः, जाते सम्पन्नेऽपि, सांयात्रिकः पोतवणिक्, ("सांयात्रिकः पोतवणिक्" इत्यमरः) कर्म स्वं वाणिज्यमेव, वाञ्छति धैर्यमाश्रित्य पुनरपि कर्तुमिच्छति, न पुनः व्यवसायात् विचलतीति भावः। "कर्म एव" इत्यत्र सन्धिरार्षित्वं दोषः। अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः। तदुक्तं दर्पणे,—"सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते। साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः॥" इति। इन्द्रवज्रा वृत्तम् ॥२१६॥

उद्योगिनमिति।—अत्र संसारे, लक्ष्मीः श्रीः, सततम् उद्योगिनं सोद्यमं जनं, समेति प्राप्नोति, कापुरुषाः पौरुषविहीनाः अक्षमाः पुरुषाः, हि दैवं दैवं "दैवमेव परत्रेह नान्यत्" इति वदन्ति; अत एव दैवं निहत्य निरस्य, आत्मशक्त्या स्वसामर्थ्येन, पौरुषं पुरुषकारं, कुरु अवलम्बस्वेत्यर्थः, यत्ने पुरुषकारे इत्यर्थः, कृते सति यदि न सिध्यति, कार्यम् इति शेषः, तदा अत्र यत्ने, कः कोऽपि, दोषः यत्नप्रयोगकर्तुस्त्रुटिर्विद्यते

तदेवं ज्ञात्वा सुगूढ़बुद्धिप्रभावेण यथा तौ द्वौ अपि न ज्ञास्यतः, तथा मिथो वियोजयिष्यामि। उक्तञ्च,—

सुगुप्तस्यापि दम्भस्य ब्रह्माऽप्यन्तं न गच्छति।
कौलिको विष्णुरूपेण राजकन्यां निषेवते" ॥ २१८ ॥

करटक आह,—"कथमेतत् ?" । सोऽब्रवीत्,—

कथा ५ ।

"कस्मिंश्चिदधिष्ठाने कौलिकरथकारौ मित्रे प्रतिवसतः स्म। तत्र च तौ बाल्यात् प्रभृति सहचारिणौ परस्परमतीव स्नेहपरौ सदा एकस्थानविहारिणौ कालं नयतः। अथ कदाचित् तत्राधिष्ठाने कस्मिंश्चिद्देवायतने यात्रामहोत्सवः संवृत्तः। तत्र च (च) नटनर्त्तकचारणसङ्कुले नानादेशागतजनाकुले तौ सहचरौ भ्रमन्तौ काञ्चिद्राजकन्यां (छ) करेणुकारूढां सर्वलक्षणसनाथां कञ्चुकिवर्षवरपरिवारितां देवतादर्शनार्थं समायातां दृष्टवन्तौ। अथासौ कौलिकस्तां दृष्ट्वा विषार्दित

इति बोद्धव्यम्, अन्यथा कथं कार्यसिद्धिर्न भवेत् ? सम्यक् यत्नेन कर्तुं शक्यते तर्हि नूनमेव कार्यसिद्धिरिति निष्कर्षः। ["सदृशीमिमं पुरुषसिंहमुपेति सम्पदैवेन देयमिति कापुरुषा वदन्ति" इति प्रथमार्द्धे पाठान्तरम्]। वसन्ततिलकं वृत्तम् ॥२१७॥

सुगुप्तस्येति।—ब्रह्मा स्वयं विधाताऽपि, अन्येषां का कथेति अभ्यर्थः, सुगुप्तस्य गूढं प्रयुक्तस्य, दम्भस्य कपटस्य, अन्तं पारं, न गच्छति अपि नावबुध्यते इति सम्भावयामि इत्यर्थः। अपिरत्र सम्भावनायाम्। तथा हि, कौलिकः कश्चित् तन्तुवायः, विष्णुरूपेण कपटविष्णुरूपं धृत्वा, राजकन्यां निषेवते भुङ्क्ते ॥२१८॥

(च) नटेति।—नटाश्च नर्त्तकाश्च चारणाः,—कुशीलवाश्च तैः सङ्कुले—व्याप्ते।

(छ) करेणुकारूढां—द्विपिनीमारूढां यानताम्। सर्वेति।—सर्वैः सकलैः,—गुणविशेषैः, सनाथां—युक्तां तां, सर्वसुलक्षणसम्पन्नाम्। कञ्चुकीति।—कञ्चुकिभिः,—अन्तःपुरचरवृद्धप्राज्ञैः, "अन्तःपुरचरो वृद्धो विप्रो गुणसमन्वितः। सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते ॥" इति लक्षणान्वितैरित्यर्थः, वर्षवरैः—नपुंसकश्रेष्ठैश्च, परिवारितां—परिवेष्टितां, वेष्टितामित्यर्थः।

इव दुष्टग्रहगृहीत इव कामशरैः हन्यमानः सहसा भूतले निपपात। अथ तं तदवस्थम् अवलोक्य रथकारः तद्दुःखदुःखितः (ज) आप्तपुरुषैस्तं समुत्क्षिप्य स्वगृहमानाययत्। तत्र च विविधैः (झ) शीतोपचारैः चिकित्सकोपदिष्टैः मन्त्रवादिभिरुपचर्य्यमाणः चिरात् कथञ्चित् सचेतनो बभूव। ततो रथकारेण पृष्टः,—'भो मित्र! किमेवं त्वम् अकस्मात् विचेतनः सञ्जातः? तत् कथ्यताम् आत्मस्वरूपम्'। सः आह,—'वयस्य! यदि एवं, तत् शृणु मे रहस्यं, येन सर्वाम् आत्मवेदनां ते वदामि। यदि त्वं मां सुहृदं मन्यसे, तदा (ञ) काष्ठप्रदानेन प्रसादः क्रियताम्; क्षम्यतां यद्वा किञ्चित् प्रणयातिरेकात् अयुक्तं तव मया अनुष्ठितम्'। सोऽपि तदाकर्ण्य (ट) वाष्पपिहितनयनः सगद्गदमुवाच,—'वयस्य! यत् किञ्चित् दुःखकारणं तद्वद, येन प्रतीकारः क्रियते, यदि शक्यते कर्त्तुम्। उक्तञ्च,—

औषधार्थसुमन्त्राणां बुद्धेश्चैव महात्मनाम्।
असाध्यं नास्ति लोकेऽत्र यद्ब्रह्माण्डस्य मध्यगम्॥ २१८॥

तदेषां चतुर्णां यदि साध्यं भविष्यति, तदा अहं साधयि-

(ज) आप्तपुरुषैः,—आत्मीयजनैः। समुत्क्षिप्य—समुत्थाप्य।

(झ) शीतोपचारैः,—शीतलप्रक्रियाभिः। मन्त्रवादिभिः,—भूतविद्याऽभिज्ञैरित्यर्थः। उपचर्य्यमाणः,—सेव्यमानः।

(ञ) काष्ठप्रदानेन—चितारचनेन इत्यर्थः। प्रणयातिरेकात्—प्रीतिबाहुल्यात्।

(ट) वाष्पेति।—वाष्पेण—नेत्रजलेन, पिहिते—आच्छादिते, नयने यस्य तादृशः। सगद्गदं—गद्गदैः,—अव्यक्तास्फुटशब्दैः, तेन सह वर्त्तमानं तद्यथा तथा।

औषधेति।—अत्र यच्छब्दः, लोके संसारे, यत् वस्तु, ब्रह्माण्डस्य जगतः, मध्यगम् अन्तर्गतं, जगति लभ्यमित्यर्थः, तत् वस्तु औषधं भेषजम्, अर्थः धनं, सुमन्त्रः सुमन्त्रणा तेषां, तथा महात्मनां बुद्धेश्च असाध्यं न अस्त्येव न विद्यते एव; सर्वमेव औषधेन अर्थेन सुमन्त्रेण बुद्धिबलेन च साधयितुं शक्यते इति फलितार्थः॥२१८॥

स्वामि'। कौलिक आह,—'वयस्य ! एतेषाम् अन्येषाम् अपि सहस्राणाम् उपायानाम् असाध्यं तत् मे दुःखम्। तस्मात् मम मरणे मा कालक्षेपं कुरु'। रथकार आह,—'भो मित्र ! यद्यपि असाध्यं, तथाऽपि निवेदय, येन अहमपि तत् असाध्यं मत्वा त्वया सह वह्नौ प्रविशामि, न क्षणमपि त्वद्वियोगं सहिष्ये, एष मे निश्चयः'। कौलिक आह,—'वयस्य ! या असौ राजकन्या करेणुकारूढा तत्र उत्सवे दृष्टा, तस्या दर्शनानन्तरं मकरध्वजेन मम इयम् अवस्था विहिता। तत् न शक्नोमि तद्दिनां सोढुम्।

तथा चोक्तं,—मत्तेभकुम्भपरिणाहिनि कुङ्कुमार्द्रे
तस्याः पयोधरयुगे रतखेदखिन्नः।
वक्षो निधाय भुजपञ्जरमध्यवर्त्ती
स्वप्स्ये कदा क्षणमवाप्य तदीयसङ्गम् ॥ २२० ॥

तथा च,—

रागी विम्बाधरोऽसौ स्तनकलसयुगं यौवनारूढगर्वं
नीचा नाभिः प्रकृत्या कुटिलकमलकं स्वल्पकञ्चापि मध्यम्।

मत्तेभेति।—तदा तदीयसङ्गं तस्याः सङ्गमम्, अवाप्य लब्ध्वा, रतखेदेन सुरतश्रमेण, खिन्नः क्लान्तः सन्, मत्तेभस्य मत्तगजस्य, यौ कुम्भौ तयोः परिणाहः विस्तारता इव परिणाहो यस्य तादृशे, ("परिणाहो विस्तारता" इत्यमरः) कुङ्कुमा[illegible]कुङ्कुमेन गन्धद्रव्यभेदेन, तद्विलेपनेनेत्यर्थः, आर्द्रे श्रीतले, तस्याः कन्यायाः, पयोधरयुगे कुचयुगले, वक्षो निधाय स्थापयित्वा, भुजपञ्जरमध्यवर्त्ती गाढालिङ्गनवद्धः सन्नित्यर्थः, क्षणं स्वप्स्ये निद्रां यास्यामि। [आत्मनेपदं विवक्षितम्]। वसन्ततिलकं वृत्तम् ॥२२०॥

रागीति।—तस्याः असौ विम्बाधरः, रागी रागवान्, रक्तः इत्यर्थः, [मात्सर्य्यवान् इति ध्वन्यते] स्तनकलसयुगं कुचकुम्भयुग्मं, यौवनेन आरूढः जातः, गर्वः औद्धत्यम्, औन्नत्यमिति यावत्, यत्र तथोक्तः, तादृशेन हेतुना प्राप्तोन्नत्यमित्यर्थः, [एतेन दर्पवत्त्वं ध्वन्यते] नाभिः नीचा निम्ना, गुप्तत्वाच्चेयमुक्ता इति भावः, [नीचत्वभावत्वञ्च व्यज्यते] अल्पकं पृथुत्वशून्यः, प्रकृत्या स्वभावेन, कुटिलकं वक्रं, अस्निग्धत्वादतीव सौन्दर्य्यवर्द्धकमिति भावः,

कुर्वन्त्वेतानि नाम प्रसभमिह मनश्चिन्तितान्याशु खेदं
यस्यां तस्याः कपोलौ दहत इति मुहुः स्वच्छको तत्र युक्तम्'॥२२१॥

रथकारोऽपि एवं सकामं तद्वचनम् आकर्ण्य सस्मितम् इदमाह,—'वयस्य! यदि एवं, तर्हि दिष्ट्या सिद्धं नः प्रयोजनम्। तत् अद्यैव तया सह समागमः क्रियताम्' इति। कौलिक आह,—'वयस्य! यत्र कन्याऽन्तःपुरे वायुं मुक्त्वा न अन्यस्य प्रवेशोऽस्ति, तत्र (ठ) रत्नापुरुषाधिष्ठिते कथं मम तया सह समागमः? तत् किं माम् असत्यवचनेन विडम्बयसि?' रथकार आह,—'मित्र! पश्य मे बुद्धिबलम्'। एवम् अभिधाय तत्क्षणात् (ड) कौलसञ्चारिणं वैनतेयं बाहुयुगलं वायुजङ्घदारुणा शङ्खचक्रगदापद्मान्वितं सकिरीटकौस्तुभम् अघटयत्। ततः तस्मिन् कौलिकं समारोप्य (ढ) विष्णुचिह्नितं कृत्वा कौलसञ्चरणविज्ञानञ्च दर्शयित्वा प्रोवाच,—'वयस्य! अनेन विष्णुरूपेण गत्वा कन्याऽन्तःपुरे

[कुटिलप्रकृतित्वञ्च व्यज्यते] मध्यमपि च, कटिदेशमपि, खल्वकं चीणमित्यर्थः; [अल्पमतित्वमपि व्यज्यते] एतानि मनश्चिन्तितानि मया मनसाऽऽलोचितानि सन्ति, आशु शीघ्रं, प्रसभं बलात्, इह अस्मिन्, मयीत्यर्थः, खेदं कुर्वन्तु जनयन्तु, नाम सम्भावनायाम; एतेषां रागवत्तादिदोषयोगात् लोकस्य मनःखेदनं सम्भाव्यते इति भावः; किन्तु स्वच्छको मुधो इत्यर्थः, [निर्मलाशयो इति व्यज्यते]; कपोलौ गण्डौ, मुहुः पुनः पुनः,मां दहतः सन्तापयतः, चिन्तने इति भावः, इति यत् तत् न युक्तम् उचितं, तयोर्वैमनस्यात् परखेदनस्य अयुक्तत्वादिति भावः। खग्धरा वृत्तम्॥ २२१॥

(ठ) रत्नापुरुषाधिष्ठिते—रक्षिवर्गपरिवृते। विडम्बयसि—प्रतारयसि।

(ड) कौलेति।—कौलेन—अद्भुना, कौलघूर्णनकौशलेनेत्यर्थः, सञ्चरति—सञ्चलतीति तथाविधम्। वैनतेयं—गरुडम्। वायुजेति।—वायुजो नाम हयभेदः, तस्य दारुणा—काष्ठेन, तस्य हयस्य अतीव लघुभारत्वात् सञ्चरत्यस्मिन्नरकौलीति भावः।

(ढ) विष्णुचिह्नितं—शङ्खादिपुरुषायुधस्य किरीटकौस्तुभयोश्च परिधापनेन विष्णुचिह्नधारिणम्। कौलसञ्चरणविज्ञानं—कौलसञ्चालनकौशलम्।

(ण) निशीथे तां राजकन्याम् एकाकिनीं (त) सप्तभूमिक-प्रासादप्रान्तगतां सुप्तस्वभावां त्वां (थ) वासुदेवं मन्यमानां स्वकीयमिथ्यावक्त्रोक्तिभिः रञ्जयित्वा (द) वात्स्यायनोक्तविधिना भज'। कौलिकोऽपि तत् आकर्ण्य, (ध) तथारूपः तत्र गत्वा ताम् आह,—'राजपुत्रि ! सुप्ता ? किं वा जागर्षि ? अहं तव कृते समुद्रात् सानुरागो लक्ष्मीं विहाय एव आगतः। तत् क्रियतां मया सह समागमः' इति। साऽपि गरुडारूढं चतुर्भुजं सायुधं कौस्तुभोपेतम् अवलोक्य सविस्मया शयनात् उत्थाय प्रोवाच,—'भगवन् ! अहं मानुषी (न) कोटिका अशुचिः, भवान् त्रैलोक्यपावनो वन्दनीयश्च ; तत् कथमेतत् युज्यते ?' कौलिकः आह,—'सुभगे ! सत्यम् अभिहितं भवत्या, किन्तु राधा नाम मे भार्या गोपकुलप्रसूता प्रथमम् आसीत्, सा त्वम् अत्र अवतीर्णा, तेन अहमत्र आयातः'। इति उक्ता सा प्राह, —'भगवन् ! यदि एवं, तत् मे (प) तातं प्रार्थय, सोऽपि अविकल्पं मां तुभ्यं प्रयच्छति'। कौलिक आह,—'सुभगे ! न अहं दर्शनपथं मानुषाणां गच्छामि, किं पुनरालापकरणम् ?

(ण) निशीथे—अर्द्धरात्रे।

(त) सप्तेति।—सप्तसङ्ख्या भूमयः,—उपर्युपरिभावेन स्थिता आलयविशेषा यत्र तादृशः, यः प्रासादः,—सप्ततलं राजभवनमित्यर्थः, तस्य प्रान्ते—सर्वोपरिगृहे, गतां—स्थिताम्। सुप्तस्वभावां—सुप्तप्रकृतिम्।

(थ) वासुदेवं—श्रीकृष्णम्। स्वकीयमिथ्यावक्त्रोक्तिभिः,—निजासत्यवचनैः कापट्यवाक्यैश्च।

(द) वात्स्यायनोक्तविधिना—वात्स्यायनेन मुनिना, उक्तः यो विधिः, स्वरचित-कामशास्त्रे इति भावः, तेन। भज—सेवस्व, रमस्वेत्यर्थः।

(ध) तथारूपः,—विष्णुचिह्नधरः सन्।

(न) कौटिका—तुच्छकोटिस्वरूपा, अतिक्षुद्रेति भावः। अशुचिः,—अपवित्रा। त्रैलोक्यपावनः,—त्रिभुवनपवित्रतासम्पादकः। युज्यते—सम्भवति।

(प) तातं—पितरम्। अविकल्पं—निःसंशयम्।

त्वं (फ) गान्धर्वेण विवाहेन आत्मानं प्रयच्छ, नो चेत् प्राणं दत्त्वा (ब) सान्वयं ते पितरं भक्षसात् करिष्यामि' इति। एवम् अभिधाय गरुड़ात् अवतीर्य (भ) सख्ये पाणौ गृहीत्वा, तां सभयां सलज्जां वेपमानां शय्यायामनयत्। ततश्च रात्रिशेषं यावत् वात्स्यायनोक्तविधिना निशेष्य प्रत्यूषे खगरूपम् अलक्षितो जगाम। एवं तस्य तां नित्यं सेवमानस्य कालो याति।

अथ कदाचित् कञ्चुकिनः तस्याः (म) अधरोष्ठप्रवालखण्डनं दृष्ट्वा मिथः प्रोचुः,—'अहो! पश्यत, अस्या राजकन्यायाः पुरुषोपभुक्तायाः इव शरीरावयवाः विभाव्यन्ते। तत् कथं सुरक्षितेऽपि अस्मिन् गृहे एवंविधो व्यवहारः? तत् राज्ञे निवेदयामः' एवं निश्चित्य सर्वे समेत्य राजानं प्रोचुः,—'देव! वयं न विद्मः, परं सुरक्षितेऽपि कन्याऽन्तःपुरे कश्चित् प्रविशति, तद्देवः (य) प्रमाणम्' इति। तत् श्रुत्वा राजा अतीव व्याकुलितचित्तो व्यचिन्तयत्,—

'पुत्रीति जाता महतीह चिन्ता
कस्मै प्रदेयेति महान् वितर्कः।
दत्ता सुखं प्राप्नुयाति वा न वेति।
कन्यापितृत्वं खलु नाम कष्टम्!॥ २२२॥

(फ) गान्धर्वेण—अन्योऽन्यानुरागानिबन्धनविवाहविशेषेण, "गान्धर्वः समयाग्निधः" इति स्मरणात्। आत्मानं प्रयच्छ—आत्मसमर्पणं कुरु, मां भक्षयेत्यर्थः।

(ब) सान्वयं—सवंशम्।

(भ) सख्ये—पाणौ। वेपमानां—कम्पमानाम्।

(म) अधरोष्ठप्रवालखण्डनम्—अधरोष्ठक्षिप्तक्षतं, ("प्रवालोऽस्त्री किसलये नीचाहस्ते च विद्रुमे" इति मेदिनी)। मिथः,—परस्परम्। विभाव्यन्ते—लक्ष्यन्ते।

(य) प्रमाणं—प्रमाता, यदौचितकारीत्यर्थः।

पुत्रीति।—इह संसारे, पुत्री कन्या, जाता उत्पन्ना, इति एतदेव दुःखं; महती प्रबला, चिन्ता जायमानविषयः, कस्मै चिन्ता दास्यामि—कस्मै प्रदेया इति एवं,

नद्यश्च नार्यश्च समप्रभावा-
स्तुल्यानि कूलानि कुलानि तासाम् ।
तोयैश्च दोषैश्च निपातयन्ति
नद्यो हि कूलानि कुलानि नार्यः ॥२२३॥

तथा च,—जननीमनो हरति जातवती
परिवर्धते सह शुचा सुहृदाम् ।
परसात्कृताऽपि कुरुते मलिनं
दुरतिक्रमा दुहितरो विपदः' ॥२२४॥

एवं बहुविधं विचिन्त्य देवीं (र) रहःस्थां प्रोवाच,—'देवि! श्रूयतां किमेते कञ्चुकिनो वदन्ति, तस्य कृतान्तः कुपितः, येन एतदेवं क्रियते'। देवी अपि तदाकर्ण्य व्याकुलीभूता सत्वरं कन्याऽन्तःपुरे गत्वा तां खण्डिताधरां नखविलिखित-

तथा दत्ता अर्पिता सती, कस्मैचिदिति शेषः, सुखं प्राप्नोति लप्स्यते वा, न वा, प्राप्स्यति इति शेषः, इति च महान् वितर्कः संशयः, तज्जनितभावना इत्यर्थः ; तस्मात् कन्यापितृत्वं कन्योत्पादनमित्यर्थः, कष्टं खलु, नाम सम्भावनायाम् ; कन्यापिता तच्चिन्तया सततमेव क्लेशं प्राप्नोतीति सम्भावयामि इति भावः । इन्द्रवज्रा वृत्तम् ॥२२२॥

नद्य इति ।—नद्यश्च नार्यश्च समप्रभावाः तुल्यप्रभाववत्यः, यतः तासां नदीनां नारीणाञ्च, कूलानि तीराणि, कुलानि वंशाः च, तुल्यानि समानानि । कुतः ?—नद्यः तोयैः जलप्रवाहैः, कूलानि तटानि, नार्यश्च दोषैः, जलकैः, कुलानि वंशान्, निपातयन्ति मज्जनेन जलकेन च अधः पातयन्ति, हि अवधारणे । इन्द्रवज्रा वृत्तम् ॥२२३॥

जननीति ।—कन्या जातवती जाता सती, जननी मनः हरति सत्यावे पतिष्यति न वा इति चिन्तया वैमनस्यमापादयतीत्यर्थः । ततः सुहृदां बन्धूनां, शुचा शोकेन, सह परिवर्धते वृद्धिं गच्छति, कन्यायाः दुर्वृत्तदर्शने विवाहे प्रभूतार्थनाशसम्भावनया बन्धूनां शोकवृद्धिरिति भावः । परसात्कृताऽपि परस्मै वरायेति भावः, प्रदत्ताऽपि, मलिनं कुरुते, बन्धुवर्गमिति शेषः ; पश्चात् सुखं भवति न वेति भावनावशादिति भावः । अतः दुहितरः कन्यारूपा आपदः, दुरतिक्रमाः दुस्तराः ; अन्या विपत् कथञ्चित् अतिक्रम्यते, कन्या तु नेवेति भावः । प्रमिताक्षरा वृत्तम् ॥२२४॥

(र) रहःस्थाम्—एकान्तस्थिताम् । येन—पुरुषवेषेणेत्यर्थः ।

शरीरावयवां दुहितरमपश्यत्, आह च,—'आः पापे! कुलकलङ्ककारिणि! किमेवं (ल) शीलखण्डनं कृतम्? कोऽयं कृतान्तावलोकितः त्वत्सकाशमभ्येति? तत् कथ्यतां ममाग्रे सत्यम्' इति (व) कोपाटोपविसङ्कटं वदन्त्यां मातरि राजपुत्री भयलज्जाऽऽनताऽऽननं प्रोवाच,—'अम्ब! साक्षात् नारायणः प्रत्यहं गरुड़ारूढो निशि समायाति। चेत् असत्यं मम वाक्यं, तत् स्वचक्षुषा विलोकयतु (श) निगूढतरा निशीथे भगवन्तं रमाकान्तम्'। तत् श्रुत्वा सा अपि प्रहसितवदना पुलकाङ्कित-सर्वाङ्गी सत्वरं गत्वा राजानम् ऊचे,—'देव! (ष) दिष्ट्या वर्द्धसे, नित्यम् एव निशीथे भगवान् नारायणः कन्यकापार्श्वे-ऽभ्येति, तेन गान्धर्वविवाहेन सा विवाहिता। तत् अद्य त्वया मया च रात्रौ वातायनगताभ्यां निशीथे द्रष्टव्यः, यतो न स मानुषैः सह आलापं करोति'। तत् श्रुत्वा हर्षितस्य राज्ञः तद्दिनं (स) वर्षशतप्रायमिव कथञ्चित् जगाम। ततस्तु रात्रौ (ह) निभृतो भूत्वा राज्ञीसहितो राजा वातायनस्थो गगनासक्त-दृष्टिः यावत् तिष्ठति, तावत् गरुड़ारूढं तं शङ्खचक्रगदापद्महस्तं यथोक्तचिह्नाङ्कितं व्योम्नोऽवतरन्तं नारायणम् अपश्यत्।

(ल) शीलखण्डनं—सदाचारखण्डनम्। कृतान्तावलोकितः,—यमेन दृष्टः, तस्य मृत्युरवश्यम्भावीति भावः।

(व) कोपेति।—कोपस्य आटोपः,—वेगः, तेन विसङ्कटं—निष्ठुरं, क्रोधकर्कशमित्यर्थः। भयलज्जाऽऽनताऽऽननं—भयेन—त्रासेन, लज्जया—व्रीड़या च, आनतम्—अवनतम्, आननं यस्मिन् तद्यथा तथा, [इति क्रियाविशेषणम्]।

(श) निगूढतरा—अतिप्रयत्नेन प्रच्छन्ना। रमाकान्तं—लक्ष्मीपतिम्।

(ष) दिष्ट्या—भाग्येन, [हर्षभाग्यादिसूचकमव्ययम्]। वर्द्धसे—अभ्युदयं प्राप्नोषि।

(स) वर्षशतप्रायं—शतवत्सरोपमम्, औत्सुक्यातिशयादिति भावः।

(ह) निभृतः,—प्रच्छन्नः। वातायनस्थः,—गवाक्षवर्त्ती। व्योम्नः,—आकाशात्।

ततः (घ) सुधापूरप्लावितम् इव आत्मानं मन्यमानः तामुवाच,—'प्रिये ! नास्ति अन्यो धन्यतरो लोके मत्तः त्वत्तश्च, यत् प्रसूतिं नारायणो भजते; तत् सिद्धाः सर्वेऽस्माकं मनोरथाः, अधुना जामाद्रप्रभावेण सकलामपि वसुमतीं वश्यां करिष्यामि'। एवं निश्चित्य सर्वैः (क) सीमाऽधिपैः सह मर्य्यादाव्यतिक्रमम् अकारोत्। ते च तं मर्य्यादाव्यतिक्रमेण वर्त्तमानम् आलोक्य सर्वे समेत्य तेन सह (ङ) विग्रहं चक्रुः। अत्रान्तरे स राजा (ग) देवीमुखेन तां दुहितरमुवाच,—'पुत्रि ! त्वयि दुहितरि वर्त्तमानायां, भगवति नारायणे च जामातरि स्थिते, किमेतत् युज्यते, यत् सर्वे पार्थिवा मया सह विग्रहं कुर्वन्ति ? तत् (घ) सम्बोध्योऽद्य त्वया निजभर्त्ता,यथा मम शत्रून् व्यापादयति'। ततः तया स कौलिको रात्रौ सविनयम् अभिहितः,—'भगवन्! त्वयि जामातरि स्थिते मम तातो यच्छत्रुभिः (ङ) परिभूयते, तत् न युक्तम्; तत् प्रसादं कृत्वा सर्वान् तान् शत्रून् व्यापादय'। कौलिक आह,—'सुभगे! (च) कियन्मात्रास्तु एते तव पितुः शत्रवः। तद्विश्वस्ता भव, क्षणेनापि सुदर्शनचक्रेण सर्वान् तिलशः खण्डयिष्यामि'। अथ गच्छता कालेन सर्वदेशं शत्रुभिः (छ) उद्दास्य, स राजा प्राकारशेषः कृतः। तथाऽपि वासुदेवरूपधरं कौलिकमजानन् राजा नित्य-

(घ) सुधेति।—सुधायाः,—अमृतस्य, पूरेण—प्रवाहेण, प्लावितमिव—सिक्तमिव। प्रसूतिं—तनयां, ("प्रसूतिरङ्गवेऽपि स्यात् तनये दुहितर्यपि" इति मेदिनी)।

(ङ) सीमाऽधिपैः,—निजाधिकारसीमान्तस्थितराजभिः। मर्य्यादाव्यतिक्रमं—मर्य्यादायाः,—सीमायाः, व्यतिक्रमं—लङ्घनं, बलपूर्वकं तेषां सीमाक्रमणमित्यर्थः।

(ङ) विग्रहं—युद्धम्।

(ग) देवीमुखेन—राज्ञ्या। पार्थिवाः,—राजानः।

(घ) सम्बोध्यः,—सम्यक् ज्ञापनीयः।

(ङ) परिभूयते—तिरस्क्रियते, अवमन्यते इत्यर्थः। प्रसादम्—अनुग्रहम्।

(च) कियन्मात्राः,—कियत्परिमाणाः, सामान्याः इत्यर्थः।

(छ) उद्दास्य—उच्छिद्येत्यर्थः। प्राकारशेषः,—प्राचीरमात्रावशिष्टः।

मेव विशेषतः कर्पूरागुरुकस्तूरिकादिपरिमलविशेषान् नाना-प्रकारवस्त्रपुष्पभक्ष्यपेयांश्च प्रेषयन् दुश्चित्तमुखेन तस्थौ,—'भगवन्! प्रभाते नूनं (अ) स्नानभङ्गो भविष्यति, यतो यवसेन्धनक्षयः सञ्जातः, तथा सर्वोऽपि जनः प्रहारैः जर्जरितदेहः संवृत्तो योद्धुमक्षमः प्रचुरो मृतश्च। तदेवं ज्ञात्वा अत्र काले यदुचितं भवति, तद्विधेयम्' इति। तच्छ्रुत्वा कौलिकोऽपि अचिन्तयत्—'यत् स्नानभङ्गे जाते मम अनया सह वियोगो भविष्यति, तस्मात् गरुडमाकृष्य सायुधमात्मानमाकाशे दर्शयामि। कदाचित् मां वासुदेवं मन्यमानाः ते साशङ्काः राज्ञो योद्धृभिः हन्यन्ते। उक्तञ्च—निर्विषेणापि सर्पेण कर्त्तव्या महती फणा।

विषं भवतु मा भूयात् फणाऽऽटोपो भयङ्करः॥२२५॥

(भ) अथ यदि मम स्नानार्थम् उद्यतस्य मृत्युः भविष्यति, तदपि (अ) सुन्दरतरम्। उक्तञ्च—

गवामर्थे ब्राह्मणार्थे स्वाम्यर्थे स्त्रीकृतेऽथवा।

स्नानार्थे यस्त्यजेत् प्राणांस्तस्य लोकाः सनातनाः॥२२६॥

(अ) स्नानभङ्गः,—वासस्नानच्युतिः। यवसेति।—यवसानां—घासानाम्, इन्धनानां—काष्ठानाञ्च, क्षयः,—अभावः, तृणकाष्ठादीनामपि अत्यधिकव्ययत्वात् दुर्लभत्वम्, अतो घासादीनां सैन्यानामाभावात् वासस्थानत्याग एवाऽऽवश्यक मित्यर्थः।

निर्विषेणापीति।—निर्विषेणापि सर्पेण महती फणा फणविस्तारः इत्यर्थः, कर्त्तव्या, विषं भवतु अस्तु, मा भूयात् न भवतु वा, फणाऽऽटोपः फणाविस्तारडम्बरः, भयङ्करः; सर्पफणविस्तारदर्शनादेव लोकाः सभयाः पलायन्ते इति भावः॥ २२५॥

(भ) अथ—पक्षान्तरे। स्नानार्थं—राज्ञः वासस्थानरक्षार्थम्। उद्यतस्य—चेष्टमानस्य।

(अ) सुन्दरतरं—भद्रतरम्; भद्रं मङ्गलस्य सदाकालसुखमैलोक्यवासमुत्तरोत्तरं भावः।

गवामिति।—यः नरः, गवामर्थे गोरक्षार्थे, ब्राह्मणार्थे ब्राह्मणरक्षार्थे, स्वाम्यर्थे प्रभुरक्षार्थम्, अथवा स्त्रीकृते स्त्रीनिमित्तं, स्त्रीरक्षार्थमित्यर्थः, तथा स्नानार्थे ईश्वरार्थं, प्राणान् त्यजेत्, तस्य सनातनाः अक्षयाः, लोकाः स्वर्गादिभुवनानीत्यर्थः, भवन्तीति शेषः; विषं स्वर्गवासो भवतीति भावः॥२२६॥

चन्द्रे मण्डलसंस्थे विग्रस्यते राहुणा दिनाधीशः।
शरणागतेन सार्द्धं विपदपि तेजस्विनां श्लाघ्या' ॥२२७॥

एवं निश्चित्य प्रत्यूषे दत्तधावनं कृत्वा तां प्रोवाच,—'सुभगे! समस्तैः शत्रुभिः हतैः एव अद्य पानञ्च आस्वादयिष्यामि; किं बहुना, त्वयाऽपि सह सङ्गमं ततः परमेव करिष्यामि; परं वाच्यस्त्वया आत्मार्पिता यत्, प्रभाते प्रभूतेन सैन्येन सह नगरात् निष्क्रम्य योद्धव्यम्, अहञ्च आकाशस्थित एव सर्वान् तान् निस्तेजसः करिष्यामि, पश्चात् सुखेन भवता हन्तव्याः। यदि पुनरहं तान् स्वयमेव (ट) सूदयामि, तदा तेषां पापात्मनां वैकुण्ठीया गतिः स्यात्; तस्मात् ते तथा कर्त्तव्याः यथा पलायन्ते हन्यमानाः, स्वर्गं न गच्छन्ति'। साऽपि तदाकर्ण्य पितुः समीपं गत्वा सर्वं वृत्तान्तं न्यवेदयत्। राजाऽपि तस्याः वाक्यं श्रद्दधानः प्रत्यूषे समुत्थाय (ठ) सुसन्नद्धसैन्यो युद्धार्थं निश्चक्राम; कौलिकोऽपि मरणे कृतनिश्चयः चापपाणिः गगनगतिः गरुड़ारूढो युद्धाय प्रस्थितः। (ड) अत्रान्तरे भगवता नारायणेन अतीतानागतवर्त्तमानवेदिना स्मृतमात्रो वैनतेयः सम्प्राप्तो विहस्य प्रोक्तः,—'भो गरुत्मन्! जानासि त्वं यत्, मम

चन्द्रे इति।—चन्द्रे मण्डलसंस्थे सूर्यमण्डलवर्त्तिनि सति, सूर्याचन्द्रमसोरेकमण्डलावस्थितरूपायाम् अमावस्यायामिति भावः; दिनाधीशः दिनकरः, राहुणा विग्रस्यते विशेषेण ग्रस्यते, ग्रसत इत्यर्थः, सूर्यग्रहणं भवतीति भावः; [ग्रह आदाने, इत्यस्य कर्मणि रूपम्] इति तु प्रस्तुतार्थः। आरोपितार्थस्तु—राहुभयात् चन्द्रे आश्रयलाभार्थं सूर्यमण्डलं प्रविष्टे शरणागतं तं रक्षितुं सूर्यः राहुणा सह युध्यते इति; अत एव शरणागतेन सार्द्धं तेजस्विना सङ्गता, विपदपि श्लाघ्या प्रशस्या, शरणागतरक्षणम् अवश्यमेव कर्त्तव्यमिति भावः। आर्या वृत्तम् ॥२२७॥

(ट) सूदयामि—नाशयामि। वैकुण्ठीया गतिः,—वैकुण्ठलोकप्राप्तिः।

(ठ) सुसन्नद्धसैन्यः,—सुसज्जितसैन्यः। गगनगतिः,—आकाशगामी।

(ड) अत्रान्तरे—अस्मिन्नवसरे। अतीतेत्यादि।—त्रिकालज्ञेन इत्यर्थः।

रूपेण कौलिको दारुमयगरुडे समारूढो राजकन्यां कामयते ?' सोऽब्रवीत्,—'देव ! सर्वं ज्ञायते तच्चेष्टितम्। तत् किं कुमः साम्प्रतम् ?' श्रीभगवान् आह,—'अद्य कौलिको मरणे ज्ञातनिश्चयो विहितनियमो युद्धार्थं विनिर्गतः। स नूनं प्रधानक्षत्रियपराहतो निधनमेष्यति ; तस्मिन् हते सर्वो जनो वक्ष्यति यत्, प्रभूतक्षत्रियैर्मिलित्वा वासुदेवो गरुडश्च निपातितः, ततः परं लोकोऽयमावयोः पूजां न करिष्यति। ततस्त्वं द्रुततरं तत्र दारुमयगरुडे (ढ) सङ्क्रमणं कुरु, अहमपि कौलिकशरीरे प्रवेशं करिष्यामि, येन स शत्रून् व्यापादयति ; ततश्च शत्रुवधात् आवयोः माहात्म्यवृद्धिः स्यात्'।

अथ गरुडे 'तथा' इति प्रतिपन्ने श्रीभगवान् नारायणः तच्छरीरे सङ्क्रमणम् अकरोत्। ततो भगवन्माहात्म्येन गगनस्थः सः कौलिकः शङ्खचक्रगदाद्यायुधचिह्नितः क्षणादेव लोकयैव समस्तान् अपि प्रधानक्षत्रियान् निस्तेजस्कमकार। ततस्तेन राज्ञा ससैन्यपरिवृतेन सङ्ग्रामे जिताः, निहताश्च ते सर्वेऽपि शत्रवः। जातश्च लोकमध्ये प्रवादो यथा,—'अनेन विष्णुजामातृप्रभावेण सर्वे शत्रवो निहताः' इति। कौलिकोऽपि तान् हतान् दृष्ट्वा प्रमुदितमनाः गगनात् अवतीर्णः यावत्, तावद्राजामात्यपौरलोकास्तं (ण) नगरवास्तव्यं कौलिकं पश्यन्ति। ततः (त) पृष्टः,—'किमेतत् ?' इति। ततः सोऽपि मूलादारभ्य सर्वं प्राग्वृत्तान्तं न्यवेदयत्। ततश्च कौलिकसाहसानुरञ्जितमनसा शत्रुवधात् (थ) अवाप्ततेजसा राज्ञा सा राजकन्या सकलजनप्रत्यक्षं विवाहविधिना तस्मै समर्पिता, देशश्च प्रदत्तः। कौलिकोऽपि

(ढ) सङ्क्रमणम्—अधिष्ठानम्। माहात्म्यवृद्धिः—महिमप्रचारः।

(ण) नगरवास्तव्यं—नगरवासिनम् ; पूर्वदृष्टमिति भावः ; [वस्तेः तव्यत्]।

(त) पृष्टः,—जिज्ञासितः, लोकैः कौलिक इति भावः।

(थ) अवाप्ततेजसा—प्राप्तप्रभावेण। देयः,—राज्यम्।

तया सार्द्धं (द) पञ्चप्रकारं जीवलोकसारं विषयसुखमनुभवन् कालं निनाय। अतस्तु उच्यते,—'सुप्रयुक्तस्य दक्षस्य' इति"।

तच्छ्रुत्वा करटक आह,—"भद्र! अस्ति एवम्; परं तथाऽपि महत् मे भयं, यतो बुद्धिमान् सञ्जीवकः, रौद्रश्च सिंहः। यद्यपि ते बुद्धिप्रागल्भ्यं, तथाऽपि त्वं पिङ्गलकात् तं वियोजयितुम् असमर्थः एव"। दमनक आह,—"भ्रातः! असमर्थोऽपि समर्थः एव। उक्तञ्च,—

उपायेन हि यत् कुर्यात् तन्न शक्यं पराक्रमैः।
काक्या कनकसूत्रेण कृष्णसर्पो निपातितः" ॥ २२८ ॥

करटक आह,—"कथमेतत्?" सोऽब्रवीत्,—

कथा ६।

"अस्ति कस्मिंश्चित् प्रदेशे महान् (ध) न्यग्रोधपादपः; तत्र वायसदम्पती प्रतिवसतः स्म। अथ तयोः प्रसवकाले वृक्षविवरात् निष्क्रम्य कृष्णसर्पः सदैव तदपत्यानि भक्षयति। ततस्तौ (न) निर्वेदात् अन्यवृक्षमूलनिवासिनं प्रियसुहृदं शृगालं गत्वा ऊचतुः,—'भद्र! किम् एवंविधे सञ्जाते आवयोः कर्त्तव्यं भवति? एवं तावत् दुष्टात्मा कृष्णसर्पो वृक्षविवरात् निर्गत्य आवयोर्बालकान् भक्षयति; तत् कथ्यतां तद्रक्षार्थं कश्चिदुपायः।

(द) पञ्चप्रकारं—पञ्चविधं, पञ्चेन्द्रियवाक्यनिमित्तं। विषयेति।—विषयाणां रूपचन्दनवनितादीनां, सुखं सम्भोगसुखं, तच्च पञ्चेन्द्रियसाध्यत्वादिति भावः।

उपायेनेति।—उपायेन बुद्धिकौशलेन, यत् कुर्यात्; ["कुर्यात्" इत्यत्र "अकृत्" इति पाठान्तरम्] जनः इति शेषः, तत् पराक्रमैः न हि शक्यं, कर्तुमिति शेषः; तथा हि, काक्या वायस्या, कनकसूत्रेण सुवर्णतन्तुसदृशवर्णमयरज्जुभूतेनेति भावः; कृष्णसर्पः निपातितः ॥२२८॥

(ध) न्यग्रोधपादपः,—वटतरुः।

(न) निर्वेदात्—वैराग्यात्। वृक्षविवरात्—तरुकोटरात्।

यतः,—यस्य क्षेत्रं नदीतीरे भार्या च परसङ्गता।
सर्पे च गृहे वासः कथं स्यात् तस्य निर्वृतिः ? ॥२२८॥

अस्माकमपि तत्र स्थितानां प्रतिदिनं प्राणसंशयः'। सः आह,—'न अत्र विषये स्वल्पोऽपि विषादः कार्यः। (प) नूनं सः लुब्धो न उपायम् अन्तरेण वध्यः स्यात्। यतः,—

उपायेन जयो यादृक् रिपोस्तादृक् न हेतिभिः।
उपायज्ञोऽल्पकायोऽपि न शूरैः परिभूयते ॥ २३० ॥

तथा च,—भक्षयित्वा बहून् मत्स्यानुत्तमाधममध्यमान्।
अतिलोभ्यादेकः कश्चित् मृतः कर्कटकग्रहात्' ॥ २३१ ॥

तौ ऊचतुः,—'कथमेतत् ?' सोऽब्रवीत्,—

कथा ७।

'अस्ति कस्मिंश्चित् वनप्रदेशे (फ) नानाजलचरसनाथं महत् सरः। तत्र च कृताश्रयो बक एको वृद्धभावमुपागतो मत्स्यान्

यस्येति।—यस्य नदीतीरे क्षेत्रं कर्षितभूमिः, भार्या च परसङ्गता परपुरुषगामिनी, तथा सर्पे सर्पयुक्ते, गृहे वासश्च, तस्य निर्वृतिः सुखं, ("निर्वृतिः···सुखे स्त्रियाम्" इति मेदिनी) कथं स्यात् ? न कथमपि इत्यर्थः; सर्पादिग्रस्तत्वादिति भावः ॥२२८॥

(प) नूनं—निश्चितम्। [उपायमित्यत्र "अन्तरान्तरेण युक्ते" (२।३।४ पा०) इति द्वितीया] अन्तरेण—विना।

उपायेनेति।—उपायेन कौशलेन, यादृक् यथा, रिपोः शत्रोः, जयः वशीकरणं, हेतिभिः अस्त्रैः, तादृक् जयः, न, स्यादिति शेषः; उपायज्ञो जनः अल्पकायः क्षुद्रशरीरोऽपि, दुर्बलोऽपीत्यर्थः, शूरैः बलवद्भिः, न परिभूयते न तिरस्क्रियते इत्यर्थः ॥२३०॥

भक्षयित्वेति।—कश्चित् बकः बलाका, मत्स्यघाती पक्षिविशेष इत्यर्थः, बहून् अनेकान्, उत्तमाधममध्यमान् अक्षुद्रक्षुद्रमध्यमान्, मत्स्यान् मीनान्, भक्षयित्वा अतिलोभ्यात् अतिशयलोभात्, बहुमीनभक्षणेन तत्रावचे: प्राप्तस्तत्रभक्षणाय अतिलोभवशादित्यर्थः, कर्कटकग्रहात् कुलीरग्रहणं कृत्वा, भक्षणायेति भावः; [ल्यब्लोपे पञ्चमी] मृतः विनष्टः, तेनैवाक्रान्ततयेति भावः ॥२३१॥

(फ) नानेति।—विविधजलजन्तुपूर्णम्।

व्यापादयितुम् असमर्थः। ततश्च (ब) क्षुत्क्षामकण्ठः सरस्तीरे उपविष्टो मुक्ताफलप्रकरसदृशैः अश्रुप्रवाहैः धरातलमभिषिञ्चन् रुरोद। एकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरम् इदमूचे,—(म) 'मामः! किमद्य त्वया न आहारवृत्तिः अनुष्ठीयते? केवलम् अश्रुपूर्णनेत्राभ्यां सनिश्वासेन स्थीयते?' स आह,—'वत्स! सत्यमुपलक्षितं भवता, मया हि (म) मत्स्यादनं प्रति परमवैराग्यतया साम्प्रतं प्रायोपवेशनं कृतं, तेनाहं समीपगतान् अपि मत्स्यान् न भक्षयामि'। कुलीरकः तच्छ्रुत्वा प्राह,—'मामः! किं तत् वैराग्यकारणम्?' सः प्राह,—'वत्स! अहम् अस्मिन् सरसि जातः, वृद्धिं गतश्च; तत् मया एतत् श्रुतं यत्, (य) द्वादशवार्षिकी अनावृष्टिः सम्पत्स्यते लग्ना'। कुलीरक आह,—'कस्मात् तत् श्रुतम्?' बक आह,—'दैवज्ञमुखात्। यतः (र) शनैश्चरो हि रोहिणी-शकटं भित्त्वा भौमं शुक्रञ्च प्रयास्यति। उक्तञ्च वराह-मिहिरेण,—

(ब) क्षुदिति।—क्षुधाक्षीणकण्ठस्वरः, शुष्ककण्ठ इत्यर्थः। [क्षामः,—क्षै + क्तः]। मुक्तेति।—मौक्तिकसमूहतुल्यैः। अभिषिञ्चन्—आर्द्रीकुर्वन्।

(म) मामः।—मातुल! आहारवृत्तिः,—भोजनव्यापारः।

(म) मत्स्यादनं—मीनभोजनम्। प्रायोपवेशनम्—अनशनव्रतम्, अनाहारेण जीवनं त्यक्ष्यामीत्येवं सङ्कल्पः कृत इत्यर्थः।

(य) द्वादशवार्षिकी—द्वादशवर्षव्यापिनी, [द्वादशवर्षाणि व्याप्य भाविनीति ठक्]। सम्पत्स्यते—भविष्यति। लग्ना—निरवच्छिन्ना।

(र) शनैश्चरः,—शनिग्रहः। रोहिणीशकटं—रोहिणी नाम नक्षत्रभेदः, तस्याः शकटं शकटाकारचतुस्तारात्मकं स्थानम्; तस्य ह्युपरिष्टात् सप्तदशांशे याम्यविक्षेप-द्वयात् पर्वं विद्यते; भित्त्वा—तन्मध्यं गत्वेत्यर्थः। "ह्युपरिष्टौ सप्तदशांशे स्फुटे तद्विक्षेपे च अंशद्वयाधिके सति यदः रोहिणीशकटं भिनत्ति" इति (सूर्यसिद्धान्तः ८ अध्यः १२ श्लोकः) द्रष्टव्यम्। भौमं—भूमिसुतं मङ्गलम्। शुक्रं—तदाख्यग्रहम्। प्रयास्यति—

'यदि भिन्ते सूर्यपुत्रो रोहिण्याः शकटमिश्च कौवे।
द्वादशवर्षाणि तदा न हि वर्षति वासवो भूमौ ॥२२२॥

तथा च,—प्राजापत्ये शकटे भिन्ने क्षत्वेव पातकं वसुधा।
भक्षास्थिशकलकीर्णा कापालिकमिव व्रतं धत्ते ॥२२३॥

तथा च,—रोहिणीशकटमर्कनन्दन-
स्तेद्भिनत्ति रुधिरौघभाक् मही।
किं वदामि ? तदनिष्टसागरे
सर्वलोकमुपयाति सङ्क्षयः ॥२२४॥
रोहिणीशकटमध्यसंस्थितं
चन्द्रमस्यशरणोकृता जनाः।

संयोगं करिष्यति। रोहिणीनक्षत्रात् सप्तमे शुक्रे च शनैश्चरस्य गमने अनावृष्टिर्भवतीति रामायणे पद्मपुराणे च अष्टाविंशतिसंवादे विस्तरः।

यदीति।—सूर्यपुत्रः शनैश्चरः, यदि रोहिण्या शकटं प्रागुल्लिखितं रोहिणीशकटाख्यं स्थानमित्यर्थः, भित्त्वा गच्छति इत्यर्थः, तदा वासवः इन्द्रः, इह लोके जगति, भूमौ पृथिव्यां, द्वादशवर्षाणि व्याप्य न हि वर्षति। आर्या छन्दसम् ॥२२२॥

प्राजापत्ये इति।—प्राजापत्ये प्रजापतिदेवताके, शकटे रोहिणीशकटे इत्यर्थः, तस्याः प्रजापतिदेवताकत्वादिति भावः, भिन्ने, शनैश्चरेणेति शेषः, वसुधा पृथिवी, भक्षास्थिशकलकीर्णा भक्षाभिः पांसुभिः, प्राणिदाहोत्थैरिति भावः; अस्थिशकलैश्च कङ्कालखण्डैश्च, व्याप्तानामकृतदाहानामिति भावः; कीर्णा व्याप्ता, अत एव पातकं क्षत्वेव कापालिकं कापालिकैराचरितं, व्रतं नियमं, धत्ते इव धारयतीव। कापालिका हि भक्षास्थिशकलकं व्रतं धारयन्तीति प्रसिद्धिः। अनावृष्ट्या अन्नविघातेन प्राणिनः अनाहारेणैव मरिष्यन्तीति भावः। (ह० सं० ४र्थ अध्या० २५ श्लोकः)। आर्या छन्दसम् ॥२२३॥

रोहिणीति।—अर्कनन्दनः शनिः, चेत् यदि, रोहिणीशकटं भिनत्ति रोहिणीनक्षत्रस्य शकटाकृतिस्थानं गच्छतीत्यर्थः, तदा मही पृथिवी, रुधिरौघभाक् रक्तप्रवाहवती, भवतीति शेषः, किं वदामि ? किमधिकं कथयामीत्यर्थः, तदनिष्टसागरे तस्मिन् अनङ्गलाम्बुधौ, सङ्क्षयः प्रलयः, सर्वलोकमुपयाति प्राप्नोति, सर्वप्राणिनो म्रियन्ते इत्यर्थः। रथोद्धता छन्दः,—"रात् परैर्नरलगै रथोद्धता" इति लक्षणात् ॥२२४॥

रोहिणीति।—चन्द्रमसि चन्द्रे, रोहिणीशकटमध्यसंस्थिते रोहिणीशकटं गते इत्यर्थः,

क्वापि यान्ति शिशुपाचिताशनाः
सूर्य्यतप्तभिदुराम्बुपायिनः' ॥२१५॥

तदेतत् सरः स्वल्पतोयं वर्त्तते, शीघ्रं शोषं यास्यति; अस्मिन् शुष्के ये: सह अहं वृद्धिं गतः सदैव क्रीड़ितश्च, ते सर्वे तोयाभावात् नाशं यास्यन्ति; तत् तेषां वियोगं द्रष्टुमहम् असमर्थः, तेनैतत् प्रायोपवेशनं कृतम्। साम्प्रतं सर्वेषां स्वल्पजलाशयानां जलचरा गुरुजलाशयेषु स्वजनैर्नीयन्ते, केचिच्च (ल) मकरगोधाशिशुमारजलहस्तिप्रभृतयः स्वयमेव गच्छन्ति। अत्र पुनः सरसि ये जलचराः, ते निश्चिन्ताः सन्ति, तेनाहं विशेषात् रोदिमि, यत् बीजशेषमात्रमप्यत्र न उद्धरिष्यति'।

ततः स तदाकर्ण्य अन्येषामपि जलचराणां तत् तस्य वचनं निवेदयामास। अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभृतयः तमभ्युपेत्य पप्रच्छुः,—'मामः! अस्ति कश्चिदुपायः, येन अस्माकं रक्षा भवति?' बक आह,—'अस्ति अस्य जलाशयस्य नातिदूरे प्रभूतजलसनाथं सरः (व) पद्मिनीषण्डमण्डितं,

---

अम्बरशीकृताः निरवलम्बनीकृताः, दूरं क्षिप्ता इति भावः, जनाः, शिशुपाचिताशनाः शिशून् स्वबालकान्, पाचितान् अश्नन्तीति तथोक्ताः, स्वान् स्वान् शिशून् पाचयित्वा खादन्ति इत्यर्थः, तथा सूर्य्येण तप्तानि, अत एव भिदुराणि भेदं गतानि विनष्टप्रायाणीत्यर्थः, प्रखरसूर्य्यकिरणादिति भावः, अम्बूनि जलानि, पिबन्तीति तथाभूताः सन्तः, क्वापि यान्ति म्रियन्ते इति भावः। (ह० स० २४ अध्या० ३० श्लोकः)। ["पाचिताशनाः" इत्यत्र "याचिताशनाः" इति हृदयसंज्ञितापुस्तकपाठे,—शिशुनिमित्तं याचितम् अन्नं यैरित्यर्थः। तथा "भिदुराम्बु" इत्यत्र "पिठराम्बु" इति पाठे—सूर्य्येण तप्तानि शीघ्रं गतानीत्यर्थः, पिठराम्बुषु पात्रविशेषस्थजलानीत्यर्थः]। रचोद्धता वृत्तम् ॥२१५॥

(ल) मकरेति।—मकराश्च गोधाश्च शिशुमाराश्च जलहस्तिनश्च प्रभृतयो येषां तथोक्ताः, स्वं स्वजनवत्ता महाकायजलचरा इति भावः। शिशुमाराः,—"सुसुक्" इति बङ्गभाषया प्रसिद्धाः। उद्धरिष्यति—स्थास्यति इत्यर्थः।

(व) पद्मिनीति।—पद्मिनीनां षण्डैः समूहैः, मण्डितं शोभितम्।

यच्चतुर्विंशत्यापि वर्षाणामहोभ्या न शोषमेष्यति। तदयदि मम पृष्ठं कश्चिदारोहति, तदहं तं तत्र नयामि'। अथ तं (ग) तत्र विश्रामप्राप्ताः 'तात'! 'मातुल'! 'भ्रातः'! इति ब्रुवाणाः 'अहं पूर्वम्' 'अहं पूर्वम्' इति समन्तात् परितस्थुः। सोऽपि दुष्टाशयः क्रमेण तान् पृष्ठे आरोप्य जलाशयस्य नातिदूरे शिलां समासाद्य तस्यामाछिद्य स्वेच्छया भक्षयित्वा भूयोऽपि जलाशयं समासाद्य जलचराणां (घ) मिथ्यावार्त्तासन्देशकैः मनांसि रञ्जयन् नित्यमेवाहारवृत्तिमकरोत्।

अन्यस्मिन् दिने च कुलीरकेणोक्तः,—'माम! मया सह ते प्रथमः (ङ) स्नेहसम्भावः सञ्जातः, तत् किं मां परित्यज्य अन्यान् नयसि? तस्मात् अद्य मे प्राणत्राणं कुरु'। तदाकर्ण्य सोऽपि दुष्टाशयश्चिन्तितवान्,—(च) 'निर्विण्णोऽहं मत्स्यमांसादनेन, तदद्य एनं कुलीरकं व्यञ्जनस्थाने करोमि' इति विचिन्त्य तं पृष्ठे समारोप्य तां बध्यशिलामुद्दिश्य प्रस्थितः। कुलीरकोऽपि दूरादेवास्थिपर्वतं (छ) शिलाश्रयमवलोक्य मत्स्यास्थीनि परिज्ञाय तमपृच्छत्,—'माम! कियद्दूरे स जलाशयः? मदीयभारेण अतिश्रान्तस्त्वं, तत् कथय'। सोऽपि (क) मन्दधीः जलचरोऽयं स्थले न प्रभवतीति मत्वा सस्मितमिदमाह,—'कुलीरक! कुतोऽन्यो जलाशयः? मम

(ग) तत्र—वधे इत्यर्थः। समन्तात्—चतुर्दिक्षु। परितस्थुः,—अवस्थितवन्तः।

(घ) मिथ्येति।—मिथ्या—अवृताः, वार्त्ताः,—इतराः, ताः आपद्य आमच्छामीत्येवंरूपा इत्यर्थः, एव सन्देशाः,—वाचिकानि तैः। रञ्जयन्—प्रीणयन्।

(ङ) स्नेहसम्भावः,—प्रणयालापः।

(च) निर्विण्णः,—विरक्तः, अनवरतमत्स्यभक्षणेन सञ्जातावधिलादिति भावः। व्यञ्जनस्थाने इति—कुलीरकमांसेन व्यञ्जनं करोमि इत्यर्थः।

(छ) शिलाश्रयं—शिलोपरि स्थितम् इत्यर्थः।

(क) मन्दधीः,—दुष्टबुद्धिः। प्रभवति—शौर्यवान् भवति।

प्राणयात्रेयम् ; तस्मात् स्मर्यतामात्मनोऽभीष्टदेवता। त्वामपि अस्यां शिलायां निक्षिप्य भक्षयिष्यामि'। इत्युक्तवति तस्मिन् तेन (ख) स्वदनदंष्ट्रहतेन मृणालनालधवलायां मृदुग्रीवायां स गृहीतो मृत्यवे। अथ स तां वकग्रीवां समादाय शनैः शनैः तच्छिलाशयमाससाद। ततः सर्वैरेव जलचरैः पृष्टः,—'भोः कुलीरक! किं निहतस्त्वम्? स ते मातुलोऽपि न आयातः? तत् किं (ग) चिरयति? वयं सर्वे सोत्सुकाः कृतेक्षणास्तिष्ठामः'। एवं तैः अभिहितं कुलीरकोऽपि विहस्योवाच,—'मूर्खाः सर्वे जलचरास्तेन मिथ्यावादिना वञ्चयित्वा नातिदूरे शिलातले प्रक्षिप्य भक्षिताः; तन्मया आयुःशेषतया तस्य विश्रामघातकस्य अभिप्रायं ज्ञात्वा ग्रीवेयमानीता; (घ) तदलं सम्भ्रमेण, अधुना सर्वजलचराणां क्षेमं भविष्यति'। अतोऽहं ब्रवीमि,—'भक्षयित्वा बहून् मत्स्यान्' इति'।

वायस आह,—'भद्र! तत् कथय, कथं स दुष्टसर्पो वधमुपेष्यति?' मृगाल आह,—'गच्छतु भवान् कस्मिंश्चिन्नगरं (ङ) राजाधिष्ठानं, तत्र कस्यापि धनिनो राजामात्यादेः (च) प्रमादिनः कनकसूत्रं हारं वा गृहीत्वा तत्कोटरे प्रक्षिप, येन सर्पस्तद्ग्रहणेन बध्यते'। अथ तच्छ्रवणात् काकः काकी च

(ख) खेति।—स्वदनस्य दंष्ट्राः,—दंष्ट्रा इति भावः, तृतीयेन। मृणालेति।—मृणालनालं—बिसनाडी, ("नाडी नालञ्च" इत्यमरः) बिसतन्तु इत्यर्थः, पद्मदण्डात् आतनतिशुभ्रं सुकोमलं नाडीवत् प्रसरच्छीलं वस्तु इत्यर्थः, तद्वत् धवला तस्याम्।

(ग) चिरयति—विलम्बते। सोत्सुकाः,—जनाय कृतोद्योगाः, ("इष्टार्थोद्युक्त उत्सुकः" इत्यमरः)। कृतेक्षणाः,—प्रतिपालयन्तः, प्रतीक्षमाणा इत्यर्थः।

(घ) तदलं—निषेधे, सम्भ्रमेण—भयेन, भयं मा कुरु इत्यर्थः। क्षेमं—कुशलम्।

(ङ) राजाधिष्ठानं—राज्ञः अधिष्ठानम् अवस्थानं यत्र तादृशम्।

(च) प्रमादिनः,—अनवहितस्य। कनकसूत्रं—सुवर्णकारकर्तरिकर्तितकण्ठभूषणविशेषम्। तत्कोटरे—तस्य सर्पस्य कोटरे बिले, सर्पाश्रये इत्यर्थः। बध्यते—निरुध्यते।

तदाकर्ण्य भामेच्छयोत्पतितौ। ततश्च काकौ किञ्चित् सरः प्राप्य यावत् पश्यति, तावत् तन्मध्ये कस्यदिद्राज्ञः (छ) अन्तःपुरं जलासन्नं न्यस्तकनकसूत्रं मुक्तामुक्ताहारवस्त्राभरणं जलक्रीड़ां कुरुते। अथ सा वायसी कनकसूत्रमेकमादाय स्वगृहाभिमुखं प्रतस्थे। ततश्च कञ्चुकिनो वर्षवराश्च तं नीयमानमुपलक्ष्य (ज) गृहीतलगुड़ाः सत्वरमनुययुः। काकोऽपि सर्पकोटरे तत् कनकसूत्रं प्रक्षिप्य सुदूरमवस्थितः। अथ यावत् राजपुरुषास्तं वृक्षमारुह्य तत्कोटरमवलोकयन्ति, तावत् कृष्णसर्पः (झ) प्रसारितभोगस्तिष्ठति। ततस्तं लगुड़प्रहारैरुत्थाप्य कनकसूत्रमादाय यथाऽभिलषितं स्थानं गताः। वायसदम्पती अपि ततःपरं सुखेन वसतः। अतोऽहं ब्रवोमि,—'उपायेन हि यत् कुर्य्यात्' इति। तत्र किञ्चिदिह बुद्धिमताम् असाध्यमस्ति। उक्तञ्च,—

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम्?।
वने सिंहो मदोन्मत्तः शशकेन निपातितः" ॥ २३६ ॥

करटक आह,—"कथमेतत्?" स आह,—

(छ) अन्तःपुरम्—अन्तःपुरमधिष्ठाय इत्यर्थः। जलासन्नं—जलस्य आसन्नं—समीपस्थं यस्मिन् तद् यथा तथा, [क्रियाविशेषणमेतत्]। न्यस्तेति।—न्यस्तं—स्थापितं, कनकसूत्रं येन तथाभूतम्. [अन्तःपुरमित्यस्य विशेषणमिदम्]। मुक्तेति।—मुक्तानि—अङ्गात् उन्मुच्य रक्षितानि, मुक्ताहारवस्त्राभरणानि येन तथोक्तं सत्।

(ज) गृहीतलगुड़ाः,—दण्डहस्ता इत्यर्थः।

(झ) प्रसारितभोगः,—विस्तारितदेहः, विस्तारितफणो वा, ("भोगः सुखे स्त्र्यादिभुजाविस्तरेऽहेश्च फणकाययोः" इत्यमरः)।

यस्येति।—यस्य जनस्य, बुद्धिः, अस्तीति शेषः, तस्य बलम्, अप्यस्त्येवेति बोद्धव्यम् इति भावः; निर्बुद्धेः बुद्धिहीनस्य जनस्य तु, बलं कुतः? नास्त्येव इत्यर्थः; तथा हि, वने मदोन्मत्तः बलाढ्य इत्यर्थः, सिंहः शशकेन निपातितः निहतः, बुद्ध्यति शेषः; अबोधः सर्वत्र पराभूयते, सुधीस्तु सर्वोत्कर्षेण वर्त्तते इति भावः ॥२३६॥

कथा ८।

"कस्मिंश्चिद्वने भासुरको नाम सिंहः प्रतिवसति स्म। अथासौ (अ) वीर्य्यातिरेकात् नित्यमेव अनेकान् मृगशशकादीन् व्यापादयन् न उपरराम। अथ (ट) अन्येद्युस्तद्वनजाः सर्वे सारङ्गवराहमहिषशशकादयो मिलित्वा तमभ्युपेत्य प्रोचुः,—'स्वामिन्! (ठ) किमनेन सकलमृगबधेन नित्यमेव? यतः स्तव एकेनापि मृगेण तृप्तिर्भवति, तत् क्रियतामस्माभिः सह समयधर्मः; अद्य प्रभृति तव अत्र उपविष्टस्य जातिक्रमेण प्रतिदिनमेको मृगो भक्षणार्थं समेष्यति। एवं कृते तव तावत् (ड) प्राणयात्रा क्लेशं विना अपि भविष्यति, अस्माकञ्च पुनः सर्वोच्छेदनं न स्यात्। तदेष राजधर्मोऽनुष्ठीयताम्।

उक्तञ्च,—शनैः शनैश्च यो राज्यमुपभुङ्क्ते यथाबलम्।
रसायनमिव प्राज्ञः स पुष्टिं परमां व्रजेत् ॥ २३७ ॥
विधिना मन्त्रयुक्तेन कृष्टाऽपि मथिताऽपि च।
प्रयच्छति फलं भूमिररणीव हुताशनम् ॥ २३८ ॥

(अ) वीर्य्यातिरेकात्—पराक्रमातिशयात्। व्यापादयन्—विनाशयन्, अपीति शेषः।

(ट) अन्येद्युः,—अन्यस्मिन् दिवसे। सारङ्गेत्यादौ।—सारङ्गः,—हरिणः।

(ठ) किं—निषेधे। समयधर्मः,—नियमलक्षणः,व्यवस्थितनियम इत्यर्थः।

(ड) प्राणयात्रा—जीवनयापनम्। विना अपि—विनैव।

शनैरिति।—यः प्राज्ञः बुद्धिमान्, नृपः यथाबलं बलं सामर्थ्यमनुसृत्य, राज्यं रसायनमिव औषधविशेषमिव, शनैः शनैः क्रमेण, उपभुङ्क्ते सेवते, स परमां महतीं, पुष्टिं व्रजेत् प्राप्नुयात्। अग्निबलादिकं विचिन्त्य क्रमशो मात्रां वर्द्धयित्वा रसायनौषधस्य सेवनं यथा शरीरपुष्टिं साधयति, बलप्रयोगं विहाय क्रमशः अल्पाल्पकरग्रहणपूर्वकः राज्यभोगोऽपि तथा सर्वं क्लेशमपास्य मनसः अर्थस्य च पुष्टिं जनयति; अतो भवानपि अस्मान् क्रमशो हत्वा भक्षयतु, तेन ते कुशलं भविष्यतीत्यभिप्रायः ॥२३७॥

विधिनेति।—कृष्टाऽपि कर्षिताऽपि, भूमिः मन्त्रयुक्तेन सुयुक्तिसहितेन, विधिना

प्रजानां पालनं शस्यं स्वर्गकोषस्य वर्द्धनम् ।
पीड़नं धर्मनाशाय पापायायशसे स्थितम् ॥२३८॥
गोपालेन प्रजाधेनोर्वित्तदुग्धं शनैः शनैः ।
पालनात् पोषणाद्राज्ञा न्याय्यां वृत्तिं समाचरेत् ॥२३९॥
अजामिव प्रजां मोहात् यो हन्यात् पृथिवीपतिः ।
तस्यैका जायते वृत्तिर्न द्वितीया कथञ्चन ॥ २४१ ॥
फलार्थी नृपतिर्लोकान् पालयेत् यत्नमास्थितः ।
दानमानादि-तोयेन मालाकारोऽङ्कुरानिव ॥ २४२ ॥

क्षयायेन, व्ययक्षयेनेति यावत्. सञ्चिता विलोडिता, दूषितेति भावः,ततो धरणिः यथा-अन्यत्रदाहविशेषः, हुताशनमिव अग्निमिव, फलं प्रयच्छति ददाति ॥ २३८ ॥

प्रजानामिति ।—प्रजानां पालनं, राज्ञ इति शेषः, शस्यं प्रशंसनीयम्, इह लोके इति शेषः ; स्वर्गकोषस्य स्वर्गरूपस्य धनभाण्डस्य, वर्द्धनं वर्द्धिकारकञ्च, परलोके इति शेषः ; प्रजापालने इह लोके प्रशंसा, अन्ते च स्वर्गप्राप्तिरिति भावः। पीड़नं, प्रजानामित्यनुषङ्गः, धर्मनाशाय पुण्यक्षयाय, पापाय अयशसे अपकीर्त्तये च, स्थितं नियतम् ; अतस्तन्त्यक्त्वा पालयन्निह परत्र च सुखं लभस्वेत्याशयः ॥ २३९ ॥

गोपालेनेति ।—गोपालेन गां पृथिवीं, धेनुञ्च. पालयति रक्षति यः तेन भूपेन, गोपेन च, प्रजाधेनोः प्रजा धेनुः गौरिव, प्रजा इव धेनुश्च तस्याः, पालनात् भयादिभ्यः रक्षणात्, पोषणात् अन्नादिना प्रतिपालनाच्च, शनैः शनैः वित्तदुग्धं वित्तं धनं, दुग्धमिव, वित्तमिव दुग्धञ्च, राज्ञा ग्रहणीयम् ; तस्मात् न्याय्यां न्यायात् अनपेतां, युक्तियुक्तामित्यर्थः, वृत्तिं व्यवहारं, समाचरेत् विदध्यात्, नृप इति शेषः ॥ २४० ॥

अजामिति ।—यः पृथिवीपतिः राजा. मोहात् अज्ञानात्, प्रजाम् अजामिव छागीमिव, हन्यात् नाशयेत्, अपराधं विना इति भावः ; तस्य हिंसैकरसस्य राज्ञः, एका एकविधा, वृत्तिः हिंसाजनिता तात्कालिकीति भावः, जायते. कथञ्चन कथमपि, द्वितीया अपरा, धनादिलाभजन्या वृत्तिरिति भावः, न, जायते इति शेषः ॥ २४१ ॥

फलार्थीति ।—फलार्थी फलमिच्छुः, नृपतिः राजा, यत्नमास्थितः यत्नवान् सन्, मालाकारः मालां, अङ्कुरानिव नूतनप्ररोहानिव,इवादीनामिति शेषः, लोकान् प्रजाः, दानमानादितोयेन दानमानादिरूपेण जलेन,पालयेत् पोषयेत् ; मालाकारो जलादिदानेन यथा तरून् वर्द्धयति, तथैव दानादिभिस्तथा प्रजाः तोषयेत्याशयः ॥ २४२ ॥

नृपदीपो धनस्नेहं प्रजाभ्यः संहरन्नपि ।
अन्तरस्थैर्गुणैः शुभ्रैर्लक्ष्यते नैव केनचित् ॥ २४३ ॥
यथा गौर्दुह्यते काले पाल्यते च तथा प्रजाः ।
सिच्यते चीयते चैव लता पुष्पफलप्रदा ॥ २४४ ॥
यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत् काले तद्वल्लोकः सुरक्षितः ॥ २४५ ॥
हिरण्यधान्यरत्नानि यानानि विविधानि च ।
तथाऽन्यदपि यत्किञ्चित् प्रजाभ्यः स्यान्महीपतेः ॥२४६॥
लोकानुग्रहकर्त्तारः प्रवर्द्धन्ते नरेश्वराः ।
लोकानां सङ्क्षयाच्चैव क्षयं यान्ति न संशयः' ॥ २४७ ॥

नृपदीप इति।—नृपो दीप इव, [इति उपमितसमासः] दीपसदृशो नृपः, अन्तरस्थैः आत्मन्यवस्थितैः, दीपगर्भस्थैश्च, शुभ्रैः शुक्लैः, विशुद्धैरित्यर्थः, निर्मलैश्च, गुणैः दयादिभिः, वर्त्तिभिरित्यर्थः, प्रजाभ्यः धनं स्नेह इव तं, तैलोपमं धनम् इत्यर्थः, संहरन्नपि शोषयन्नपि, केनचित् जनेन, नैव लक्ष्यते धनं गृह्णातीति नानुभूयते ; यदीपो यथा दृश्यो ज्वलंश्च तैलमाकर्षन् केनापि न विभाव्यते, तथा नृपतिः स्वगुणैः प्रजाभ्यः करमाददानः न केनापि लक्ष्यते इति फलितार्थः ॥२४३॥

यथेति।—गौः धेनुः, यथा पाल्यते, धनलाभं काले दुग्धदानोपयुक्तसमये, दुह्यते च, यथा वा, लता सिच्यते, जनेन प्रथमं जलैरिति शेषः, अनन्तरं यदा पुष्पफलप्रदा पुष्पाणि फलानि च प्रददातीति तथाभूता, तदा चीयते च, पुष्पफलादिकमिति शेषः, तथैव प्रजाः, पाल्यन्ते कालेन दुह्यन्ते सिच्यन्ते चीयन्ते चेति शेषः ॥२४४॥

यथेति।—यथा सूक्ष्मः अणुः, बीजाङ्कुरः बीजसहिताङ्कुर इत्यर्थः, प्रयत्नेन अभिरक्षितः पर्य्यवेक्षितः, जलादिना लालितः सन् इत्यर्थः, काले योग्यसमये, फलप्रदो भवेत्, सुरक्षितः सुप्रतिपालितः, लोकोऽपि तद्वत् काले फलप्रदः भवेदिति भावः ॥२४५॥

हिरण्येति।—महीपतेः राज्ञः, हिरण्यधान्यरत्नानि हिरण्यानि स्वर्णानि, धान्यानि व्रीह्यादीनि, रत्नानि मणयश्च तानि, विविधानि यानानि वाहनानि अश्वादीनि, तथा अन्यत् अपरमपि, यत्किञ्चित्, धनादिकमिति शेषः, तत् सर्वं प्रजाभ्यः स्यात् ; प्रजाभ्य एव सर्वाणि धनानि राज्ञा लभ्यन्ते, अतः प्रजा रक्षणीया इति भावः ॥ २४६ ॥

लोकेति।—नरेश्वराः नृपतयः, लोकानां प्रजानाम्, अनुग्रहकर्त्तारः हितकारिणः सन्तः, प्रवर्द्धन्ते प्रकर्षेण वृद्धिं गच्छन्ति ; लोकानां प्रजानां, सङ्क्षयाच्च विनाशाच्च,

अथ तेषां तद्वचनमाकर्ण्य भासुरक आह,—'अहो! सत्यमभिहितं भवद्भिः, परं यदि मम उपविष्टस्य अत्र नित्यमेव नैकः (ठ) श्वापदः समागमिष्यति, तत्नूनं सर्वानपि भक्षयिष्यामि'।

अथ ते तथैव प्रतिज्ञाय (ण) निर्हेतिभाजः तत्रैव वने निर्भयाः पर्यटन्ति। एकस्य प्रतिदिनं क्रमेण याति; हृतो वा, वैराग्यदुःखी वा, शोकग्रस्तो वा, पुत्रकलत्रनाशभीतो वा, तेषां मध्यात् तस्य भोजनार्थं मध्याह्नसमये उपतिष्ठते। अथ कदाचित् जातिक्रमाच्छृगालस्य (त) अवसरः समायातः; स समस्तसृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपायं चिन्तयन् वेलाऽतिक्रमं ज्ञात्वा व्याकुलितहृदयो यावत् गच्छति, तावत् मार्गे कूपमेकं दृष्टवान्। यावत् (थ) कूपोपरि याति, तावत् कूपमध्ये आत्मनः प्रतिबिम्बं ददर्श। दृष्ट्वा च तेन हृदये चिन्तितं यत्,—(द) 'भक्ष्य उपायोऽस्ति, अहं भासुरकं प्रकोप्य स्वबुद्ध्या अस्मिन् कूपे पातयिष्यामि'। अथ असौ दिनशेषे भासुरकसमीपं प्राप्तः। सिंहोऽपि वेलाऽतिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः (ध) सक्रकचौ परिलेलिहत् व्यचिन्तयत्,—'अहो! प्रातराहाराय निःसत्त्वं वनं मया कर्त्तव्यम्'। एवं चिन्तयतस्तस्य शृगालो मन्दं मन्दं गत्वा प्रणम्य अग्रे स्थितः। अथ तं प्रज्वलितात्मा भासुरको भर्त्सयन्नाह,—'रे शृगाधम! एकतः तावत् त्वं लघुः प्रातः, अपरतः वेलाऽतिक्रमेण, तदस्मादपराधात् त्वां निपात्य प्रातः

धीरुनादिना इति भावः, चर्यं नार्यं, यान्ति गच्छन्ति, इत्यत्र संशयः सन्देहः, नैव नास्त्येव; प्रणाश्रित्या एव राज्ञीऽपि स्थातरिति भावः ॥ २४७ ॥

(ठ) श्वापदः,—चतुष्पदप्राणीति यावत्।

(ण) निर्हेतिभाजः,—निर्वैरेणा इत्यर्थः।

(त) अवसरः,—समयः, वार इत्यर्थः।

(थ) कूपोपरि याति—कूपे झटिं निक्षिपतीति भावः।

(द) भक्ष्यः,—भुजः, खाद्यः इत्यर्थः।

(ध) सक्रकचौ—ओष्ठप्रान्तौ। परिलेलिहत्—पुनः पुनर्लिहन् [परिलेलिहदिति अभ्यस्तात् "नाभ्यस्ताच्छतुः" (७।१।७८ पा०) इति झतुर्नुमभावः]। निःसत्त्वं—जीवशून्यम्।

सकलान्यपि मृगकुलानि उच्छेदयिष्यामि'। अथ शशकः सविनयं प्रोवाच,—'स्वामिन्! न अपराधो मम, न च सत्त्वानां, तत् श्रूयतां कारणम्'। सिंह आह,—'सत्वरं निवेदय, यावत् मम दंष्ट्रान्तर्गतो न भवान् भविष्यति' इति। शशक आह,—'स्वामिन्! समस्तमृगैरस्य जातिक्रमेण मम (न) लघुतरस्य प्रस्तावं विज्ञाय ततोऽहं पञ्चशशकैः समं प्रेषितः। ततश्च अहमागच्छन् अन्तराले महता केनचिदपरेण सिंहेन विवरान्निर्गत्य अभिहितः,—'रे! क्व प्रस्थिता यूयम्? अभीष्टदेवतां स्मरत'। ततो मयाऽभिहितं,—'वयं स्वामिनो भासुरकसिंहस्य सकाशे आहारार्थं समयधर्मेण गच्छामः'। ततः तेन अभिहितं—'यद्येवं, तर्हि मदीयमेतदनं, मया सह समयधर्मेण समस्तैरपि स्वापदैर्वर्त्तितव्यम्। चौररूपो स भासुरकः। अथ यदि सोऽत्र राजा, ततो (प) विश्वासस्थाने चतुरः शशकानत्र धृत्वा तमाहूय द्रुततरमागच्छ, येन यः कश्चिदावयोर्मध्यात् पराक्रमेण राजा भविष्यति, स सर्वानेतान् भक्षयिष्यति' इति। ततोऽहं तेनादिष्टः स्वामिसकाशमभ्यागतः, एतत् वेलाव्यतिक्रमकारणम्; तदत्र स्वामी (फ) प्रमाणम्' इति। तच्छ्रुत्वा भासुरक आह,—'भद्र! यदि एवं, तत् सत्वरं दर्शय मे तं चौरसिंहं, येन अहं मृगकोपं तस्य उपरि क्षिप्त्वा सुखी भवामि। उक्तञ्च,—

भूमिर्मित्रं हिरण्यञ्च विग्रहस्य फलत्रयम्।
नास्त्येकमपि यद्येषां न तं कुर्य्यात् कथञ्चन ॥२४८॥

(न) लघुतरस्य—अतिक्षुद्रस्य। प्रस्तावं—भवदन्तिके आगमनप्रसङ्गम् इत्यर्थः।

(प) विश्वासस्थाने—प्रतिभूस्वरूपम्। चतुरः,—चतुःसङ्ख्यकान्। धृत्वा—रक्षित्वा।

(फ) प्रमाणं—कर्त्तव्यनिर्देष्टा।

भूमिरिति।—भूमिः राज्यं, मित्रं सुहृत्, हिरण्यं सुवर्णादिधनम्, एतत्

यत्र न स्यात् फलं भूरि यत्र च स्यात् पराभवः।
न तत्र मतिमान् युद्धं समुत्थाय समाचरेत्' ॥२४८॥

शशक आह,—'स्वामिन्! सत्यमिदं, स्वभूमिहेतोः परिभवाच्च युध्यन्ते क्षत्रियाः। परं सः (ब) दुर्गाश्रयः, दुर्गान्निष्क्रम्य वयं तेन विष्कम्भिताः; ततो दुर्गस्थो दुःसाध्यो भवति रिपुः।

उक्तञ्च,—न गजानां सहस्रेण न च लक्षेण वाजिनाम्।
यत् कृत्यं साध्यते राज्ञां दुर्गेणैकेन सिध्यति ॥२५०॥
अतमेकोऽपि मन्यते प्राकारस्थो धनुर्धरः।
तस्माद्दुर्गं प्रशंसन्ति नीतिशास्त्रविचक्षणाः ॥२५१॥
पुरा गुरोः समादेशात् हिरण्यकशिपोर्भयात्।
शक्रेण विहितं दुर्गं प्रभावाद्विश्वकर्मणः ॥ २५२ ॥
तेनापि च वरो दत्तो यस्य दुर्गं स भूपतिः।
विजयो यात्ततो भूमौ दुर्गाणि स्युः सहस्रशः ॥२५३॥

विग्रहस्य युद्धस्य, फलत्वयं, युद्धजये सति एतत्त्रयं लभते इति भावः; यदि एषां त्रयाणां मध्ये, एकमपि न भवति न लभते इत्यर्थः, तदा कथञ्चन कथमपि, तं विग्रहं, न कुर्यात्, निष्फलत्वात् इति भावः ॥२४८॥

यत्रेति।—यत्र विग्रहे, भूरि महत्, फलं न स्यात् न लभेत इत्यर्थः, यत्र च विग्रहे, पराभवः पराजयः, स्यात् सम्भवेत्, मतिमान् जनः, तत्र समुत्थाय मतूनां परस्परभेदं प्रकृतिकोपं वा घटयित्वा, युद्धं न समाचरेत् न कुर्यात् ॥२४८॥

(ब) दुर्गाश्रयः,—दुर्गमश्रयन्तीं। विष्कम्भिताः,—अवरुद्धाः। दुःसाध्यः,—दुर्जेयः।

नेति।—गजानां हस्तिनां, सहस्रेण यत् कृत्यं साध्यं, न, तथा वाजिनाम् अश्वानां, लक्षेण च यत् कृत्यं न साध्यते सिद्धमिति, राज्ञाम् एकेन दुर्गेण तत् सिध्यति ॥२५०॥

अतमिति।—एकोऽपि प्राकारस्थः दुर्गप्राकारान्वितः, धनुर्धरः अतं अवसङ्गकं, योधमिति शेषः, मन्यते योधयति इत्यर्थः, ["अतमेको योधयति" इति क्वचित् पाठः] तस्मात् नीतिशास्त्रविचक्षणाः नीतिज्ञाः, दुर्गं प्रशंसन्ति ॥२५१॥

पुरेति।—पुरा पूर्वस्मिन् काले, हिरण्यकशिपोः तद्राख्यदैत्यराजात्, भयात् हेतोः शक्रेण इन्द्रेण, गुरोः बृहस्पतेः, समादेशात् नियोगात्, विश्वकर्मणः देवशिल्पिनः, प्रभावात् सामर्थ्यात्, नैपुण्यादित्यर्थः, दुर्गं विहितं निर्मितम् ॥२५२॥

दंष्ट्राविरहितो नागो मदहीनो यथा गजः।
सर्वेषां जायते वश्यो दुर्गहीनस्तथा नृपः॥' ॥ २५४ ॥

तत् श्रुत्वा भासुरक आह,—'भद्र! दुर्गस्थमपि दर्शय तं वीरसिंहं, येन व्यापादयामि। उक्तञ्च,—

जातमात्रं न यः शत्रुं रोगञ्च प्रथमं नयेत्।
महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते ॥२५५॥

तथा च,—उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।
सभी हि शिष्टैराज्ञातौ वह्न्यन्तावामयः स च ॥२५६॥

अपि च,—उपेक्षितः क्षीणबलोऽपि शत्रुः
प्रमाददोषात् पुरुषैर्मदान्धैः।
साध्योऽपि भूत्वा प्रथमं ततोऽसौ
असाध्यतां व्याधिरिव प्रयाति ॥२५७॥

तेनेति।—तेन इन्द्रेणापि, वरः दत्तः, राजभ्य इति शेषः, यस्य भूपतेः, दुर्गम्, अस्तीति शेषः, स भूपतिः राजा, विजयी स्यात्; दुर्गाश्रयेण युद्धकरणात् इति भावः; ततः प्रभवति, भूमौ पृथिव्यां, सकलस्य बहुनः, दुर्गाणि खलु सन्त्यवेयुः ॥ २५३ ॥

दंष्ट्रेति।—दंष्ट्राविरहितः विगतदन्तहीनः, नागः पन्नगः, तथा मदहीनः गजश्च यथा सर्वेषां वश्यः जायते, दुर्गहीनो नृपोऽपि तथा, सर्वेषां वश्यो भवेदिति भावः ॥ २५४ ॥

जातमात्रमिति।—यः जातमात्रम् उत्पन्नमात्रं, शत्रुं, रोगञ्च प्रथमं आदौ, न नयेत् प्रापयेत्, न नाशयेदित्यर्थः, स महाबलोऽपि तेनैव शत्रुणा रोगेण च, वृद्धिं प्राप्य, क्लिष्टेनेति शेषः, हन्यते विनाश्यते ॥२५५॥

उत्तिष्ठमान इति।—तु किञ्च, पथ्यं हितम्, आरोग्यञ्च, इच्छता अभिलषता, पुरुषेण इति शेषः, उत्तिष्ठमानः वर्द्धमानः, ["उदोऽनूर्ध्वकर्मणि" (१।३।२४ पा०) इत्यात्मनेपदत्वात् आनच्] परः शत्रुः, न उपेक्ष्यः न क्रियालेश उपेक्षणीयः; हि यतः, शिष्टैः साधुभिः, नीतिशास्त्रैरित्यर्थः, वह्न्यन्तौ वृद्धिं गतिमन्तौ, आमयः रोगः, ("रोगव्याधिगदा-मयाः" इत्यमरः) स च शत्रुश्च, सभौ तुल्यौ, आज्ञातौ कथितौ। "अल्पोऽप्यग्निरसंदिग्धं दहत्याश्रयमेव हि। तथाल्पोऽपि रिपुर्वह्निरिवाश्रयमुपक्षति॥" इति भावः ॥२५६॥

उपेक्षित इति।—मदान्धैः गर्वान्धैः, पुरुषैः जनैः, प्रमादहीनात् अनवधानतारूपात्

तथा च,—आत्मनः शक्तिमुद्दीप्य मानोत्साहश्च यो व्रजेत्।
वहन् हन्ति स एकोऽपि चक्रियान् मार्गगो यथा' ॥२५८॥

शशक आह,—'अस्त्येतत्, तथाऽपि बलवान् स मया दृष्टः, तत् न युज्यते स्वामिनस्तत्र सामर्थ्यमविदित्वा गन्तुम्।

उक्तञ्च,—अविदित्वाऽऽत्मनः शक्तिं परस्य च समुत्सुकः।
गच्छन्नभिमुखो नाशं याति वह्नौ पतङ्गवत् ॥२५९॥
यो बलात् प्रोन्नतं याति निहन्तुं सबलोऽप्यरिम्।
विमदः स निवर्त्तेत शौण्डदन्तो गजो यथा' ॥२६०॥

भासुरक आह,—'भोः! किं तव अनेन व्यापारेण? दर्शय मे तं दुर्गस्थमपि'। अथ शशक आह,—'यद्येवं, तर्हि आगच्छतु स्वामी'। एवमुक्त्वा अग्रे व्यवस्थितः। ततश्च तेन आगच्छता यः कूपो दृष्टोऽभूत्, तमेव कूपमासाद्य भासुरकमाह,—'स्वामिन्! कस्ते प्रतापं सोढुं समर्थः? त्वां दृष्ट्वा दूरतोऽपि चौरसिंहः प्रविष्टः स्वं दुर्गं, तदागच्छ, येन दर्शयामि' इति। भासुरकः आह,—'दर्शय मे दुर्गम्'। तदनु दर्शितस्तेन कूपः। ततः सोऽपि मूर्खः सिंहः कूपमध्ये आत्मप्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंह-

---

दीप्तात्, उपेक्षितः प्रभुः औदासीन्योऽपि प्रथमं साध्यः प्रतीक्षार्थोऽपि भूत्वा, ततः उपेक्षावस्थादिति भावः, व्याधिरिव यतो बलाध्यताम् अप्रतिविधेयतां, प्रयाति गच्छति ॥२५७॥

आत्मन इति।—यश्च आत्मनः स्वस्य, शक्तिं सामर्थ्यम्, उद्दीप्य पर्याप्तीकृत्य, मानोत्साहं मानरूपोत्साहयुक्तं, व्रजेत् गच्छेत्, कुर्यादिति भावः, सः एकोऽपि मार्गगः परमार्गगः, यथा चक्रियान्, तथा वहन्, अमूनिति शेषः, हन्ति नाशयति। उपमालङ्कारः ॥२५८॥

अविदित्वेति।—आत्मनः परस्य प्रभोः च, शक्तिं सामर्थ्यम्, अविदित्वा अज्ञात्वा, अनालोच्येत्यर्थः, समुत्सुकः अधीरः सन्, अभिमुखः प्रभूनभिमुखीकृत्य च, गच्छन् जनः, वह्नौ अग्नौ, पतङ्गवत् शलभ इव, नाशं निपातं, याति प्राप्नोति ॥२५९॥

य इति।—सबलोऽपि बलवानपि, यः बलात् बलमाश्रित्य, न तु बुद्धिमिति भावः; प्रोन्नतं प्रबलम्, अरिं शत्रुं, निहन्तुं विनाशयितुं, याति, स शौण्डदन्तः मदोद्धतदन्तः, गजो यथा हस्तीव, विमदः हतगर्वः सन्, निवर्त्तेत पराजितो भवेदित्यर्थः ॥२६०॥

नादं मुमोच। ततः प्रतिशब्देन कूपमध्यात् द्विगुणतरो नादः समुत्थितः। अथ तेन तं शत्रुं मत्वा आत्मानं तस्य उपरि प्रक्षिप्य प्राणाः परित्यक्ताः। अन्यकोऽपि हृष्टमनाः सर्वमृगान् आनन्द्य तैः सह प्रेक्ष्यमाणो यथासुखं तत्र वने निवसति स्म। अतोऽहं ब्रवीमि,—'यस्य बुद्धिर्बलं तस्य' इति। तत् यदि भवान् कथयति, तर्हि तत्रैव गत्वा तयोः स्वबुद्धिप्रभावेण मैत्रीभेदं करोमि"। करटक आह,—"भद्र! यदि एवं, तर्हि गच्छ, (भ) शिवास्ते पन्थानः सन्तु, यथाऽभिप्रेतमनुष्ठीयताम्"।

अथ दमनकः (म) सञ्जीवकवियुक्तं पिङ्गलकमवलोक्य तत्रान्तरे प्रणम्याग्रे समुपविष्टः। पिङ्गलकोऽपि तमाह,—"भद्र! किं चिरात् दृष्टः?" दमनक आह,—"न किञ्चिदेवपादानाम् अस्माभिः प्रयोजनं, तेन अहं न आगच्छामि; तथाऽपि(य) राजप्रयोजनविनाशमवलोक्य सन्दह्यमानहृदयो व्याकुलतया स्वयमेव अभ्यागतो वर्तते। उक्तञ्च,—

प्रियं वा यदि वा द्वेष्यं शुभं वा यदि वाऽशुभम्।
अपृष्टोऽपि हितं ब्रूयात् यश्च नेच्छेत् पराभवम्"॥२६१॥

अथ तस्य साभिप्रायं वचनमाकर्ण्य पिङ्गलक आह, —"किं वृथामना भवान्? तत् कथ्यतां, यत् कथनीयमस्ति"। स प्राह,—"देव! सञ्जीवको युष्मत्पादानामुपरि

(भ) शिवाः,—कल्याणदाः, ते—तव, पन्थानः,—मार्गाः, सन्तु—भवन्तु, यदि ते विघ्नं मा मूदित्यर्थः; तव यात्रा सफला भवतु इति भावः।

(म) सञ्जीवकवियुक्तं—सञ्जीवकेन रहितम्। तत्रान्तरे—तस्मिन्नवसरे।

(य) राजेति।—राजकार्यभंशं दृष्ट्वा। सन्दह्यमानहृदयः,—सन्तप्यमानचेताः।

प्रियमिति।—यो जनः, यस्य पराभवं पराजयं, नाञ्छतित्यर्थः, न इच्छेत् द्रष्टुं नाभिलषेदित्यर्थः, सः अपृष्टोऽपि अजिज्ञासितोऽपि, स्वभावितनाशेन तेनेति शेषः, तस्य प्रियं वा, यदि वा द्वेष्यम् अप्रियं, शुभं वा, यदि वा अशुभं, लोकानिति भावः, भवतु इति शेषः, हितं ब्रूयेत् कथयेत्। [वचधातोर्दैवादिकात् विधिलिङ्]॥ २६१॥

(र) द्रोहबुद्धिः, स विश्वासगतस्य मम विजने इदमाह,—'भो दमनक! दृष्टो मया अस्य पिङ्गलकस्य सारासारता; तदहमेनं हत्वा सकलमृगाऽऽधिपत्यं त्वत्साचिव्यपदवीसमन्वितं करिष्यामि' इति"। पिङ्गलकोऽपि (ल) तदत्यसारप्रहारसदृशं दारुणं वचः समाकर्ण्य मोहमुपगतो न किञ्चिदपि उक्तवान्। दमनकोऽपि तस्य तमाकारमालोक्य चिन्तितवान्,—"अयं तावत् (व) सञ्जीवकनिबद्धरागः, तन्नूनमनेन मन्त्रिणा राजा विनाशमवाप्स्यति इति। उक्तञ्च,—

एकं भूमिपतिः करोति सचिवं राज्ये प्रमाणं यदा
तं मोहाच्छ्रयते मदः स च मदाद्दास्येन निर्वेद्यते।
निर्विण्णस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा
स्वातन्त्र्यस्पृहया ततः स नृपतेः प्राणेष्वभिद्रुह्यते ॥२६२॥

(र) द्रोहबुद्धिः,—द्रोहे—अनिष्टे, बुद्धिर्यस्य तथाभूतः, विद्रोहार्थीत्यर्थः। विश्वासगतस्य—विश्वस्तस्य। सारासारता—बलाबलत्वम्। त्वत्साचिव्येति।—तव या साचिव्यपदवी—मन्त्रिपदं, तत्सहितम्; मम मृगाधिराज्ये त्वया मन्त्रिणा भवितव्यमिति भावः।

(ल) वज्रेति।—वज्रेण—अग्निना, यः सारः,—कठिनः इत्यर्थः, प्रहारः,—आघातः, तत्सदृशं—तत्तुल्यम्।

(व) सञ्जीवकेति।—सञ्जीवके निबद्धः,—दृढसंसक्तः, रागो यस्य तादृशः, सञ्जीवके बद्धानुराग इत्यर्थः। अनेन मन्त्रिणा—सञ्जीवकेनेत्यर्थः।

एकमिति।—यदा भूमिपतिः एकं सचिवं मन्त्रिणं, राज्ये प्रमाणं कर्त्तव्याकर्त्तव्यावधारकं, करोति, एकस्मिन्नेव सचिवे सर्वराज्यभारं निक्षिपति इत्यर्थः, तदा मोहात् अज्ञानात्, मदः गर्वः, 'अहमेव सर्वेषां प्रभुः' इत्येवंरूपः इति भावः, तं सचिवं, श्रयते आश्रयति, स च सचिवः, मदात् तादृशात् गर्वात्, दास्येन निर्वेद्यते निर्वेदं गच्छति, 'अहं सर्वस्य प्रभुरपि अस्य दासः' इति आत्मावमाननां मन्यते इति भावः; ततः निर्विण्णस्य निर्वेदं गतस्य, तस्य सचिवस्य, हृदये स्वतन्त्रस्पृहा स्वाधीनताऽऽकाङ्क्षा, पदं स्थानं, करोति, 'कथमहं स्वाधीनो भवामि?' इति आत्माङ्क्षा जायते इति भावः; ततः सः स्वातन्त्र्यस्पृहया नृपतेः प्राणेषु [विषयेषु सप्तमी, प्राणान् इति भाव्यं, "तृषदृहीदृपस्पृशेः कर्म" (१।४।६८ पा०) इति कर्मसंज्ञात्वात्] अभिद्रुह्यते द्रोह-

तत् किमत्र युक्तम्?" इति। पिङ्गलकोऽपि चेतनां समासाद्य कथमपि तमाह,—"दमनक! सञ्जीवकस्तावत् प्राणसमो भृत्यः, स कथं ममोपरि द्रोहबुद्धिं करोति?" दमनक आह,—"देव! भृत्यो भृत्य इति (ग) अनैकान्तिकमेतत्।

उक्तञ्च,—न सोऽस्ति पुरुषो राज्ञां यो न कामयते श्रियम्।
अयत्ना एव सर्वत्र नरेन्द्रं पर्य्युपासते" ॥२६३॥

पिङ्गलक आह,—"भद्र! तथाऽपि मम तस्य उपरि (घ) चित्तवृत्तिर्न विकृतिं याति। अथवा साधु इदमुच्यते,—

अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः?।
कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः" ॥२६४॥

दमनक आह,—"अत एव अयं दोषः। उक्तञ्च,—

यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः।
अकुलीनः कुलीनो वा स श्रियो भाजनं नरः ॥२६५॥

अपरं, केन गुणविशेषेण स्वामी सञ्जीवकं निर्गुणकमपि

आचरति, 'राज्ञि निकृते ममैवाधिपत्यं भवेत्' इति अभिलाषेण नृपतिं नाशयतीति भावः। [अत्र आत्मनेपदं चिन्त्यम।] आर्दूलविक्रीडितं वृत्तम् ॥२६२॥

(ग) अनैकान्तिकम्—अनियतहृदयः, यो भृत्यः स चिरमेव भृत्यभावेन स्थास्यति इति न कदाचिदपि सम्भवेत्, दास्यात् आत्मानं मोचयितुं सर्वे एव यतन्ते इति भावः।

नेति।—यः राज्ञां श्रियं न कामयते नाभिलषति, यः तादृशः, पुरुषो नास्ति, सर्वे एव राजश्रियं कामयते इत्यर्थः; सर्वत्र सर्वस्मिन् प्रदेशे, अयत्नाः अयत्ना एव पुरुषाः, दुर्यत्ना निर्धनाश्च इति भावः, नरेन्द्रं नृपं, पर्य्युपासते सेवन्ते ॥२६३॥

(घ) चित्तवृत्तिः,—मनोभावः। विकृतिं—विकारम्, अन्यथाभावमित्यर्थः।

अनेकेति।—यः प्रियः, स व्यलीकानि अप्रियाणि, ("व्यलीकमप्रियाकार्ये वैक्लव्येऽपि पीडने" इति मेदिनी) कुर्वन्नपि आचरन्नपि, प्रियः एव स्वामिवत् प्रेमाकर एवेत्यर्थः। तदेव दृष्टान्तेन दृढयति,—अनेकदोषदुष्टोऽपि बहुभिर्दोषैराक्रान्तोऽपि, कायः देहः, कस्य जनस्य, वल्लभः प्रियः, किं? अपि तु सर्वस्यैव प्रिय इत्यर्थः ॥२६४॥

यस्मिन् इति।—पार्थिवः पृथिव्या ईश्वरः, नृपतिः, यस्मिन् एव जने, अधिकं यथा

नकुलः (स) धारयति ? अथ देव! यदि एवं चिन्तयसि,—'महाकायोऽयम्, अनेन रिपून् व्यापादयिष्यामि' तदप्युक्तात् न सिध्यति, यतोऽयं शस्त्रभोजी ; देवपादानां पुनः शस्त्रवो मांसाग्निः ; तत् रिपुसादनम् अस्य महाकायेन न भवति, तस्मादेनं दूषयित्वा हन्यताम्" इति। पिङ्गलक आह,—

"उक्तो भवति यः पूर्वं गुणवानिति संसदि।
तस्य दोषो न वक्तव्यः प्रतिज्ञाभङ्गभीरुणा ॥ २६६ ॥

अन्यच्च,—मया अस्य तव वचनेन (ह) अभयप्रदानं दत्तम्। तत् कथं स्वयमेव व्यापादयामि ? सर्वथा सञ्जीवकोऽयं सुहृत् अस्माकं, न तं प्रति कश्चित् (च) मन्युरिति। उक्तञ्च,—

इतः स दैत्यः प्राप्तश्चेन्न एवार्हति क्षयम्।
विषह्यश्चोऽपि संवर्द्ध स्वयं क्षेत्तुमसाम्प्रतम् ॥२६७॥

तथा चक्षुः दृष्टिम्, आरोपयति ददाति, वसु अधिकम् आदियते इत्यर्थः, स नरः सकुलीनः असदंशोद्भवः, कुलीनः तदितरः सदंशोद्भवो वा, श्रियः सम्पदः, भाजनं पात्रं, भवतीति शेषः। यः कश्चित् राज्ञानुग्रहीतो धनवान् बलवांश्च भवतीति निष्कर्षः ॥२६५॥

(ङ) धारयति—रक्षति। महाकायः,—महच्छरीरः। शस्त्रभोजी—दृषभक्षकः। रिपुसादनं—शत्रुविनाशः। दूषयित्वा—दूषितं कृत्वा, छलेन दोषोद्भावनादिनेति भावः।

उक्त इति।—यो जनः, पूर्वं प्रथमं, संसदि सभायां, गुणवान् अयं गुणी, इति उक्तः कथितः, गुणिनेन स्वीकृतः इत्यर्थः, भवति, प्रतिज्ञाभङ्गभीरुणा प्रागुक्तस्वीकारान्यथाकरणभङ्गिना जनेन, तस्य दोषो न वक्तव्यः स निर्गुण इति पुनर्न वाच्यः ; तथाऽऽत्मे तद्वचसि कोऽपि न विश्वसिति इति भावः ॥२६६॥

(ङ) अभयप्रदानं—न हनिष्यामि इति आश्वासवचनम्।

(च) मन्युः,—क्रोधः, क्रोधकारणमिति भावः।

इत इति।—तारकाक्षुरपीडितान् तन्नाशार्थिनो देवान् प्रति ब्रह्मणा उक्तिरियम्। स दैत्यः तारकः, इतः मत्तः, मत्तकाश्यादित्यर्थः, प्राप्तः श्रीः श्रियोऽप्यर्थे क्वेव तथाभूतः, अतः इत एव मत्त एव, क्षयं क्षयं, न अर्हति ; तथा हि—विषह्यः [साम्प्रतमित्यव्यययोगेन प्रथमा] अपि स्वयम् आत्मना, संवर्द्ध उग्रा अजसेवादिना वर्द्धयित्वा इत्यर्थः, क्षेत्तुं क्षपयितुम्, असाम्प्रतम् अयुक्तः। ("युक्ते च साम्प्रत आगे" इत्यमरः) ॥२६७॥

आदौ न वा प्रणयिनां प्रणयो विधेयो
दत्तोऽथवा प्रतिदिनं परिपोषणीयः।
उत्क्षिप्य यत् क्षिपति तत् प्रकरोति लज्जां
भूमौ स्थितस्य पतनात् भयमेव नास्ति ॥ २६८ ॥

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ?।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ २६९ ॥

तद्द्रोहबुद्धेरपि मया अस्य न विकृतमाचरणीयम्"। दमनक आह,—"स्वामिन्! नैष राजधर्मः, यद्द्रोहबुद्धिरपि क्षम्यते। उक्तञ्च,—तुच्छार्थं तुच्छसामर्थ्यं मर्मज्ञं व्यवसायिनम्।
अर्द्धराज्यहरं भृत्यं यो न हन्यात् स हन्यते ॥ २७० ॥

अपरं, त्वया अस्य सख्यित्वात् सर्वोऽपि राजधर्मः परित्यक्तः, राजधर्माभावात् सर्वोऽपि परिजनो विरक्तिं गतः; यतः सञ्जीवकः मांसभोजी, (क) भवान् मांसादः, तव प्रकृतयश्च। यत्तव

आदाविति।—आदौ प्रथमतमेव, प्रणयिनां प्रेमलाभेच्छूनां सत्त्वानां, प्रणयः न विधेयः वा न कर्त्तव्यः; वा, अथवा किंवा, दत्तः विहितश्चेत्, प्रणयः दत्तानुबन्धः, तर्हि प्रतिदिनं परिपोषणीयः सः वर्द्धनीयः; प्रथमं तावत् प्रणयो न कर्त्तव्यः एव, कृतश्चेत् नासौ त्याज्य इति भावः; तथा हि, उत्क्षिप्य अर्द्धमुत्थाप्य, क्षिपति, अधः इति शेषः, इति यत्, तत् लज्जां प्रकरोति जनयति, परन्तु भूमौ स्थितस्य जनस्य, पतनात् अधं नास्ति एव; अस्यापि वर्द्धनं कृत्वा अधःपतनात् वर्द्धनाकरणमेव वरमिति भावः ॥२६८॥

उपकारिष्विति।—यः उपकारिषु हितकारिजनेष्वित्यर्थः, साधुः सद्व्यवहारपरः, तस्य साधुत्वे तादृशव्यवहारे, कः गुणः? न कोऽपीत्यर्थः; यः अपकारिषु अहितकारिजनेष्वित्यर्थः, साधुः, स एव सद्भिः साधुः उच्यते ॥२६९॥

तुच्छार्थमिति।—यः तुच्छार्थं तुच्छप्रयोजनं, राज्यार्द्धाकाङ्क्षणमिति यावत्, तुच्छज्ञानार्थं समानबलं, मर्मज्ञम् आश्रयज्ञं, छिद्राभिज्ञमिति भावः, व्यवसायिनम् उद्योगिनम्, अत एव अर्द्धराज्यहरं तादृग्गुणयोगात् राज्यार्द्धहारिणेव सम्भाव्यमानमिति भावः; भृत्यं, न हन्यात्, स हन्यते स्वयमेव वध्यते; तेनैव मृत्युनेति शेषः ॥२७०॥

(क) भवान् मांसादः,—मांसभोजी, तव प्रकृतयश्च मांसादः,—मांसभोजिनः, [एकवचनान्तपदे बहुवचनान्तपदे त्रिपूप्रत्ययो बोध्यः]। मांसाशिप्रभृतिनां

अवध्यव्यवसायवाञ्छं कुतस्तासां मांसाशनम् ? (ख) यद्रहिताः ता: त्वां त्यक्ता यास्यन्ति। (ग) ततोऽपि त्वं विनष्ट एव, अस्य सङ्गत्या पुनस्ते न कदाचित् आखेटके मतिः भविष्यति।

इत्यत्र,—याट्शैः सेव्यते भृत्यैर्याट्शांश्चोपसेवते।
कदाचिन्नात्र सन्देहस्ताट्क् भवति पूरुषः ॥२७१॥

तथा च,—सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।
स्वाती सागरशुक्तिकुक्षिपतितं तज्जायते मौक्तिकं
प्रायेणाधममध्यमोत्तमगुणः संवासतो जायते ॥२७२॥

तथा च,—असतां सङ्गदोषेण साधवो यान्ति विक्रियाम्।
दुर्योधनप्रसङ्गेन भीष्मो गोहरणे गतः ॥२७३॥

प्रकृतिविरोधिनोः सख्यित्वं न युज्यते इति भावः। यदिति।—यत—मांसाशनं तव अवध्यव्यवसायात्—अहिंसाऽऽचरणात्, वाच्यं—बहिर्भूतं, तत तासां—मांसादानां प्रकृतीनां, कुतः ? अवध्यव्यवसायराहित्येन मांसस्य दुष्प्रापत्वादिति भावः।

(ख) यद्रहिताः,—यैन—मांसेन, रहिताः,—वञ्चिता इत्यर्थः, ताः,—प्रकृतयः; अमात्यादयः अनुचरवर्गाः इत्यर्थः; इत्यभावात् परिजनाः त्वां त्यक्ष्यन्ति इति भावः।

(ग) ततः,—प्रकृतिभिः परित्यक्तत्वादित्यर्थः। अस्य—सञ्जीवकस्य, सङ्गत्या—संसर्गेण, ते—तव, आखेटके—मृगयायां, मतिर्न भविष्यतीति सम्बन्धः।

याट्शैरिति।—याट्शैः भृत्यैः सेव्यते, प्रभुरिति शेषः, याट्शांश्च, जनानिति शेषः, उपसेवते आश्रयति, पूरुषः प्रभुरिति भावः, ताट्क् ताट्शगुणसम्पन्नः, भवति, अत्र विषये, कदाचित सन्देहः न, अस्तीति शेषः; "संसर्गजा दोषगुणा भवन्ति" इति भावः ॥२७१॥

सन्तप्तायसीति।—सन्तप्ते, अयसि लौहे, संस्थितस्य, पयसः जलस्य, नामापि न ज्ञायते, सद्य एव शुष्यमाणत्वादिति भावः। तदेव पयः, नलिनीपत्रस्थितं पद्मिनी-पत्राग्रसंस्थितं सत्, मुक्ताकारतया अत्यच्छतया मौक्तिकवत् इत्यर्थः, राजते शोभते; स्वाती स्वातिनक्षत्रे स्थितमित्यर्थः, तत् पयः, सागरस्य शुक्तेः मुक्ताम्फोटस्य, कुक्षिपतितम् अभ्यन्तरनिपतितं सत्, मौक्तिकं जायते; तस्मात संवासतः एकत्र वासात्, संसर्गा-दित्यर्थः, प्रायेण अधमः मध्यमः उत्तमस्य गुणः जायते। मार्दूलविक्रीडितं वृत्तम् ॥२७२॥

असतामिति।—असतां दुर्जनानां, सङ्गदोषेण साधवः विक्रियां विकारं, यान्ति;

अत एव सन्तो नीचसङ्गं वर्जयन्ति । उक्तञ्च,—

न ह्यविज्ञातशीलस्य प्रदातव्यः प्रतिश्रयः ।
मत्कुणस्य च दोषेण हता मन्दविसर्पिणी" ॥२७४॥

पिङ्गलक आह,—"कथमेतत् ?" सोऽब्रवीत्,—

कथा ९ ।

"अस्ति कस्यचित् महीपतेः कस्मिंश्चित् स्थाने मनोरमं शयनस्थानम् ; (घ) तत्र शुक्लतरपटयुगलमध्यसंस्थिता मन्दविसर्पिणी नाम श्वेता (ङ) यूका प्रतिवसति स्म । सा च तस्य महीपतेः रक्तमास्वादयन्ती सुखेन कालं नयमाना तिष्ठति । अन्येद्युश्च तत्र शयने क्वचित् भ्राम्यन् अग्निमुखो नाम मत्कुणः समायातः । अथ तं दृष्ट्वा सा विषण्णवदना प्रोवाच,—'भो अग्निमुख ! कुलस्त्वमत्र अनुचितस्थाने समायातः ? तदुयावत् न कश्चिद्वेत्ति, तावत् शीघ्रं गम्यताम्' इति । स आह,—'भगवति ! गृहाऽऽगतस्य असाधोरपि नैतत् युज्यते वक्तुम् । उक्तञ्च,—

एह्यागच्छ समाश्वसासनमिदं कस्माच्चिराद्दृश्यसे ?
का वार्त्ता ? न्वतिदुर्बलोऽसि कुशलं ? प्रीतोऽस्मि ते दर्शनात् ।

तथा हि, भोगैः दुर्योधनप्रसङ्गेन दुर्योधनसंसर्गेण, गोहरणे, उत्तरगोग्रहे इति भावः, गतः प्रस्थितः, प्रवृत्तो वा इत्यर्थः ॥२७३॥

न ह्वीति ।—अविज्ञातशीलस्य अज्ञातचरित्रस्य, जनस्य इति शेषः, प्रतिश्रयः आश्रयः, न हि प्रदातव्यः ; तथा हि, मत्कुणस्य रक्तपायिनः मत्याकीटविशेषस्य, "छारपोका" इति बङ्गभाषायां प्रसिद्धस्य इत्यर्थः, दोषेण मन्दविसर्पिणी तदभिधाना काचित् यूका, हता विनाशिता ॥२७४॥

(घ) तत्र—शयनस्थाने । शुक्लेति ।—शुक्लतरम्—अतिशुभ्रं, यत् पटयुगलम्—आवरणवस्त्रद्वयं, तन्मध्यसंस्थिता ।

(ङ) यूका—क्रिमिविशेषः, केशकीटः (उकुण) इति यावत् ।

एह्येहीति ।—एहि, आगच्छ, समाश्वस समाश्वसो भव, [समाश्वसेति चिन्त्यं, "समाश्वसिहि"इति भाव्यम्] आसनमिदम्, अत्र उपविशेति भावः ; कस्मात् चिरात्

एवं नीचजनेऽपि युज्यति यदि प्राप्ते सतां सर्वदा
धर्मोऽयं यदनेधिनां निगदितः स्मार्त्तैर्लघुस्वर्गदः ॥२७५॥

अपरं,—मया अनेकमानुषाणामनेकविधानि रुधिराणि आस्वादितानि आहारदोषात् कटुतिक्तकषायाम्लरसास्वादानि; न च मया कदाचिन्मधुररसं समास्वादितम्; तत् यदि त्वं प्रसादं करोषि, तदस्य नृपतेर्विविधव्यञ्जनान्नपानचोष्यलेह्यास्वाद्याहार-वशात् शरीरे यत् मिष्टं रसं सञ्जातं, तदास्वादनेन सौख्यं सम्पादयामि जिह्वाया इति। उक्तञ्च,—

रसस्य नृपतेर्वापि जिह्वासौख्यं समं स्मृतम्।
तन्मात्रञ्च स्मृतं सारं तदर्थं यतते जनः ॥२७६॥
यद्येव न भवेल्लोके कर्म जिह्वाप्रतुष्टिदम्।
तत्र भृत्यो भवेत् कश्चित् कस्यचिद्दयगोऽथवा ॥२७७॥
यदसत्यं वदेत् मर्त्यो यदाऽसेव्यञ्च सेवते।
यच्चकृति विदेयञ्च तत् सर्वमुदरार्थतः ॥२७८॥

द्यस्यसे ? नु भोः ! का वार्त्ता ? कः संवादः ? अस्तिदुर्बलोऽसि, कुशलम् ? तवेति शेषः, ते तव, दर्शनात् प्रीतोऽस्मि। नीचजनेऽपि यदि प्राप्ते सति, सतां साधूनां, सर्वदा एवम् उक्तप्रकारम्, आचरणमिति शेषः, युज्यति, [परस्मैपदमत्र छन्दोऽनु-रोधात्] आर्त्तैः स्मृतिशास्त्रविशारदैः पण्डितैः हृत्यर्थः, यदनेधिनां यदिष्यताम्, अयं धर्मः सत्यस्वर्गदः आयुस्वर्गसाधनं, निगदितः कथितः। आर्टुंखविक्रीडितं छन्दः ॥२७५॥

रसस्येति।—रसस्य रूपस्य, मन्दस्य वा, नृपतेर्वापि राज्ञश्चापि, जिह्वासौख्यं रसनाहृप्तिरित्यर्थः, समं तुल्यं, स्मृतम्; तदर्थं रसनासौख्यार्थं, जनः यतते चेष्टते, अतः, तन्मात्रं रसनासौख्यमेव, सारम् उत्कृष्टं, स्मृतम्; जनानां रुचिभिन्नत्वेऽपि सर्वे-षामेव रसनातुष्टेः समतया तत उत्कृष्टं किमपि नास्तीति फलितार्थः ॥२७६॥

यदीति।—यदि लोके जनानां, जिह्वाप्रतुष्टिदं रसनासन्तोषप्रदं, कर्म नैव भवेत्, तत् तदा, कश्चित् कोऽपि जनः, कस्यचित् कस्यापि, भृत्यः किङ्करः, अथवा दयगः; दयः, न भवेत्; सर्व एव जिह्वातुष्टये लोकस्य वशगो भवतीति भावः ॥२७७॥

यदिति।—मर्त्यः मानवः, यत् असत्यं वदेत्, यदा असेव्यं नीचजनमिति भावः,

तत् मया (च) गृहागतेन बुभुक्षया पीड्यमानेन स्वल्पकाद्यात् भोजनम् अर्थनीयम्। तत्र त्वया एकाकिन्या अस्य भूपतेः रक्तपानं कर्त्तुं युज्यते'। तत् श्रुत्वा मन्दविसर्पिणी आह,—'भोः मत्कुण! अहमस्य नृपतेर्निद्रावशं गतस्य रक्तमास्वादयामि, त्वं पुनः अग्निमुखः चपलश्च; तत् यदि मया सह रक्तपानं करोषि, तत् तिष्ठ, अभीष्टतरं रक्तमास्वादय'। सोऽब्रवीत्,—'भगवति! एवं करिष्यामि, यावत् त्वं न आस्वादयसि प्रथमं नृपरक्तं, तावत् मम (छ) देवगुरुकृतः शपथः स्यात्, यदि तत् आस्वादयामि'। एवं तयोः परस्परं वदतोः स राजा तच्छयनमासाद्य प्रसुप्तः।

अथ असौ मत्कुणः (ज) जिह्वालौल्यप्रकृष्टौत्सुक्यात् जागतमपि तं महीपतिम् अदशत्। अथवा साधु उदमुच्यते,—

स्वभावो नोपदेशेन शक्यते कर्त्तुमन्यथा।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ॥२७९॥
यदि स्याच्छीतलो वह्निः शीतांशुर्दहनात्मकः।
न स्वभावोऽत्र मर्त्यानां शक्यते कर्त्तुमन्यथा ॥२८०॥

सेवते, यत्र विदेशं गच्छति, तत् सर्वम् उदरार्थतः उदरपोषणार्थमेव; अन्यथा अर्थं निष्प्रयोजनं क्षीणसेवनं, स्वजनं हित्वा दूरदेशगमनञ्च स्वीकुर्यात्? इत्यर्थः ॥२७८॥

(च) गृहागतेन—अतिथिना, [द्वितीयासमासः]। बुभुक्षया—क्षुधया। अर्थनीयं—प्रार्थनीयम्।

(छ) देवगुरुकृतः,—देवान् गुरुंश्च उद्दिश्य यः क्रियते स इत्यर्थः।

(ज) जिह्वेति।—जिह्वायाः,—रसनायाः, लौल्यात्—चापल्यात्, अतिलोलादित्यर्थः. यत् प्रकृष्टं—महत्, औत्सुक्यम्—चापलः तस्मात्।

स्वभाव इति।—उपदेशेन स्वभावः प्रकृतिः, अन्यथा कर्त्तुं परावर्त्तयितुं, न शक्यते। तदेव दृष्टान्तेन दृढयति, सुतप्तमिति।—तथा हि पानीयं जलं, सुतप्तमपि अत्युष्णमपि, पुनः शीततां शैत्यं, गच्छति प्राप्नोति, शीतप्रकृतिकत्वादिति भावः ॥२७९॥

यदीति।—यदि चेत्, वह्निः अग्निः, शीतलः शैत्यगुणयुक्तः स्यात्, तथा शीतांशुश्चन्द्रः,

अथ असौ महीपतिः सूच्यग्रविद्ध इव तच्छ्रवणं त्यक्त्वा तत्क्षणादेव उत्थितः प्रोवाच,—'अहो! ज्ञायतामत्र (भ) प्रच्छादनपटे मत्कुणो यूका वा नूनं तिष्ठति, येन अहं दष्टः' इति। अथ ये कञ्चुकिनस्तत्र स्थिताः, ते सत्वरं प्रच्छादनपटं गृहीत्वा सूक्ष्मदृष्ट्या वीक्षाञ्चक्रुः। अत्रान्तरे स मत्कुणः चापल्यात् खट्वान्तः प्रविष्टः, सा मन्दविसर्पिणी अपि वस्त्रसन्यन्तर्गता तैर्दृष्टा व्यापादिता च। अतोऽहं ब्रवीमि,—'न ह्यविज्ञातशीलस्य'इति। एवं ज्ञात्वा त्वया एषः बध्यः, नो चेत् त्वां व्यापादयिष्यति।

उक्तञ्च,—त्यक्ताबाभ्यन्तरा येन बाह्याबाभ्यन्तरीकृताः।

स एव मृत्युमाप्नोति यथा राजा ककुद्रुमः" ॥२८१॥

पिङ्गलक आह,—"कथमेतत्?" सोऽब्रवीत्,—

कथा १०।

"कस्मिंश्चित् वनप्रदेशे चण्डरवो नाम शृगालः प्रतिवसति स्म। स कदादित् क्षुधाविष्टो जिघ्रांल्लीलयात् नगरान्तरे प्रविष्टः। अथ तं नगरवासिनः (ञ) सारमेया अवलोक्य सर्वतः शब्दायमानाः परिधाव्य तीक्ष्णदंष्ट्राग्रैर्भक्षितुमारब्धाः। सोऽपि तैः भक्ष्यमाणः प्राणभयात् (ट) प्रत्यासन्नरजकगृहं प्रविष्टः। तत्र च नीलीरसपरिपूर्णं महाभाण्डं सञ्जी-

---

दहनात्मकः उष्णगुणसम्पन्नः, स्यात्, तथापि अत्र संसारे, मर्त्यानां स्वभावः अन्यथा कर्तुं न शक्यते। यथा "अङ्गारः शतधौतेन मलिनत्वं न मुञ्चति" तथेतिभावः ॥२८०॥

(भ) प्रच्छादनपटे—आस्तरणवस्त्रे।

त्यक्त्वा इति।—येन जनेन, आभ्यन्तरा आत्मीयाः, स्वजना इत्यर्थः, त्यक्ताः, तथा बाह्याः इतरे, अस्वजना इत्यर्थः, आभ्यन्तरीकृताः आत्मीयत्वेन परिगृहीता इत्यर्थः, स एव राजा ककुद्रुमः यथा ककुद्रुमनामकमृगालवत्, मृत्युमाप्नोति ॥२८१॥

(ञ) सारमेयाः,—कुक्कुराः। शब्दायमानाः,—शब्दं कुर्वाणाः, [कण्ड्वादात् शब्दायधातोः आनचि रूपम्]। परिधाव्य—धावित्वा। भक्षितुं—दष्टुम्।

(ट) प्रत्यासन्नेति।—प्रत्यासन्नं—समीपवर्ति, यत् रजकगृहं—वस्त्ररञ्जकभवनम्।

कृतमासीत् ; तत्र सारमेयैः आक्रान्तो भाण्डमध्ये पतितः। अथ यावत् निष्क्रान्तः, तावत् नीलीवर्णः सञ्जातः। तत्र अपरे सारमेयास्तं मृगालमजानन्तो यथाऽभीष्टदिशं जग्मुः ; चण्ड-रवोऽपि दूरतरं प्रदेशमासाद्य काननाभिमुखं प्रतस्थे, न च नीलवर्णेन कदाचित् (ठ) निजरङ्गः त्यज्यते। उक्तञ्च,—

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च।
एको ग्रहस्तु मौनानां नीलीमद्यपयोर्यथा ॥२८२॥

अथ तं (ड) हरगलगरल-तमालसमप्रभमपूर्वं सत्त्वमव-लोक्य सर्वे सिंहव्याघ्रद्वीपिवृकप्रभृतयोऽरण्यनिवासिनो भय-व्याकुलितचित्ताः समन्तात् पलायनक्रियां कुर्वन्ति, कथयन्ति च,—'न ज्ञायतेऽस्य कीदृग्विचेष्टितं पौरुषञ्च, तद्दूरतरं गच्छामः। उक्तञ्च,—न यस्य चेष्टितं विद्यात् न कुलं न पराक्रमम्।
न तस्य विश्वसेत् प्राज्ञो यदीच्छेच्छ्रियमात्मनः' ॥२८३॥

(ठ) निजरङ्गः,—आत्मरागः, स्ववर्णः इत्यर्थः, ("—रङ्गो ना रागे नृत्ते—"इति मेदिनी)। बहुशो धावनेनापि नीलीरञ्जितं द्रव्यं न कदाऽपि स्ववर्णं प्राप्नोतीति भावः।

वज्रेति।—वज्रलेपस्य आमलिन्दुकफलादिना विरचितस्य प्रलेपविशेषस्य, मूर्खस्य मूढस्य, नारीणां स्त्रीणां, कर्कटस्य कुलीरकस्य, मौनानां मत्यानाञ्च, एकः एकत्वम्, आक्रान्तिरित्यर्थः, आयत्तश्च, सङ्कल्प इत्यर्थः, यथा एकस्तु एक एव, तुकारोऽवधारणार्थः ; कदाचिदपि नान्यथा भवेदित्यर्थः ; तथा नीलीमद्यपयोः, अपीति शेषः ; नीलवर्णस्य मद्यपस्य च यद्येकोऽपि तथैवेत्यर्थः ; यथा वज्रलेपलिप्तस्य वस्तुनः, कर्कटनीनयोः दशनायेष ग्रहस्य च ततो विमुक्तिरतिदुष्करी, तथानीलवर्णस्य सङ्गेऽपि ततो विमुक्तिरतिदुष्करी, यथा मूर्खनार्योः सङ्गो न प्रबोधोपशमनीयः, तथा मद्यपस्य सङ्गोऽपीति भावः ॥२८२॥

(ड) हरेति।—हरस्य—शम्भोः, गले—कण्ठे, यत् गरलं—कालकूटमित्यर्थः, तथा तमालः,—तदाख्यतरुश्च, तयोः समा प्रभा यस्य तथाभूतम। द्वीपी—चित्रव्याघ्रः।

नेति।—प्राज्ञो बुद्धिमान् जनः, यदि आत्मनः श्रियं सम्पदं, कल्याणमित्यर्थः, इच्छेत् अभिलषेत्, तदा यस्य जनस्य, चेष्टितम् आचरणं, न, कुलं वंशं, न, तथा पराक्रमं शौर्यञ्च, न विद्यात् जानीयात्, तस्य अज्ञातचेष्टितकुलपराक्रमस्य जनस्य, [विश्वसेत्यत्र सप्तमी] न विश्वसेत् न तं विश्वासविषयं प्रतीयादित्यर्थः ॥२८३॥

चण्डरवोऽपि तान् भयव्याकुलितान् विज्ञाय इदमाह,—'भो भोः श्वापदाः ! किं यूयं मां दृष्ट्वैव (ढ) सन्त्रस्ता व्रजथ ? तन्न भेतव्यम् ; अहं ब्रह्मणा अद्य स्वयमेव सृष्टाऽभिहितः,—'यत् श्वापदानां मध्ये कश्चिद्राजा नास्ति, तत् त्वं मया अद्य सर्व-श्वापदप्रभुत्वेऽभिषिक्तः ककुद्द्रुमाभिधः ; ततो गत्वा क्षिति-तले तान् सर्वान् परिपालय' इति ; ततोऽहमत्रागतः । तन्मम (ण) छत्रच्छायायां सर्वैरेव श्वापदैर्वर्त्तितव्यम् ; अहं ककुद्द्रुमो नाम राजा त्रैलोक्येऽपि सञ्जातः' । तत् श्रुत्वा सिंहव्याघ्र-पुरःसराः श्वापदाः,—'स्वामिन् ! प्रभो ! समादिश' इति वदन्तस्तं परिवव्रुः ।

अथ तेन सिंहस्य अमात्यपदवी प्रदत्ता, व्याघ्रस्य शय्यापालत्वं, द्वीपिनः ताम्बूलाधिकारः, वृकस्य द्वारपालक-त्वम् ; ये च आत्मीयाः शृगालाः, तैः सह आलापमात्रमपि न करोति, ते सर्वेऽपि (त) अर्द्धचन्द्रं दत्त्वा निःसारिताः । एवं तस्य राजक्रियायां वर्त्तमानस्य ते सिंहादयो मृगान् व्यापाद्य तत्पुरतः प्रक्षिपन्ति । सोऽपि प्रभुधर्मेण सर्वेषां तान् प्रविभज्य प्रयच्छति । एवं गच्छति काले कदाचित् तेन समागतेन दूरदेशे शब्दायमानस्य शृगालवृन्दस्य कोलाहलः अश्रावि । तं शब्दं श्रुत्वा (थ) पुलकिततनुः आनन्दाश्रुपरि-पूर्णनयनः उत्थाय तारस्वरेण विरोतुमारब्धवान् । अथ ते सिंहादयस्तं तारस्वरमाकर्ण्य शृगालोऽयमिति मत्वा सलज्ज-

(ढ) सन्त्रस्ताः,—अतिभीताः । ककुद्द्रुमाभिधः,—ककुद्द्रुमनामा ।

(ण) छत्रच्छायायाम्—अधीनत्वे इति भावः, [छद+णिच्—त्रः, ङ्यप्] ।

(त) अर्द्धचन्द्रं—गलहस्तमिति भावः ।

(थ) पुलकिततनुः,—रोमाञ्चितगात्रः । तारस्वरेण—उच्चरवेण । विरोतुं—शब्दायितुम् ।

मधोमुखाः क्षणमेकं स्थित्वा मिथः प्रोचुः,—'भोः! (ङ) वाहिताः वयमनेन क्षुद्रशृगालेन, तत् बध्यताम्' इति। सोऽपि तदाकर्ण्य पलायितुमिच्छन् तत्र स्थाने एव सिंहादिभिः खण्डशः कृतो मृतश्च। अतोऽहं ब्रवीमि,—'त्यक्त्वाशाभ्यन्तरा येन' इति"।

तदाकर्ण्य पिङ्गलक आह,—"भो दमनक! कः प्रत्ययोऽत्र विषये, यत् स ममोपरि दुष्टबुद्धिः?" स आह,—"यदस्य ममाग्रे तेन निश्चयः कृतो यत्—'प्रभाते पिङ्गलकं बधिष्यामि'। तदत्रैव प्रत्ययः,—प्रभाते (घ) अवसरवेलायाम् आरक्तमुखनयनः स्फुरिताधरो दिशोऽवलोकयन् अनुचितस्थानोपविष्टस्त्वां क्रूरदृष्ट्या विलोकयिष्यति। एवं ज्ञात्वा यदुचितं, तत् कर्त्तव्यम्" इति कथयित्वा सञ्जीवकसकाशं गतः, तं प्रणम्य उपविष्टश्च। सञ्जीवकोऽपि सोद्वेगाकारं मन्दगत्या समायान्तं तमुद्दीक्ष्य सादरतरमुवाच,—"भो मित्र! स्वागतम्? चिराद्दृष्टोऽसि, अपि शिवं भवतः? तत् कथय, येनादेयमपि तुभ्यं गृहाऽऽगताय प्रयच्छामि। उक्तञ्च,—

ते धन्यास्ते विवेकज्ञास्ते सभ्या इह भूतले।
आगच्छन्ति गृहे येषां कार्य्यार्थं सुहृदो जनाः" ॥२८४॥

दमनक आह,—"भोः! कथं शिवं सेवकजनस्य?—

सम्पत्तयः परायत्ताः सदा चित्तमनिर्वृतम्।
स्वजीवितंऽप्यविश्वासस्तेषां ये राजसेवकाः ॥२८५॥

(ङ) वाहिताः,—भृत्यभावेन कर्म कारिताः, प्रतारिता इति भावः।

(घ) अवसरवेलायां—अवसन्निधानागमनोचितसमये इत्यर्थः, राजकार्य्यविरतिसमये इत्यर्थो वा। क्रूरदृष्ट्या—कोपदृष्ट्या।

ते इति।—सुहृदो जनाः मित्राणीत्यर्थः, कार्य्यार्थं येषां गृहे आगच्छन्ति, इह अस्मिन्, भूतले ते जनाः धन्याः पुण्यवन्तः, ते जनाः, विवेकज्ञाः परमविज्ञाः इत्यर्थः, तथा ते जनाः, सभ्याः साधवः ॥२८४॥

सम्पत्तयः इति।—ये जनाः, राजसेवकाः नृपचिङ्करा, तेषां सम्पत्तयः धनानि, परायत्ताः पराधीनाः, चित्तं मनः, सदा सर्वक्षण, अनिर्वृतम् असुखं, तथा

तथा च,—सेवया धनमिच्छद्भिः सेवकैः पञ्च यत् कृतम् ।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितम् ॥२८६॥
तावज्जन्मातिदुःखाय ततो दुर्गतता सदा ।
तत्रापि सेवया वृत्तिरहो ! दुःखपरम्परा ॥२८७॥
जीवन्तोऽपि मृताः पञ्च श्रूयते किल भारते ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥२८८॥
नाश्नाति स्वेच्छयौत्सुक्यात् विनिद्रो न प्रबुध्यते ।
न निःशङ्कं वचो ब्रूते सेवकोऽप्यत्र जीवति ? ॥२८९॥

स्वजीवितेऽपि निजजीवनेऽपि, अविश्वासः अप्रत्ययः ; कदा राजा किं कुर्यादिति चिन्तयेति भावः ; सेवकानां जीवनमतीव दुःखावहमिति तात्पर्यम् ॥ २८५ ॥

सेवयेति ।—सेवया प्रभुशुश्रूषया, दास्येन इत्यर्थः, धनमिच्छद्भिः सम्पदमभिलषद्भिः, सेवकैः दासैः, यत् कृतम् आचरितं, तदिति ऊहनीयं, पञ्च अवलोकय ; किमत् ? इत्याह,—मूढैः मूर्खैः, सेवकैरिति पूर्वानुषङ्गः, शरीरस्य यत् स्वातन्त्र्यं स्वाधीनत्वं, तदपि हारितं नाशितम् ; शरीरध्वंसे भवत्यपि प्रभोराज्ञा पालनीयेति भावः ॥२८६॥

तावदिति ।—जन्म तावत् दैहधारणमेव, प्रथममिति भावः, अतिदुःखाय, भवतीति शेषः ; एवमुत्तरत्रापि ; ततः तत्र,अतिदुःखावहदैहधारणे इत्यर्थः, सदा आजीवनमित्यर्थः, दुर्गतता दारिद्र्यं, तत्रापि दारिद्र्येऽपि, सेवया दास्येन, वृत्तिर्जीवनम्, अहो इति खेदसूचकमव्ययं, दुःखपरम्परा दुःखधारा, एतत सर्वं क्लेशसन्ततिः इति यावत् ॥२८७॥

जीवन्त इति ।—भारते महाभारतग्रन्थे इत्यर्थः, दरिद्रः दीनः, व्याधितः रुग्णः, मूर्खः मूढः, प्रवासी विदेशस्थः, तथा नित्यसेवकः चिरदासः, एते पञ्च पञ्चविधाः, लोका इति शेषः, जीवन्तः प्राणवोऽपि, मृताः किल मृता एव, (किलशब्दोऽत्र अवधारणार्थः,) इति श्रूयते एवं कीर्त्तितमस्ति इति आकर्ण्यते इत्यर्थः ॥ २८८ ॥

नेति ।—यः सेवकः औत्सुक्यात् उत्कण्ठावशात्,सान्यतमेव प्रभुसमीपे गन्तव्यमिति सदैवादिति भावः ; स्वेच्छया रुचिपूर्वकमित्यर्थः, न अश्नाति न भक्षयति ; विनिद्रः विगतनिद्रः सन्,न प्रबुध्यते न जागर्त्ति,सुनिद्रानन्तरं न जागर्त्ति,किन्तु सदा प्रभुः किमादिश्यति इत्युद्देशात् निद्राऽऽवेशे सत्यपि कृत्वा रात्रिमेव जागर्त्तीत्यर्थः, तथा निःशङ्कं निर्भयं यथा तथा, वचः न ब्रूते न वक्तुं शक्नोतीति भावः ; अत्र संसारे, एवम्भूतोऽपि सेवकः जीवति ? पूर्वोक्तस्य स्वातन्त्र्यरहितस्य जीवनात् मरणमेव वरमिति भावः ॥२८९॥

सेवा श्ववृत्तिराख्याता येस्तैर्मिथ्या प्रजल्पितम् ।
स्वच्छन्दं चरति श्वाऽत्र सेवकः परवासनात् ॥२८०॥
भूशय्या क्षत्रचर्यश्च जाग्रत्वं लघुभोजनम् ।
सेवकस्य यतैर्यद्वद्विशेषः पापधर्मजः ॥२८१॥
शीतातपादिकष्टानि सहते यानि सेवकः ।
धनाय तानि चाल्पानि यदि धर्मान्न मुच्यते ॥२८२॥
कदन्नादपि सुक्षुत्तेन सुमिष्टेनापि हारिणा ।
मोदकेनापि किं तेन निष्पत्तिर्यश्च सेवया ?" ॥२८३॥

सेवेति ।—यैः आत्मव्यतिरेकिति भावः, सेवा, श्ववृत्तिः कुक्कुरजीविका, आख्याता उक्ता, तैः एतत् मिथ्या अलीकं, प्रजल्पितम् ; यतः श्वा कुक्कुरः, अत्र जगति, स्वच्छन्दं निर्बाधं, चरति भ्रमति, सेवकः परवासनात् प्रभोरादेशात्, चरतीति शेषः, श्वापि स्वाधीनः, सेवकस्तु पराधीनः, अतः कुक्कुरोऽपि सेवकाद्वरमिति भावः ॥ २८० ॥

भूशय्येति ।—यतेः संन्यासिनः, यद्वत् यथा, भूशय्या क्षितिशायनं, ब्रह्मचर्यं स्वच्छन्दचरिताद्युपभोगराहित्यमिति भावः ; जाग्रत्वं नीरन्ध्रायत्नं, तपोजनितक्लेशेन इति भावः, लघुभोजनञ्च यत्किञ्चनाशित्वमित्यर्थः, अलीकं शेषः ; सेवकस्य दासजनस्यापि, तद्वदिति शेषः, तत् सर्वं भूशय्यादिकम् उभयोरेव तुल्यम् अलीकमित्यर्थः ; स्वामिन्नार्थसम्पादनत्वरया तज्जनितमनेव च इति भावः ; विशेषः प्रभेदः तु, सेवकस्वामिनोरिति शेषः ; पापधर्मजः पापनिबन्धनः धर्मनिबन्धनश्च ; सेवकः पापी, यतिस्तु पुण्यवानिति भावः ॥ २८१ ॥

शीतेति ।—सेवकः धनाय यानि शीतातपादिकष्टानि सहते, यदि सः धर्मात् न मुच्यते न क्षीयते, धनार्थं यतते चेदित्यर्थः, तदा तानि शीतातपादिकष्टानि, अल्पानि च तदपेक्षया न्यूनानि, सहते इति शेषः ; धनार्थं वाहनानि कष्टान्यनुभूयन्ते सेवकैः, धनार्थं यतनाम्नेन तेन ततोऽल्पक्लेशेनैव तल्लभ्यते इति भावः ॥ २८२ ॥

कदन्नेति ।—सेवया दास्येन, यच्च मोदकञ्च इत्यर्थः, निष्पत्तिः प्राप्तिरित्यर्थः, कदन्नादपि कोद्रवेणापि, सुक्षुत्तेन सुवर्तुलेन, सुमिष्टेन अतिमधुरेणापि, हारिणा मनःप्रीतिकरेणापि, तेन मोदकेन मिष्टान्नविशेषेणेत्यर्थः, किम् ? प्राक् दुःखमनुभूय तदनु सुखलाभात् तत्र न खिद्यति प्रयोजनमित्यर्थः ; यथाकथञ्चित् प्राप्तेन आत्मादिनाऽपि कष्टतरपूरणं वरं, न तु सेवया मिष्टान्नभोजनमिति भावः ॥ २८३ ॥

सञ्जीवक आह,—"अथ भवान् किं चिन्तयति?" सोऽब्रवीत्,—"मित्र! सचिवानां मन्त्रभेदं कर्तुं न शुध्यते। उक्तञ्च,—यो मन्त्रं स्वामिनो भिन्द्यात् साचिव्यसन्नियोजितः।

स हत्वा नृपकार्य्यं तत् स्वयञ्च नरकं व्रजेत् ॥२८४॥

येन यस्य कृतो भेदः सचिवेन महीपतेः।

तेनाग्रन्थवधस्तस्य कृत इत्याह नारदः ॥२८५॥

तथाऽपि मया तव स्नेहपाशवशेन मन्त्रभेदः कृतः, यतस्त्वं मम वचनेनात्र राजकुले विश्वस्तः, प्रविष्टश्च। उक्तञ्च,—

विश्रम्भात् यस्य यो मृत्युमवाप्नोति कथञ्चन।

तस्य हत्या तदुत्था सा प्राहेदं वचनं मनुः ॥२८६॥

तत् तवोपरि पिङ्गलकोऽयं दुष्टबुद्धिः। कथितञ्च अद्य अनेन मत्पुरतः (न) चतुष्कर्णतया यत्,—'प्रभाते सञ्जीवकं हत्वा समस्तमृगपरिवारं चिरात् तृप्तिं नेष्यामि'। ततः स मयोक्तः,—'स्वामिन्! न युक्तमिदं, यत् मित्रद्रोहेण (प) जीवनं क्रियते।

य इति।—साचिव्ये मन्त्रिते, सन्नियोजितः प्रतिष्ठितः, प्रभुरिति शेषः, यो जनः, स्वामिनः प्रभोः, मन्त्रं गूढं परामर्शं, भिन्द्यात् प्रकाशयेत्, स दुरात्मा इति भावः, तत् नृपकार्य्यं, हत्वा प्राक् विनाश्य, स्वयञ्च नरकं निरयं, व्रजेत् गच्छेत् ॥ २८४ ॥

येनेति।—येन सचिवेन मन्त्रिणा, यस्य महीपतेः भेदः मन्त्रभेदः इत्यर्थः, कृतः, तेन मन्त्रिणा, तस्य महीपतेः, अग्रन्थवधः अग्रन्थधारणं विना विनाशः, कृत इति नारदः आह; मन्त्रभेदेन प्रभुवधः सुनिश्चित एवेति भावः ॥ २८५ ॥

विश्रम्भादिति।—यः जनः, यस्य जनस्य, विश्रम्भात् विश्वासात्, यं जनं विश्वास्येत्यर्थः, कथञ्चन येन केनापि प्रकारेण, मृत्युमवाप्नोति, तस्य विश्वस्तस्य जनस्य इत्यर्थः, सा हत्या हननं, मृत्युरित्यर्थः, [हन्तेः भावे क्यप्] तदुत्था तत्कृता विश्वास्यजनकृता एव इत्यर्थः, इदं वचनं मनुः प्राह ॥ २८६ ॥

(न) चतुष्कर्णतया—"षट्कर्णो भिद्यते मन्त्रः" इति महाजनवाक्यात् केवलं द्वयोर्यत् मन्त्रणं तन्मन्त्रस्य चतुष्कर्णत्वमिति भावः।

(प) जीवनं—जीविका, जीवनधारणमित्यर्थः, "आजीवो जीविका वार्त्ता वृत्तिर्वर्त्तनजीवने" इत्यमरः)।

उक्तञ्च,—अपि ब्रह्मवधं कृत्वा प्रायश्चित्तेन शुध्यति ।
तदर्हेण विचीर्णेन न कथञ्चित् सुहृद्द्रुहः ॥२९७॥

ततस्तेनाहं (फ) सामर्षेणोक्तः,—'भो दुष्टबुद्धे ! सञ्जीवकस्तावत् शष्पभोजी, वयं मांसाशिनः, तदस्माकं स्वाभाविकं वैरम् इति, कथं रिपुरुपेक्ष्यते ? तस्मात् सामादिभिरुपायैर्हन्यते, न च हते तस्मिन् दोषः स्यात् । उक्तञ्च,—

दत्त्वाऽपि कन्यकां वैरी निहन्तव्यो विपश्चिता ।
अन्योपायैरशक्यो यो हते दोषो न विद्यते ॥२९८॥
कृत्याकृत्यं न मन्येत क्षत्रियो युधि सङ्गतः ।
प्रसुप्तो द्रोणपुत्रेण धृष्टद्युम्नः पुरा हतः' ॥२९९॥

तदहं तस्य निश्चयं ज्ञात्वा त्वत्सकाशमिहागतः । साम्प्रतं मे नास्ति विश्वासघातकदोषः ; मया सुगुप्तमन्त्रस्तव निवेदितः, अथ यत् ते प्रतिभाति, तत् कुरुष्व" इति । अथ सञ्जीवकस्तस्य तत् वज्रपातदारुणं वचनं श्रुत्वा मोहमुपागतः । अथ चेतनां लब्ध्वा सवैराग्यमिदमाह,—"भोः ! साधु इदमुच्यते,—

अपीति ।—ब्रह्मवधमपि कृत्वा, तदर्हेण ब्रह्मवधपापक्षालनयोग्येन, विचीर्णेन विशेषेणानुष्ठितेन, प्रायश्चित्तेन चतुर्विंशतिवार्षिक-द्वादशवार्षिकादिव्रतरूपेण इति भावः, शुध्यति पापात् विमुक्तो भवति, जन इति शेषः ; सुहृद्द्रुहः मित्रद्रोही मित्रद्रोहिणो वा, कथञ्चित् केनापि प्रकारेण, न, शुध्यति वा शुध्यतीति शेषः । [अत्र द्रुहधातोः क्तप्रत्यय-क्विप्प्रत्ययभेदेन एकवचन-बहुवचनान्तता बोध्या] ॥ २९७ ॥

(फ) सामर्षेण—सक्रोधेन । उपेक्ष्यते—औदासीन्येन त्यज्यते इत्यर्थः ।

दत्त्वेति ।—यः वैरी शत्रुः, अन्योपायैः साधनान्तरैः, अशक्यः असाध्यः, इत्युमिति शेषः ; विपश्चिता विदुषा, कन्यकां दत्त्वाऽपि, स निहन्तव्यः, हते तस्मिन् वैरिणि विनष्टे सतीत्यर्थः, दोषो न विद्यते ; येन केनापि शत्रुवधो न दोषायेति भावः ॥२९८॥

कृत्येति ।—युधि युद्धे, सङ्गतः उपस्थितः, युयुत्सुरित्यर्थः, क्षत्रियः वीर इति भावः, कृत्याकृत्यं कर्तव्याकर्तव्यं, न्यायान्यायमित्यर्थः, न मन्येत न विचारयेत् ; तथा हि, पुरा पूर्वस्मिन् काले, द्रोणपुत्रेण अश्वत्थाम्ना, प्रसुप्तः निद्रितः, धृष्टद्युम्नः हतः ॥ २९९ ॥

दुर्जनसम्पर्कः प्रायेणाखेटकवत् भवति राजा।
अपघातानुसारि च धनं मेघो गिरिदुर्गवर्षी च ॥ २०० ॥
अहं हि सम्मतो राज्ञो य एवं मन्यते कुधीः।
बलीवर्दैः स विज्ञेयो विद्याशस्त्रपरिवर्जितः ॥ २०१ ॥
वरं वनं वरं भैक्ष्यं वरं भारोपजीवनम्।
वरं व्याधिभयोपेतानां नाधिकारेण सम्पदः ॥ २०२ ॥
तदयुक्तं मया कृतं, यदनेन सह मैत्री विहिता। उक्तञ्च,—
ययोरेव समं वित्तं ययोरेव समं कुलम्।
तयोर्मैत्री विवाहश्च न तु पुष्ट-विपुष्टयोः ॥ २०३ ॥

दुर्जनेति।—नार्थः प्रायेण दुर्जनसम्पर्कः दुर्जनानां प्राप्तिः, अस्पष्टभोग्यः इत्यर्थः; राजा प्रायेण आखेटकवत् भवति न कदापि विश्रान्तीत्यर्थः; धनञ्च अपघातानुसारि अपघातोऽहाता, व्ययकर्तृ इत्यर्थः, तदनुसारि प्रायेण सञ्चरति, भवतीति शेषः; मेघश्च प्रायेण गिरिदुर्गवर्षी गिरौ दुर्गे दुर्गमस्थाने, वर्षीतीति शेषः, गह्वरादौ इत्यर्थः, वर्षतीति तथोक्तः; स तु उत्तरकोशलादिषु क्षेत्रो बहु वर्षतीति भावः। आर्य्या छन्दः ॥२००॥

अहमिति।—यः कुधीः कुबुद्धिः पुमान्, अहं हि अहमेव, राज्ञः [मन्यमाने शब्दस्य "शत्रु च मन्यमाने" (२।३।६७ पा०) इति सूत्रेण कर्तरि षष्ठी] सम्मतः प्रियः इत्यर्थः, इत्येवं मन्यते, स विद्याशस्त्रपरिवर्जितः शास्त्रविहीनः, बलीवर्दः पशुः, ज्ञेय इत्यर्थः, विज्ञेयः ज्ञातव्यः; राज्ञामिह जगति स कोऽपि प्रिय इति भावः ॥२०१॥

वरमिति।—मनुष्याणां वनम् अरण्यवासः, वरं मनाक् प्रियं, भैक्ष्यं भिक्षाजीवित्वमपि, वरं मनाक् प्रियं, तथा भारोपजीवनं भारवहनेन जीवनधारणमपि, वरं मनाक् प्रियं, व्याधिः रोगोऽपि, वरं मनाक् प्रियः; सर्वे चेत् वरं तदा अधिके किम्? इत्याह, नाधिकारेणेति।—अधिकारेण नियोज्यव्यापारेण, सेवादिरूपेणेत्यर्थः, सम्पदः न, वरमिति योजना; तत्र एतेषामपि क्लेशबहुलत्वात् स्वाधीनत्वादिति भावः ॥२०२॥

ययोरिति।—ययोर्जनयोः, वित्तं धनं समानमेव, ययोः कुलं समानमेव, तयोः तादृशयोः तुल्यकुलैश्वर्ययोरेव, मैत्री सौहार्द्यं, विवाहः परिणयश्च, परस्परमिति भावः; शुभाय भवतीति शेषः, पुष्टविपुष्टयोः धनिनिर्धनयोः, कुलीनाकुलीनयोश्च, मैत्री विवाहो वेति शेषः, न तु नैव, शुभायेति भावः ॥२०३॥

तथा च,—मृगा मृगैः सङ्गमनुव्रजन्ति
गावश्च गोभिस्तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः
समानशीलव्यसनेषु सख्यम् ॥ २०४ ॥

तद्दूयदि गत्वा तं प्रसादयामि, तथाऽपि न प्रसादं यास्यति।

उक्तञ्च,—निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रशाम्यति।
अकारणद्वेषपरो हि यो भवेत्
कथं नरस्तं परितोषयिष्यति ? ॥ २०५ ॥

अहो ! साधु चेदमुच्यते,—

भक्तानामुपकारिणां परहितव्यापारयुक्तात्मनां
सेवासंव्यवहारतत्त्वविदुषां द्रोहच्युतानामपि।
व्यापत्तिः स्खलितान्तरेषु नियता सिद्धिर्भवेद्वा न वा
तस्मादम्बुपतेरिवाविनयतेः सेवा सदा शङ्किनी ॥ २०६ ॥

मृगा इति।—मृगाः कुरङ्गाः, मृगैः सजातीयैरिति भावः; गावः गोभिः, तुरगाः अश्वाः, तुरङ्गैः अश्वैः, मूर्खाः मूर्खैः, तथा सुधियः पण्डिताः, सुधीभिः, [सर्वत्र सदृशैः इतीथा] सङ्गं संसर्गम्, अनुव्रजन्ति कुर्वन्ति; यतः, समानशीलव्यसनेषु तुल्यचरितेषु समदुःखेषु च जनेषु, सख्यं मैत्री, साधु भवतीति शेषः। उपजातिः छन्दः ॥ २०४ ॥

निमित्तमिति।—यः निमित्तं कारणम्, उद्दिश्य अनुसृत्य, प्रकुप्यति कुपितो भवति, स जनः, तस्य कोपनिमित्तस्य, अपगमे नाशे सति, ध्रुवं निश्चितं, प्रशाम्यति शान्तिं गच्छति, वीतक्रोधो भवतीति भावः; यः हि अकारणद्वेषपरः अहेतुकुपितः, भवेत्, नरः लोकः, तं जनम्, अकारणद्वेषनिमित्तमित्यर्थः, कथं केन प्रकारेण, परितोषयिष्यति ? परितुष्टं करिष्यति ? न केनापि इति भावः। वंशस्थविलं छन्दः ॥ २०५ ॥

भक्तानामिति।—भक्तानाम् अनुरक्तानाम्, उपकारिणाम् उपकारकशीलानां, परहितव्यापारे परेषां हितानुष्ठाने युक्तः अभिनिविष्टः, आत्मा येषां तथाभूतानां, तथा सेवायाः दास्यस्य, यः संव्यवहारः सम्यगाचरणनियमः, तस्य तत्त्वविदुषां तत्त्वज्ञानां, द्रोहच्युतानां पुरानिष्टविरतानामपि, सेवकानामिति शेषः, स्खलितान्तरेषु च्युतान्तः-

तथा च,—भावस्निग्धैरुपक्रान्तमपि द्वेष्यतां याति लोके
सार्द्धादन्यैरुपक्रान्तमपि प्रीतये चोपयाति।
दुर्वाह्यत्वान्नृपतिमनसां नैकभावाश्रयाणां
सेवाधर्मः परमगहनो योगिनामप्यगम्यः॥ १०७॥

तत् परिज्ञातं मया यत्.(ब)प्रसादम् असहमानैः समीपवर्त्तिभिः एष पिङ्गलकः प्रकोपितः। तेनायं मम अदोषस्यापि एवं वदति।
उक्तञ्च—प्रभोः प्रसादमन्यस्त्र न सहन्तोर्ह सेवकाः।
सपत्न्या इव मङ्क्रीडाः सपत्न्याः सुकृतैरपि॥ १०८॥

कारणवृत्तिषु, नष्टस्नेहभावेषु इत्यर्थः, अस्थिरस्नेहभावेषु च, प्रभुरित्यर्थः द्वेष्यः, खिन्नैः खेदान्वितैः जनैः, उपक्रान्तमपि कृतः उपकारोऽपि, लोके संसारे, द्वेष्यतां अप्रियतां, अनिष्टभावमित्यर्थः, याति प्राप्नोति, अन्यैः अनुरक्तैरित्यर्थः, सार्द्धात् समयकृतमित्यर्थः, अपकृतमपि अनिष्टकरणमपि, प्रीतये उपयाति च प्रीतिं जनयति च इत्यर्थः। इत्थं नैकभावाश्रयाणां विविधाश्रयवतां, नृपतिमनसां राजहृदयानां, प्रभुचित्तानामिति यावत्, दुर्वाह्यत्वात् दुर्बोधत्वात्, परमगहनः अतिदुर्ज्ञेयः, सेवाधर्मः परिचर्याक्रमो विधिः, योगिनामपि वैकालिकनिरिन्द्रियज्ञानशालिनामपीत्यर्थः, अगम्यः दुर्बोधः; प्रभुचित्तं यदा कौतुकाश्रयं स्यात, सेवकैः तत् बोद्धुं न शक्यते, अतः तस्य हितकर्मण्यपि अहितबुद्धिः, अहितकर्मण्यपि हितबुद्धिर्जायते; तस्मात् तत्सेवा अतीव दुष्करेति भावः। सन्दानिताख्यं इत्तम् ॥१०७॥

(ब) प्रसादं—प्रसन्नताम्, अनुग्रहमिति यावत्, मयीति शेषः।

प्रभोरिति।—इह संसारे, सुकृतैः आचरितैरपि, सङ्क्रीडाः स्वभावैरित्यादिति भावः, सपत्न्याः एकपतिकाः स्त्रियः, सपत्न्याः अन्यतरस्याः, प्रसादमिव, पत्युरिति भावः, सेवकाः भृत्याः, अन्यत्र स्त्रियञ्च, स्त्रियाम् भृत्ये इति भावः; प्रभोः प्रसादं न सहन्ति

भवति चैवं यत्, गुणवत्सु समीपवर्तिषु गुणहीनानां न प्रसादो भवति। उक्तञ्च,—

गुणवत्तरपार्श्वेन ह्रास्यन्ते गुणिनां गुणाः।
रात्रौ दीपशिखाकान्तिर्न भानावुदिते सति"॥ १०८॥

दमनक आह,—"भो मित्र! यद्येवं, तत् नास्ति ते भयम्। प्रकोपितोऽपि(भ) स दुर्जनैः तव वचनरचनया प्रसादं यास्यति।" स आह,—"भोः! न युक्तमुक्तं भवता, लघूनामपि दुर्जनानां मध्ये वस्तुं न शक्यते, उपायान्तरं विधाय ते नूनं घ्नन्ति। उक्तञ्च,—बहवः पण्डिताः क्षुद्राः सर्वे मायोपजीविनः।
कुर्युः क्षत्यमक्षत्यं वा दृष्टे काकादयो यथा"॥ ११०॥

दमनक आह,—"कथमेतत्?" सोऽब्रवीत्,—

कथा ११।

"कस्मिंश्चिन्नगरोद्देशे मदोत्कटो नाम सिंहः प्रतिवसति स्म। तस्य च अनुचरा अन्ये (म) द्वीपि-वायस-गोमायवः

न चमत्ते। [उदधातोरात्मनेपदित्वेऽपि अत्र परस्मैपदं विवक्षितं बोध्यं.—"परस्मैपदमिच्छन्ति आत्मनेपदिनां क्वचित्" इति नियमादित्यभिप्रायः॥ १०८॥

गुणवत्तरेति।—गुणवत्तरपार्श्वेन अतिगुणवान्विना जनेन, गुणिनां अन्यत्रगुणवतां, गुणाः ह्रास्यन्ते तिरस्क्रियन्ते; तथा हि, दीपशिखायाः कान्तिः शोभा, रात्रौ रजन्यामेव, भवतीति शेषः; भानौ सूर्ये, उदिते सति न, भातीति शेषः; यथा सूर्योदये दीपशिखा न शोभते, तथा गुणवत्तरजनसन्निधाने अन्यजनगुणवान् न शोभते इति भावः॥१०८॥

(म) क्षः,—विकृतवेषः दुष्टः। वचनरचनया—वाक्चातुर्येण।

उक्तञ्च इति।—बहवः अनेके, पण्डिताः विद्वांसः, नीतिनिपुणा इत्यर्थः, क्षुद्राः नीचाः, मूर्खा वा इत्यर्थः, भवन्तु इति शेषः, ते सर्वे मायोपजीविनः कपटिनः, चेत् भवन्तीति शेषः, तदा दृष्टे यथा काकादयः दृष्ट इति लिखिताः काकादयः इव, क्षत्यं क्षतकर्तृजनपदि, वाक्यादिकं अक्षत्यं; क्षत्यं कारकौघं, कुर्युः कुर्वन्तीत्यर्थः; यूर्णैः सर्वैः सर्वं प्रकाशते इति भावः॥ ११०॥

(म) द्वीपि-वायस-गोमायवः,—मार्जार-काक-शृगालाः।

सन्ति। अथ कदाचित् तैः कृतस्ततो भ्रमद्भिः (य) सार्थभ्रष्टः क्रथनको नाम उष्ट्रो दृष्टः। अथ सिंह आह,—'अहो! (र) अपूर्वमिदं सत्त्वं, तत् आनयतां, किमेतदारण्यं ग्राम्यं वा' इति। तत् श्रुत्वा वायस आह,—'भोः स्वामिन्! ग्राम्योऽयमुष्ट्र-नामा जीवविशेषस्तव भोज्यः, तत् व्यापाद्यताम्'। सिंह आह,—'नार्हं गृहागतं हन्मि। उक्तञ्च,—

गृहे शत्रुमपि प्राप्तं विश्वस्तमकुतोभयम्।

यो हन्यात् तस्य पापं स्याच्छतब्राह्मणघातजम् ॥२११॥

तदभयप्रदानं दत्त्वा मत्सकाशमानीयतां, येन अस्यागमन-कारणं पृच्छामि'। अथ(ल)असौ सर्वैरपि विश्वास्य अभयप्रदानं दत्त्वा महोत्कटसकाशमानीतः, प्रणम्योपविष्टश्च। ततस्तस्य (व) पृच्छतस्तेनात्मवृत्तान्तः सार्थभ्रंशसमुद्भवो निवेदितः।

ततः सिंहेनोक्तं,—'भोः क्रथनक! मा त्वं ग्रामं गत्वा भूयोऽपि भारोद्वहनकष्टभागी भूयाः। तदत्रैव अरण्ये निर्विशङ्को मरकतसदृशानि शष्पाग्राणि भक्षयन् मया सह सदैव वस'। सोऽपि 'तथा' इत्युक्त्वा तेषां मध्ये विचरन् न कुतोऽपि भयमिति सुखेन आस्ते।

अथान्येद्युः महोत्कटस्य महागजेन अरण्यचारिणा सह युद्धमभवत्। ततस्तस्य दन्तमुसलप्रहारैर्व्यथा मञ्जाता;

(य) सार्थभ्रष्टः,—यूथच्युतः।

(र) अपूर्व—न पूर्वं दृष्टमित्यर्थः, आश्चर्यमिति यावत्।

गृहे इति।—यः विश्वस्तम्, अत एव अकुतोभयं निःशङ्कं [नास्ति कुतोऽपि भयं यस्य, भयूरव्यंसकादित्वात् समासः, विभक्तेरलोपश्च]। गृहे प्राप्तं गृहागतं, अयुमपि हन्यात्, तस्य शतब्राह्मणघातजं शतब्राह्महत्याजनितं, पापं स्यात् ॥ २११ ॥

(ल) असौ—उष्ट्रः।

(व) पृच्छतः,—जिज्ञासमानस्य। सार्थेति।—सार्थभंशात्—यूथच्युतेः, समुद्भवः, —समुत्पन्नः, यूथभंशजनितावस्था इत्यर्थः।

व्यथितः कथमपि प्राणैर्न वियुक्तः। अथ शरीरासामर्थ्यात् न कुत्रचित् चलितुं शक्नोति। तेऽपि सर्वे काकादयः (ग) अप्रभुत्वेन क्षुधाविष्टाः परं दुःखं भेजुः। अथ तान् सिंहः प्राह,—'भोः! अन्विष्यतां कुत्रचित् किञ्चित् सत्त्वं, येन अहम् एतामपि दशां प्राप्तस्तत् हत्वा युष्मद्भोजनं सम्पादयामि'।

अथ ते चत्वारोऽपि भ्रमितुमारब्धा यावन्न किञ्चित् सत्त्वं पश्यन्ति, तावदायस-शृगालौ परस्परं मन्त्रयतः। शृगाल आह,—'भो वायस! किं (घ) प्रभूतभ्रान्तेन? अयमस्माकं प्रभोः क्रथनको विश्वस्तस्तिष्ठति; तदेनं हत्वा प्राणयात्रां कुर्मः'। वायस आह,—'युक्तमुक्तं भवता, परं स्वामिना तस्य अभयप्रदानं दत्तमास्ते, न वध्योऽयम्' इति। शृगाल आह,—'भो वायस! अहं स्वामिनं विज्ञाप्य तथा करिष्ये, यथा स्वामी अस्य वधं करिष्यति; तत्तिष्ठन्तु भवन्तोऽत्रैव, यावदहं गृहं गत्वा प्रभोरानां गृहीत्वा च आगच्छामि'। एवमभिधाय मत्वरं सिंहमुद्दिश्य प्रस्थितः। अथ सिंहमामाद्य इदमाह,—'स्वामिन्! समस्तं वनं (ङ) भ्रान्त्वा वयमागताः, न किञ्चित् सत्त्वमामादितम्; तत् किं कुर्मो वयम्? सम्प्रति वयं बुभुक्षया पदमेकमपि प्रचलितुं न शक्नुमः, दैवोऽपि पथ्याशी वर्त्तते; तत् यदि दैवादेशो भवति, तदा क्रथनकपिशितेन अद्य पथ्यक्रिया क्रियते'।

(ग) अप्रभुत्वेन—असमर्थत्वेन, स्वयं भक्ष्याहरणे इति भावः।

(घ) प्रभूतभ्रान्तेन—अधिकेन भ्रमणेन, [भ्रमणातीः क्लमथयः]। प्राणयात्रां—जीवनयापनं, जीवनधारणमित्यर्थः, ("यात्रा तु यापनेऽपि स्यात् गमनोत्सवयोः स्त्रियाम्" इति मेदिनी)।

(ङ) भ्रान्त्वा—भ्रमित्वा। पथ्याशी—पथ्यं—हितं,(पथ्या स्त्री हरीतक्यां हिते त्रिषु"इति मेदिनी) यत्किञ्चन हितकरं भक्षयतीति यावत्, अश्नातीति तच्छीलः,पूर्वेषां मनुष्यहत्याघातजनितपीडया यत्किञ्चित् हितभोजनार्थी सन् इत्यर्थः। क्रथनकपिशितेन —क्रथनकं हत्वा तन्मांसेनेत्यर्थः। पथ्यक्रिया—हितभोजनकार्यम्।

अथ सिंहस्तस्य तद्वाक्यं वचनमाकर्ण्य सक्रोपम् इदमाह, —'धिक् पापाधम! यस्त्वेवं भूयोऽपि वदसि, ततः त्वां तत्क्षण-मेव वधिष्यामि, यतो मया तस्य अभयं प्रदत्तम्; तत् कथं व्यापादयामि? उक्तञ्च,—

न गोप्रदानं न महीप्रदानं
न चान्नदानं हि तथा प्रधानम्।
यथा वदन्तीह बुधाः प्रधानं
सर्वप्रदानेष्वभयप्रदानम्' ॥३१२॥

तत् श्रुत्वा शृगाल आह,—'स्वामिन्! यदि अभयप्रदानं दत्त्वा वधः क्रियते, तदा एष दोषो भवति. पुनर्यदि दैवपादानां भक्ष्या स आत्मनो जीवितं प्रयच्छति, तत्र दोषः; ततो यदि स स्वयमेव आत्मानं वधाय नियोजयति, (ह) तत् वध्यः, अन्यथा अस्माकं मध्यादेकतमो वध्य इति; यतो दैवपादाः पथ्या-शिनः क्षुन्निरोधादन्त्यां दशां यास्यन्ति; तत् किमेतैः प्राणैः अस्माकं, ये स्वाम्यर्थे न यास्यन्ति? अपरं, पश्चादपि अस्माभिर्वह्निप्रवेशः कार्यः, यदि स्वामिपादानां किञ्चिदनिष्टं भविष्यति। उक्तञ्च,—

यस्मिन् कुले यः पुरुषः प्रधानः
स सर्वयत्नैः परिरक्षणीयः।

नेति।—इह संसारे, बुधाः विद्वांसः, सर्वप्रदानेषु सर्वप्रकारदानेषु मध्ये, अभय-प्रदानम् आश्वासदानमित्यर्थः, यथा प्रधानं वदन्ति, गोप्रदानं नवां विनियोगः, तथा प्रधानं न ताहग्गं वरं न, तथा महीप्रदानं पृथिवीदानमपि, न तथा—प्रधानं नेत्यर्थः, अन्नदानञ्च तथा प्रधानं न हि नैव, वदन्तीति सर्वत्रानुषङ्गः। उपेन्द्रवज्रेन्द्रवज्रयोरुपजातिः, इतरत्र ॥३१२॥

(ह) तत्—तदा। पथ्याशिनः,—हितभोजनार्थिन इत्यर्थः। क्षुन्निरोधात्—क्षुधा-ऽवरोधात्, क्षुधाकालि अभोजनादित्यर्थः। अन्त्यां—चरमाम्। दशाम्—अवस्थाम्।

यस्मिन्निति।—यस्मिन् कुले वंशे, यः पुरुषः प्रधानः सर्वश्रेष्ठः, ज्येष्ठादिति शेषः, स सर्वैः यत्नैः निखिलचेष्टया, परिरक्षणीयः पालनीयः, सर्वेषामेवेति शेषः,

तस्मिन् विनष्टे कुलसारभूते
न नाभिषङ्गे प्रभवो वहन्ति' ॥ ११३ ॥

तदाकर्ण्य मदोत्कट आह,—'यद्येवं, तत् कुरुष्व यद्रोचते'। तत् श्रुत्वा स सत्वरं गत्वा तान् आह,—'भोः! स्वामिनो महती अवस्था वर्त्तते, तत् किं पर्य्यटितेन? तेन विना कोऽत्र अस्मान् रक्षिष्यति? तत् गत्वा तस्य (ख) क्षुद्रोगात् परलोकं प्रस्थितस्य आत्मशरीरदानं कुर्मः, येन स्वामिप्रसादस्य अनृणतां गच्छामः। उक्तञ्च,—

आपदं प्राप्नुयात् स्वामी यस्य भृत्यस्य पश्यतः।
प्राणेषु विद्यमानेषु स भृत्यो नरकं व्रजेत्' ॥११४॥

तदनन्तरं ते सर्वे (क) वाष्पपूरितदृशो मदोत्कटं प्रणम्य उपविष्टाः। तान् दृष्ट्वा मदोत्कट आह,—'भोः! प्राप्तं दृष्टं वा किञ्चित् सत्त्वम्?' अथ तेषां मध्यात् काकः प्रोवाच,—'स्वामिन्! वयं तावत् सर्वत्र पर्य्यटिताः, परं न किञ्चित् सत्त्वमामादितं दृष्टं वा; तदद्य मां भक्षयित्वा प्राणान् धारयतु स्वामी, येन देवस्य (ख) आश्वासनं भवति, मम पुनः स्वर्गप्राप्तिरिति।

कुलसारभूते कुलस्य स्थिरांशस्वरूपे, वंशप्रधानतमे इति यावत्, ("सारो बले स्थिरांशे च" इति मेदिनी) तस्मिन् विनष्टे सति, अभिषङ्गे ताडने पराभवे, ("अभिषङ्गः पराभवे" इत्यमरः) प्रभवः, न वहन्ति प्राप्नुवन्ति, तं कुलमिति शेषः, इति न, अपि तु सर्वतः समाक्रामन्ति इत्यर्थः। उपेन्द्रवज्रेन्द्रवज्रयोरुपजातिः, इत्तम ॥११३॥

(ख) क्षुद्रोगात्—क्षुत्—क्षुधा एव रोगः,—प्राणान्तकरत्वात् व्याधिस्वरूपत्वात्।

आपदमिति।—पश्यतः अवलोकयतः, स्वामिप्राणनाशमिति शेषः, न तु दूरस्थितस्येति भावः, यस्य भृत्यस्य प्राणेषु विद्यमानेषु सत्सु, स्वामी आपदं प्राप्नुयात् विपत्तेः इत्यर्थः, स भृत्यः नरकं व्रजेत्; प्राणत्यागेन अपि प्रभुरक्षा विधेया इति भावः ॥ ११४ ॥

(क) वाष्पपूरितदृशः,—अश्रुपूर्णनेत्राः।

(ख) आश्वासनं—जीवनधारणम्। स्वर्गप्राप्तिः,—प्रभुरक्षार्थं प्राणदानेनेति भावः।

उक्तं च—स्वाम्यर्थं यस्त्यजेत् प्राणान् भृत्यो भक्तिसमन्वितः।
परं स पदमाप्नोति जरामरणवर्जितम्' ॥११५॥

तत् श्रुत्वा शृगाल आह,—'भोः! (ग) स्वल्पायुर्भवान्, तव भक्षणात् स्वामिनस्तावत् प्राणयात्रा न भवति; अपरः (घ) दोषस्तावत् समुत्पद्यते। उक्तञ्च,—

काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्लभम्।
भक्षितेनापि किं तेन तृप्तिर्येन न जायते?॥ ११६॥

तत् दर्शिता स्वामिभक्तिभवता, (ङ) गतश्च आनृण्यं भर्तृपिण्डस्य, प्राप्तश्च (च) उभयलोके साधुवादः; तदपसर अयतः, अहं स्वामिनं विज्ञापयामि'। तथाऽनुष्ठिते शृगालः सादरं प्रणम्य उपविष्टः प्रोवाच,—'स्वामिन्! मां भक्षयित्वा अद्य प्राणयात्रां विधाय मम उभयलोकप्राप्तिं कुरु। उक्तञ्च,—

स्वाम्यायत्ता सदा प्राणा भृत्यानामर्जिता धनैः।
यतस्ततो न दोषोऽस्ति तेषां भक्षणसम्भवः' ॥११७॥

स्वाम्यर्थं इति।—यो भृत्यः भक्तिसमन्वितः प्रभो अनुरक्तः सन्, स्वाम्यर्थं प्रभुकार्यार्थं, प्राणान् त्यजेत्, स जरामरणवर्जितं जरया वार्द्धक्येन, मरणेन मृत्युना च रहितम्, अमरावस्थिरूपमित्यर्थः, परं पदं मोक्षमित्यर्थः, आप्नोति लभते ॥ ११५ ॥

(ग) स्वल्पायुः,—क्षुद्रदेहः।

(घ) दोषः,—अभक्ष्यभक्षणजनितं पापम् इत्यर्थः, काकमांसस्य अभक्ष्यत्वादिति भावः।

काकमांसमिति।—एतत् इदं अध्याहार्यम्। एतत् काकमांसम्, अभक्ष्यमिति भावः; तदपि शुना कुक्कुरेन, उच्छिष्टं भुक्तावशेषितं, तदपि स्वल्पं स्तोकं, तदपि दुर्लभं दुष्प्रापम्; अन्यच्च, येन इति: परितोषः, न जायते, तेन भक्षितेनापि किम्? फलम् इति शेषः, न किमपि इति भावः॥ ११६ ॥

(ङ) गतं—प्राप्तम्। आनृण्यम्—ऋणमुक्तत्वम्। भर्तृपिण्डस्य—स्वामिनश्च।

(च) उभयलोके—इह परत्र च। साधुवादः,—धन्यवादः, प्रशंसा इत्यर्थः।

स्वाम्यायत्ता इति।—यतः यस्मात्, धनैः वर्जिताः क्रीता इत्यर्थः, अतएव प्राणाः सदा स्वामिनः आयत्ताः, ततः, तेषां भृत्यप्राणानां, भक्षणसम्भवः भक्षणजन्यः, दोषः नास्ति ॥११७॥

अथ तत् श्रुत्वा द्वीपी आह.—'भोः! साधु उक्तं भवता, पुनः भवानपि स्वल्पकायः स्वजातिश्च (छ)नखायुधत्वात् अभक्ष्य एव। उक्तञ्च.—नाभक्ष्यं भक्षयेत् प्राज्ञः प्राणैः कण्ठगतैरपि।

विशेषात्तदपि स्तोकं लोकद्वयविनाशकम् ॥ ११८ ॥

तत् देशितं त्वया आत्मनः (ज) कौलीन्यम्। अथवा साधु चेदमुच्यते,—

एतदर्थं कुलीनानां नृपाः कुर्वन्ति सङ्ग्रहम्।

आदिमध्यावसानेषु न ते गच्छन्ति विक्रियाम् ॥११९॥

तदपसर अयतः, येनाहं स्वामिनं विज्ञापयामि'।

तथाऽनुष्ठिते द्वीपी प्रणम्य मटोत्कटमाह,—'स्वामिन्! क्रियतामद्य मम प्राणैः प्राणयात्रा, दीयतामक्षयो वामः स्वर्गे मम, विस्तार्यतां क्षितितले प्रभूततरं यशः। तत् नात्र विकल्पः कार्यः।

(छ) नखायुधत्वात्—नखास्त्रत्वात्. स्वजातिः; श्वापदा हि नखैरेव अन्यैः जन्तून् पशून् हिंसन्तीति तेषां नखायुधत्वम्; अत एव अभक्ष्यः; जातिभक्षणं नैव दृश्यते कदाचिदिति भावः। पञ्चपञ्चनखा इति निषिद्धनखायुधपशुभक्षणं श्राद्धनिषिद्धमिति द्रष्टव्यम्

नाभक्ष्यमिति।—प्राज्ञः पण्डितो जनः, प्राणैः कण्ठगतैरपि कण्ठागतप्राणोऽपीत्यर्थः, ["इत्थम्भूतलक्षणे" (२।३।२१ पा०) इति सूत्रेण विशेषणे तृतीया] आहारा-भावेन इति भावः; अभक्ष्यं श्राद्धनिषिद्धं वस्तु, न भक्षयेत्; विशेषात् विशेषतस्तु, तदपि अभक्ष्यभक्षणमपीत्यर्थः, स्तोकम् अल्पम्. उदरपरिपोषणासमर्थमित्यर्थः, चेदिति शेषः. लोकद्वयविनाशकम् अहितिकरत्वात् नेह लोके प्रशस्यम्, अभक्ष्यत्वात् परलोकव्याघातकमेति भावः॥ ११८॥

(ज) कौलीन्यम्—आभिजात्यं, सत्कुलप्रसूतत्वम् इत्यर्थः, स्वाभ्यनुरागादिति भावः।

एतदर्थमिति।—नृपाः राजानः, एतदर्थम् एतन्निमित्तं, विषमो साहाय्यलाभार्थमित्यर्थः, कुलीनानां महाकुलप्रसूतानां जनानां, सङ्ग्रहं कुर्वन्ति तान् पालयन्ति इत्यर्थः; यतः ते कुलीनाः, आदिमध्यावसानेषु कदापीत्यर्थः, विक्रियां भावान्तरं, न गच्छन्ति न प्राप्नुवन्ति; स्वभावेनैव स्थिरा इति भावः॥ ११९॥

उक्तञ्च,—मृतानां स्वामिनः कार्ये भृत्यानामनुवर्त्तिनाम्।
भवेत् स्वर्गेऽक्षयो वासः कीर्त्तिश्च धरणीतले' ॥ ३२० ॥

तत् श्रुत्वा क्रथनकश्चिन्तयामास,—'एतैः तावत् सर्वैरपि शोभनानि वाक्यानि प्रोक्तानि, न च एकोऽपि स्वामिना विनाशितः; तदहमपि (भ) प्राप्तकालं विज्ञापयामि, येन मम वचनमेते त्रयोऽपि समर्थयन्ति' इति निश्चित्य प्रोवाच,—'भोः! सत्यमुक्तं भवता, परं भवानपि नखायुधः, तत् कथं भवन्तं स्वामी भक्षयति? उक्तञ्च,—

मनसाऽपि स्वजात्यानां योऽनिष्टानि प्रचिन्तयेत्।
भवन्ति तस्य तान्येव इह लोके परत्र च ॥ ३२१ ॥

तदपसर अग्रतः, येन अहं स्वामिनं विज्ञापयामि'।

तथाऽनुष्ठिते क्रथनकोऽग्रे स्थित्वा प्रणम्योवाच,—'स्वामिन्! एते तावदभक्ष्या भवतां, तत् मम प्राणैः प्राणयात्रा विधीयतां, येन मम उभयलोकप्राप्तिर्भवति। उक्तञ्च,—

न यज्वानोऽपि गच्छन्ति तां गतिं नैव योगिनः।
यां यान्ति प्रोज्झितप्राणाः स्वाम्यर्थे सेवकोत्तमाः' ॥ ३२२ ॥

मृतानामिति।—स्वामिनः कार्ये कार्यार्थमित्यर्थः, मृतानां त्यक्तप्राणानाम्, अनुवर्त्तिनाम् अनुरक्तानां, भृत्यानां सेवकानां, स्वर्गे सुरलोके, अक्षयो वासः, धरणीतले च कीर्त्तिः यश्च, अक्षया इति शेषः, इष्टान्तरूपेति भावः, भवेत् जायेत ॥ ३२० ॥

(भ) प्राप्तकालं—समयोचितमित्यर्थः। समर्थयन्ति—अनुमन्यन्ते, सम्यक् सूचयन्ति वा, [समर्थशब्दात् "तत् करोति" (ग०) इति णिचि रूपम्]।

मनसेति।—यः मनसाऽपि, वा वचा कार्यमिति भावः, स्वजात्यानाम् अनिष्टानि प्रचिन्तयेत्, तस्य इह लोके, परत्र च परलोके च, तान्येव अनिष्टानि, भवन्ति ॥ ३२१ ॥

नेति।—सेवकेषु भृत्येषु, उत्तमाः श्रेष्ठाः, स्वाम्यर्थं प्रोज्झिताः परित्यक्ताः, प्राणाः यैः तथाभूताः सन्तः, यां गतिं, यान्ति प्राप्नुवन्ति, यज्वानः विधिना इष्टवन्तोऽपि जनाः, ("यज्वा तु विधिनेष्टवान्" इत्यमरः) तां गतिं न गच्छन्ति, योगिनोऽपि नैव, तां गतिं गच्छन्ति इत्यनुषङ्गः; स्वाम्यर्थमुत्क्रान्तप्राणस्य श्रेयःप्राप्तिर्भवतीति भावः ॥ ३२२ ॥

एवमभिधिते ताभ्यां (अ) मृगालचिरकाभ्यां विदारितोऽथकुक्षिः क्रथनकः प्राणान् अत्याक्षीत्। ततश्च तैः (ट) क्षुद्रपक्षिभिः सर्वैर्भक्षितः। अतोऽहं ब्रवीमि,—'बहवः पक्षिताः क्षुद्राः' इति; तत भद्र! (ठ) क्षुद्रपरिवारोऽयं ते राजा मया सम्यग्ज्ञातः मतान्नमेष्यथ। उक्तञ्च,—

अमुखप्रकृतौ रात्रि जनता नानुरज्यते।
यथा यूथसमायुक्तः कलहंसः समाचरेत् ॥ ३२३ ॥

तथा च,—यूथाऽऽकारोऽपि सेव्यः स्यात् हंसाकारैः समायुतैः।
हंसाकारोऽपि सन्त्याज्यो यूथाकारैः न तैर्नृपः ॥३२४॥

नन्वयं ममोपरि केनचित् दुर्जनेन अयं प्रकोपितः, तेनैवं ब्रवीति; अथवा भवति एतत। उक्तञ्च,—

क्षुद्रेना मलिनेन खल्यमाना-
न्यवक्षुण्णानि गिरेरपि स्खलानि।

(अ) मृगालचिरकाभ्यां—जम्बुकद्वीपिभ्याम्।

(ट) क्षुद्रपक्षिभिः,—क्षुद्रपक्षीभिः।

(ठ) क्षुद्रपरिवारः,—नीचाशयपरिजन इत्यर्थः।

अमुखेति।—अमुखा खदोषा, प्रकृतिर्यस्य तादृशे, रात्रि जनता लोकसमूहः, न अनुरज्यते नानुरागं व्रजति; यथा यूथसमायुक्तः यूथपरिवृतः, कलहंसः सदाचरेत् आचरणं कुर्यादित्यर्थः; हिंसापरिपरिवृतत्वेन निर्मलोऽपि कलहंसः हिंसाचरणात् जनैर्यथा न सेव्यते, तथा त्वं ते राज्ञा इति भावः॥ ३२३॥

यूथेति।—नृपः यूथाकारः यूथः सदृशो निकृष्टपक्षिविशेषः, तस्य आकार इव आकारो यस्य तादृशः, यूथवत् आचारवानपीति भावः; हंसाकारैः हंसानामाकार इव आकारो येषां तादृशैः, हंसवत् सुनिर्मलैरिति भावः, समायुतैः सङ्गतैः, सदृशैरित्यर्थः, (परिवृतयेदिति कृष्णाङ्कार्थे) सेव्यः स्यात्; कृष्णवर्णेन हिंसप्रकृतेरपि तस्य प्रकृतिपरिवर्तनसम्भवादिति भावः। हंसाकारोऽपि हंसवत् सुनिर्मलप्रकृतिरपि, स नृपः, यूथाकारैः तैः सभ्यैः, परिवृतत्वेन त्याज्यः; अकृष्णवर्णेन निर्मलप्रकृतेरपि तस्य प्रकृतिविपर्ययेणाशङ्कयेति भावः॥ ३२४॥

क्षुद्रेनेति।—गिरेः पर्वतस्यापि, स्खलानि प्रदेशाः, क्षुद्रेना क्षीणेन, मलिनेन कृष्णेन, खल्यमानानि खननमुपरिदेशात् पतनेन ताड्यमानानि सन्ति, अवक्षुण्णानि चूर्णं गच्छन्ति,

उपजापविदाश्च कर्णजापैः
किमु चेतांसि मृदूनि मानवानाम् ? ॥३२५॥
कर्णविषेण च भग्नः किं किं न करोति बालिशो लोकः ?।
क्षपणकतामपि धत्ते पिबति सुरां नरकपालेन ॥ ३२६ ॥

अथवा साधु इदमुच्यते,—

पादाहतोऽपि दृढदण्डसमाहतोऽपि
यं दष्ट्वा स्मयति तं किल हन्ति सर्पः।
कोऽप्यष एव पिशुनोग्रमनुष्यधर्मः
कर्णे पर स्मयति हन्ति परं समूलम् ॥३२७॥

तथा च,—अहो ! खलभुजङ्गस्य विपरीतो बधक्रमः।
कर्णे लगति चैकस्य प्राणैरन्यो वियुज्यते ॥ ३२८ ॥

उपजापविदा भेदकुशलानाम्, कर्णजापैः पैशुन्यव्यवहारैः, कर्णभङ्गैः कुमन्त्रणैरित्यर्थः, खलमानानि इति पूर्वानुषङ्गः, मानवानां मृदूनि चेतांसि किमु ? नूनमेव विकृतानि भवन्तीत्यर्थः, निरन्तरमतिकोमलजलप्रपातेन कठोरपर्वतस्यापि यत. पारक्यो दृश्यते, अत. भेदघटना दारुणैः कुमन्त्रणैः कोमलानां चेतसां विकारस्तु अवश्यमेव सम्भवतीति भावः। मालभारिणी वृत्तम् ॥ ३२५ ॥

कर्णविषेणेति।—कर्णविषेण विषतुल्यकर्णजापेन, कर्णजापस्य अतीवानिष्टफलत्वात तत्र विषवारोपः इति श्लेषः, भग्न भेदं गतः, विकृतचित्त इति भावः, बालिशो मूर्खो लोकः, विद्वांस्तु कर्णजापवचनं न गृह्णीयादिति भावः, किं किं, दुष्कार्यमात्रं शेषः, न करोति ? सर्वमेव करोतीत्यर्थः। किं बहुना ? क्षपणकतां बौद्धसंन्यासित्वमपि, धत्ते अवलम्बते, नरकपालेन नृकरोटिकया. सुरां पिबति च, कापालिकतामपि आश्रयतीत्यर्थः. विकृतचित्तत्वादिति भावः ॥३२६॥

पादाहत इति।—सर्पः पादाहतोऽपि चरणदलितोऽपि, दृढेन कठिनेन, अथवा दृढं यथा तथा, दण्डेन समाहतोऽपि प्राणाघातोऽपि दृष्ट्वा यं स्मयते दशतीत्यर्थः, तं हन्ति किल नाशयत्येव, किन्तु एष पिशुनानां खलस्वभावानां,("पिशुनो दुर्जनः खलः" इत्यमरः) उग्राणां दारुणानां, मनुष्याणां धर्मः अवश्यभावः इत्यर्थः, कोऽपि अनिर्वचनीय एव,दुर्ज्ञेय इत्यर्थः,यत् पर कर्णे स्मयते एकस्य कर्णे प्रविशतीत्यर्थः, परम् अन्यं जनम्, समूलं हन्ति नाशयति,सर्पादपि क्रूरतर. खल. इति भावः। वसन्ततिलकं वृत्तम् ॥३२७॥

अहो इति।—अहो! आश्चर्यम् एतत्, यत् खल एव भुजङ्ग सर्पः तस्य, वध

तदेवंगतेऽपि किं कर्त्तव्यमिति अहं त्वां सुहृद्भावात् पृच्छामि"। दमनक आह,—"तत् देशान्तरगमनं युज्यते, न एवंविधस्य कुस्वामिनः सेवां विधातुम्। उक्तञ्च,—

गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते" ॥३२८॥

सञ्जीवक आह,—"अस्माकमुपरि स्वामिनि कुपिते गन्तुं न शक्यते, न च अन्यत्र गतानामपि (ङ) निर्वृतिः भवति। उक्तञ्च,—महतां योऽपराध्येत दूरस्थोऽस्मीति नाश्वसेत्।

दोर्घौ बुद्धिमतो बाहू ताभ्यां हिंसति हिंसकम् ॥३३०॥

तत् युक्तं मुक्त्वा मे नान्यदस्ति श्रेयस्करम्। उक्तञ्च,—

न तान् हि तीर्थैस्तपसा च लोकान्
स्वर्गैषिणो दानशतैः सुवृत्तैः।
क्षणेन यान् यान्ति रणेषु धीराः
प्राणान् समुज्झन्ति हि ये सुशीलाः ॥३३१॥

क्रमः कृत्यानियमः, विपरीतः विभिन्नरूपः; तथा हि, सः एकस्य कर्णे लगति जपति, अन्यस्य अपरो जनः, प्राणैः वियुज्यते विद्दीयते; सर्पस्तु यं दंष्ट्रया स्पृशति तमेव हन्ति, खलः पुनः एकं कर्णे स्पृष्ट्वा तेनैवापरं नाशयतीति विचित्रमिति भावः ॥ ३२८ ॥

गुरोरिति।—अवलिप्तस्य उद्धतस्य, कार्य्याकार्य्ये कर्त्तव्याकर्त्तव्यम्, अजानतः, उत्पथप्रतिपन्नस्य कुमार्गगामिनः, गुरोः पित्रादेरपि, परित्यागो विधीयते विद्दितत्वया क्रियते इत्यर्थः; तादृशगुरुत्यागो न दोषायेति भावः ॥ ३२९ ॥

(ङ) निर्वृतिः,—सुखम्, उद्वेगशून्यता वा।

महतामिति।—यः महतां बलवताम्, अपराध्येत अपराधं कुर्य्यात्, स दूरस्थोऽस्मि इति मत्वापि न आश्वसेत् न सान्त्वनां प्राप्नुयात्; यतः बुद्धिमतो जनस्य, बाहू भुजौ, दोर्घौ दूरस्थितवस्तुपरुषजनवर्त्तौ, ताभ्यां बाहुभ्यां, दूरदेशप्रस्थताभ्यामिति भावः, हिंसकम् अपराधिनं, हिंसति नाशयति, स महान् इति शेषः ॥३३०॥

नेति।—ये रणेषु सङ्ग्रामेषु, प्राणान् समुज्झन्ति त्यजन्ति, ते क्षणेन प्राणत्यागमात्रेण, न तु चिरक्लेशेनेति भावः, यान् लोकान्, यान्ति प्राप्नुवन्ति, सुशीलाः धीराश्च

मृतैः सम्प्राप्यते स्वर्गो जीवद्भिः कीर्त्तिरुत्तमा।
तदुभावपि शूराणां गुणावेतौ सुदुर्लभौ ॥३३२॥

एवञ्च।—ललाटदेशे रुधिरं स्रवन्तु
शूरस्य यस्य प्रविशेच्च वक्त्रे।
तत् सोमपानेन समं भवेच्च
सङ्ग्रामयज्ञे विधिवत् प्रदिष्टम् ॥ ३३३॥

तथा च,—

होमार्थैर्विधिवत् प्रदानविधिना सद्विप्रवृन्दार्चनैः
यज्ञैर्भूरिसुदक्षिणैः सुविहितैः सम्प्राप्यते यत् फलम्।
सत्तीर्थाश्रमवासहोमनियमैश्चान्द्रायणाद्यैः क्रतैः
पुंभिस्तत् फलमाहवे विनिहतैः सम्प्राप्यते तत्क्षणात्" ॥३३४॥

हि निश्चितं, स्वर्गविषः स्वर्गकामाः सन्तः, तीर्थैः पुण्यक्षेत्रपर्य्यटनैरित्यर्थः, तपसा चान्द्रायणादिना, तथा मुक्तैः सुसम्पन्नैः, दानव्रतैश्च तान् लोकान्, न हि नैव, यान्तीत्यनुषज्यते; युद्धे हतस्य सुनिश्चितः स्वर्गवासः इति भावः। उपजातिः छन्दः ॥३३१॥

मृतैरिति।—मृतैः, सङ्ग्रामे इति शेषः, स्वर्गः, जीवद्भिः, युद्धं जित्वेति शेषः, उत्तमा कीर्त्तिः सम्प्राप्यते लभ्यते; तत् तस्मात्, शूराणां वीराणाम्, एतौ उभौ अपि स्वर्गलाभयशोलाभरूपौ इति भावः, गुणौ सुदुर्लभौ, शूरेतरैरिति भावः ॥ ३३२ ॥

ललाटेति।—यस्य तु शूरस्य ललाटदेशे स्रवन् निर्गच्छन्, रुधिरं सङ्ग्रामप्रहारोत्थमिति भावः, वक्त्रे मुखे, प्रविशेच्च, तत् रुधिरं, सङ्ग्रामयज्ञे विधिवत् यथाविधि, सोमपानेन समं तुल्यं, प्रदिष्टं कीर्त्तितं, भवेच्च। उपजातिः छन्दः ॥ ३३३ ॥

होमार्थैरिति।—पुंभिः पुरुषैः, विधिवत् यथाविधि, कृतैः सङ्कृतैः, होमार्थैः यज्ञीयवस्तुभिः ("अर्थोऽभिधेयवैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः) प्रदानविधिना प्रकृष्टेन दानरूपेण विधानेन, सतां विदुषां, विप्रवृन्दानां ब्राह्मणसमूहानाम्, अर्चनैः पूजनैः, तथा सुविहितैः सुनिश्चितैः, भूरिसुदक्षिणैः बहुशोभनदक्षिणावद्भिः, यज्ञैः सत्सु श्रेष्ठेषु, तीर्थेषु आश्रमेषु च वासैः, होमैः आग्नेयोक्तानुष्ठानैरित्यर्थः, नियमैः इन्द्रियसंयमादिभिः, तथा चान्द्रायणाद्यैः व्रतविशेषैः, [सर्वत्र करणे हेतौ वा] यत् फलं सम्प्राप्यते लभ्यते, तत् फलम् आहवे सङ्ग्रामे, विनिहतैः तत्क्षणात्, न तु विलम्बेनेति भावः, सम्प्राप्यते। आर्द्रविक्रीडितं छन्दः ॥ ३३४ ॥

तदाकर्ण्य दमनकश्चिन्तयामास,—"युद्धाय कृतनिश्चयोऽयं दृश्यते दुरात्मा, तत् यदि कदाचित् तीक्ष्णशृङ्गाभ्यां स्वामिनं प्रहरिष्यति, तदा महान् अनर्थः सम्पत्स्यते ; तदेनं भूयोऽपि स्वबुद्ध्या (ढ) प्रबोध्य तथा करोमि, यथा देशान्तरगमनं करोति" ; आह च,—"भो मित्र ! सम्यक् अभिहितं भवता, किन्तु कः स्वामिभृत्ययोः सङ्गामः ? उक्तञ्च,—

बलवन्तं रिपुं दृष्ट्वा किलात्मानं प्रगोपयेत् ।
बलवद्भिश्च कर्त्तव्या शरच्चन्द्रप्रकाशता ॥३३५॥

अन्यच्च,—अल्पोविक्रममज्ञात्वा वैरमारभते हि यः ।
स पराभवमाप्नोति समुद्रष्टिट्टिभात् यथा" ॥३३६॥

सञ्जीवक आह,—"कथमेतत् ?" सोऽब्रवीत्,—

कथा १२ ।

"कस्मिंश्चित् समुद्रतीरैकदेशे टिट्टिभदम्पती प्रतिवसतः स्म । ततो गच्छति काले ऋतुसमयमासाद्य टिट्टिभी गर्भमधत्त । अथ आसन्नप्रसवा सती सा टिट्टिभमूचे,—'भोः कान्त ! मम प्रसवसमयो वर्त्तते, तत् विचिन्त्यतां किमपि निरुपद्रवं स्थानं, येन तत्राहम् (ण) अण्डकविमोक्षणं करोमि' । टिट्टिभः प्राह,—

(ढ) प्रबोध्य—मान्त्वयित्वा । स्वामिभृत्ययोरिति ।—सङ्गामः समावबलयोरेव युज्यते, स्वामिभृत्ययोस्तु साम्याभावात् कथं सङ्गामः ? इति भावः ।

बलवन्तमिति ।—बलवन्तं प्रबलं, रिपुं शत्रुं, दृष्ट्वा आत्मानं प्रगोपयेत् प्रकर्षेण गोपितं कुर्य्यात्, दुर्बल इति शेषः, किलेत्यवधारणे : बलवद्भिश्च जनैः, शरच्चन्द्रप्रकाशता शरच्चन्द्रवत् आत्मप्रकाश इत्यर्थः, अगोपनमिति भावः, कर्त्तव्या ; बलिभिः सह सङ्गामे बलिनः एव आत्मानं प्रकाशयन्ति, न तु दुर्बला इति भावः ॥३३५॥

अल्पोरिति ।—यः हि अल्पोः विक्रमम् अज्ञात्वा वैरं विरोधम्, आरभते, सः समुद्रः यथा टिट्टिभात् क्षुद्रपक्षिविशेषात्, तथा पराभवम् आप्नोति ॥३३६॥

(ण) अण्डकविमोक्षणम्—अण्डकानां क्षुद्रडिम्बानां, विमोक्षणं गर्भात् निःसारणम् ।

'भद्रे ! रम्योऽयं समुद्रप्रदेशः, तदत्रैव प्रसवः कार्यः' । सा आह,—'अत्र पूर्णिमादिने (त) समुद्रवेला चरति ; सा मत्तगजेन्द्रानपि समाकर्षति, तद्दूरमन्यत्र किञ्चित् स्थानमन्विष्यताम्' । तत् श्रुत्वा विहस्य टिट्टिभः प्राह,—'भद्रे ! न युक्तमुक्तं भवत्या, (थ) का मात्रा समुद्रस्य, या मम दूषयिष्यति प्रसूतिम् ? किं न श्रुतं भवत्या ?—

वह्नाम्बरचरमार्गं व्यपगतधूमं सदा महाभयदम् ।
मन्दमतिः कः प्रविशति हुताशनं स्वेच्छया मनुजः ? ॥३३७॥
मत्तेभकुम्भविदलननक्तञ्चमं सुप्तमन्तकप्रतिमम् ।
यमलोकदर्शनेच्छुः सिंहं बोधयति को नाम ? ॥ ३३८ ॥
को गत्वा यमसदनं स्वयमन्तकमादिशत्यजातभयः ।
प्राणानपहर मत्तो यदि शक्तिः काचिदस्ति तव ? ॥३३९॥

(त) समुद्रवेला—सागरजलस्य विकृतिः, जलोच्छ्रास इत्यर्थः ("अब्ध्यम्बुविकृतौ वेला" इत्यमरः) । चरति भवतीत्यर्थः, चन्द्रोदयदर्शनात् वृद्धिं गच्छति इति भावः । सा—वेला । समाकर्षति—आयतीकरोति, समाकृष्य जलनिमग्नान् करोतीत्यर्थः ।

(थ) का मात्रा—किं वित्तं, का शक्तिमत्त्वमिति भावः । प्रसूतिम्—अपत्यं, ("प्रसूतिरुद्भवेऽपि स्यात् तनये दुहितर्यपि" इति मेदिनी) ।

वह्नेति ।—कः मन्दमतिः मूढचेताः, मनुजः मानवः, वह्नः रुद्ध इत्यर्थः, अम्बरचराणां खेचराणां, मार्गः पन्थाः येन तादृशं, गगनस्पर्शिशिखमित्यर्थः, व्यपगतधूमं धूमशून्यं, नियतं तीव्रं ज्वलन्तमिति भावः, अत एव सदा महाभयदम् अतिभयङ्करं, हुताशनम् अग्निं, स्वेच्छया प्रविशति ? न कोऽपीत्यर्थः ; मया सह विरोधः हुताशने प्रवेश इव भयङ्करः इति भावः । आर्या वृत्तम् ॥ ३३७ ॥

मत्तेति ।—को नाम यमलोकदर्शनेच्छुः सन्, मत्तानां मदस्राविणाम्, इभानां गजानां, कुम्भविदलने मस्तकस्थपिण्डाकारावयविशेषस्य विदारणे इत्यर्थः, क्षतः श्रमो येन तादृशम्, अतएव यमसदृशं, सुप्तं निद्रितं, सिंहं बोधयति जागरयति ? न कोऽपीत्यर्थः ; कोऽपि मया सह न विवादिष्यतीति भावः । आर्या वृत्तम् ॥३३८॥

क इति ।—कः जनः, यमसदनं गत्वा अजातभयः निर्भयः सन्, स्वयम् अन्तकं यमं, तव यदि काचित् शक्तिः अस्ति, तदा मत्तः मत्सकाशात्, मम वा, प्राणान्

प्रालेयमिश्रे मरुति प्राभातिके च वाति जड़े।
गुणदोषज्ञः पुरुषो जलेन कः शीतमपनयति ? ॥३४०॥

तस्मात् (ट) विश्रब्धा अत्रैव गर्भं मुञ्च। उक्तञ्च,—

यः पराभवमन्वस्तः स्वस्थानं मन्यजेन्नरः।
तेन चेत् पुत्रिणी माता तद्वन्ध्या केन कथ्यते ?' ॥३४१॥

तत् श्रुत्वा ममुर्दध्यौ चिन्तयामास,—'अहो! गर्वः पक्षिकीटस्य अस्य। अथवा साधु च इदमुच्यते,—

उत्क्षिप्य दृष्टिभिः पादावास्ते भङ्गभयाद्दिवः।
स्वचित्तकल्पितो गर्वः कस्य नात्रापि विद्यते ? ॥३४२॥

तन्मया अस्य (ध) प्रमाणं कुतूहलादपि द्रष्टव्यं, किं मम एषः अण्डापहारे कृते करिष्यति ?' इति चिन्तयित्वा स्थितः। अथ प्रसवानन्तरं प्राणयात्रार्थं गतायाः टिट्टिभ्याः

अपहर. गृहाण, इति आदिशति ? न कोऽपि इत्यमादिशतीत्यर्थः; जीवतो यमपुरगमनमिव मदपत्यविनाशः अतिसाहस इति भावः। आर्या वृत्तम् ॥३३९॥

प्रालेयेति।—प्रालेयमिश्रे तुषारसंवलिते, ("...तुषारस्तुहिनं हिमम्। प्रालेयं निहिका च" इत्यमरः) अत एव जड़े अत्यन्तशीतले, प्राभातिके प्रातःकालिके, मरुति वायौ, शैत्योत्पादके इति भावः, वाति वहति सति, गुणदोषज्ञः कश्च को हि, पुरुषः, जलेन शीतम् अपनयति निवारयति ? न कोऽपीत्यर्थः। आर्या वृत्तम् ॥३४०॥

(ट) विश्रब्धा—निःशङ्केत्यर्थः।

य इति।—यः नरः पराभवमन्वस्तः पराजयाङ्कीतः सन्, स्वस्थानं सत्यजेत्, माता तज्जननी, चेत् यदि, तेन नरेण, पुत्रिणी पुत्रवती, भवतीति शेषः, तत् तदा, केन कोऽपि पुत्रेण, वन्ध्या कथ्यते ? कापुरुषमातैव वन्ध्या, न तु अप्रसवा इति भावः ॥३४१॥

उत्क्षिप्येति।—टिट्टिभः दिवः आकाशस्य, भङ्गभयात् पतनाशङ्कयेत्यर्थः, पादौ उत्क्षिप्य ऊर्ध्वीकृत्य, अवष्टम्भनार्थमिति भावः, आस्ते तिष्ठति, तथा हि, अपि प्रश्ने, अत्र जगति, कस्य जनस्य, स्वचित्तकल्पितः गर्वः अहङ्कारः, न विद्यते ? क्षुद्रस्य महतो वा सर्वस्यापि आत्मगर्वः स्वचित्तानुसारी वर्तते इत्यर्थः ॥ ३४२ ॥

(ध) प्रमाणं—निदर्शनमित्यर्थः। अण्डापहारे—अण्डानां—डिम्बानाम्, अपहारः,—हरणं, तस्मिन्।

समुद्रः (न) वेलाव्याजेन अण्डानि अपजहार। अथ आयाता सा टिट्टिभी प्रसवस्थानं शून्यमवलोक्य प्रलपन्ती टिट्टिभमूचे,—'भो मूर्ख! कथितमासीत् मया तं, यत् समुद्रवेलया अण्डानां विनाशो भविष्यति, तद्दूरतरं व्रजावः; परं मूढतया अहङ्कारमाश्रित्य मम वचनं न करोषि। अथवा साधु इदमुच्यते,—

सुहृदां हितकामानां न करोतीह यो वचः।
स कूर्म इव दुर्बुद्धिः काष्ठात् भ्रष्टो विनश्यति' ॥३४३॥

टिट्टिभ आह,—'कथमेतत्?' सा अब्रवीत्,—

कथा १३।

'अस्ति कस्मिंश्चित् जलाशये कम्बुग्रीवो नाम कच्छपः। तस्य च सङ्कटविकटनाम्नौ मित्रे हंसजातीये (प) परमस्नेहकोटिमाश्रिते नित्यमेव सरस्तीरमासाद्य तेन सह अनेकदेवर्षिमहर्षीणां कथाः कृत्वा अस्तमयवेलायां स्वनीडसंश्रयं कुरुतः। अथ गच्छता कालेन अवृष्टिवशात् सरः शनैः शनैः शोषमगमत्। ततस्तद्वःखदुःखितौ तौ ऊचतुः,—'भो मित्र! (फ) जम्बालशेषम् एतत् सरः सञ्जातं, तत् कथं भवान् भविष्यति इति व्याकुलत्वं नो हृदि वर्त्तते'। तत् श्रुत्वा

(न) वेलाव्याजेन—स्रोतोम्बुविक्रान्तिच्छद्मना, जलोच्छ्रासच्छलेनेत्यर्थः,("अम्बाम्बुविक्रान्तौ वेला कालमर्य्यादयोरपि" इत्यमरः)।

सुहृदामिति।—इह जगति, यः हितकामानां हितार्थिनां, सुहृदां वचः न करोति न शृणोतीत्यर्थः, न प्रतिपालयतीति यावत्, स दुर्बुद्धिः काष्ठात् भ्रष्टः स्खलितः, कूर्मः इव विनश्यति ॥ ३४३ ॥

(प) परमस्नेहकोटिं—प्रथमातिशयम्। अस्तमयवेलायां—सायङ्काले। स्वनीडसंश्रयं—निजवासाश्रयम्।

(फ) जम्बालशेषं—कर्दमावशिष्टं, ("निषद्वरस्तु जम्बालः पङ्कोऽस्त्री स्यात्कर्दमो" इत्यमरः)।

कम्बुग्रीवः आह,—'भोः ! साम्प्रतं न अस्ति अस्माकं जीवितव्यं जलाभावात्। तथाऽपि उपायश्चिन्त्यतामिति। उक्तञ्च,—

त्याज्यं न धैर्यं विधुरेऽपि काले
धैर्यात् कदाचिद्गतिमाप्नुयात् सः।
यथा समुद्रेऽपि च पोतभङ्गे
सांयात्रिको वाञ्छति तर्तुमेव ॥ ३४४ ॥

अपरञ्च,—मित्रार्थे बान्धवार्थे च बुद्धिमान् यतते सदा।
जातास्वापत्सु यत्नेन जगादेदं वचो मनुः ॥ ३४५ ॥

तत् अन्विष्यतां (ब) प्रभूतजलसनाथं सरः, आनीयतान्तु काचित् दृढरज्जुः लघुकाष्ठं वा, येन मया मध्यप्रदेशे दन्तैर्गृहीते सति युवां कोटिभागयीः तत् काष्ठं मया सहितं मङ्क्षु तत् सरो नयथः'। तौ ऊचतुः,—'भो मित्र ! एवं करिष्यावः, परं (भ) भवता मौनव्रतेन स्थातव्यं, नो चेत् तव काष्ठात् पातो भविष्यति'। तथा अनुष्ठिते, गच्छता कम्बुग्रीवेण

त्याज्यमिति।—काले समये, विधुरे विकलेऽपि, शोकादिजन्यविकल्यसमयेऽपीत्यर्थः, धैर्यं धीरत्वं, न त्याज्यम् अवलम्बनीयमित्यर्थः, जनेनेति शेषः; सः तादृशसमयेऽपि धैर्यवान् पुरुष इत्यर्थः, धैर्यात् धीरतासंश्रयात्, कदाचित् गतिम् उपायम्, आप्नुयात्; यथा समुद्रे पोतभङ्गे यानव्यसनेऽपि, सांयात्रिकः पोतवणिक्, तर्तुमेव वाञ्छति, धैर्यात्रयेणेति भावः, अधीरतया न निर्वेदश्लिष्टतीत्याशयः। उपजातिः छन्दः ॥ ३४४ ॥

मित्रार्थे इति।—आपत्सु जातासु उपस्थितासु सतीषु, बुद्धिमान् जनः, मित्रार्थे सुहृन्निमित्ते, बान्धवार्थे पितृव्यार्थे च, सदा यत्नेन सावधानतापूर्वेण, यतते विपदुद्धरणार्थं चेष्टते, मनुः इदं वचो जगाद उक्तवान् ॥ ३४५ ॥

(ब) प्रभूतजलसनाथ—बहुजलपूर्णम् इत्यर्थः। लघुकाष्ठं—क्षुद्रकाष्ठम्। कोटिभागयीः,—प्रान्तभागधीः।

(भ) भवता—त्वया, मौनव्रतेन—मौनेना इत्यर्थः। नो चेत्—अन्यथा, मौनत्यागे सति इत्यर्थः।

(म) अधोभागव्यवस्थितं किञ्चित् पुरमालोकितम्। तत्र ये पौराः, ते तथा नीयमानं विलोक्य सविस्मयमिदमूचुः,—'अहो! चक्राकारं किमपि पक्षिभ्यां नीयते, पश्यत पश्यत'। अथ तेषां कोलाहलमाकर्ण्य कम्बुग्रीवः,—'भोः! किमेष कोलाहलः?' इति वक्त्रमना अर्द्धोक्ते पतितः, पौरैः खण्डशः कृतश्च। अतोऽहं ब्रवीमि,—'सुहृदां हितकामानाम्' इति। तथा च,—

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति' ॥२४६॥

टिट्टिभ आह,—'कथमेतत्?' सा ब्रवीत्,—

कथा १४।

कस्मिंश्चित् जलाशये अनागतविधाता प्रत्युत्पन्नमतिः यद्भविष्यश्चेति त्रयो मत्स्याः सन्ति। अथ कदाचित् तं जलाशयं दृष्ट्वा गच्छद्भिर्मत्स्यजीविभिरुक्तम्—'अहो! बहुमत्स्योऽयं ह्रदः कदाचिदपि न अस्माभिरन्वेषितः; तदद्य तावत् (य) आहारवृत्तिः सञ्जाता, सन्ध्यासमयश्च संवृत्तः; ततः प्रभातेऽत्र आगन्तव्यम इति निश्चयः'। ततस्तेषां तत् (र) कुलिशपातोपमं वचः समाकर्ण्य अनागतविधाता सर्वान् मत्स्यान् आहूय इदमूचे,—'अहो! श्रुतं भवद्भिः यत् मत्स्यजीविभिरभिहितम्? तत् रात्रावेव गम्यतां किञ्चित् निकटं सरः। उक्तञ्च,—

(म) अधोभागव्यवस्थितं—निम्नस्थितम।

अनागतेति।—अनागतस्य अनुपस्थितस्य, विषयस्येति भावः, विधाता प्रतिकर्त्ता, भविष्यदिचित्र कर्मकर्त्ता इत्यर्थः, तथा प्रत्युत्पन्ना तत्कालोचिता, विपत्प्रतीकारसमर्था इत्यर्थः, मतिः बुद्धिः यस्य तथोक्तः, विपदुपस्थितावेव सञ्जाततत्प्रतीकारबुद्धिरित्यर्थः, एतौ द्वौ सुखं यथा तथा, एधेते वृद्धिं गच्छतः, यत् भविष्यं भाव्यं यस्य तथोक्तः, यत् भविष्यति तत् भाव्यत्येव इति भाग्यनिर्भरात् प्रतीकारपराङ्मुखः इत्यर्थः, विनश्यति ॥२४६॥

(य) आहारवृत्तिः,—भोजनव्यापारः, क्षुधोद्रेको वा। संवृत्तः,—उपस्थितः।

(र) कुलिशपातोपमं—वज्रपातसदृशम्। अभिहितम्—उक्तम्।

अशक्तैर्बलिनः शत्रोः कर्त्तव्यं प्रपलायनम् ।
संश्रितव्योऽथवा दुर्गो नान्या तेषां गतिर्भवेत् ॥१४७॥

तन्नूनं प्रभातसमये मत्स्यजीविनोऽत्र समागम्य मत्स्यसङ्घयं करिष्यन्ति, एतन्मम मनसि वर्त्तते ; तत्र युक्तं साम्प्रतं क्षणमपि अत्रावस्थातुम् । उक्तञ्च,—

विद्यमाना गतिर्येषामन्यत्रापि सुखावहा ।
ते न पश्यन्ति विद्वांसो देहभङ्गं कुलक्षयम्' ॥ १४८ ॥

तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह,—'अहो ! सत्यमभिहितं भवता, ममापि अभीष्टमेतत्, तदन्यत्र गम्यतामिति । उक्तञ्च,—

परदेशभयाद्भीता बहुमाया नपुंसकाः ।
स्वदेशे निधनं यान्ति काका: कापुरुषा मृगाः ॥ १४९ ॥

तथा च,—यस्यास्ति सर्वत्र गतिः स कस्मात्
स्वदेशरागेण हि याति नाशम् ? ।

अशक्तैरिति ।—अशक्तैः दुर्बलैः, जनैरिति शेषः, बलिनः बलवतः, शत्रोः सकाशादिति भावः, प्रपलायनं प्रकर्षेण पलायनं, कर्त्तव्यम् ; अथवा दुर्गः कोट्टः, "गढ़" "किल्ला" इति वा ख्यातं पर्वतप्राचीरादिवेष्टितं शत्रुदुर्गमस्थानमित्यर्थः, संश्रितव्यः आश्रयणीयः, [विवक्षया इडभावः, गुणाभावश्च छान्दसः । वस्तुतस्तु 'संश्रयितव्यः' इत्येव प्रयोगः साधुः] ; तेषां दुर्बलानाम्, अन्या गतिः पलायनं विना अन्यः उपायः, न भवेत् नास्ति इत्यर्थः ॥ १४७ ॥

विद्यमानेति ।—येषां जनानाम्, अन्यत्रापि स्थानान्तरेऽपि, सुखावहा सम्यक् सुखजनिका, गतिः उपायः, भयायासम् अवस्थानोपाय इत्यर्थः, विद्यमाना अस्तीत्यर्थः, ते विद्वांसः देहभङ्गं निजशरीरक्षयं, कुलक्षयं बंशनाशञ्च, न पश्यन्ति ॥१४८॥

परेति ।—काकाः वायसाः, कापुरुषाः भीरवः, मृगाः हरिणाश्च, एते त्रयः परदेशभयात् भीताः परस्मिन् देशे कथं वत्स्यन्तीति सन्तस्ताः, बहुमायाः स्वदेशं प्रति सातिशयममताग्रस्तिनः, अत एव नपुंसकाः क्लीबाः, अक्षमा इति भावः, सुतरां स्वदेशे निधनं नाशं, यान्ति प्राप्नुवन्ति ॥ १४९ ॥

यस्येति ।—यस्य जनस्य, सर्वत्र गतिः गमनोपायः, अस्ति, स जनः, स्वदेशरागेण

तातस्य कूपोऽयमिति ब्रुवाणाः
क्षारं जलं कापुरुषाः पिबन्ति' ॥ ३५० ॥

अथ तत् समाकर्ण्य प्रोच्चैर्विहस्य यज्ञविघ्नः प्रोवाच,—'अहो! न भवद्भ्यां मन्त्रितं सम्यगेतत्, यतः, किं वाक्षात्रेणापि (ल)तेषां पिङ्गपैतामहकम् एतत् सरः त्यक्तुं युज्यते? यदि आयुःक्षयोऽस्ति, तदन्यत्र गतानामपि मृत्युर्भविष्यति एव। उक्तञ्च,—

अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः
कृतप्रयत्नोऽपि गृहे विनश्यति ॥ ३५१ ॥

तदहं न यास्यामि, भवद्भ्यश्च यत् प्रतिभाति तत् कर्त्तव्यम्'।

अथ तस्य तं निश्चयं ज्ञात्वा अनागतविधाता प्रत्युत्पन्नमतिश्च निष्क्रान्तौ सह परिजनेन। अथ प्रभाते तैर्मत्स्यजीविभिः जालैस्तं जलाशयमालोड्य यज्ञविघ्नेन सह तत् सरो निर्मत्स्यतां नीतम्। अतोऽहं ब्रवीमि,—'अनागतविधाता च' इति'।

तत् श्रुत्वा टिट्टिभ आह,—'भद्रे! किं मां यज्ञविघ्नसदृशं सम्भावयसि? तत् पश्य मे बुद्धिप्रभावं, यावदेनं दुष्टसमुद्रं

निजदैन्यप्रियतया, कस्मात् कथं, नाशं याति प्राप्नोति? कापुरुषाः जनाः, तातस्य पितुः, अयं कूप इति ब्रुवाणाः वदन्तः सन्तः, क्षारं लवणाक्तं, जलं पिबन्ति, पेयं सरः इति मायया बद्धाः तत्यक्त्वा न कुत्रापि गच्छन्तीति भावः। उपजातिः वृत्तम् ॥ ३५० ॥

(ल) तेषां—मत्स्यजीविनाम्। पिङ्गपैतामहकं—पितृपितामहक्रमेणाभ्युषितम्।

अरक्षितमिति।—अरक्षितं यत्नेन अप्रतिपालितमपीत्यर्थः, वस्तु इति शेषः, दैवरक्षितं दैवेन भाग्येन, रक्षितं जातं सत्, तिष्ठति; सुरक्षितं यत्नपालितमपि वस्तु, दैवहतं दैवेन विहन्यमानं, विनश्यति न तिष्ठतीत्यर्थः; वने विसर्जितः [स्वार्थविजन्मात् स्वजनैरपि त्यक्तः,] परित्यक्तः, अनाथोऽपि अशरणोऽपि, जीवति; गृहे कृतप्रयत्नोऽपि जनः, विनश्यति नाशं गच्छति। वंशस्थविलं वृत्तम् ॥ ३५१ ॥

खचद्वा शोषयामि'। टिट्टिभो आह,—'अहो! कस्ते समुद्रेण सह विग्रहः? तत्र युक्तमस्योपरि कोपं कर्त्तुम्।

उक्तञ्च,—पुंसामसमर्थानामुपद्रवायात्मनो भवेत् कोपः।
पिठरं ज्वलदतिमात्रं निजपार्श्वानेव दहतितराम् ॥३५२॥

तथा च,—अविदित्वाऽऽत्मनः शक्तिं परस्य च समुत्सुकः।
गच्छत्यभिमुखो नाशं याति वह्नौ पतङ्गवत्' ॥३५३॥

टिट्टिभ आह,—'प्रिये! मा मैवं वद, येषाम् (व) उत्साहशक्तिः भवति, ते स्वल्पा अपि गुरून् विक्रमन्ते। उक्तञ्च,—

विशेषात् परिपूर्णस्य याति शत्रोरमर्षणः।
आभिमुख्यं शशाङ्कस्य यथाऽद्यापि विधुन्तुदः ॥ ३५४ ॥

तथा च,—प्रमाणादधिकस्यापि गण्डश्यामस्य मदच्युतः।
पदं मूर्द्धि समाधत्ते केशरी मत्तदन्तिनः ॥ ३५५ ॥

पुंसामिति।—असमर्थानाम् अक्षमाणां, पुंसां कोपः आत्मनः स्वस्य, उपद्रवाय नाशाय इत्यर्थः, भवेत्; तथा हि, अतिमात्रं ज्वलत् पिठरं स्थाली, ["पिठरः स्थाल्युखा कुण्डम्" इत्यमरः। अत्र क्लीबत्वं चिन्त्यम्] निजपार्श्वानेव दहतितराम् अतिशयेन दहति; स्वल्पत्वं ततरां दह्यमानं स्त्रीभूतमपि स्वमेव दहतीति निष्कर्षः। आर्या वृत्तम ॥ ३५२ ॥

अविदित्वेति।—आत्मनः परस्य च शक्तिम् अविदित्वा अविचिन्त्य, समुत्सुकः समुत्सर्जितः सन्, अभिमुखो गच्छन् जनः, वह्नौ पतङ्गवत् नाशं याति ॥ ३५३ ॥

(व) उत्साहशक्तिः,—अध्यवसायः। स्वल्पाः,—क्षुद्राः। विक्रमन्ते—अतिक्रमन्ते इत्यर्थः, [तङ्च चिन्त्यम्]।

विशेषादिति।—विधुन्तुदो राहुः, अद्यापि यथा परिपूर्णस्य शशाङ्कस्य आभिमुख्यं याति, तथा अमर्षणः कोपनः जनः, विशेषात् विशेषेण, परिपूर्णस्य शत्रोः आभिमुख्यं याति गच्छति; न हि मूर्खाः दुर्बलात् बोधयन्तीति भावः ॥ ३५४ ॥

प्रमाणादिति।—केशरी सिंहः, प्रमाणात् स्वपरिमाणात्, अधिकस्य अतिरिक्तस्य, उन्नतस्येत्यर्थः, गण्डयोः श्यामस्य श्यामवर्णस्य, मदस्य च्युतिः क्षरणं यस्य तादृशस्य, मदस्राविण इत्यर्थः, मत्तदन्तिनः मत्तगजस्यापि, मूर्द्धि शिरसि, पदं समाधत्ते अर्पयति; क्षुद्राकारोऽपि उत्साही महाकायं शत्रुं पराजयते इति भावः ॥ ३५५ ॥

तथा च,—बालस्यापि रवेः पादाः पतन्त्युपरि भूभृताम्।
तेजसा सह जातानां वयः कुत्रोपयुज्यते ? ॥३५६॥

एवच।—

हस्ती स्थूलतरः स चाङ्कुशवशः, किं हस्तिमात्रोऽङ्कुशः ?
दीपे प्रज्वलिते प्रणश्यति तमः, किं दीपमानं तमः ?।
वज्रेणापि शतं पतन्ति गिरयः, किं वज्रमात्रो गिरिः ?
तेजो यस्य विराजते स बलवान्, स्थूलेषु कः प्रत्ययः ? ॥३५७॥

तदनया चञ्चा अस्य सकलं तोयं शुष्कस्थलतां नयामि'। टिट्टिभो आह,—'भोः कान्त ! यत्र जाह्नवी नदनदीशतानि गृहीत्वा नित्यमेव प्रविशति तथा (ग) सिन्धुश्च, तस्य कथं त्वम् अष्टादशनदीशतैः पूर्य्यमाणस्य तत् विप्रुषवाहिण्या चञ्चा शोषयिष्यसि ? तत् किमस्मद्वैरेण उक्तेन ?'। टिट्टिभ आह,—'प्रिये !—

बालस्येति।—बालस्य नवोदितस्य अपि, अल्पतेजस इति भावः, रवेः सूर्य्यस्य, प्रकृत्या चञ्चांशोरिति भावः, पादाः किरणाः, भूभृता पर्वतानाम् एव, टिट्टिभतानामिति भावः; उपरि, न त्वधः इति भावः, पतन्ति, तेजसा सह जातानाम् उत्पन्नानां, तेजस्विनामित्यर्थः, वयः तारुण्यप्रौढत्वादिकं, कुत्र उपयुज्यते उपयोगि भवति ? न कुत्रापीत्यर्थः। तेजीयस अल्पकायस्यापि जयः, न तु महाकायस्यापि निस्तेजस इति भावः॥ ३५६॥

हस्तीति।—हस्ती स्थूलतरः अतिशयेन स्थूलकाय इत्यर्थः, स च हस्ती, अङ्कुशस्य वशे, इच्छितताडनदण्डस्य इत्यर्थः, वशः अधीनः; सः अङ्कुशः किं हस्तिमात्रः ? हस्तिप्रमाणः ? नैवेत्यर्थः, [परिमाणार्थे मात्रच् प्रत्ययः] दीपे प्रज्वलिते तमः तिमिरं, प्रणश्यति, तत् तमः किं दीपमानं दीपप्रमाणम् ? नैवेत्यर्थः। वज्रेण शतं शतसङ्ख्याकाः, गिरयः पर्वताः, पतन्ति, गिरिः किं वज्रमात्रः वज्रपरिमाणः ? नैवेत्यर्थः; वज्रमतिक्षुद्रं, गिरिस्तु अतिमहानिति भावः; एवं पूर्वार्धेऽपि बोध्यम्; अत एव यस्य तेजः विराजते विशेषेण भाति, स बलवान्, भवतीति शेषः, स्थूलेषु पृथुषु, महाकायेषु इत्यर्थः, प्रत्ययः विश्वासः कः ? नास्ति कोऽपि विश्वास इत्यर्थः; आकारेण सर्वैरादियते, न स्थूलत्वादिकमिति भावः। आदूंसविक्रीडितं वृत्तम् ॥ ३५७॥

(ग) सिन्धुः,—नदविशेषः। तस्य—सागरस्य। तत्—तोयम्। विप्रुषवाहिण्या—जलादीनां कणवाहिन्या इत्यर्थः। अस्मद्वैरेण—विश्वासायोग्येन।

अनिर्वेदः श्रियो मूलं चक्षुर्मे लोहसन्निभा।
अहोरात्राणि दीर्घाणि समुद्रः किं न शुष्यति ?॥ ३५८॥

किञ्च।—दुरधिगमः परभागो यावत् पुरुषेण पौरुषं न कृतम्।
जयति तुलामधिरूढो भास्वानपि जलदपटलानि'॥ ३५९॥

टिट्टिभौ आह,—'यदि त्वया अवश्यं समुद्रेण सह विग्रहानुष्ठानं कार्यं, तदन्यानपि विहङ्गमानाहूय सुहृज्जनसहितः एवं समाचर। उक्तञ्च,—

बहूनामप्यसाराणां समवायो हि दुर्जयः।
तृणैरावेष्यते रज्जुर्येन नागोऽपि बध्यते॥ ३६०॥

तथा च—चटका-काष्ठकूटेन मक्षिका-दर्दुरैस्तथा।
महाजनविरोधेन कुञ्जरः प्रलयं गतः॥ ३६१॥

अनिर्वेद इति।—निर्वेदः खेदमानं, खेदशून्य इत्यर्थः, तदन्यः अनिर्वेदः खेदोत्कर्षज्ञानमित्यर्थः, उत्साहबलवत्त्वमिति भावः, श्रियः सम्पदः, मूलं निदानम्; मे मम, चक्षुः लोहसन्निभा लोहवत् कठिना; दीर्घाणि महान्ति, अहोरात्राणि च, सन्तीति शेषः, [अहोरात्रान् इति साधुः, रात्रान्तशब्दस्य पुंस्त्वित्वात्] समुद्रः किं न शुष्यति ? न शोषं याति ? अपि तु शुष्यत्येवेत्यर्थः; सोत्साहोऽहं कठिनया चञ्च्वा दीर्घैरहोरात्रैः समुद्रं शोषयिष्यामीति आशयः॥ ३५८॥

दुरधिगमं इति।—पुरुषेण यावत् पौरुषं न कृतं नानुष्ठितं, भवेदिति शेषः, तावत् परभागः उत्कर्षः, दुरधिगमः दुर्लभः; पराक्रमं विना महत्त्वं न प्रकाशते इति भावः। भास्वान् सूर्योऽपि, का कथा अन्येषामिति भावः, तुलां राशिविशेषम्, अधिरूढः सन्, जलदपटलानि मेघवृन्दानि, जयति; तुलास्थो रविर्मेघैराच्छाद्यते इति भावः; यावत् पराक्रमो न प्रकाश्यते, तावत् महताऽपि वैरिनिर्यातनं कर्तुं न शक्यत इति निष्कर्षः। आर्या छन्दः॥ ३५९॥

बहूनामिति।—असाराणां सारहीनानामपि, बहूनां बहूनां, समवायः संहतिः, दुर्जयः जेतुमशक्यः, हि तथा हि, तृणैः अतितुच्छैर्लताप्रतानादिभिः, रज्जुः बाम्रः, आवेष्यते विरच्यते इति भावः, येन संहतेन तृणेन, नागोऽपि गजोऽपि, बध्यते बद्धः क्रियते; अतो बहूनामसाराणामपि समवायः संघं शोषयिष्यतीति भावः॥ ३६०॥

चटकेति।—चटकया सह काष्ठकूटेन "काठ्ठोकरा" इति प्रसिद्धेन पक्षिणा,

टिट्टिभ आह,—'कथमेतत् ?' सा प्राह,—

कथा १५ ।

'कस्मिंश्चित् वनोद्देशे चटकटम्पती तमालतरुकृतनिलयौ प्रतिवसतः स्म। अथ तयोर्गच्छता कालेन सन्ततिः अभवत्। अन्यस्मिन्नहनि कश्चित् प्रमत्तो वनगजः (घ) घर्मार्त्तश्छायार्थी तं तमालवृक्षं समाश्रितः। ततः (ङ) मदोत्कर्षात् तां तस्य शाखां चटकाश्रितां पुष्करायेण आक्रम्य बभञ्ज। तस्या भङ्गेन चटकाण्डानि सर्वाणि (च) विशीर्णानि, आयुःशेषतया च चटकौ कथमपि प्राणैर्न वियुक्तौ। अथ चटका स्वाण्डभङ्गाभिभूता प्रलापान् कुर्वाणा न किञ्चित् सुखमासासाद। अत्रान्तरे तस्यास्तान् प्रलापान् श्रुत्वा काष्ठकूटो नाम पक्षी तस्याः परमसुहृत् तद्दुःखदुःखितोऽभ्येत्य ताम् उवाच,—'भगवति! किं वृथा प्रलापेन ? उक्तञ्च,—

नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः।
पण्डितानाञ्च मूर्खाणां विशेषोऽयं यतः स्मृतः॥ ३६२॥

तथा मल्लिकया सह मिलितैः दर्दुरैः भेकैः, एवं मद्दालनविरोधेन मद्दतां बहूनामित्यर्थः, जलानां विरोधेन, कुञ्जरः गजः, प्रलयं नाशं, गतः॥ ३६१॥

(घ) घर्मार्त्तः,—आतपपीडितः।

(ङ) मदोत्कर्षात्—मत्ततातिरेकात्, अहङ्कारातिशयाच्च इति शेषः। पुष्करायेण—शुण्डायेण।

(च) विशीर्णानि—भग्नानि। आयुःशेषतया—आयुषः अवशिष्टतया।

नष्टमिति।—पण्डिताः विद्वांसः, नष्टं अदर्शनं गतं, द्रव्यमिति शेषः, चौरादिभिरपहृततयेति भावः; मृतं निधनं गतं, पुत्रकलत्रादिस्वजनमिति शेषः, अतिक्रान्तम् अतीतञ्च, व्यापारमिति शेषः, न अनुशोचन्ति एतत् त्वयमुद्दिश्य शोकं न प्रकाशयन्तीत्यर्थः; यतः पण्डितानां मूर्खाणाञ्च अयं विशेषः प्रभेदः, स्मृतः उक्तः; त्वमपि ग्राम्यजनाचरितमनुसृत्य नष्टानां मृतानां कृते मा मुहः इत्यभिप्रायः॥ ३६२॥

तथा च,—अशोच्यानीह भूतानि यो मूढस्तानि शोचति।
स दुःखे लभते दुःखं हावनर्थौ निषेवते ॥ ३६३ ॥

अन्वय—श्लेष्मास्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः।
तस्मान्न रोदितव्यं हि क्रियाः कार्याश्च शक्तितः' ॥३६४॥

चटका प्राह,—'अस्त्वेतत्, परं दुष्टगजेन (च) मदात् मम सन्तानक्षयः कृतः, तत् यदि मम त्वं सुहृत् सत्यः, तदस्य गजापसदस्य कोऽपि वधोपायश्चिन्त्यताम्; तस्य अनुष्ठानेन मे सन्ततिनाशदुःखमपसरेदिति। उक्तञ्च,—

आपदि येनापकृतं येन च हसितं दशासु विषमासु।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये' ॥ ३६५ ॥

काष्ठकूट आह,—'भगवति! सत्यमभिहितं भवत्या।

अशोच्यानीति।—इह जगति, भूतानि प्राणिनः, ("युक्ते आदाहते भूतं प्राप्तीतरे त्रिषु" इत्यमरः) अशोच्यानि शोकानर्हाणि, यो मूढः तानि भूतानि, शोचति, सः दुःखे नाशजन्ये एकस्मिन् सतीति भावः, दुःखं शोकजन्यमपरं लभते; अतः द्वौ अनर्थौ नष्टादिजन्यमेकं तदनुशोचनेनानशनादिरूपमपरमिति भावः, निषेवते अनुभवति ॥ ३६३ ॥

श्लेष्मेति।—यतः प्रेतः मृतः, अवशः पराधीनः, अनिच्छन्नपीति भावः, बान्धवैः मुक्तं पारलौकिकं, श्लेष्मास्रु श्लेष्मा नासानिर्गत इति भावः, तदुपलक्षितं नेत्रजलं, भुङ्क्ते पिबति; तस्मात् न रोदितव्यं हि रोदनं न कर्त्तव्यमेव; शक्तितः शक्तिमनुसृत्य, शास्त्रानुरूपमित्यर्थः, क्रियाश्च और्द्धदैहिककार्य्याणि च, श्राद्धतर्पणादिकानि इत्यर्थः, कार्य्याः कर्त्तव्याः, जनैरिति शेषः; प्रेतस्यार्थमिति भावः ॥ ३६४ ॥

(च) मदात्—गर्वात्। गजापसदस्य—गजाधमस्य। तस्य अनुष्ठानेन—गजस्य निधनव्यापारेण।

आपदीति।—आपदि येन जनेन, अपकृतम् अनिष्टमाचरितं, येन च विषमासु दारुणासु, दशासु दुरवस्थासु इत्यर्थः, हसितं, तयोः उभयोः द्वयोः, अपकृत्य अनिष्टं विधाय, नरं मृतजननमिति भावः, पुनरपि जातम् उत्पन्नम्, इति मन्ये तर्कयामि। आर्या छन्दः ॥ ३६५ ॥

उक्तञ्च—स सुहृत् व्यसने यः स्यादन्यजात्यनुजोऽपि सन्।
हृदो सर्वोऽपि मित्रं स्यात् सर्वेषामेव देहिनाम्॥ २६६॥
स सुहृत् व्यसने यः स्यात् स पुत्रो यस्तु भक्तिमान्।
स भृत्या यो विधेयज्ञः सा भार्या यत्र निर्वृतिः॥ २६७॥

तत् पश्य मे बुद्धिप्रभावम्; परं ममापि सुहृद्भूता वोणारवा नाम मक्षिका अस्ति, तत् तामाहूय आगच्छामि, येन स दुरात्मा दुष्टगजो बध्यते'।

अथासौ चटकया सह मक्षिकामासाद्य प्रोवाच,—'भद्रे! मम (क) इष्टा इयं चटका केनचित् दुष्टगजेन पराभूता अण्डस्फोटनेन, तत् तस्य बधोपायमनुतिष्ठतो मे साहाय्यं कर्त्तुमर्हसि'। मक्षिकाऽपि आह,—'भद्र! किमुच्यतेऽत्र विषये?

उक्तञ्च,—पुनः प्रत्युपकाराय मित्राणां क्रियते प्रियम्।
यत् पुनर्मित्रमित्रस्य कार्य्यं मित्रेन किं कृतम्?॥ २६८॥

स इति।—यः व्यसने विपदि, स्यात्, सहाय इति शेषः, सः अन्यजात्यनुजः जात्यन्तरोत्पन्नः सन् अपि, सुहृत् मित्रम्; सर्वोऽपि जनः, सर्वेषामेव देहिनां, हृदो अभ्युदये, न तु व्यसने इति भावः, मित्रं स्यात्; अतस्ते न खलु सुहृद इति भावः॥ २६६॥

स इति।—यः सुहृत्, व्यसने विपदि, स्यात्, सहाय इति शेषः, स एव सुहृत् वस्तुपदवाच्यः; यस्तु पुत्रः, भक्तिमान् पूज्येषु अनुरक्तः, स एव पुत्रः; यः भृत्यः विधेयज्ञः कार्य्यज्ञः, सः एव भृत्यः किङ्करपदवाच्यः; यत्र भार्य्यायां, निर्वृतिः सुखं, लभ्यते इति शेषः, सा एव भार्य्या यथार्थजाया॥ २६७॥

(क) इष्टा—प्रिया। अण्डस्फोटनेन—डिम्बभङ्गेन।

पुनरिति।—पुनः प्रत्युपकाराय कृतोपकारस्य प्रतिदानलाभाय, मित्राणां प्रियं क्रियते, लोकैरिति शेषः; मित्रमित्रस्य मित्रसुहृदः, पुनः यत् कार्य्ये, तत् किं मित्रैः न कृतम्? अपि तु कृतमेव इत्यन्वयः दृश्यते इत्यर्थः, यथा प्रत्युपकारादाशया मित्रस्य उपकारः क्रियते, तथा मित्रसन्तोषार्थं तन्मित्रस्यापि इति लोके दृश्यते, अतः अवश्यमेव उपकर्त्तव्यः इति भावः॥ २६८॥

सत्यमेतत्, परं ममापि भेको मेघनादो नाम मित्रं तिष्ठति, तमपि आहूय यथोचितं कुर्मः। उक्तञ्च,—

हितैः साधुसमाचारैः शास्त्रधर्मतिशालिभिः।

कथञ्चिन्न विकल्पन्ते विहङ्गैश्चिन्तिता नयाः' ॥ १६९ ॥

अथ ते त्रयोऽपि गत्वा मेघनादस्य अग्रे समस्तमपि वृत्तान्तं निवेद्य तस्थुः। अथ स प्रावोच, (ख)—'कियन्मात्रोऽसौ वराको गजो महाजनस्य कुपितस्याग्रे? तन्मदीयो मन्त्रः कर्त्तव्यः। मत्कुणिके! त्वं गत्वा मध्याह्नसमये तस्य मदोद्धतस्य गजस्य कर्णे वीणारवसदृशं शब्दं कुरु, येन श्रवणसुखलालसो निमीलितनयनो भवति। ततस्य काष्ठकूटचञ्चुना (ग) स्फाटितनयनोऽन्धीभूतः तृषार्त्तो मम गर्त्ततटाश्रितस्य सपरिकरस्य शब्दं श्रुत्वा जलाशयं मत्वा समभ्येति; ततो गर्त्तमासाद्य पतिष्यति, पञ्चत्वं यास्यति च इति। एवं (घ) समवायः कर्त्तव्यः, यथा वैरसाधनं भवति'।

अथ तथानुष्ठितं स मत्तगजो मत्कुणिकागीयसुखात् निमीलितनेत्रः काष्ठकूटच्छतचक्षुः मध्याह्नसमये भ्राम्यन् मण्डूकशब्दानुसारी गच्छन् महान्तं गर्त्तमासाद्य पतितो मृतश्च। अतोऽहं ब्रवीमि,—'चटका-काष्ठकूटेन' इति।'

टिट्टिभ आह,—'भद्रे! एवं भवतु, मुच्छदर्मसमुदायेन समुद्रं

हितैरिति।—हितैः हितार्थिभिः, साधुसमाचारैः सच्चरितैः, शास्त्रैः शास्त्रविद्भिः, मतिशालिभिः बुद्धिमद्भिः, विहङ्गैः जनैः, चिन्तिताः मनःकल्पिताः, नयाः नीतिव्यापाराः, कथञ्चित् केनापि प्रकारेण, न विकल्पन्ते नान्यथा भवन्तीत्यर्थः ॥ १६९ ॥

(ख) कियन्मात्रः,—किंप्रमाणः, अतितुच्छ इत्यर्थः। वराकः,—दीनः, जनस्य इति भावः। मन्त्रः,—मन्त्रणा, उपदेश इत्यर्थः। कर्त्तव्यः,—पालयितव्य इत्यर्थः।

(ग) स्फाटितनयनः,—उत्पाटितचक्षुः। सपरिकरस्य—सपरिवारस्य, ("भवेत् परिकरः सङ्ग पर्यङ्कपरिवारयोः" इति मेदिनी)।

(घ) समवायः,—सङ्घः, मेलनमिति यावत्। वैरसाधनं—प्रतिहिंसासिद्धिः।

शोषयिष्यामि' इति निश्चित्य वकसारसमयूरादीन् समाहूय प्रोवाच,—'भोः! पराभूतोऽहं समुद्रेण अण्डकापहारेण, तच्चिन्त्यतामस्य शोषणोपायः'। ते सम्भ्रान्ता प्रोचुः,—'अशक्ता वयं समुद्रशोषणे, तत् किं वृथा प्रयासेन? उक्तञ्च,—

अबलः प्रोन्नतं शत्रुं यो याति मदमोहितः।
युद्धार्थं स निवर्त्तेत शोषणदन्तो गजो यथा॥ ३७०॥

तदस्माकं स्वामी (ङ) वैनतेयः अस्ति, तस्मै सर्वमेतत् परिभवस्थानं निवेद्यतां, येन स्वजातिपराभवकोपितो वैरानृण्यं गच्छति; अथवा अत्रावलेपं करिष्यति, तथाऽपि नास्ति वो दुःखम्। उक्तञ्च,—

सुहृदि निरन्तरचित्ते गुणवति भृत्येऽनुवर्त्तिनि कलत्रे।
स्वामिनि शक्तिसमेते निवेद्य दुःखं सुखी भवति॥ ३७१॥

तत् यामो वैनतेयसकाशं, यतोऽसौ अस्माकं स्वामी'।

ततश्च सर्वे ते पक्षिणो विषण्णवदना वाष्पपूरितदृशः वैनतेयमकाशमासाद्य करुणस्वरेण (च) फूत्कर्तुमारब्धाः,—'अहो! अत्रह्मण्यमत्रह्मण्यम्! अधुना सदाचारस्य टिट्टिभस्य भवति नाथे

अबल इति।—यः अबलः दुर्बलः, मदमोहितः सन्, प्रोन्नतं प्रबलं, शत्रुं याति, युद्धार्थमिति भावः; स शोषणदन्तो गजो यथा, तथा निवर्त्तेत, पराभूतः सन् इति शेषः॥३७०॥

(ङ) वैनतेयः,—विनतानन्दनः, गरुडः इत्यर्थः। परिभवस्थानं—तिरस्कारविषयम्। वैरानृण्यं—अप्रतीकारमोक्षमित्यर्थः। अवलेपं—गर्वम्; अहं समुद्रमतितुच्छं शोषयिष्यामीति तेन समेव लाघवमित्येवंरूपमिति भावः।

सुहृदीति।—निरन्तरचित्ते अभिन्नहृदये, सुहृदि, गुणवति सद्गुणे, भृत्ये सेवके, अनुवर्त्तिनि अनुरक्ते, कलत्रे भार्य्यायां, तथा शक्तिसमेते सामर्थ्यवति, स्वामिनि प्रभौ, दुःखं निवेद्य सुखी भवति, जन इति शेषः। आर्य्या छन्दः॥ ३७१॥

(च) फूत्कर्तुं—चीत्कर्तुम्। अत्रह्मण्यम्—अवध्यं, "यथा वयं न हन्यामहे तथा क्रियताम्" इत्येवमार्त्तवचनमिति भावः, ("अत्रह्मण्यमवध्यायाम्" इत्यमरः)। भवति—लभि। नाथे—अरक्षे, प्रभौ।

सति समुद्रेण भक्षितानि अपक्षतानि !! तत् प्रनष्टमधुना पक्षि-कुलम्। अन्येऽपि स्वेच्छया समुद्रेण व्यापादयिष्यन्ते।

उक्तञ्च,—एकस्य कर्म संवीक्ष्य करोत्यन्योऽपि गर्हितम्।
गतानुगतिको लोको न लोकः पारमार्थिकः ॥ ३७२ ॥

तथा च—चाटतस्करदुर्वृत्तैस्तथा साहसिकादिभिः।
पीड्यमानाः प्रजा रक्ष्याः कूटच्छद्मादिभिस्तथा ॥३७३॥
प्रजानां धर्मषड्भागो राज्ञो भवति रक्षितुः।
अधर्मादपि षड्भागो जायते यो न रक्षति ॥ ३७४ ॥
प्रजापीड़नसन्तापात् समुद्भूतो हुताशनः।
राज्ञः श्रियं कुलं प्राणान् नादग्ध्वा विनिवर्त्तते ॥३७५॥

एकस्येति।—एकस्य जनस्य, कर्म कार्यं, गर्हितमिति शेषः, संवीक्ष्य दृष्ट्वा, अन्योऽपि गर्हितं निन्दितं कर्म, करोति; यतो लोकः गतानुगतिकः गतान् अनुगतानां पश्चात्, गतिः पन्थाः, गमनं वा यस्य तादृशः, ("गतिः स्त्री मार्गदशयोर्ज्ञाने याचाऽभ्युपाययोः" इति मेदिनी) अपरकार्यानुसारीत्यर्थः, पारमार्थिकः परमार्थपरः, सत्यानुसारीत्यर्थः, लोकः न, अस्तीति शेषः; गर्हितमाचरतः समुद्रस्य प्रतीकाराभावे अन्येऽपि तथा करिष्यन्ति, ततः संसारस्य अतीवानिष्टं सम्पत्स्यते इति भावः॥ ३७२॥

चाटेति।—चाटतस्करदुर्वृत्तैः प्रतारकचोरदुराचारैः, यो विश्वास्य परधनमप-हरति, स चाट इति मिताक्षरा; तथा साहसिकादिभिः अविमृश्यकारकादिभिः, दुर्जनैरिति भावः; तथा कूटच्छद्मादिभिः कौटिल्यच्छद्मादिभिः, पीड्यमानाः प्रजाः रक्ष्याः रक्षणीयाः, यथा न पीड्यन्ते तथा कार्या इत्यर्थः, नृपैरिति शेषः॥ ३७३॥

प्रजानामिति।—रक्षितुः रक्षणकर्तुः, दुर्जनेभ्य इति शेषः, राज्ञः प्रजानां धर्मस्य षड्भागः षष्ठो भागः, ["सङ्ख्यावाचकानां ह्रस्वविषये पूरणार्थत्वम्" इति नियमात् अत्र पूरणार्थता] भवति, खल्वित्यत्र शेषः; यः राजा, न रक्षति, प्रजा इति शेषः, तस्य अधर्मादपि, प्रजाजनादिति शेषः, षड्भागः षष्ठो भागः, जायते; अतः धर्मार्थिना राज्ञा प्रजा अवश्यमेव पालनीया इति तात्पर्यम्॥ ३७४॥

प्रजेति।—प्रजाना पीड़नेन यः सन्तापः तासां मनसि यत् दुःखमित्यर्थः, तस्मात्, समुद्भूतः सञ्जातः, हुताशनः अग्निः, पापवह्निरित्यर्थः, राज्ञः श्रियं कुलं प्राणांश्च अदग्ध्वा न विनिवर्त्तते; अतो राज्ञः प्रजापीड़नं सर्वानर्थमूलमिति भावः॥ ३७५॥

राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम्।
राजा पिता च माता च सर्वेषां न्यायवर्त्तिनाम् ॥३७६॥
फलार्थी पार्थिवो लोकान् पालयेत् यत्नमास्थितः।
दानमानादितोयेन मालाकारोऽङ्कुरानिव ॥ ३७७ ॥
यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः।
फलप्रदो भवेत् काले तद्वल्लोकः सुरक्षितः ॥ ३७८ ॥
हिरण्यधान्यरत्नानि यानानि विविधानि च।
तथाऽन्यदपि यत्किञ्चित् प्रजाभ्यः स्यात् नृपस्य तत्'॥३७९॥

अथ एवं गरुड़ः ममाकर्ण्य तद्दुःखदुःखितः कोपाविष्टश्च व्यचिन्तयत्,—'अहो! सत्यमुक्तमेतैः पक्षिभिः; तत् अद्य गत्वा तं समुद्रं शोषयामः'। एवं चिन्तयतस्तस्य विष्णुदूतः समागत्य प्राह,—'भो गरुत्मन्! भगवता नारायणेन अहं तव पार्श्वे प्रेषितः, देवकार्य्याय भगवान् अमरावत्यां यास्यतीति, तत् सत्वरम् आगम्यताम्'। तत् श्रुत्वा गरुड़ः साभिमानं प्राह,—'भो दूत! किं मया कुभृत्येन भगवान् करिष्यति? तत् गत्वा तं वद,—यदन्यो भृत्यो वाहनाय अस्मत्स्थाने क्रियताम्; मदीयो नमस्कारो वाच्यो भगवतः। उक्तञ्च,—

राजेति।—राजा अबन्धूना बन्धुराहतादा, बन्धुः मित्रस्वरूपः, साहसांकितकारित्वादिति भावः; राजा अचक्षुषाम् अन्धानां, चक्षुः नयनस्वरूपः; प्रतिपालकत्वादिति भावः; राजा सर्वेषां न्यायवर्त्तिना न्याय्यपथावलम्बिनां, न तु कुमार्गगाधामिति भावः; पिता च माता च पितोः स्वरूपः; तद्दादरणवत्त्वादिति भावः॥ ३७६॥

फलार्थीति।—फलार्थी फलम् ऐहिकं राजत्वादि, पारलौकिकञ्च स्वर्गादि, तदर्थी तत्कामी, पार्थिवः राजा, मालाकारः अङ्कुरानिव, तोयेनेति भावः, यत्नमास्थितः सयत्नः सन्, दानमानादि तोयमिव तेन, लोकान् प्रजाः, पालयेत्॥ ३७७॥

यथेति।—सूक्ष्मः अत्यल्पभाव., बीजाङ्कुरः प्रयत्नेन अभिरक्षितः सन्, यथा काले फलप्रदो भवेत्, तद्वत् तथा, सुरक्षितो लोकः, राज्ञः फलप्रदो भवतीति शेषः॥३७८॥

सम्यक् प्रजापालने यत् फलं तदाह, हिरण्येति।—हिरण्यानि स्वर्णानि, धान्यानि

यो न वेत्ति गुणान् यस्य न तं सेवेत पण्डितः ।
न हि तस्मात् फलं किञ्चित् सुकृष्टादूषरादिव' ॥ ३८० ॥

दूत आह,—'भो वैनतेय! कदाचिदपि भगवन्तं प्रति त्वया न अभिहितम् ईदृक् ; तत् कथय, किं ते भगवता अपमानस्थानं कृतम् ?' गरुड़ आह,—'भगवदाश्रयभूतेन मम्रुद्रेण अस्मदृष्टिदृष्टिभाण्डानि अपहृतानि, तत् यदि तस्य निग्रहं न करोति, तदहं भगवतो न भृत्यः, इत्येष निश्चयस्त्वया वाच्यः ; तत् द्रुततरं गत्वा भवता भगवतः समीपे वक्तव्यम्' ।

अथ दूतमुखेन प्रणयकुपितं वैनतेयं विज्ञाय भगवान् चिन्तयामास,—'अहो ! (कष्टं) स्थाने कोपो वैनतेयस्य, तत् स्वयमेव गत्वा सम्मानपुरःसरं तमानयामि । उक्तञ्च—

भक्तं प्रकृतं कुलीनञ्च न भृत्यमपमानयेत् ।
पुत्रवल्लालयेन्नित्यं य इच्छेत् श्रियमात्मनः ॥ ३८१ ॥

अन्यच्च—राजा तुष्टोऽपि भृत्यानामर्थमात्रं प्रयच्छति ।
ते तु सम्मानितास्तस्य प्राणैरप्युपकुर्वते' ॥ ३८२ ॥

रत्नानि नवरत्नानि, विविधानि यानानि वाहनानि, अश्वादीनि इत्यर्थः, तथा अन्यदपि यत्किञ्चित् वस्तु, नृपस्य, प्रयोजनीयमिति शेषः, तत् सर्वं, प्रजाभ्यः स्यात् ॥ ३७९ ॥

य इति ।—यः यस्य गुणान् न वेत्ति न जानाति, पण्डितः तम् अविदितगुणं जनं, न सेवेत ; हि यतः, सुकृष्टात् सुष्ठु कृतकर्षणात्, ऊषरात् मरुभूमेरिव, ("ऊषरौ मरुधन्वानौ" इत्यमरः) तस्मात् जनात्, सुसेवितादपीति भावः ; किञ्चिदपि फलं न, भवतीति शेषः ॥ ३८० ॥

(कष्टं) स्थाने—युक्तं इत्यर्थः, [अव्ययमेतत् "युक्ते हे साम्प्रतं स्थाने" इत्यमरः] ।

भक्तमिति ।—यः प्रभुः, आत्मनः श्रियम् इच्छेत्, स भक्तम् अनुरक्तं, प्रकृतं समर्थं, कुलीनं सत्कुलप्रसूतञ्च, अभिजातमिति यावत्, भृत्यं सेवकं, न अपमानयेत् नावज्ञानीयात्, प्रत्युत नित्यं पुत्रवत् पुत्रमिव, लालयेत् प्रतिपालयेत् ॥ ३८१ ॥

राजेति ।—राजा तुष्टोऽपि भृत्यानाम् [अत्र सम्प्रदानत्वेऽपि सम्बन्धविवक्षया षष्ठी] अर्थमात्रम् अर्थमेव, प्रयच्छति पुरस्करोति, ते भृत्याः, तु सम्मानिताः सन्तः,

इत्येवं सम्प्रधार्य्य (ज) रुक्मपुरे वैनतेयसकाशं सत्वरमगमत्। वैनतेयोऽपि गृहागतं भगवन्तमवलोक्य (झ) त्रपाऽधोमुखः प्रणम्योवाच,—'भगवन्! त्वदाश्रयोन्मत्तेन समुद्रेण मम भृत्यस्य अण्डानि अपहृत्य ममापमानं विहितम्; परं भगवल्लज्जया मया विलम्बितं, नो चेत् एनमहं स्वलान्तम् अद्यैव नयामि, यतः स्वामिभयात् शुनोऽपि प्रहारो न दीयते।

उक्तञ्च,—येन स्वाल्पवृता वाऽथ पीडा चित्ते प्रभोः क्वचित्।
प्राणात्ययेऽपि तत् कर्म न कुर्य्यात् कुलसेवकः' ॥३८३॥

तच्छ्रुत्वा भगवान् आह,—"भो वैनतेय! सत्यमभिहितं भवता। उक्तञ्च,—

भृत्यापराधजो दण्डः स्वामिनो जायते यतः।
तेन लज्जाऽपि तस्योत्था न भृत्यस्य तथा पुनः॥ ३८४॥

तदागच्छ, येन अण्डानि समुद्रात् आदाय टिट्टिभं सभार्यावयावः, अमरावतीञ्च गच्छावः।

तथाऽनुष्ठिते समुद्रो भगवता निर्भर्त्स्य आग्नेयं शरं सन्धाय

प्राणैरपि तस्य राज्ञः, उपकुर्वते उपकारं कुर्वन्ति। [तस्य इति करोतेः कर्मणि "कृञः प्रतियत्ने" (२।३।५१ पा०) इति सूत्रेण शेषत्वलक्षणा षष्ठी] ॥ ३८२॥

(ज) रुक्मपुरं—तदाख्ये गरुडनगरे।

(झ) त्रपाऽधोमुखः,—लज्जाऽवनतमुखः। भगवल्लज्जया—भगवदाश्रयोऽसाविति, तदपमानेन भगवतो लज्जा स्यादिति भयेनेत्यर्थः। स्वलान्तं—स्खलनाभावशेषम्। शुनः,—कुक्कुरस्य, प्रभोरिति शेषः।

येनेति।—येन कार्य्येण, प्रभोः लघुता क्वचता, अवमाननमिति भावः, अथवा चित्ते पीडा सन्तापः, स्यात्, कुलसेवकः कुलीनः, भृत्यः इति शेषः, प्राणात्ययेऽपि क्वचित् कदाऽपि, तत् कर्म न कुर्य्यात् ॥ ३८३॥

भृत्येति।—यतः यस्मात् कारणात्, भृत्यापराधजः भृत्यदोषजनितः, दण्डः, अन्यैः कृत इति भावः, स्वामिनः एव जायते भवति, तेन लज्जाऽपि, दण्डजनितात भावः, तस्य स्वामिनः एव, उत्था उत्पन्ना, भवति, भृत्यस्य पुनर्न तथा, लज्जात शेषः ॥३८४॥

अभिहितः,—'भो दुरात्मन्! दीयन्तां टिट्टिभाण्डानि, नो चेत् स्थलतां त्वां नयामि'। ततः समुद्रेण सभयेन टिट्टिभाण्डानि तानि प्रदत्तानि, टिट्टिभेनापि भार्य्यायै समर्पितानि। अतोऽहं ब्रवीमि,—'शक्तोर्विक्रममज्ञात्वा' इति। तस्मात् पुरुषेण उद्यमो न त्याज्यः"।

तदाकर्ण्य सञ्जीवकस्तमेव भूयोऽपि पप्रच्छ,—"भो मित्र! कथं श्रेयो मया अमौ दुष्टबुद्धिरिति? इयन्तं कालं यावदुत्तरोत्तरस्नेहेन प्रसादेन च अहं दृष्टः, न कदाचित् तद्विकृतिर्दृष्टा; तत् कथ्यतां, येनाहम् आत्मरक्षार्थं तद्विधाय उद्यमं करोमि"।

दमनक आह,—"भद्र! किमत्र श्रेयम्? एष ते (अ) प्रत्ययः, यदि रक्तनेत्रस्त्रिशिखां भ्रुकुटिं दधानः सक्रूणो परिलेलिहत् त्वां दृष्ट्वा भवति, तद्दुष्टबुद्धिः, अन्यथा सुप्रमादश्चेति। तदाज्ञापय मां, स्वाश्रयं प्रति गच्छामि। त्वया च यथा मन्त्रभेदो न भवति, तथा कार्य्यम्; यदि निशामुखं प्राप्य गन्तुं शक्नोषि, तद्देशत्यागः कार्य्यः। यतः,—

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥ ३८५॥

(अ) प्रत्ययः,—ज्ञानहेतुरित्यर्थः। सक्रूणो परिलेलिहत्—ओष्ठप्रान्तद्वयं जिह्वया मार्जयन्, [परिलेलिहत इति परिपूर्वस्य लिहधातोः यङि शतृप्रत्यये "नाभ्यस्ताच्छतुः" (७।१।७८ पा०) इत्यनेन शतुर्नुम् निषेधः]। त्वां दृष्ट्वा रक्तनेत्रादिभवतोऽन्वयः। सुप्रमादः,—सुष्ठु प्रमादसम्पन्नः इत्यर्थः।

त्यजेदिति।—कुलस्य अर्थे वंशरक्षार्थमित्यर्थः, एकं त्यजेत्, यदि एकस्य स्वजनस्य त्यागे वंशरक्षा स्यात्, तदा स कार्य्य इति भावः; ग्रामस्यार्थे ग्रामवासिनां रक्षार्थमित्यर्थः, कुलं वंशं, त्यजेत्, यदि वंशत्यागे ग्रामस्था सर्वेषां रक्षा स्यात्, तदा तस्यापि त्यागः कार्य्य इति भावः; जनपदस्यार्थे देशवासिनां रक्षार्थमित्यर्थः, ग्रामं ग्रामान्, त्यजेत्, यदि ग्रामाणां त्यागे देशवासिनां रक्षा स्यात्, तदा स कार्य्य इति भावः; आत्मार्थे स्वरक्षार्थं, पृथिवीं त्यजेत्, पृथिवीस्थानां सर्वेषां त्यागेऽपि यदि आत्मरक्षा स्यात् तदा तदपि कार्य्यमिति भावः॥ ३८५॥

आपदर्थं धनं रक्षेत् दारान् रक्षेत् धनैरपि।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि ॥ ३८६ ॥

बलवता (ट) अभिभूतस्य विदेशगमनं तदनुप्रवेशो वा नीतिः, तत् देशत्यागः कार्यः; अथवा आत्मा सामादिभिरुपायैः अभिरक्षणीयः। उक्तञ्च,—

अपि पुत्रकलत्रैर्वा प्राणान् रक्षेच्च पण्डितः।
विद्यमानैर्यतस्तैः स्यात् सर्वं भूयोऽपि देहिनाम् ॥३८७॥

तथा च,—येन केनाप्युपायेन शुभेनाप्यशुभेन वा।
उद्धरेदीनमात्मानं समर्थो धर्ममाचरेत् ॥ ३८८ ॥
यो मायां कुरुते मूढः प्राणत्यागे धनादिषु।
तस्य प्राणाः प्रणश्यन्ति तैर्नष्टैर्नष्टमेव तत्" ॥ ३८९ ॥

आपदर्थं इति।—आपदर्थं विपन्निवारणार्थं, धनं रक्षेत्, धनैरपि दारान् स्त्रियः, रक्षेत्, दारैरपि धनैरपि आत्मानं सततं रक्षेत्; दारादित्यागेनाप्यात्मा रक्ष्य इति भावः ॥ ३८६ ॥

(ट) अभिभूतस्य—आक्रान्तस्य। तदनुप्रवेशः,—तस्य बलवतः आश्रयणम्। तत्—तस्मात् हेतोः। सामादिभिः,—सामदानभेददण्डरूपैरित्यर्थः; तत्र साम—सन्धिः, दानं—भूहिरण्यादिसमर्पणं, भेदः,—उपजापः, अनृता सह तदमात्य-मिथाटैर्मनोभङ्गकरणमित्यर्थः, सर्वाभावे दण्डः,—युद्धम्।

अपीति।—पण्डितो जनः, पुत्रकलत्रैरपि वा प्राणान् रक्षेत् च, यतः तैः प्राणैः, विद्यमानैः तिष्ठद्भिः सद्भिः, भूयोऽपि पुनरपि, देहिनां सर्वे पुत्रकलत्रादिकमित्यर्थः, स्यात्, आत्ममूलत्वात् सर्वेषामिति भावः ॥ ३८७ ॥

येनेति।—शुभेन अपि वा अशुभेन येन केनापि उपायेन दीनं विपन्नम्, आत्मानम् उद्धरेत् रक्षेत्; समर्थः शक्तिमान् सन्, धर्ममाचरेत् अनुतिष्ठेत्; विपन्नस्य धर्मानु-ष्ठानासम्भवादिति भावः ॥३८८॥

य इति।—यः मूढः प्राणत्यागे प्राणविनाशसम्भवे इत्यर्थः, धनादिषु मायां ममतां, कुरुते, तस्य प्राणाः प्रणश्यन्ति; प्राणरक्षार्थं धनव्ययादिषु कुण्ठितत्वादिति भावः, नष्टैः तैः प्राणैः करणैः, तत् सर्वं धनादिकं, नष्टमेव, भोक्तृरभावात् इति भावः, भवतीति शेषः; "सत्यर्थो जीवनावधि" इत्युक्तेरिति बोध्यम् ॥ ३८९॥

एवमभिधाय दमनकः करटकसकाशमगमत्। करटकोऽपि तमायान्तं दृष्ट्वा प्रोवाच,—"भद्र! किं कृतं तत्र भवता?" दमनक आह,—"मया (ठ) यावत् नीतिबीजनिर्वपणं कृतं, परतो दैवविहितायत्तम्। उक्तञ्च यतः,—

पराङ्मुखेऽपि दैवेऽत्र कृत्यं कार्य्यं विपश्चिता।
आत्मदोषविनाशाय स्वचित्तस्तम्भनाय च ॥ ३९० ॥

तथा च,—उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवं हि दैवमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः" ॥३९१॥

करटक आह—"तत् कथय कीदृक् त्वया नीतिबीजं निर्वापितम्?"। सोऽब्रवीत्,—"मया अन्योऽन्यं (ड) ताभ्यां मिथ्याप्रजल्पनेन भेदः तथा विहितः, यथा भूयोऽपि मन्त्रयन्तौ एकस्थानस्थितौ न द्रक्ष्यसि"। करटक आह,—"अहो! न युक्तं

(ठ) यावत्—साकल्येन। नीतिबीजनिर्वपणं—नीतयः बीजानीव, तेषां निर्वपणं—सम्यक् रोपणम्। परतः,—इतःपरं, भाविन्यादित्यर्थः। दैवेति।—दैवेन यत् विहितं—निर्दिष्टं, तस्य आयत्तम्—अधीनम्; अतः परं यत् तत् दैवाधीनमिति भावः।

पराङ्मुखे इति।—अत्र चारं, दैवे पराङ्मुखे प्रतिकूलेऽपि, विपश्चिता विदुषा, आत्मदोषविनाशाय स्वदोषनाशनाय, स्वस्य चित्तस्य स्तम्भनाय धैर्य्याय च, प्रबोधदानायेत्यर्थः, कृत्यं पुरुषकारः, कार्य्यं, यतः कर्त्तव्य इत्यर्थः; दैवापहतस्य सर्वत्र विफलायामपि चेष्टायां यत्नाकरणे परतः आत्मग्लानिः स्यात्, अतः सर्वथैव कार्य्यमिति भावः॥३९०॥

उद्योगिनमिति:—लक्ष्मीः उद्योगिनं पुरुषसिंहम् उपैति प्राप्नोति; कापुरुषाः दैवं दैवम् इति वदन्ति हि, अतः दैवं निहत्य अगणयित्वा, आत्मशक्त्या स्वसामर्थ्येन, पौरुषं पुरुषकारं, कुरु, यत्ने कृते सति यदि न सिध्यति, कार्य्यमिति शेषः, तदा अत्र एतस्मिन् प्रयत्ने, को दोषः काऽपि अनुचिता वृत्तिः, अकीर्तिरिति शेषः; योग्यपौरुषप्रयोगे तु कार्य्यसिद्धिः सुनिश्चितेति भावः। वसन्ततिलकं वृत्तम्॥ ३९१॥

(ड) ताभ्यां, सह इति शेषः, मिथ्याप्रजल्पनेन—मृषावचनेन। भेदः,—मनोभङ्गः।

भवता विहितं, यत् परस्परं तौ स्नेहार्द्रहृदयौ सुखाम्बुधौ क्षीरसागरे प्रविष्टौ। उक्तञ्च,—

अविरुद्धं सुखस्थं यो दुःखमार्गे नियोजयेत्।
जन्मजन्मान्तरे दुःखी स नरः स्यादसंशयम् ॥ ३८२॥

अपरं, त्वं यन्नेदमात्रेणापि तुष्टः, तदपि अयुक्तं,यतः सर्वोऽपि जनः (ढ) विरूपकरणे समर्थो भवति, नोपकर्त्तुम्। उक्तञ्च,—

घातयितुमेव नीचः परकार्य्यं वेत्ति न प्रसाधयितुम्।
पातयितुमस्ति शक्तिर्वायोर्वृक्षं न चोन्नमयितुम्" ॥३८३॥

दमनक आह,—"अनभिज्ञो भवान् नीतिशास्त्रस्य, तेन एतत् ब्रवीषि। उक्तञ्च यतः,—

जातमात्रं न यः शत्रुं व्याधिञ्च प्रशमं नयेत्।
महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते ॥ ३८४ ॥

तच्छत्रुभूतोऽयमस्माकं मन्त्रिपदापहरणात्। उक्तञ्च,—

पिट्टपैतामहं स्थानं यो यस्यात्र जिगीषते।
स तस्य सहजः शत्रुरुच्छेद्योऽपि प्रियै स्थितः ॥ ३८५ ॥

अविरुद्धमिति।—यः अविरुद्धम् अविरोधिनं, सुखस्थं सुखिनं जनं, दुःखमार्गे क्लेशवर्त्मनि, नियोजयेत् पातयेत्, स नरः, जन्मजन्मान्तरे प्रतिजन्म इत्यर्थः, असंशयं दुःखी स्यात्; परापकृतेः स्वापक्षतिफलकत्वादिति भावः ॥ ३८२॥

(ढ) विरूपकरणे—विरुद्धाचरणे विरोधोत्पादने वा।

घातयितुमिति।—नीचः जनः, परकार्य्यं घातयितुं नाशयितुमेव, वेत्ति जानाति,न प्रसाधयितुं सम्पादयितुम्; वृक्षं पातयितुं वायोः शक्तिरस्ति,उन्नमयितुम उत्तोलयितुं,च न; वायुर्यथा तरुपातने क्षमः तदुत्तोलने तु सर्वथा असमर्थः, तथा नीचोऽपि परापकारे क्षमः,न तु तेषां कार्य्यसाधने इति भावः। दृष्टान्तालङ्कारः। आर्य्या छन्दः ॥३८३॥

जातमात्रमिति।—यः शत्रुं व्याधिञ्च जातमात्रं उत्पन्नमात्रं,न प्रशमं नयेत् नोपशमयेदित्यर्थः, स महाबलोऽपि तेनैव शत्रुणा व्याधिना वा कर्त्रा, वृद्धिं प्राप्य हन्यते विनाश्यते; अतः शत्रुः सर्वात्मना समूलघातं हन्तव्य इति भावः ॥ ३८४ ॥

पिट्टेति।—अत्र संसारे, यः यस्य पिट्टपैतामहं स्थानं पदं, जिगीषते [बलात्ने

तत् मया स उदासीनतया समानीतोऽभयप्रदानेन यावत्, तावदहमपि तेन (ष) साचिव्यात् प्रच्यावितः। अथवा साधु इदमुच्यते,—

दद्यात् साधुर्यदि निजपदे दुर्जनाय प्रवेशं
तन्नाशाय प्रभवति ततो वाञ्छमानः स्वयं सः।
तस्माद्देयो विपुलमतिभिर्नावकाशोऽधमानां
जारोऽपि स्यात् गृहपतिरिति श्रूयते वाक्यतोऽत्र ॥३९६॥

तेन मया तस्योपरि बधोपाय एष विरच्यते ; देशत्यागाय वा भविष्यति उपाय एषः। तच्च त्वां मुक्त्वा अन्यो न ज्ञास्यति, तत् युक्तम् एतत् स्वार्थायानुष्ठितम्। उक्तञ्च यतः,—

निस्त्रिंशं हृदयं कृत्वा वाणीं क्षुरसमोपमाम्।
विकल्पोऽत्र न कर्त्तव्यो हन्यात् तत्रापकारिणम् ॥३९७॥

अपरं, मृतोऽपि अस्माकं भोज्यो भविष्यति, तदेकं तावत् (त) वैरसाधनम्, अपरं साचिव्यञ्च भविष्यति तृप्तिश्चेति। तत्

यदं सत्यम्] जेतुमिच्छति, जिघृक्षति इत्यर्थः. स तस्य सहज. स्वाभाविकः, अतः, अत प्रियं प्रियकार्यं, स्थितोऽपि उच्छेद्यः विनाश्यः, सः इति शेषः ॥ ३९५ ॥

(ष) साचिव्यात्—मन्त्रिपदात्। प्रच्यावितः,—प्रभ्रंशितः।

दद्यादिति।—साधुर्जनः, यदि दुर्जनाय निजपदे प्रवेशं दद्यात्, ततस्तदा, स स्वयं तस्य साधोः, नाशाय वाञ्छमानः सन्, [अत्र परस्मैपदिनोऽपि धातोः ज्ञानेच्छार्थयोः विवक्षावशादेव] प्रभवति प्रभुर्भवतीत्यर्थः, तस्मात् विपुलमतिभिः सुधीभिः, अधमानां दुर्जनानां, [सम्बन्धे षष्ठी] अवकाशः न देयः ; अत्र संसारे, जारोऽपि उपपतिरपि, गृहपतिः स्यात्, शिष्टपादप्रसारन्यायेन इति भावः, इति वाक्यतः श्रूयते, अतः पूर्वमेव सावधानेन भवितव्यम् इति भावः। सन्दाक्रान्ता छन्दः ॥ ३९६ ॥

निस्त्रिंशमिति।—हृदयं निस्त्रिंशम् असिम्, असिसमनित्यर्थः, वाणीं क्षुरसमोपमां क्षुरसदृशीं, कृत्वा तत्र अपकारिणं हन्यात्, अत्र विकल्पः सन्देहः, न कर्त्तव्यः ॥३९७॥

(त) वैरसाधनं—वैरस्य—विद्वेषस्य, साधनं—सम्पादनं, अतः निर्यातन-मित्यर्थः। साचिव्यं—मन्त्रिपदम्। तृप्तिः,—भोजनजन्यपरितोषः।

(थ) गुणत्रयेऽस्मिन् उपस्थिते कस्मात्मां दूषयसि त्वं जाड्यभावात्? उक्तञ्च,—

परस्य पीडनं कुर्वन् स्वार्थसिद्धिञ्च पण्डितः।
मूढबुद्धिर्न भक्षेच्च वने चतुरको यथा" ॥ ३८८ ॥

करटक आह,—"कथमेतत्?" स आह,—

कथा १६।

"अस्ति कस्मिंश्चिद्वनोद्देशे वज्रदंष्ट्रो नाम सिंहः। तस्य चतुरक-क्रव्यमुखनामानौ (द) शृगालकौ भृत्यभूतौ सदैवानुगतौ तत्रैव वने प्रतिवसतः। अथ अन्यदिने सिंहेन कदाचित् आसन्नप्रसवा प्रसववेदनया स्वयूथात् भ्रष्टा उष्ट्री उपविष्टा कस्मिंश्चित् वनगहने समासादिता। अथ तां व्यापाद्य यावदुदरं (ध) स्फोटयति, तावज्जीवल्लघुदासेरकशिशुर्निष्क्रान्तः; सिंहोऽपि दासेरक्याः पिशितेन सपरिवारः परां तृप्तिमुपागतः; पर स्नेहात् बालदासेरकं त्यक्तं गृह्यमानोयं इदमुवाच,—'भद्र! तेऽस्ति मत्तोभयं मत्तो न, अन्यस्मादपि; ततः स्वेच्छया अत्र वने भ्राम्यताम्; यतस्ते शृङ्गसदृशौ कर्णौ, ततः 'शङ्कुकर्णः' नाम भविष्यति' इति।

(थ) गुणत्रये—वैरसाधनसाचिव्यलक्षणरूपे इत्यर्थः। जाड्यभावात्—मौर्ख्यात्। परस्येति।—पण्डितो जनः, वने चतुरको यथा चतुरकाख्यः शृगाल इव, परस्य अरेः, पीडनं स्वार्थासद्धिञ्च कुर्वन् भक्षेत् भुञ्जीत, न च मूढबुद्धिः, तथा भक्षेदिति शेषः; मूर्खस्तु भक्षयितुं न शक्नुयादिति भावः। [चौरादिकस्यापि भक्षधातोः केषाञ्चिन्मते भ्वादिकेष्वपि पाठदर्शनात् भक्षेदिति सिद्धम्] ॥ ३८८ ॥

(द) शृगालकौ—जम्बुक-कुक्कुराकारव्याघ्रभेदौ। [पूर्वनिपातस्य विकल्पितत्वात् द्वकस्य परतः सन्निवेशः]।

(ध) स्फोटयति—विदारयति। जीवादिति।—जीवन् लघुः,—क्षुद्रकायः, दासेरकशिशुः,—करभशावकः, उष्ट्रशावक इत्यर्थः, ("दासेरकस्तु करभे दासीपुत्रे च धोवरे" इति मेदनी)। दासेरक्याः,—उष्ट्र्याः। पिशितेन—मांसेन। त्यक्तं—तन्मांसभक्षणरूपापत्यव्यवहारात् अभय दत्त्वा मुक्तमित्यर्थः। मत्तो न, अन्यस्मा-

(न) एवमनुष्ठिते चत्वारोऽपि ते एकस्थाने विहारिणः परस्परमनेकप्रकारगोष्ठीसुखमनुभवन्तस्तिष्ठन्ति। शङ्कुकर्णोऽपि यौवनपदवीम् आरूढः सत्त्वमपि न तं सिंहं मुञ्चति। अथ कदाचित् वज्रदंष्ट्रस्य केनचित् वन्येन मत्तगजेन सह युद्धम् अभवत्, तेन मदवीर्यात् स दन्तप्रहारैस्तथा क्षतशरीरो विहितः, यथा प्रचलितुं न शक्नोति। तदा (प) क्षुत्क्षामकण्ठः तान् प्रोवाच,—'भोः! अन्विष्यतां किञ्चित् सत्त्वं, येन अहमेवं स्थितोऽपि तं व्यापाद्य आत्मनो युष्माकञ्च क्षुत्प्रणाशं करोमि'। तत् श्रुत्वा ते त्रयोऽपि वने सन्ध्याकालं यावत् भ्रान्ताः, परं न किञ्चित् सत्त्वमासादितम्। अथ चतुरकः चिन्तयामास,—'यदि शङ्कुकर्णोऽयं व्यापाद्यते, ततः सर्वेषां कतिचिद्दिनानि तृप्तिर्भवति, परं नैनं स्वामी मित्रत्वात् आश्रयमाश्रितत्वाच्च विनाशयिष्यति; अथवा बुद्धिप्रभावेण स्वामिनं प्रतिबोध्य तथा करिष्ये, यथा व्यापादयिष्यति। उक्तञ्च,—अवध्यं चाथवाऽगम्यमकृत्यं नास्ति किञ्चन।

लोके बुद्धिमता बुद्धेस्तस्मात् तां विनियोजयेत् ॥३९९॥

एवं विचिन्त्य शङ्कुकर्णमिदमाह,—'भोः शङ्कुकर्ण! स्वामी तावत् पथ्यं विना क्षुधया परिपीड्यते, स्वाम्यभावात् अस्माकम् अपि ध्रुवं विनाश एव; ततो वाक्यं किञ्चित् स्वाम्यर्थं वदिष्यामि, तत् श्रूयताम्'। शङ्कुकर्ण आह,—'भाः! शीघ्रं निवेद्यतां,

---

क्षाप न द्वात मन्यस्व:। स्वाम्यता—स्वचरतु, [श्रमादित्वात् दीर्घः]। शङ्कुसङ्गो—कीलोपनी।

(न) एवमनुष्ठिते—एवं दत्ताभये इत्यर्थः। गोष्ठीसुखं—संलापसुखं, ("गोष्ठी सभासंलापयोः स्त्रियाम्" इति मेदिनी)।

(प) क्षुत्क्षामकण्ठः,—क्षुधाक्षीणकण्ठस्वर इत्यर्थः [क्षैधातोः क्तः]।

अवध्यमिति।—लोके जगति, किञ्चन वस्तु, बुद्धिमतां बुद्धेः अवध्यम् अविनाश्यम्, अथवा अगम्यम् अविषयम्, अकृत्यञ्च अकर्त्तव्यं वा, नास्ति, तस्मात् तां बुद्धिं, विनियोजयेत् विशेषेण स्वव्यापारे नियुक्तां कुर्यात् इत्यर्थः॥ ३९९॥

येन ते वचनं शीघ्रं (क) निर्विघ्नं करोमि; अपरं स्वामिनो हिते हते मया सुकृतशतं हतं भविष्यति'। अथ चतुरक आह,—'भो भद्र! आत्मशरीरं द्विगुणलाभेन स्वामिने प्रयच्छ, येन ते द्विगुणं शरीरं भवति, स्वामिनः पुनः प्राणयात्रा भवति'। तदाकर्ण्य शङ्कुकर्णः प्राह,—'भद्र! यदि एवं, तन्मदीयप्रयोजनमेतत्; उच्यतां 'स्वाम्यर्थः क्रियताम्' इति, परम् (ब) अत्र धर्मः प्रतिभूः' इति विचिन्त्य ते सर्वे सिंहसकाशम् आजग्मुः। ततः चतुरकः आह,—'देव! न किञ्चित् सत्त्वं प्राप्तम्; भगवान् आदित्योऽपि अस्तङ्गतः; तत् यदि स्वामी द्विगुणं शरीरं प्रयच्छति, ततः शङ्कुकर्णोऽयं द्विगुणहृष्टया स्वशरीरं प्रयच्छति (भ) धर्मप्रतिभुवा'। सिंह आह,—'भोः! यद्येवं, तत् सुन्दरतरं, व्यवहारस्य अस्य धर्मः प्रतिभूः क्रियताम्' इति।

अथ सिंहवचनानन्तरं वृकमृगालाभ्यां विदारितोभयकुक्षिः शङ्कुकर्णः पञ्चत्वमुपागतः। अथ वज्रदंष्ट्रः चतुरकम् आह,—'भोः चतुरक! यावदहं नदीं गत्वा स्नानं देवताऽर्चनविधिं कृत्वा आगच्छामि, तावत् त्वया अत्र (म) अप्रमत्तेन भाव्यम्' इत्युक्त्वा नद्यां गतः। अथ तस्मिन् गते चतुरकः चिन्तयामास,—'कथं मम एकाकिनो भोज्योऽयमुष्ट्रो भविष्यति?' इति विचिन्त्य क्रव्यमुखमाह,—'भोः क्रव्यमुख! क्षुधालुर्भवान्; तत् यावदसौ स्वामी न आगच्छति, तावत् त्वमस्य उष्ट्रस्य मांसं भक्षय; अहं त्वां स्वामिनो निर्दोषं प्रतिपादयिष्यामि'। सोऽपि तत् श्रुत्वा यावत् किञ्चिन्मांसम्

(क) निर्विघ्नं—निःसन्देहम्। सुकृतशतं—पुण्यशतम्।

(ब) अत्र—द्विगुणलाभविषये। प्रतिभूः,—प्रत्ययहेतुः, जामनः वा, ("स्युर्जामनाः प्रतिभुवः" इत्यमरः)"स्वामिन" इति षष्ठ्यन्ता। विचिन्त्य—परस्परमालोच्य इत्यर्थः।

(भ) धर्मप्रतिभुवा—धर्मजामनेन, धर्मे साक्षिणं कृत्वेत्यर्थः। व्यवहारस्य—कर्मणः।

(म) अप्रमत्तेन—अवहितेन।

आस्वादयति, तावत् चतुरकेणोक्तं,—'भोः क्रव्यमुख! समागच्छति स्वामी, तत् त्यक्त्वा एनं दूरे तिष्ठ, येनास्य भक्षणं न (य) विकल्पयति'। तथाऽनुष्ठिते सिंहः समायातो यावदुष्ट्रं पश्यति, तावत् (र) रिक्तीकृतहृदयो दासेरकः। ततो भ्रुकुटिं कृत्वा(ल)परुषतरमाह,—'अहो! केनैष उष्ट्रः उच्छिष्टतां नीतः? येन तमपि व्यापादयामि'। एवमभिहिते (व) क्रव्यमुखः चतुरकमुखं तथा अवलोकयति किल,यथा,'तद्दद किञ्चित्,येन मम शान्तिर्भवति' इति प्रतीयते। अथ चतुरको विहस्योवाच,—'भोः! माम् (श)अनादृत्य पिशितं भक्षयित्वा अधुना मन्मुखमवलोकयसि? तत् आस्वादय अस्य दुर्नयतरोः फलम्' इति। तदाकर्ण्य क्रव्यमुखः (ष) जीवननाशभयात् दूरदेशं गतः। एतस्मिन् अन्तरे तेन मार्गेण (स) दासेरकसार्थो भाराक्रान्तः समायातः। (ह) तस्याग्रसरोष्ट्रस्य कण्ठे महती घण्टा बद्धा। तस्याः शब्दं दूरतोऽपि आकर्ण्य सिंहो जम्बूकमाह,—'भद्र! श्रूयतां किमेषः (क्ष) रौद्रः शब्दः श्रूयतेऽश्रुतपूर्वः'। तच्छ्रुत्वा चतुरकः किञ्चित्

(य) विकल्पयति—सन्देन्धि, स्वामीति शेषः, त्वयि अत्र स्थिते स्वामी सन्देहं करिष्यतीति भावः।

(र) रिक्तीकृतहृदयः,—भक्षिततया शून्यीकृतोरःस्थलः, हर्षेणेति भावः।

(ल) परुषतरम्—अतिनिष्ठुरम्। येन—उच्छिष्टीकरणेनेत्यर्थः।

(व) क्रव्यमुखः,—तदाख्यः शृगालः। चतुरकमुखं—चतुरकस्य—तदाख्यस्य शृगालस्य मुखम्। अवलोकयति किल—किलेत्यनुनयार्थमव्ययम; सानुनयं पश्यतीत्यर्थः, ("किलशब्दस्तु वार्त्तायां सम्भाव्यानुनयार्थयोः" इति मेदिनी)। तत—तथेत्यर्थः।

(श) अनादृत्य—अगणयित्वा। पिशितं—मांसम। दुर्नयतरोः,—अविनयहेतुस्य।

(ष) जीवननाशभयात्—मरणभङ्गया। दूरदेशं गतः,—पलायित इत्यर्थः।

(स) दासेरकसार्थः,—उष्ट्रयूथम्। भाराक्रान्तः,—भारवहनेनातिश्रान्तः इत्यर्थः।

(ह) तस्येति।—तस्य—उष्ट्रसार्थस्य, अग्रसरः,—अग्रवर्त्ती, यः उष्ट्रः तस्य।

(क्ष) रौद्रः,—भयङ्करः। अश्रुतपूर्वः,—पूर्वं कदाऽप्यनाकर्णितः।

(क) वनान्तरं गत्वा सत्वरमभ्युपेत्य प्रोवाच,—'स्वामिन्! गम्यतां गम्यतां, यदि शक्नोषि गन्तुम्'। सोऽब्रवीत्,—'भद्र! किमेवं मां (ख) व्याकुलयसि? तत् कथय, किमेतत्?' इति। चतुरक आह,—'स्वामिन्! एषः (ग) धर्मराजः तवोपरि कुपितः, यदनेन अकाले दासेरकोऽयं मदीयो व्यापादितः, तत् सहस्रगुणमुष्ट्रमस्य सकाशात् ग्रहीष्यामीति निश्चित्य बृहन्मानम् आदाय अग्रेसरस्य उष्ट्रस्य ग्रीवायां घण्टां बद्ध्वा व्यापन्नदासेरकसन्तान् अपि पितृपितामहान् आदाय वैरनिर्यातनार्थमायात एव'। सिंहोऽपि तत् श्रुत्वा (घ) सर्वतो दूरादेव अवलोक्य मृतमुष्ट्रं परित्यज्य प्राणभयात् प्रनष्टः। चतुरकोऽपि शनैः शनैः तस्य उष्ट्रस्य मांसं भक्षयामास। अतोऽहं ब्रवीमि,—'परस्य पीडनं कुर्वन्' इति"।

अथ दमनके गते सञ्जीवकश्चिन्तयामास,—"अहो! किमेतन्मया कृतं, यत् (ङ) अभ्यादोऽपि मांसाशिनस्तस्यानुगः संवृत्तः!! अथवा साधु इदमुच्यते,—

अगम्यान् यः पुमान् याति असेव्यांश्च निषेवते।
स मृत्युमुपगच्छति गर्भमश्वतरी यथा ॥ ४०० ॥

(क) वनान्तरम्—अन्यत् वनम् [नित्यसमासः]। गम्यता—पलाय्यतामित्यर्थः।

(ख) व्याकुलयसि—व्याकुलं करोषि, उद्वेजयसि इत्यर्थः।

(ग) धर्मराजः,—यमः, धर्मदेवो वा। अनेन—सिंहेन, त्वयेत्यर्थः। बृहन्मानं—महापरिमाणं, बहूनुष्ट्रानित्यर्थः। व्यापन्नदासेरकसन्तान्—विनाशितोष्ट्रसन्बन्धिनः इत्यर्थः।

(घ) सर्वतः,—समन्तात्। प्रनष्टः,—पलायितः, अन्तर्हित इत्यर्थः।

(ङ) अभ्यादः,—दृष्टभोजी, [क्विपो वैकल्पात् अप्]। मांसेति।—मांसाशिनः,—मांसभोजिनः। तस्य—पिङ्गलकस्य। अनुगः,—अनुचरः, संवृत्तः, अभूदिति शेषः।

अगम्यानिति।—यः पुमान् अगम्यान् गमनायोग्यान्, याति गच्छति, असेव्यांश्च सेवानर्हांश्च, निषेवते भजते, अश्वतरी गर्भं यथा मृत्वे गच्छतीति भावः, तथा स मृत्युम् उपगच्छति प्राप्नोति; अकार्यकारिणो मरणमवश्यम्भावीति भावः॥ ४०० ॥

तत् किं करोमि ? क्व गच्छामि ? कथं मे शान्तिर्भविष्यति ? अथवा तमेव पिङ्गलकं गच्छामि, कदाचित् मां शरणागतं रक्षति, प्राणैर्न वियोजयति । यत उक्तञ्च,—

धर्मार्थं यततामपीह विपदो दैवात् यदि स्युः क्वचित्
तत्तामामुपशान्तये सुमतिभिः कार्य्यो विशेषादरः ।
लोके ख्यातिमुपागतास्त्र सकले लोकोक्तिरेषा यतो
दग्धानां किल वह्निना हितकरः स्वेदोऽपि तत्सम्भवः ॥४०१॥

तथा च,—लोकेऽथवा तनुभृतां निजकर्मपाकं
नित्यं ममाश्रितवतां विहितक्रियाणाम् ।
भावार्जितं शुभमथाप्यशुभं निकामं
यद्भावि तद्भवति नात्र विचारहेतुः ॥ ४०२ ॥

धर्मार्थमिति ।—इह जगति, धर्मार्थं धर्मनिमित्तं, यतता चेष्टमानानां, [यतधातोरात्मनेपदित्वात् प्रकृतप्रत्ययो ह्यः] यदि क्वचित् दैवात् विपदः आपि स्युः भवेयुः, तत् तदा, तासां विपदाम्, उपशान्तये प्रशमनाय, सुमतिभिः सुबुद्धिभिः, पुरुषैरिति शेषः, विशेषात् नयः न्यायाचरणमित्यर्थः, कार्य्यः विधेयः ; धार्मिकाणां विपदि आतायामपि न खलु अधर्मलेशः सेवनीय इति भावः ; यतः अत्र सकले सर्वस्मिन्, लोके जगति, एषा लोकोक्तिः जनश्रुतिः, ख्यातिमुपागता प्रसिद्धिं गता इत्यर्थः, यत् वह्निना अग्निना, दग्धानाम्, अङ्गानामिति शेषः, तस्मात् वह्नेः, सम्भवः जातः, स्वेदोऽपि तापोऽपि, हितकरः उपकारी, किलेति वार्तायाम् ; वह्निना दग्धदेहे यथा तापः हितकरः, तथा प्राणविपत्तिसम्भावनाया येन तद्विपत्सम्भावना, तदाश्रयणमेव श्रेयः ; "विषस्य विषमौषधम्" इति न्यायादिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥४०१॥

लोके इति ।—अथवा लोके जगति, नित्यं सततमेव, निजकर्मपाकं स्वकर्मजनितां परिणतिमित्यर्थः, ममाश्रितवतां उपभुञ्जतां, विहितक्रियाणां विहिता अनुष्ठिता, क्रिया शुभाशुभं कर्म इत्यर्थः, यैः तथोक्तानाम्, इह जन्मनि पूर्वजन्मनि वा इति भावः, तनुभृतां प्राणिनां, भावार्जितं स्वकर्मोपार्जितं, शुभम् अथापि अथवा, अशुभं यत् निकामम् अत्यर्थं, भावि अवश्यम्भावि इत्यर्थः, तत् भवति, अत्र न विचारहेतुः, अस्ति कश्चिदिति शेषः ; कर्मफलस्य सर्वेषामेवावश्यम्भोक्तव्यतया व्यर्थमेव विचारणमिति भावः । वसन्ततिलकं वृत्तम् ॥ ४०२ ॥

अपरञ्च, अन्यत्र गतस्यापि मे कस्यचित् दुष्टसत्त्वस्य मांसाशिनः सकाशात् मृत्युर्भविष्यति, तदहं सिंहात् । उक्तञ्च,—

महद्भिः स्पर्द्धमानस्य विपदेव गरीयसी ।
दन्तभङ्गोऽपि नागानां श्लाघ्यो गिरिविदारणे ॥ ४०३ ॥

तथा च,—महतोऽपि क्षयं लब्ध्वा श्लाघ्यं नीचोऽपि गच्छति ।
दानार्थी मधुपो यद्वद्गजकर्णसमाहतः" ॥ ४०४ ॥

एवं निश्चित्य स स्खलितगतिर्मन्दं मन्दं गत्वा सिंहाश्रयं पश्यन् अपठत्,—"अहो ! साधु इदमुच्यते,—

अन्तर्लीनभुजङ्गमं गृहमिव व्यालाकुलं वा वनं
ग्राहाकीर्णमिवाभिरामकमलच्छायासनाथं सरः ।
नानादुष्टजनैरसत्यवचनासक्तैरनार्यैर्वृतं
दुःखेन प्रतिगम्यते प्रचकितैः राज्ञां गृहं वार्धिवत्" ॥४०५॥

एवं पठन् दमनकोल्लाकारं पिङ्गलकं दृष्ट्वा प्रचकितः

महद्भिरिति ।—महद्भिः, जनैः सहेति शेषः, स्पर्द्धमानस्य स्पर्द्धां कुर्वतः जनस्य, विपदेव विपत्तिरपि, गरीयसी श्रेयसी ; गिरिविदारणे शुक्लादण्डप्रतिघातेन पर्वतप्रस्फोटनकर्मणि, नागानां हस्तिनां, दन्तभङ्गः दशनस्फोटनम अपि, श्लाघ्यः प्रशस्यः ॥ ४०३ ॥

महत इति ।—नीचोऽपि क्षुद्रोऽपि जनः, दानार्थी गजमदार्थी, अत एव गजकर्णसमाहतः हालकर्णतालताडित, मधुपो यद्वत् मधुकर इव, महतः जनात्,क्षयं विपदमित्यर्थः, लब्ध्वापि श्लाघ्यं श्लाघनीयत्वं, [भावे यप्रत्ययः] गच्छति प्राप्नोति ॥ ४०४ ॥

अन्तरिति ।—अन्तर्लीनः अभ्यन्तरे स्थितः,भुजङ्गमो यस्य तादृशं, गृहमिव, व्यालैः श्वापदैः, हिंस्रैरिति यावत्, ("व्यालो दुष्टगजे सर्पे श्वापदे" इति मेदिनी) आकुलं व्याप्तं, वनं वा वनमिव, ग्राहैः जलचरविशेषैः, "हाङ्गर" इति बङ्गे प्रसिद्धैः, आकीर्णं व्याप्तम्, अभिरामा शोभना, कमलानां या छाया कान्तिः, तत्सनाथं तद्युक्तं, सर इव, नानादुष्टजनैः विविधैर्दुर्जनैः, असत्यवचनासक्तैः मृषावादरतैः, अनार्यैः असाधुभिः, वृतं वेष्टितं, राज्ञां गृहं वार्धिवत् वारिधिरिव, [वारि जलानि धीयन्ते अत्र इति धाधातोः किं ; वार्+धा+कि] प्रचकितैः प्रकर्षेण भीतैः, सद्भिः जनैरिति शेषः, दुःखेन प्रतिगम्यते , राजभवनं सुतरां संत्यजतीति फलितम् । शार्दूलविक्रीडितं वृत्तम् ॥ ४०५ ॥

(च) संहृतशरीरो दूरतरं प्रणामक्रियां विनाऽपि उपविष्टः। पिङ्गलकोऽपि तथाविधं तं विलोक्य दमनकवाक्यं (छ) अश्रद्धानः कोपात् तस्योपरि पपात। अथ सञ्जीवकः (ज) खरनखर-विकर्त्तितपृष्ठः शृङ्गाभ्यां तदुदरमुल्लिख्य कथमपि तस्मात् अपेतः शृङ्गाभ्यां हन्तुमिच्छन् युद्धायावस्थितः। अथ द्वौ अपि तौ (झ) पुष्पितपलाशप्रतिमौ परस्परवधाकाङ्क्षिणौ दृष्ट्वा करटको दमनकमाह,—"भो मूढमते! अनयोर्विरोधं वितन्वता त्वया साधु न कृतं, न च त्वं नीतितत्त्वं वेत्सि, नीतिविद्भिरुक्तञ्च,—

कार्य्याण्युत्तमदण्डसाहसफलान्यायाससाध्यानि ये
प्रीत्या संशमयन्ति नीतिकुशलाः सान्त्वेन ते मन्त्रिणः।
निःसाराल्पफलानि ये त्वविधिना वाञ्छन्ति दण्डोद्यमैः
तेषां दुर्नयचेष्टितैर्नरपतेरारोप्यते श्रीस्तुलाम् ॥ ४०६ ॥

तत् यदि स्वाम्यभिघातो भविष्यति, तत् किं त्वदीयमन्त्र-

(च) संहृतशरीरः,—सङ्कुचितदेह इत्यर्थः। प्रणामक्रियां—प्रणामक्रियाम्।

(छ) अश्रद्धानः,—विश्वसन्।

(ज) खरेति।—खरैः,—तीक्ष्णैः, नखरैः विकर्त्तितं—विशेषेण छिन्नं, पृष्ठं यस्य तथाभूतः। तदुदरं—तस्य सिंहस्य उदरम्। उल्लिख्य—विपाट्येत्यर्थः। अपेतः,—अपसृतः।

(झ) पुष्पितेति।—विकसितपलाशतरुसदृशौ, रुधिरस्रावादिति भावः। वितन्वता—विस्तारयता, घटयता इत्यर्थः। नीतितत्त्वं—नीतिशास्त्रस्य तत्त्वं—याथार्थ्यम्।

कार्य्याणीति।—ये नीतिकुशलाः नीतिज्ञाः, प्रीत्या सान्त्वेन सान्त्वेनैव, प्रियवाक्यादि-नेत्यर्थः, आयाससाध्यानि कष्टसाध्यानि, उत्तमदण्डः प्रबलसङ्ग्राम एव, साहसफलं येषां तानि, कार्य्याणि संशमयन्ति सम्यक् शान्तिं नयन्ति, ते मन्त्रिणः मन्त्रिपदाधिकारिण इत्यर्थः; ये तु अविधिना अन्यायेन, दण्डोद्यमैः युद्धादृद्योगैः, निःसाराल्पफलानि निःसाराणि असाराणि, अल्पफलानि, च कार्य्याणि वाञ्छन्ति, तेषां दुर्नयचेष्टितैः अन्यायाचरणैः, नरपतेः श्रीः राजलक्ष्मीः, तुलां सन्देहम्, आरोप्यते नीयते, तत्र स्वाम्यभि न वेति सन्दिग्धा भवति राजलक्ष्मीरित्यर्थः। आर्द्धर्चविक्रीडितं छन्दः ॥ ४०६ ॥

बुद्ध्या क्रियते ? यथ सञ्जीवको न बध्यते, तथाऽपि (अ) अभव्यं, यतः प्राणसन्देहात् तस्य च वधः ; तन्मूढ ! कथं त्वं मन्त्रिपदम् अभिलषसि ? सामसिद्धिं न वेत्सि, तत् वृथा मनोरथोऽयं ते दण्डरुचेः। उक्तञ्च,—

सामादिदण्डपर्य्यन्तो नयः प्रोक्तः स्वयम्भुवा।
तेषां दण्डस्तु पापीयांस्तं पश्चादिनियोजयेत् ॥ ४०७ ॥

तथा च,—साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः।

पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन ? ॥४०८॥

तथा च,—आदौ साम प्रयोक्तव्यं पुरुषेण विजानता।

सामसाध्यानि कार्य्याणि विक्रियां यान्ति न क्वचित् ॥४०९॥

न चन्द्रेण न चौषध्या न सूर्य्येण न वह्निना।
साम्नैव विलयं याति विद्वेषिप्रभवं तमः ॥ ४१० ॥

(अ) अभव्यम्—अयुक्तम्। प्राणसन्देहात्—सञ्जीवके जीवति स्वामिनः जीवनसन्देहादिति यावत्। तस्य—सञ्जीवकस्य, वधः, कर्त्तव्य इति शेषः। सामसिद्धिं—साम्ना—सन्धिना, सिद्धिः ताम्। दण्डरुचेः,—दण्डे रुचिः यस्य तथोक्तस्य, युद्धप्रियस्य इत्यर्थः।

सामादीति।—स्वयम्भुवा ब्रह्मणा, सामादिदण्डपर्य्यन्तः सामदानभेददण्डावधिरित्यर्थः, नयः नीतिः, प्रोक्तः कथितः ; तेषां मध्ये, दण्डः सङ्ग्रामः, पापीयान् अतिनिकृष्टः, पश्चात् सामादिषु विफलेषु सत्सु, तं दण्डं, विनियोजयेत् प्रयुञ्जीत ॥४०७॥

साम्नैवेति।—यत्र साम्ना सान्त्वेनैव, सिद्धिः, भवेदिति शेषः, बुधेन विदुषा, तत्र दण्डः सङ्ग्रामः, न विनियोज्यः न प्रयोज्यः, "न दण्डेन कदाचन" इति श्रुत्यादित्यर्थः। यदि शर्करया गुडविकारविशेषेण, पित्तं शाम्यति, तदा पटोलेन कोऽर्थः ? किं प्रयोजनम् ? न किञ्चित्, परन्तु मुखावकारसम्पादनमेव इति भावः। आर्य्या वृत्तम् ॥४०८॥

आदाविति।—विजानता विदुषा, पुरुषेण इति शेषः, आदौ प्रथमं, साम प्रयोक्तव्यं, यतः सामसाध्यानि साम्ना निष्पाद्यानि कार्य्याणि, क्वचित् कुत्रापि, न विक्रियां विकारं, यान्ति गच्छन्ति, सर्वत्रैव फलन्ति इत्यर्थः ॥ ४०९ ॥

नेति।—विद्वेषिप्रभवं शत्रुसम्भूतं, तमः तिमिररूपः क्रोध इत्यर्थः, चन्द्रेण न, ओषध्या हव्यज्योतिर्लतया न, सूर्य्येण न, वह्निना च न विलयं नाशं, याति, किन्तु साम्ना सान्त्वेनैव, विलयं याति इत्युत्तरार्द्धम् ॥ ४१० ॥

तथा यत् त्वं मन्त्रित्वमभिलषसि, तदपि अयुक्तं, यतस्त्वं (ट) मन्त्रिगतिं न वेत्सि। पञ्चविधो हि मन्त्रः; स च (ठ) कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विनिपातप्रतीकारः, कार्यसिद्धिश्चेति। (ड) सोऽयं स्वाम्यमात्ययोः एकतरस्य किं वा द्वयोरपि विनिपातः समुत्पद्यते लग्नः; तत् यदि काचित् शङ्कास्ति, तद्विचिन्त्यतां विनिपातप्रतीकारः। (ढ) भिन्नसन्धाने हि मन्त्रिणां बुद्धिपरीक्षा; तन्मूर्ख! तत् कर्तुममसमर्थस्त्वं, यतो विपरीतबुद्धिरसि।

उक्तञ्च,—मन्त्रिणां भिन्नसन्धाने भिषजां सान्निपातिके।
कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पण्डितः?॥४११॥

(ट) मन्त्रिगतिं—मान्त्रिणः कर्त्तव्यम् इत्यर्थः, वक्ष्यमाणपञ्चविधमन्त्रमिति यावत्।

(ठ) कर्मेति।—कर्मणां सन्ध्यादीनाम्, आरम्भे अनुष्ठाने, षाड्गुण्यप्रयोगे इत्यर्थः, उपायः कौशलम्। पुरुषेति।—पुरुषाणां—सैनानां, कर्मचारिणां वा, द्रव्याणां—धनानाञ्च, सम्पत्—समृद्धिः, पर्याप्तः सद्भाव इति भावः। देशेति।—अस्मिन् देशे साम, अस्मिन् देशे दानं विधेयम, अस्मिन् देशे भेदः, अस्मिन् देशे दण्डः प्रयोक्तव्यः; अस्मिन् काले साम, अस्मिन् काले दानं प्रयोज्यम, अस्मिन् काले भेदः, अस्मिन् काले दण्डः प्रयोक्तव्यः इत्येवंरूपो विभागः व्यवस्थापनमित्यर्थः। विनिपातेति।—विनिपातः अपायः, तस्य प्रतीकारः यथा न अपायः आपतति तथा प्रतिविधानम्। कार्यसिद्धिः,—कार्याणां सन्ध्यादीनां, सिद्धिः,—सम्यक् साधनम।

(ड) स्वाम्यमात्ययोः,—नृपति मन्त्रिणोः, प्रस्तुते पिङ्गलक-सञ्जीवकयोरित्यर्थः। विनिपातः,—विध्वंसकरः। समुत्पद्यते—समुदेति। लग्नः,—समयः।

(ढ) भिन्नसन्धाने—भग्नसङ्घटने, विरोधापनयने इत्यर्थः।

मन्त्रिणामिति।—भिन्नसन्धाने वियुक्तयोर्जने अघटनीयघटनायामिति यावत्, मन्त्रिणाम् अमात्यानाम्; तथा सान्निपातिके प्रकुपितानां वायुपित्तकफाभिधानानां दोषत्रयाणां समवायज्ञानते चेत्यर्थः, कर्मणि व्यापारे, भिषजां चिकित्सकानां, प्रज्ञा बुद्धिः, व्यज्यते बोध्यते, स्वयं प्रतीयते इत्यर्थः, स्वस्थे प्रकृतिस्थे जने, को वा जनः पण्डितो न? अपि तु सर्व एव पाण्डित्यं दर्शयितुं समर्थः इति भावः॥ ४११॥

अन्वयः,—घातयितुमेव नीचः परकार्य्यं वेत्ति न प्रसाधयितुम्।
पातयितुमेव शक्तिर्नाखोरुद्धर्त्तुमन्नपिटम् ॥ ४१२ ॥

अथवा न ते दोषः, अयं स्वामिनो दोषः, यस्ते वाक्यं अद्धाति। उक्तञ्च,—

नराधिपा नीचजनानुवर्त्तिनो बुधोपदिष्टेन पथा न यान्ति ये।
विशन्ति ते दुर्गममार्गनिर्गमं समस्तसम्बाधमनर्थपिञ्जरम् ॥ ४१३ ॥

तत् यदि त्वमस्य मन्त्री भविष्यसि, तदा अन्योऽपि कश्चित् न अस्य ममोपि साधुजनः समेष्यति। उक्तञ्च,—

गुणालयोऽप्यसन्मन्त्री नृपतिर्नाधिगम्यते।
प्रसन्नस्वादुसलिलो दुष्टग्राहो यथा ह्रदः ॥ ४१४ ॥

तथा शिष्टजनरहितस्य स्वामिनोऽपि नाशो भविष्यति।

उक्तञ्च,—चित्रास्वादकथैर्भृत्यैरनायासमतकामुकैः।
ये रमन्ते नृपास्तेषां रमन्ते रिपवः श्रिया ॥ ४१५ ॥

घातयितुमिति।—नीचः क्षुद्रो जनः, परकार्य्यं घातयितुं नाशयितुमेव, वेत्ति जानाति, प्रसाधयितुं सम्पादयितुं, न वेत्तीत्यनुषङ्गः। भाखोः मूषकस्य, अन्नपिटं भक्ष्यीयद्रव्याधारविशेषं, पातयितुमेव भूमाववतारयितुमेव, शक्तिः सामर्थ्यम्, अस्तीति शेषः, उद्धर्त्तुम् उत्तोलयितुं, न शक्तिरित्यनुषङ्गः। आर्य्या छन्दः ॥ ४१२ ॥

नराधिपा इति।—ये नराधिपाः राजानः, नीचजनानुवर्त्तिनः क्षुद्रजनमतानुसारिणः सन्तः, बुधोपदिष्टेन विद्वदुपदर्शितेन, पथा न यान्ति चलन्ति, कार्य्ये न प्रवर्त्तन्ते इत्यर्थः, ते अमार्गनिर्गमं नास्ति मार्गः निर्गमाय यस्य तत्, निर्गममार्गरहितमित्यर्थः, समस्तसम्बाधं प्रतिबन्धभूयिष्ठं, दुर्गं दुर्गमम्, अनर्थपिञ्जरं व्यसनरूपं पिञ्जरं, विशन्ति प्रविशन्ति, विपद्यन्ते इति भावः। वंशस्थविलं छन्दः ॥ ४१३ ॥

गुणालय इति।—गुणाः दयादाक्षिण्यादयः, तेषाम् आलयः आकरोऽपि, नृपतिः, असन्तः असाधवः, मन्त्रिणो यस्य तथाभूतः, दुर्मन्त्रिपरिवृतः चेत् इत्यर्थः, प्रसन्नं अच्छं, स्वादु सुस्वादं, सलिलं यस्य तादृशः, अत्र च दुष्टाः ग्राहाः जलजन्तुभेदाः यत्र तथाभूतः, ह्रदः यथा तथाभूतः ह्रदः, न अधिगम्यते न सेव्यते, लोकैरिति शेषः ॥ ४१४ ॥

चित्रेति।—ये नृपाः, चित्राः नर्म्मोक्तयः, आस्वादाः यासां तादृश्यः, कथाः वचनानि येषां तैः, मधुरभाषिभिरित्यर्थः, किन्तु अनायासितं अकष्टेन अनिवृत्तं,

तत् किं मूर्खोपदेशेन ? यतः तत्र केवलं दोषः, न गुणः । उक्तञ्च,—नानाम्यं नमते दारु नाश्मनि स्यात् क्षुरक्रिया ।

सूचीमुखं विजानीहि नाशिष्यायोपदिश्यते" ॥ ४१६ ॥

दमनक आह,—"कथमेतत् ?" सोऽब्रवीत्,—

कथा १७ ।

"अस्ति कस्मिंश्चित् पर्वतैकदेशे वानरयूथम् । (ख) तच्च कदाचित् हेमन्तसमये अतिकठोरवातसंस्पर्शवेपमानकलेवरं तुषारवर्षोद्दलितप्रवर्षघनधारानिपातसमाहतं न कथञ्चित् शान्तिमगमत् । अथ केचित् वानराः (त) वङ्किकणमट्टग्नानि गुञ्जाफलानि अवचित्य वङ्किवाञ्छया फूत्कुर्वन्तः समन्तात् तस्थुः । अथ सूचीमुखो नाम पक्षी तेषां तं वृथाऽऽयासम् अवलोक्य प्रोवाच,—'भोः ! सर्वे मूर्खाः यूयं, नैतं वङ्किकणाः, गुञ्जाफलानि एतानि, तत् किं वृथा श्रमेण ? न एतस्मात् शीतरक्षा भविष्यति ; तत् अन्विष्यतां कश्चित् निर्वातो वनप्रदेशो

कार्मुकं धनुः यैः तथाभूतैः, काण्डाघमैरित्यर्थः, मूर्खैः सेवकैः, रमन्ते क्रीडन्ति, न तु राजकार्यं कुर्वन्तीति भावः, रिपवः शत्रवः, तेषां वृषाणां, स्त्रिया सम्पदा, रमन्ते हृष्यन्तीत्यर्थः ; रिपवस्तान् पराभूय सम्पदो हरन्तीति भावः ॥ ४१५ ॥

नेति ।—अनाम्यम् अनमनीयं, दारु काष्ठं, न नमते [आत्मनेपदम् अत्र छन्दोऽनुरोधात्] कैर्नापि नतं न भवति, अश्मनि प्रस्तरे, क्षुरक्रिया क्षौरकर्म, न स्यात्, प्रस्तरं क्षुरेण छेत्तुं न कोऽपि प्रक्रमेदिति भावः । अशिष्याय अयोग्यशिष्याय, अशिष्यासवे इत्यर्थः, न उपदिश्यते ; अत्र दृष्टान्तं—सूचीमुखं तदाख्यं पक्षिणं, विजानीहि ; सूचीमुखः अशिष्यासनानेभ्य उपदेशं विपन्नोऽभवदिति निष्कर्षः ॥ ४१६ ॥

(ख) तच्च—वानरयूथम् । अतिकठोरेति ।—अतिकठोरेण अत्युत्कटेन, वातसंस्पर्शेन वायुयोगेन, वेपमानं कम्पमानं, कलेवरं शरीरं यस्य तथोक्तम् । तुषारेति ।—तुषारवर्षोद्दलित—तुहिनानि:सृत दृत, उद्दलेन—उत्कटेन, प्रवर्षेण—प्रबलवृष्टेः, घनधारानिपातेन—सान्द्राऽऽसारपतनेन, समाहतं—सम्यक् ताडितम् । शान्तिं—स्वास्थ्यम् ।

(त) वङ्किकणमट्टग्नानि—क्षुद्रिकतुच्छानि, वर्षसाध्यादिति भावः ।

(घ) गुहा वा गिरिकन्दरो वा; अद्यापि साटोपा मेघा दृश्यन्ते'। अथ तेषाम् एकतमो हुडवानरः तमुवाच,—'भो मूर्ख! किं तव अनेन व्यापारेण? तद्गम्यताम्। उक्तञ्च,—

मुहुर्विघ्नितकर्माणं द्यूतकारं पराजितम्।
नालापयेद्विवेकज्ञो यदीच्छेत् सिद्धिमात्मनः॥ ४१७॥

तथा च,—आखेटकं हयाक्लेशं मूर्खं व्यसनसंस्थितम्।
आलापयति यो मूढः स गच्छति पराभवम्॥ ४१८॥

सोऽपि तमनादृत्य भूयोऽपि वानरान् अनवरतमाह—'भोः! किं वृथा क्लेशेन?' अथ यावदसौ न कथञ्चित् (ङ) प्रलपन् विरमति, तावदेकेन वानरेण व्यर्थश्रमत्वात् कुपितेन पद्भ्यां गृहीत्वा शिलायाम् आस्फालित उपरतश्च। अतोऽहं ब्रवीमि,—'नानाम्यं नमते दारु' इत्यादि।

तथा च,—पयःपानं भुजङ्गानां केवलं विषवर्द्धनम्।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये॥ ४१९॥

(घ) गुहा—पर्वतगह्वरम्, अद्यापि=अधुनापि, सावलम्बिमित्यर्थः। कन्दरः,—दरी, पर्वतादिनिम्नगुहेत्यर्थः। साटोपाः,—सदर्पाः, साडम्बरा इत्यर्थः, सगर्जिता इति यावत्।

मुहुरिति।—विवेकज्ञः प्राज्ञो जनः, यदि आत्मनः स्वस्य, सिद्धिं कल्याणम्, इच्छेत् अभिलषेत्, तदा मुहुः पुनः पुनः, विघ्नितकर्माणं विघ्नितं व्याहतं, कर्म येन तादृशं, कार्येव्याघातकमित्यर्थः, तथा द्यूतकारं, तथा पराजितञ्च जनं, न आलापयेत् न तैः आलापं कुर्यादित्यर्थः। अयन्तु पक्षो विघ्नितकर्मेति भावः॥ ४१७॥

आखेटकमिति।—यः मूढः, आखेटकं मृगयाशीलं, हयाक्लेशम् अनर्थकपरिश्रमिणं, मूर्खं, तथा व्यसनसंस्थितं कामजक्रोधजेषु द्यूतादिषु चतुर्दशसु समासक्तं जनम्, आलापयति तैरालापं कुर्यादित्यर्थः, सः पराभवं गच्छति॥ ४१८॥

(ङ) प्रलपन्—अविरतं भाषमाणः। आस्फालितः,—आच्छिन्नः। उपरतः,—मृतः।

पयः इति।—भुजङ्गानां पयःपानं दुग्धपानं, केवलं विषवर्द्धनं विषमेव वर्द्धयतीति इत्यर्थः, हि तथा हि, मूर्खाणाम् उपदेशः प्रकोपाय कोपवर्द्धनाय, भवतीति शेषः, शान्तये न प्रशमाय न; अतो मूर्खो नोपदेष्टव्य इति भावः॥ ४१९॥

अन्वयः,—उपदेशो न दातव्यो यादृशे तादृशे जने।
पश्य वानरमूर्खेण सुग्रहो निर्गृहीकृतः" ॥ ४२० ॥

दमनक आह,—"कथमेतत् ?" सोऽब्रवीत्,—

कथा १८।

"अस्ति कस्मिंश्चित् वनोद्देशे शमीवृक्षः; तस्य लम्बमान-शाखायां कृतावासौ अरण्यचटकदम्पती वसतः स्म। अथ कदाचित् तयोः सुखसंस्थयोर्हेमन्तमेघो मन्दं मन्दं वर्षितुमारब्धः। अत्रान्तरे कश्चित् (घ) शाखामृगो वाताऽऽसारसमाहतः प्रोद्धूषितशरीरो दन्तवीणां वादयन् वेपमानः तत् शमीमूलमासाद्य उपविष्टः। अथ तं तादृशमवलोक्य चटका प्राह,—'भो भद्र !—

हस्तपादसमायुक्तो दृश्यसे पुरुषाकृतिः।
श्रोत्रेण खिद्यसे मूढ ! कथं न कुरुषे गृहम् ?' ॥४२१॥

एतत् श्रुत्वा तां वानरः सकोपमाह,—'अधमे ! कस्मात् न त्व (न) मौनव्रता भवसि ?' इत्युक्त्वा पुनरचिन्तयत्,—'अहो ! धार्ष्ट्यम् अस्याः, अद्य मामुपहसति !!—

उपदेश इति।—यादृशे तादृशे यस्मिन् कस्मिंश्चिदपि जने, [अत्र मुख्यदानाभावेन सम्प्रदानत्वाभावात् विषयाधिकरणे सप्तमी] उपदेशः न दातव्यः, पश्य अवलोकय, वानरमूर्खेण सुग्रहो उपसगृहीतः, निर्गृहीकृतः गृहशून्यीकृतः ॥ ४२० ॥

(घ) शाखामृगः,—वानरः, वाताऽऽसारसमाहतः,—वातभ्रमवर्षितवृष्टिधारा-ताडितः। प्रोद्धूषितशरीरः,—वृष्टिजलसिक्तदेहः। दन्तवीणां—दन्त एव वीणा ताम्, दन्तेन वीणां कुर्वाणः प्राप्नोमिति वा। वेपमानः,—कम्पमानः। शमीमूलं—शम्याः अग्निगर्भतरुविशेषस्य, सक्तुफलीत्यपरपर्यायकस्य इत्यमरः ("शमी सक्तुफला शिवा" इत्यमरः) मूलं—पाददेशः तत्।

हस्तेति।—रे मूढ ! हस्तपादेन समायुक्तः करचरणवानसि, पुरुषाकृतिः नराकृतिः, दृश्यसे, अथ च श्रोत्रेण खिद्यसे क्लिश्यसे, कथं गृहं न कुरुषे ? ॥ ४२१ ॥

(ङ) मौनव्रता भवसि—तूष्णीं न तिष्ठसीत्यर्थः। धार्ष्ट्ये—चापल्ये, प्रागल्भ्यम् इत्यर्थः।

सूचीमुखी दुराचारा रण्डा पण्डितमानिनी।
नाशङ्कते प्रजल्पन्ती तत् किमेनां न हन्म्यहम् ?'॥४२२॥

एवं विचिन्त्य प्रकाशं तामाह,—'मुग्धे! किं तव ममोपरि चिन्तया ?

उक्तञ्च,—वाच्यं श्रद्धासमेतस्य पृच्छतश्च विशेषतः।
प्रोक्तं श्रद्धाविहीनस्य अरण्यरुदितोपमम्' ॥ ४२३ ॥

तत् अनुभव तं धार्ष्ट्यस्य फलम्' इत्युक्त्वा यावत् (प) कुलायस्थितया तया अभिहितः सः, तावत् तां ग्रसीमारुह्य तस्याः कुलायं शतधा खण्डशः अकरोत्। अतोऽहं ब्रवीमि—'उपदेशो न दातव्यः' इति। तन्मूर्ख! (फ) शिक्षापितोऽपि न शिक्षितः त्वम्; अथवा न ते दोषोऽस्ति; यतः साधोः शिक्षा गुणाय सम्पद्यते, न असाधोः। उक्तञ्च,—

किं करोत्येव पाण्डित्यमस्थाने विनियोजितम् ?
अन्धकारप्रतिच्छन्ने घटे दीप इवाहितः ॥ ४२४ ॥

सूचीति।—इयं सूचीमुखी सूचीव मुखं यस्याः सा, दुराचारा दुर्वृत्ता, रण्डा धूर्त्ता, विधवा वा, "रॉडो" इति वङ्गभाषया व्यवहृता इति भावः; पण्डितमानिनी पण्डितमिव आत्मानं मन्यते या सा, ["आत्ममाने खश्च" (३।२।८३ पा०) इति सूत्रेण मनधातोर्णिनिः] सती प्रजल्पन्ती वदन्ती, माभिति शेषः, न आशङ्कते न बिभेति, तत् तस्मात्, एनां चटकां, किं कथम्, अहं न हन्मि न नाशयामि ? ॥ ४२२ ॥

वाच्यमिति।—श्रद्धासमेतस्य श्रद्धान्वितस्य, विशेषतः विशेषेण, पृच्छतश्च जिज्ञासमानस्य च, जनस्य इति शेषः, सम्बन्धे वाच्यं वक्तव्यं, श्रद्धाविहीनस्य अश्रद्दधानस्य, समीपे प्रोक्तं वचनम्, 'अरण्यरोदनतुल्यम्; निष्फलत्वादिति भावः; अश्रद्दधाने अजिज्ञासमाने च नयि ते वचनं निष्फलमित्याशयः॥ ४२३ ॥

(प) कुलायस्थितया—नीडवासिन्या।

(फ) शिक्षापितः,—शिक्षावान् कृतः। [शिक्षावत् श्रद्धात् तत्करोत्यर्थे णिचि इष्टवद्भावात् मतुपो लुक्, ततः पुगागमः]।

स्थानेति।—अस्थाने अपात्रे, विनियोजितं समाहितं, पाण्डित्यं सदुपदेशः, अन्धकारप्रतिच्छन्ने तमिस्रपूर्णे, घटे घटस्याभ्यन्तरे इत्यर्थः, आहितः अर्पितः, दीप इव

तत् (ब) व्यर्थपाण्डित्यमाश्रित्य मम वचनमसूयन् न आत्मनः भ्रान्तिमपि वेत्सि, तन्मूनम् अपजातः त्वम्। उक्तञ्च,—

जातः पुत्रोऽनुजातश्च अतिजातस्तथैव च।
अपजातश्च लोकेऽस्मिन् मन्तव्याः शास्त्रवेदिभिः ॥४२५॥
मातृतुल्यगुणो जातस्त्वनुजातः पितुः समः।
अतिजातोऽधिकस्तस्मादपजातोऽधमाधमः ॥ ४२६ ॥
अप्यात्मनो विनाशं गणयति न खलः परव्यसनहृष्टः।
प्रायो मस्तकनाशे समरमुखे वृत्यति कबन्धः ॥ ४२७ ॥

अहो ! साधु इदमुच्यते,—

धर्मबुद्धिः कुबुद्धिश्च द्वावेतौ विदितौ मम।
पुत्रेण व्यर्थपाण्डित्यात् पिता धूमेन घातितः" ॥ ४२८ ॥

दमनक आह,—"कथमेतत् ?" सोऽब्रवीत्,—

किं करोत्येव ? प्रतिरुद्धप्रकाशोऽसौ केवलं तदाश्रयान्तरस्थितं वस्तु प्रकाशयितुमसमर्थः इति न, अपि तु स्वयं सपदि विलयं गच्छत्येवेति भावः ॥ ४२४ ॥

(ब) व्यर्थपाण्डित्यम्—अहं जानीति मिथ्याऽभिमानम्। अपजातः,—अधमजातः। जात इति।—अस्मिन् लोके शास्त्रवेदिभिः शास्त्रज्ञैः, जातः, अनुजातः, अतिजातः, तथा अपजातः इति चतुर्विधः पुत्रः मन्तव्यः ॥ ४२५ ॥

मातृतुल्येति।—मातृतुल्यः गुणो यस्य तथाविधः, पुत्रः, जातः जातसंज्ञकः; पितुः समः पितृतुल्यगुणः, पुत्रः, अनुजातः; तस्मात् पितुः, अधिकः अधिकगुणः, पुत्रः, अतिजातः; अधमाधमः अत्यधमः, पुत्रः अपजातः, उच्यते इति शेषः ॥४२६॥

अपीति।—खलः दुर्जनः, परव्यसने परेषां क्लेशरेषां, व्यसने विपदि, हृष्टः आनन्दितः सन्, आत्मनः स्वस्य, विनाशमपि न गणयति न पश्यतीत्यर्थः; कबन्धः छिन्नशिराः कायः, मस्तकस्य नाशे सत्यपि, स्वविनाशमनपेक्षितोऽपीति भावः, समरमुखे रणशिरसि, युद्धक्षेत्रे इत्यर्थः, प्रायः बाहुल्येन, वृत्यति, खलस्तु कबन्धवत् स्वव्यसनानभिज्ञः जड इति भावः। दृष्टान्तालङ्कारः। आर्या वृत्तम् ॥ ४२७ ॥

धर्मबुद्धिरिति।—धर्मबुद्धिः कुबुद्धिश्च एतौ द्वौ मम विदितौ ज्ञातौ, पुत्रेण कुबुद्धिनेति भावः, व्यर्थपाण्डित्यात् विफलचातुर्यात्, पिता, आत्मन इति शेषः, धूमेन सधूमाग्निना इत्यर्थः, घातितः विनाशितः ॥ ४२८ ॥

कथा १९।

कस्मिंश्चित् (भ) अधिष्ठाने धर्मबुद्धिः पापबुद्धिश्च द्वौ मित्रे प्रतिवसतः स्म। अथ कदाचित् पापबुद्धिना चिन्तितम्,—'अहं तावत् मूर्खः (म) दारिद्र्योपेतश्च; तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वा अस्य आश्रयेण अर्थोपार्जनं कृत्वा एनमपि वञ्चयित्वा सुखीभवामि'। अथ अन्यस्मिन् अहनि पापबुद्धिः धर्मबुद्धिं प्राह,—'भो मित्र! (य) वार्द्धकभावे किं त्वमात्मविचेष्टितं स्मरिष्यसि? देशान्तरमदृष्ट्वा कां श्वशुरजनस्य वार्त्तां कथयिष्यसि? उक्तञ्च,—

देशान्तरेषु बहुविधभाषावेषादि येन न ज्ञातम्।
भ्रमता धरणीपीठे तस्य फलं जन्मना व्यर्थम्॥ ४२९॥

तथा च—विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक्।
यावत् व्रजति न भूमौ देशाद्देशान्तरं दृष्टः॥ ४३०॥

अथ तस्य तद्वचनमाकर्ण्य प्रहृष्टमनाः तेनैव सह गुरुजनानुज्ञातः शुभे अहनि देशान्तरं प्रस्थितः। तत्र च धर्मबुद्धिप्रभावेण भ्रमता पापबुद्धिना प्रभूततरं वित्तम् आसादितम्।

(भ) अधिष्ठाने—पुरे, नगरे इति यावत्, ("अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि" इत्यमरः)।

(म) दारिद्र्योपेतः,—दारिद्र्ययुक्तः, निर्धन इत्यर्थः।

(य) वार्द्धकेति।—वार्द्धकभावे—वृद्धावस्थायां, किम् आत्मविचेष्टितं—स्वकार्यं, स्मरिष्यसि?—स्मृतिविषयमानेष्यसि? इत्यर्थः।

देशान्तरेष्विति।—येन जनेन, देशान्तरेषु भ्रमता विचरता सता, बहुविधभाषावेषादि न ज्ञातं, तस्य धरणीपीठे भूतले, जन्मनः फलं व्यर्थम्; अविज्ञातविदेशव्यवहारस्य कूपमण्डूकवत् इयमेव जन्म इति भावः। आर्या छन्दः॥ ४२९॥

विद्यामिति।—भूमौ पृथिव्यां, मानवः दृष्टः सन्, यावत् देशात् देशान्तरं न व्रजति, विद्यां, वित्तं धनं, शिल्पं वैज्ञानिकव्यापारमित्यर्थः, ("विज्ञानं शिल्पशास्त्रयोः" इत्यमरोक्तेः) तावत् सम्यक् सुष्ठु, न आप्नोति न लभते। आर्या छन्दः॥ ४३०॥

ततश्च द्वौ अपि तौ प्रभूतोपार्जितद्रव्यौ प्रहृष्टौ स्वगृहं प्रति औत्सुक्येन निवृत्तौ। उक्तञ्च,—

प्राप्तविद्यार्थशिल्पानां देशान्तरनिवासिनाम्।
क्रोशमात्रोऽपि भूभागः शतयोजनवद्भवेत् ॥ ४२१ ॥

अथ स्वस्थानसमीपवर्त्तिना पापबुद्धिना धर्मबुद्धिरभिहितः,—'भद्र! न सर्वमेतद्धनं गृहं प्रति नेतुं युज्यते, यतः (र)कुटुम्बिनो बान्धवाश्च प्रार्थयिष्यन्ते। तदत्र एव वनगहने क्वापि भूमौ निक्षिप्य किञ्चिन्मात्रमादाय गृहं प्रविशावः, भूयोऽपि प्रयोजने सञ्जाते (ल) तन्मात्रं समेत्य अस्मात् स्थानात् नेष्यावः।

उक्तञ्च—न वित्तं दर्शयेत् प्राज्ञः कस्यचित् स्वल्पमप्यहो!।
मुनेरपि यतस्तस्य दर्शनाच्चलते मनः ॥ ४२२ ॥

तथा च,—यथाऽऽमिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि।
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान्' ॥ ४२३ ॥

प्राप्तेति।—प्राप्तानि विद्यार्थशिल्पानि यैः तथाभूतानां, अस्मादृशानाम् उपार्जितधनानां, निश्चिन्तशिल्पकौशलानामित्यर्थः, देशान्तरनिवासिनाम् अन्यदेशप्रेषितानां, जनानामिति शेषः, क्रोशमात्रोऽपि क्रोशपरिमितोऽपि, [प्रमाणे मात्रच् प्रत्ययः] भूभागः शतयोजनवत् शतयोजनमित इव, अतिदूरवर्त्तीव इत्यर्थः, भवेत्। यदर्थं जना देशान्तरं गच्छन्ति, यावत् तदधिगमो न स्यात्, तावत् स्वदेशं प्रति निरुत्सुकाः तिष्ठन्ति, कृतकार्यास्तु स्वदेशं प्रति सातिशयसमुत्सुकतया मुहूर्त्तस्यापि विलम्बमसहनीयत्वात् अल्पमात्रमपि पन्थानं बहुदूरमिव मन्यन्ते इति भावः ॥ ४२१ ॥

(र) कुटुम्बिनः,—पोष्यवर्गजनाः। बान्धवाः,—भ्रातयः, सुहृदो वा।

(ल) तन्मात्रं—प्रयोजनोपयुक्तम् इत्यर्थः।

नेति।—प्राज्ञः पण्डितः, [प्रज्ञा विद्यतेऽस्य, इति प्रज्ञादित्वात् अण् प्रत्ययः] जन इति शेषः, स्वल्पमपि वित्तं धनं, कस्यचित् न दर्शयेत्, अहो! आश्चर्यमेतत्, यतः तस्य वित्तस्य, दर्शनात् मुनेरपि विषयानिःस्पृहस्यापि इत्यर्थः, मनः चलते [आत्मनेपदमत्र चिन्त्यम्] सञ्चलितं भवतीति भावः ॥ ४२२ ॥

यथेति।—यथा मत्स्यैः मीनैः, जले सलिले, श्वापदैः हिंस्रैः, भुवि पृथिव्यां, स्थले इति यावत्, पक्षिभिश्च विहगैश्च, आकाशे अन्तरीक्षे, क्षितमिति शेषः, आमिषं

तत् आकर्ण्य धर्मबुद्धिः आह,—'भद्र! एवं क्रियताम्'। तथा अनुष्ठिते द्वौ अपि तौ खगृहं गत्वा सुखेन स्थितवन्तौ।

अथ अन्यस्मिन् अहनि पापबुद्धिः (व) निशीथे अटव्यां गत्वा तत् सर्वं वित्तं समादाय गर्त्तं पूरयित्वा स्वभवनं जगाम। अथ अन्येद्युः धर्मबुद्धिं समभ्येत्य प्रोवाच,—'सखे! (ग) बहुकुटुम्बा वयं वित्ताभावात् सीदामः, तद्गत्वा तत्र स्थाने किञ्चिन्मात्रं धनमानयावः'। सोऽब्रवीत्,—'भद्र! एवं क्रियताम्'। अथ द्वौ अपि गत्वा तत् स्थानं यावत् खनतः, तावत् रिक्तं भाण्डं दृष्टवन्तौ। अत्रान्तरे पापबुद्धिः शिरस्ताडयन् प्रोवाच,—'भो धर्मबुद्धे! त्वया हृतमेतद्धनं, न अन्येन, यतो भूयोऽपि गर्त्तापूरणं कृतं, तत् प्रयच्छ मे तस्यार्द्धम्; अन्यथा अहं राजकुले निवेदयिष्यामि'। स आह,—'भो दुरात्मन्! मैवं वद, धर्मबुद्धिः खलु अहम्; न एतच्चौरकर्म करोमि। उक्तञ्च,—

मातृवत् परदाराणि परद्रव्याणि लोष्टवत्।
आत्मवत् सर्वभूतानि यो वेत्ति स धर्मवित्॥ ४३४॥

एवं द्वौ अपि तौ (ष) विवदमानौ धर्माधिकारिणं गतौ,

भोग्यवस्तु, ("भगं पुन्नपुंसकम्। भोग्यवस्तुनि सम्भोगे—" इति मेदिनी) भज्यते, तथा सर्वत्र सर्वस्मिन् देशे, वित्तवान् धनवान् लोकः, भज्यते, जनैरिति शेषः; सर्व एव धनवतो धनं काङ्क्षन्तीति भावः॥ ४३३॥

(व) निशीथे—अर्द्धरात्रे। अटव्यां—वने।

(ग) बहुकुटुम्बाः,—अनेकपरिजनाः। सीदामः,—क्लेशं प्राप्नुमः।

मातृवदिति।—धर्मबुद्धयः धर्मे पुण्यकर्मणि, बुद्धिः मतिर्येषां तथोक्ताः, धार्मिका इत्यर्थः, परदाराणि परकलत्राणि, [दारशब्दस्य पुंस्त्वेऽपि स्त्रीत्वलिङ्गत्वं विवक्षावशात्] मातृवत् जननीरिव, परद्रव्याणि लोष्टवत् भूपतितखण्डानीव, तथा सर्वभूतानि सर्वान् प्राणिनः, आत्मवत् आत्मन इव, वीक्षन्ते पश्यन्ति; धार्मिकाः सर्वैरेव निस्पृहाः वर्त्तन्ते इति भावः॥ ४३४॥

(ष) विवदमानौ—कलहायमानौ। धर्माधिकारिणं—विचारकम्।

प्रोचतुश्च परस्परं दूषयन्तौ। अथ धर्माधिकरणाधिष्ठितपुरुषैः (स) दिव्यार्थं यावत् नियोजितौ, तावत् पापबुद्धिः आह,—'अहो! न सम्यग्दृष्टोऽयं न्यायः। उक्तञ्च,—

विवादेऽन्विष्यते पत्रं तदभावेऽपि साक्षिणः।
साक्ष्यभावात्ततो दिव्यं प्रवदन्ति मनीषिणः॥ ४३५॥

तदत्र विषये मम (ङ) वृक्षदेवताः साक्षीभूताः तिष्ठन्ति। ता अपि आवयोः एकतरं चौरं साधुं वा करिष्यन्ति'। अथ तैः सर्वैः अभिहितं,—'भोः! युक्तमुक्तं भवता। उक्तञ्च,—

अन्यजोऽपि यदा साक्षी विवादे सम्प्रजायते।
न तत्र विद्यते दिव्यं किं पुनर्यत्र देवताः॥ ४३६॥

तदस्माकमपि अत्र विषये महत् कौतूहलं वर्त्तते। प्रत्यूषसमये युवाभ्यामपि अस्माभिः सह तत्र वनाहेये गन्तव्यम्' इति। एतस्मिन्नन्तरे पापबुद्धिः स्वगृहं गत्वा स्वजनकमुवाच,—'तात! प्रभूतोऽयं मयाऽर्थो धर्मबुद्ध्येवोरितः, स च तव वचनेन (च) परिणतिं गच्छति, अन्यथा अस्माकं प्राणैः सह

(स) दिव्यार्थं—शपथकरणाय। नियोजितौ—आदिष्टौ इत्यर्थः। न्यायः,—विचारः, युक्तिरिति यावत्। दृष्टः, युष्माभिरिति शेषः।

विवादे इति।—विवादे व्यवहारकर्मणि, प्रथमं पत्रं लेख्यमित्यर्थः, अन्विष्यते अनुसन्धीयते, द्रष्टुं प्रार्थ्यते इत्यर्थः, धर्माधिकरणाधिकारिति शेषः, तदभावे तस्य पत्रस्य अभावे, साक्षिणः, अन्विष्यन्ते इति शेषः; ततः साक्षिणाम् अभावात् अभावे सति इत्यर्थः, मनीषिणः विद्वांसः, दिव्यं प्रवदन्ति प्रमाणत्वेन कथयन्ति; अतः प्रथमसेव दिव्यानुसन्धानमतीवानुचितमिति भावः॥ ४३५॥

(ङ) वृक्षदेवताः,—वनदेवताः। साक्षीभूताः,—प्रत्यक्षद्रष्टारः।

अन्यज इति।—विवादे अन्यजोऽपि नीचजातीयोऽपि, यदा यदि इत्यर्थः, साक्षी सम्प्रजायते साक्ष्यो भवतीत्यर्थः, तत्र दिव्यं, प्रमाणमिति शेषः, न विद्यते, यत्र पुनः देवताः, साक्षिण इति शेषः, तत्र किम्? किं वक्तव्यमिति भावः॥ ४३६॥

(च) परिणतिं—परिपाकम्, अस्माकं सम्यगायत्तमित्यर्थः।

यास्यति'। स आह,—'वत्स! द्रुतं वद, (क) येन प्रोच्य तत् द्रव्यं स्थिरतां नयामि'। पापबुद्धिः आह,—'तात! अस्ति तत्रदेशे महाश्रमी, तस्यां महत् कोटरमस्ति, तत्र त्वं साम्प्रतमेव प्रविश। ततः प्रभाते यदाऽहं (ख) सत्यश्रावणं करोमि, तदा त्वया वाच्यं यत् 'धर्मबुद्धिश्चौरः' इति। तथा अनुष्ठिते प्रत्यूषे पापबुद्धिः स्नात्वा (ग) धौतप्रावरणो धर्मबुद्धिपुरःसरो धर्माधिकरणिकैः सह तां श्रमीमभ्येत्य तारस्वरेण प्रोवाच,—

'आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मो हि जानाति नरस्य वृत्तम्॥ ४३७॥

भगवति वनदेवते! आवयोर्मध्ये यः चौरः तं कथय'। अथ पापबुद्धिपिता श्रमीकोटरस्थः प्रोवाच,—'भोः! शृणुत शृणुत, धर्मबुद्धिना अपहृतमेतद्धनम्'। तदाकर्ण्य सर्वे ते राजपुरुषा विस्मयोत्फुल्ललोचना यावद्धर्मबुद्धेः वित्तहरणोचितं निग्रहं शास्त्रदृष्ट्या अवलोकयन्ति, तावद्धर्मबुद्धिना तच्छ्रमी-

(क) येन—लक्षणानुसारेण इत्यर्थः। प्रोच्य—कथयित्वा, साक्ष्यं दत्त्वेति भावः। स्थिरतां—स्थायित्वम्। नयामि—प्रापयामि; यथा तद्धनम् अन्यगृहात् न वर्धिष्यति, तथा करोमीति भावः।

(ख) सत्यश्रावणं करोमि—सत्यं श्रावयामि, राजपुरुषेभ्यः सत्यवाक्यं श्रावयितुं वनदेवता प्रार्थयामि इत्यर्थः, [भविष्यदर्थे लट्]।

(ग) धौतप्रावरणः,—शुभ्ववसनः। तारस्वरेण—उच्चैःस्वरेण।

आदित्येति।—आदित्यचन्द्रौ सूर्याचन्द्रमसौ, अनिलो वायुः, अनलः अग्निः, द्यौः अन्तरीक्षं, भूमिः पृथिवी, आपः जलं, [आपशब्दः नित्यबहुवचनान्तः, तथा च—"आपः स्त्री भूम्नि वार्वारि" इत्यमरः] हृदयं मनः, यमः अन्तकः, अहः दिनं, रात्रिश्च, उभे ते, सन्ध्ये प्रातःसायंरूपे, तथा धर्मः, नरस्य मानवस्य, वृत्तं चरितं, जानाति हि जानात्येव। उपजानाति; वृत्तम्॥ ४३७॥

कोटरं (घ) वह्निभोज्यद्रव्यैः परिवेष्ट्य वह्निना सन्दीपितम्।

अथ ज्वलति तस्मिन् शमीकोटरे अर्धदग्धशरीरः(ङ) स्फुटितेक्षणः करुणं परिदेवयन् पापबुद्धिपिता निरक्रामत्। ततश्च तैः सर्वैः पृष्टः,—'भोः! किमिदम्?' इत्युक्ते (च) स पापबुद्धिविचेष्टितं सर्वमिदं निवेदयित्वा उपरतः। अथ ते राजपुरुषाः पापबुद्धिं शमीशाखायां प्रतिलम्ब्य धर्मबुद्धिं प्रशस्य इदमूचुः,—'अहो! साधु इदमुच्यते,—

उपायं चिन्तयेत् प्राज्ञस्तथाऽपायञ्च चिन्तयेत्।
पश्यतो वकमूर्खस्य नकुलेन हता वकाः' ॥ ४३८ ॥

धर्मबुद्धिः प्राह,—'कथमेतत्?' ते प्रोचुः,—

कथा २०।

'अस्ति कस्मिंश्चिदनोद्देशे (छ) बहुवकसनाथो वटपादपः। तस्य कोटरे कृष्णसर्पः प्रतिवसति स्म। स च वकबालकान् अजातपक्षान् अपि सदैव भक्षयन् कालं नयति। अथ एको वकः

(घ) वह्निभोज्यद्रव्यैः,—इन्धनैः, तृणकाष्ठादिभिः दाह्यैरित्यर्थः।

(ङ) स्फुटितेक्षणः,—स्फुटित—दग्धत्वात् भङ्गमागते, दृष्टये—चक्षितारके इत्यर्थः यस्य तथोक्तः, गलितदृष्टः इति भावः। करुणं—दीनम्। परिदेवयन्—विलपन्। निरक्रामत—बहिरागमत्।

(च) सः,—पापबुद्धिपिता। निवेदयित्वा—कथयित्वा, [सोपसर्गात् धातोः ल्यब्विधानात् क्ष्वाख्यिमित्यादि चिन्त्या। "निवेद्य" इति साधु]। उपरतः,—स्तब्धः।

उपायमिति।—प्राज्ञः बुद्धिमान् जनः, उपायं साधनं, चिन्तयेत् तथा अपायञ्च विनाशमपि, चिन्तयेत्; यथा उपायः चिन्तनीयः, तथा तस्मिन् उपाये अनुसृते आपत्तिरपि क्षोऽप्यपायः आगमिष्यति न वा इत्यपि विभावनीयः इति तात्पर्यम्; तथा हि पश्यतो वकमूर्खस्य ["षष्ठी चानादरे"(२।३।३८ पा०) इति अनादरे षष्ठी] पश्यन्नं मूर्खं वकमनादृत्येत्यर्थः, नकुलेन वकाः हताः नाशिताः॥ ४३८॥

(छ) बहुवकसनाथः,—अनेकवकयुक्तः।

तेन भक्षितानि अपत्यानि दृष्ट्वा अतिदुःखेराक्रान्तः सरस्तीरमासाद्य (ज) बाष्पपूरपूरितनयनः अधोमुखस्तिष्ठति। तस्य तादृक् चेष्टितमवलोक्य कुलीरकः कश्चित् प्रोवाच,—'भाम! किमेवं क्रियते भवता अद्य?' स आह,—'भद्र! किं करोमि? मम मन्दभाग्यस्य बालकाः कोटरनिवासिना सर्पेण भक्षिताः, तद्दुःखदुःखितोऽहं रोदिमि। तत् कथय मे, यदि अस्ति कश्चिदुपायः तद्विनाशाय'। तदाकर्ण्य कुलीरकः चिन्तयामास,—'अयं तावत् (भ) अजन्मजातिसहजवैरी, अतः तथा उपदेशं प्रयच्छामि सत्यानृतं, यथाऽन्येऽपि वकाः सर्वे सङ्क्षयमायान्ति। उक्तञ्च,—

नवनीतसमां वाचीं कृत्वा चित्तन्तु निर्दयम्।
तथा प्रबोध्यते शत्रुः सान्वयो म्रियते यथा' ॥ ४१८ ॥

आह च—'भाम! यदि एवं, तत् मत्स्यमांसखण्डानि नकुलस्य विलद्वारात् सर्पकोटरं यावत् (ज) प्रक्षिप्य, यथा नकुलस्तन्मार्गेण गत्वा तं दुष्टसर्पं विनाशयति'। अथ तथा अनुष्ठिते मत्स्यमांसानुसारिणा नकुलेन तं कृष्णसर्पं निहत्य तेऽपि तदृक्षाश्रयाः सर्वे वकाश्च शनैः शनैर्भक्षिताः। अतो वयं ब्रूमः,—'उपायं चिन्तयेत्' इति। तदनेन पापबुद्धिना उपायश्चिन्तितः, नापायः; ततस्तत्फलं प्राप्तम्'।

एवं मूढ! त्वयाऽपि उपायश्चिन्तितो नापायः पापबुद्धि-

(ज) बाष्पपूरपूरितनयनः,—अश्रुप्रवाहपूर्णाक्षः।

(भ) अजन्मजातिसहजवैरी—अजन्मजातीनां—मत्स्यादीनां, सहजवैरी—स्वभावशत्रुः। सत्यानृतं—सत्यम्, अनृतं—मिथ्या च, सत्येन सह अनृतम् इति वा विग्रहः।

नवनीतेति।—वाचीं वाचं, नवनीतसमां अतिकोमलामित्यर्थः, तु किन्तु, चित्तं मनः, निर्दयं निष्ठुरं, कृत्वा विधाय, शत्रुः रिपुः, तथा तेन प्रकारेण, प्रबोध्यते उपदिश्यते, यथा येन प्रकारेण, सान्वयः सवंशः, म्रियते सर्वं मरिष्यति इत्यर्थः, शत्रुरिति शेषः; येन केनापि प्रकारेण शत्रुनाशस्य अवश्यकर्तव्यत्वादिति भावः ॥ ४१८ ॥

(ज) प्रक्षिप्य—पातय, [क्षिपेर्दैवादिकस्य क्षणि क्षोटि रूपम्]।

वत्। तत् न भवसि त्वं सज्जनः, केवलं पापबुद्धिः असि, ज्ञातो मया स्वामिनः (ट) प्राक्तसन्देहानयनात्; प्रकटीकृतं त्वया स्वयमेवात्मनो दुष्टत्वं कौटिल्यञ्च। अथवा साधु वदमुच्यते,—

यद्वादपि कः पश्येच्छ्लिष्णानाहारनिःसरणमार्गम्?।
यदि जलदध्वनिमुदितास्त एव मूढा न नृत्येयुः॥ ४४०॥

यदि त्वं स्वामिन एनां (ठ) दशां नयसि, तत् अस्माद्विधस्य का गणना? तस्मात् मम आसक्तेन भवता न भाव्यम्।

उक्तञ्च,—तुलां लोहसहस्रस्य यत्र खादन्ति मूषिकाः।
राजन्! तत्र हरेच्छ्येनो बालकं नात्र संशयः" ॥४४१॥

दमनक आह,—"कथमेतत्?" सोऽब्रवीत्,—

कथा २१।

"अस्ति कस्मिंश्चिदधिष्ठाने (ड) जीर्णधनो नाम वणिक्पुत्रः। स च (ढ) विभवक्षयात् देशान्तरगमनमना व्यचिन्तयत्,—

(ट) प्राक्तेति।—जीवेद्र वा इति ग्रन्थोत्पादनात्। प्रकटीकृतं—प्रकाशीकृतम्।

यद्वादिति।—कः यद्वादपि यदनास्थिरेऽपि, स्निग्धिनां मयूराणाम्, आहारनिःसरणमार्गम् अपानं, पुरीषद्वारमित्यर्थः, पश्येत्? न कोऽपीत्यर्थः; यदि मूढाः ते एव स्निग्धिन एव, जलदानां मेघानां, ध्वनिना मुदिताः हृष्टाः सन्तः, न नृत्येयुः; नृत्यकाले एव तेषामाहारनिःसरणमार्गो दृश्यते, नान्यदा इति भावः॥ ४४०॥

(ठ) दशाम्—अवस्थां, दुरवस्थामित्यर्थः, मृत्युदशामिति भावः। अस्मादिति।—अस्माकमपि दृष्टयो दशा त्वया घटयितव्येति अत्र न सन्देह इति भावः।

तुलामिति।—यत्र मूषिकाः लोहसहस्रस्य द्विसहस्रपलसौख्यं, तुलां तोलनयन्त्रं, खादन्ति, हे राजन्! तत्र श्येनः पक्षिविशेषः, बालकं हरेत्; अत्र न संशयः सन्देहो नास्ति इत्यर्थः; अतिकठिनस्य लोहतुलादण्डस्य मूषिकदन्तैकमक्षणं यदा न सम्भवति, तदा श्येनपक्षिणाऽपि बालकहरणम्; एकस्य सम्भवे तु अपरस्यापि सम्भव इति भावः; तथा च त्वं स्वामिनमपि यदा एतादृशीमापदं नयसि, तदा अस्माकम् एतादृशावस्थाया त्वया पातनं नासम्भवमित्यभिप्रायः॥ ४४१॥

(ड) जीर्णधनः,—जीर्णं—चीर्णं, धनं—वित्तं मूलं तपोवा।

(ढ) विभवक्षयात्—धननाशात्।

'यत्र देशेऽथवा स्थाने भोगान् भुक्त्वा स्वचौर्य्यतः।
तस्मिन् विभवहीनो यो वसेत् स पुरुषाधमः॥ ४४२॥

तथा च,—येनाहङ्कारयुक्तेन चिरं विलसितं पुरा।
दीनं वदति तत्रैव यः परेषां स निन्दितः'॥ ४४३॥

(ण) तस्य च गृहे लोहभारघटिता पूर्वपुरुषोपार्जिता तुला आसीत्। (त) तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनम् उवाच,—'भोः श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला'। स आह,—'भोः! नास्ति सा, त्वदीया तुला मूषिकैर्भक्षिता'। जीर्णधन आह,—भोः श्रेष्ठिन्! नास्ति दोषस्ते, यदि सा मूषिकैः भक्षितेति, ईदृक् एवायं संसारः, न किञ्चित् (थ)अत्र शाश्वतमस्ति; परमहं नद्यां स्नानार्थं गमिष्यामि, तत् त्वमात्मीयं शिशुमेनं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषय' इति। सोऽपि चौर्य्यभयात् (द) तस्य शङ्कितः स्वपुत्रमुवाच,—'वत्स! पितृव्योऽयं तव, स्नानार्थं नद्यां

यत्रेति।—यो जनः, यत्र देशे, अथवा स्थाने, स्वचौर्य्यतः निजपौरुषबलात्, भोगान् सुखानि, भुक्त्वा, तस्मिन् पुनः विभवहीनः निर्धनः, वसेत्, स पुरुषेषु मध्ये अधमः; प्रभाववतां धनिनाम् आकाङ्क्षिकदारिद्र्यस्य लघुतासम्पादकत्वादिति भावः॥४४२॥

येनेति।—येन जनेन, पुरा पूर्वम्, अहङ्कारयुक्तेन अहमिकापूर्णेन मता, चिरं दीर्घकालं, विलसितं व्यवहृतं, यत्र पुनः तत्रैव देशे, दीनं कातरतां, वदति व्यनक्ति इत्यर्थः, सः, परेषाम् अन्येषां। [परेषामिति सम्बन्धविवक्षया षष्ठी] निन्दितः तिरस्कृतः, भवति इति शेषः॥ ४४३॥

(ण) तस्य—जीर्णधनस्य। लोहभारघटिता—द्विसहस्रपललौहनिर्मिता इत्यर्थः, "पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः" इति वैद्यकोक्तेः।

(त) तां—तुलामित्यर्थः। निक्षेपभूतां कृत्वा—न्यासीकृत्य इत्यर्थः।

(थ) अत्र—संसारे। शाश्वतम्—अक्षयम्। स्नानेति।—स्नानस्य उपकरणं—तैलादिकं हस्ते यस्य तद्भावभूतम्।

(द) तस्य—जीर्णधनस्य, [सम्बन्धविवक्षया अपादाने षष्ठी]।

यास्यति, तत् गम्यतामनेन सार्द्धं स्नानोपकरणमादाय' इति। अहो! साधु इदमुच्यते,—

न भक्त्या कस्यचित् कोऽपि प्रियं प्रकुरुते नरः।
मुक्त्वा भयं प्रलोभं वा कार्य्यकारणमेव वा ॥ ४४४ ॥

तथा च,—अत्यादरो भवेत् यत्र कार्य्यकारणवर्जितः।
तत्र शङ्का प्रकर्त्तव्या परिणामेऽसुखावहा ॥ ४४५ ॥

अथ असौ वणिक्शिशुः स्नानोपकरणमादाय (ध) प्रहृष्टमनाः तेन अभ्यागतेन सह प्रस्थितः। तथाऽनुष्ठिते स वणिक् ज्ञात्वा तं शिशुं (न) नदीगुहायां प्रक्षिप्य तद्वारं बृहच्छिलया आच्छाद्य सत्वरं गृहमागतः। पृष्टश्च तेन वणिजा,—'भोः अभ्यागत! कथ्यतां कुत्र मे शिशुः, यः त्वया सह नदीं गतः?' इति। स आह,—'नदीतटात् स श्येनेन हृतः' इति। श्रेष्ठी आह,—'मिथ्यावादिन्! किं क्वचित् श्येनो बालं हर्त्तुं शक्नोति? तत् समर्पय मे सुतम्, अन्यथा राजकुले निवेदयिष्यामि' इति। स आह,—'भोः सत्यवादिन्! यथा श्येनो बालं न नयति, तथा मूषिका अपि लोहभारघटितां तुलां न भक्षयन्ति; तत् अर्पय मे तुलां, यदि (प) दारकेण प्रयोजनम्'। एवं तौ विवदमानौ

नेति।—कोऽपि नरः, भयं त्रासहेतुं, प्रलोभं वा प्रलोभनं वा, कार्य्यकारणं वा हेतुहेतुमद्भावं वा, मुक्त्वा विहाय, भक्त्या अनुरागेण एव, कस्यचित् प्रियम् उपकारं, न प्रकुरुते न विदधाति इत्यर्थः, ["गत्यनादरयोपधे—" (१।३।२२ पा०) इत्यात्मनेपदम्]; प्रियकरणं लोकस्य भयादधीनं, न तु भक्तिनिबन्धनमिति भावः ॥४४४॥

अत्यादर इति।—यत्र कार्य्यकारणवर्जितः विना कार्य्यकारणमित्यर्थः, अत्यादरः अतिभक्तिः, भवेत्, तत्र तस्मिन् आदरे, परिणामे अनुबन्धे शङ्का विपत्ति इत्यर्थः, शङ्का प्रकर्त्तव्या; कारणमन्तरेण प्रहृष्टादरत्वात्सम्भवादिति भावः ॥ ४४५ ॥

(ध) प्रहृष्टमनाः,—सन्तुष्टचित्तः। अभ्यागतेन—आगन्तुकेन, नवीनेनेत्यर्थः।

(न) नदीगुहायां—नदीतीरस्थगर्ते। तद्वारं—गुहाद्वारम्।

(प) दारकेण—पुत्रेण।

द्वौ अपि राजकुलं गतौ। तत्र श्रेष्ठी तारस्वरेण प्रोवाच,—'भोः! अब्रह्मण्यम्!! अब्रह्मण्यम्!!! मम शिशुः अनेन चीरेण अपहृतः'। अथ धर्माधिकारिणः तमूचुः,—'भोः! समर्प्यतां श्रेष्ठिसुतः'। स आह,—'किं करोमि? पश्यतो मे नदीतटात् श्येनेन अपहृतः शिशुः'। तच्छ्रुत्वा ते प्रोचुः,—'भोः! न सत्यमभिहितं भवता; किं श्येनः शिशुं हर्तुं समर्थो भवति?' स आह,—'भो भोः! श्रूयतां मदचः,—

तुलां लोहसहस्रस्य यत्र खादन्ति मूषिकाः।
राजन्! तत्र हरेच्छ्येनो बालकं नात्र संशयः' ॥४४६॥

ते प्रोचुः,—'कथमेतत्?' ततः श्रेष्ठी सभ्यानाम् अग्रे आदितः सर्वं वृत्तान्तं निवेदयामास। ततः तैर्विहस्य द्वौ अपि तौ परस्परं सम्बोध्य तुला-शिशुप्रदानेन सन्तोषितौ। अतोऽहं ब्रवीमि,—'तुलां लोहसहस्रस्य' इति।

तन्मूर्ख! (फ) सश्लोकप्रसादम् असहमानेन त्वया एतत् कृतम्। अहो! साधु इदमुच्यते,—

प्रायेणात्र कुलान्वितं कुकुलजाः श्रीवल्लभं दुर्भगा
दातारं कृपणा ऋजूननृजवो वित्ते स्थितं निर्धनाः।
वैरूप्योपहताश्च कान्तवपुषं धर्माश्रयं पापिनो
नानाशास्त्रविचक्षणञ्च पुरुषं निन्दन्ति मूर्खाः सदा ॥४४७॥

तुलामिति।—१८६ पृष्ठे व्याख्यातं प्राक् ॥ ४४६ ॥

(फ) सश्लोकप्रसादं—सश्लोके राजकृतानुग्रहम् इत्यर्थः।

प्रायेणेति।—अत्र जगति, प्रायेण कुकुलजाः नीचकुलोत्पन्नाः, जनाः इति शेषः, कुलान्वितं सत्कुलीनं, दुर्भगाः मन्दभाग्याः, श्रीवल्लभं लक्ष्मीप्रियमित्यर्थः, कृपणाः दातारम्, ऋजूनृजवः कुटिलाः, नराः इति शेषः, ऋजून् सरलान् नरान् इत्यर्थः, निर्धनाः वित्ते स्थितं धनिनं, वैरूप्योपहताः कुरूपाः, कान्तवपुषं रम्याकृतिं, पापिनः धर्माश्रयं धार्मिकं, तथा मूर्खाः, नानाशास्त्रेषु विचक्षणं पण्डितं, पुरुषं सदा

तथा च,—मूर्खाणां पण्डिता द्वेष्या निर्धनानां महाधनाः।
व्रतिनः पापशीलानामसतीनां कुलस्त्रियः ॥ ४४८ ॥
तन्मूर्ख ! त्वया हितमपि अहितं कृतम्। उक्तञ्च,—
पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारकः।
वानरेण हतो राजा विप्रास्त्रीरेण रक्षिताः" ॥ ४४९ ॥
दमनक आह,—"कथमेतत् ?" सोऽब्रवीत्,—

कथा २२।

"कस्यचित् राज्ञो नित्यं वानरोऽतिभक्तिपरो (ब) अङ्गसेवकोऽन्तःपुरेऽपि अप्रतिषिद्धप्रसरोऽतिविश्वासस्थानम् अभूत्। एकदा राज्ञो निद्रां गतस्य वानरं (भ) व्यजनं नीत्वा वायुं विदधति वक्त्रःस्थलोपरि मक्षिका उपविष्टा ; व्यजनेन मुहुर्मुहुर्निषिध्यमानाऽपि पुनःपुनः तत्रैव उपविशति। ततः तेन स्वभावचपलेन मूर्खेण वानरेण क्रुद्धेन सता तीक्ष्णं खड्गम्

निन्दन्ति ; स्वाधिक्यगुणवतां जनानामुत्कर्षासहनमेव नीचानां स्वभावः इति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ ४४७ ॥

मूर्खाणामिति।—पण्डिताः विद्वांसः, मूर्खाणां शास्त्रज्ञानविवर्जितानां, महाधनाः धनिनः, निर्धनानां धनहीनानां, व्रतिनः धर्मानुष्ठायिनः, पापशीलानाम् अधर्मकर्मनिरतानां, तथा कुलस्त्रियः कुलकामिन्यः, पतिपरायणाः रमण्य इत्यर्थः, असतीनां कुलटानां, द्वेष्याः विद्वेषास्पदानि, निन्दनीयाः इति यावत्, भवन्ति इति शेषः ॥ ४४८ ॥

पण्डित इति।—पण्डितः विद्वान्, शत्रुरपि वरं मनाक् प्रियः, हितकारकः प्रियकारी, मूर्खो न, वरमिति शेषः ; तथा हि, राजा वानरेण, हितकारकेण मूर्खेण इति भावः, हतः, विप्राः चौरेण तस्करेण, प्राणहरणच्छलेनापि पण्डितेनेति भावः, रक्षिताः परित्राताः ॥ ४४९ ॥

(ब) अङ्गसेवकः,—शरीरपरिचारकः। अप्रतिषिद्धप्रसरः,—अव्याहतगतिः। अतिविश्वासस्थानं—सम्यक्प्रत्ययभाजनम्।

(भ) व्यजनं—तालवृन्तम्। विदधति—कुर्वति, [भावे सप्तमी]।

आदाय तस्या उपरि प्रहारो विहितः। ततो मक्षिका उड्डीय गता, तेन (म) ग्रितधारेण असिना राज्ञो वक्षो द्विधा जातं, राजा मृतश्च। तस्मात् चिरायुरिच्छता नृपेण मूर्खोऽनुचरो न रक्षणीयः। अपरम्,—

एकस्मिन् नगरे कोऽपि विप्रो महाविद्वान् परं पूर्वजन्मयोगेन चौरो वर्त्तते। स तस्मिन् पुरेऽन्यदेशात् आगतान् चतुरो विप्रान् बहूनि वस्तूनि (य) विक्रीणतो दृष्ट्वा चिन्तितवान्,—'अहो! केन उपायेन एषां धनं लभे?' इति विचिन्त्य तेषां पुरोऽनेकानि शास्त्रोक्तानि सुभाषितानि च अतिप्रियाणि मधुराणि वचनानि जल्पता तेषां मनसि विश्वासमुत्पाद्य सेवा कर्त्तुमारब्धा। अथवा साधु इदमुच्यते,—

असतौ भवति सलज्जा चारं नीरञ्च शीतलं भवति।
दग्धो भवति विवेकी प्रियवक्ता भवति धूर्त्तजनः॥ ४५०॥

अथ तस्मिन् सेवां कुर्वति तैः विप्रैः सर्ववस्तूनि विक्रीय बहुमूल्यानि रत्नानि क्रीतानि। ततः तानि जङ्घामध्ये (र) तत्समत्वं प्रक्षिप्य स्वदेशं प्रति गन्तुमुद्यमो विहितः। ततः स धूर्त्तविप्रस्तान् विप्रान् गन्तुमुद्यतान् प्रेक्ष्य चिन्ताव्याकुलितमनाः सञ्जातः,—'अहो! धनमेतत् न किञ्चित् मम(ल) चटितम्। अथ एभिः सह यामि, पथि क्वापि विषं दत्त्वा एतान् निहत्य

(म) ग्रितधारेण—तीक्ष्णधारेण।

(य) "परिव्यवेभ्यः क्रियः" (१।३।१८ पा०) इत्यात्मनेपदनियमात् "विक्रीणानान्" इति पदमेवात्र साधु, "विक्रीणतः" इति प्रयोगस्तु चिन्तनीयः।

असतीति।—असती कुलटा, सलज्जा कपटलज्जावती, भवति; चारं जलञ्च, नीरं जलञ्च, शीतलं भवति; दग्धो वञ्चितो जनः, विवेकी प्रज्ञाव्याप्तोपहितः, भवति, धूर्त्तजनश्च प्रियवक्ता प्रियवादी, भवति॥ ४५०॥

(र) तत्समत्वं—तस्य चौरस्य समत्वम्।

(ल) चटितं—दत्तं, ["चट भेदने" इति भौवादिकस्य निष्ठायां रूपम्]।

सर्वरत्नानि गृह्णामि' इति विचिन्त्य तेषामग्रे सकरुणं विलप्य इदमाह,—'भोः ! मित्राणि ! यूयं माम् एकाकिनं मुक्त्वा गन्तुमुद्यताः, तन्मे मनो भवद्भिः सह स्नेहपाशेन बद्धं भवद्विरहनाम्नैव आकुलं सञ्जातं, (व) यथा धृतिं क्वापि न धत्ते ; यूयम् अनुग्रहं विधाय सहायभूतं मामपि सहैव नयत' । तदुचः श्रुत्वा ते करुणार्द्रचित्ताः तेन सममेव स्वदेशं प्रति प्रस्थिताः । अथ अध्वनि तेषां पञ्चानामपि पञ्चोपुरमध्ये (श) व्रजतां ध्वाङ्क्षाः कथयितुम् आरब्धाः,—'रे रे किराताः ! धावत धावत, सपादलक्षधनिनो यान्ति ; एतान् निहत्य धनं नयत' ।

ततः किरातैः ध्वाङ्क्षवचनम् आकर्ण्य सत्वरं गत्वा ते विप्राः (ष) लगुडप्रहारैः जर्जरीकृत्य वस्त्राणि मोचयित्वा विलोकिताः, परं धनं किञ्चिन्न लब्धम् । तदा तैः किरातैः अभिहितं,—'भोः पान्थाः ! पुरा कदाऽपि (स) ध्वाङ्क्षवचनमनृतं न आसीत्, ततो भवतां सन्निधौ क्वापि धनं विद्यते, तत् अर्पयत, अन्यथा सर्वेषामपि वधं विधाय (ह) चर्म विदार्य प्रत्यङ्गं प्रेक्ष्य धनं नेष्यामः' । तदा तेषाम् ईदृशं वचनम् आकर्ण्य चौरविप्रेण मनसि चिन्तितं,—'यदा एषां विप्राणां वधं विधाय अङ्ग विलोक्य रत्नानि नेष्यन्ति, तदा माम् अपि वधिष्यन्ति । ततोऽहं पूर्वमेवात्मानम् (क्ष) अरत्नं समर्प्य एतान् मुञ्चामि । उक्तञ्च,—

(व) यथा—येन विरहेणेत्यर्थः । धृतिं—सन्तोषम् ।

(श) व्रजतां—गच्छताम् । ध्वाङ्क्षाः,—काकाः । किराताः,—व्याधाः । सपादलक्षधनिनः,—पञ्चविंशतिसहस्राधिकलक्षसङ्ख्याकद्रविणवन्तः ।

(ष) लगुडप्रहारैः,—दण्डाघातैः । जर्जरीकृत्य—कुट्टयित्वा ।

(स) ध्वाङ्क्षवचनं—काकवाक्यम् । अनृतम्—अलीकं, मिथ्या इत्यर्थः ।

(ह) चर्म—त्वक् । प्रत्यङ्गं—सर्वाणि अङ्गानि, [नीत्याऽत्र अव्ययीभावः] ।

(क्ष) अरत्नं—रत्नहीनम् । एतान्—विप्रान् । मुञ्चामि किरातेभ्यो मोचयामि

मृत्योर्बिभेषि किं बाल ! न स भीतं विमुञ्चति ।
अद्य वाऽब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥४५१॥

तथा च,—गवार्थे ब्राह्मणार्थे च प्राणत्यागं करोति यः ।
सूर्यस्य मण्डलं भित्त्वा स याति परमां गतिम्' ॥४५२॥

इति निश्चित्य अभिहितं,—'भोः किराताः ! यदि एवं, ततो मां पूर्वं निहत्य विलोकय' । ततः तैः तथाऽनुष्ठिते तं धनरहितमवलोक्य अपरे चत्वारोऽपि सुप्ताः । अतोऽहं ब्रवीमि,—'पण्डितोऽपि वरं शत्रुः' इति" ।

अथ एवं (क) संवदतोस्तयोः सञ्जीवकः क्षणमेकं पिङ्गलकेन सह युद्धं कृत्वा तस्य खरनखरप्रहाराभिहतो गतासुः वसुन्धरापीठे निपपात । अथ तं गतासुम् अवलोक्य पिङ्गलकस्तृणाक्षरणार्द्रहृदयः प्रोवाच,—"भोः ! अयुक्तं मया पापेन कृतं सञ्जीवकं व्यापादयता, यतो विश्वासघातादन्यत् नास्ति पापतरं कर्म । उक्तञ्च,—मित्रद्रोही कृतघ्नश्च यश्च विश्वासघातकः ।
ते नरा नरकं यान्ति यावच्चन्द्रदिवाकरौ ॥ ४५३ ॥

इत्यर्थः, मयि चरणे दृष्टे सर्वं एव दिक्षा इति विज्ञाय सर्वान् विप्रान् किराताः मोचयिष्यन्तीति भावः ।

मृत्योरिति ।—हे बाल ! विवेकहीन ! किं कथं, मृत्योः बिभेषि ? स मृत्युः, भीतं जनं, न विमुञ्चति न त्यजति; अद्य वा अब्दशतान्ते वर्षशतान्ते वा, प्राणिनां मृत्युः ध्रुवः निश्चितः ; न कोऽपि मृत्युदुःखात् आत्मानं मोचयितुमीष्टे इति फलितम् । अतो मयाऽत्र निर्भीकेण भवितव्यमिति भावः ॥ ४५१ ॥

गवार्थे इति ।—यः गवार्थे गोरक्षणार्थे, ब्राह्मणार्थे ब्राह्मणरक्षणार्थञ्च, प्राणत्यागं करोति प्राणान् त्यजति, सः सूर्यस्य मण्डलं भित्त्वा अतिक्रम्येत्यर्थः, परमां उत्कृष्टां, गतिं लोकमिति यावत्, याति प्राप्नोति, मुक्तो भवतीत्यर्थः ॥ ४५२ ॥

(क) संवदतोः,—परस्परं जल्पतोः । तयोः,—दमनक-करटकयोः । खरनखरप्रहाराभिहतः,—तीक्ष्णनखाघाततर्जितः इत्यर्थः । गतासुः,—मृतः ।

मित्रद्रोहीति ।—यः मित्रद्रोही सुहृदानपकारकः, यश्च कृतघ्नः उपकारस्य

भूमिच्चये राजविनाश एव भृत्यस्य वा बुद्धिमतो विनाशे ।
नो युक्तमुक्तं ह्यनयोः समत्वं नष्टाऽपि भूमिः सुलभा न भृत्याः॥४५४॥

तथा मया सभामध्ये स सदैव प्रशंसितः । तत् किं कथयिष्यामि तेषामग्रतः !! उक्तञ्च,—

उक्तो भवति यः पूर्वं गुणवानिति संसदि ।
न तस्य दोषो वक्तव्यः प्रतिज्ञाभङ्गभीरुणा" ॥ ४५५ ॥

एवंविधं प्रलपन्तं दमनकः समेत्य सहर्षमिदमाह,—"देव ! (ख) कातरतमस्तव एष न्यायः, यत् द्रोहकारिणं शष्पभुजं हत्वा इत्थं शोचसि ; तन्न एतत् उपपन्नं भूभुजाम् ।
उक्तञ्च,—पिता वा यदि वा भ्राता पुत्रो भार्याऽथवा सुहृत् ।
प्राणद्रोहं यदा गच्छेद्धन्तव्यो नास्ति पातकम् ॥ ४५६ ॥

विश्वासं, यश्च विश्वासघातकः विश्वासकारिणः अपकर्त्ता, ते नराः चन्द्रदिवाकरौ यावत्, तिष्ठत इति शेषः, तावत् नरकं यान्ति निरयं प्राप्नुवन्ति ॥ ४५३ ॥

भूमीति ।—भूमिच्चये राज्यनाशे, वा बुद्धिमतः सदसद्विवेकशालिनः इत्यर्थः, भृत्यस्य विनाशे राजविनाश एव राज्ञ एव मरणम् ; किन्तु अनयोः भूमिच्चयभृत्यनाशयोः, समत्वं समानता, यदुक्तं कविना, तत् नो युक्तं नोचितं, हि यतः, भूमिः नष्टाऽपि सुलभा अनायासेन लभ्या, भृत्याः, न, सुलभा इत्यनुषङ्गः, तस्मात भृत्यविनाशो भूमिच्चयादधिको राजहानिकर इति भावः । इन्द्रवज्रा वृत्तम् ॥ ४५४ ॥

उक्त इति ।—यः यो हि जनः, पूर्वं, येनेति अध्याहार्यम् ; संसदि सभायां, गुणवानिति उक्तः भवति, प्रतिज्ञाभङ्गभीरुणा पूर्ववाक्यालीकत्वभयाकुलेन, तेनेति शेषः, तस्य जनस्य, दोषः प्रस्तावापराधोऽपीति भावः,न वक्तव्यः ; तथात्वे पूर्वापरविरोधे महत्त्वहानिः व्यादीति भावः ॥ ४५५ ॥

(ख) कातरतमः,—आतदीनः, दुर्बलोचित इत्यर्थः । न्यायः,—व्यवहारः । द्रोहकारिणम्—अनिष्टकारिणम् । शष्पभुजं—तृणाशिनम् । उपपन्नं—युक्तम् । भूभुजां—राज्ञाम् ।

पितेति ।—पिता वा, भ्राता यदि वा, पुत्रो वा, भार्या वा, अथवा सुहृत मित्रं, यदा प्राणद्रोहं गच्छेत् प्राणान् हन्तुमिच्छेदित्यर्थः, तदा हन्तव्यः वध्यः, तत्र पातकं नास्ति, आततायिवधस्यापापजनकत्वस्मरणादिति भावः ॥ ४५६ ॥

तथा च,— राजा घृणी ब्राह्मणः सर्वभक्षी
स्त्री चाव्रता दुष्टमतिः सहायः ।
प्रेष्यः प्रतीपोऽधिकृतः प्रमादी
त्याज्या अमी यश्च कृतं न वेत्ति ॥ ४५७ ॥

अपि च,— सत्याऽनृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
भूरिव्यया प्रचुरवित्तसमागमा च
वेश्याऽङ्गनेव नृपनीतिरनेकरूपा ॥ ४५८ ॥

अपि च,— अकृतोपद्रवः कश्चिन्महानपि न पूज्यते ।
पूजयन्ति नरा नागान् न तार्क्ष्यं नागघातिनम् ॥४५९॥

राजेति ।—घृणी [घृणा कृपा अस्य अस्ति इति इनिः] दयालुः, दयार्द्रहृदयत्वात् दुष्टनिग्रहासमर्थ इति भावः, ("घृणा जुगुप्साकृपयोः" इति मेदिनी) राजा ; सर्वभक्षी सर्वभोजी, खाद्याखाद्यविचाररहितः इत्यर्थः, सदाचारविवर्जित इति भावः, ब्राह्मणः ; अव्रता निर्लज्जा, स्त्री कुलस्त्री इत्यर्थः, दुष्टमतिः कलुषितबुद्धिः, सहायः सहचरः ; "संसर्गजा दोषगुणा भवन्ति" इति भरतादिति भावः ; प्रतीपः प्रतिकूलः ; प्रेष्यः भृत्यः ; प्रमादी अनवधानवान्, अधिकृतः अध्यक्षः, राज्ञः प्रधानपुरुष इत्यर्थः, तथा यश्च कृतं कृतोपकारं न वेत्ति न स्मरतीत्यर्थः, कृतघ्न इति भावः, अमी त्याज्याः, न आश्रयणीया इति भावः । इन्द्रवज्रा वृत्तम् ॥ ४५७ ॥

सत्येति ।—नृपनीतिः राजनीतिः, वेश्याऽङ्गनेव वारवनितेव, अनेकरूपा बहुप्रकारा, बहुरूपविलासा इत्यर्थः, यतः सा क्वचित् सत्या, क्वचिदनृता मिथ्या च, परुषा निष्ठुरा, प्रियवादिनी च, हिंस्रा दयालुरपि च, अर्थपरा स्वार्थतत्परा, वदान्या बहुप्रदा चेत्यर्थः, भूरिव्यया बहुव्ययकारिणी, तथा प्रचुरवित्तसमागमा बहुधनोपार्जनशीला च ; सत्यानृतत्वादीनां परस्परविरुद्धानामपि प्रियाप्रियविषयकतया एकत्र धर्मिभूतायां वेश्याऽङ्गनायां राजनीतौ च स्थितिर्न विरुध्यते इति ज्ञेयम् । वसन्ततिलकं वृत्तम् ॥ ४५८ ॥

अकृतोपद्रव इति ।—अकृतः अननुष्ठितः, उपद्रवः अत्याचारः, परपीडनमित्यर्थः, येन तादृशः, महानपि कश्चित् न पूज्यते नादियते ; तथा हि, नराः नागान् सर्पान्, अत्याचारिण इति भावः, पूजयन्ति, नागघातिनं सर्पहन्तारं, तार्क्ष्यं गरुडं, न पूजयन्ति

तथा च,—अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः" ॥ ४६० ॥

एवं तेन सम्बोधितः पिङ्गलकः सञ्जीवकशोकं त्यक्त्वा दमनकसाचिव्येन राज्यमकरोत् ।

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे मित्रभेदं नाम प्रथमं तन्त्रम् ॥ १ ॥

अथ मित्रसम्प्राप्ति नाम द्वितीयं तन्त्रम् ।

अथ इदमारभ्यते (क)मित्रसम्प्राप्ति नाम द्वितीयं (ख)तन्त्रम्; तस्य अयमाद्यः श्लोकः,—

असाधना अपि प्राज्ञा बुद्धिमन्तो बहुश्रुताः ।
साधयन्त्याशु कार्याणि काकाखुमृगकूर्मवत् ॥ १ ॥

तद्यथा अनुश्रूयते,—

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् ।

दृश्यन्ते इत्यनुषङ्गः, सर्वत्र भक्तिः अयमूलिका एव, न तु क्वचित् भावमूलिका दृश्यते इति भावः ॥ ४५९ ॥

अशोच्यानिति ।—त्वम् अशोच्यान् शोकानर्हान्, अनन्वशोचः अनुशोचसीत्यर्थः, [सामान्यवचनेऽपि लङ्] प्रज्ञावादांश्च बुद्धियुक्तवचनानि च, अथवा प्रज्ञानां पण्डितानाम्, अवादान् अवाच्यान्, तथा च पण्डिता नैवं वदन्तीत्यर्थः, भाषसे कथयसि ; किन्तु पण्डिताः प्राज्ञाः, गतासून् मृतान्, अगतासूंश्च असतश्च, न अनुशोचन्ति ; मृतानुशोचनात् नितराम् अपण्डितत्वमिति भावः ॥ ४६० ॥

(क) मित्रसम्प्राप्तिः,—मित्रस्य सम्प्राप्तिः यत्र इति विग्रहे सुहृन्मिलनसाधनम् इत्यर्थः ।

(ख) तन्त्रं—प्रबन्धः, परिच्छेदः इति वा, अध्याय इति यावत् ।

असाधना इति ।—बुद्धिमन्तः, बहुश्रुताः बहुशास्त्रदर्शिनः, श्रुतसंस्कारहृतात्मानो वा, प्राज्ञाः विद्वांसः, जना इति शेषः, असाधनाः निरुपायाः अपि, काकाखुमृगकूर्मवत् काकमूषिकहरिणकच्छपा इव, आशु शीघ्रं. कार्याणि साधयन्ति निष्पादयन्ति ॥ १ ॥

तस्य (ग) नातिदूरस्थो महोच्छ्रायवान् नानाविहङ्गोपभुक्त-फलः कोटैः आहृतकोटरः (घ) छायाऽऽश्वासितपथिकजनसमूहो न्यग्रोधपादपो महान्। अथवा युक्तं,—

छायासुप्तमृगः शकुन्तनिवहैर्विष्वग्विलुप्तच्छदः
कोटैराहृतकोटरः कपिकुलैः स्कन्धे कृतप्रश्रयः।
विश्रब्धं मधुपैर्निपीतकुसुमः श्लाघ्यः स एव द्रुमः
सर्वाङ्गैर्बहुमत्स्वमङ्गसुखदो भूभारभूतोऽपरः॥ २॥

तत्र च लघुपतनको नाम वायसः प्रतिवसति स्म। स कदाचित् (ङ) प्राणयात्रार्थं पुरम् उद्दिश्य प्रचलितो यावत् पश्यति, तावत् (च) जालहस्तोऽतिकृष्णतनुः स्फुटितचरणः कर्कु-

(ग) नातिदूरस्थः,—समीपस्थः, [नञर्थेन न-शब्दस्य 'सुप्सुपा' इति समासः] महोच्छ्रायवान्—अत्युन्नतः। नानेति।—नानाविहङ्गैः विविधपक्षिभिः, उपभुक्तानि भक्षितानीत्यर्थः, फलानि यस्य तथाविधः।

(घ) छायेति।—छायया आश्वासितः,—छायादानेन तर्पितः, पथिकजनानां समूहो येन तथोक्तः। न्यग्रोधपादपः,—वटवृक्षः। महान्—श्लाघ्य इत्यर्थः।

छायेति।—छायासु अनातपेषु, सुप्ता लुप्ता यस्य तथोक्तः, विष्वक् समन्तात्, शकुन्तनिवहैः पक्षिसङ्घैः, विलुप्ताः त्रोटिताः, भक्षिताः वा, छदाः पक्षाणि यस्य तादृशः, कोटैः क्षुद्रजीवविशेषैः, आहृतानि व्याप्तानि, कोटराणि यस्य तादृशः, कपिकुलैः वानरवृन्दैः, स्कन्धे प्रकाण्डदेशे, कृतः प्रश्रयः प्रणयः, आश्रयग्रहणादिति भावः, "प्रश्रयप्रणयौ समौ" इत्यमरः, यस्य तादृशः, मधुपैः भ्रमरैः, विश्रब्धं निःशङ्कं, निर्जनत्वादिति भावः; निपीतानि निःशेषेण आस्वादितानि, कुसुमानि पुष्पमधूनि इत्यर्थः, यस्य तथोक्तः, तथा सर्वैः अङ्गैः शाखाप्रशाखादिभिः, बहुना सत्त्वानां प्राणिना, मङ्गं संसर्गं, आश्रयणं इत्यर्थः, सुखदः, य इति शेषः, स एव द्रुमः वृक्षः, श्लाघ्यः प्रशस्यः, अपरः एतद्व्यतिरिक्तः, भुवः पृथिव्याः, भारभूतः भारस्वरूपः, अकिञ्चित्करः इत्यर्थः; सर्वेषामपि विशेषेण आश्रयदाता एव धन्यः, नेतर इति भावः। शार्दूल-विक्रीडितं छन्दः॥ २॥

(ङ) प्राणयात्रार्थं—जीविकान्वेषणार्थमित्यर्थः। पुरं—नगरम्।

(च) जालहस्तः,—वागुराधारी। स्फुटितचरणः,—विदीर्णचरणतलः।

केश: (छ) यमकिङ्करआकारो नर: सम्मुखो बभूव। अथ तं दृष्ट्वा शङ्कितमना व्यचिन्तयत्,—"यदयं दुरात्मा अद्य मम आश्रयवटपादपसम्मुखोऽभ्येति, तन्न ज्ञायते, अद्य वटवासिनां विहङ्गमानां सङ्क्षयो भविष्यति न वा?" एवं बहुविधं विचिन्त्य तत्क्षणाच्चित्रत्य तमेव वटपादपं गत्वा सर्वान् विहङ्गमान् प्रोवाच,—"भो:! अयं दुरात्मा लुब्धको जालतण्डुलहस्त: समभ्येति; तत् सर्वथा तस्य न विश्वसनीयम्। एष जालं प्रसार्य्य तण्डुलान् प्रक्षेप्स्यति, ते तण्डुला भवद्भि: सर्वैरपि कालकूटसदृशा द्रष्टव्या:"। एवं वदतस्तस्य स (ज) लुब्धकस्तत्र वटतले आगत्य जालं प्रसार्य्य सिन्दुवारसदृशान् तण्डुलान् प्रक्षिप्य न अतिदूरं गत्वा निभृत: स्थित:। अथ ये पक्षिण: तत्र स्थिता:, ते (झ) लघुपतनकवाक्यार्गलया निवारितास्तान् तण्डुलान् (ज) डालाडलाङ्कुरान् इव वीक्षमाणा निभृता: तस्थु:।

अत्रान्तरे चित्रग्रीवो नाम कपोतराज: सहस्रपरिवार: प्राणयात्रार्थं परिभ्रमन् तान् तण्डुलान् दूरतोऽपि पश्यन् लघुपतनकेन निवार्यमाणोऽपि जिह्वालौल्यात् भक्षणार्थम् अपतत्, सपरिवारो निबद्धश्च। साधु दृष्टमुच्यते,—

(छ) यमकिङ्करआकार:,—यमदूतसदृश:।

(ज) लुब्धक:,—व्याध:। सिन्दुवारेति।—सिन्दुवारश्च "निर्गुण्डी" इति प्रसिद्धवृक्षजातकुसुमश्च, सदृशान् तुल्यान्, तस्य श्वेतत्वादिति भाव:; तथा च "मुक्ताकलापीकृतसिन्दुवारम्" इति कुमारे श्वेतपुष्पत्वात् मुक्ताशुक्लत्वसुकरम्। निभृत:,—प्रच्छन्न:, गुप्त इति यावत्।

(झ) लघुपतनकेति।—लघु—क्षिप्रं, पतनम्—उड्डयनं यस्य तस्य, तदाख्यस्य खगस्य इत्यर्थ:, वाक्यमेव अर्गला—द्वारावरोधकदारुविशेष: तया।

(ञ) डालाडलाङ्कुरान्—विपत्तिपरीक्षान्। वीक्षमाणा:,—पश्यन्त:। निभृता:,—प्रच्छन्ना:, गुप्तभावेनेत्यर्थ:।

जिह्वालौल्यप्रसक्तानां जलमध्यनिवासिनाम्।
अचिन्तितो वधोऽज्ञानां मीनानामिव जायते ॥ ३ ॥
अथवा (ट) दैवप्रतिकूलतया भवति एवं, न तस्य दोषोऽस्ति।
उक्तञ्च,—पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्?
रामेणापि कथं न हेमहरिणस्यासम्भवो लक्षितः?।
अक्षैरप्यपि युधिष्ठिरेण सहसा प्राप्तो ह्यनर्थः कथम्?
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ॥ ४ ॥
तथा च,—कृतान्तपाशबद्धानां दैवोपहतचेतसाम्।
बुद्धयः कुञ्जगामिन्यो भवन्ति महतामपि ॥ ५ ॥
अत्रान्तरे (ठ) लुब्धकस्तान् बद्धान् विज्ञाय प्रहृष्टमनाः

जिह्वेति।—जिह्वाया रसनायाः, लौल्यं चापल्यं, तस्मिन् प्रसक्तानाम् आसक्तानाम्, अतिलुब्धानाम इत्यर्थः, अज्ञानां मूढानां, जलमध्यनिवासिनां सलिलमध्यस्थानां, मीनानां मत्स्यानामिव, अचिन्तितः अतर्कितः, वधः विनाशः, जायते सम्पद्यते, अतः अतिलोभो न कर्त्तव्यः इति भावः ॥ ३ ॥

(ट) दैवप्रतिकूलतया—भाग्यविपर्य्ययेण।

पौलस्त्य इति।—पुलस्त्यस्यापत्यं पुमान् पौलस्त्यः पुलस्त्यकुलोत्पन्नः रावण इत्यर्थः, कथम् अन्यदारहरणे परस्त्रीहरणे, दोषं न विज्ञातवान्? विदितवतोऽपि कथं बुद्धिभ्रंशः सञ्जात इति भावः; रामेणापि प्रभापुरुषेणापि, हेमहरिणस्य काञ्चनमृगस्य, असम्भवः कथं न लक्षितः? युधिष्ठिरेणापि अक्षैः द्यूतैः, कथं सहसा अनर्थः विपत्, प्राप्तः ईदृशः? पूर्वोक्तमर्थं दृढयति, प्रत्यासन्नेति।—प्रत्यासन्नया समीपवर्त्तिन्या, उपस्थितया इत्यर्थः, विपत्त्या विपदा, मूढं विभ्रान्तं, मनो येषां तादृशानां, मतिः बुद्धिः, प्रायः बाहुल्येन, क्षीयते स्वयमेव विलुप्यते, [कर्मकर्त्तर्य्ययं प्रयोगः]; विनाशकाले हि प्रायेणतामपि बुद्धिविपर्य्ययो जायते इति भावः। अथान्तरस्याक्षोऽलङ्कारः। मार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

कृतान्तेति।—कृतान्तस्य यमस्य, पाशेन रज्ज्वा, बद्धानां, सन्निहितमृत्यूनामित्यर्थः, दैवेन, दुष्टेन इति भावः, उपहतं विभ्रान्तमित्यर्थः, चेतः चित्तं येषां तादृशानां, महतामपि बुद्धयः कुञ्जगामिन्यः कुञ्जवत् सङ्कुचितप्रसराः, जड़धाया इत्यर्थः, भवन्ति ॥ ५ ॥

(ठ) लुब्धकः,—व्याधः।

(ङ) प्रोद्यतयष्टिः तद्वधार्थं प्रधावितः । चित्रग्रीवोऽपि आत्मानं सपरिवारं बद्धं मत्वा लुब्धकमायान्तं दृष्ट्वा तान् कपोतान् ऊचे, —"न भेतव्यम । उक्तञ्च,—

व्यसनेष्वेव सर्वेषु यस्य बुद्धिर्न हीयते ।
स तेषां पारमभ्येति तत्प्रभावादसंशयम् ॥ ६ ॥
सम्पत्तौ च विपत्तौ च महतामेकरूपता ।
उदये सविता रक्तो रक्तश्चास्तमये तथा ॥ ७ ॥

तत् सर्वे वयं हेलया उड्डीय सपाशजालाः अस्य अदर्शनं गत्वा (ढ) मुक्तिं प्राप्नुमः, नो चेत् भयविह्वलाः सन्तः हेलया समुत्पातं न करिष्यथ, ततो मृत्युमवाप्स्यथ । उक्तञ्च,—

तनवोऽप्यायता नित्यं तन्तवो बहुलाः समाः ।
बह्वीर्न बहुत्वादायासान् सहन्तीत्युपमा सताम्" ॥ ८ ॥

(ङ) प्रोद्यतयष्टिः,—उद्यतदण्डः ।

व्यसनेष्विति ।—सर्वेषु व्यसनेषु विपत्सु एव, यस्य बुद्धिः न हीयते [हाधातोः कर्मकर्तरि लट्] स्वयमेव न भ्रश्यते, सः तत्प्रभावात् तस्याः बुद्धेः, प्रभावात् मामप्यांत, असंशयं निःसन्देहं यथा तथा, तेषां व्यसनानां, पारम् अन्तम्, अभ्येति प्राप्नोति, धीराः विपद्भ्रः स्वयमेव उत्तीर्यन्ते इति भावः ॥ ६ ॥

सम्पत्तावितिः—सम्पत्तौ अभ्युदये च, विपत्तौ विपादे च, महताम् एकरूपता समभावः एव, न भावान्तरमिति भावः, विद्यते इति शेषः ; तथा हि सविता सूर्यः, उदये रक्तः लोहितवर्णः, तथा अस्तमये च रक्तः, न तु उदयास्तमययोर्भिन्नरूपमिति भावः । ["उदेति सविता ताम्रस्ताम्र एवास्तमेति च । उत्सवे व्यसने चैव महतामेकरूपता ॥" इति पाठान्तरम्] ॥ ७ ॥

(ढ) मुक्तिं—मोक्षं, अतस्त्वामित्यर्थः, ("मुक्तिर्मोक्षे च मोचने" इति मेदिनी) । हेलया—अवज्ञया । समुत्पातम्—उड्डयनम् ।

तनव इति ।—नित्यं सततं, तनवः सूक्ष्माः, आयताः विस्तीर्णाः, दीर्घा वा, तथा बहुलाः प्रभूताः, समाः तुल्यरूपाः अपि, तन्तवः वस्त्रापरनामकस्त्रायाणि सूत्राणि, बहुत्वात् बहुसङ्ख्यकत्वात्, बह्वीः आयासान् गुरुभारवहनादिरूपान्, सहन्ति, [सहधातोः परस्मैपदं विवक्षावशात्] इति सतां साधूनाम्, उपमा निदर्शनम् ; यथा सूक्ष्माण्यपि

तथाऽनुष्ठिते लुब्धको जालमादाय आकाशे गच्छतां तेषां पृष्ठतो (ष) भूमिष्ठोऽपि पर्य्यधावत्। ततः ऊर्द्धाननः श्लोकमिमम् अपठत्,—

"जालमादाय गच्छन्ति संहताः पक्षिणोऽप्यमी।
यावच्च विवदिष्यन्ते पतिष्यन्ति न संशयः" ॥ ९ ॥

लघुपतनकोऽपि प्राणयात्राक्रियां त्यक्त्वा "किमत्र भविष्यति" इति कुतूहलात् तत्पृष्ठलग्नोऽनुसरति। अथ दृष्टेः अगोचरतां गतान् विज्ञाय लुब्धको निराशः श्लोकमपठत्, निवृत्तश्च,—

"न हि भवति यन्न भाव्यं, भवति च भाव्यं विना प्रयत्नेन।
करतलगतमपि नश्यति यस्य हि भवितव्यता नास्ति ॥१०॥

तथा च,—पराङ्मुखे विधौ चेत् स्यात् कथञ्चित् द्रविणोदयः।
तत् सोऽन्यदपि सङ्कृष्य याति शङ्कनिधियंथा ॥ ११ ॥

सूत्राणि बध्नन्ति मिलितानि गुरुभारं वहन्ति, तथा क्षुद्रा अपि बहवः मिलिताः स्वकार्य्यं साधयन्ति इति भावः ॥ ८ ॥

(ष) भूमिष्ठः,—भूमौ पृथिव्यां तिष्ठति इति कः। ["अध्यायनोमूमि—" (८।३।९७ पा०) इति षत्वम्]। 'भूमिस्थः" इति पाठस्तु चिन्त्य एव।

जालमिति।—पक्षिणः अपि अमी दुर्बला अपीति भावः, संहताः मिलिताः सन्तः, जालमादाय गच्छन्ति, यावच्च विवदिष्यन्ते विवदमानपूर्वकं विचित्रं वक्ष्यन्ति इत्यर्थः, परस्परमिति शेषः, [अत्र वदतेः विनत्यर्थं वर्त्तमानत्वात् "भाषनोपसम्भाषा-ज्ञानयत्नविनत्युपमन्त्रणेषु वदः" (१।३।४७ पा०) इति तङ्] तावच्च पतिष्यन्ति, न संशयः सन्देहो नास्ति इत्यर्थः ॥ ९ ॥

न हीति।—यत् न भाव्यं केनापि नैव भवितव्यम् इत्यर्थः, तदिति शेषः, यत्नेन अपीति अध्याहार्य्यं, न हि भवति सत्यपते; यच्च भाव्यं केनचित् भवितव्यमेव, तदिति शेषः, प्रयत्नेन प्रकृष्टचेष्टया विना, अपीति शेषः, भवति च भवत्येव; यस्य भवितव्यता अवश्यम्भाविता नास्ति, करतलगतमपि हस्तस्थमपि, तत् द्रव्यमिति शेषः, नश्यति दूरं याति, भाग्यहीनस्य कुतः लाभः? इति भावः। आर्य्या छन्दः ॥ १० ॥

पराङ्मुख इति।—विधौ दैवे, पराङ्मुखे, चेत् यदि, कथञ्चित् द्रविणोदयः धनागमः, स्यात्, तत् तदा, सः द्रविणोदयः, अन्यदपि पूर्वार्जितं धनमपि, सङ्कृष्य याति

तदास्तां तावत् (त) विहङ्गाऽऽमिषलोभः, यावत् (थ) कुटुम्बवर्त्तनोपायभूतं जालमपि मे नष्टम्"।

चित्रग्रीवोऽपि लुब्धकम् अदर्शनीभूतं ज्ञात्वा ताम् उवाच,—"भोः! निहतः स दुरात्मा लुब्धकः। तत् सर्वैरपि (द) स्वस्थैर्गम्यतां महिलारोप्यस्य प्रागुत्तरदिग्भागे, तत्र मम सुहृत् हिरण्यको नाम मूषकः सर्वेषां पाशच्छेदं करिष्यति। उक्तञ्च,—

सर्वेषामेव मर्त्यानां व्यसने समुपस्थिते।
वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न सन्दधे" ॥ १२ ॥

एवं ते कपोताः चित्रग्रीवेण सम्बोधिता महिलारोप्ये नगरे हिरण्यकविलदुर्गं प्रापुः। हिरण्यकोऽपि (ध) सहस्रमुखविलदुर्गं प्रविष्टः सन् अकुतोभयः सुखेन आस्ते। अथवा साधु इदमुच्यते,—

गच्छति, दैवानुकम्पितमिति शेषः; अकृतनिधिर्थशेति।—अकृतनिधिर्यथा स्वाधिकारिणः पुत्रकलत्रादीनपि वञ्चयित्वा केवलं तमेव पोषयति तथा प्रसन्नं दैवं प्रतिकूलदैवस्य सर्वं धनं गृहीत्वा स्वानुगृहीतमेव पोषयतीति भावः ॥ ११ ॥

(त) विहङ्गाऽऽमिषलोभः,—विहङ्गः,—पक्षी [विहायसा गच्छति इति गमधातोः खचि "विहायसो विह इति वाच्यम्" इति वार्त्तिकसूत्रेण विहादेशात्, "खश्च डिद्वा वाच्यः" इति वार्त्तिकेन खचः वैभाषिकाऽऽडभावात् सुमागमे च विहङ्ग इति सिद्धम्। पक्षे विहगः विहङ्गम इति च] तस्य आमिषलोभः,—पक्षिमांसलोभः इत्यर्थः।

(थ) कुटुम्बेति।—कुटुम्बानां—परिवाराणां, वर्त्तनं—जीविका, तस्य उपायभूतम्—उपायस्वरूपम्।

(द) स्वस्थैः,—निरुद्वेगैरित्यर्थः। पाशच्छेदं—बन्धनकर्त्तनम्।

सर्वेषामिति।—सर्वेषामेव मर्त्यानां, व्यसने विपदि, समुपस्थिते सति, मित्रात् सुहृदः, अन्यः अपरः, [मित्रात् इत्यत्र "अन्यारादितरर्त्त—" (२।३।२९ पा०) इत्यादिना पञ्चमी] वाङ्मात्रेण वचनमात्रेणापि, साहाय्यं सहायतां, न सन्दधे नानुष्ठितवान्। [धाञ् धातोः लिटि रूपम्] ॥ १२ ॥

(ध) सहस्रेति।—सहस्रशब्दोऽत्र बहुवाची। अकुतोभयः,—नास्ति कुतोऽपि भयं यस्येति ["मयूरव्यंसकादयश्च"(२।१।७२ पा०) इति समासः] निर्भीकः इत्यर्थः।

अनागतं भयं दृष्ट्वा नीतिशास्त्रविशारदः।
अवसत् मूषकस्तत्र कृत्वा शतमुखं बिलम् ॥ १३ ॥
दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः।
सर्वेषां जायते वश्यो दुर्गहीनस्तथा नृपः ॥ १४ ॥

तथा च,—न गजानां सहस्रेण न च लक्षेण वाजिनाम्।
तत् कर्म सिध्यते राज्ञां दुर्गेणैकेन यत् रणे ॥ १५ ॥
शतमेकोऽपि सन्धत्ते प्राकारस्थो धनुर्धरः।
तस्मात् दुर्गं प्रशंसन्ति नीतिशास्त्रविदो जनाः ॥ १६ ॥

अथ चित्रग्रीवो बिलमासाद्य तारस्वरेण प्रोवाच,—"भोः भोः! मित्र हिरण्यक! सत्वरम् आगच्छ; महती मे (न)व्यसनावस्था वर्त्तते"। तत् श्रुत्वा हिरण्यकोऽपि बिलदुर्गान्तर्गतः सन् प्रोवाच,—"भोः! को भवान्? किमर्थमायातः? किं कारणम्? कौटुक् ते व्यसनावस्थानम्? तत् कथ्यताम्" इति। तत् श्रुत्वा चित्रग्रीव आह,—"भोः! चित्रग्रीवो नाम कपोतराजोऽहं ते सुहृत्; तत् सत्वरम् आगच्छ, गुरुतरं प्रयोजनम्

अनागतमिति।—नीतिशास्त्रविशारदः नयविद्यानिपुणः, मूषकः उन्दुरः, अनागतम् आगामि इत्यर्थः, भयं दृष्ट्वा विविच्य, शतमुखं (शतशब्दोऽत्र बहुवाची) बिलं गर्तं, कृत्वा तत्र अवसत् ॥ १३ ॥

दंष्ट्रेति।—यथा दंष्ट्राविरहितः विषदन्तहीनः, सर्पः, यथा च मदहीनो गजः, सर्वेषां वश्यः वशीभूतः, जायते भवति, तथा दुर्गहीनो नृपः, सर्वेषां वश्यो जायते इत्यनुषङ्गः ॥ १४ ॥

नेति।—एकेन दुर्गेण रणे राज्ञां यत् कर्म, सिध्यते निष्पाद्यते, सेनानीभिरिति शेषः, [कर्मणि षट्] तत् कर्म गजानां सहस्रेण न, वाजिनाम् अश्वानां, लक्षेण च न, सिध्यते इत्यनुषङ्गः ॥ १५ ॥

शतमिति।—प्राकारस्थः दुर्गप्राचीरस्थः एकोऽपि धनुर्धरः शतं बहून् योधान् इत्यर्थः, सन्धत्ते योधयति इत्यर्थः, तस्मात् नीतिशास्त्रविदो जनाः दुर्गं प्रशंसन्ति ॥ १६ ॥

(न) व्यसनावस्था—विपदवस्था।

अस्ति"। तत् आकर्ण्य पुलकिततनुः प्रहृष्टात्मा स्थिरमनाः त्वरमाणो निष्क्रान्तः। अथवा साधु इदमुच्यते,—

सुहृदः स्नेहसम्पन्ना लोचनानन्ददायिनः।
गृहे गृहवतां नित्यं नागच्छन्ति महात्मनाम् ॥ १७ ॥
आदित्यस्योदयस्तात! ताम्बूलं भारती कथा।
इष्टा भार्या सुमित्रञ्च अपूर्वाणि दिने दिने ॥ १८ ॥
सुहृदो भवने यस्य समागच्छन्ति नित्यशः।
चित्ते च तस्य सौख्यस्य न किञ्चित् प्रतिमं सुखम् ॥१९॥

अथ चित्रग्रीवं सपरिवारं पाशबद्धमालोक्य हिरण्यकः सविषादम् इदमाह,—"भोः किमेतत्?" स आह,—"भोः! जानन्नपि किं पृच्छसि? उक्तञ्च यतः,—

यस्माच्च येन च यदा च यथा च यच्च
यावच्च यत्र च शुभाशुभमात्मकर्म।
तस्माच्च तेन च तदा च तथा च तच्च
तावच्च तत्र च कृतान्तवशादुपैति ॥ २० ॥

सुहृद इति।—स्नेहसम्पन्नाः स्निग्धाः, अत एव लोचनानन्ददायिनः नेत्रप्रीतिप्रदाः, सुहृदः महात्मनां धन्यानां, गृहवतां गृहिणां, गृहे नित्यं न आगच्छन्ति, कदाचिदागच्छन्ति इत्यर्थः, तस्मात् तेषां परिचर्यां अवश्यं कर्तव्या इति भावः ॥ १७ ॥

आदित्यस्येति।—हे तात! आदित्यस्य उदयः सूर्योदयः, ("उदयस्तु प्रभात पूर्वपर्वते च समुन्नतौ" इति मेदिनी) ताम्बूलं, भारती कथा महाभारतीयमाख्यानम इत्यर्थः, इष्टा प्रिया, भार्या पत्नी, तथा सुमित्रं सहस्रुच, एतानि दिने दिने प्रतिदिनम, अपूर्वाणि नवानि इव प्रीतिकराणि इति भावः ॥ १८ ॥

सुहृद इति।—यस्य भवने गृहे, सुहृदः मित्राणि, नित्यशः सततं, समागच्छन्ति, तस्य चित्ते मनसि, ज्ञातस्येति शेषः, सौख्यस्य सुखसन्तानस्य, प्रतिमं तुल्यं, सुखं न लभ्यते, किञ्चित् किमपि, न च नैव, अस्ति इति शेषः ॥ १९ ॥

यस्मादिति।—कृतान्तवशात् दैववशात्, ("कृतान्तो यमदैवयोः" इत्यमरः) यस्माच्च यदर्थाच्च, येन च कारणेन च, यदा च यस्मिन् काले च, यथा च यद्वाहुल्यच्च, यावच्च यत्परिमितच्च, यत्र च यस्मिन् स्थाने च, यच्च शुभाशुभम् आत्मकर्म, कृतमिति

तत् प्राप्तं मया एतत् बन्धनं जिह्वालौल्यात् ; साम्प्रतं त्वं सत्वरं पाशविमोक्षं कुरु" । तत् आकर्ण्य हिरण्यकः प्राह,—

"अर्द्धार्द्धात् योजनशतादामिषं वीक्षते खगः ।
सोऽपि पार्श्वस्थितं दैवात् बन्धनं न च पश्यति ॥२१॥

तथा च,—रविनिशाकरयोर्ग्रहपीड़नं
गजभुजङ्गविहङ्गमबन्धनम् ।
मतिमतां च निरीक्ष्य दरिद्रतां
विधिरहो ! बलवानिति मे मतिः ॥ २२ ॥

तथा च,—व्योमेकान्तविचारिणोऽपि विहगाः सम्प्राप्नुवन्त्यापदं
बध्यन्ते निपुणैरगाधसलिलात् मीनाः समुद्रादपि ।
दुर्नीतं किमिहास्ति ? किञ्च सुकृतम् ? कः स्थानलाभे गुणः ?
कालः सर्वजनान् प्रसारितकरो गृह्णाति दूरादपि" ॥२३॥

शेषः, तस्माच्च दैवात्, तेन च कारणेन च, तदा च तस्मिन् काले च, तथा च तादृशश्च, तावच्च तत्परिमितश्च, तत्र च तस्मिन् लोके च, तच्च शुभमशुभं वा आत्मकर्म, उपैति उपगच्छति ; सर्वमेवकलमेव प्राक्तनकर्मफलमुपभुञ्जते जना इति तु तात्पर्यम् । वसन्ततिलकं वृत्तम् ॥ २० ॥

अर्द्धार्द्धादिति ।—खगः पक्षी, अर्द्धार्द्धात् योजनशतात् पञ्चविंशतियोजनात्, ("अध्यर्द्धात्" इति पाठान्तरं साधु) ; आमिषं भोग्यं वस्तु, वीक्षते पश्यति ; किन्तु सोऽपि खगः, दैवात् दौर्भाग्यात्, पार्श्वस्थितं बन्धनं बन्धनहेतुं पाशम् इत्यर्थः, न च पश्यति ॥२१॥

रवीति ।—रविनिशाकरयोः सूर्याचन्द्रमसोः, ग्रहैश्च राहुणा, पीडनं ग्रसनमित्यर्थः, गजानां, भुजङ्गानां सर्पाणां, विहङ्गमानां पक्षिणाञ्च, बन्धनं संयमनं, मतिमतां बुद्धिमतां च, दरिद्रतां वीक्ष्य दृष्ट्वा, विधिः दैवम् इत्यर्थः, ("विधिर्विधाने दैवे च" इत्यमरः) बलवान् सर्वेभ्यः बलवत्तमः ; तथा हि,—"बलवता दैवेन सर्वमनुक्रीयते, निमित्तमात्रमन्यत्" इति मे मम, मतिः बुद्धिः, इति जानीयात् इति शेषः, अहो आश्चर्यम् । द्रुतविलम्बितं वृत्तं,—"द्रुतविलम्बितमाह नभौ भरौ" इति लक्षणात् ॥ २२ ॥

व्योमेकान्तेति ।—विहगाः पक्षिणः, व्योमैकान्तविचारिणोऽपि आकाशैकदेशविहरणशीला अपि, आपदं सम्प्राप्नुवन्ति। निपुणैः जलेः जालिकैरित्यर्थः, अगाधसलिलात्

एवमुक्ता चित्रग्रीवस्य पाशं छेत्तुम् उद्यतं स तमाह,—"भद्र! मा मैवं कुरु, प्रथमं मम भृत्यानां पाशच्छेदं कुरु, तदनु ममापि च"। तत् श्रुत्वा कुपितो हिरण्यकः प्राह,—"भोः! न युक्तमुक्तं भवता, यतः (प) स्वामिनोऽनन्तरं भृत्याः"। स आह,—"भद्र! मा मैवं वद, (फ) मदाश्रयाः सर्वे एते वराकाः अपरं स्वकुटुम्बं परित्यज्य समागताः; तत् कथम् एतावन्मात्रमपि सम्मानं न करोमि? उक्तञ्च,—

यः सम्मानं सदा धत्ते भृत्यानां क्षितिपोऽधिकम्।
वित्ताभावेऽपि तं दृष्ट्वा ते त्यजन्ति न कर्हिचित् ॥२४॥

तथा च—विश्वासः सम्पदां मूलं तेन यूथपतिर्गजः।
सिंहो मृगाधिपत्येऽपि न मृगैः परिवार्यते ॥ २५ ॥

अगाधम् अतलस्पर्शं, सलिलं जलं यस्मिन् तस्मात्, ("अगाधमतलस्पर्शम्" इत्यमरः) समुद्रादपि नौनाः मत्स्याः, बध्यन्ते म्रियन्ते। दृष्ट जगति, दुर्नीतं दुर्नयः, किम् अस्ति? नास्ति इत्यर्थः, सुकृतञ्च किम्? अस्ति इति शेषः, न किमपि इत्यर्थः; स्वामलाभे उत्तमस्वामप्राप्तौ च, कः गुणः? उपकारः? न कोऽपि इत्यर्थः; कालः प्राक्तनकर्मणां परिपक्वतिसमय इत्यर्थः, प्रसारितकरः दत्तो प्रसार्य्येत्यर्थः, दूरादपि सर्वजनान् गृह्णाति आकर्षति; समय एव बलाबलं करोति, नात्र पुरुषदोष इति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ २३ ॥

(प) स्वामिनः,—प्रभोः, पालयितुरित्यर्थः। अनन्तरं—पश्चादेव। भृत्याः,—सेवकाः, उपजीवका इत्यर्थः, रक्षणीया इति शेषः, इयन्तु नीतिः यत्, आदौ प्रभवः सरक्षणीयाः, ततश्च सेवकाः इति, रक्षके रक्षिते सर्वेषामेव रक्षितत्वात्; त्वया तु तादृक्षमनुष्ठातुमुच्यते, अतोऽन्याय्यमेतदित्याशयः।

(फ) मदाश्रयाः,—मदधीनाः, मदनुगता इत्यर्थः। एते—कपोताः। वराकाः,—दीनाः। सम्मानं—समादरम्।

य इति।—यः क्षितिपः राजा, सदा भृत्यानाम् अधिकं सम्मानं धत्ते करोति इत्यर्थः, ते भृत्याः, वित्ताभावेऽपि धनाभावेऽपि, क्षितिपश्चेति शेषः, तं क्षितिपं, दृष्ट्वा कर्हिचित् कदाचित्, न त्यजन्ति; चिरमनुरक्ताश्चिष्ठन्तीति भावः॥ २४ ॥

विश्वास इति।—विश्वासः अयमस्माकं राजा रक्षकश्चेति प्रत्ययः, सम्पदां मूलं कारणं,

अपरं,—मम कदाचित् पाशच्छेदं कुर्वतस्ते दन्तभङ्गो भवति, अथवा दुरात्मा लुब्धकः समभ्येति, तत् नूनं मम नरकपात एव।

उक्तञ्च,—सदाचारेषु भृत्येषु संमोदक्षु च यः प्रभुः।

सुखी स्यात् नरकं याति परत्रेह च मोदति" ॥ २६ ॥

तत् श्रुत्वा प्रहृष्टो हिरण्यकः प्राह,—"भोः! वेद्मि अहं राजधर्मं, परं मया तव परीक्षा कृता; तत् सर्वेषां पूर्वं पाशच्छेदं करिष्यामि। भवानपि क्रमेण विधिना बहुकपोतपरिवारो भविष्यति। उक्तञ्च,—

कारुण्यं संविभागश्च यस्य भृत्येषु सर्वदा।

सम्भवेत् स महीपालस्त्रैलोक्यस्यापि रक्षणे" ॥ २७ ॥

एवमुक्त्वा सर्वेषां पाशच्छेदं कृत्वा हिरण्यकः चित्रग्रीवमाह,—"मित्र! गम्यताम् अधुना स्वाश्रयं प्रति, भूयोऽपि व्यसने प्राप्ते समागन्तव्यम्" इति तान् सम्प्रेष्य पुनरपि दुर्गं प्रविष्टः; चित्रग्रीवोऽपि सपरिवारः स्वाश्रयम् अगमत्। अथवा साधु इदमुच्यते,—

तेन विश्वासेन. गजः यूथपतिः गजसमूहानां प्रभुरित्यर्थः, गजाधिपत्यमाले स्थितोऽप्ययं मत्सकं विपदस्थाता इति यूथपतौ तेषां प्रत्ययात् तैः सदा सखौ परिवार्यते इति भावः; तथा मृगाधिपत्येऽपि, स्थित इति शेषः, सिंहः मृगैः न परिवार्यते, मृगाधिपत्ये स्थितोऽपि मृगेन्द्रः हिंसतया तव मृगाणां विश्वासाभावात् तैः सदा परित्यज्यते इति भावः; विश्वासस्यैवाभ्युदयमूलत्वादित्याशयः ॥ २५ ॥

सदिति।—यस्य प्रभुः, सदाचारेषु सद्वृत्तेषु, अनुरक्तेष्वित्यर्थः, भृत्येषु संमोदक्षु विपदमानेषु सत्सु, सुखी निरुद्वेग इत्यर्थः, स्यात् भवेत्, स परत्र परलोके, नरकं याति गच्छति. इह च भोगान् लाभे च, मोदति हर्षं प्राप्नोति ॥ २६ ॥

कारुण्यमिति।—यस्य भृत्येषु सर्वदा कारुण्यं दया, संविभागश्च सम्यक् विभज्य व्यवस्थापनञ्च गृहदाघौ विधेय धनदानमित्यर्थः, आदिति शेषः, स महीपालः, त्रैलोक्यस्यापि रक्षणे पालने, सम्भवेत् समर्थो भवेत् इत्यर्थः. नान्यथेति भावः ॥ २७ ॥

मित्रवान् साधयत्यर्थान् दुःसाध्यानपि वै यतः।
तस्मान्मित्राणि कुर्वीत समानान्येव चात्मनः॥ २८॥

लघुपतनकोऽपि वायसः सर्वं तं चित्रग्रीववन्धमोक्षम् अवलोक्य विस्मितमना व्यचिन्तयत्,—"अहो! बुद्धिः अस्य हिरण्यकस्य प्रशस्या (ब) दुर्गसामग्री च, तत् ईदृगेव विधिः विहङ्गानां बन्धनमोक्षात्मकः। अहञ्च न कस्यचित् विश्वसिमि (भ) चलप्रकृतित्वं; तथाऽपि एनं मित्रं करोमि। उक्तञ्च,—

अपि सम्पूर्णतायुक्तैः कर्त्तव्याः सुहृदो बुधैः।
नदीशः परिपूर्णोऽपि चन्द्रोदयमपेक्षते" ॥ २९॥

एवं (म) सम्प्रधार्य्य पादपादवतीर्य्य विलहारम् आश्रित्य चित्रग्रीववच्छब्देन हिरण्यकं समाह्वतवान्,—"एहि एहि भोः! हिरण्यक! एहि"। तच्छब्दं श्रुत्वा हिरण्यको व्यचिन्तयत्,—"किमन्योऽपि कश्चित् कपोतः (य) बन्धनशेषः तिष्ठति, येन मां व्याहरति?" आह च,—"भोः! को भवान्?" स आह,—"अहं लघुपतनको नाम वायसः"। तत् श्रुत्वा विशेषात्

मित्रवानिति।—यतः यस्मात् हेतोः, मित्रवान् प्रशस्तमित्रसुहृत्सम्पन्नः, पुमानिति शेषः, दुःसाध्यानपि अशक्यानपि, अर्थान् प्रयोजनानि, साधयति वै सम्पादयति, तस्मात् च आत्मनः समानानि एव अनुरूपाणि एव, मित्राणि कुर्वीत॥ २८॥

(ब) दुर्गसामग्री—दुर्गैरक्षोपायनिचयः। ईदृगेव विधिः,—ईदृशैः सह मैत्रीकरणरूपं विधानमित्यर्थः।

(भ) चलप्रकृतिः,—चञ्चलस्वभावः। एनं—हिरण्यकम्।

अपीति।—सम्पूर्णतायुक्तैः सम्यक्परिपूर्णैरपि, बुधैः विद्वद्भिः, सुहृदः मित्राणि, कर्त्तव्याः। नदीशः समुद्रः, परिपूर्णोऽपि चन्द्रोदयम् अपेक्षते आकाङ्क्षति, समधिकपूर्णतायया इति भावः। अत्र पूर्णत्वेऽपि लक्ष्ये समधिकपूर्णतायया चन्द्रोदयाकाङ्क्षावत् ऋद्धिमतोऽपि बुधस्य मित्राऽऽकाङ्क्षा कर्त्तव्येति साधर्म्याक्षेपात् दृष्टान्तालङ्कारः॥ २९॥

(म) सम्प्रधार्य्य—निश्चित्य। विलहारं—गर्त्तमुखम्।

(य) बन्धनशेषः,—बन्धावशिष्टः, बन्धच्छिन्नपाद इति यावत्।

(र) अन्तर्लीनो हिरण्यक आह,—"भोः ! द्रुतं गम्यताम् अस्मात् स्थानात्" । वायसः आह,—"तव पार्श्वे गुरुकार्य्येण समागतः, तत् किं न क्रियते मया सह दर्शनम् ?" हिरण्यक आह,—"न मेऽस्ति त्वया सह सङ्गमेन प्रयोजनम्" इति । स आह,—"भोः ! चित्रग्रीवस्य मया तव सकाशात् पाशमोक्षणं दृष्टं, तेन मम महती प्रीतिः सञ्जाता ; तत् कदाचित् ममापि बन्धने जाते तव पार्श्वात् मुक्तिर्भविष्यति ; तत् क्रियतां मया सह मैत्री"। हिरण्यक आह,—"अहो ! त्वं भोक्ता, अहं ते भोज्यभूतः ; तत् कथं त्वया सह मम मैत्री ? तत् गम्यतां, (ख) मैत्री विरोधभावात् कथम् ?

तथाच,—ययोरेव समं वित्तं ययोरेव समं कुलम् ।

तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ॥ ३० ॥

तथा च—यो मित्रं कुरुते मूढ़ आत्मनोऽसदृशं कुधीः ।

हीनं वाऽप्यधिकं वाऽपि हास्यतां यात्यसौ जनः ॥३१॥

तत् गम्यताम्" इति । वायस आह,—"भोः हिरण्यक ! एषोऽहं तव दुर्गद्वारे उपविष्टः, यदि त्वं मैत्रीं न करोषि, ततोऽहं प्राणमोक्षणं तवाग्रे करिष्यामि ; अथवा

(र) अन्तर्लीनः,—अभ्यन्तरगतः, अतुलः स्वपराभवनाशङ्केति भावः ।

(ख) मैत्री—सौहार्दं, विरोधभावात्—सहजशत्रुतासत्त्वात्, कथम् ? सम्भवतीति शेषः ; विरोधिना सह मैत्री अविधेयेत्याशयः ।

ययोरिति ।—ययोः वित्तं धनं, समम् एव, ययोः कुलम् आभिजात्यं, समम् एव, तयोरेव मैत्री बन्धुता, विवाहश्च, परस्परं सङ्गच्छते इति शेषः ; पुष्टविपुष्टयोः अधिकहीनयोः, परस्परविरुद्धयोरित्यर्थः, न, सङ्गच्छते इति शेषः ; विषमसम्बन्धस्यानर्थफलकत्वात्तथोः मैत्री शुभोदर्का इति भावः ॥ ३० ॥

य इति ।—यः कुधीः दुर्बुद्धिः, मूढ़ः अविवेकी जनः, आत्मनः हीनं वा अधिकमपि वा, असदृशं मित्रं कुरुते, असौ हास्यताम् उपहासास्पदत्वं याति लभते ; अतः त्वया सह मैत्री न युज्यते इति भावः ॥ ३१ ॥

(व) प्रायोपवेशनं मे स्यात्" इति। हिरण्यक आह,—"भोः! त्वया वैरिणा सह कथं मैत्रीं करोमि? उक्तञ्च,—

वैरिणा न हि सन्धध्यात् सुश्लिष्टेनापि सन्धिना।
सुतप्तमपि पानीयं शमयत्येव पावकम्" ॥ ३२ ॥

वायस आह,—"भोः! त्वया सह दर्शनमपि नास्ति, कुतो वैरम्? तत् किमनुचितं वदसि?" हिरण्यक आह,—"द्विविधं वैरं भवति, सहजं (श) कृत्रिमञ्च; तत् सहजवैरी त्वम् अस्माकम्। उक्तञ्च,—

कृत्रिमं नाशमभ्येति वैरं द्राक् कृत्रिमैर्गुणैः।
प्राणदानं विना वैरं सहजं याति न क्षयम्" ॥ ३३ ॥

वायस आह,—"भोः! द्विविधस्य वैरस्य लक्षणं श्रोतुमिच्छामि, तत् कथ्यताम्"। हिरण्यक आह,—"भोः! कारणेन निर्वृत्तं कृत्रिमं, (ष) तत्तदुपकारकरणात् गच्छति;

(व) प्रायोपवेशनम्—अनशनव्रतम्।

वैरिणेति।—सुश्लिष्टेनापि सुघटितेनापि, सन्धिना उपायविशेषेण, वैरिणा शत्रुणा सह, न हि सन्धध्यात् न हि सन्धत्ते; तथा हि, पानीयं जलं, सुतप्तमपि अत्युष्णमपि, तुल्यगुणमपीति यावत्, पावकम् अग्निं, शमयत्येव; सहजवैरित्वादिति भावः ॥३२॥

(श) कृत्रिमं—कार्यवशाज्जातम्। सहजवैरी—स्वभावशत्रुः।

कृत्रिमेति।—कृत्रिमं—[क्रियया निर्वृत्तमिति "ड्वितः क्रिः" (३।३।८८ पा०) इत्यनेन क्रियार्थात् क्रिप्रत्यये "नित्यम्" (४।४।२० पा०) इति सूत्रेण ष्ठिकम्] क्रियाकृतमित्यर्थः, वैरं, कृत्रिमैः क्रियाजन्यैः, गुणैः उपकारादिभिरित्यर्थः, द्राक् झटिति, नाशम् अभ्येति प्राप्नोति, सहजं स्वाभाविकं, वैरं प्राणदानं विना जीवनत्राणमन्तरेण, प्राणेति भावः, क्षयं न याति। "सखा मरोर्यात् प्रभव कृत्रिमस्तौ हि कार्यतः। त्राणानलिप्तौ सिद्धे च सहजप्राकृतावपि॥" इति नास्ति द्विविधं वैरम्; तेषु कृत्रिमस्यैव प्राधान्यमुक्तम्, अत्र तु सहजस्य इति; अतः प्रयोजनवशात् मुख्यामुख्यत्वकल्पनमिति विरोधाभावः॥ ३३ ॥

(ष) तदिति।—तत्—कृत्रिमं वैरम्। तदुपकारकरणात्—येन कारणेन वैरं जातं, तस्य यथायोग्यप्रतीकारविधानादित्यर्थः।

स्वाभाविकं पुनः कथमपि न गच्छति; तत् यथा,—नकुल-सर्पाणां, (स) ग्रध्यभुङ्नखायुधानां, जलवल्मीकः, देव-दैत्यानां, सारमेयमार्जाराणाम्, दुःखरदरिद्राणां, सपत्नीनां, (ह) लुब्धकहरिणानां, श्रोत्रियभ्रष्टक्रियाणां, मूर्खपण्डितानां, पतिव्रताकुलटानां, सज्जनदुर्जनानाम्। (क्ष) न कश्चित् केनापि व्यापादितः, तथाऽपि प्राणान् सन्तापयन्ति"।

वायस आह,—

"कारणान्मित्रतां याति कारणादेति शत्रुताम्।
तस्मान्मित्रत्वमेवात्र योज्यं वैरं न धीमता॥ ३४॥

तस्मात् कुरु मया सह समागमं मित्रधर्मार्थम्"। हिरण्यक आह,—"भोः! श्रूयतां (क) नीतिसर्वस्वम्—

(स) ग्रध्यभुङ्नखायुधानां—दृष्टभोजिभिः सह श्वापदानाम्। सारमेय-मार्जाराणां—कृतविडालानाम्। दुःखरदरिद्राणां—अनिद्रुतानाम्।

(ह) लुब्धकहरिणानां—व्याधसगानाम्। श्रोत्रियभ्रष्टक्रियाणां—वेदविहि-तिभिः सह ब्राह्मणवर्याणाम्। ["येषां च विरोधः शाश्वतिकः" (२।४।९ पा०) इति द्वन्द्वसमासे शाश्वतिकविरोधानाम् एकवचनप्राप्तिरूक्ता, अत्र तु बहुवचनेन एतेषां कुत्रचित् कुत्रचित् मित्रता सम्भवतीति बोध्यते; तेन हिरण्यकेन सार्द्धं लघुपतनकस्य कैवी भविष्यति इति सूच्यते]।

(क्ष) नेति।—यद्यपि अत्रास्मिन्नध्याये एतेषां मध्ये दुर्बलेन केनापि बलवान् कश्चित् न विनाशितः, तथाऽपि एते परस्परं प्राणान् सन्तापयन्ति, विरोधश्च शाश्वतिकत्वादिति भावः।

कारणादिति।—कारणात् केनापि हेतुना, उपकारादिनेत्यर्थः, मित्रतां याति गच्छति, अतः इति शेषः, तथा कारणात् अपकारादिनेत्यर्थः, शत्रुतां च एति गच्छति; तस्मात् अत्र संसारे, धीमता बुद्धिमता, जनेन इति शेषः, मित्रत्वमेव योज्यं कर्त्तव्यं, न वैरम्; उभयोरेव कारणप्रयोज्यत्वेन साध्येऽपि कस्य न निश्चितसुखनिश्चये मित्रत्वे रुचिः? इति भावः॥ ३४॥

(क) नीतिसर्वस्वं—नीतिसारः।

सकृद्दृष्टमपीष्टं यः पुनः सन्धातुमिच्छति ।
स मृत्युमुपगच्छति गर्भमश्वतरी यथा ॥ ३५ ॥

अथवा 'गुणवान् अहं, न मे कश्चित् (ख) वैरयातनां करिष्यति' एतदपि न सम्भाव्यम् । उक्तञ्च,—

सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः
मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम् ।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्
अज्ञानाहतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः ?" ॥३६॥

वायस आह,—"अस्त्येतत्, तथाऽपि श्रूयताम्,—

उपकाराच्च लोकानां निमित्तान्मृगपक्षिणाम् ।
भयाल्लोभाच्च मूर्खाणां मैत्री स्याद्दर्शनात् सताम् ॥ ३७ ॥

सकृदिति ।—यः सकृद्दृष्टम् एकवारमेव दृष्टं, का कथा पुनः पुनः दृष्टस्येति भावः ; दृष्टमपि प्रियजनमपि, सर्पदष्टानङ्गलीमिवेति भावः, पुनः सन्धातुं सम्मेलयितुम्, इच्छति, सः अश्वतरी गर्भे यथा, तथा मृत्युम् आत्मविनाशमित्यर्थः, उपगच्छति आश्रयति ; अश्वतर्याः गर्भधारणं यथा मृत्वे, तथा तस्य तादृशमित्रसम्मेलनमपि भवतीत्यर्थः ॥ ३५ ॥

(ख) वैरयातनां—वैरेण पीडनं, शत्रुतामाचरणमित्यर्थः ।

सिंह इति ।—सिंहः व्याकरणस्य कर्तुः विदुषः, निरपराधस्येति भावः, पाणिनेः मुनेः, प्रियान् प्राणान् अहरत् ; हस्ती मीमांसाकृतं मीमांसादर्शनकारिणं, जैमिनिं मुनिं सहसा उन्ममाथ विनाशितवान् [मथते. क्षिपि रूपम्]; मकरः जलजन्तुविशेषः, वेलातटे समुद्रोपकूले, छन्दोज्ञाननिधिं छन्दःशास्त्रप्रणेतारम् इत्यर्थः, पिङ्गलं मुनिं जघान ; अज्ञानाहतचेतसां मोढाज्ञानचिह्नानाम्, अतिरुषाम् अतिकोपनानां, तिरश्चां पशुपक्षिणां, गुणैः गुणविचारैः, अयं गुणो, एनं न हनिष्यामि, अयं निर्गुणः, एनं मारयिष्यामि इति वितर्कैरिति भावः, कोऽर्थः ? किं प्रयोजनम् ? न कोऽपीत्यर्थः ; दर्शना गुणदोषौ न गणयन्तीति भावः ॥ ३६ ॥

उपकारादिति ।—लोकानां नराणाम्, उपकारात् परस्परोपकारकरणात् इत्यर्थः, मृगपक्षिणां निमित्तात् कुतश्चित् कारणात्, मूर्खाणां भयात्, लोभाच्च, तथा सतां साधूनां, दर्शनात् परस्परावलोकनात्, मैत्री स्यात् ॥ ३७ ॥

सहटवत् सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति ।
सुजनस्तु कनकघट इव दुर्भेद्यः सुकरसन्धिश्च ॥ ३८ ॥
इक्षोरग्रात् क्रमशः पर्वणि पर्वणि यथा रसविशेषः ।
तद्वत् सज्जनमैत्री विपरीतानान्तु विपरीता ॥ ३९ ॥

तथा च,— आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥ ४० ॥

तत् साधुरहम्, अपरं त्वां शपथादिभिः निर्भयं करिष्यामि"। स आह,—"न मे अस्ति ते शपथैः प्रत्ययः । उक्तञ्च,—

सहटोक्ति ।—दुर्जनः सहटवत् सत्कलस इव, सुखेन भेद्यः, दुःसन्धानश्च न पुनर्योजनायोग्यश्चेत्यर्थः, भवति ; सहटो यथा लोष्टादिना लघुप्रहारमात्रेण भग्नः पुनः कथञ्चित् योजयितुमशक्यश्च, तथा दुर्जनोऽपि येन केनचिदेव कारणेन भग्नमैत्रः सन् न पुनः प्रयत्नशतेनापि संयोजनीयो भवतीति भावः, सुजनस्तु कनकघट इव काञ्चनकलस इव, दुर्भेद्यः भेत्तुमशक्यः, सुकरसन्धिश्च अक्लेशं सन्धेयश्च, भवतीति शेषः ; कनककलसो यथा दैवात् केनापि भग्नोऽपि पुनरुपायेन संयोजनयोग्यः, तथा सुजनोऽपीति भावः । इत्तमार्य्या ॥ ३८ ॥

इक्षोरिति ।—इक्षोः अग्रात् अग्रमारभ्य, पर्वणि पर्वणि अधोऽधो यथा इत्यर्थः, यथा क्रमशः रसविशेष रसस्य उत्कर्षः इत्यर्थः, तिष्ठतीति शेषः, सज्जनमैत्री साधुसौहार्दं, तद्वत् क्रमशः सुरसा इति भावः, भवतीति शेषः, विपरीतानान्तु दुर्जनानान्तु, विपरीता प्रागुक्तस्य विपर्य्ययः ; प्रथमतः सौहार्दं, पश्चात् शनैर्लघ्वीति भावः । आर्य्या वृत्तम् ॥ ३९ ॥

आरम्भेति ।—खलानां दुर्जनानां, सज्जनानां सताञ्च, मैत्री, दिनस्य पूर्वार्द्धपरार्द्धभिन्ना पूर्वाह्णापराह्णभेदेन पृथग्भूता, छायेव आरम्भगुर्वी आदौ महती, क्रमेण क्षयिणी अपचयशीला च, तथा पुरा लघ्वी अल्पा, पश्चात् वृद्धिमती वर्द्धमाना च ; यथा दिनपूर्वार्द्धच्छाया प्रथमं महती, पश्चात् क्षयवती च, तथा खलस्य मैत्री ; यथा च दिनपरार्द्धच्छाया प्रथमं लघ्वी, पश्चात् महती, तथा सज्जनस्य मैत्रीति भावः । वृत्तमुपजातिः ॥ ४० ॥

अपथैः सन्धितस्यापि न विश्वासं व्रजेत् रिपोः ।
श्रूयते अपथं कृत्वा हतः अक्षेण सूदितः ॥ ४१ ॥
न विश्वासं विना शत्रुर्दैवानामपि सिध्यति ।
विश्वासात् त्रिदशेन्द्रेण दितेर्गर्भो विदारितः ॥ ४२ ॥

अन्वयः,—हृदयतेरपि प्राज्ञस्तस्मान्नैवात्र विश्वसेत् ।
य इच्छेदात्मनो हृद्यमायुष्यञ्च सुखानि च ॥ ४३ ॥

तथा च,—सुसूक्ष्मेणापि रन्ध्रेण प्रविश्याभ्यन्तरं रिपुः ।
नाशयेच्च अनैः पश्चात् प्लवं सलिलपूरवत् ॥ ४४ ॥

अपथैरिति ।—अपथैः दिव्यैः, सन्धा सन्धानं, मिलनमित्यर्थः, जाता अस्येति [तारकादित्वादितच्] सन्धितस्य दिव्यं कृत्वा परस्परं मिलितस्य अपि, रिपोः विश्वासं न व्रजेत् न गच्छेत्, अत्र इति शेषः ; तथा हि अक्षेण इन्द्रेण, अपथं कृत्वा "नाहं तुभ्यं दुष्यामि" इति प्रतिज्ञां कृत्वाऽपि, हतः तन्नामासुरः, सूदितः नाशितः, इति श्रूयते ; दैवा अपि अपथं भङ्क्त्वा शत्रुं नाशयन्ति, किमुतापरे ? इति भावः ॥ ४१ ॥

नेति ।—विश्वासं विना विश्वासोत्पादनमन्तरेणेत्यर्थः, दैवानामपि शत्रुः न सिध्यति न वश्यो भवतीत्यर्थः ; विश्वासात् विश्वासम उत्पाद्य इत्यर्थः, ["ल्यब्लोपे कर्मण्यधिकरणे च" इति वार्त्तिकसूत्रेण पञ्चमी] त्रिदशेन्द्रेण देवराजेन, दितेः विमातुः, गर्भः भ्रूणः, ("गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पलसकट्टके" इति मेदिनी) खण्डितवानिति भावः, विदारितः खण्डितः । पुरा दितिरक्षग्निपुत्रोकेन चार्त्ता दितिः स्वपुत्राणां रिपुमिन्द्रं हन्तुं तद्वातनयं गर्भं धृतवती । देवराजोऽपि तदनुसन्धाय विमातुः परिचर्य्याच्छलेन सततं तस्यान्तेषी, एकदा दिवा शयानां दितिमवलोक्य तद्गर्भे प्रविष्टः गर्भस्थं जीवम् एकोनपञ्चाशत्खण्डैः खण्डयामास ; एकोनपञ्चाशद्विभक्तश्च स पवनदेवतमगादिति पौराणिकी कथा अत्र अनुसन्धेया ॥ ४२ ॥

हृदयतेरिति ।—तस्मात् हेतोः, यः चात्मनः हृद्यं कल्याणम्, आयुष्यं दीर्घजीवनं, सुखानि च इच्छेत्, सः प्राज्ञः अत्र संसारे, हृदयतेरपि न विश्वसेत् ; अपरञ्च किमु वक्तव्यम् ? इति भावः । ['श्वस प्राणने' इति अदादिगणीयत्वात् 'विश्वसेत्' इति न साधु, 'विश्वस्यात्' इत्येव सम्यक् । विपूर्वस्य श्वसधातोः अच्प्रत्यये विश्वस इति शब्दस्य नामधातौ कथञ्चित् साधनीयम्] ॥ ४३ ॥

सुसूक्ष्मेणेति ।—रिपुः शत्रुः, सुसूक्ष्मेण अत्यल्पेनापि, रन्ध्रेण छिद्रेण, अनैः क्रमेण,

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ४५ ॥
न बध्यते ह्यविश्वस्तो दुर्बलोऽपि बलोत्कटैः।
विश्वस्ताश्वाशु बध्यन्ते बलवन्तोऽपि दुर्बलैः ॥४६॥
सुकृत्यं विष्णुगुप्तस्य मित्रासिभागवस्य च।
दृढस्यतेरविश्वासो नीतिसन्धिस्त्रिधा स्थितः ॥ ४७॥

तथा च,—महताऽप्यर्थसारेण यो विश्वसिति शत्रुषु।
भार्य्यासु सुविरक्तासु तदन्तं तस्य जीवितम्" ॥ ४८ ॥

तत् श्रुत्वा लघुपतनकोऽपि निरुत्तरः चिन्तयामास,—"अहो!

अभ्यन्तरं प्रविश्य आत्मीय' सन्निव दत्यर्थं., पश्चात् प्रबलं उड्पं, नौकामिति भाव:, सलिलपूरवत जलप्रवाह इव, नाशयेच्च ; यथा अल्पेनापि छिद्रेण सलिलप्रवाह: नौकां क्रमेण प्रविश्य निमज्जयति, तद्वत शत्रुरपि केनचित् छलेन प्रविश्य नाशयतीति भाव: ॥ ४४ ॥

नेति।—अविश्वस्ते जने न विश्वसेत, विश्वस्ते न अतिविश्वसेत ; विश्वासात् उत्पन्नं भयं मूलान्यपि निकृन्तति नाशयति ॥ ४५ ॥

नेति।—दुर्बलोऽपि, जन: इति शेष , अविश्वस्त: अकृतविश्वासश्चेत्, बलोत्कटै: प्रबलै:, न बध्यते न हन्यते ; बलवन्तोऽपि विश्वस्ता: कृतविश्वासा: सन्त:, दुर्बलै: आशु शीघ्रं, बध्यन्ते, विश्वासेन अनवधितत्वादिति भाव: ॥ ४६ ॥

सुकृत्यमिति।—नीतिसन्धि: नीतिशास्त्रोक्त: कार्य्यसाधकोपायविशेष:, त्रिधा त्रिप्रकार:, स्थित:, भवतीत शेष:, विष्णुगुप्तस्य चाणक्यस्येत्यर्थ:, सुकृत्यं सुष्ठु कार्य्यं, कार्य्यानुष्ठानमित्यर्थ:, भार्गवस्य शुक्रनन्दनस्य शुक्राचार्य्यस्य, मित्रासि: मित्रखाभ:, दृढस्यते: अविश्वास: विश्वासाभावश्चम ; चाणक्यमते नीत्यनुसारेण कार्य्यानुष्ठानं, भार्गवमते मित्रसकृत:, दृढस्यतिमते सर्वत्रापि अविश्वास एव नीतिरिति भाव: ॥ ४७ ॥

महतेति।—य: महताऽपि प्रभूतेनापि, अर्थसारेण सारधनेन, प्रभूतहीरकरत्नादि-धनलाभेनेति भाव:, शत्रुषु रिपुषु, तथा सुविरक्तासु अनन्यरक्तासु, भार्य्यासु विश्वसिति, [विपूर्वकस्रसधातो: क्तटि "ऋदादिभ्य: सार्वधातुके" (७।२।७६ पा०) इडभावेन रूपम] तस्य जीवितं तदन्तं तत्पर्य्यन्तम् ; तेन विश्वासेनैव स विनश्यतीति भाव: ॥ ४८ ॥

(ग) बुद्धिप्रागल्भ्यमस्य नीतिविषये। अथवा अतः एव अस्योपरि मैत्रीपक्षपातः"। ततः प्रकाशम् आह,—"भोः हिरण्यक!—

सतां सप्तपदं मैत्रमित्याहुर्विबुधा जनाः।
तस्मात् त्वं मित्रतां प्राप्तो वचनं मम तत् शृणु ॥ ४८ ॥

(घ) दुर्गस्थेनापि त्वया मया सह नित्यमेव आलापः(ङ)गुण-दोषसुभाषितगोष्ठीकथाः सर्वदा कर्त्तव्याः, यद्येवं न विश्वसिषि"। तत् श्रुत्वा हिरण्यकोऽपि व्यचिन्तयत्,—(च) "विदग्धवचनोऽयं दृश्यते लघुपतनकः सत्यवाक्यश्च,तत् युक्तम् अनेन मैत्रीकरणम्; परं कदाचित् मम दुर्गे चरणपातोऽपि न कार्य्यः। उक्तञ्च,—

भीतभीतः पुरा शत्रुर्मन्दं मन्दं विसर्पति।
भूमौ प्रहेलया पश्चाज्जारहस्ताऽङ्गनास्विव" ॥ ५० ॥

(ग) बुद्धिप्रागल्भ्यं—ज्ञानप्राचुर्य्यम इत्यर्थः।

सतामिति।—विबुधाः विद्वांसो जनाः, सतां साधूनां, मैत्रं सप्तपदं सप्तपदीशब्दसाध्यम्, इति आहुः कथयन्ति; अत्र सप्तपदान्युपलक्षणानि, बहुविध आलाप एव मैत्रलक्षणं, तत् येन सह संवृत्तं स एव मित्रमिति भावः। तस्मात् त्वं मित्रतां प्राप्तः, विविधालापपक्षाद्धितं भावः, तत् ततः, मित्रतामाप्तः, मम वचनं शृणु ॥४८॥

(घ) दुर्गस्थेन—विलस्थेन।

(ङ) गुणेति।—गुणाश्च दोषाश्च तेषां सुभाषितानि शोभनालापा एव, गोष्ठीकथाः परस्परसौहार्दसंलापाः, ("गोष्ठी सभासंलापयोः स्त्रियाम्" इति मेदिनी)।

(च) विदग्धवचनः,—विदग्धस्य इव—पण्डितस्येव, वचनं यस्य तथाभूतः, सुवक्ता इत्यर्थः।

भीतेति।—शत्रुः पुरा पूर्वं, भीतभीतः अतिभीतः सन्, भूमौ भवन्त्यस्मिन् भूतानि इति भूमिः तस्यां, स्थाने, शत्रुपुरं इति भावः, ("भूमिर्वसुन्धरायां स्यात् स्थानमात्रेऽपि च स्त्रियाम्" इति मेदिनी) मन्दं मन्दं विसर्पति पदं निदधाति इत्यर्थः, पश्चात्,प्रहेलया अत्यन्ताबहेलया, अनायासेनेत्यर्थः, प्रकटेन विलासेन च, अङ्गनासु स्त्रीषु, जारहस्त इव उपपतेः कर इव, विसर्पति इत्यनुषङ्गः; यथा जारः अन्यैः अन्यैः अभिनवपत्नीयाअङ्गनादौ सृपति, पश्चात् प्रथमे जाते स्वच्छन्दं, तद्वत् शत्रुरपि प्रथमं मन्दं मन्दं प्रविश्य, पश्चात् निजपादप्रसारस्वच्छायेन सर्वमेवायत्तीकरोतीति भावः ॥ ५० ॥

आह च,—"भद्र! एवं भवतु"। (ङ) ततः प्रभृति द्वौ अपि तौ सुभाषितगोष्ठीसुखमनुभवन्तौ तिष्ठतः, परस्परं कृतोपकारौ कालं नयतः। लघुपतनकोऽपि (ज) मांसशकलानि मेध्यानि बलिशेषाणि अन्यानि (झ) वात्सल्याऽऽकृष्टानि पक्वान्नविशेषादीनि हिरण्यकार्यमानयति। हिरण्यकोऽपि तण्डुलान् अन्यांश्च भक्ष्यविशेषान् लघुपतनकार्थं रात्रौ आकृष्य (ञ) तत्कालायातस्य अर्पयति; अथवा युज्यते द्वयोरपि एतत्।

उक्तञ्च,—"ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥५१॥
नोपकारं विना प्रीतिः कथञ्चित् कस्यचित् भवेत्।
उपयाचितदानेन पश्य देवा ह्यभीष्टदाः॥ ५२॥

(ङ) ततः प्रभृति—तस्मादारभ्य, ["अपादाने पञ्चमी" (२।३।२८ पा०) इति सूत्रे कात्तिकया: प्रभृतीति भाष्यप्रयोगात् प्रभृतयोगे पञ्चमी]।

(ज) मांसशकलानि—पिशितखण्डानि। मेध्यानि—विशुद्धानि। बलिशेषाणि—काकमुद्दिश्य दत्तस्य उपहारद्रव्यस्य अवशिष्टानि।

(झ) वात्सल्याऽऽकृष्टानि—प्रेम्णा सञ्चितानि।

(ञ) तत्कालायातस्य—तत्काले—रात्रौ, आयातस्य—उपस्थितस्य, [सम्बन्धविवक्षया सम्प्रदाने षष्ठी]।

ददातीति।—ददाति, प्रतिगृह्णाति, गुह्यं रहस्यम्, आख्याति कथयति, पृच्छति, गुह्यमिति शेषः, भुङ्क्ते, भोजयते च, एवं षड्विधं दान-प्रतिपद्-गुह्यभाषण-प्रश्न-भोजन-भोज्यदानात्मकमिति भावः, प्रीतेः प्रणयस्य, लक्षणं चिह्नम् ॥ ५१ ॥

नोपकारमिति।—उपकारं विना हितसाधनाद्ऋते, कस्यचित् कथञ्चित् प्रीतिः न भवेत्, हि यस्मात् हि, देवाः, अपि अवाङ्मुखाः; उपयाचितदानेन "यदि मम एतं मनोरथं पूरयिष्यसि, तदा तुभ्यमिदमभीष्टं दास्यामि" इत्येवंरूपं दिव्यदोहदम् उपयाचितम्, [उपयाच्यतेऽनेन इति करणे क्तच्प्रत्ययः। तदुक्तं,—"यत् दीयते देवताभ्यो मनोराज्यस्य सिद्धये। उपयाचितकं दिव्य-दोहदं तत् विदुर्बुधाः॥" इति] तस्य दानेन प्रदानेन, अभीष्टदाः; मनोरथपूरकाः, भवन्ति इति शेषः; ज्ञानं

तावत् प्रीतिर्भवेल्लोके यावद्दानं प्रदीयते।
वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम् ॥ ५३ ॥
पश्य दानस्य माहात्म्यं मन्त्रः प्रत्ययकारकम्।
यत्प्रभावादपि द्वेषी मित्रतां याति तत्क्षणात् ॥ ५४ ॥
पुत्रादपि प्रियतरं खलु तेन दानं
मन्ये पशोरपि विवेकविवर्जितस्य।
दत्ते खले तु निखिलं खलु येन दुग्धं
नित्यं ददाति महिषी ससुताऽपि पश्य" ॥ ५५ ॥

किं बहुना,—प्रीतिं निरन्तरां कृत्वा दुर्भक्षां नखमांसवत्।
मूषको वायसश्चैव गतौ कृत्रिममित्रताम् ॥ ५६ ॥

ददति इत्यर्थः, पश्य इति दृष्टान्तमवलोकय इत्यर्थः; देवानामपि दानसापेक्षा प्रीतिः, मर्त्यानान्तु सुतरामेवेति भावः ॥ ५२ ॥

तावदिति।—लोके यावत् दानम् अन्नवस्त्रधनादिकमित्यर्थः, प्रदीयते, तावत् प्रीतिः भवेत् तिष्ठतीत्यर्थः; तथा हि,—वत्सः गोशिशुः, क्षीरक्षयं दुग्धक्षयं, दृष्ट्वा क्षीरमप्राप्य इत्यर्थः, मातरं जननीं, परित्यजति; माहतमधस्तन्यस्यापि दानस्याऽऽ इत्यहो! दानमाहात्म्यमिति भावः ॥ ५३ ॥

पश्येति।—दानस्य माहात्म्यं महिमा, पश्य; तत्क्षणात्, प्रत्ययकारकं विश्वासजनकं, भवतीति शेषः, इति पश्य; यत्प्रभावात् यस्य दानस्य, प्रभावात् दानमाहात्म्यात्, द्वेषी शत्रुरपि, तत्क्षणात् दानसमय एव इत्यर्थः, मित्रतां याति गच्छति, शत्रुमपि वशीकरोति दानं, किमन्यत् वक्तव्यम्? इति भावः ॥ ५४ ॥

पुत्रादपीति।—तेन कारणेन, महिषी ससुता सवत्साऽपि, खले निखलक्षेत्रे, दत्ते भक्षणार्थमर्पिते सति, खलु निश्चितं, तु भोः, निखिलं सकलं, खलस्यापि खलिहरखलित्वेत्यर्थः, दुग्धं क्षीरं, नित्यं प्रत्यहं, ददाति प्रयच्छति, तेन हेतुना, सुतार्थमपि खलिहरखलनात भावः, विवेकविवर्जितस्य अज्ञानस्य, पशोरपि पशुजातेरपि, दानम् अभीष्टवस्तुनोऽर्पणं, पुत्रादपि अरनखेदजनकत्वात् खसुतादपि, प्रियतरं खलु अतिशयेन प्रियमेव, मन्ये सम्भावयामि, पश्य इत्यनया आर्थ्यकरम् उदाहरणमवलोकय। वसन्ततिलकं छन्दः ॥ ५५ ॥

प्रीतिमिति।—नखमांसवत् नखमांसमिव, [प्राग्वदत्वात् एकवद्भावः] निर-

एवं स मूषकस्तदुपकाररक्षितः तथा विश्रब्धः, यथा तस्य पक्वमध्ये प्रविष्टः तेन सह सर्वदैव (ट) गोष्ठीं करोति।

अथ अन्यस्मिन्नहनि वायसोऽप्युपूर्णनयनः समभ्येत्य सगद्गदं तमुवाच,—"भद्र हिरण्यक! विरक्तिः सञ्जाता मे साम्प्रतं देशस्य अस्य उपरि, तदन्यत्र यास्यामि"। हिरण्यक आह,—"भद्र! किं विरक्तेः कारणम्?" स आह—"भद्र! श्रूयताम्, अत्र देशे महत्या अनावृष्ट्या (ठ) दुर्भिक्षं सञ्जातं, दुर्भिक्षत्वात् जनः (ड) बुभुक्षापीडितः कोऽपि (ढ) बलिमात्रमपि न प्रयच्छति। अपरं, गृहे गृहे बुभुक्षितजनैः विहङ्गानां बन्धनाय (ण) पाशाः प्रगुणीकृताः सन्ति। अहमपि (त) आयुःशेषतया पाशेन बद्धः उद्धारितोऽस्मि, एतद्विरक्तेः कारणम्। तेनाहं विदेशं चलित इति (थ) वाष्पमोक्षं करोमि"। हिरण्यक आह,—"अथ भवान् क्व प्रस्थितः?" स आह,—"अस्ति दक्षिणापथे (द) वनगहनमध्ये महासरः; तत्र त्वत्तोऽधिकः परमसुहृत् कूर्मो मन्थरको

स्तराम् अविच्छिन्नां, दुर्भेद्यां दुरपनेयां, प्रीतिं प्रणयं, दानादिनेति शेषः, कृत्वा मूषकः हिरण्यकः, वायसः स्वपतनकस्य, क्रविनभिज्ञतां गतौ प्राप्तौ; नख-तदधःस्थमांसयोर्मध्ये यथा अन्तरं नास्ति, किन्तु नखस्य काठिन्यात् मांसस्य नखाहतत्वाच्च उभे अपि यथा दुर्भेद्ये तथा अनयोः प्रणयोऽपि निरन्तरो दुर्भेद्यश्च इति सरलार्थः॥ ५६॥

(ट) गोष्ठीम्—अन्योऽन्यसंलापम् ("गोष्ठी सभासंलापयोः स्त्रियाम्" इति मेदिनी)।

(ठ) दुर्भिक्षं—भिक्षाया अपि अभावः [अत्र अभावार्थेऽव्ययीभावः]।

(ड) बुभुक्षापीडितः,—क्षुधार्तः।

(ढ) बलिमात्रं—बलिः,—काकबलिनाम्ना प्रसिद्धं वायसेभ्यो देयं बल्किञ्चिदन्नं, तावत्परिमितम् ["प्रमाणपरिमाणाभ्यां—" (वा०) इति मात्रच्प्रत्ययः]।

(ण) पाशाः,—बन्धनरज्जुविशेषाः। प्रगुणीकृताः,—सज्जीकृत्य स्थापिताः।

(त) आयुःशेषतया—आयुषः अवशिष्टतया। उद्धारितः,—विमोचितः।

(थ) वाष्पमोक्षं—अश्रुविसर्जनम्।

(द) वनगहनमध्ये—दुर्गमस्थानमध्यभागे, [गहनशब्दोऽत्र दुर्गमत्ववाची]।

नाम। स च मे मत्स्यमांसखण्डानि दास्यति, तद्भक्षणात् तेन सह (ध) सुभाषितगोष्ठीसुखमनुभवन् सुखेन कालं नेष्यामि। न अहमत्र विहङ्गानां पाशबन्धनेन क्षयं द्रष्टुमिच्छामि।

उक्तञ्च,—अनाहूष्टिहते देशे शस्ये च प्रलयं गते।

धन्यास्तात! न पश्यन्ति देशभङ्गं कुलक्षयम्॥ ५७॥

कोऽतिभारः समर्थानाम्? किं दूरं व्यवसायिनाम्?।

को विदेशः सविद्यानाम्? कः परः प्रियवादिनाम्?॥५८॥

विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन।

स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते"॥ ५९॥

हिरण्यक आह,—"यदि एवं, तदहमपि त्वया सह गमिष्यामि; ममापि महत् दुःखं वर्त्तते"। वायस आह,—भोः! तव किं दुःखम्? तत् कथय"। हिरण्यक आह,—"भोः! बहु वक्तव्यमस्ति अत्र विषये, तत्र एव गत्वा सर्वं सविस्तरं कथयिष्यामि"। वायस आह,—"अहं तावत् आकाशगतिः, तत् कथं

(ध) सुभाषितेति।—सुभाषिता—सदालोचनरूपा, या गोष्ठी—संलापः, तया सुखं, सद्विषयकालोचनारूपालापजनितानन्दमित्यर्थः।

अनाहूष्टिहते इति।—हे तात! देशे अनाहूष्ट्या विनाशं गते, शस्ये च प्रलयं प्रणाशं, गते सति, धन्याः पुण्यवन्तः जनाः, देशभङ्गं देशोच्छेदं, कुलक्षयञ्च वंशनाशञ्च, न पश्यन्ति; अतो देशभङ्गादेः पूर्वमेव पलायनमुचितमिति भावः॥ ५७॥

क इति।—समर्थानां शक्तानाम्, अतिभारः गुरुतरकार्य्यमित्यर्थः, कः? न कोऽपि इत्यर्थः, व्यवसायिनां वाणिजां, दूरं किम्? न किमपि दूरमलौल्यर्थः; सविद्यानां विदुषां, विदेशः कः? अयं देशः अयं विदेश इति गणना नास्ति इत्यर्थः; प्रियवादिनां प्रियभाषिणां, परः कः? न कोऽपि इत्यर्थः, तेषां प्रियवाक्येनैव सर्वे आत्मीया भवन्तीति भावः॥ ५८॥

विद्वत्त्वमिति।—विद्वत्त्वञ्च विद्यावत्त्वञ्च, नृपत्वञ्च राजत्वञ्च, कदाचन तुल्यं नैव, भवतीति शेषः, यतः राजा स्वदेशे पूज्यते, विद्वान् जनः, सर्वत्र पूज्यते; नृपादपि श्रेष्ठो विद्वानिति पर्य्यवसितम्॥ ५९॥

भवतो मया सह गमनम्?" स आह,—"यदि मे प्राणान् रक्षसि, तदा स्वपृष्ठमारोप्य मां तत्र प्रापय, न अन्यथा मम गतिः अस्ति"। तत् श्रुत्वा सानन्दं वायस आह,—"यदि एवं तर्हि अहं, यद्यपि अहं (न) सम्पातादिकान् अष्टौ उड्डीनगतिविशेषान् वेद्मि; तत् समारोह मम पृष्ठं, येन सुखेन त्वां तत् सरः प्रापयामि"। हिरण्यक आह,—"उड्डीनानां नामानि श्रोतुमिच्छामि"। स आह,—

"सम्पातं विप्रपातञ्च महापातं निपातनम्।
वक्रं तिर्यक् तथा चोर्द्धमष्टमं लघुसंज्ञकम्" ॥ ६० ॥

तत् श्रुत्वा हिरण्यकः तत्क्षणादेव तदुपरि समारूढः। सोऽपि शनैः शनैः तमादाय (प) सम्पातोड्डीनप्रक्षितक्रमेण तत् सरः प्राप्तः। ततो लघुपतनकं (फ) मूषकाधिष्ठितं विलोक्य अतिदूरतः, देशकालवित् असामान्यकाकोऽयमिति ज्ञात्वा सत्वरं मन्थरको जले प्रविष्टः। लघुपतनकोऽपि तीरस्थतरुकोटरे हिरण्यकं मुक्त्वा शाखाग्रमारुह्य तारस्वरेण प्रोवाच,—"भोः मन्थरक! आगच्छ आगच्छ, तव मित्रम् अहं लघुपतनको नाम वायसः चिरात् सोत्कण्ठः समायातः, तदागत्य आलिङ्ग माम्।

(न) सम्पातादिकान्—सम्पातप्रभृतीन् वक्ष्यमाणान्। उड्डीनगतिविशेषान्—नभोगमनप्रकारान्।

तानेवाह, सम्पातमिति।—सम्पातं समभावेन गमनं, विप्रपातं पक्षौ विधुय विशेषभावेन गमनं, महापातं बहुदूरमुत्पाय द्रुतगमनं, निपातनं निम्नदेशेन गमनं, वक्रं कुटिलगमनं, तिर्यक् पार्श्वदेशेन गमनम्, ऊर्द्धं किञ्चिदूर्द्धेन गमनम्, अष्टमं लघुसंज्ञकं द्रुतगमननामकम्, एतदष्टप्रकारमुड्डीनम् इत्यर्थः॥ ६०॥

(प) सम्पातेति।—सम्पाताख्यं यत् उड्डीनं, तेन प्रक्षितं प्रक्षानं, तत्क्रमेण च।

(फ) मूषकाधिष्ठितं—मूषकारूढमूषिकम्। देशकालवित्—अस्मिन् देशे इदं करणीयम्, अस्मिन् काले इदं करणीयमिति वेत्तीति तथोक्तः, विचक्षण इत्यर्थः। असामान्यकाकः,—असाधारणो वायसः।

उक्तञ्च,—किं चन्दनैः सकर्पूरैः ? तुहिनैः किञ्च शीतलैः ?।
सर्वे ते मित्रगात्रस्य कलां नार्हन्ति षोड़शीम् ॥ ६१ ॥

तथा च,—केनामृतमिदं सृष्टं मित्रमित्यक्षरद्वयम् ।
आपदाञ्च परित्राणं शोकसन्तापभेषजम् ?" ॥ ६२ ॥

तत् श्रुत्वा निपुणतरं परिज्ञाय सत्वरं सलिलाविष्क्रम्य पुलकिततनुः आनन्दाश्रुपूरितनयनो मन्थरकः प्रोवाच,—"एहि एहि मित्र ! आलिङ्ग माम् ; (ब) चिरकालात् मया त्वं न सम्यक् परिज्ञातः, तेन अहं सलिलान्तः प्रविष्टः ।

उक्तञ्च,—यस्य न ज्ञायते वीर्य्यं न कुलं न विचेष्टितम् ।
न तेन सङ्गतिं कुर्य्यादित्युवाच बृहस्पतिः" ॥ ६३ ॥

एवमुक्ते लघुपतनको द्रुतात् अवतीर्य्य तमालिङ्गितवान् । अथवा साधु इदमुच्यते,—

अमृतस्य प्रवाहैः किं कायचालनसम्भवैः ? ।
चिरान्मित्रपरिष्वङ्गो योऽसौ मूल्यविवर्जितः ॥ ६४ ॥

किमिति ।—सकर्पूरैः कर्पूरसहितैः, चन्दनैः अतिशीतलैरिति भावः, किम् ? शीतलैः तुहिनैः तुषारैश्च, किम् ? न किमपि प्रयोजनम् इत्यर्थः ; यतः ते सर्वे सकर्पूर चन्दनादयः, मित्रगात्रस्य बन्धुशरीरस्य, षोड़शीं कलां षोड़शभागैकभागम् इत्यर्थः, न अर्हन्ति ; बन्धुगात्रसंस्पर्शः तादृशचन्दनादिभ्योऽपि सन्तापनाशक इति भावः ॥ ६१ ।

केनेति ।—आपदां विपदां, परित्राणं रक्षणकारणं, शोकसन्तापभेषजञ्च इष्ट वियोगजनितसन्तापस्य प्रशमने औषधभूतम्, अत एव अमृतम् अमृतरूपम् इत्यर्थः इदम् एतत्, "मित्रम्" इति अक्षरद्वयं, केन जनेन, सृष्टम् ? उत्पादितम् ; मित्रदर्शनस्य परमप्रीतिजनकत्वादिति भावः ॥ ६२ ॥

(ब) चिरकालात्—बहुकालादर्शनात् । परिज्ञातः,—परिचिततया विदितः इत्यर्थः । सलिलान्तःप्रविष्टः,—जलमध्यं गतः ।

यस्येति ।—यस्य वीर्य्ये बलं, न, कुलं वंशं, न, विचेष्टितञ्च आचारञ्च, न ज्ञायते तेन सह सङ्गतिं मिलनं, न कुर्य्यादिति बृहस्पतिः उवाच ; तथा च वीर्य्यवंशचेष्टितान् अवगत्यैव मैत्री विधेया इति तात्पर्य्यम् ॥ ६३ ॥

अमृतस्येति ।—कायस्य देहस्य, चालनाय सम्भवः उत्पत्तिः, प्रयोजनमिति यावत्

एवं द्वौ अपि तौ विहितालिङ्गनौ परस्परं (भ) पुलकितशरीरौ हृष्टाटधः समुपविष्टौ प्रोचतुः आत्मचरित्रवृत्तान्तम्। हिरण्यकोऽपि मन्थरकं प्रणम्य (म) वायसाभ्यासे समुपविष्टः। अथ तं समालोक्य मन्थरको लघुपतनकमाह,—"भोः! कोऽयं मूषकः? कस्मात् त्वया भक्ष्यभूताऽपि पृष्ठमारोप्य आनीतः? तत्र अत्र खल्वकारणेन भाव्यम्"। तत् श्रुत्वा लघुपतनक आह,—"भोः! हिरण्यका नाम मूषकाऽयं मम सुहृत् हितोयमिव जीवितम्। तत् किं बहुना?—

पर्जन्यस्य यथा धारा यथा च दिवि तारकाः।
सिकतारेणवो यद्वत् सङ्ख्या परिवर्जिताः॥ ६५॥
गुणाः सङ्ख्यापरित्यक्तास्तद्वदस्य महात्मनः।
परं निर्वेदमापन्नः सम्प्राप्तोऽयं तवान्तिकम्" ॥ ६६॥

मन्थरक आह,—"किमस्य वैराग्यकारणम्?" वायस

यैषां तथाभूतैः, शरीरप्रक्षालनमात्रसाधनैरित्यर्थः, अमृतस्य प्रवाहैः जलपूरैः, किम्? न किमपि प्रयोजनम् इत्यर्थः, यः चिरात् दीर्घकालादनन्तरं, मित्रपरिष्वङ्गः सुहृदालिङ्गनम्, असौ परिष्वङ्गः, मूल्यविवर्जितः अमूल्यः इत्यर्थः; चित्तसन्तापनाशकत्वात् अनुपमनेतत् मित्रालिङ्गनं, केवलदैहिकसन्तापनाशको जलप्रवाहस्तु न तथेति भावः॥ ६४॥

(भ) पुलकितशरीरौ—रोमाञ्चितकलेवरौ।

(म) वायसाभ्यासे—काकसमीपे, ("समीपे निकटासन्न···। सदेशाभ्याससन्निध···"॥ इत्यमरः)।

सङ्ख्यया मूषिकस्य गुणाधिक्यं प्रकटयन् आगमनकारणमपि सङ्क्षेपेणाह, पर्जन्यस्येत्यादि द्वाभ्याम्।—यथा पर्जन्यस्य मेघस्य, धाराः, यथा च दिवि अन्तरीक्षे, तारकाः, सिकतानां वालुकानां, रेणवः कणा इत्यर्थः, यद्वत् यथा, सङ्ख्यया गणनया, परिवर्जिताः परित्यक्ताः, असङ्ख्या इत्यर्थः, तद्वत् अस्य महात्मनः मूषकस्य, गुणाः सङ्ख्या परित्यक्ताः असङ्ख्याः इत्यर्थः; सोऽयं मूषकः, परं निर्वेदं वैराग्यम्, आपन्नः प्राप्तः सन्, तव अन्तिकं समीपं, सम्प्राप्तः आगतः; असङ्ख्यगुणविभूषितोऽपि पुमान् दुर्दैववशात् परं विपन्नः आपत्प्रतिकाराय आधिविघाताय वा हितैषिणं सुहृदं समाश्रयतीति वक्तुराशयः॥ ६५-६६॥

आह,—"पृष्टो मया, परमनेन अभिहितं, 'यत् बहु वक्तव्यमस्ति, तत् तत्र एव गतः कथयिष्यामि'इति ममापि न निवेदितम्। तत् भद्र स्थिरदंष्ट्रक ! इदानीं निवेद्यताम् उभयोः अपि आवयोः तदात्मनो वैराग्यकारणम्"। सोऽब्रवीत्,—

कथा १।

"अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरं, तस्य नातिदूरे (य) मठायतनं भगवतः श्रीमहादेवस्य। तत्र च ताम्रचूडो नाम (र) परिव्राजकः प्रतिवसति स्म; स च नगरे भिक्षाटनं कृत्वा प्राणयात्रां समाचरति, भिक्षाशेषञ्च तत्रैव भिक्षापात्रे निधाय तद्भिक्षापात्रं (ल) नागदन्ते अवलम्ब्य पश्चात् रात्रौ स्वपिति, प्रत्यूषे च तदन्नं (व) कर्मकराणां दत्त्वा सम्यक् स्तत्रैव देवतायतने (श) सम्मार्जनोपलेपमण्डनादिकं समाज्ञापयति।

अन्यस्मिन् अहनि मम (ष) बान्धवैः निवेदितं,—'स्वामिन्! मठायतने सिद्धमन्नं मूषकभयात् तत्रैव भिक्षापात्रे निहितं नागदन्तेऽवलम्बितं तिष्ठति सदा एव, तत् वयं भक्षयितुं न शक्नुमः; स्वामिनः पुनरगम्यं किमपि नास्ति, तत् किं वृथाऽटनेन अन्यत्र? अद्य तत्र गत्वा यथेच्छं भुञ्जमहे तव प्रसादात्'। तदाकर्ण्य अहं सकलयूथपरिवृतः तत्क्षणादेव तत्र गतः, उत्पत्य च तस्मिन् भिक्षापात्रे सन्ना-

(य) मठायतनं—देवतावासस्थानं, मन्दिरम् इत्यर्थः।

(र) परिव्राजकः,—पर्य्यटकः, सन्यासी इत्यर्थः; भिक्षाटनं—भिक्षार्थंभ्रमणम्।

(ल) नागदन्ते—एतदभिधौ प्रोथिते "खातिना" इति बङ्गभाषया प्रसिद्धे दन्तविशेषे।

(व) कर्मकराणां—भृत्यानाम्, [सम्बन्धविवक्षया षष्ठी]।

(श) सम्मार्जनोपलेपमण्डनादिकं—धूल्यपनयन-गोमयलेपनादिकार्य्यमिति भावः।

(ष) बान्धवैः,—ज्ञातिभिः। वृथाऽटनेन—निष्फलभ्रमणेन।

रूढः भक्ष्यविशेषान् सेवकानां दत्त्वा पश्चात् स्वयमेव भक्षयामि ; सर्वेषां तृप्तौ जातायां भूयः स्वगृहं गच्छामि। एवं नित्यमेव तदन्नं भक्षयामि। परिव्राजकोऽपि यथाशक्ति रक्षति। परं यदा एव (स) निद्राऽन्तरितो भवति, तदा अहं तत्र आरुह्य आत्मकृत्यं करोमि।

अथ कदाचित् तेन (ङ) मम रक्षणार्थं महान् यत्नः कृतः, जर्जरवंशयष्टिकः समानीतः, तेन सुप्तोऽपि मम भयात् भिक्षापात्रं ताड़यति। अहमपि अभक्षितेऽपि अन्ने प्रहारभयात् अपसर्पामि। एवं तेन सह सकलां रात्रिं (च) विग्रहपरस्य कालो व्रजति।

अथ अन्यस्मिन्नहनि तस्मिन् मठे (क) बृहत्स्फिङ्नामा परिव्राजकः तस्य सुहृत् तीर्थयात्राप्रसङ्गेन पान्थः प्राघूर्णिकः समायातः। तं दृष्ट्वा (ख) प्रत्युत्थानविधिना सभाज्य प्रतिपत्तिपूर्वकम् (ग) अभ्यागतक्रियया नियोजितः। ततश्च रात्रौ एकत्र (घ) कुशसंस्तरे द्वौ अपि प्रसुप्तौ धर्मकथां कथयितुम् आरब्धौ।

अथ (ङ) बृहत्स्फिक्कथागोष्ठीषु स ताम्रचूड़ो मूषकत्राणार्थं व्याक्षिप्तमनाः जर्जरवंशेन भिक्षापात्रं ताड़यन् तस्य शून्यं

(स) निद्राऽन्तरितः,—सुप्तः, निद्रित इत्यर्थः। आत्मकृत्यं—स्वकार्यं भक्षणादिकम्।

(ङ) मम रक्षणार्थं—मत्तः भोज्यद्रव्याणां गुप्त्यर्थम्। जर्जरवंशः,—जीर्णवंशदण्डः।

(च) विग्रहपरस्य—युध्यमानस्य।

(क) बृहदिति।—बृहत्यौ—विशाले, स्फिचौ—नितम्बमांसपिण्डौ यस्य सः बृहत्स्फिक्, स नाम यस्य सः। प्राघूर्णिकः,—अतिथिः।

(ख) प्रत्युत्थानविधिना—प्रत्युद्गमनाद्यनुष्ठानेन। सभाज्य—सत्कृत्य। प्रतिपत्तिपूर्वकं—सम्मानपूर्वकम्।

(ग) अभ्यागतक्रियया—अतिथिपरिचर्यया। नियोजितः, आत्मा इति शेषः।

(घ) कुशसंस्तरे—दर्भशय्यायाम्। प्रसुप्तौ—शयितौ।

(ङ) बृहदिति।—बृहत्स्फिचा—तन्नाम्ना परिव्राजकेन सह, कथागोष्ठीषु—संलापावसरेषु। व्याक्षिप्तमनाः,—व्यग्रचित्तः।

(च) प्रतिवचनं प्रयच्छति । (छ) तन्मयः न किञ्चित् (ज) उदाहरति ।

अथ असौ अभ्यागतः परं कोपमुपागतः तमुवाच,—'भोः ताम्रचूड ! परिज्ञातः त्वं सम्यक् न सुहृत्, तेन मया सह साङ्गटं न जल्पसि ; तत् रात्रौ अपि त्वदीयं मठं त्यक्त्वा अन्यत्र मठे यास्यामि । उक्तञ्च—

एह्येह्यत्र, समाश्रयासनमिदं, कस्माच्चिरात् दृश्यसे ?
का वार्त्ता? अतिदुर्बलोऽसि? कुशलम्? प्रीतोऽस्मि ते दर्शनात्।
एवं ये समुपागतान् प्रणयिनः प्रह्लादयन्त्यादरात्
तेषां युक्तमशङ्कितेन मनसा हर्म्याणि गन्तुं सदा ॥ ६७॥

गृहो यत्राऽऽगतं दृष्ट्वा दिशो वीक्षते वाऽप्यधः ।
तत्र ये मदने यान्ति ते शृङ्गरहिता वृषाः ॥ ६८ ॥

(च) प्रतिवचनम्—उत्तरम् ।

(छ) तन्मयः,—हृदयस्थितक्रव्यादमयचित्तः, मूषिकध्यानेन तत्रैव निविष्टमनस्कत्वात् इति भावः ।

(ज) उदाहरति—कथयति, स्वयं प्रश्नः न किञ्चित् भाषते इत्यर्थः ।

एहीति ।—अत्र मत्समीपे, एहि एहि आगच्छ आगच्छ, इदम् आसनं समाश्रय गृहाण, कस्मात् किमर्थं, चिरात् दीर्घकालात्, परमिति शेषः, दृश्यसे ? का वार्त्ता ? कः वृत्तान्तः ? अतिदुर्बलोऽसि ? अत्यन्तं कृशोऽसि ? कुशलं मङ्गलम् ? ते तव, दर्शनात् प्रीतोऽस्मि ; ये जनाः, समुपागतान् उपस्थितान्, प्रणयिनः बान्धवान्, एवम् उक्तप्रकारेण, आदरात् प्रह्लादयन्ति प्रीणयन्ति, अशङ्कितेन अमङ्गलचिन्तनेनेत्यर्थः, मनसा तेषां हर्म्याणि गृहाणि इत्यर्थः, [विशेषार्थपरशब्दस्यापि क्वचित् सामान्यवाचकत्वदर्शनात् अत्र हर्म्यशब्दस्य गृहसामान्यपरता] सदा गन्तुं युक्तम् उचितं, साधुनामिति शेषः । आर्टसविक्रीडितं वृत्तम् ॥ ६७ ॥

गृहीति ।—गृहो गृहस्थः, यत्र यस्मिन् गृहे, आगतम् अभ्यागतम्, अतिथिम् इत्यर्थः, दृष्ट्वापि दिशः वा अधः वीक्षते इतस्ततो दृष्टिं निक्षिपति, अधोमुखो वा भवति इत्यर्थः, तत्र मदने गृहे, ये यान्ति, ते शृङ्गरहिताः शृङ्गहीनाः, वृषाः, तद्वत् विवेकहीना इत्यर्थः, पशुवत् मानापमानज्ञानवर्जिता इति भावः ॥ ६८ ॥

नाभ्युत्थानक्रिया यत्र नाऽऽलापा मधुराक्षराः ।
गुणदोषकथा नैव तत्र दृर्म्ये न गम्यते ॥ ६९ ॥

तत् (झ) एकमठप्राप्या अपि त्वं गर्वितः(ञ) त्यक्तसुहृत्स्नेहः न एतत् वेत्सि, यत् त्वया मठाश्रयव्याजेन नरकोपार्जनं कृतम्। उक्तञ्च,—नरकाय मतिस्ते चेत् पौरोहित्यं समाचर ।

वर्षं यावत् किमन्येन मठचिन्तां दिनत्रयम् ॥ ७० ॥

तन्मूर्ख ! शोचितव्यः त्वं गर्वं गतः । तदहं त्वदीयं मठं परित्यज्य यास्यामि' ।

अथ तत् श्रुत्वा (ट) भयत्रस्तमनाः ताम्रचूडः तमुवाच,—'भो भगवन् ! मा एवं वद, न त्वत्समोऽन्यो मम सुहृत् कश्चिदस्ति परः ; तत् श्रूयतां (ठ)' गोष्ठीशैथिल्यकारणम् । एष

नेति ।—यत्र गृहे, अभ्युत्थानक्रिया सादरप्रत्युद्गमनं, न, मधुराक्षराः मधुराणि अक्षराणि येषु तादृशाः, आलापाः वचनानि, न,तथा गुणदोषकथा अन्योऽन्यगुणदोषचर्चा, न, अस्तीति शेषः, तत्र दृर्म्ये नैव गम्यते, तत्र गमनं नोचितमिति भावः ॥६९॥

(झ) एकमठप्राप्या—एकस्य मठस्य—देवमन्दिरस्य,प्राप्या—आधिपत्यलाभेनेत्यर्थः ।

(ञ) त्यक्तसुहृत्स्नेहः,—परित्यक्तबन्धुप्रणयः ।

नरकायेति ।—चेत् यदि, ते तव, नरकाय नरकं गन्तुं, मतिः बुद्धिः, वर्तते इति शेषः, तदा वर्षं यावत् एकवर्षं व्याप्य इत्यर्थः,["कालाध्वनोरत्यन्तसंयोगे"(२।३।५ पा०) इति अत्यन्तसंयोगे द्वितीया] पौरोहित्यं देवमन्दिरस्य पुरोहितकार्यं, लोकप्रतारणात्मकमिति भावः ; पौरोहित्यं—यागयाजित्वमिति वा "देवस्वो यागयाजी च" इत्यादि स्मरणादिति भावः ; (मिथोपजीविनां परिव्राजकानां देवेषु यागेषु च सोल्लुण्ठनीक्तिरियमिति शेषम्) समाचर अनुतिष्ठ ; अन्येन किं किं बहुना इत्यर्थः, दिनत्रयं व्याप्य मठचिन्तां मठसंरक्षणभावनां, समाचर इति पूर्वानुषङ्गः ; दिनत्रयं व्याप्य मठचिन्तां कृत्वा देवत्वेऽपि नरके वासो भवति, एतदेव ते समुचितम् अवज्ञाताभ्यागतस्येति भावः ॥ ७० ॥

(ट) भयत्रस्तमनाः,—भयेन भ्रष्टितचित्तः । परः,—श्रेष्ठः ।

(ठ) गोष्ठीति ।—गोष्ठ्याम्—अन्योऽन्यञ्च सदाऽपि, यत् शैथिल्यम्—अनभिनिवेशः, तस्य कारणम् ।

दुरात्मा मूषकः प्रोन्नतस्थाने घृतमपि भिक्षापात्रम् (ङ) उत्प्लुत्य आरोहति, भिक्षाग्रेषञ्च तत्रस्थं भक्षयति। (ढ) तद्भावात् एव मठे (ण) मार्जनक्रिया अपि न भवति। तन्मूषकत्रासार्थम् एतेन वंशेन भिक्षापात्रं मुहुर्मुहुः ताड़यामि, नान्यत् कारणमिति। अपरमेतत् (त) कुतूहलं पश्य अस्य दुरात्मनः, यत् (थ) मार्जारमर्कटादयोऽपि तिरस्कृता अस्य उत्पतनेन'। (द) बृहत्स्फिक् आह,—'अथ ज्ञायते तस्य (ध) विलं कस्मिंश्चित् प्रदेशे ?' ताम्रचूड आह,—'भगवन्! न वेद्मि सम्यक्'। स आह,—'नूनं (न) निधानस्य उपरि तस्य विलम्; (प) निधानोष्मणा प्रकूर्दते। उक्तञ्च,—

ऊष्माऽपि वित्तजो दृढिं तेजो नयति देहिनाम्।
किं पुनस्तस्य सम्भोगत्यागकर्मसमन्वितः ॥ ७१ ॥

(ङ) उत्प्लुत्य—उड्डीय, उत्प्लुत्येत्यर्थः।

(ढ) तदिति।—तद्भावात्—तस्य—मूषिकस्य,भावात्—अत्र विद्यमानत्वात् इत्यर्थः।

(ण) मार्जनक्रिया—सम्मार्जनव्यापारः, तद्रेणुगुण्डनत्वादित्याशयः।

(त) कुतूहलं—कौतुकम।

(थ) मार्जारेति।—मार्जाराः,—बिडालाः, मर्कटाः,—वानराः, तस्मादुत्तमोऽपि यै अस्य तीव्रोत्प्लवप्रसिद्धाः अनुपलक्ष्योऽपीति भावः। तिरस्कृताः,—खर्वीकृताः; ततोऽपि शीघ्रतरमस्योत्पतनमिति भावः। अस्य—मूषिकस्य।

(द) बृहत्स्फिक्—बृहत्यौ स्फिचौ—नितम्बौ यस्य तथाभूतः, तदाख्यः इत्यर्थः।

(ध) विलं—गर्त्तः।

(न) निधानस्य—अङ्गपद्मादिनामकस्य रत्नविशेषस्य।

(प) निधानोष्मणा—चिरसञ्चिततथाभूतनिधिप्रभावजनितत्वेन इत्यर्थः। प्रकूर्दते—प्रकर्षेण क्रीडति इत्यर्थः, ["कूर्दते"इत्यस्य धातोः भौवादिकस्य लटि रूपम्]।

ऊष्मेति।—वित्तजः धनजातः, ऊष्मा उत्तापः, अहङ्कार इत्यर्थः, ("उष्मा घर्मेऽध्वनि ज्येष्ठे पुमानूष्मा स्त्रियां त्रिषि" इति ऊष्मशब्दो नान्योऽहङ्कारोऽपि कोषे दृश्यते) अपि देहिनां प्राणिनां, तेजः प्रभावं, दृढिं नयति प्रापयति [नयतेर्द्विकर्मकत्वात्];

तथा च,—नाकस्माच्छाखिलो मातर्विक्रीणाति तिलैस्तिलान् ।
लुञ्चितानितरैर्येन हेतुरत्र भविष्यति' ॥ ७२ ॥

ताम्रचूड आह,—'कथमेतत् ?' स आह,—

कथा २ ।

'यदा अहं कस्मिंश्चित् स्थाने (फ) प्रावृट्काले व्रतग्रहण-निमित्तं कञ्चित् ब्राह्मणं वासार्थं प्रार्थितवान् ; ततश्च (ब) तद्-वचनात् तेनापि (भ) शुश्रूषितः सुखेन देवार्चनपरः तिष्ठामि ।

अथ अन्यस्मिन्नहनि प्रत्यूषे (म) प्रबुद्धोऽहं ब्राह्मण-ब्राह्मणीसंवाददत्तावधानः शृणोमि । तत्र ब्राह्मण आह,—'ब्राह्मणि ! प्रभाते दक्षिणायनसङ्क्रान्तिः अनन्तदानफलदा

त्यागकर्मणा दानव्यापारेण, समन्वितः युक्तः, तस्य वित्तस्य, सम्भोगः किं पुनः ? तेनो-ह्यिं नयत्येव, तत्र किं वक्तव्यमलमौत्सुक्येन ; वित्तस्य दाने भोगे च, किं बहुना वित्त-संसर्गेऽपि क्रमा जायते, अर्थस्यानर्थमूलत्वादिति भावः ॥ ७१ ॥

नेति ।—हे मातः ! श्राखिली तदाख्या, श्राखिलगोत्रसम्भूता वा काचित् ब्राह्मणी, येन हेतुना, इतरैः अलुञ्चितैः इति भावः, तिलैः लुञ्चितान् अपनीतत्वचः, तिलान् अकस्मात् विना कारणम् इत्यर्थः. न विक्रीणाति तुषरहितैः तिलैः सतुषान् तिलान् न विनिमिनोति इति भावः ; ["पारेमध्येषष्ठ्या क्रियः" (१।३।१८ पा०) इत्यनुशासनेन आत्मनेपदव्यवस्थितेः; अत्र "विक्रीणीते" इत्येवमेव भवितुं युक्तम्] तेन अत्र अधिकर्यो, हेतुः कारणं, भविष्यति ; प्रयोजनमुद्दिश्यैव सर्वेषां प्रवर्तनादिति भावः ॥७२॥

(फ) प्रावृट्काले—वर्षाकाले [प्रावृडिति प्रपूर्वस्य वृञ्धातोः क्विप् "नाहि-वृतिवृषि—"(६।३।११६ पा०) इति सूत्रेण उपसर्गस्य दीर्घत्वम्] । व्रतग्रहणनिमित्तं —कस्यांचित् नियमस्य पालनार्थम् । वासार्थं—तद्गृहे अवस्थानार्थम् ।

(ब) तद्वचनात्—तस्मात् वचनात्, तत्प्रार्थनावचनात् इत्यर्थः । तेन—प्रार्थित-ब्राह्मणेन ।

(भ) शुश्रूषितः,—सेवितः ।

(म) प्रबुद्धः,—जागरितः । ब्राह्मणेति ।—ब्राह्मणब्राह्मणीसंवादे—ब्राह्मणस्य ब्राह्मण्या सह परस्परकथोपकथने, दत्तावधानः,—अभिनिविष्टचित्तः ।

भविष्यति । तदहं (य) प्रतिग्रहार्थं ग्रामान्तरं यास्यामि । त्वया (र) ब्राह्मणस्य एकस्य भगवतः (ल) सूर्यस्य उद्देशेन किञ्चिद्भोजनं दातव्यम्' ।

अथ तच्छ्रुत्वा ब्राह्मणी (व) परुषतरवचनैः तं भर्त्सयमाना प्राह,—'कुतः ते (श) दारिद्र्योपहतस्य भोजनप्राप्तिः ? तत् किं न लज्जसे एवं ब्रुवाणः !! अपि च, न मया तव (ष) हस्तलग्नया क्वचिदपि लब्धं सुखम् ; न मिष्टान्नस्य आस्वादनं, न च हस्त-पादकण्ठादिभूषणम्' । तत् श्रुत्वा भयत्रस्तोऽपि विप्रो मन्दं मन्दं प्राह,—'ब्राह्मणि ! न एतत् युज्यते वक्तुम । उक्तञ्च,—

आसादपि तदर्हञ्च कस्मान्नो दीयतेऽर्थिषु ?।
इच्छाऽनुरूपो विभवः कदा कस्य भविष्यति ? ॥ ७३ ॥
ईश्वरा भूरिदानेन यत्नभन्ते फलं किल ।
दरिद्रस्तच्च काङ्क्षिण्या प्राप्नुयादिति नः श्रुतिः ॥ ७४ ॥

(य) प्रतिग्रहार्थं—दत्तवस्तुनः स्वीकारः प्रतिग्रहः, तस्मै इदं, दानग्रहणार्थ-मित्यर्थः, [अत्र नित्यसमासः, "अर्थेन नित्यसमासः सर्वलिङ्गता चेति वक्तव्यम्" इति वार्त्तिकात्]।

(र) ब्राह्मणस्येति,—[सम्बन्धविवक्षया सम्प्रदाने षष्ठी]।

(ल) सूर्यस्य उद्देशेन—सूर्यदेवप्रीत्यर्थम इत्यर्थः।

(व) परुषतरवचनैः,—अतिकर्कशवाक्यैः। भर्त्सयमाना—तिरस्कुर्वन्ती।

(श) दारिद्र्योपहतस्य—निर्धनस्य इत्यर्थः।

दाता लघुरपि सेव्यो भवति न कृपणो महानपि सदृद्या ।
कूपोऽल्पः स्वादुजलः प्रीत्यै लोकस्य न समुद्रः ॥ ७५ ॥

तथा च,—अकृतत्यागमहिम्ना मिथ्या किं राजराजशब्देन ? ।
गोप्तारं न निधीनां कथयन्ति महेश्वरं विबुधाः ॥ ७६ ॥

अपि च,—सदा धनपरिक्षीणः शस्त्र एव करीश्वरः ।
क्षीणः पीनगात्रोऽपि निन्द्य एव हि गर्दभः ॥ ७७ ॥

किल खलु, दरिद्रो जनः, आकिञ्चनां वराटकानां विक्रयात्, ("वराटकानां दशकद्वयं यत्र सा आकिञ्ची" इति लीलावती) आकिञ्चीमात्रदानेन इत्यर्थः, तस्य फलं, प्राप्नुयात् लभेत, इति नः अस्माकं, श्रुतिः आगमेषु श्रुतम् ; अतोऽस्माकं दरिद्राणाम् अल्पदानस्यापि भूरिफलवत्तया किञ्चिदपि दातव्यमिति भावः ॥ ७४ ॥

दातेति ।—दाता लघुरपि निर्धनोऽपीत्यर्थः, सेव्यः भवति, लोकैरिति शेषः, कृपणः अदाता, सदृद्या [अव क्रये क्तीया] सत्पदा, महानपि न, सेव्यः इत्यनुषङ्गः ; तथा हि, अल्पर्यतानि स्वादूनि जलानि यस्य तादृशः कूपः क्षुद्रोऽपीति भावः, लोकस्य जनस्य, प्रीत्यै, भवतीति शेषः, तस्य मधुरजलदातृत्वात् ; समुद्रो बृहदपीति भावः, न, लवणमयजलत्वात् तेन न कोऽपि तृप्यतीति भावः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः । आर्या वृत्तम् ॥ ७५ ॥

अकृतेति ।—अकृतः अविहितः इत्यर्थः, त्यागस्य दानस्य, महिमा महत्त्वं येन तादृशेन, दानवर्जितेनेत्यर्थः, अत एव मिथ्या अयथार्थभूतेन, राजराजशब्देन नृपश्रेष्ठ इति पदेन, अथ च राजराजशब्देन कुबेरस्य नानविशेषेण, ("कुबेरस्त्र्यम्बकसखः··· । ···राजराजो धनाधिपः ॥" इत्यमरः) किम् ? न किमपि प्रयोजनमित्यर्थः ; विबुधाः पण्डिताः, निधीनां रत्नानां, गोप्तारं रक्षितारं, न तु दातारं, तस्य महेश्वरकुबेरयक्षत्वादिति भावः ; कुबेरमिति शेषः, महेश्वरं न कथयन्ति ; धनवत्त्वमेव न महेश्वरशब्दप्रतिपाद्यत्वे हेतुः, अपि तु त्यागशीलत्वमेवेति भावः । आर्या वृत्तम् ॥ ७६ ॥

सदेति ।—सदा सततं, दानेन एव, मदजलेन, अन्यत्र,—धनविसरणेन, परिक्षीणः एव, न्यूनः, अन्यत्र,—दैन्यमापन्नः इत्यर्थः, करीश्वरः करिणामीश्वरः, गजेन्द्रः इति यावत्, शस्त्रः प्रशंसान्वितः, एव, न्यूनत्वाभावात्, अन्यत्र,—सदा धनदानादिति भावः ; क्षीणः एव, न्यूनदत्तवान्, अन्यत्र,—कृपण इति भावः, पीनगात्रः स्थूलकायोऽपि, एव, स्वभावात्, अन्यत्र,—खादरमात्रपरिपोषकत्वात् केवलं मांसपिण्डमयशरीरधारक इति भावः ; गर्दभः रासभः, निन्द्य एव गर्हणीयः

सुश्रीकोऽपि सुहृत्तोऽपि यात्यदानादधो घटः।
पुनः कुलाऽपि काषाऽपि दानादुपरि कर्कटी ॥ ७८ ॥
यच्छन् जलमपि जलदो वल्लभतामेति सकललोकस्य।
नित्यं प्रसारितकरो मित्रोऽपि न वीक्षितुं शक्यः ॥७९॥

एव, हि निश्चयं ; दृश्यते हि तिरश्चामपि दानमूषिकैव प्रशंसा, किमुत परेषामिति तु क्षिप्तार्थः। अत्र विशेषवचनान्यूनत्ववशात् अप्रस्तुतात् ऊषोत्करात् गर्दभाच्च प्रस्तुतस्य दातुः रूपकस्य च प्रतीतेः अप्रस्तुतप्रशंसाऽलङ्कारः ॥ ७७ ॥

सुश्रीक इति।—सुश्रीकोऽपि सुखभाग्योऽपि, एवम्,—मार्गणिकद्रव्यत्वात्, अन्यत्र,—कैवार्त्तिकेऽपि अनिष्टानाचरत्वादिति भावः; सुहृत्तोऽपि एवम्,—सुवर्तुलोऽपि, अन्यत्र —सुचरितोऽपि, घटः जलस्य, अदानात् एवम्,—जलस्थावितरत्वात्, अन्यत्र,—कार्पण्यादिति भावः, अधो याति अधस्तिष्ठति, जलमूल्यावस्थायामधोमुखं कृत्वा स्थापनादिति भावः, जलानालनादरनीयत्वात् इति च भावः, पुनः किन्तु, कुलाऽपि वल्लाऽपि, काषाऽपि विकृताऽऽकृतिरपि, पक्षद्वयेऽपि समानम् ; कर्कटी एवंफलं, "काँकुड़" इति वङ्गभाषया प्रसिद्धं, दानात् एवम्,—पथिकेभ्यः आत्मसमर्पणात्, अन्यत्र, —धनवितरणात्, उपरि सप्तमे प्रदेशे, मञ्चोपरि प्रशंसनीयस्थाने च स्थित्यै, यातीति पूर्वेणान्वयः, एवम्,—यातपोत्तप्तपान्थानां क्षुत्पिपासानिवारकतया, अन्यत्र,—आर्त्तानां विपन्नानां वा दैन्यविनाशकतया इति भावः ; अत्रापि विशेषवचनान्यूनत्ववशात् अप्रस्तुतात् घटात् कर्कट्याश्च प्रस्तुतस्य अदातुः दातुश्च प्रतीतेः अप्रस्तुतप्रशंसाऽलङ्कारः ॥ ७८ ॥

यच्छन्निति।—जलदः मेघः, सूर्य्यादेश्चेति भावः ; जलं वारि, यच्छन्नपि दददपि, सर्वत्र सुप्राप्यजलदानादपि इति भावः ; सकललोकस्य बल्लभतां सर्वजनप्रियतां, एति प्राप्नोति ; अकातरदानशीलत्वादिति भावः ; नित्यं सततं, प्रसारितकरः एवम्,—भूम्याः सङ्कटरांशुभिः जलसमाकर्षणार्थं विस्तारितकिरणः, अन्यत्र,—धनप्रार्थनार्थं हस्तं प्रसारयन्निति भावः, मित्रोऽपि एवम्,—सूर्य्योऽपि, पूर्वोक्तजलदात् अत्युन्नतस्थलस्थितोऽपीति भावः, अन्यत्र,—बन्धुरपि, अतिप्रियोऽपीति भावः ; [मित्रशब्दस्य बन्धुवाचकत्वे क्लीवत्वं सूर्यवाचकत्वे तु पुंस्त्वमेवेति ज्ञेयं] वीक्षितुं द्रष्टुं, न शक्यः, एवम्,—तेजोऽतिरेकात् दृष्टिप्रतीक्षपरीक्षकतया, अन्यत्र,—नियतप्रार्थनावशात् लोकैरनादरणीयतयेति भावः ; अत्रापि विशेषवचनान्यूनत्ववशात् अप्रस्तुतात् जलदात् मित्राच्च प्रस्तुतस्य वदान्यस्य, अदातुः प्रस्तुत प्रार्थयितुरेव रूपकस्य च प्रतीतेः पूर्ववदप्रस्तुतप्रशंसाऽलङ्कारः। आर्या छन्दः ॥ ७९ ॥

एवं ज्ञात्वा दारिद्र्याभिभूतैरपि स्वल्पात् स्वल्पतरं काले पात्रे च देयम्। उक्तञ्च,—

सत्पात्रं महतो श्रद्धा देशे काले यथोचिते ।
यद्दीयते विवेकज्ञैस्तदनन्ताय कल्पते ॥ ८० ॥

तथा च,—अतितृष्णा न कर्त्तव्या तृष्णां नैव परित्यजेत् ।
अतितृष्णाऽभिभूतस्य शिखा भवति मस्तके' ॥८१॥

ब्राह्मणी आह,—'कथमेतत् ?' स आह,—

कथा ३ ।

'अस्ति कस्मिंश्चित् वनोद्देशे कश्चित् (स)पुलिन्दः, स च कदाचित् (ङ) पापर्द्धिं कर्त्तुं वनं प्रति प्रस्थितः। अथ तेन (क) प्रसर्पता महान् (ख) अञ्जनपर्वतशिखराकारः क्रोड़ः समासादितः, दृष्ट्वा च (ग) कर्णान्ताकृष्टनिशितसायकेन समाहतः,

सत्पात्रमिति।—सत्पात्रम् उत्कृष्टं दानपात्रं, महतो सनधिका, श्रद्धा धर्मकार्य्येषु प्रत्ययः, यस्मिं चेदिति शेषः, तदा विवेकज्ञैः सुविवेचकैः, यथोचिते देशे कालादौ, तथा काले पौर्णमासादौ, यत् दीयते, श्रद्धातिशयेन सत्पात्रायेति शेषः, तत् दानम्, अनन्ताय अक्षयफलाय, कल्पते प्रभवति, ["अनन्ताय" इत्यत्र "कृपि सम्पद्यमाने च" (वा०) इति चतुर्थी] अक्षयफलं भवति इत्यर्थः ॥ ८० ॥

अतितृष्णेति।—अतितृष्णा अतिलोभः, न कर्त्तव्या, तृष्णां ज्ञात्वाकृतलोभं, नैव परित्यजेत्, अतितृष्णया अभिभूतस्य अत्यन्तलोभाऽऽकृष्टस्य, अनस्य इति शेषः, मस्तके, शिरोमध्ये, शिखा शिखावत्प्रतीयमानः चापल्यभागः इत्यर्थः, भवति उत्तिष्ठते ॥ ८१ ॥

(स) पुलिन्दः,—म्लेच्छजातिविशेषः।

(ङ) पापर्द्धिं—पापवृद्धिं, जीवहत्यापापेन सम्पदं वा।

(क) प्रसर्पता—विचरता।

(ख) अञ्जनपर्वतशिखराऽऽकारः,—कज्जलाचलचूड़ासदृशमूर्त्तिः। क्रोड़ः,—शूकरः, ("क्रोड़: पुमी शूकरे ना न पुमानुरश्छदः" इति मेदिनी)।

(ग) कर्णान्तेति।—कर्णान्तम्—आकर्णम्, आकृष्टः,—आकर्णकृष्टः, निशितः—तीक्ष्णः, सायकः,—शरो येन तथोक्तेन सता। समाहतः,—ताडितः।

तेनापि कोपाऽऽविष्टेन चेतसा (घ) बालेन्दुद्युतिना दंष्ट्राग्रेण (ङ) पाटितोदरः पुलिन्दो गतासुः भूतलेऽपतत्। अथ लुब्धकं व्यापाद्य शूकरोऽपि शरप्रहारवेदनया पञ्चत्वं गतः।

एतस्मिन्नन्तरे कश्चित् आसन्नमृत्युः शृगालः निराहारतया पीड़ितः इतस्ततः परिभ्रमन् तं प्रदेशम् आजगाम ; अथ यावत् वराहपुलिन्दौ द्वौ अपि पश्यति, तावत् प्रहृष्टो व्यचिन्तयत्,—'भोः ! सः (च) अनुकूलो मे विधिः, तेन एतदपि अचिन्तितं भोजनमुपस्थितम् !! अथवा साधु इदमुच्यते,—

अकृतेऽप्युदये पुंसामन्यजन्मकृतं फलम्।
शुभाशुभं समभ्येति विधिना सन्नियोजितम् ॥ ८२ ॥

तथा च,—यस्मिन् देशे च काले च वयसा यादृशेन च।
कृतं शुभाशुभं कर्म तत् तथा तेन भुज्यते ॥ ८३ ॥

तदहं तथा भक्षयामि, यथा बहूनि अहानि मे (छ) प्राणयात्रा भवति ; तत् तावदेनं (ज)स्नायुपाशं धनुष्कोटिगतं भक्षयामि। उक्तञ्च,—

(घ) बालेन्दुद्युतिना—नवोदितचन्द्रकान्तिना, शुक्लकुटिलेनेति भावः।

(ङ) पाटितोदरः,—विदारितकुक्षिः। पुलिन्दः,—व्याधः। गतासुः,—विगतप्राणः।

(च) अनुकूलः,—सदयः।

अकृते इति।—उदये सति, अकृतेऽपि, पुंसाम् अन्यजन्मकृतं जन्मान्तरोपार्जनमेव निर्णादितं, शुभाशुभं फलं सुखदुःखादिरूपं, विधिना दैवेन, सन्नियोजितं सम्यक् प्रेरितं सदित्यर्थः, समभ्येति समागच्छति, पुरुषमिति शेषः ॥ ८२ ॥

यस्मिन्निति।—यस्मिन् देशे च, काले च, यादृशेन वयसा च, यत् शुभाशुभं कर्म कृतं, स्यादिति शेषः, येन पूर्वजन्मनीति पदद्वयमध्याहार्य्यम् ; तत् सर्वं, तथा तादृशमेव, तस्मिन् देशे, तस्य काले, तादृशे वयसि च, तत्तत्कर्मानुरूपमित्यर्थः, तेन पुंसा, भुज्यते ॥ ८३ ॥

(छ) प्राणयात्रा—जीविका।

(ज) स्नायुपाशं—स्नायुनिर्मितां रज्जुम्। धनुष्कोटिगतं—धनुषोऽवलम्बनरूपम्।

प्रनैः प्रनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम्।
रसायनमिव प्राज्ञैर्हेलया न कदाचन' ॥ ८४ ॥

इत्येवं मनसा निश्चित्य (झ)चापचटितकोटिं मुखमध्ये प्रक्षिप्य स्वायुं भक्षितुं प्रवृत्तः, ततश्च त्रुटिते पाशे तालुदेशं विदार्य चापकोटिर्मस्तकमध्येन निष्क्रान्ता। सोऽपि तद्दिनया तत्क्षणात् मृतः। अतोऽहं ब्रवीमि,—'अतितृष्णा न कर्त्तव्या' इत्यादि'।

स पुनरपि आह,—'ब्राह्मणि! न श्रुतं भवत्या?—

आयुः कर्म च वित्तञ्च विद्या निधनमेव च।
पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः' ॥ ८५ ॥

अथ एवं सा तेन प्रबोधिता ब्राह्मणी आह,—'यदि एवं, तदस्ति मे गृहे (ञ)स्तोकतिलराशिः। ततः तिलान् (ट)लुञ्चित्वा

प्रनैरिति।—प्राज्ञैः बुद्धिमद्भिः, प्रनैरिति श्रेषः, स्वयम् आत्मना, [कर्त्तरि तृतीया] उपार्जितं वित्तं धनं, रसायनमिव जराव्याधिनाशकौषधमिव, प्रनैः प्रनैश्च अल्पमल्पमेव, क्रमेणेत्यर्थः, भोक्तव्यं, कदाचन हेलया अवज्ञया, [प्रकृत्यादित्वात् तृतीया] ममत्व-बोधाभावात् अनादरेणेति भावः, न, भोक्तव्यमित्यनुषङ्गः; रसायनं यथा लोकपरि-मितमेव सादरं भुञ्जीत, न तु यदृच्छया, स्वोपार्जितं वित्तमपि तथैवेति भावः ॥८४॥

(झ) चापेति।—चापञ्च—धनुषः, चटितकोटिं—खचितायभागं, ज्यारोपण-स्थानमित्यर्थः; यद्वा,—चापे चटिता—बद्धा, कोटिः,—अग्रभागः, प्रान्तदेश इत्यर्थः, यत्र तम्; धनुरग्रभागार्थकस्यापि कोटिशब्दस्य "ऋषिविशेषार्थशब्दस्यापि सामान्यार्थे प्रयोगः" इति न्यायात् स्वायुरग्रभागार्थे प्रयोगः। त्रुटिते—छिन्ने। निष्क्रान्ता—बहिर्गता, नलकनलध्वनेरिव शिखावत् ऊर्द्ध्वं अवस्थिता इति भावः।

आयुरिति।—आयुः जीवनकालः, कर्म प्राग्यं, वित्तं धनं, विद्या शास्त्रज्ञानं, तथा निधनं खलु, एतानि ["नपुंसकमनपुंसके—" (१।२।६९ पा०) इति सूत्रेणैकशेषात् पक्षे बहुवचनं क्लीवत्वञ्च] पञ्च, गर्भस्थस्य उदरस्थितस्यैव, देहिनः सृज्यन्ते हि, विधात्रा इति श्रेषः ॥ ८५ ॥

(ञ) स्तोकतिलराशिः,—अल्पतिलराशिः।

(ट) लुञ्चित्वा—लक्षयित्वा, त्वचोऽपनीय इत्यर्थः। ["वञ्चिलुञ्चृतञ्च" (१।२।२४ पा०) इति क्त्वापक्षे "लुञ्चित्वा" इत्यपि]।

तिलचूर्णेन ब्राह्मणं भोजयिष्यामि' इति। ततः तद्वचनं श्रुत्वा सूर्य्याऽऽतपे दत्तवती। अत्रान्तरे तस्या गृहकर्मव्यग्रायाः तिलानां मध्ये कश्चित् (ठ) सारमेयो मूत्रोत्सर्गं चकार। तं दृष्ट्वा सा चिन्तितवती,—'अहो! (ड) नैपुण्यं पश्य पराङ्मुखीभूतस्य विधेः, यटेते तिला अभोज्याः कृताः; तदलम्, एतान् समादाय कस्यचित् गृहं गत्वा लुञ्चितैः अलुञ्चितान् आनयामि। सर्वोऽपि जनोऽनेन विधिना प्रदास्यति' इति।

अथ यस्मिन् गृहेऽहं भिक्षार्थं प्रविष्टः, तत्र गृहे साऽपि तिलान् आदाय प्रविष्टा विक्रयं कर्त्तुम्; आह च,—'गृह्णातु कश्चित् अलुञ्चितैः लुञ्चितान् तिलान्'।

अथ तद्गृहगृहिणी गृहं प्रविष्टा यावत् अलुञ्चितैः लुञ्चितान् गृह्णाति, तावत् अस्याः पुत्रेण (ढ) कामन्दकशास्त्रं दृष्ट्वा (ण) व्याहृतम्,—'मातः! अग्राह्याः खलु इमे तिलाः, न अस्याः अलुञ्चितैः लुञ्चिताः ग्राह्याः, कारणं किञ्चित् भविष्यति, तेन एषा अलुञ्चितैः लुञ्चितान् प्रयच्छति' । तत् श्रुत्वा तया परित्यक्तास्ते तिलाः। अतोऽहं ब्रवीमि,—'नाकस्माच्छ्राण्डिलो मातः' इत्यादि'।

एतदुक्त्वा (त) स भूयोऽपि प्राह,—'अथ श्रूयते तस्य क्रमणमार्गः?' ताम्रचूड़ आह,—'भगवन्! श्रूयते, यत एकाकी न समागच्छति, किन्तु असङ्ख्ययूथपरिवृतः (थ) पश्यतो मे परिभ्रमन् इतस्ततः सर्वजनेन सह आगच्छति याति च'।

(ठ) सारमेयः,—कुक्कुरः।

(ड) नैपुण्यं—कौशलम्, अज्ञान् विडम्बयितुमिति शेषः। पराङ्मुखीभूतस्य—प्रतिकूलस्य इत्यर्थः। विधेः,—दैवस्य।

(ढ) कामन्दकशास्त्रं—नीतिशास्त्रविशेषम्।

(ण) व्याहृतम्—उक्तम्।

(त) सः,—ताम्रचूडकः। तस्य—मूषिकस्य। क्रमणमार्गः,—विचरणस्य पन्थाः।

(थ) पश्यतो मे—पश्यन्तं माम् अनादृत्य, [अनादरे षष्ठी]।

अभ्यागतः आह,—'अस्ति किञ्चित् खनित्रकम् ?' स आह,—(द) 'वाढम्, अस्ति एषा सर्वलोहमयी खड्खिका'। अभ्यागत आह,—'तर्हि प्रत्यूषे त्वया मया सह ज्ञातव्यं, येन द्वौ अपि (ध) जनचरणाम्बिनायां भूमौ (न) तत्पदानुसारेण गच्छावः'। (प) मया अपि तद्वचनमाकर्ण्य चिन्तितम्,—'अहो! विनष्टोऽस्मि, यतोऽस्य (फ) साभिप्रायवचांसि श्रूयन्ते। नूनं यथा (ब) निधानं ज्ञातं, तथा दुर्गमपि अस्माकं ज्ञास्यति, एतदभिप्रायादेव ज्ञायते। उक्तञ्च,—

सकृदपि दृष्ट्वा पुरुषं विबुधा जानन्ति सारतां तस्य।
हस्ततुलयाऽपि निपुणाः पलप्रमाणं विजानन्ति ॥ ८६ ॥
वाञ्छैव सूचयति पूर्वतरं भविष्यं
पुंसां यदन्यतनुजं त्वशुभं शुभं वा।
विघ्नायते शिशुरजातकलापचिह्नः
प्रत्यङ्गतैरपसरन् सरसः कलापी' ॥ ८७ ॥

(द) वाढं—स्वीकारार्थकमव्ययम्। खड्खिका—खनित्रम्।

(ध) जनचरणाम्बिनायां—लोकानां पदविन्यासेनार्द्रायामिति भावः।

(न) तदिति।—तस्य—मूषिकस्य, पदानुसारेण—पदचिह्नानुसारेण।

(प) मया—हिरण्यकेन।

(फ) साभिप्रायवचांसि—अभिप्राययुक्तानि वचनानि, महासत्त्वज्ञानज्ञानसूचकानीति भावः।

(ब) निधानं—निधिः; यद्वा,—निधीयते अस्मिन् इति निधानं वित्तपेटा, धनरक्षणपात्रमित्यर्थः; "सिन्दुक" इति वङ्गभाषा। ज्ञातम्—अनुमितम्। दुर्गं—बिलम्।

सकृदिति।—विशेषेण बुध्यन्ते इति विबुधाः विद्वांसः देवा वा, पुरुषं सकृदपि एकवारमपि, दृष्ट्वा तस्य पुरुषस्य, सारताम् उत्कर्षापकर्षौ इत्यर्थः, जानन्ति बुध्यन्ते; निपुणाः कुशलाः, नरा इति शेषः, हस्ततुलयाऽपि हस्तरूपतुलादण्डेनापि, पलप्रमाणं पलस्य परिमाणं, विजानन्ति; न हि ते तुलया तोलयन्ति इति भावः। आर्या छन्दः ॥८६॥

वाञ्छेति।—पुंसां वाञ्छैव आकाङ्क्षैव, चित्तवृत्तिः एव इत्यर्थः, पूर्वतरम् अतीतं, भविष्यं, अन्यतनुजं अन्यशरीरोद्देशजं, यत् अशुभं शुभं वा, तत् सूचयति प्रकट-

ततोऽहं भयत्रस्तमनाः सपरिवारो दुर्गमार्गं परित्यज्य अन्यमार्गेण गन्तुं प्रवृत्तः सपरिजनो यावदग्रतो गच्छामि, तावत् सम्मुखो बृहत्कायो मार्जारः समायाति। स च मूषकवृन्दम् अवलोक्य तन्मध्ये सहसा उत्पपात।

अथ ते मूषका मां (भ) कुमार्गगामिनम् अवलोक्य (म) गर्हयन्तः हतशेषाः (य) रुधिरप्लावितवसुन्धराः तमेव दुर्गं प्रविष्टाः। अथवा साधु इदमुच्यते,—

छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलात् वागुरां
पर्य्यन्ताग्निशिखाकलापजटिलान्निर्गत्य दूरं वनात्।
व्याधानां शरगोचरादपि जवेनोत्पत्य धावन् मृगः
कूपान्तःपतितः करोतु विधुरे किं वा विधौ पौरुषम्? ॥८८॥

यति; तथा हि, बलातम् अनुत्पन्नं, कलापस्य बर्हस्य, चित्रं यस्य तादृशः, अपसरन् अपगच्छन्, सरसः रसवान्, मनोहर इत्यर्थः, शिखी कलापी बालमयूरः इत्यर्थः, प्रत्युद्गते: रमणीयगतिविशेषैरेवेत्यर्थः, विज्ञायते, जनैरिति शेषः। मयूरचित्रस्य बालपक्षानुद्गमेऽपि पूर्वजन्माभ्यासगतिविशेषेणैव "अयं मयूरः, नेतरः खगः" इति जनानां चित्तवृत्तिः एव प्रलापयतीति भावः। वसन्ततिलकं वृत्तम् ॥ ८७ ॥

(भ) कुमार्गगामिनं—दुर्गमार्गं परित्यज्य विषयप्रवृत्तम्।

(म) गर्हयन्तः,—निन्दन्तः।

(य) रुधिरप्लावितवसुन्धराः,—रक्ताक्तभूमयः।

छित्त्वेति।—मृगः पाशं जालं, छित्त्वा, कूटरचनां मृगबन्धनार्थं यन्त्रविशेषस्य विकारनित्यर्थः, अपास्य अतिक्रम्य, बलात् बलेनाश्रित्य, वागुरां बन्धनवृत्तिं, भङ्क्त्वा खण्डयित्वा, पर्य्यन्तेषु प्रान्तेषु, अग्निशिखाकलापैः वह्निज्वालासमूहैः, जटिलात् गहनात्, दुःखापगमनादित्यर्थः, वनात् दूरं निर्गत्य, तथा व्याधानां शरगोचरात् वेगेन निक्षिप्तशरस्य सन्धावितपतनस्थानादपि, जवेन वेगेन, उत्पत्य उत्प्लुत्य, धावन् वेगेन गच्छन्, कूपान्तःपतितः कूपमध्यनिमग्नः, भवतीति शेषः; तथापि विषयते इति भावः। तथा हि, विधौ दैवे, विधुरे प्रतिकूले सति, पौरुषं पुरुषकारः, किं वा करोतु? न किमपि कर्तुं शक्नोति; प्राणिनो हि सर्वत्रैव मनुष्यकृतानि शरणकारणानि उपरितनं न दैवकृतानि इति भावः। प्रादूषविक्रीडितं वृत्तम् ॥ ८८ ॥

अथ अहमेकोऽन्यत्र गतः, शेषा मूढतया तत्रैव दुर्गे प्रविष्टाः। अत्रान्तरे स दुष्टपरिव्राजको रुधिरबिन्दुचर्चितां भूमिमवलोक्य तेनैव दुर्गमार्गेण आगत्य उपस्थितः। ततश्च स्वहस्तिकया खनितुम् आरब्धः।

अथ तेन खनता प्राप्तं तन्निधानं, यस्य उपरि सदा एवाहं कृतवसतिः, यस्य (र) ऊष्मणा महादुर्गमपि गच्छामि। ततो हृष्टमनाः ताम्रचूडमिदमूचे अभ्यागतः,—'भोः भगवन्! इदानीं स्वपिहि निःशङ्कः, अस्य ऊष्मणा मूषकस्ते जागरणं सम्पादयति' एवमुक्त्वा निधानम् आदाय मठाभिमुखं प्रस्थितौ द्वौ अपि। अहमपि यावत् निधानरहितं स्थानम् आगच्छामि, तावत् अरमणीयम् उद्वेगकारकं तत् स्थानं वीक्षितुमपि न शक्नोमि, अचिन्तयञ्च,—'किं करोमि? क्व गच्छामि? कथं मे स्यात् मनसः प्रशान्तिः?' एवं चिन्तयतो महाकष्टेन स दिवसो व्यतिक्रान्तः। अथ अस्तमितेऽर्के साद्वेगो निरुत्साहस्तस्मिन् मठे सपरिवारः प्रविष्टः।

अथ (ल) अस्मत्परिग्रहशब्दम् आकर्ण्य ताम्रचूडोऽपि भूयो भिक्षापात्रं जर्जरवंशेन ताडयितुं प्रवृत्तः। अथ असौ अभ्यागतः प्राह,—'सखे! किम् अद्यापि निःशङ्को न निद्रां गच्छसि?' स आह,—'भगवन्! भूयोऽपि समायातः सपरिवारः स दुष्टात्मा मूषकः, तद्भयात् जर्जरवंशेन भिक्षापात्रं ताडयामि'। ततो विहस्य अभ्यागतः प्राह,—'सखे! मा भैषीः, वित्तेन सह

(र) ऊष्मणा—उष्णतेन, प्रभावेणेति भावः। नहीति।—अतिदुर्गमस्थानमपि।

(ल) अस्मदिति।—अस्मत्परिग्रहशब्दं—मम परिजनानां, शब्दं—आस्फालनध्वनिम्।

गतोऽस्य (व) कूर्दनोत्साहः। सर्वेषामपि जन्तूनाम् इयमेव (श) स्थितिः। उक्तञ्च,—

यदुत्साही सदा मर्त्यः पराभवति यत्नवान्।
यदुद्धतं वदेत् वाक्यं तत् सर्वं वित्तजं बलम्' ॥ ८८ ॥

अथ अहं तत् श्रुत्वा कोपाऽऽविष्टो भिक्षापात्रमुद्दिश्य विशेषादुत्कूर्दितोऽप्राप्त एव भूमौ निपतितः। तत् दृष्ट्वा असौ मे शत्रुर्विहस्य ताम्रचूडम् उवाच,—'भोः! पश्य पश्य (ष) कौतूहलम्। आह च,—

अर्थेन बलवान् सर्वो योऽर्थयुक्तः स पण्डितः।
पश्यैनं मूषकं व्यर्थं खजातेः समतां गतम् ॥ ९० ॥

तत् क्षपिहि त्वं गतशङ्कः। यदस्य उत्पतनकारणं, तत् आवयोर्हस्तगतं जातम्। अथवा साधु इदमुच्यते,—

दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः।
तथाऽर्थेन विहीनोऽत्र पुरुषो नामधारकः' ॥ ९१ ॥

(व) कूर्दनोत्साहः,—उत्प्लवनसामर्थ्यमित्यर्थः।

(श) स्थितिः,—मर्य्यादा, नियमः इत्यर्थः।

यदिति।—मर्त्यः मानवः, सदा यत् उत्साही कर्म्यव्यवसायी, भवतीति शेषः, यत् जनान् पराभवति पराजयते, यच्च उद्धतं पटवं, वाक्यं वदेत्, तत् सर्वं वित्तजं धनजातं, बलम् ; धनीमन्त एव एतादृशा भवन्ति लोका इति भावः ॥ ८८ ॥

(ष) कौतूहलं—कौतुकम्।

अर्थेनेति।—सर्वो जनः, अर्थेन धनेन, बलवान्, भवतीति शेषः, यः अर्थयुक्तः धनवान्, सः जनः, पण्डितः विद्वान्, भवतीति शेषः ; एनं व्यर्थं विगतार्थम्, अपगतार्थमित्यर्थः, मूषकं खजातेः आत्मजातेः, इतरमूषकस्येत्यर्थः, समतां तुल्यतां, गतं प्राप्तं, दूरोत्प्लवनशक्तिहीनमिति यावत्, धनबलाभावादिति भावः, पश्य ॥ ९० ॥

दंष्ट्रेति।—दंष्ट्राविरहितः अपदन्तः, सर्पो यथा, मदहीनो गजो यथा, यथा च संसारे, अर्थेन विहीनः दरिद्रः, पुरुषः नामधारकः, आदिति शेषः, केवलं पुरुष इति नाममात्रं धरति, न तु किञ्चिदपि पौरुषं दर्शयितुं क्षमते इति भावः ॥ ९१ ॥

तत् श्रुत्वा अहं मनसा विचिन्तितवान्,—'यतोऽकृत्रिम-मात्रमपि कूर्दनशक्तिर्नास्ति, तत् धिक् अर्थहीनस्य पुरुषस्य जीवितम् !!

उक्तञ्च,—अर्थेन तु विहीनस्य पुरुषस्यैव मेधसः।
उच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥८२॥
यथा काकयवाः प्रोक्ता यथाऽरण्यभवास्तिलाः।
नाममात्रा न सिद्धौ हि धनहीनास्तथा नराः ॥ ८३ ॥
सन्तोऽपि न हि राजन्ते दरिद्रस्येतरे गुणाः।
आदित्य इव भूतानां श्रीर्गुणानां प्रकाशिनी ॥ ८४ ॥
न तथा बाध्यते लोके प्रकृत्या निर्धनो जनः।
यथा द्रव्याणि सम्प्राप्य तैर्विहीनः सुखे स्थितः ॥ ८५ ॥

अर्थेनेति।—अर्थेन विहीनस्य अत एव अल्पमेधसः [अल्पा मेधा यस्येति बहुव्रीहिसमासे—अल्पोत्तरवार्त्तमेधाया अप्यच् समासान्तः,—"नित्यमसिच् प्रजामेधयोः" (५।४।१०२ पा०) इत्यत्र "अल्पावपि भवति" इति काशिकोक्तेः अल्पशब्दस्य यङ्गम्] मन्दबुद्धेरित्यर्थः, अर्थवत्तैव मतेः क्षुरधारादिति भावः, पुरुषस्य नरस्य, सर्वास्तु सकलाः एव, क्रियाः कर्माणि, ग्रीष्मे निदाघे, कुसरितः यथा क्षुद्रसरितः इव, उच्छिद्यन्ते स्वयमेव नश्यन्ति, [कर्मकर्त्तरि लट्] ; न फलदा भवन्ति इति भावः ॥ ८२ ॥

यथेति।—यथा काकयवाः कङ्गवः, अल्पविहीनधान्यानीत्यर्थः, यथा अरण्यभवाः वन्याः, तिलाः अल्पस्निग्धाः, नाममात्राः यवतिलनामधारिण एव, प्रोक्ताः, न हि सिद्धौ, न कदापि कार्य्ये व्यवह्रियन्ते इति भावः, तथा धनहीनाः नराः न किमपि कार्य्ये साधयितुमर्हन्तीति भावः ॥ ८३ ॥

सन्त इति।—दरिद्रस्य निर्धनस्य, सन्तोऽपि विद्यमाना अपि, इतरे गुणाः दयादाक्षिण्यादयः, न हि राजन्ते नैव शोभन्ते, नैव प्रकटीभवन्तीत्यर्थः, यतः भूतानां चित्रादीनां पदार्थानाम्, आदित्यः सूर्य्यः इव, श्रीः लक्ष्मीः, गुणानां प्रकाशिनी ; सूर्य्यो यथा खनिरञ्जनादीन पदार्थान् प्रकाशयति, तथा सम्पदपि स्वप्रभावेण सर्वान् गुणान् इति भावः। अत्र उपमानभूतसूर्य्यपदस्य उपमेयभूतश्रीपदेन सह भिन्नलिङ्गनिर्देशस्तु न दोषावहः "न लिङ्गवचने भिन्ने न श्रीमाधिक्यतोऽपि वा" इत्यादुक्तेः ॥ ८४ ॥

नेति।—लोके जगति, प्रकृत्या स्वभावेन, बाध्यते दुःखी भवति, निर्धनः जनः, तथा न

शुष्कस्य कोटरस्थस्य वह्निदग्धस्य सर्वतः ।
तरोरप्युषरस्थस्य वरं जन्म न चार्थिनः ॥ ९६ ॥
शङ्कनीया हि सर्वत्र निष्प्रतापा दरिद्रता ।
उपकर्तुमपि प्राप्तं निःस्वं सन्त्यज्य गच्छति ॥ ९७ ॥
उन्नम्योन्नम्य तत्रैव निर्धनानां मनोरथाः ।
हृदयेष्वेव लीयन्ते विधवास्तोस्तनाविव ॥ ९८ ॥
व्यक्तेऽपि वासरे नित्यं दीर्घत्यतममस्यावृतः ।
अग्रतोऽपि स्थितो यस्मान्न केनापीह दृश्यते ॥ ९९ ॥

बाध्यते न क्लिश्यते, यथा द्रव्याणि धनानि, सम्प्राप्य सुखी स्थितः सुखी, पश्चात् तैः द्रव्यैः, विहीनः परिभ्रष्टः, बाध्यते दुःखमनुभवति ; अतिशयितदारिद्र्यम् अतीव दुःखजनकमिति निष्कर्षः ; "सुखात्तु यो याति नरो दरिद्रतां मृतः शरीरेण सतः स जीवति" इति भावः ॥९५॥

शुष्कस्येति ।—शुष्कस्य नीरसस्य, कोटरस्थस्य कोटेः अभ्यन्तरस्थस्येति भावः, सर्वतः समन्तात्, वह्निना दग्धस्य, ऊषरस्थस्य क्षारभूमिस्थितस्य, तरोरपि जन्म वरं मनाक्प्रियम्, अर्थिनः भिक्षोः, न, जन्म वरमित्यनुषङ्गः ; एवंविधविशेषणविशिष्टतरुरपि कदाचित् जनानां किमपि कार्यं साधयति, न च तान् कथञ्चिदुद्वेजयति, दरिद्रस्तु सान्येषामुपकारकः, प्रत्युत उद्वेजक एव ; अतः याचकात् क्षीणस्य दग्धस्य समस्तस्य क्षीणवंशस्यतुल्यस्यापि अयाचकस्य श्रेष्ठत्वमिति भावः ॥ ९६ ॥

शङ्कनीयेति ।—निष्प्रतापा प्रभावशून्या, दरिद्रता निर्धनता, सर्वत्र सर्वस्मिन् विषये, शङ्कनीया शङ्कास्थानमित्यर्थः, हि यतः, उपकर्तुं प्राप्तमपि उपस्थितमपि, निःस्वं निर्धनं जनं, सन्त्यज्य विहाय, प्रत्याख्यायेत्यर्थः, गच्छति, जनः इति शेषः ; दारिद्र्यात् धनापहरणादिभयात् न कोऽपि निःस्वेन कृतमुपकारं बहु मन्यते इति भावः ॥ ९७ ॥

उन्नम्येति ।—निर्धनानां दरिद्राणां, मनोरथाः अभिलाषाः, विधवायाः स्त्रियाः स्तनाविव, हृदयेषु एव उन्नम्य उन्नम्य उत्थाय उत्थाय, तत्रैव हृदयेष्वेव, लीयन्ते स्वयं गच्छन्ति ; फलसिद्ध्यभावात् तत्रैव तेषामभिलाष इति भावः ॥ ९८ ॥

व्यक्ते इति ।—इह संसारे, व्यक्ते सुप्रकाशेऽपि, सूर्यकिरणोद्भासितेऽपीत्यर्थः, वासरे दिवसे, नित्यं सततं, दीर्घत्यं दारिद्र्यमेव, तमः तिमिरं तेन, आवृतः आच्छादितः, जन इति शेषः, अयतः सम्मुखे, स्थितोऽपि, केनापि जनेन, यस्मात् न दृश्यते ; अज्ञानमेवेदं तमः दारिद्र्यप्रभवमिति भावः ॥ ९९ ॥

एवं विलप्य अहं भग्नाशाङ्गः तन्निधानं (ख) गण्डोपधानीकृतं दृष्ट्वा स्वं दुर्गं प्रभाते गतः। ततश्च मन्त्रयित्वा प्रभाते गच्छन्तः (ङ) मिथो जल्पन्ति,—'अहो! असमर्थोऽयमुदरपूरणे अस्माकम्; केवलमस्य (क) पृष्ठलग्नानां विड़ालादिविपत्तयः; तत् किमनेन आराधितेन? उक्तञ्च,—

यत्नकाद्याति लाभः स्यात् केवलाः स्युर्विपत्तयः।
स स्वामी दूरतस्त्याज्यो विशेषादनुजीविभिः' ॥ १०० ॥

एवं तेषां वचांसि श्रुत्वा स्वदुर्गं प्रविष्टोऽहम्। यावच्च कश्चित् मम सम्मुखे अभ्येति, तावत् मया चिन्तितं,—'धिक् इमां दरिद्रताम्!!। अथवा साधु इदमुच्यते,—

मृतो दरिद्रः पुरुषो मृतं मैथुनमप्रजम्।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः' ॥ १०१ ॥

एवं मे चिन्तयतः ते भृत्या मम शत्रूणां सेवका जाताः। ते च माम् एकाकिनं दृष्ट्वा (ख) विडम्बना कुर्वन्ति।

(ख) गण्डेति।—गण्डस्य—कपोलस्य, उपधानीकृतम्—उपबर्हीकृतं, शिरस उपधानवत् गण्डस्य उपधानीकृतं, गण्डनिधे स्थापयित्वा शयितमित्यर्थः, परिव्राजकेन इति शेषः।

(ङ) मिथः,—परस्परं, जल्पन्ति—भाषन्ते।

(क) पृष्ठलग्नानां—पृष्ठानुयायिनाम्, अस्माकम् इत्यर्थः।

यादृशं।—यत्नकाद्यात् यत्न आश्रयं स्त्रियेत्यर्थः, लाभः प्रयोजनसिद्धिरूप इत्यर्थः, न स्यात्, (प्रत्युत) केवला विपत्तयः विपदः, स्युः, सः स्वामी अनुजीविभिः अनुचरैः, विशेषात् विशेषेण, दूरतः त्याज्यः; न हि विपत्तिमात्रजनके केवलमनुरागः इति भावः ॥१००॥

मृत इति।—दरिद्रः पुरुषः मृतः मृतवत् अशक्तोऽनीश इत्यर्थः, अप्रजं [समासविधेरनित्यत्वात् "नित्यमसिच्—" (५। ४। १२२ पा०) इति सूत्रेण प्रजाशब्दात् असिच्प्रत्ययः] अपुत्रं, पुत्रोत्पादनशक्तिविरहितमित्यर्थः, मैथुनं स्त्रीसङ्गः, मृतं निष्फलमित्यर्थः, अश्रोत्रियं वेदपारगब्राह्मणवर्जितं, श्राद्धं पितृदानं, मृतं नष्टं, विफलमित्यर्थः, यज्ञाङ्गः दक्षिणायुक्तः, यज्ञः मृतः इतः, फलप्राप्तिविरहित इत्यर्थः; सर्वमेतत् व्यर्थमिति भावः ॥ १०१ ॥

(ख) विडम्बना कुर्वन्ति—उपहसन्ति, तिरस्कुर्वन्ति वा, पीडयन्तीत्यर्थः।

अथ मया एकाकिना (ग) योगनिद्रां गतेन भूयो विचिन्तितं यत्,—'तस्य कुतप क्षिनः (घ) समाश्रयं गत्वा (ङ) तद्-गच्छोपधानवर्त्तिक्षतां वित्तपेटां शनैः शनैः विदार्य्य तस्य निद्रा-वशङ्गतस्य स्वदुर्गे तद्वित्तम् आनयामि, येन भूयोऽपि मे वित्तप्रभावेण आधिपत्यं पूर्ववत् भविष्यति। उक्तञ्च,—

व्यथयन्ति परं चेतो मनोरथशतैर्जनाः।
नानुष्ठानैर्धनैर्हीनाः कुलजा विधवा इव ॥ १०२ ॥
दौर्गत्यं देहिनां दुःखमपमानकरं परम्।
येन स्वैरपि मन्यन्ते जीवन्तोऽपि मृता इव ॥ १०३ ॥
दैन्यस्य पात्रतामेति पराभूतेः परं पदम्।
विपदामाश्रयः शश्वद्दौर्गत्यकलुषीकृतः ॥ १०४ ॥

(ग) योगनिद्रां—युक्तांखरीकरणार्थं नेत्रानमीलनरूपव्यापारविशेषः।

(घ) समाश्रयम्—आश्रयम्।

(ङ) तद्वित्ति।—तस्य—तपस्विनः, गच्छस्य उपधानं—"गालवाखिम" इति यस्य भाषा, तद्वर्त्तिक्षतां—तत्स्थानीकृताम्। वित्तपेटाम्—अर्थपेटिकाम्।

व्यथयन्तीति।—धनैः हीनाः दरिद्रा जनाः, कुलजाः सद्वंशोत्पन्नाः विधवा इव, मनोरथशतैः विविधाभिलाषैः, चेतः चित्तं, परं केवलं, व्यथयन्ति क्लेशयन्ति, किन्तु अनुष्ठानैः तत्तन्मनोरथसम्पादनयोग्यकर्मकरणैः, न, मोदयन्तीति शेषः; उपायाभावा-दिति भावः; दरिद्राणाम् आभिलाषपरम्परा: केवलं मनसि स्फुरन्ति, नैव ते क्वाचिदपि साफल्यं प्राप्नुवन्तीति निष्कर्षः ॥ १०२ ॥

दौर्गत्यमिति।—दौर्गत्यं दारिद्र्यं, देहिना प्राणिनां, परम् अत्यन्तं, दुःखं दुःखकरम्, अपमानकरञ्च अवज्ञाजनकञ्च; येन दौर्गत्येन हेतुना, स्वैरपि स्वजनै-रपि, जीवन्तोऽपि प्राणान् धारयन्तोऽपि, दरिद्राः स्वजना इति शेषः, मृता इव कलीनाः इत्यर्थः, मन्यन्ते बुध्यन्ते; मृतवत् मत्वा अवज्ञया नापि तान् स्मरन्तीति भावः ॥ १०३ ॥

दैन्यस्येति।—दौर्गत्यं दारिद्र्यं, तेन कलुषीकृतः मलिनीकृतः, पुरुषः इति शेषः, अतएव निरन्तरं, दैन्यस्य दीनतायाः, पात्रतां एति प्राप्नोति, पराभूतेः पराभवस्य, परं पदं प्रधानं स्थानं, तथा विपदाम् आश्रयः, भवतीति शेषः ॥ १०४ ॥

लज्जन्ते बान्धवास्तेन सम्बन्धं गोपयन्ति च ।
मित्राण्यमित्रतां यान्ति यस्य न स्युः कपर्दकाः ॥ १०५ ॥
मूर्त्तं लाघवमेवैतदपायानामिदं गृहम् ।
पर्य्यायो मरणस्यायं निर्धनत्वं शरीरिणाम् ॥ १०६ ॥
अजाधूलिरिव व्रस्तैर्मार्जनीरेणुवज्जनैः ।
दीपखद्योतछायेव त्यज्यते निर्धनो जनः ॥ १०७ ॥
शौचावशिष्टयाऽप्यस्ति किञ्चित् कार्य्यं क्वचित् मृदा ।
निर्धनेन जनेनैव न तु किञ्चित् प्रयोजनम् ॥ १०८ ॥

लज्जन्ते इति।—यस्य जनस्य, कपर्दकाः वराटकाः, [अपिरत्र अध्याहार्यः] न स्युः, यः अकिञ्चन इति भावः, बान्धवाः, तस्येति शेषः, तेन दरिद्रस्वजनेन, लज्जन्ते, अत एव सम्बन्धं छाद्यन्ते, तेन सह इति शेषः, गोपयन्ति च [गोपनार्थस्य औचादिकस्य आत्मनेपदिनः गुपधातोः णिचि परस्मैपदत्वात् सिद्धं] गूहन्ति, अपमानभयात्र प्रकाशयन्ति इति भावः, मित्राणि च अमित्रतां शत्रुतां, यान्ति प्राप्नुवन्ति; सर्वे विरक्ता भवन्ति इति निष्कर्षः ॥ १०५ ॥

मूर्त्तमिति।—एतत् निर्धनत्वं दारिद्र्यं, शरीरिणां प्राणिनां, मूर्त्तं मूर्त्तिमत्, लाघवं लघुना, अपमानस्वरूपमित्यर्थः; इदं निर्धनत्वम्, अपायानां विपदां, गृहम्, अयं निर्धनभावः, मरणस्य पर्य्यायः नामान्तरं, मरणमेव इत्यर्थः। ["मरणस्यायम्" इत्यत्र "मरणस्येदम्" इति पाठः साधुः, निर्धनत्वमिति नपुंसकविशेष्यस्य पुंस्त्वविशेषणस्य चासङ्गत्या] ॥ १०६ ॥

अजेति।—व्रस्तैः त्रासं गतैः, किञ्चित्प्रार्थयते चेत् दरिद्रा इति शब्दयेति भावः, जनैः बलिभिरित्यर्थः, अजाधूलिरिव छागपदोत्खरज इव, तथा मार्जनीरेणुवत् सम्मार्जनी-ताडनोत्थधूलिवत्, तथा दीपखद्योतछायेव दीपस्य छाया अन्धकारं, तद्वत्, तथा खद्योतस्य ज्योतिरिङ्गणाख्यकीटविशेषस्य च, छायेव कान्तिरिव, ["अकिञ्चविशेषेर-निष्कर्षात्" अत्र ककारस्य श्लेषाभावः] निर्धनो जनः त्यज्यते; अल्पसारत्वादसङ्गत्व-करत्वाच्च यथा अजाधूलिप्रभृतिकं जनैस्त्यज्यते, तथा दरिद्रोऽपीति भावः। साधोपमा-लङ्कारः ॥ १०७ ॥

शौचेति।—शौचावशिष्टया शौचकार्य्यादुद्धृतया, अवशिष्टया इत्यर्थः, मृदा मृत्तिकया अपि, क्वचित् किञ्चित् कार्य्यं यदि भवति, निर्धनेन जनेन तु किञ्चिदेव जनेनापि, प्रयोजनं न, अलमिति शेषः; तथा च साहसमदोऽपि अपवित्रत्वम् अकिञ्चित्करत्वञ्च दरिद्राद्यालमिति भावः ॥ १०८ ॥

अधनो दातुकामोऽपि सम्मानो धनिनां गृहम् ।
मन्यते याचकोऽयं धिक् दारिद्र्यं खलु देहिनाम् ॥१०८॥

अतः (च) वित्तापहारं विदधतो यदि मे मृत्युः स्यात् तदपि शोभनम् । उक्तञ्च,—

स्ववित्तहरणं दृष्ट्वा यो हि रक्षत्यसून् नरः ।
पितरोऽपि न गच्छन्ति तद्दत्तं सलिलाञ्जलिम् ॥ ११० ॥

तथा च,—गवार्थे ब्राह्मणार्थे च स्त्री-वित्तहरणे तथा ।
प्राणांस्त्यजति यो युद्धे तस्य लोकाः सनातनाः' ॥१११॥

एवं निश्चित्य रात्रौ तत्र गत्वा निद्रावशम् उपागतस्य पेटायां मया छिद्रं कृतं यावत्, तावत् प्रबुद्धो दुष्टतापसः ; ततश्च जर्जरवंशप्रहारेण शिरसि ताडितः कथञ्चित् (छ) आयुःशेषतया निर्गतोऽहं मृत इव । उक्तञ्च,—

अधन इति ।—अधनः दरिद्रः, जनः इति शेषः, दातुकामोऽपि ["तुङ्कामनसोरपि" इति कारिकया तुमः मकारलोपः] दानार्थी सन्नपि,, न तु [अहाऽर्थीति भावः, धनिनां गृहं सम्मानः, चोदार इति शेषः, अयं याचक इति मन्यते, लोकैरिति शेषः, तस्मात् देहिनां दारिद्र्यं [धिक्शब्दयोगे द्वितीया] खलु निश्चितं, धिक् निन्दामि इत्यर्थः, ("धिक् निर्भर्त्सननिन्दयोः" इत्यमरः) ॥ १०८ ॥

(च) वित्तापहारं—द्रव्यम् । विदधतः,—कुर्वतः ।

स्ववित्तेति ।—यो नरः स्वस्य वित्तहरणं स्वस्य धनहरणं, दृष्ट्वा, असून् प्राणान्, रक्षति पालयति, जीवतीत्यर्थः, हि निश्चये, पितरोऽपि तद्दत्तं तेन दत्तं, सलिलाञ्जलिम् [अञ्जलिभिः सलिलम् इति राजदन्तादिवत् पूर्वनिपातसमासः । "द्वौ पुतावञ्जलिः पुमान्" इत्यमरः] तर्पणजलं, न गच्छन्ति ; स्वधनहरणात् प्राक् मरणमपि श्रेयः इति भावः ॥ ११० ॥

गवार्थे इति ।—यः गवार्थे ब्राह्मणार्थे तथा स्त्री-वित्तयोर्हरणे च गो-ब्राह्मण-स्त्री-धनरक्षार्थमित्यर्थः, युद्धे प्राणान् त्यजति, तस्य सनातनाः शाश्वताः, लोकाः स्वर्गा इत्यर्थः, भवन्तीति शेषः ; स स्वर्गं यातीत्यर्थः ; अतो धनरक्षार्थं मे प्राणत्यागोऽपि वरमिति भावः ॥ १११ ॥

(छ) आयुःशेषतया—जीवितावशेषं यथा भवति तथा ।

'प्राप्तव्यमर्थं लभते मनुष्यो देवोऽपि तं लङ्घयितुं न शक्तः ।
तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं न हि तत् परेषाम्'॥११२॥

काककूर्मौ पृच्छतः,—"कथमेतत् ?" हिरण्यक आह,—

कथा ४ ।

"अस्ति कस्मिंश्चित् नगरे सागरदत्तो नाम वणिक्, (ज) तत्सूनुना रूपकशतेन विक्रीयमाणः पुस्तको गृहीतः; तस्मिंश्च लिखितमस्ति,—

'प्राप्तव्यमर्थं लभते मनुष्यो देवोऽपि तं लङ्घयितुं न शक्तः ।
तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं न हि तत् परेषाम्'॥११३॥

तत् दृष्ट्वा सागरदत्तेन (झ) तनुजः पृष्टः,—'पुत्र ! कियता मूल्येन एष पुस्तको गृहीतः ?' सोऽब्रवीत्,—'रूपकशतेन'। तत् श्रुत्वा सागरदत्तोऽब्रवीत्—'धिक् मूर्ख ! त्वं लिखितैकश्लोकं रूपकशतेन यत् गृह्णासि, एतया बुद्ध्या कथं द्रव्योपार्जनं करिष्यसि ? तत् अद्य प्रभृति त्वया मे गृहे न प्रवेष्टव्यम्'। एवं (ञ) निर्भर्त्स्य गृहात् (ट) निःसारितः। स च तेन

प्राप्तव्यमिति।—मनुष्यः प्राप्तव्यम् अवश्यप्राप्यम्, अर्थं वस्तु, लभते, देवोऽपि तं प्राप्तव्यमर्थं, लङ्घयितुम् अन्यथा कर्तुं, न शक्तः ; तस्मात् न शोचामि, अहमिति शेषः, अर्थानामिति भावः ; मे मम, विस्मयः "कथं मम अर्थो नष्टः ? कथं वा न प्राप्तः ?" इत्यादिविषयक इति भावः, न, भवतीति शेषः ; हि यतः, यत् वस्तु, अस्मदीयं, तत् परेषाम् अन्येषां, न, भवितुमर्हतीति शेषः, यत् मम वस्तु, तत् चिरं ममैव स्थास्यति, न केनापि नेतुं शक्यते ; अतस्तदनुशोचनं तत्र विस्मयश्च व्यर्थमिति भावः। उपजातिः छन्दः ॥ ११२ ॥

(ज) तत्सूनुना—वणिक्पुत्रेण। रूपकशतेन—अतसङ्ख्याकरौप्यमुद्रया इत्यर्थः। प्राप्तव्यमिति।—व्याख्यातं प्राक् ॥ ११३ ॥

(झ) तनुजः,—पुत्रः।

(ञ) निर्भर्त्स्य—तिरस्कृत्य।

(ट) निःसारितः,—बहिष्कृतः।

(ठ) निर्वेदेन विप्रकृष्टं देशान्तरं गत्वा किमपि नगरमासाद्य अवस्थितः ।

अथ कतिपयदिवसैः तन्नगरनिवासिना केनचित् असौ पृष्टः,—'कुतो भवान् आगतः ? किंनामधेयो वा ?' इति । असौ अब्रवीत्,—'प्राप्तव्यमर्थं लभते मनुष्यः' ।

अथ अन्येनापि पृष्टेन अनेन तथा एव उत्तरं दत्तम् । एवं च नगरस्य मध्ये 'प्राप्तव्यमर्थः' इति तस्य प्रसिद्धं नाम जातम् ।

अथ राजकन्या चन्द्रवती नाम अभिनवरूपयौवनसम्पन्ना सखीद्वितीया एकस्मिन् महोत्सवदिवसे नगरं निरीक्षमाणा अस्ति । तत्र एव च कश्चित् राजपुत्रोऽतीव रूपसम्पन्नो मनोरमश्च कथमपि तस्या दृष्टिगोचरं गतः । तद्दर्शनसमकालमेव कुसुमबाणाऽऽहतया तया निजसखी अभिहिता,—'सखि! यथा किल अनेन सह समागमो भवति, तथा अद्य त्वया यतितव्यम्' एवञ्च श्रुत्वा सा सखी तत्सकाशं गत्वा शीघ्रमब्रवीत् यत्,—'अहं चन्द्रवत्या तवान्तिकं प्रेषिता, भणितश्च त्वां प्रति तया,—'यन्मम त्वद्दर्शनात् (ड) मनोभवेन परिमावस्था कृता, तत् यदि शीघ्रमेव मदन्तिकं न समेष्यसि, तदा मे मरणं (ढ) शरणम्' । इति श्रुत्वा तेन अभिहितं,—'यदि अवश्यं मया तत्र गन्तव्यं, तत् कथय, केन उपायेन प्रवेष्टव्यम् ?' अथ सख्या अभिहितं,—'रात्रौ (ण) सौधावलम्बितया दृढवरत्रया त्वया

(ठ) निर्वेदेन—खाबमाननेन, वैराग्येण वा । विप्रकृष्टं—दूरस्थम् ।

(ड) मनोभवेन—कामेन । परिमावस्था—अत्यवस्था, सन्तप्तता इत्यर्थः ।

(ढ) शरणं—रक्षकम्, आश्रय इत्यर्थः, ("शरणं गृहरक्षित्रोः" इत्यमरः) ।

(ण) सौधावलम्बितया—सौधात्—प्रासादात्, अवलम्बितया—लम्बमानया । दृढवरत्रया—दृढया—कठिनया, दुश्छेद्यया इति भावः, वरत्रया—वर्ट्या, चर्मरज्जुविशेषेण इत्यर्थः, ("वर्ट्री वरत्रा स्त्रियाम्" इत्यमरः) ।

(त) तत्राऽऽरोढ़व्यम्'। सोऽब्रवीत्,—'यदि एवं निश्चयो भवत्याः, तदहमेवं करिष्यामि'। इति निश्चित्य सखी चन्द्रवतीसकाशं गता।

अथ आगतायां रजन्यां स राजपुत्रः स्वचेतसा व्यचिन्तयत्, —'अहो! महत् (थ) अकृत्यमेतत्। उक्तञ्च,—

गुरोः सुतां मित्रभार्य्यां स्वामि-सेवकगेहिनीम्।
यो गच्छति पुमाल्लोके तमाहुर्ब्रह्मघातिनम्॥ ११४॥

अपरञ्च,—अयशः प्राप्यते येन येन चापगतिर्भवेत्।
स्वर्गाच्च भ्रश्यते येन तत् कर्म न समाचरेत्'॥ ११५॥

इति सम्यक् विचार्य्य तत्सकाशं न जगाम।

अथ (द) प्राप्तव्यमर्थः पर्य्यटन् (ध) धवलगृहपार्श्वे रात्रौ अवलम्बितवस्त्रां दृष्ट्वा कौतुकाविष्टहृदयः ताम् आलम्ब्य

(त) तत्र—कुमारीसौधे इत्यर्थः, आरोढ़व्यम्—आरोहणं कर्त्तव्यं, गन्तव्यमित्यर्थः।

(थ) अकृत्यम्—अकार्य्यम्।

गुरोरिति।—यः पुमान् गुरोः सुतां कन्यां, मित्रभार्य्यां, स्वामि सेवकगेहिनीं प्रभुभार्य्यां भृत्यभार्य्यां च, (उपलक्षणञ्चैतत्, विधिवदूढेतरासाभिप्रायकं सुताभार्य्यादिपदोपादानं वेदितव्यम्) गच्छति, लोके जगति, तं जनं, ब्रह्मघातिनं ब्रह्महत्यापापिसमं महापापिनमित्यर्थः, आहुः कथयन्ति, बुधा इति शेषः; एतासु गमनं महापापकरम्, अतो नानुष्ठेयमिति भावः॥ ११४॥

अयश इति।—येन कर्मणा, अयशः अकीर्त्तिः, प्राप्यते लभ्यते, येन च कर्मणा, अपगतिः दुर्गतिः, नरकमित्यर्थः, भवेत्, येन च कर्मणा, स्वर्गात् भ्रश्यते, [देवादिकस्य भ्रंशघातोः भावविहितस्यैव रूपमेतत; पुरुषेणेति कर्तृपदमपीच्छं वेदितव्यम्] पुरुषः च्यवते इत्यर्थः, तत कर्म न समाचरेत् न कुर्य्यात्॥ ११५॥

(द) प्राप्तव्यमर्थः,—सागरदत्तसुत इति भावः, [प्राप्तव्यमर्थं पौनःपुन्येनाभिदधाति यः इत्यर्थे अर्थशब्दात् णिचि पचात् पचाद्यचि रूपमेतत्, अन्यथा कर्तुरनुपस्थितेः]।

(ध) धवलगृहपार्श्वे—सौधपार्श्वे।

अधिरूढः। तया च राजपुत्रया 'स एव अयम्' इति आक्षिप्तचित्तया (न) स्नानखादनपानाऽऽच्छादनादिना सम्मान्य तेन सह शयनतलमाश्रितया तदङ्गसंस्पर्शसञ्जातहर्षरोमाञ्चितगात्रया उक्तं,—'युष्मद्दर्शनमात्रानुरक्तया मया आत्मा प्रदत्तोऽयम्; (प) त्वद्वर्जम् अन्यो भर्त्ता मनसि अपि मे न भविष्यति, तत् कस्मात् मया सह न (फ) ब्रवीषि ?' इति। सोऽब्रवीत्,—'प्राप्तव्यमर्थं लभते मनुष्यः'। इत्युक्ते तयाऽन्योऽयमिति मत्वा धवलगृहात् (ब) उत्तार्य्य मुक्तः। स तु (भ) खण्डदेवकुले गत्वा सुप्तः।

अथ तत्र कयाचित् (म) खैरिण्या दत्तसङ्केतको यावत् (य) दण्डपाशकः प्राप्तः, तावत् (र) असौ पूर्वसुप्तः तेन दृष्टः,

---

(न) स्नानेति।—स्नानभाजनपानीयवसनादिना। तदङ्गेति।—तस्य—वणिक्पुत्रस्य, अङ्गसंस्पर्शेन—देहस्पर्शेन, सञ्जातः,—उत्पन्नः, यो हर्षः,—आनन्दः, तेन रोमाञ्चितं—पुलकितं, गात्रं यस्याः तया, तद्देहसंस्पर्शजनिताऽऽनन्देन पुलकितशरीरया।

(प) त्वद्वर्जं—त्वां वर्जयित्वा, [क्रियाविशेषणमेतत्] त्वां वर्जयित्वा इत्यर्थः, [अथवा द्वितीयाया लोपपदात् वर्जयतेः अमुल्प्रत्ययः, "द्वितीयायाश्च" (२। ४। ५२ पा०) इति सूत्रात्। अत्र दीक्षितमते—परीप्सायामित्येव त्वरायां गम्यमानायामित्यर्थः; पद्मनाभमते—अत्वरायामपि वेदितव्यम्]।

(फ) ब्रवीषि—भाषसे।

(ब) उत्तार्य्य—निष्काश्य। मुक्तः,—त्यक्तः।

(भ) खण्डदेवकुले—भग्नदेवमन्दिरे।

(म) खैरिण्या—कुलटया। दत्तसङ्केतकः,—अभिसारार्थं ज्ञातेङ्गितः।

(य) दण्डपाशकः,—तदाख्यः पुरुषः, नगररक्षको वा।

(र) असौ—वणिक्सुतः इत्यर्थः। पूर्वसुप्तः,—पूर्वं निद्रितः, ["पूर्वापराधरोत्तरम्" (२।२।१८ पा०) इति सूत्रेण पूर्वादिशब्दयोगात् अव्ययेन सह एकदैक्रियासाक्षेव दर्शनात्, अत्र तु तथाऽभावात् "सुपा सुप्" (२।१।४ पा०) इति सूत्रेण समासः]।

रक्षस्यरक्षणार्थमभिहितश्च,—'को भवान् ?' सोऽब्रवीत्,—'प्राप्तव्यमर्थं लभते मनुष्यः'। इति श्रुत्वा दण्डपाशकेन अभिहितं,—'यच्छून्यं देवगृहमिदं, तदत्र मदीयस्थाने गत्वा स्वपिहि'। तथा (ल) प्रतिपद्य सः (व) मतिविपर्य्यासात् अन्यशयने सुप्तः।

अथ तस्य रक्षकस्य कन्या नियमवती नाम रूपयौवनसम्पन्ना कस्यापि पुरुषस्य अनुरक्ता सङ्केतं दत्त्वा तत्र शयने सुप्ताऽऽसीत्।

अथ सा तम् आयातं दृष्ट्वा 'स एव अयम् अस्मद्वल्लभः' इति रात्रौ (श) घनतरान्धकारव्यामोहिता उत्थाय भोजनाच्छादनादिक्रियां कारयित्वा गान्धर्वविवाहेन आत्मानं (ष) विवाहयित्वा तेन समं शयने स्थिता विकसितवदनकमला तमाह,—'किमद्य अपि मया सह विश्रब्धं भवान् न ब्रवीति ?' सोऽब्रवीत्,—'प्राप्तव्यमर्थं लभते मनुष्यः'। इति श्रुत्वा तया चिन्तितं,—'यत् कार्य्यम् (स) असमीक्षितं क्रियते, तस्य ईदृक् फलविपाको भवति' इति। एवं विमृश्य सविषादया तया निःसारितोऽसौ। स च यावत् (ह) वीथीमार्गेण गच्छति, तावत्

(ल) प्रतिपद्य—बुद्ध्वा, ("प्रतिपदज्ञप्रतिचेतना" इत्यमरोक्तेः) अङ्गीकृत्य इत्यर्थो वा, ("प्रतिपन्नोऽभिशिष्टः स्यात् विज्ञातेऽङ्गीकृतेऽपि च" इति मेदिनीवचनात्)।

(व) मतिविपर्य्यासात्—बुद्धिविपरीत्यात्।

(श) घनेति।—घनतरेण—अतिमात्रेण, अन्धकारेण—तिमिरेण, व्यामोहिता—व्यामोहं गता, ध्याता सतीत्यर्थः।

(ष) विवाहयित्वा—उद्वाह्य। [अथ स्वप्नप्रयोगानाविधित्वः; अथवा विवाहं कृत्वेत्यर्थे विवाहशब्दात् तत्करोत्यर्थे णिजन्तात् क्त्वापि रूपम्]।

(स) असमीक्षितम्—अपरीक्षितम्, अविचिन्त्येत्यर्थः। फलविपाकः,—परिणामः।

(ह) वीथीमार्गेण—वीथीपदेन अत्रत्यवा गृहाधिपरं वीथ्यं, तथा च तद्वीथिसेन मार्गेण, राजपथेनेत्यर्थः।

(क) अन्यविषयवासी वरकौर्त्तिर्नाम वरो महता वाद्यशब्देन आगच्छति। प्राप्तव्यमर्थोऽपि तैः समं गन्तुमारब्धः।

अथ यावत् प्रत्यासन्ने लग्नसमये (ख) राजमार्गासन्नश्रेष्ठिगृहद्वारे रचितमण्डपवेदिकायां (ग) कृतकौतुकमङ्गलवेषा वणिक्सुता अस्ति, तावत् मदमत्तो हस्ती (घ) आरोहकं हत्वा (ङ) प्रणश्यज्जनकोलाहलेन लोकम् (च) आकुलयन् तमेव उद्देशं प्राप्तः। तच्च दृष्ट्वा सर्वे (छ) वरानुयायिनो वरेण सह (ज) प्रणश्य च दिशो जग्मुः।

अथ अस्मिन् अवसरे (झ) भयतरलालोचनाम् एकाकिनीं कन्याम् अवलोक्य 'मा भैषीः, अहं (ञ) परित्राता' इति सुधीरं स्थिरीकृत्य दक्षिणपाणौ सकृष्य महासाहसिकतया प्राप्तव्यमर्थः पक्षपातैः हस्तिनं निर्भर्त्सितवान्। ततः कथमपि दैवयोगादपयाते हस्तिनि ससुहृद्बान्धवेन अतिक्रान्तलग्नसमये वरकौर्त्तिना

(क) अन्यविषयवासी—अन्यदेशवासी, ("विषयो गोचरे देशे तथा जनपदेऽपि च" इति मेदिनी)।

(ख) राजमार्गेति।—राजपथसमीपस्थितवणिग्भवनद्वारसमीपे।

(ग) कृतेति।—कृतः,—धृतः, कौतुकं—विवाहसूत्रं, विवाहकाले हस्ते बाध्यम् इत्यर्थः, ("कौतुकन्त्वभिलाषे··· विवाहसूत्रमौतादिभोगयोरपि न द्वयोः॥" इति मेदिनी) मङ्गलवेषश्च यया तादृशी।

(घ) आरोहकं—हस्तिपालम्।

(ङ) प्रणश्यदिति।—प्रणश्यतां—पलायमानानां, जनानां—लोकानां, कोलाहलेन—महाशब्देन, [सहार्थे तृतीया]।

(च) आकुलयन्—व्याकुलीकुर्वन्, इतस्ततो विक्षिपन् इत्यर्थः।

(छ) वरानुयायिनः,—वरयात्रिकाः।

(ज) प्रणश्य—पलाय्य।

(झ) भयेति।—भयेन—त्रासेन, तरले—चपले, लोचने—नयने यस्यास्तथाभूताम्।

(ञ) परित्राता—रक्षिता। सुधीरं—सधैर्यम्। स्थिरीकृत्य—साम्त्वयित्वा।

आगत्य तावत् तां कन्याम् (ट) अन्यहस्तगतां दृष्ट्वा (ठ) अभिहितं,—'भोः श्वशुर! विरुद्धमिदं त्वया अनुष्ठितं, यन्मह्यं प्रदाय कन्या अन्यस्मै प्रदत्ता' इति। सोऽब्रवीत्,—'भोः! अहमपि हस्तिभयपलायितो भवद्भिः सह आयातः, न जाने किमिदं वृत्तम्' इति अभिधाय दुहितरं प्रष्टुमारब्धः,—'वत्से! न त्वया सुन्दरं कृतम्; तत् कथ्यतां कोऽयं वृत्तान्तः?' सोऽब्रवीत्,—'यदहमनेन प्राणसंशयात् रक्षिता, तदा एनं मुक्त्वा मम जीवन्त्या नान्यः पाणिं ग्रहीष्यति' इति। अनेन (ड) वार्त्ताव्यतिकरेण रजनी (ढ) व्युष्टा।

अथ प्रातस्तत्र सञ्जाते (ण) महाजनसमवाये, वार्त्ताव्यतिकरं श्रुत्वा राजदुहिता तमुद्देशमागता। (त) कर्णपरम्परया श्रुत्वा दण्डपाशकसुताऽपि तत्रैव आगता।

अथ तं महाजनसमवायं श्रुत्वा राजा अपि तत्रैव आजगाम, प्राप्तव्यमर्थं प्राह च,—'भोः! विश्रब्धं कथय, कीदृशोऽसौ वृत्तान्तः?' अथ सोऽब्रवीत्,—'प्राप्तव्यमर्थं लभते मनुष्यः' इति। राजकन्या स्मृत्वा प्राह,—'देवोऽपि तं लङ्घयितुं न शक्तः'। ततो दण्डपाशकसुता अब्रवीत्,—'तस्माच्च शोचामि न विस्मयो मे' इति। तम् अखिललोकवृत्तान्तम् आकर्ण्य वणिक्सुताऽब्रवीत्, —'यदस्मदीयं न हि तत् परेषाम्' इति। ततश्च अभयदानं दत्त्वा

(ट) अन्यहस्तगतां—प्राप्तव्यमर्थहस्तगताम्।

(ठ) अभिहितम्—उक्तम्। विरुद्धम्—अन्यायम्।

(ड) वार्त्ताव्यतिकरेण—परस्परवादविसंवादेन इत्यर्थः।

(ढ) व्युष्टा—अतिक्रान्ता, प्रभाता इत्यर्थः। ["उष् दाहे" इति धातोः निष्ठायां रूपम्, "ओषीत्, ओचत्" इति वृद्धि रूपद्वयं वेदितव्यम्]।

(ण) महाजन समवाये।—बहुलोकसमीक्षणे।

(त) कर्णपरम्परया—श्रुतिक्रमेण, जनश्रुत्यनुसारेणेत्यर्थः।

राजा पृथक् पृथक् वृत्तान्तान् ज्ञात्वा (घ) अवगततत्त्वः तस्मै प्राप्तव्यमर्थाय स्वदुहितरं (ङ) सबहुमानं ग्रामसहस्रेण समं सर्वालङ्कारपरिवारयुतां दत्त्वा 'त्वं मे पुत्रोऽसि' इति नगरविदितं तं युवराज्येऽभिषिक्तवान्। दण्डपाशकेनापि स्वदुहिता स्वयंवरा वस्त्रदानादिना सम्भाव्य प्राप्तव्यमर्थाय प्रदत्ता।

अथ प्राप्तव्यमर्थेनापि स्वीयमातापितरौ समस्तकुटुम्बावृतौ तस्मिन् नगरे सम्मानपुरःसरं समानीतौ। अथ सोऽपि स्वगोत्रेण सह विविधभोगान् उपभुञ्जानः सुखेन अवस्थितः। अतोऽहं ब्रवीमि,—'प्राप्तव्यमर्थं लभते मनुष्यः' इत्यादि।

तदेतत् सकलं (च) सुखदुःखमनुभूय परं विषादमुपागतोऽनेन मित्रेण त्वत्सकाशम् आनीतः; तदेतत् मे वैराग्यकारणम्"।

मन्थरक आह,—"भद्र! भवति (छ) सुहृदयमसन्दिग्धं, यत् (ज) क्षुत्क्षामोऽपि शत्रुभूतं त्वां भक्ष्यस्थाने स्थितमेवं पृष्ठमारोप्य आनयति, न मार्गेऽपि भक्षयति। उक्तञ्च तत:,—

विकारं याति नो चित्तं वित्ते यस्य कदाचन।
मित्रं स्यात् सर्वकाले च कार्यं त्वन्नत्तमुत्तमम् ॥ ११६ ॥

(घ) अवगततत्त्वः,—विदितयथार्थः, ज्ञातसर्ववृत्तान्त इत्यर्थः।

(ङ) सबहुमानं—सादरम्। सर्वेति।—विविधभूषणभूषितपरिजनसहिताम्।

(च) सुखदुःखं—[सुखञ्च दुःखञ्चेति समाहारद्वन्द्वः, "विप्रतिषिद्धं चानधिकरणवाचि" (२।४।१२ पा०) इति सूत्रात् समाहारः नैकाल्यकः, तथा च सुखदुःखे इत्यपि भावितमर्हतीति बोध्यम्]।

(छ) सुहृदयमसन्दिग्धम्—अयं—वायसः, सुहृत्—मित्रम्, असन्दिग्धम्—अत्र सन्देहो नास्तीत्यर्थः।

(ज) क्षुत्क्षामः,—क्षुधार्तः, [क्षैधातोः क्तप्रत्ययेन क्षाम इति पदं सिद्धम्]। भक्ष्यस्थाने स्थितं—भक्ष्यभूतम्।

विकारमिति।—यस्य वित्ते धनविषये, चित्तं कदाचन विकारं नो याति न प्राप्नोति, न विकृतं भवतीत्यर्थः, यश्च सर्वकाले सम्पदि विपदि च इत्यर्थः, मित्रं सुहृत्,

विदद्भिः सुहृदामत्र चिह्नैरेतैरसंशयम् ।
परीक्षाकरणं प्रोक्तं होमाग्नेरिव पण्डितैः ॥ ११७ ॥

तथा च,—आपत्काले तु सम्प्राप्ते यन्मित्रं मित्रमेव तत् ।
वृद्धिकाले तु सम्प्राप्ते दुर्जनोऽपि सुहृद्भवेत् ॥ ११८ ॥

तन्मामपि अद्य अस्य विषये विश्वासः समुत्पन्नः ; यतो नीतिविरुद्धा इयं मैत्री मांसाशिभिः वायसैः सह जलचराणाम् । अथवा साधु इदमुच्यते,—

मित्रं कोऽपि न कस्यापि नितान्तं न च वैरकृत् ।
दृश्यते मित्रविध्वस्तात् कार्य्याद्वैरी परोचितः ॥ ११९ ॥

तत् स्वागतं भवतः ? स्वगृहवदास्यताम्, अत्र विषये सन्तापो न कर्त्तव्यः । उक्तञ्च,—

स्यात्, न कदाचित् कुतश्चित् अनुभवतीत्यर्थः, एवम्भूतम् उत्तमं, जनमिति शेषः, मित्रं कारयेत्, जन इति शेषः ॥ ११६ ॥

विदद्भिरिति ।—विदद्भिः प्राज्ञैः, एतैश्चिह्नैः लक्षणैः, अविकृतमुखभावादिभिरिति भावः, असंशयं यथा तथा, अत्र संसारे, सुहृदां मित्राणां, परीक्षाकरणं चित्तमविकृतं न वेति निर्णयकरणमित्यर्थः, पण्डितैः वेदविद्भिः, होमाग्नेः आहवनीयादियज्ञीयाग्नेरिव, प्रोक्तं कथितम् ; पण्डितैर्यथा यज्ञादौ दक्षिणावर्त्तत्व-शुभशिखात्वस्वादिभिर्लक्षणैः अग्नेर्मङ्गलजनकत्वादिकं परीक्ष्य ज्ञातव्यमुक्तं, तथा मित्रताकरण सुहृदामपि प्रोक्तलक्षणैः हृदयविशुद्धत्वादिकमिति भावः ॥ ११७ ॥

आपत्काले इति ।—आपत्काले विपत्तिसमये, सम्प्राप्ते तु उपस्थिते सति, यत् मित्रम् आपत्कालेऽपि यः सुहृत् भवति इत्यर्थः, तदेव मित्रं मित्रपदवाच्यम् ; वृद्धिकाले सम्पत्समये, सम्प्राप्ते तु दुर्जनोऽपि सुहृत् भवेत्, आत्मनः हितसाधनेच्छयेति भावः ; विपत्सहाय एव बन्धुरिति निष्कर्षः ॥ ११८ ॥

नितान्तमिति ।—कोऽपि जनः, कस्यापि न नितान्तं मित्रं, न च वैरकृत् अभूत् ; अत्रापि "नितान्तम्" इति पदं योजनीयम् ; मित्रविध्वस्तात् मित्रेण मित्रभावेनावस्थितेन जनेन, विध्वस्तात् कार्यविशेषात् स्वार्थसाधनाय वा नाशं गमितात्, विकृतीकृतादित्यर्थः, कार्य्यात् वैरी अभूत्, परीक्षितः, भवतीति शेषः, इति दृश्यते, जनैरिति शेषः ; मित्रभावेनावस्थितोऽपि जनः स्वार्थभ्रंशात् रिपुरपि भवतीति भावः ॥ ११९ ॥

अभ्रच्छाया खलप्रीतिः सिद्धमन्नञ्च योषितः।
किञ्चित्कालोपभोग्यानि यौवनानि धनानि च ॥ १२० ॥
अत एव (फ) विवेकिनः जितात्मानो धनस्पृहां न कुर्वन्ति।

उक्तञ्च,—सुसञ्चितैर्जीवनवत् सुरक्षितैः
निजेऽपि देहे न वियोजितैः क्वचित्।
पुंसो यमान्तं व्रजतोऽपि निष्ठुरैः
एतैर्धनैः पञ्चपदी न दीयते ॥ १२१ ॥

अन्यच्च,—यथाऽऽमिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि।
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ॥ १२२ ॥

अभ्रेति।—अभ्राणां मेघानां, छाया अनातपः, खलानां दुर्जनानां, प्रीतिः प्रणयः, सिद्धं पक्वम्, अन्नं भक्ष्यं, योषितः स्त्रियः, यौवनानि तारुण्यानि, धनानि वित्तानि च, किञ्चित्कालोपभोग्यानि अल्पकालसम्भोगार्हाणि, [भुजधातोः "कृदभोग-" (३।१।१२४ पा०) इति ण्यति "चजः कु घिण्ण्यतोः" (७।३।५२ पा०) इति कुत्वात् भोग्यमिति सिद्धं, भक्षणार्थे तु—"भोज्य भक्ष्ये" (७।३।६९ पा०) इति सूत्रेण भोज्यमित्येव स्यात्] एतानि न चिरं तिष्ठन्तीत्यर्थः; अतः सर्वेऽप्येतेषां कदाऽपि नानुरागो विधेयमिति भावः ॥ १२० ॥

(फ) विवेकिनः,—सदसद्विचारकुशलाः। जितात्मानः,—जितेन्द्रियाः।

सुसञ्चितैरिति।—सुसञ्चितैः अतिकष्टेन सङ्गृहीतैः, जीवनवत् प्राणवत्, सुरक्षितैः दस्युतस्करादिभ्यः इति भावः, निजे देहेऽपि निजदेहार्थमपि, [निमित्ते सप्तमी] क्वचित् न वियोजितैः कदाऽपि न व्ययितैरिति भावः; एतैः पुंसः पुरुषस्येत्यर्थः, निष्ठुरैः आत्मानं वञ्चयित्वाऽपि तद्रक्षणार्थं यतमानस्य उपकारविस्मरणात् अतीव कठिनैरित्यर्थः, व्रजतः गच्छतोऽपि, पुनरागमनसम्भावनारहितस्यापीति भावः, पुंसः स्वस्यैवेत्यर्थः, पञ्चपदी (पञ्चानामाधाराणामर्थः) पञ्चानां पदानां वस्तूनां समाहारः पञ्चपदी लोकान्तरगमनकालिकं पाथेयभूतं कालिकोपयुक्तमपि, न दीयते न समर्प्यते इत्यर्थः, अथवा पदपञ्चकमपि नानुगम्यते इत्यर्थः। वंशस्थविलं वृत्तम् ॥ १२१ ॥

यथेति।—मत्स्यैः जलौ, श्वापदैः भुवि, पक्षिभिश्च आकाशे, आमिषं भक्ष्यं वस्तु, यथा भक्ष्यते, तथा वित्तवान् धनवान् जनः, सर्वत्रैव सुगमे दुर्गमे वा यत्रैव प्रदेशे

निर्दोषमपि वित्ताढ्यं दोषैर्योजयते नृपः।
निर्धनः प्राप्तदोषोऽपि सर्वत्र निरुपद्रवः॥ १२३॥
अर्थानामर्जने दुःखमर्जितानाञ्च रक्षणे।
नाशे दुःखं व्यये दुःखं धिगर्थान् कष्टसंश्रयान्॥१२४॥
अर्थार्थी यानि कष्टानि मूढोऽयं सहते जनः।
यतांशेनापि मोक्षार्थी तानि चेन्मोक्षमाप्नुयात्॥ १२५॥

अपरं,—विदेशवासजमपि वैराग्यं त्वया न कार्य्यम्; यतः,—

को धीरस्य मनस्विनः स्वविषयः? को वा विदेशः स्मृतः?
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम्।

गच्छति तत्रैवेत्यर्थः, भज्यते इत्यनुषज्यते; अन्यानियस्य स्थानियमः वर्त्तते, धनिकपानियन्तु यत्रैव गच्छति, तत्रैवार्थिभिः अर्थगृद्धुभिः तत्करैश्च यस्यते इति भावः॥१२२॥

निर्दोषमिति।—नृपः निर्दोषमपि दोषहीनमपि, वित्ताढ्यं धनिनं, दोषैः योजयते दूषितं करोति इत्यर्थः, धनलोभात् निष्यादोषं प्रख्याप्य दण्डयतीति भावः; निर्धनः जनः, प्राप्तदोषोऽपि दोषी अपि, सर्वत्र निरुपद्रवः उत्पातहीनः, कैरपि न दूष्यते इत्यर्थः, धनप्राप्त्याद्याविरहादिति भावः; धनमूला हि विपत्तिः सर्वेषामिति तात्पर्य्यम्॥१२३॥

अर्थानामिति।—अर्थानां धनानाम्, अर्जने उपार्जने, दुःखं कष्टम्, अर्जितानाञ्च, अर्थानामिति शेषः, रक्षणे दुःखं, नाशे, अर्थानामिति शेषः, दुःखं, व्यये वितरणे, दुःखं, तस्मात् कष्टसंश्रयान् केवलकष्टाऽऽधारान्, अर्थान् [अत्र धिक्शब्दयोगे द्वितीया, "उपान्वध्याङ्वसः" (१।४।४८ पा०) इत्यत्र दीक्षितस्तु धिक्शब्दयोगे द्वितीया आदिलुप्तम्; तथा हि,—"उभसर्वतसोः कार्य्या धिग्उपर्य्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥" इति] धिक् निन्दामि इत्यर्थः; सर्वदा दुःखकरत्वात् अर्थलोभः परिहरणीयः इति निष्कर्षः॥ १२४॥

अर्थार्थीति।—अयं मूढो जनः, अर्थार्थी धनार्थी सन्, यानि कष्टानि सहते, चेत् यदि, मोक्षार्थी सन् तानि कष्टानि, यतांशेनापि, सहते इति शेषः, तदा स मोक्षम् आप्नुयात् लभेत; परमपुरुषार्थमुक्तिसाधनादपि अर्थसाधनं नितरां दुःखकरमित्यहो! विडम्बना इति भावः॥ १२५॥

अ इति।—धीरस्य मनस्विनः स्वविषयः स्वदेशः, कः? को वा विदेशः स्मृतः? न देशविदेशगणनेति भावः; यं देशं श्रयते आश्रयति, धीरो जनः इति शेषः, तमेव

यद्दंष्ट्रानखलाङ्गुलप्रहरणः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्रुधिरैस्तृष्णां छिनत्त्यात्मनः ॥१२६॥

अर्थहीनः (ब) परे देशे गतोऽपि यः प्रज्ञावान् भवति, स कथञ्चिदपि न सीदति। उक्तञ्च,—

को ऽतिभारः समर्थानाम् ? किं दूरं व्यवसायिनाम् ?।
को विदेशः सुविद्यानाम् ? कः परः प्रियवादिनाम् ?॥१२७॥

तत् (भ)प्रज्ञानिधिर्भवान् न (म)प्राकृतपुरुषतुल्यः। अथवा,—

उत्साहसम्पन्नमदीर्घसूत्रं
क्रियाविधिज्ञं व्यसनेष्वसक्तम्।
शूरं कृतज्ञं दृढ़सौहृदञ्च
लक्ष्मीः स्वयं मार्गति वासहेतोः॥ १२८ ॥

दैन्यं, बाहुप्रतापार्जितं स्वबाहुबललब्धं, स्वायत्तमित्यर्थः, कुरुते, तत्रैव प्रभूतधनलाभादिकम् अर्जयतीति भावः; दंष्ट्रा नखाः लाङ्गुलञ्च तानि [ऋक्षोकारवल्लाङ्गुलमष्टोऽज हन्दीभङ्गभङ्ग्या प्रयुक्तः] प्रहरणानि अस्त्राणि यस्य तादृशः, सिंहः यत् वनं गाहते प्रविशति, तस्मिन्नेव वने, हतानां स्वबाहुबलेन विनाशितानां, द्विपेन्द्राणां गजश्रेष्ठानां, रुधिरैः रक्तैः, आत्मनः स्वस्य, तृष्णां छिनत्ति अपनयति; न हि परतन्त्रचित्ता मनस्विस्वभाव इति भावः। विशेषेण ज्ञानान्वयसमर्थनरूपोऽर्थान्तरन्यासः। शार्दूलविक्रीडितं वृत्तम् ॥ १२६ ॥

(ब) परे देशे—अन्यस्मिन् देशे। सीदति—क्लिश्यति।

उक्तञ्चेति।—समर्थानां शक्तिमताम्, अतिभारः कः ? व्यवसायिनां वणिजां, दूरं किम् ? सुविद्यानां सुशिक्षितविद्यानां, [सुविद्यानामिति वा पाठः] विदेशः कः ? तथा प्रियवादिनां परः कः ? न कोऽपि, तेषां प्रियवाक्येनैव सर्वे जनाः स्वीया अपि आत्मीया भवन्ति इति भावः॥ १२७ ॥

(भ) प्रज्ञानिधिः,—बुद्धिमान्।

(म) प्राकृतपुरुषतुल्यः,—नीचजनसदृशः, ("विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः" इत्यमरः)।

उत्साहेति।—लक्ष्मीः सम्पत्, वासहेतोः [हेतुशब्दयोगात् "षष्ठी हेतुप्रयोगे" (२।३।२६ पा०) इति सूत्रेण षष्ठी] आश्रयार्थम्, उत्साहसम्पन्नम् उद्योगिनम्,

अपरं, प्राप्तोऽपि अर्थः (य) कर्मप्राप्ता नश्यति; तत् एतावन्ति (र) दिनानि त्वदीयमासीत्, (ल) मुहूर्त्तमपि अनात्मीयं भोक्तुं न लभ्यते; (व) स्वयमागतमपि विधिनाऽपक्रियते।

अर्थस्योपार्जनं कृत्वा नैव भोगं समश्नुते।
अरण्ये मृगदासाद्य मूढः सोमिलको यथा" ॥ १२८ ॥

हिरण्यक आह,—"कथमेतत्?" स आह,—

कथा ५।

"कस्मिंश्चिदधिष्ठाने सोमिलको नाम (श) कौलिको वसति स्म। स च (ष) अनेकविधपटरचनारञ्जितानि पार्थिवोचितानि सदा एव वस्त्राणि उत्पादयति; परं तस्य च अनेकविधपटरचनानिपुणस्यापि न भोजनाच्छादनाभ्यधिकं कथमपि अर्थ-

अदीर्घसूत्रम् अचिरक्रियम्, अनलसमित्यर्थः, ("दीर्घसूत्रश्चिरक्रियः" इत्यमरः) क्रियाविधिषु आर्य्यानुष्ठानदक्षं, व्यसनेषु कामजक्रोधजव्यादग्रविषमगयादिदोषेषु, अलक्तम् अनासक्तं, शूरं बलवन्तं, कृतज्ञम् उपकारज्ञातारं, तथा दृढं स्थिरं, सौहृदं मैत्रं यस्य तादृशं, मित्रधर्मादस्खलितश्च इत्यर्थः, अनमिति शेषः, स्वयं मार्गति अन्विष्यति; एतादृशपुरुषस्य करतलगतैव लक्ष्मीरिति तात्पर्यम्। उपजातिः वृत्तम् ॥ १२८ ॥

(य) कर्मप्राप्ता—कर्मवशेनेत्यर्थः, प्राक्तनकर्मपरिपाककाले इति भावः। नश्यति—नष्टः भवति।

(र) दिनानि इति [अत्यन्तसंयोगे द्वितीया]। त्वदीयं—त्वदायत्तं, अनमिति शेषः।

(ल) मुहूर्त्तमपि—अल्पकालमपि। अनात्मीयम्—अस्वम्, अन्यदीयं वस्तु इत्यर्थः। लभ्यते—प्राप्यते।

(व) स्वयमागतमपि, अनात्मीयमिति शेषः।

अर्थस्येति।—मृगम् अरण्यम् आसाद्य प्राप्य, सोमिलकः यथा, तथा मूढः अज्ञः जनः, अर्थस्य उपार्जनं कृत्वा भोगं नैव समश्नुते लभते इत्यर्थः ॥ १२८ ॥

(श) कौलिकः,—तन्तुवायाख्यजातिविशेषः।

(ष) अनेकेति।—बहुप्रकारवस्त्रवयनकौशलाभिज्ञतया तन्त्रीज्ञानीत्यर्थः। पार्थिवोचितानि—राजयोग्यानि। उत्पादयति—वयतीत्यर्थः।

मात्रं सम्पद्यते। अथ अन्ये तत्र सामान्यकौलिकाः (स) स्थूल-वस्त्रसम्पादनविज्ञानिनो महर्द्धिसम्पन्नाः। तान् अवलोक्य स स्वभार्य्यामाह,—'प्रिये! पश्य एतान् स्थूलपटकारकान् धनकनकसमृद्धान्, तत् (ह) अधारणकं मम एतत् स्थानम्; तदन्यत्र उपार्जनाय गच्छामि'। सा प्राह,—'भोः प्रियतम! मिथ्याप्रलपितमेतत् यत् अन्यत्र गतानां धनं भवति, स्वस्थाने न भवति। उक्तञ्च,—

उत्पतन्ति यदाकाशे निपतन्ति महीतले।
पक्षिणां तदपि प्राप्या नादत्तमुपतिष्ठते॥ ११०॥

तथा च,—न हि भवति यन्न भाव्यं भवति च भाव्यं विना प्रयत्नेन।
करतलगतमपि नश्यति यस्य तु भवितव्यता नास्ति॥ १११॥

(स) स्थूलेति।—स्थूलवस्त्रवयनकुशलाः। महर्द्धिसम्पन्नाः,—महाधनशालिनः।

(ह) अधारणकं—न धारकम्, एतत् स्थानं मां न धारयति इत्यर्थः; अत्र मम सौभाग्यं नास्तीति भावः। [धार्य्यतेऽस्मिन्नेन वेत्यर्थेऽधिकरणे करणे वार्थे ल्युटि पश्चात् स्वार्थे कनि रूपं, पश्चात् नञ्समासः]।

उत्पतन्तीति।—आकाशे नभसि, यत् उत्पतन्ति उड्डीयन्ते, कदाचिदिति भावः; यच्च महीतले पृथिव्यां, निपतन्ति कदाचिदवतरन्तीत्यर्थः, पक्षिण इति शेषः, पक्षिणां खगानामपि सम्बन्धे इत्यर्थः, तत् कदाचिदुत्पतनं कदाचिच्च निपतनमित्यर्थः, प्राप्या किञ्चित् लाभाशया इत्यर्थः, ("प्राप्तिर्लाभोदये। लाभेऽपि च स्त्रियाम्" इति मेदिनी) किन्तु अदत्तं कदाचित् कस्मैचित किमपि अवितरितं द्रव्यं, न उपतिष्ठते न प्राप्नोतीत्यर्थः; "तन्नष्टं यन्न दीयते" इति स्मरणात्, [उपपूर्वकात् तिष्ठतेः "अकर्मकाच्च" (१।३।२६ पा०) इति सूत्रेण आत्मनेपदम]; योजनशतादपि आमिषं द्रष्टुं समर्थानां किञ्चित् प्राप्त्यर्थं दिवि भुवि च सुदूरविचरतां खगानामपि प्राप्तिः यदा कर्मफलायत्ता, तदा भूतावचराणामदूरदर्शिनां कर्माधीनानां मानवानां तत्प्राप्तौ का कथा? यदि त्वया कदाऽपि कस्मैचित् किमपि दत्तमासीत् तदा दृष्टं स्वित्वैव प्रभूतधनं प्राप्स्यसि, किं बहिर्गमनायासेनेति निष्कर्षः। ["प्राप्त्या" इत्यत्र "प्राप्तौ" इति पाठे—प्राप्तिविषये इत्यर्थः]॥ ११०॥

न हीत्यादि।—व्याख्यातं प्राक् १० सङ्ख्यकश्लोके। आर्या छन्दः॥ १११॥

यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पुराकृतं कर्म कर्त्तारमनुगच्छति ॥ १३२ ॥
शेते सह शयानेन गच्छन्तमनुगच्छति ।
नराणां प्राक्तनं कर्म तिष्ठेदथ सहात्मना ॥ १३३ ॥
यथा च्छायातपौ नित्यं सुसम्बद्धौ परस्परम् ।
एवं कर्म च कर्त्ता च संश्लिष्टावितरेतरम् ॥ १३४ ॥

तस्मादत्र एव (क) व्यवसायपरो भव' । कौशिक आह,—'प्रिये ! न सम्यगभिहितं भवत्या, (ख) व्यवसायं विना कर्म न (ग) फलति । उक्तञ्च,—

यथैकेन न हस्तेन तालिका सम्प्रपद्यते ।
तथोद्यमपरित्यक्तं न फलं कर्मणः स्मृतम् ॥ १३५ ॥

यथेति ।—धेनुसहस्रेषु मध्ये [अत्र निर्द्धारणे सप्तमी] वत्सः गोशावकः, यथा मातरं विन्दति आश्रयति, बहुषु गोषु मध्ये अवस्थितां स्वमातरं परिचित्य तदन्तिकं गच्छति इत्यर्थः, तथा पुराकृतं प्राक्तनं, कर्म, कर्त्तारं तत्तत्कर्मणः फलभोक्तारम्, अनुगच्छति प्राप्नोति, स्वयमन्विष्य इति भावः ॥ १३२ ॥

शेते इति ।—नराणां प्राक्तनं पूर्वकृतं, कर्म शयानेन, नरेण इति शेषः, सह शेते, गच्छन्तं नरम् अनुगच्छति ; अथ आत्मना सह तिष्ठेत् स्थितिं करोति इत्यर्थः ; दृष्टान्तमेतत् प्राक्तनं कर्म प्राणिभिरिति तात्पर्यम् ॥ १३३ ॥

यथेति ।—छायातपौ छाया प्रतिबिम्बम्, आतपः रौद्रं तौ, यथा नित्यं सततं, परस्परं सुसम्बद्धौ संयुक्तौ, तिष्ठत इति शेषः, यत्रैव आतपस्तत्रैव छायेति भावः, एवं तथा, कर्म च प्राक्तनमिति भावः, कर्त्ता च जीवपोत्यर्थः, इतरेतरम् अन्योऽन्यं, संश्लिष्टौ सम्बद्धौ, जातपि नान्योऽन्यं जहीत इत्यर्थः ; स्वकर्मफलभुक् पुमानिति भावः ॥ १३४ ॥

(क) व्यवसायपरः,—उद्योगपरः, यत्नवान् इत्यर्थः ।

(ख) व्यवसायं—यत्नम् ।

(ग) फलति—सिध्यति ।

यथेति ।—यथा एकेन हस्तेन तालिका करतलशब्दः, न सम्प्रपद्यते न निष्पद्यते,

पश्य कर्मवशात् प्राप्तं भोज्यशालेऽपि भोजनम् ।
इदमोद्यमं विना वक्त्रे प्रविशेत्र कथञ्चन ॥ १२५ ॥

तथा च,—उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी:
दैवं हि दैवमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोष: ॥ १२७ ॥

तथा च,—उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथै: ।
न हि सिंहस्य सुप्तस्य प्रविशन्ति मुखे मृगा: ॥ १२८ ॥
उद्यमेन विना राजन् ! न सिध्यन्ति मनोरथा: ।
कातरा इति जल्पन्ति यद्भाव्यं तद्भविष्यति ॥ १२९ ॥

न लभ्यते इत्यर्थ:, तथा उद्यमपरित्यक्तं यत्नरूपसिद्धिकारणविवर्जितं, कर्मण: फलं न भूतं न कथितम् ; पुरुषकारं विना एकेन दैवेनैव कर्म न सिध्यति इत्यर्थ: ॥ १२५ ॥

पश्येति ।—पश्य अवलोकय, कर्मवशात् प्राप्तमादिति भाव:, भोज्यशाले भोजनसमये, प्राप्तमपि उपस्थितमपि, भोजनं इदम् उद्यमं चेष्टां, विना वक्त्रे मुखे, कथञ्चन न प्रविशेत् ; पूर्वकर्मणा भोजनशाले भोजनमुपस्थातुमर्हति, किन्तु मुखविवरप्रवेश: प्रयत्नसाध्य: ; अत: सर्वत्र सयत्नेन भवितव्यमिति भाव: ॥ १२५ ॥

उद्योगिनमिति ।—लक्ष्मी: श्री:, उद्योगिनं प्रयत्नवन्तं, पुरुषसिंहं नरवरम्, उपैति प्राप्नोति, कापुरुषा: हि दैवं दैवमिति वदन्ति । दैवं निहत्य दूरीकृत्य, आत्मशक्त्या पौरुषं यत्नं, कुरु, यत्ने कृते सति यदि न सिध्यति, कार्यमिति शेष:, तदा अत्र एतादृशे यत्ने, कोऽपि दोष:, वर्तते इति शेष: ; यत्नेऽपि सिद्धाभावस्य दर्शनात् सम्यक् यत्नो न भूत: इति मन्तव्यमिति भाव: ॥ १२७ ॥

उद्यमेनेति ।—कार्याणि उद्यमेन हि यत्नेनैव, सिध्यन्ति फलन्ति, मनोरथै: अभूतैः, अभिलाषमात्रैरित्यर्थ:, न, सिध्यन्तीत्यनुषङ्ग: ; तथा हि, सुप्तस्य निद्रितस्य, सिंहस्य मुखे मृगा: न हि प्रविशन्ति ; तदा तस्य यत्नाभावादिति भाव: ; अत्र विशेषेण ज्ञानान्वयसमर्थनादर्थान्तरन्यासोऽलङ्कार: ॥ १२८ ॥

उद्यमेनेति ।—हे राजन् ! उद्यमेन यत्नेन, विना मनोरथा: अभिलाषा:, न सिध्यन्ति, कातरा: अधीरा:, जना: इति शेष:, यत् भाव्यं तत् भविष्यतीति जल्पन्ति ; न यत्नेन तेषां वाञ्छितमिति भाव: ॥ १२९ ॥

स्वशक्त्या कुर्वतः कर्म न चेत् सिद्धिं प्रयच्छति ।
नोपालभ्यः पुमांस्तत्र देवान्तरितपौरुषः ॥ १४० ॥

तत् मया अवश्यं देशान्तरं गन्तव्यम्' । इति निश्चित्य वर्द्धमानपुरं गतः । तत्र च वर्षत्रयं स्थित्वा सुवर्णशतत्रयोपार्जनं कृत्वा भूयः स्वगृहं प्रस्थितः ।

अथ अर्द्धपथे गच्छतः तस्य कदाचित् अटव्यां (घ) पर्य्यटतो भगवान् रविरस्तमुपागतः । तदा असौ (ङ) व्यालभयात् स्थूलतरवटस्कन्धमारुह्य यावत् प्रसुप्तः, तावत् (च) निशीथे स्वप्ने द्वौ पुरुषौ (छ) रौद्राकारौ परस्परं प्रजल्पन्तौ अशृणोत् । तत्रैक आह,—'भोः (ज) कर्त्तः ! त्वं किं सम्यक् न वेत्सि, यदस्य सोमिलकस्य (झ) भोजनाच्छादनाभ्यधिका समृद्धिर्नास्ति ; तत् किं त्वया अस्य सुवर्णशतत्रयं प्रदत्तम् ?' स आह,—'भोः कर्मन् !

स्वशक्त्येति ।—स्वशक्त्या निजसामर्थ्येन, कुर्वतः कार्यं सम्पादयतः, जनस्य इति शेषः, कर्म चेत् यदि, सिद्धिं साफल्यं, न प्रयच्छति न विदधाति, न सफलं भवतीत्यर्थः, तदा तत्र अस्मिन्नौ, पुमान् न उपालभ्यः न तिरस्कार्यः, ["उपात् प्रशंसायाम्" (७।१।१६ पा०) इति सूत्रेण उपपूर्वकात् लभधातोः यकारादिप्रत्ययविषये प्रशंसायां गम्यमानायामेव नुमागमः, अत्र तु निन्दार्थकत्वात् न नुमिति वेदितव्यम्] यतः सः दैवेन अन्तरितं व्याहतं, पौरुषं प्रयत्नः यस्य तथाभूतः ; दैवविनिते पुरुषदोषानवकाशात् न कोऽपि भवति निन्दास्पदमिति भावः ॥ १४० ॥

(घ) पर्य्यटतः,—विचरतः ।

(ङ) व्यालभयात्—हिंस्रभयात् । स्थूलतरवटस्कन्धं—पीनतरवटवृक्षस्कन्धम् ।

(च) निशीथे—अर्द्धरात्रे ।

(छ) रौद्राकारौ—भीषणाकृती ।

(ज) कर्त्तः ! प्रभो ! कर्मफलदातः ! इत्यर्थः ।

(झ) भोजनाच्छादनाभ्यधिका—अन्नवस्त्रातिरिक्ता, समृद्धिः,—सम्पत्, नास्ति, भोग्येति शेषः ।

मया अवश्यं दातव्यं (अ) व्यवसायिनां, तत्र च (ट) तस्य परिणतिः (ठ) त्वदायत्ता' इति ।

अथ यावदसौ कौलिकः (ड) प्रबुद्धः सुवर्णग्रन्थिम् अवलोकयति, तावत् रिक्तं पश्यति । ततः (ढ) सखेदं चिन्तयामास, —'अहो ! किमेतत् ? महता कष्टेन उपार्जितं वित्तं हेलया क्वापि गतम् !! तत् व्यर्थश्रमः अकिञ्चनः कथं स्वपत्न्या मित्राणाञ्च मुखं दर्शयिष्यामि ?' इति विचिन्त्य पुनरपि तदेव (ण) पत्तनं गतः । तत्र च (त) वर्षमात्रेणापि सुवर्णशतपञ्चकमुपार्ज्य भूयोऽपि स्वस्थानं प्रति प्रस्थितः यावत्, तावत् अर्द्धपथे भूयोऽटवीगतस्य भगवान् भानुरस्तं जगाम ।

अथ सुवर्णनाशभयात् सुश्रान्तोऽपि न विश्राम्यति, केवलं (थ) क्षतमट्टोल्कण्ठः सत्वरं व्रजति । अत्रान्तरे द्वौ पुरुषौ तादृशौ दृष्टिदेशे समागच्छन्तौ जल्पन्तौ च शृणोति । तत्रैकः प्राह,—'भोः कर्त्तः ! किं त्वया एतस्य सुवर्णशतपञ्चकं प्रदत्तम् ? तत् किं न वेत्ति, यत् भोजनाच्छादनाभ्यधिकमस्य किञ्चित् नास्ति ?' स आह,—'भोः कर्मन् ! मया अवश्यं देयं व्यवसायिनां, तस्य परिणामः त्वदायत्तः । तत् किं माम्

(अ) व्यवसायिनाम्—उद्योगिनाम्, [अत्र सम्प्रदाने सम्बन्धविवक्षया षष्ठी] ।

(ट) तत्र—दत्तस्येत्यर्थः, परिणतिः,—परिणामः, स्थितिरिति यावत् ।

(ठ) त्वदायत्ता—तवाधीना ।

(ड) प्रबुद्धः,—जागरितः । सुवर्णग्रन्थिं—सुवर्णमुद्राणां वसनप्रान्तेन बन्धनं, सुवर्णसनाथं सुदृढनिबद्धमिति वस्त्राञ्चलमिति यावत् । रिक्तं—शून्यम् ।

(ढ) सखेदम्—सखेदम् । हेलया—अवज्ञया, अतर्कितभावेनेत्यर्थः । अकिञ्चनः, —निर्धनः । [नास्ति किञ्चिदस्येत्यकिञ्चनः । मयूरव्यंसकादित्वात् समासः] ।

(ण) पत्तनं—नगरम् ।

(त) वर्षमात्रेणापि—एकवर्षेणैव, [अपवर्गे तृतीया] ।

(थ) क्षतमट्टोल्कण्ठः,—मट्टं प्रति उत्कण्ठितः इत्यर्थः ।

(ङ) उपालम्भयसि ?' तत् श्रुत्वा सोमिलको यावत् पन्थिम् अवलोकयति, तावत् सुवर्णं नास्ति। ततः परं दुःखमापन्नो व्यचिन्तयत्,—'अहो! किं मम धनरहितस्य जीवितेन ? तदत्र वटवृक्षे आत्मानमुद्बध्य प्राणान् त्यजामि'। एवं निश्चित्य (च) दर्भमयीं रज्जुं विधाय स्वकण्ठे पाशं नियोज्य शाखायाम् आत्मानं निबध्य यावत् प्रक्षिपति, तावदेकः पुमान् आकाशस्थः एव इदमाह,—'भो भोः सोमिलक! मा एवं (न) साहसं कुरु, अहं ते वित्तापहारकः, न ते भोजनाच्छादनाभ्यधिकां (प) वराटिकामपि सहामि; तन्नच्छ स्वगृहं प्रति। अन्यच्च, भवदीयसाहसेन अहं तुष्टः, तथा मे न स्यात् व्यर्थं दर्शनम्; तत् प्रार्थ्यताम् अभीष्टो वरः कश्चित्'। सोमिलकः आह,—'यदि एवं, तर्हेहि मे प्रभूतं धनम्'। स आह,—'भोः! किं करिष्यसि भोगरहितेन धनेन ? यतः तव भोजनाच्छादनाभ्यधिका प्राप्तिरपि नास्ति। उक्तञ्च,—

किं तया क्रियते लक्ष्म्या या वधूरिव केवला ?।
या च वेश्येव सामान्या पथिकैरुपभुज्यते ?॥ १४१ ॥

(ङ) उपालम्भयसि—तिरस्करोषि, [उपपूर्वकात् लभधातोः स्वार्थे णिचि तुनागमः "लभेश्च" (७।१।५४ पा०) इति सूत्रात्; उपालभसे इति तु व्यचिनत-प्रयोग एवात्र समीचीनम्]।

(च) दर्भमयीं—कुशमयीम्; [दर्भेनिर्मितामिति "तयड्वैतयोः" (४।३।१४१ पा०) इति सूत्रात् अवयवार्थे मयट्]।

(न) साहसं—दुष्कारिताम्। वित्तापहारकः,—धनहर्ता।

(प) वराटिकामपि—कपर्दकमपि, न सहामि—मर्षयितुं न शक्नोमीत्यर्थः, [सहधातोः वैकल्पिकचौरादिकस्य शक्त्यर्थकस्य रूपमेतत्; 'साहयति' 'सहति' च सटि रूपद्वयं वेदितव्यम्]।

क्रियते।—या लक्ष्मीः, केवला वधूरिव सुखेव, पुत्रजनधूरिवेत्यर्थः, केवलं पुत्रस्यैव भोग्या न आत्मनः इति भावः; या च लक्ष्मीः, सामान्या साधारणी, वेश्येव कुलटेव,

सोमिलक आह,—'यद्यपि भोगो नास्ति, तथाऽपि तन्नवतु। उक्तञ्च,—क्रपणोऽप्यकुलीनोऽपि सज्जनैर्वर्जितः सदा।

सेव्यते स नरो लोके यस्य स्यात् वित्तसञ्चयः ॥ १४२ ॥

तथा च,—शिथिलौ च सुबद्धौ च पततः पततो न वा।

निरीक्षितौ मया भद्रे! दश वर्षाणि पञ्च च' ॥ १४३ ॥

पुरुष आह,—'किमेतत्' ? सोऽब्रवीत्,—

कथा ६ ।

'कस्मिंश्चित् अधिष्ठाने (फ) तीक्ष्णविषाणो नाम महाऋषभः प्रतिवसति स्म। स च (ब) मदातिरेकात् परित्यक्तनिजयूथः शृङ्गाभ्यां नदीतटानि विदारयन् स्वेच्छया मरकतसदृशानि शष्पाणि भक्षयन् अरण्यचरो बभूव।

अथ तत्र एव वने प्रलोभको नाम शृगालः प्रतिवसति स्म। स कदाचित् स्वभार्यया सह नदीतीरे सुखोपविष्टः तिष्ठति।

पथिकैः सर्वसाधारणैरित्यर्थः, उपभुज्यते ; न तु स्वयमित्यर्थः ; तथा लक्ष्मीः सम्पदा, किं क्रियते ? न किमपि प्रयोजनं तत्र ; पुत्रस्यैव भोगार्हा भवतु अन्येषां वा, या नात्मभोगसाधिका, सा नैव काम्या इति भावः ॥ १४१ ॥

क्रपण इति।—यस्य वित्तसञ्चयः धनसङ्गृहः, सञ्चितं धनमिति यावत्, स्यात्, सः नरः क्रपणः व्ययवर्जितः, अकुलीनः असत्कुलप्रसूतः, तथा सज्जनैः वर्जितः परित्यक्तोऽपि, सदा लोके संसारे, सेव्यते पूज्यते, लोकैरिति शेषः ; धनस्यैव मानहेतुत्वादिति भावः ॥ १४२ ॥

शिथिलाविति।—हे भद्रे! मया दश पञ्च च वर्षाणि पञ्चदशवत्सरान् व्याप्य, [अत्र "कालाध्वनोरत्यन्तसंयोगे" (२।३।५पा०) इति द्वितीया] शिथिलौ च सञ्जनानौ चेत्यर्थः, सुबद्धौ दृढसंश्लिष्टौ च, पततः न वा पततः, इषत्पाताविति शेषः, निरीक्षितौ दृष्टौ ; चाञ्चल्यात् पतनसन्देहात्सदोभूतवया इति भावः, तात्पर्यमस्य परतः स्फुटीभविष्यति ॥१४३॥

(फ) तीक्ष्णविषाणः,—निशितशृङ्गः।

(ब) मदातिरेकात्—गर्वाधिक्यात्। मरकतसदृशानि—हरितवर्णमणिविशेषतुल्यानि, श्यामलानि इत्यर्थः। शष्पाणि—तृणानि।

अत्रान्तरे स तीक्ष्णविषाणो जलार्थं तटेव (भ) पुलिनम् अवतीर्णः; ततश्च तस्य लम्बमानौ वृषणौ अवलोक्य शृगाल्या शृगालोऽभिहितः,—'स्वामिन्! पश्य, अस्य वृषभस्य मांसपिण्डौ लम्बमानौ यथा स्थितौ, तदेतौ क्षणेन प्रहरेण वा पतिष्यतः; एवं ज्ञात्वा भवता (म) पृष्ठानुयायिना भाव्यम्'। शृगाल आह,—'प्रिये! न ज्ञायते कदाचित् एतयोः पतनं भविष्यति वा न वा, तत् किं वृथा श्रमाय मां नियोजयसि? अत्रस्थः तावत् जलार्थम् आगतान् मूषकान् भक्षयिष्यामि (य) समं त्वया, मार्गोऽयं यतः तेषाम्। अपरं, यदि त्वां (र) मुक्त्वा अस्य तीक्ष्णविषाणस्य वृषभस्य पृष्ठे गमिष्यामि, तदा आगत्य अन्यः कश्चिदेतत् स्थानं समाश्रयिष्यति। न एतत् युज्यते कर्त्तुम्। उक्तञ्च,—यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते।

ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च' ॥ १४४ ॥

शृगाली आह,—'भोः! कापुरुषः त्वं यत्किञ्चित् प्राप्तं, तेनापि सन्तोषं करोषि।

उक्तञ्च,—सुपूरा स्यात् कुनदिका सुपूरो मूषिकाञ्जलिः।

सुसन्तुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ॥ १४५ ॥

(भ) पुलिनं—तीर्योत्थितं तटम्। वृषणौ—अण्डकोषौ।

(म) पृष्ठानुयायिना—पश्चाद्गामिना, अनुसरणपरेण इत्यर्थः।

(य) समं—सह। यतः,—यस्मात् हेतोः, तेषां—मूषकाणाम्, अयं मार्गः, —पन्थाः।

(र) मुक्त्वा—विहाय।

ध्रुवाणि।—यो जनः, ध्रुवाणि निश्चितानि, परित्यज्य त्यक्त्वा, अध्रुवाणि अनिश्चितानि, निषेवते आश्रयति, तस्य ध्रुवाणि नश्यन्ति, अध्रुवञ्च अनिश्चितं पुनः, नष्टमेव पूर्वमेव नष्टमित्यर्थः; "नाशमीक्षेत्य पदं स्थानं पूर्वमाश्रयतश्च त्यजेत्" इति भावः॥ १४४॥

सुपूरेति।—कुनदिका क्षुद्रा नदी, सुपूरा अल्पेनैव पूरयोग्या, स्यात्, मूषिकस्य अञ्जलिः अतिक्षुद्र इति भावः, सुपूरः अल्पेनैव पूर्यः, [सर्वत्र सुपूरशब्दे कर्मणि खल्-

तस्मात् पुरुषेण सदा एव उत्साहवता भाव्यम् ।

उक्तम्,—यत्नोत्साहसमारम्भो यत्नाऽऽलस्यविहीनता ।
नयविक्रमसंयोगस्तत्र श्रीरचला ध्रुवम् ॥ १४६ ॥
तदेवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः ।
अनुयोगं विना तैलं तिलानां नोपजायते ॥ १४७ ॥

अन्यच्च,—यः स्तोकेनापि सन्तोषं कुरुते मन्दधीर्जनः ।
तस्य भाग्यविहीनस्य दत्ता श्रीरपि मार्ज्यते ॥ १४८ ॥
यच्च त्वं वदसि, एतौ पतिव्रतौ न वेति, तदपि अयुक्तम् ।

प्रत्ययः] तथा सुसन्तुष्टः स्ववस्त्रायामेव परितुष्टः इत्यर्थः, कापुरुषः ["कुमति—" (२।२।१८ पा०) इति नित्यसमासः, ततश्च "विभाषा—" (६।३।१०६ पा०) इति कुत्सार्थस्य 'का' शब्दस्य कापुरुषः कुपुरुष इति] अधमो नरः, स्वल्पकेनापि, वस्तुनेति शेषः, तुष्यति, उत्तमस्तु न तथा इति भावः ॥ १४५ ॥

यत्नेति ।—यत्र उत्साहेन समारम्भः सम्यक् उद्योगः, ("आरम्भस्तु त्वरायां स्यादुद्यमे वधदर्पयोः" इति मेदिनी) यत्र आलस्यविहीनता अनालस्यं, श्रमशीलता इत्यर्थः, तथा नयविक्रमयोः नीतिपुरुषकारयोः, संयोगः समावेशः, तत्र श्रीः सम्पत्, ध्रुवं निश्चितम्, अचला स्थिरा सती, तिष्ठतीति शेषः ; पौरुषपक्षपातित्वः सम्यद इति हृदयम् ॥ १४६ ॥

तदिति ।—तत् तस्मात्, उत्साहसमारम्भादौ श्रिया अचलत्वेनावस्थानादित्यर्थः, यद्वा,—तत् प्रसिद्धम् इत्यर्थः ; दैवम् अप्रतिसमाधेयमिति भावः, इति सञ्चिन्त्य आत्मनः उद्योगं पुरुषकारं, न त्यजेत् ; तथा हि, अनुयोगं पौरुषयत्नेन सह योगं, पुरुषव्यापारमिति यावत्, विना पौरुषादृते इति भावः, तिलानां तैलं न उपजायते न वर्धिःप्रकाशो भवतीत्यर्थः ; पौरुषादेव कार्यसिद्धिः भवतीति भावः ॥ १४७ ॥

य इति ।—यः मन्दधीः मूढमतिः, जनः स्तोकेनापि अल्पेनैव, सन्तोषं कुरुते सन्तुष्टो भवति इत्यर्थः, भाग्यविहीनस्य मन्दभाग्यस्य, तस्य दत्तापि, केनचिदिति शेषः, श्रीः सम्पत्, मार्ज्यते श्रीभ्यते, तादृशकापुरुषसमीपे अचलानामचिरस्थायीत्वादपरिहार्यं तस्मात् पलाय्य चात्मा निर्दोषीक्रियते इत्यर्थः ; स्वयमेवेति शेषः ; "सम्पदा सुस्थिरस्तम्भो भवति स्वस्वयाऽपि यः । अतस्तस्मै विधिर्नित्यं न वर्धयति तत्र ताम् ॥" इति भावः । [श्रीरादिरूपस्य मार्ज्यधातोः विशरणस्य श्रीभ्यधातोर्वा कर्मणीदम्] ॥ १४८ ॥

उक्तञ्च,—कृतनिश्चयिनो वन्द्यो तुङ्गिमा नः प्रशस्यते ।

चातकः को वराकोऽयम् ? यस्येन्द्रो वारिवाहकः ॥ १४९॥

अपरं, मूषकमांसस्य (ख) निर्विण्णा अहम्, एतौ च मांसपिण्डौ पतनप्रायौ दृश्येते, तत् सर्वथा नान्यथा कर्त्तव्यम्' इति ।

अथ असौ तदाकर्ण्य मूषकप्राप्तिखानं परित्यज्य तीक्ष्णविषाणस्य पृष्ठमन्वगच्छत् । अथवा साधु इदमुच्यते,—

तावत् स्यात् सर्वकृत्येषु पुरुषोऽत्र स्वयं प्रभुः ।
स्त्रीवाक्याङ्कुशविच्छिन्नो यावन्नो म्रियते बलात् ॥ १५० ॥
अकृत्यं मन्यते कृत्यमगम्यं मन्यते सुगम् ।
अभक्ष्यं मन्यते भक्ष्यं स्त्रीवाक्यप्रेरितो नरः ॥ १५१ ॥

कृतेति।—कृतनिश्चयिनः ["न कर्मधारयान्मतुवर्थीयो बहुव्रीहिरिच्छेदर्थप्रतिपत्तिकरः" इति नियमात् कृतनिश्चयिन: इति पदस्य असाधुत्वेऽपि एतन्नियमस्यासार्वत्रिकत्वस्वीकारात् कथञ्चित् समाधेयम्] कार्य्यसिद्धौ दृढसङ्कल्पस्य इत्यर्थः, वन्द्यो वन्दनीयः, समादरणीय: इत्यर्थः, तुङ्गिमा [तुङ्गशब्दात् भावे इमनिच्प्रत्ययः] उच्चाभिलाष इति यावत्, नः अस्माकं, प्रशस्यते प्रशंसनीयो भवति, ["प्रशस्यते" इति कर्मकर्त्तरि प्रयोगः, "नः" इति षष्ठ्यन्तविवक्षायां षष्ठी] ; तथा हि, वराकः दीनः, अयं चातकः कः ? यस्य चातकस्य, कृतनिश्चयस्येति भावः, इन्द्रः देवराजः, वारिवाहकः जलदाता ; चातकः अतिक्षुद्रोऽपि कार्य्ये साध्यायामीति कृतनिश्चयः सन् जलार्थं देवराजं प्रार्थयते, तेन च देवराजोऽपि तस्य मनोरथं पूरयतीति भावः ॥ १४९ ॥

(ख) निर्विण्णा—विरक्ता, मूषकमांसभक्षणे न मम रुचिरस्तीति भावः ।

तावदिति ।—अत्र संसारे, पुरुषः यावत् बलात् प्रसह्य, स्त्रीणां वाक्यमेव अङ्कुशः गाढतरदुःखविशेषः, तेन विच्छिन्नः विताडितः, नो म्रियते न मिम्रति, तावत् सर्वेषु कृत्येषु कार्य्येषु, स्वयं प्रभुः स्वाधीनः, स्यात् ; स्त्रीवशमापन्नो हि स्वाधीनतां नश्यतीति भावः ॥१५०॥

अकृत्यमिति ।—स्त्रीणां वाक्येन प्रेरितः नियुक्तः, चालितः इत्यर्थः, नरः अकृत्यम् अकार्य्यं, कृत्यं मन्यते, अगम्यं सुगं सुगमं, मन्यते, तथा अभक्ष्यं भक्ष्यं मन्यते ; तथा च प्रतिकूलमपि सर्वम् अनुकूलमिव मन्यते खेच्छ इति भावः ; "तावदेव प्रधानं स्यात् यावदुत्सङ्गने रतः । पुंसो योषिता यावन्न प्रयोति वशी रहः ॥" इति मनूक्तिरत्वात् स्त्रीवशगा न समीचीना इति निष्कर्षः ॥ १५१ ॥

एवं सः (व) तस्य वृषभस्य पृष्ठतः सभार्य्यः परिभ्रमन् चिरकालम् अनयत्, न च (श) तयोः पतनम् अभूत्। ततश्च (ष) निर्वेदात् पञ्चदशे वर्षे शृगालः स्वभार्य्यामाह,—

'शिथिलौ च सुबद्धौ च पततः पततो न वा।
निरीक्षितौ मया भद्रे! दश वर्षाणि पञ्च च ॥ १५२ ॥

एतयोः तत्पतनादपि पातो न भविष्यति, तत् तदेव स्वस्थानं गच्छावः'। अतोऽहं ब्रवीमि—'शिथिलौ च सुबद्धौ च' इति'।

पुरुष आह,—'यदि एवं, तन्नच्छ भूयोऽपि वर्द्धमानपुरम्। तत्र द्वौ वणिक्पुत्रौ वसतः, एकः (स) गुप्तधनः, द्वितीयः (ह) उपभुक्तधनः। ततः तयोः (क) स्वरूपं बुद्ध्वा एकस्य वरः प्रार्थनीयः। यदि ते धनेन प्रयोजनम् (ख) अभक्षितेन, ततः त्वामपि गुप्तधनं करोमि; अथवा दत्तभोग्येन धनेन ते प्रयोजनं तदुपभुक्तधनं करोमि' इति। एवमुक्त्वा अदर्शनं गतः।

सोमिलकोऽपि विस्मितमना भूयोऽपि वर्द्धमानपुरं गतः।

(व) तस्य—वृषभस्य। पृष्ठतः,—पश्चात्, [आद्यादित्वात् सप्तम्यां तसिल्प्रत्ययः]।

(श) तयोः,—वृषभयोः।

(ष) निर्वेदात्—खेदात्।

शिथिलाविति।—व्याख्यातं प्राक् १४३ सङ्ख्याकश्लोके। अत्रायं भावः,—तथा हि,—कृपणः धनं वितरतु न वा, तस्य पेटकावद्धं धनं "यदि कदाऽपि अस्माकं भोग्यं आयेत" इति धिया जनाः तं खेदयन्ति, यथा शृगालौ सुबद्धावपि वृषभस्कन्धौ शिथिलत्वात् अचिराद्देव पतिष्यमाणौ मत्वा दीर्घकालं तदनुसरणपरौ अभूताम् इति ॥ १५२ ॥

(स) गुप्तधनः,—रक्षितधनः।

(ह) उपभुक्तधनः,—व्ययितधनः।

(क) स्वरूपं—धनभोगादिविषयरूपरिचयम् इत्यर्थः। बुद्ध्वा—ज्ञात्वा।

(ख) अभक्षितेन—भोगरहितेन। दत्तभोग्येन—दत्तं भोग्यं वस्तु येन तादृशेन उपभोगार्हेण इत्यर्थः।

अथ सन्ध्यासमये श्रान्तः कथमपि तत् पुरं प्राप्तो गुप्तधनगृहं पृच्छन् (ग) क्लेशात् लब्ध्वा (घ) अस्तमितसूर्ये प्रविष्टः।

अथ असौ भार्यापुत्रसमेतेन गुप्तधनेन (ङ) निर्भर्त्स्यमानो हठात् गृहं प्रविश्य उपविष्टः। ततश्च भोजनवेलायां तस्यापि (च) भक्तिवर्जितं किञ्चित् अशनं दत्तम्। ततश्च भुक्ता तत्र एव यावत् सुप्तो निशीथे, पश्यति तावत् तौ अपि द्वौ पुरुषौ परस्परं मन्त्रयतः। तत्र एक आह,—'भोः कर्त्तः! किं त्वया अस्य गुप्तधनस्य (छ) अन्योऽधिको व्ययः निर्मितः, यत् सोमिलकस्य अनेन भोजनं दत्तम्? तदयुक्तं त्वया कृतम्'। स आह,—'भोः कर्मन्! न मम अत्र दोषः, मया पुरुषस्य लाभप्राप्तिर्दातव्या, तत्परिणतिः पुनः त्वदायत्ता' इति।

अथ (ज) असौ यावदुत्तिष्ठति, तावत् गुप्तधनः विसूचिकया खिद्यमानो रुजाभिभूतः क्षणं तिष्ठति। ततो द्वितीयेऽह्नि (झ) तद्दोषेण कृतोपवासः सञ्जातः। सोमिलकोऽपि प्रभाते

(ग) क्लेशात—कष्टेन।

(घ) अस्तमितसूर्ये—अस्तमितः,—अस्तङ्गतः सूर्यः तस्मिन् सूर्ये अस्तं गते, प्रदोषे इत्यर्थः।

(ङ) निर्भर्त्स्यमानः,—तिरस्क्रियमाणः।

(च) भक्तिवर्जितम्—अनुरागविहीनम्, अनादरोपकल्पितमित्यर्थः, अशनं—भोजनम्।

(छ) अन्य इत्यादि।—स्तोकरूपमात्रव्ययादतिरिक्तः व्ययः, निर्मितः,—कल्पितः, निर्द्धारित इत्यर्थः। सोमिलकस्य—सोमिलकाय इत्यर्थः, [अत्र सम्प्रदाने सम्बन्धविवक्षया षष्ठी]।

(ज) असौ—सोमिलकः। उत्तिष्ठति—जागर्त्ति। विसूचिकया—व्याधिविशेषेण। खिद्यमानः,—पीड्यमानः।

(झ) तद्दोषेण—तेन दोषेण, व्याधिनेति भावः। सोमिलकाय एकवारभोजनदानेन आत्मनश्चरंग्रस्य स्वल्पीभावात् एकदिनोपवासेन तत्पूरणं कृतं कर्मणेति भावः।

तद्गृहात् निष्क्रम्य उपभुक्तधनगृहं गतः। तेनापि च अभ्युत्थानादिना सत्कृतः (अ) विहितभोजनाच्छादनसम्मानः तस्य एव गृहे भव्यशय्यायाम् आरुह्य सुष्वाप। ततश्च निशीथे यावत् पश्यति, तावत् तौ एव द्वौ पुरुषौ मिथो मन्त्रयतः।

अथ तयोः एक आह,—'भोः कर्त्तः! अनेन सोमिलकस्य उपकारं कुर्वता प्रभूतो व्ययः कृतः, तत् कथय, कथम् अस्य (ट) उद्धारकविधिः भविष्यति? अनेन सर्वम् (ठ) एतत् व्यवहारकगृहात् समानीतम्'। स आह,—'भोः कर्मन्! मम कृत्यमेतत्, परिणतिः त्वदायत्ता' इति।

अथ प्रभातसमये राजपुरुषः (ड) राजप्रसादजं वित्तम् आदाय समायात उपभुक्तधनाय समर्पयामास। तत् दृष्ट्वा सोमिलकः चिन्तयामास,—'सञ्चयरहितोऽपि वरमेष उपभुक्तधनः, न असौ गुप्तधनः।

उक्तञ्च,—अग्निहोत्रफला वेदाः शीलवित्तफलं श्रुतम्।
रतिपुत्रफला दारा दत्तभुक्तफलं धनम्॥ १५३॥

(अ) विहितेति।—विहितः,—कृतः, भोजनाच्छादनाभ्यां सम्मानः,—आदरः यस्य तथोक्तः। भव्यशय्यायां—योग्यशयनीये, उत्तमशय्यायामित्यर्थः, ("भव्यं शुभे च सत्ये च योग्ये भाविनि च त्रिषु" इति मेदिनी)।

(ट) उद्धारकविधिः,—परिशोधविधानं, व्ययितधनस्य पूरणमिति यावत्।

(ठ) एतत्—सोमिलकस्य परिचर्यार्थं द्रव्यम्। व्यवहारकगृहात्—व्यवसायिगृहादित्यर्थः; समानीतं—मूल्यमदत्त्वैव कालान्तरे दास्यामि इति प्रतिश्रुत्य सङ्गृहीतमित्यर्थः।

(ड) राजप्रसादजं—कृतोऽपि कारणात् राज्ञा पुरस्कारत्वेन दत्तमित्यर्थः, आतिथ्यसत्कारत्वप्रकर्षफलभूतमिदं विधिप्रेरितमिति भावः।

अग्नीति।—वेदाः अग्निहोत्रं तन्नामकयज्ञानुष्ठानं, मन्त्रकल्पकक्रियाप्रपञ्चपूर्वकहोमादिकं वा, फलं प्रयोजनं येषां तादृशाः, साग्निकत्वमेव वेदाध्ययनफलमित्यर्थः, श्रुतं शास्त्रज्ञानं, शीलं सुचरितं, वित्तं धनञ्च, फलं प्रयोजनं यस्य तादृशं, विद्वान्

तद्विधाता मां दत्तभुक्तधनं करोतु, न कार्यं मे गुप्तधनेन'। ततः सोमिलको दत्तभुक्तधनः सञ्जातः। अतोऽहं ब्रवीमि,—

'अर्थस्योपार्जनं कृत्वा नैव भोगं समश्नुते।
अरण्यं महदासाद्य मूढः सोमिलको यथा' ॥ १५४ ॥

तद्भद्र हिरण्यक! एवं ज्ञात्वा धनविषये सन्तापो न कार्यः अथ विद्यमानमपि धनं (ढ) भोज्यबन्ध्यतया तत् अविद्यमानं मन्तव्यम्।

उक्तञ्च,—गृहमध्यनिखातेन धनेन धनिनो यदि।
भवामः किं न तेनैव धनेन धनिनो वयम्? ॥ १५५ ॥

तथा च,—उपार्जितानामर्थानां त्याग एव हि रक्षणम्।
तड़ागोदरसंस्थानां परीवाह इवाम्भसाम् ॥ १५६ ॥

जनः सुशीलो भवति, सत्पात्रतया सम्पदश्च लभते इति भावः; दाराः [दारशब्दस्तु पुंलिङ्गः नित्यबहुवचनान्तः] स्त्रियः, रतिः सुरतं, पुत्रश्च फलं येषां तादृशाः, पुत्रार्थं रत्यर्थं च क्रियते भार्येति भावः; धनं, दत्तं दानं, भुक्तं भोगश्च, फलं यस्य तथाभूतं, भवतीति शेषः, धनं भुज्यते दीयते चेति भावः; अन्यथा सर्वं निष्फलमिति तात्पर्यम् ॥ १५३ ॥

अर्थस्येति।—व्याख्यातं प्राक् १२८ सङ्ख्याकश्लोके ॥ १५४ ॥

(ढ) भोज्यबन्ध्यतया—भोगफलाभावेन, केवलं सञ्चयवासनया स्वेषां भोजनादि-व्ययनिर्वाहेऽपि बद्धमुष्टितया इत्यर्थः।

गृहेति।—यदि, नामेति इति कार्पण्यपदमत्र ऊहनीयम्; गृहमध्ये निखातेन भूतलप्रोथितेन इत्यर्थः, भोगसाधनानर्हेण इति हृदयं, धनेन धनिनः धनवन्तः, भवन्ति इति शेषः, तदा वयमपि तेनैव धनेन किं कथं, धनिनः न भवामः? तत् धनं तेषाम् अस्माकञ्च एतदिति नास्ति विशेषः, भोगराहित्यमेवात्र नियामकमिति भावः ॥ १५५ ॥

उपार्जितानामिति।—तड़ागोदरसंस्थानां सरोवरमध्यस्थितानाम्, अम्भसां जलानां, परीवाहः [परिपूर्ववह्धातोः घञि रूपम्; अत्र "उपसर्गस्य घञ्यमनुष्ये बहुलम्" (६।३।१२२ पा०) इति सूत्रेण उपसर्गस्य दीर्घता] इव जलोच्छास इव, जलनिःसारणमिव इत्यर्थः, उपार्जितानाम् अर्थानां धनानां, त्यागः एव दानमेव, रक्षणं हि रक्षणोपायः, तन्नाम्नः स्रावस्यम्भावित्वादिति भावः ॥ १५६ ॥

दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्त्तव्यः ।
पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ॥ १५७ ॥

अन्यच्च,—दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ १५८ ॥

एवं ज्ञात्वा विवेकिना न स्वित्यर्थं वित्तोपार्जनं कर्त्तव्यं, यतो दुःखाय तत् ।

उक्तञ्च,—धनादिकेषु विद्यन्ते येऽत्र मूर्खाः सुखाशया ।
तप्तयोक्षेण सेवन्ते शैत्यार्थं ते हुताशनम् ॥ १५९ ॥

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवरा गमयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम् ॥ १६० ॥

दातव्यमिति ।—धनविषये दातव्यं दानं कर्त्तव्यं, भोक्तव्यं भोगः कर्त्तव्यः, सञ्चयः सङ्ग्रहः, न कर्त्तव्यः ; पश्य, इह संसारे, मधुकरीणां (मधुकराणामिति वा पाठः) मधुमक्षिकाणां, केवलसञ्चयशीलानामिति भावः, सञ्चितम् अर्थं मधुरूपं धनम्, अन्ये जनाः, हरन्ति ; तथा च मधुकर्य्येव सदा केवलसञ्चयशीलेन न भवितव्यमिति भावः । आर्य्या छन्दः ॥ १५७ ॥

दानमिति ।—वित्तस्य धनस्य, दानं, भोगः, नाशश्च इति तिस्रो गतयः अवस्थाः, भवन्ति ; यो जनः, न ददाति, न भुङ्क्ते, तस्य जनस्य, तृतीया गतिः नाशः इति भावः, भवति, धनानामिति शेषः । आर्य्या छन्दः ॥ १५८ ॥

धनादिकेष्विति ।—अत्र संसारे, ये मूर्खाः धनादिकेषु भोग्यवस्तुषु इत्यर्थः, सुखाशया अस्मत्तोऽभिलष्य इत्यर्थः, विद्यन्ते तिष्ठन्ति, धनादिनैव सुखं भवति इति ये मन्यन्ते इत्यर्थः, ते तप्तयोक्षेण [उपलक्षणे तृतीया] उपलक्षिताः, आर्त्ता सन्तः इत्यर्थः ; "तप्ता योक्षेण" इति पाठकल्पना साध्वी, शैत्यार्थं हुताशनम् अग्निं, सेवन्ते आश्रयन्ति ; धनादिना सुखाशा योक्षार्त्तस्य अग्निसेवनमिवेति भावः । निदर्शनालङ्कारः ॥ १५९ ॥

सर्पा इति ।—सर्पाः पवनं वायुं, पिबन्ति, न च ते सर्पाः दुर्बलाः ; वनगजाः शुष्कैः नीरसैः तृणैः अशिष्टैरिति भावः, बलिनः बलवन्तः, भवन्ति, मुनिवराः कन्दैः मूलविशेषैः, फलैश्च कालं गमयन्ति यापयन्ति, जीवन्तीति यावत् ; एते सन्तोषेणैव

सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ? ॥ १६१ ॥
पीयूषमिव सन्तोषं पिबतां निर्वृतिः परा ।
दुःखं निरन्तरं पुंसामसन्तोषवतां पुनः ॥ १६२ ॥
निरोधाच्चेतसोऽन्यानि निरुद्धान्यखिलान्यपि ।
आच्छादिते रवौ मेघैराच्छन्नाः स्युर्गभस्तयः ॥ १६३ ॥
वाञ्छाविच्छेदनं प्राहुः स्वास्थ्यं शान्ता महर्षयः ।
वाञ्छा निवर्त्तते नार्थैः पिपासेवाग्निसेवनैः ॥ १६४ ॥

मलुष्टा इत्याशयः ; तस्मात् सन्तोष एव यत्किञ्चिल्लाभेनापि आत्मतृप्तिरेव, दुराकाङ्क्षा-वर्जनमेवेति भावः, पुरुषस्य परं निधानं रत्नम्, आश्रया वा । सामान्येन विशेष-समर्थनरूपोऽर्थान्तरन्यासः । वसन्ततिलका वृत्तम् ॥ १६० ॥

सन्तोषेति ।—सन्तोष एव अमृतं, तेन तृप्तानां परितोषं गतानां, शान्तचेतसां शान्त [श्रम्-धातोः क्तिचि निष्ठाप्रत्ययं "वा दान्तशान्तेत्यादि—" (७।२।२३ पा०) इत्यनेन निपातनात् सिद्धम्; पक्षे शमित इति रूपम्] चेतो येषां तथोक्तानां निःस्पृह-चित्तानां, यत् सुखं, भवतीति शेषः, धनलुब्धानाम् अर्थगृद्धूनाम्, अत एव इतश्च इतश्च [इदम्-शब्दात् सप्तम्यां तसिल्प्रत्ययः] समन्तादित्यर्थः, धावता धनार्थं चेष्टमानानाम् इत्यर्थः, जनानामिति शेषः, तत् सुखं कुतः ? कस्मात् ? भवति इति शेषः; नैव भवति इत्यर्थः ; लोभपरित्याग एव सुखहेतुः सर्वेषाम् इति भावः ॥ १६१ ॥

पीयूषमिवेति ।—पीयूषमिव अमृतमिव, सन्तोषं परितोषं, पिबतां सेवमानानां, सायङ्कृत्यमाश्रयतामित्यर्थः, जनानामिति शेषः, परा निर्वृतिः परमं सुखं, भवतीति शेषः । असन्तोषवतां असन्तुष्टानां, कैश्चिदपि अपरितुष्यतामित्यर्थः, पुंसां पुरुषाणां, पुनः किन्तु, निरन्तरम् अविच्छिन्नं, दुःखं, भवतीति शेषः ; सर्वत्र असन्तोषस्यैव दुःखमूलकत्वादिति भावः ॥ १६२ ॥

निरोधादिति ।—चेतसः चित्तस्य, निरोधात् दमनादित्यर्थः, अखिलानि सम-ग्राणि, अन्यानि इन्द्रियाणि अपि, श्रोत्रादीन्यपीत्यर्थः, निरुद्धानि वशीकृतानि, दान्तानि इत्यर्थः, भवन्तीति शेषः, मनःसंयोगाद्धते ज्ञानसामान्यस्यानुदयात् मनस एव सर्वेन्द्रियाध्यक्षकत्वं वेदितव्यम् इति भावः ; तथा हि, रवौ सूर्ये, मेघैः आच्छादिते-सति, गभस्तयः सूर्यकिरणाः, आच्छन्नाः स्युः । दृष्टान्तालङ्कारः ॥ १६३ ॥

वाञ्छेति ।—शान्ताः महर्षयः वाञ्छायाः वासनायाः, विच्छेदनं विध्वंसः, स्वास्थ्यं

अनिन्द्यमपि निन्दन्ति सुवन्द्यस्तुत्यमुच्चकैः ।
स्वापतेयक्षते मर्त्याः किं किं नाम न कुर्वते ? ॥१६५॥
धर्मार्थं यस्य वित्तेहा तस्यापि न शुभावहा ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ १६६ ॥
दानेन तुल्यो निधिरस्ति नान्यो
लोभात्च नान्योऽस्ति रिपुः पृथिव्याम् ।
विभूषणं शीलसमं न चान्यत्
सन्तोषतुल्यं धनमस्ति नान्यत् ॥ १६७ ॥

सुखतां सुखनिमित्तैः, प्रायुः क्षपयन्ति ; अग्निसेवनैः पिपासेव जलक्षयेण, अर्थैः धनैः, वाञ्छा आकाङ्क्षा, न निवर्तते, परन्तु वर्धते एव इत्यर्थः, "इधिधा क्षपयन्त्येव भूय एवाभिवर्धते" इति भावः ॥ १६४ ॥

अनिन्द्यमिति ।—मर्त्याः मानवाः, स्वापतेयक्षते धनार्थं, ("द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु" इत्यमरः) अनिन्द्यमपि निन्दानर्हमपि, जनमिति शेषः, निन्दन्ति, अस्तुत्यञ्च स्तुत्ययोग्यञ्च, उच्चकैः अतिमात्रं, स्तुवन्ति प्रशंसन्ति ; किं बहुना, किं किं नाम न कुर्वते ? सर्वमेव कुर्वते इत्यर्थः ; धनार्थं तेषां किमपि अकार्यं नास्तीति भावः ॥ १६५ ॥

धर्मार्थमिति ।—यस्य जनस्य, धर्मार्थं धर्मकार्यानुष्ठानार्थं, वित्तेहा धनार्जनचेष्टा, तस्यापि धर्मोद्योगेऽपि, सा चेष्टा इत्युद्योगोऽयम् ; न शुभावहा न शुभकरी ; हि यतः, यस्य जनस्य, प्रक्षालनात् [अत्र ल्यब्लोपे पञ्चमी] आदौ नाम्ने पङ्कं प्रक्षिप्य पश्चात् तस्य प्रक्षालनमपेक्ष्य इत्यर्थः, दूरात् ["दूराद्धृते च" (२।३।६१ पा०) इति सूत्रेण पञ्चमी,] अस्पर्शनं वरं मनाक् प्रियम् ; प्रथमतः धनार्जनहेतोः पापं सञ्चित्य ततः परं तत्कारणधर्माचरणेन तदपनयनेच्छा खेच्छया सञ्चितकर्दमप्रक्षालनवत् नितरां हेयमिति भावः ॥ १६६ ॥

दानेनेति ।—दानेन तुल्यः समः, अन्यः अपरः, निधिः धनं, नास्ति, लोभात् [अत्र "अन्यारादितरर्तेदिक्—" (२।३।२९ पा०) इति सूत्रेण पञ्चमी] अन्यः पृथिव्यां रिपुः नास्ति ; शीलेन सच्चरित्रेण, समं तुल्यम्, अन्यत् अपरं, विभूषणञ्च न, सन्तोषेण तुल्यम् अन्यत् धनं नास्ति । उपजातिः छन्दः ॥ १६७ ॥

दारिद्र्यस्य परा भूतिर्यन्मानद्रविणाल्पता ।
जरद्धवधनः शर्वः तथाऽपि परमेश्वरः ॥ १६८ ॥
सकृत् कन्दुकपातेन पतत्यार्यः पतन्नपि ।
तथा पतति मूर्खस्तु मृत्पिण्डपतनं यथा ॥ १६९ ॥
एवं ज्ञात्वा भद्र ! त्वया सन्तोषः कार्यः" इति । मन्थरक-
वचनमाकर्ण्य वायस आह,—"भद्र ! मन्थरको यत् एवं वदति,
तत् त्वया चित्ते कर्त्तव्यम् । अथवा साधु इदमुच्यते,—
सुलभाः पुरुषा राजन् ! सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ १७० ॥
अप्रियाण्यपि पथ्यानि यो वदन्ति नृणामिह ।
त एव सुहृदः प्रोक्ता अन्ये स्युर्नामधारकाः" ॥ १७१ ॥

दारिद्र्येति ।—यत् या इत्यर्थकमव्ययम् ; मान एव द्रविणं धनं, तस्य अल्पता
न्यूनता, सा एव दारिद्र्यस्य दैन्यस्य, परा भूतिः श्रेष्ठा सत्यत्, परमोत्कर्षः इत्यर्थः ;
तथा हि, शर्वः शम्भुः, जरद्धवधनः जरन् गौरिति जरद्धवः वृद्धोक्षः, ["गौरतद्धितलुकि"
(५।४।९२ पा०) इति समासान्तः टच् । "वृद्धोक्षस्तु जरद्धवः" इत्यमरः] स एव धनं
यस्य सः, जीर्णवृषभाश्वसदृद्धिरित्यर्थः, तथाऽपि परमेश्वरः ; निर्धनत्वेऽपि मानोन्नतत्वा-
दिति भावः ; मानक्षीणतैव दरिद्रता नाम, न धनक्षीणता इत्यभिप्रायः ॥ १६८ ॥

सकृदिति ।—आर्यः सुजनः, पतन्नपि अधोगच्छन्नपि, कन्दुकपातेन कन्दुकपतन-
वत्, सकृत् एकवारं, पतति तत्क्षणादेव पुनरुत्पततीति भावः, मूर्खस्तु तथा पतति,
यथा मृत्पिण्डपतनं मृत्पिण्डो यथा पतति ; मृत्पिण्डो यथा पतित्वा पुनर्नोत्पतति,
तथा मूर्खोऽपि पतनानन्तरमभ्युदयं न लभते इति भावः ॥ १६९ ॥

सुलभा इति ।—हे राजन् ! सततं प्रियवादिनः प्रियभाषिणः, पुरुषाः सुलभाः
सुप्रापाः, सर्व एव सततं श्रुतिसुखानि वक्तुं शक्नुवन्ति इति भावः, किन्तु अप्रियस्य
श्रुतिकर्कशस्य, च पथ्य च, पथ्यस्य हितस्य, वचनस्य इति शेषः, वक्ता श्रोता च
दुर्लभः, यः अप्रियं किन्तु हितम् उपदिशति, यश्च तत् शृणोति, तावुभौ दुर्लभौ
इत्यर्थः ; मन्थरकस्तु एवं वक्ता इति भावः ॥१७० ॥

अप्रियाणीति ।—इह अस्मिन् संसारे, ये जनाः, नृणां पुरुषाणाम्, अप्रियाण्यपि
श्रुतिकटूनि अवश्यभोक्तव्यानि अपि, पथ्यानि हितानि, परिणामसुखानीति भावः,

अथ एवं जल्पतां तेषां चित्राङ्गो नाम हरिणो लुब्धकत्रासितः तस्मिन् एव सरसि प्रविष्टः।

अथ आयान्तं ससम्भ्रमम् अवलोक्य लघुपतनको वृक्षम् आरूढः। हिरण्यको निकटवर्त्तिनं (थ) शरस्तम्बं प्रविष्टः। मन्थरकः सलिलाशयम् आश्रितः।

अथ लघुपतनको मृगं सम्यक् परिज्ञाय मन्थरकम् उवाच, —"एहि एहि सखे मन्थरक! मृगोऽयं तृषार्त्तोऽत्र समायातः सरसि प्रविष्टः, तस्य शब्दोऽयं, न मानुषसम्भवः" इति। तच्छ्रुत्वा मन्थरको देशकालोचितमाह,—"भो लघुपतनक! यथा अयं मृगो दृश्यते (त) प्रभूतम् उच्छ्वासम् उद्वहन् (थ) उद्भ्रान्तदृष्ट्या पृष्ठतोऽवलोकयति, तत्र तृषार्त्त एषः, नूनं लुब्धकत्रासितः; तज्ज्ञायताम् अस्य पृष्ठे लुब्धका आगच्छन्ति न वा? इति। उक्तञ्च,—भयत्रस्तो नरः श्वासं प्रभूतं कुरुते मुहुः।

दिशोऽवलोकयत्येव न स्वास्थ्यं व्रजति क्वचित्" ॥१७२॥

तच्छ्रुत्वा चित्राङ्ग आह,—"भो मन्थरक! ज्ञातं त्वया सम्यक् मे त्रासकारणम्, अहं लुब्धकशरप्रहारात् (द) उद्धारितः;

वदन्ति भाषन्ते, ते एव सुहृदः [सु शोभनं हृदयं येषां ते "सुहृद्दुर्हृदौ मित्रामित्रयोः" (५।४।१५० पा०) इति हृदयस्य हृद्भावः निपात्यते] मित्राणि, प्रोक्ताः कथिताः, अन्ये तद्भिन्नाः पुनः, नामधारकाः सुहृद इति नाममात्रधारिणः, स्युः; न एते परमार्थतः सुहृद इति भावः ॥ १७१ ॥

(थ) शरस्तम्बं—शराच्छादितगुच्छम्।

(त) प्रभूतं—बहुधिकम्। उच्छ्वासं—निश्वासम्।

(थ) उद्भ्रान्तदृष्ट्या—चकितदर्शनेन।

भयत्रस्त इति।—भयेन त्रस्तो व्याप्तः, नरः मुहुः पुनः पुनः, प्रभूतम् अधिकं, श्वासं कुरुते दीर्घं निश्वसति इत्यर्थः, दिशः अवलोकयति समन्तात् निरीक्षते एव, तथा क्वचित् कुत्रापि, स्वास्थ्यं न व्रजति नाधिगच्छति ॥ १७२ ॥

(द) उद्धारितः,—निष्कीर्णः।

छच्छेण अत्र समायातः । मम यूथं तैः लुब्धकैः व्यापादितं भविष्यति ; तत् शरणागतस्य मे दर्शय किञ्चित् अगम्यं स्थानं लुब्धकानाम्" । तदाकर्ण्य मन्थरक आह,—"भोः चित्राङ्ग ! शृणुतां नीतिशास्त्रं,—

द्वावुपायावित्र प्रोक्तौ विमुक्तौ शत्रुदर्शने ।
हस्तयोश्चालनादेको द्वितीयः पादवेगजः ॥ १७३ ॥

तद्गम्यतां शीघ्रं (ध) सघनं वनं, यावत् अत्रापि न आगच्छन्ति ते दुरात्मानो लुब्धकाः" । अत्रान्तरे लघुपतनकः सत्वरम् अभ्युपेत्य उवाच,—"भो मन्थरक ! गतास्ते लुब्धकाः स्वगृहोन्मुखाः प्रचुरमांसपिण्डधारिणः ; तत् चित्राङ्ग ! त्वं (न) विश्रब्धो वनात् बहिर्भव" ।

ततः ते चत्वारोऽपि मित्रभावमाश्रिताः तस्मिन् सरसि मध्याह्नसमये वृक्षच्छायायाः (प) अधस्तात् सुभाषित-गोष्ठीसुखम् अनुभवन्तः सुखेन कालं नयन्ति । अथवा युक्तमेत-दुच्यते,—

द्वाविति ।—दृङ् संसारे, शत्रुदर्शने, जातौ इति शेषः, वैरजातपराभवसम्भावनायां सत्यामपि इति भावः, विमुक्तौ परित्राणविषये, द्वौ उपायौ साधने, प्रोक्तौ कथितौ, एकः, उपाय इति शेषः, हस्तयोश्चालनात् करयोः व्यापारात्, हस्ताभ्यां प्रहारादिरूप इति भावः ; द्वितीयः, उपाय इत्यनुषङ्गः, पादवेगजः चरणवेगजनितः, दूरतः पलायनरूप इति भावः ॥ १७३ ॥

(ध) सघनं—सान्द्रं, निबिडमिति भावः ।

(न) विश्रब्धः,—विश्रम्भः, निःशङ्क इति यावत् । बहिरिति ।—["अन्यारा—" (२।३।२९वा०) इति सूत्रे "अपपरिबहिरिति सप्तमीविधानात् आपञ्चात् बहिर्योगे पञ्चमी" इति वार्त्तिकारवचनात् बहिःशब्दयोगे पञ्चमी] ।

(प) अधस्तात्—तलदेशे । सुभाषितेति ।—सुभाषिते—सुखाख्यापि, या गोष्ठी—सभा, तया सुखम्—आनन्दम् ।

सुभाषितरसास्वाद-बद्धरोमाञ्चकञ्चुकाः ।
विनाऽपि सङ्गमं स्त्रीणां सुधियः सुखमासते ॥ १७४ ॥
सुभाषितमयद्रव्य-सङ्ग्रहं न करोति यः ।
स तु प्रस्तावयज्ञेषु कां प्रदास्यति दक्षिणाम् ? ॥ १७५ ॥

तथा च,—सकृदुक्तं न गृह्णाति स्वयं वा न करोति यः ।
यस्य सम्पुटिका नास्ति कुतस्तस्य सुभाषितम् ? ॥ १७६ ॥

अथ एकस्मिन्नहनि गोष्ठीसमये चित्राङ्गो न आयातः ; ततः ते व्याकुलीभूताः परस्परं जल्पितुम् आरब्धाः,—"अहो ! किमद्य सुहृद्वर्ग समायातः ? किं सिंहादिभिः क्वापि व्यापादितः ? उत लुब्धकैः ? अथवा अनले प्रपतितः ? (फ) गर्त्तविषमे वा नवतृणलोलुप्यादिति ? अथवा साधु इदमुच्यते,—

सुभाषितेति ।—सुधियः विद्वांसः, सुभाषितस्य मधुरालापस्य, रसास्वादेन बद्धः जनितः, रोमाञ्चः लोमहर्षणमेव, कञ्चुकः वारणाः येषां तादृशाः सन्तः, स्त्रीणां सङ्गमं साहचर्यं, विनाऽपि सुखम् आसते अवतिष्ठन्ते ; सुधियां स्त्रीसङ्गादपि मित्रसङ्गः नितरां प्रीतिप्रदः इति तात्पर्यम् ॥ १७४ ॥

सुभाषितेति ।—यः सुभाषितमयानां सूक्तिरूपाणां, द्रव्याणां धनानां, सङ्ग्रहं न करोति, स तु प्रस्तावयज्ञेषु प्रस्तावाः परस्परालापाः एव, यज्ञाः तेषु, वा दक्षिणां प्रदास्यति ? कथं सभ्यान् तोषयिष्यतीत्यर्थः ; सभ्यसन्तोषसम्पादनार्थं सुभाषितस्यैव आवश्यकत्वात् इति भावः ॥ १७५ ॥

सकृदिति ।—यः सकृत् एकवारम्, उक्तं भाषितं, न गृह्णाति वाक्यप्रयोगमात्रेणैव तदर्थं बोद्धुं न शक्नोति इत्यर्थः, स्वयं वा न करोति वक्तुं न शक्नोतीति भावः ; यस्य च सम्पुटिका आधारविशेषः, सुभाषितमयद्रव्यं सङ्गृह्य तदुच्चारणार्थमिति भावः ; सहाक्य-सङ्ग्रह इति निष्कर्षः , यद्वा,—सम्पुटिका आवरणभेदः, अवधानमिति भावः, नास्ति , यद्वा,—यस्य सम्पुटिका वचनावरणं, नास्ति, निरन्तरमेव यः प्रसङ्गरहितमपि वक्तीति भावः ; तस्य सुभाषितं कुतः ? स सुभाषिते नाधिकारीति भावः ; यः भावज्ञः, यस्य स्वयं विदग्धः, यस्य च विविधसूक्तिसङ्ग्रहोऽस्ति, स एव सभाभूषणं, नान्य इति तात्पर्यम् ॥ १७६ ॥

(फ) गर्त्तविषमे—गर्त्तवशात् उन्नतानते प्रदेशे इत्यर्थः । नवतृणेति ।—नवेषु—नूतनेषु, लोलुपीषु इति यावत्, हरिणेषु लौल्यात्—लोभावेशवशात् ।

स्वगृहोद्यानगतेऽपि स्निग्धे: पापं विशङ्क्यते मोहात् ।
किमु दृष्टबहूपायप्रतिभयकान्तारमध्यस्थे ?" ॥ १७७ ॥

अथ मन्थरको वायसमाह,—"भो लघुपतनक ! अहं हिरण्यकश्च तावत् द्वौ अपि अशक्तौ तस्य अन्वेषणं कर्त्तुं मन्दगतित्वात् ; तत् गत्वा त्वम् अरण्यं (ब) शोधय, यदि कुत्रचित् तं जीवन्तं पश्यसि" इति । तदाकर्ण्य लघुपतनको नातिदूरे यावत् गच्छति, तावत् (भ)पल्वलतीरे चित्राङ्गः(म)कूटपाशनियन्त्रितः तिष्ठति, इति दृष्ट्वा शोकव्याकुलितमनाः तम् अवोचत्,—"भद्र ! किमिदम् ?" चित्राङ्गोऽपि वायसमवलोक्य विशेषेण दुःखितमना बभूव । अथवा युक्तमेतत्,—

अपि मन्दत्वमापन्नो नष्टो वाऽपीष्टदर्शनात् ।
प्रायेण प्राणिनां भूयो दुःखाऽऽवेगोऽधिको भवेत् ॥१७८॥

ततश्च वाक्यावसाने चित्राङ्गो लघुपतनकमाह,—"भो

स्वगृहोद्यानेति ।—स्निग्धे: सुहृदि:, मोहात् मायावशात्, स्वगृहस्य यत् उद्यानं गृहसन्निहितम् उपवनं, तव गतेऽपि, सुहृदि इति शेष:. पापम् अनिष्टं, विशङ्क्यते विशेषेण चिन्त्यते । दृष्टेति ।—दृष्टा बहव: अपाया: विपद: यत्र तादृश:, अत एव प्रतिभय: भयावह:, य: कान्तार: दुर्गमं वनं, वर्त्म वा, तस्य मध्यस्थे मध्यवर्त्तिनि सति, किमु ? वक्तव्यमिति शेष: ; तादृशे देशे प्रियजनानां स्थितिरतीव श्रद्धास्पदमिति भाव: । आर्य्या वृत्तम् ॥ १७७ ॥

(ब) शोधय—अन्वेषयेति भाव: ।

(भ) पल्वलतीरे—क्षुद्रसरोवरतटे, ("पल्वलल्वाल्यसर:" इत्यमर:) ।

(म) कूटेति ।—कूटपाशेन—कपटजालेन, नियन्त्रित:,—निबद्ध: ।

अपीति ।—इष्टस्य प्रियस्य, दर्शनात् मन्दत्वं लाघवम्, आपन्नोऽपि प्राप्तोऽपि, नष्टोऽपि नाशं गतोऽपि वा, प्राणिनां दुःखाऽऽवेग:, प्रायेण प्रायश:, बाहुल्येन वा, भूय: पुनरपि, अधिको भवेत् ; "खलजनस्य हि दुःखमयत: विहतद्वारमिवोपजायते" इत्यादिदर्शनात् मन्दीभूतं विलुप्तमपि वा तद्दुःखमभिनवीभूय खलजनदर्शनावसरे पुनरभिवर्द्धते इत्याशय: ॥ १७८ ॥

मित्र ! सञ्जातोऽयं तावन्मम मृत्युः ; तत् (य) युक्तं सम्पन्नं यत् भवता सह मे दर्शनं सञ्जातम् ।

उक्तञ्च,—प्राणात्यये समुत्पन्ने यदि स्यान्मित्रदर्शनम् ।

तत् द्वाभ्यां सुखदं पश्चाज्जीवतोऽपि मृतस्य च ॥ १७९ ॥

तत् क्षन्तव्यं यन्मया प्रणयात् सुभाषितगोष्ठीषु अभिहितम् । तथा हिरण्यकमन्यरकौ मम वाक्याहार्यौ ।

अज्ञानाज्ज्ञानतो वाऽपि दुरुक्तं यदुदाहृतम् ।

तत् क्षन्तव्यं युवाभ्यां मे कृत्वा प्रीतिपरं मनः" ॥१८०॥

तत् श्रुत्वा लघुपतनक आह,—"भद्र ! न भेतव्यम् अस्मद्विधैः मित्रैः विद्यमानैः ; यावत् अहं द्रुततरं हिरण्यकं गृहीत्वा आगच्छामि । अपरं, ये सत्पुरुषा भवन्ति, ते व्यसने न व्याकुलत्वमुपयान्ति । उक्तञ्च,—

(य) युक्तम्—उचितम् । सम्पन्नं—भूतम् ।

प्राणात्यये इति ।—प्राणानाम् अत्यये अपगमे, प्राणविनाशहेतौ इत्यर्थः, समुत्पन्ने समुपस्थिते, यदि मित्रदर्शनं स्यात्, तदा पश्चात् मित्रदर्शनानन्तरं, जीवतः मित्रसाहाय्येन प्राप्तजीवनस्य, मृतस्य च मृतस्य वा जनस्य, उभयोरित्यर्थः, द्वाभ्यां जीवनमरणाभ्यामपि, उभाभ्यामेव अवस्थाभ्यामित्यर्थः, जीवनं वा तिष्ठतु, मरणं वा भवत्, उभयोरेव अवस्थयोरिति यावत्, तत् मित्रदर्शनं, सुखदं सुखप्रदम् ; मित्रसौहृदेन जीवनरक्षायामपि भवितुमर्हति, मरणेऽपि वा मित्रकर्तव्यौर्ध्वदैहिकव्यापारेण मृतस्य सद्गतिलाभः भवितुमर्हति इति द्वयोरेव जीवन्मृतयोः चरमदर्शनलाभाभ्यां सुखसम्भवनेति भावः ; तेन हि अहमिदानीं जीविष्यामि मरिष्यामि वा एतदुभयमपि मे सममेव, अन्तिमसमये मित्रदर्शनस्यैव केवलं वाञ्छनीयत्वादित्याशयः ॥ १७९ ॥

अथेदानीमन्तिमसमयं निश्चित्य प्रार्थयते, अज्ञानादिति ।—अज्ञानात् ज्ञानतोऽपि वा, यत् दुरुक्तं दुर्वचः, उदाहृतम् उक्तं, मया सुभाषितगोष्ठीषु इति शेषः, युवाभ्यां" प्रीतिपरं प्रणयपूर्णं, मनः कृत्वा, सानुग्रहमिति भावः ; यद्वा,—मे मम, मनः प्रीतिपरम् इति कृत्वा प्रणयवशादेव मया तदभिहितमिति विचिन्त्येत्यर्थः ; मे मम, तत् दुरुक्तं, क्षन्तव्यं सोढव्यम् ; मत्समये मित्रदुरुक्तयां पूर्वोक्तनयोक्तं मे वचनजातं सपदेव विस्मरणीयं, सम्बन्धश्च जीवनावधिकत्वादित्याशयः ॥ १८० ॥

सम्पदि यस्य न हर्षो विपदि विषादो रणे न भीरुत्वम् ।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम्" ॥ १८१ ॥

एवमुक्त्वा लघुपतनकः चित्राङ्गम् आश्वास्य यत्र हिरण्यक-मन्थरकौ तिष्ठतस्तत्र गत्वा सर्वं चित्राङ्गपाशपतनं कथितवान् । हिरण्यकश्च (र) चित्राङ्गपाशमोक्षणं प्रति कृतनिश्चयं पृष्ठम् आरोप्य भूयोऽपि सत्वरं चित्राङ्गसमीपे गतः । सोऽपि मूषक-मवलोक्य किञ्चित् जीविताशया (ल) संश्लिष्ट आह,—

"आपन्नाशाय विबुधैः कर्त्तव्याः सुहृदोऽमलाः ।
न तरत्यापदं कश्चित् योऽत्र मित्रविवर्जितः" ॥ १८२ ॥

हिरण्यक आह,—"भद्र ! त्वं तावत् नीतिशास्त्रज्ञः (व) दक्षमतिः, तत् कथमत्र कूटपाशे पतितः ?" स आह,—

इदानीं सुहृदः चित्तस्थैर्यं सम्पादयितुं यतते, सम्पदीति ।—यस्य जनस्य, सम्पदि हर्षः अतिभूमिं गत आनन्दः, न, विपदि आपत्काले, विषादोऽत्यधिकं दुःखं, न, रणे युद्धे, भीरुत्वं भयशीलता, न, विद्यते इति शेषः, जननी माता, भुवनत्रयतिलकं लोक-त्रयललामभूतं, श्रेष्ठमित्यर्थः, तं तादृशं, सुतं पुत्रं, विरलम् अल्पं, जनयति प्रसूते ; एतल्लक्षणलाञ्छितः भुवि दुर्लभ एव, अतः सत्पुरुषेण भवता न विपदि व्याकुलीभूतेन भवितव्यमिति तु निष्कर्षः । आर्या वृत्तम् ॥ १८१ ॥

(र) चित्राङ्गेति ।—चित्राङ्गस्य—तदाख्यस्य मृगस्य, पाशात् मोचणं—मोचनं प्रति, मोचनार्थम् इत्यर्थः । कृतनिश्चयं—विदितसिद्धान्तं, कृतप्रतिज्ञ-मित्यर्थः ।

(ल) संश्लिष्टः,—समालिङ्गितः, युक्तः इत्यर्थः ।

इदानीं सुहृत्सङ्गस्य अवश्यकर्त्तव्यतामाह, आपदिति ।—विबुधैः विद्वद्भिः, आप-न्नाशाय विपदो मुक्तये, अमलाः निर्दोषाः, सज्जना इत्यर्थः, सुहृदः कर्त्तव्याः ; अत्र संसारे, यः कश्चित् मित्रविवर्जितः बन्धुविहीनः, स आपदं न तरति आपदो न मुच्यते इत्यर्थः ; आपत्परित्राणे बन्धुः एव एकः समर्थः इति भावः ; अतः प्रियसुहृत् मूषकः, नूनं मां मोचयिष्यतीति निगूढाशयः ॥ १८२ ॥

(व) दक्षमतिः,—निपुणबुद्धिः ।

"भोः ! न कालोऽयं (ग) विवादस्य ; तत्र यावत् स पापात्मा लुब्धकः समभ्येति, तावत् द्रुततरं (घ) कर्त्तव्यं इमं (ङ) मत्पादपाशम्"। तदाकर्ण्य विहस्य आह हिरण्यकः,—"किं मयि अपि समायाते लुब्धकात् बिभेषि ? ततः शास्त्रं प्रति महती मे (च) विरक्तिः सम्पन्ना, यत्, भवद्विधा अपि नीतिशास्त्रविद एनाम् अवस्थां प्राप्नुवन्ति, तेन त्वा पृच्छामि"। स आह,—"भद्र ! कर्मणा दुर्विरपि हन्यते।

उक्तञ्च,—कृतान्तपाशबद्धानां दैवापहतचेतसाम्।

बुद्धयः कुजगामिन्यो भवन्ति महतामपि ॥ १८३ ॥

विधात्रा रचिता या सा ललाटेऽक्षरमालिका।

न तां मार्जयितुं शक्ताः स्वबुद्ध्याऽप्यतिपण्डिताः" ॥१८४॥

(ग) विवादस्य—अनर्थागमस्य, तिरस्कारस्य इत्यर्थः ; अथवा विवादस्य—विविधवादस्य, शास्त्रप्रत्युक्तिरूपस्य विरुद्धस्य भाषणस्य इत्यर्थः।

(घ) कर्त्तव्य—क्षिप्रं।

(ङ) मदिति।—मम पादानां—चरणानां, पाशः तम्।

(च) विरक्तिः,—अनास्था। सम्पन्ना—जाता।

दैवप्रभावमाह, कृतान्तेति।—कृतान्तस्य यमस्य, ("कृतान्तो यमदैवयोः" इति विश्वः) पाशेन बन्धना नियन्त्रितानाम्, आसन्नमृत्यूनामित्यर्थः, दैवेन उपहतं विनष्टं, विकृतमिति यावत्, चेतो येषां, दुर्दैवविलुप्तमतीनाम् इत्यर्थः, महतामपि विदुषामपि, बुद्धयः कुजगामिन्यः वक्रगतयः, कुपथगा इत्यर्थः, भवन्ति ; नीतिविसर्जिताः धियोऽपि दौर्भाग्यात् कुण्ठिता भवन्तीति भावः ; दैवविलसितत्वात् नात्र मे दोषो दातव्य इति गूढाभिप्रायः ॥ १८३ ॥

इदानीं दैवस्य बलवत्तीयतामाह, विधात्रेति।—विधात्रा विधिना, ("विधाता विश्वसृग्विधिः" इत्यमरः) ललाटे भालदेशे, सा पौर्वदेहिककर्मफलेन जन्मसमकालमेव निर्दिष्टा इत्यर्थः, या अक्षरमालिका वर्णावली, रचिता लिखिता, या हि स्वप्राक्तन-कर्मवशादायाता इति भावः ; अतिपण्डिताः अपि स्वबुद्ध्या आत्मबुद्धिप्रभावेण इत्यर्थः, ताम् अक्षरमालिकां, मार्जयितुं शोधयितुं, खण्डयितुम् इत्यर्थः, न शक्ताः न समर्थाः, भवन्ति इति शेषः ; अप्रतिविधेया हि भवन्ति दैवगतय इति भावः ॥ १८४ ॥

एवं तयोः प्रवदतोः (क) सुहृद्व्यसनसन्तप्तहृदयो मन्थरकः शनैः शनैः तं प्रदेशम् आजगाम। तं दृष्ट्वा लघुपतनको हिरण्यकमाह,—"अहो! न शोभनम् (ख) आपतितम्"। हिरण्यकः आह,—"किं स लुब्धकः समायाति?" स आह,—"आस्तां तावत् (ग) लुब्धकवार्त्ता, एष मन्थरकः समागच्छति; तत् (घ) अनीतिः अनुष्ठिता अनेन, यतो वयमपि (ङ) अस्य कारणात् नूनं(च) व्यापादनं यास्यामः; यदि स पापात्मा लुब्धकः समागमिष्यति, तदहं तावत् खम् उत्पतिष्यामि, त्वं पुनर्बिलं प्रविश्य आत्मानं रक्षयिष्यसि, चित्राङ्गोऽपि वेगेन दिगन्तरं यास्यति, एष पुनर्जलचरः स्थले (छ) कथं भविष्यति? इति व्याकुलोऽस्मि"। अत्रान्तरे प्राप्तोऽयं मन्थरकः। हिरण्यक आह,—"भद्र! न युक्तम् अनुष्ठितं भवता, यदत्र समायातः; तद्भूयोऽपि द्रुततरं गम्यतां, यावत् असौ लुब्धको न समायाति"। मन्थरक आह,—"भद्र! किं करोमि? न शक्नोमि (ज) तत्रस्थो मित्रव्यसनाग्निदाहं सोढुं, तेनाहम् अत्र आगतः। अथवा साधु इदमुच्यते,—

(क) सुहृदिति।—बन्धुविपक्षवशेन दुःखितचित्तः।

(ख) आपतितम्—उपस्थितम्।

(ग) लुब्धकवार्त्ता—व्याधवृत्तान्तः, व्याधप्रसङ्ग इति यावत्।

(घ) अनीतिः,—दुर्नयः।

(ङ) अस्य—मन्थरकस्य।

(च) व्यापादनं—विनाशम्; मन्दगामित्वेन पलायनाक्षमम् अमुं विहाय प्रथमपाशवद्धानाम् अस्माकमपि गन्तुमशक्यत्वादिति भावः। खम्—आकाशम्।

(छ) कथं भविष्यति—किं करिष्यति इत्यर्थः, जलचरस्य खेचरगमनासामर्थ्यादिति भावः।

(ज) तत्रस्थः,—तस्मिन् स्थाने स्थितः। मित्रव्यसनेति।—बन्धुविपत्तिरूपः यो वह्निः तेन दाहं—तदुद्भूतं सन्तापमित्यर्थः।

दयितजनविप्रयोगाः वित्तवियोगाश्च केन सह्याः स्युः ?।
यदि सुमहौषधकल्पो वयस्यजनसङ्गमो न स्यात् ॥ १८५ ॥
वरं प्राणपरित्यागो न वियोगो भवादृशैः।
प्राणा जन्मान्तरे भूयो न भवन्ति भवद्विधाः" ॥ १८६ ॥

(भ) एवं तस्य प्रवदतः आकर्णपूरितशरासनो लुब्धकोऽपि उपागतः; तं दृष्ट्वा मूषकेण तस्य स्नायुपाशस्तत्क्षणात् खण्डितः। अत्रान्तरे चित्राङ्गः सत्वरं पृष्ठमवलोकयन् प्रधावितः, लघुपतनको वृक्षमारूढः, हिरण्यकश्च समीपवर्त्ति बिलं प्रविष्टः।

अथ असौ लुब्धको मृगगमनात् विषण्णवदनो व्यर्थश्रमः तं मन्थरकं मन्दं मन्दं स्थलमध्ये गच्छन्तं दृष्टवान्, अचिन्तयच्च,—"यद्यपि कुरङ्गो धात्रा अपहृतः, तथाऽपि अयं कूर्म आहारार्थं

इदानीं मित्रव्यसनस्य असह्यतावर्णनप्रसङ्गात् मित्रसङ्गमस्य सुखहेतुत्वमाह, दयितेति।—यदि सुमहौषधकल्पः ["ईषदसमाप्तौ कल्पप्" (५।३।६७ पा०) इति सूत्रेण कल्पप्प्रत्ययः] ईषत्सहौषधसदृशः, सकलव्यधाऽपहारक इति यावत, वयस्यजनसङ्गमः सुहृत्समागमः, न स्यात्, तदा दयितजनानां प्रियजनानां, विप्रयोगाः विरहाः, वित्तवियोगाश्च धननाशाश्च, केन जनेन, सह्याः सोढव्याः, स्युः ? मित्रसङ्गमेन प्रियजनानां धनानाञ्च विरहात् जायमानः शोको विलीयते लोकैः इति तु निष्कर्षः। आर्या वृत्तम् ॥ १८५ ॥

अथ अकृत्रिमबन्धोः अतीव दुर्लभतामाह, वरमिति।—प्राणपरित्यागो मरणं, वरं मनाक्प्रियः, [अत्र मनाक्प्रियार्थे वरशब्दस्य क्लीबत्वम्; "देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक्प्रिये" इत्यमरवचनात्] किन्तु भवादृशैः सुहृद्भिरिति भावः, वियोगः विच्छेदः, न, वरमित्यनुषङ्गः; प्राणाः जन्मान्तरे भूयः पुनः, भवन्ति, लभ्या इति शेषः, भवद्विधाः भवादृशाः, सुहृदः, न, लभ्या इति शेषः; भवादृशसज्जनबन्धुवियोगक्लेशो हि प्राणवियोगदुःखादपि सुदुःसह इति भावः; प्राणेभ्योऽपि बन्धुः गरीयानिति निष्कर्षः ॥ १८६ ॥

(भ) एवं तस्य प्रवदतः,—एवं कथयन्तं तं मन्थरकमनादृत्येत्यर्थः; तस्येति —["षष्ठी चानादरे" (२।३।३८ पा०) इति अनादरे षष्ठी]। आकर्णेति।—कर्णपर्यन्तम् आकृष्टकार्मुकः। तस्य—चित्राङ्गस्य, स्नायुपाशः,—स्नायुनिर्मितबन्धनरज्जुः।

सम्पादितः। तदद्य मम आमिषेण मे कुटुम्बस्य आहार-निर्वृत्तिः भविष्यति"। एवं विचिन्त्य तं दर्भैः संच्छाद्य धनुषि समारोप्य स्कन्धे कृत्वा गृहं प्रति प्रस्थितः। अत्रान्तरे तं नीय-मानम् अवलोक्य हिरण्यको दुःखाऽऽकुलः (अ) पर्य्यदेवयत्,—
"कष्टं भोः! कष्टमापतितम् !!—

एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य।
तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ॥ १८७ ॥

तावत्स्खलितं यावत् सुखं याति समे पथि।
स्खलिते च समुत्पन्ने विषमञ्च पदे पदे ॥ १८८ ॥

यत्नस्तं सरलश्चापि तच्चापत्सु न सीदति।
धनुर्मित्रं कलत्रञ्च दुर्लभं शुद्धवंशजम् ॥ १८९ ॥

(अ) पर्य्यदेवयत्—व्यलपत्, विलापं कृतवान् इत्यर्थः।

कष्टकारणं विवरीतुं विपदः रज्ज्वानुसरणप्रौढत्वमाह, एकस्येति।—अहम् अर्णवस्य समुद्रस्य, अक्षीणस्येति भावः, पारमिव परतीरमिव, एकस्य दुःखस्य यावत् अन्तम् अवसानं, न गच्छामि न प्राप्नोमि, तावत् मे मम, द्वितीयम् अपरं दुःखं, समुप-स्थितम; तथा हि छिद्रेषु रन्ध्रेषु प्राप्तेषु सत्सु, अनर्थाः विपदः, बहुलीभवन्ति विस्तारं गच्छन्ति; रज्ज्वानुसारिण्यः विपदः इति भावः। इन्द्रवज्रा वृत्तम ॥ १८७ ॥

उक्तमेवार्थं प्रकारान्तरेणाह, तावदिति।—यावत् समे समतले, पथि अस्खलि-तम् अपतितमित्यर्थः, अविचलितपदमिति यावत्, याति, तावत सुखम् अनायासेन, यातीति अनुषज्यते, तावत्कालं हि निरवच्छिन्नं सुखमुपभुञ्जते जना इति भावः; अथ किन्तु, स्खलिते पतने, पदच्युतौ इत्यर्थः, समुत्पन्ने समुपस्थिते सति, दुर्दैववशात् सकृदपि पादस्खलने जाते इति भावः, पदे पदे प्रतिपदं, प्रतिकार्य्यम् इत्यर्थः, विषमं दारुणं, विपत्सङ्कटसङ्कुलमित्यर्थः, उपतिष्ठते इति शेषः; सुखमये हि सुखधाराः, दुःखमये च दुःखपरम्पराः उपर्य्युपरि समापतितुमारभन्ते इति गूढाभिप्रायः ॥ १८८ ॥

सरलत्वापदत्वं सूचयितुं दुर्लभतामाह, यदिति।—यत् यत्नः, नित्यं, कलत्रं भार्य्या च, नम्रम् अवनमनयोग्यं, विनयान्वितञ्च, तथा सरलम् अवक्रं, ऋजुस्वभावञ्च, तथा शुद्धवंशजं सदंशसम्भूतं, सत्कुलोत्पन्नञ्च, तथा आपत्सु धनिनः निर्धनस्य च विपत्तिष्वपि च, न सीदति न अवसीदति न खिद्यते भवतीत्यर्थः, न

न मातरि न दारेषु न सोदर्ये न चात्मजे।
विश्रम्भस्तादृशः पुंसां यादृक् मित्रे निरन्तरे ॥ १९० ॥

यदि तावत् (ट) कृतान्तेन मे धननाशो विहितः, तत् (ठ) मार्गश्रान्तस्य मे विश्रामभूतं मित्रं कस्मात् अपहृतम् ? अपरमपि मित्रं परं मन्यरकसमं न स्यात्।

उक्तञ्च,—असम्पत्तौ परो लाभो गुह्यस्य कथनं तथा।
आपद्विमोक्षणञ्चैव मित्रस्यैतत् फलत्रयम् ॥ १९१ ॥

(ड) तदस्य पश्चान्नान्यः सुहृत् मे; तत् किं मम उपरि

अवसादं गच्छति च, न विक्लवतां लभते इत्यर्थः, दृढतया सहायतामेव करोतीति भावः, तत् तादृशं धनुरादित्रयं, दुर्लभं दुष्प्रापं, विरलमित्यर्थः; अयन्तु तथाविधो बन्धुरिति भावः ॥ १८९ ॥

अकृत्रिमनिरस्य सर्वेभ्यो गरीयस्त्वमाह, नेति।—निरन्तरे अभिन्ने, अभिन्नहृदये इति भावः, ["स्वभावजे" इति पाठान्तरम्] मित्रे पुंसां यादृक् विश्रम्भः विश्रामः, भवतीति शेषः, तादृशः विश्रम्भः, मातरि न, दारेषु स्त्रियां, न, सोदर्ये सहोदरे भ्रातरि, न, आत्मजे पुत्रे च, न, भवतीति शेषः; तथा च, अतिविश्वासस्थानेभ्यः प्रागुक्त-चतुष्टयेभ्योऽपि समधिकविश्वास्यत्वं मित्रमिति तात्पर्यम् ॥ १९० ॥

(ट) कृतान्तेन—दैवेन। धननाशः,—अर्थापहरणं, विहितः,—कृत इत्यर्थः।

(ठ) मार्गश्रान्तस्य—अध्वाक्रान्तस्य, धनाश्रयस्येति भावः। विश्रामभूतं—विश्राम-स्वरूपम्, आश्रय इति भावः। अपहृतमिति।—स्वर्णरौप्यादिरूपं धनं मे विधात्रा अपहृतम् अपहृतं, तेन न तादृशदुःखं, किन्तु सर्वथा निःस्वस्य मे सर्वदुःखापहरणं सहार्थि मित्रधनं यत् अपहृतं तत्तु मे अतीव असहमेव इति भावः।

मित्रस्वरूपस्य फलमाह, असम्पत्ताविति।—असम्पत्तौ निर्धनत्वे सति, परः महान्, लाभः, धनस्येति शेषः, तथा गुह्यस्य रहस्यस्य च, कथनम् आलापः, आपद्विमोक्षणं विपत्परित्राणञ्च, मित्रस्य एतदेव फलत्रयम् एतानि त्रीण्येव प्रयोजनानि ॥ १९१ ॥

(ड) तत्—तस्मात्, अस्य—मन्थरकस्य, ["षष्ठ्यतसर्थप्रत्ययेन" (२।३।३० पा०) इति अतिप्रत्ययान्तपञ्चम्यर्थयोगे षष्ठी], पश्चात्—अपरः, [अपरमध्यात् प्रथमार्थे "पश्चात्" (५।३।२२ पा०) इति अतिप्रत्ययः पश्चादेशश्च] मन्थरक-

अनवरतं (ढ) व्यसनशरैः वर्षति (ण) हन्त विधिः ? यत आदौ तावद्वित्तनाशः, ततः परिवारभंगः, ततो देशत्यागः, ततो मित्रवियोग इति । अथवा (त) स्वरूपमेतत् सर्वेषामेव जन्तूनां (थ) जीवितधर्मस्य ।

उक्तञ्च,—कायः सन्निहितापायः सम्पदः क्षणभङ्गुराः ।
समागमाः सापगमाः सर्वेषामेव देहिनाम् ॥ १९२ ॥

तथा च,—क्षते प्रहारा निपतन्त्यभीक्ष्णं
धनक्षये दीव्यति जाठराग्निः ।
आपत्सु वैराणि समुल्लसन्ति
छिद्रेष्वनर्था बहुलीभवन्ति ॥ १९३ ॥

व्यतिरिक्त इत्यर्थः, अन्यः,—इतरः, सुहृत—मित्रं, मे—मम, न, अस्तीति शेषः ; एतत्समकक्षः अपरः बन्धुः मया दुर्लभ इति भावः ।

(ढ) व्यसनशरैः,—व्यसनान्येव—विपद एव, शराः तैः । "व्यसनशरान्" इति साधुः ।

(ण) हन्त—खेदे । विधिः,—दैवं, ("विधिर्विधाने दैवे च" इत्यमरः) ।

(त) स्वरूपं—लक्षणम् इत्यर्थः ।

(थ) जीवितधर्मस्य—जीवितस्य—जीवनस्य, यो धर्मः,—व्यापारः तस्य, जीवनधारणरूपव्यापारस्य इत्यर्थः ।

सर्वेषामेव चधित्वं प्रतिपादयति, काय इति ।—सर्वेषामेव देहिनां प्राणिनां, ["सर्वेषामेव देहिनाम्" इत्यत्र "सर्वमुत्पादि भङ्गुरम्" इति पाठान्तरम्] कायः देहः, सन्निहितः आसन्नः, अपायो विध्वंसो यस्य तादृशः, अचिरविनश्वर इत्यर्थः, तथा सम्पदः धनानि, क्षणभङ्गुराः क्षणध्वंसिनः, ["क्षणभङ्गुराः" इत्यत्र "पदमापदाम्" इति पाठान्तरम्] समागमाः प्रियसंयोगाः, सापगमाः सविच्छेदाः, भवन्तीति शेषः ॥१९२॥

विपदां विपत्त्यन्तरजनकत्वमाह, क्षते इति ।—क्षते क्षतस्थाने एव, अभीक्ष्णं सततं, प्रहाराः ताडनानि, निपतन्ति सम्भवन्ति, जायन्ते इत्यर्थः ; धनक्षये सति, जठरसम्भूतोऽग्निः जाठराग्निः उदरानलः, क्षुधा इत्यर्थः, दीव्यति क्रीडति, वर्द्धते इत्यर्थः ; तथा आपत्सु वैराणि विद्वेषाः, समुल्लसन्ति सम्यक् स्फुरन्ति ; तथा हि, छिद्रेषु रन्ध्रेषु, अनर्थाः विपदः, बहुलीभवन्ति प्रसरन्ति ; विपदां विपद्दुगामित्वादिति भावः । उपजातिः छन्दः ॥ १९३ ॥

अहो ! साधु उक्तं केनापि,—

प्राप्ते भये परित्राणं प्रीतिविश्वासभाजनम् ।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ?" ॥ १९४ ॥

अथान्तरे च (द) आक्रन्दपरो चित्राङ्गलघुपतनको तत्र एव समायातो। अथ हिरण्यक आह,—"अहो ! किं वृथा (ध) प्रलपितेन ? तत् यावदेव मन्थरको दृष्टिगोचरात् न नीयते, तावदस्य (न) मोक्षोपायः चिन्त्यतामिति,—

व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत् ।
क्रन्दनं वर्द्धयत्येव तस्यान्तं नाधिगच्छति ॥ १९५ ॥
केवलं व्यसनस्योक्तं भेषजं नयपण्डितैः ।
तस्योच्छेदसमारम्भो विषादपरिवर्जनम् ॥ १९६ ॥

इदानीं निवक्ष सर्वसहायैर्थोऽप्याधिक्यमाह, प्राप्त इति।—भये प्राप्ते उपस्थिते सति, परित्राणं [परित्रायते अनेनेति करणे ल्युट्] रक्षणहेतुरित्यर्थः, तथा प्रीत्याः प्रणयस्य, विश्रम्भस्य विश्वासस्य च, भाजनं पात्रम्, अत एव रत्नं रत्नभूतं, सर्वोत्कृष्टमित्यर्थः, इदं मित्रमिति अक्षरद्वयं हे अक्षरे इत्यर्थः, केन महापुरुषेणेति भावः, सृष्टम् ? निर्मितम् ? ॥ १९४ ॥

(द) आक्रन्दपरो—रुदनो।

(ध) प्रलपितेन—प्रलापेन, अनर्थकेन वचसा इत्यर्थः।

(न) मोक्षोपायः,—परित्राणोपायः।

धैर्यौदार्यवतामेव विपदुद्धरणोपाय: इत्यादर्शेन श्लोकद्वयमाह, व्यसनमिति।—यः व्यसनं विपदं, प्राप्य लब्ध्वा, मोहात् अज्ञानात्, केवलं परिदेवयेत् विलपेदेव, तथा क्रन्दनं वर्द्धयति क्रन्दनपर एव भवति इत्यर्थः, स तस्य व्यसनस्य, अन्तम् अवसानं, न अधिगच्छति न प्राप्नोति, न विपदो मुच्यते इत्यर्थः; अतो व्यसनपरिजिहीर्षुणा विलापो न कर्त्तव्य इति भावः ॥ १९५ ॥

केवलमिति।—नयपण्डितैः नीतिकुशलैः, जनैरिति शेषः, तस्य व्यसनस्य, उच्छेदसमारम्भः विध्वंसकरणोद्योग इत्यर्थः, तथा विषादस्य अधैर्यस्य, विलापस्य वा, परिवर्जनं परित्यागः, व्यसनस्य विपदः, केवलम् एकम्, एकमेवेत्यर्थः, ("एकं केवलमात्रे च ॥" इत्यमरः;) भेषजम् औषधम्, उक्तं कथितम्; यस्मै हि

अन्वयः,—अतीतलाभस्य सुरक्षणार्थं
भविष्यलाभस्य च सङ्गमार्थम्।
आपत्प्रपन्नस्य च मोक्षणार्थं
यन्मन्त्र्यते ऽसौ परमो हि मन्त्रः" ॥१८७॥

तत् श्रुत्वा वायस आह,—"भोः! यदि एवं, तत् क्रियतां मद्वचः; एष चित्राङ्गः (प) अस्य मार्गं गत्वा किञ्चित् पल्वलम् आसाद्य तस्य तीरे निश्चेतनो भूत्वा पततु, अहमपि अस्य शिरसि समारुह्य मन्दैः चञ्चुप्रहारैः गिरं उल्लखयिष्यामि, येन असौ दुष्टलुब्धकोऽमुं मृतं मत्वा मम (फ) चञ्चुप्रहरणप्रत्ययेन मन्थरकं भूमौ चिक्षिप्य मृगार्थं परिधाविष्यति, अत्रान्तरे त्वया (ब) दर्भमयानि पाशानि (भ)खण्डनीयानि, येन असौ मन्थरको द्रुततरं पल्वलं प्रविशति"। चित्राङ्ग आह,—"भोः! भद्रोऽयं त्वया दृष्टो मन्त्रः, नूनं मन्थरकोऽयं मुक्तो मन्तव्य इति।

विपद्द्वारच्छेदारंभ इव; विषादपरीहारसङ्कल्पप्रतीकारचिन्तनमेव विपदं समूलघातं हन्तीति निष्कर्षः॥ १८६॥

योगक्षेममूलिकायाः मन्त्रणायाः श्रेष्ठतामाह, अतीतेति।—अतीतः भूतः, पूर्वोपार्जित इति भावः, लभ्यते इति लाभो धनम्, अतीतश्चासौ लाभश्चेति तस्य, पूर्वोपार्जितधनस्य इत्यर्थः, सुरक्षणार्थं सुष्ठु सञ्चयार्थं, भविष्यस्य भाविनः, अप्राप्तस्येत्यर्थः, लाभस्य सङ्गमार्थं सङ्ग्रहार्थश्च, प्राप्त्यर्थम् इत्यर्थः, आपदं प्रपन्नः प्राप्तः तस्य विपन्नस्य, मोक्षणार्थं त्राणार्थश्च, यत् मन्त्र्यते रहसि परस्परं स्थिरीक्रियते, असौ हि परमो महान्, मन्त्रः मन्त्रणा; यथा इदानीम् आपदो मुच्येमहि, तथा मन्त्र्यतामिति भावः। उपजातिः। वृत्तम्॥ १८७॥

(प) अस्य—लुब्धकस्य। पल्वलं—क्षुद्रं सरः। मन्दैः—स्वल्पैः। उल्लेखयिष्यामि—विदारयिष्यामि।

(फ) चञ्चुप्रहरणप्रत्ययेन—चञ्चुभ्यां यत् प्रहरणम्—आघातः, तेन यः प्रत्ययः,—मृत इति विश्वासः तेन।

(ब) दर्भमयानि—कुशमयानि। ["तत्प्रकृतवचने मयट्" (५।४।२१ पा०), इति मयट्]।

(भ) खण्डनीयानि—कर्तनीयानि।

उक्तञ्च,—सिद्धं वा यदि वाऽसिद्धं चित्तोत्साहो निवेदयेत्।
प्रथमं सर्वजन्तूनां तत् प्राज्ञो वेत्ति नेतरः ॥ १८८ ॥
तत् एवं क्रियताम्" इति ।

तथा अनुष्ठिते स लुब्धकः तथा एव मार्गासन्नपल्वलतीरस्थं चित्राङ्गं वायससनाथम् अपश्यत्। तं दृष्ट्वा हर्षितमना व्यचिन्तयत्,—"नूनं पाशबन्धनवेदनया वराकोऽयं मृगः (म) सावशेषजीवितः पाशं त्रोटयित्वा कथमपि एतदनान्तरं यावत् प्रविष्टः, तावन्मृतः ; वश्योऽयं मे कच्छपः (य) सुयन्त्रितत्वात्, तत् एनमपि तावत् गृह्णामि" इति ।

इत्यवधार्य्य कच्छपं भूतले प्रक्षिप्य मृगम्(र)उपाद्रवत्। एतस्मिन् अन्तरे क्षिरण्यकेन (ल) वज्रोपमदंष्ट्राप्रहरणेन तत् (व) दर्भवेष्टनं खण्डशः क्षतम्। मन्थरकोऽपि तृणमध्यात् निष्क्रम्य समीपवर्त्तिनं पल्वलं प्रविष्टः। (श) चित्राङ्गोऽपि अप्राप्तस्यापि तस्य

मन्थरकस्य मुक्तानिश्चयकरणे मनसः प्रामाण्यमाह, सिद्धमिति।—चित्तस्य मनसः, उत्साहः उद्यमः, एकायता इति यावत्, प्रथमं सिद्धासिद्धयोः प्रागित्यर्थः, सर्वेषां जन्तूनां सिद्धं सफलं वा, असिद्धं निष्फलं यदि वा, कार्य्यमिति शेषः, निवेदयेत् ज्ञापयेत् ; प्राज्ञो जनः, तत् वेत्ति बुध्यते, इतरोऽनभिज्ञ इत्यर्थः, न, वेत्तीति पूर्वानुषङ्गः ; तथा च कार्य्यस्य सिद्धासिद्धिविषये सतां मनःकरणमेव प्रमाणं, तस्य प्राज्ञैः आदावेव शक्यते बोद्धुम्, इतरैस्तु दुर्बोधमिति सरलार्थः। "सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः" इत्यस्यानुरूपोऽयं श्लोकः ॥ १८८ ॥

(म) सावशेषजीवितः,—किञ्चिदवशिष्टजीवनः, मृतप्राय इत्यर्थः। त्रोटयित्वा —छित्त्वा।

(य) सुयन्त्रितत्वात्—सुबद्धत्वात्।

(र) उपाद्रवत्—अधावत।

(ल) वज्रोपमेति।—वज्रोपमा—कुलिशसदृशा, या दंष्ट्रा—दन्तः, सा एव प्रहरणम्—अस्त्रं तेन ; सुकठिनदन्तरूपास्त्रेण।

(व) दर्भवेष्टनं—कुशबन्धनम्।

(श) चित्राङ्ग इत्यादि।—अप्राप्तस्यापि—अनुपस्थितस्य एव, अपिशब्दात्

तले उत्थाय वायसेन सह पलायितः। एतस्मिन्नन्तरे (घ) विलक्षो विषादपरो लुब्धको निहत्तो यावत् पश्यति, तावत् काक्कूपोऽपि गतः। ततश्च तत्र उपविश्य इमं श्लोकम् अपठत्,—

"प्राप्तो बन्धनमप्ययं गुरुमृगस्तावत् त्वया मे हृतः
सम्प्राप्तः कमठः स चापि नियतं नष्टस्त्वयाऽऽदेशतः।
क्षुत्क्षामोऽत्र वने भ्रमामि शिशुकैस्त्यक्तः समं भार्यया
यच्चान्यत्र कृतं कृतान्त! कुरु ते तच्चापि सह्यं मया"॥१९९॥

एवं बहुविधं विलप्य स्वगृहं गतः।

अथ तस्मिन् व्याधे दूरतरं गते, सर्वेऽपि ते काककूर्ममृग-मूषिकाः परमानन्दभाजः परस्परम् आलिङ्ग्य पुनर्जातमिव आत्मानं मन्यमानाः तटेव मरः सम्प्राप्य महासुखेन सुभाषित-कथागोष्ठीविनोदेन कालं नयन्ति स्म। एवं ज्ञात्वा (ङ) विवेकिना

एवार्थे। तस्य—लुब्धकस्य, अयम् तमसाहत्यर्थः, ["षष्ठी चानादरे"(२।३।३८ पा०) इति षष्ठी]। तले—भूतले, आयितः इति शेषः, चिबाङ्गाऽपीत्यनेनान्वयः। "तले" इत्यत्र "तूर्णं" "त्वरितम्" इत्यादि पाठकल्पनं साधु, भूतले आयित इत्याद्यर्थस्य कष्ट-कल्पनत्वात्।

(घ) विलक्षः,—विक्लितो लज्जितो वा। विषादपरः,—विषण्णः, दुःखित इत्यर्थः।

लुब्धकस्य दैवोपालम्भनं विहायोति, प्राप्त इति।—हे कृतान्त! दैव! अयं गुरु-मृगः महान् मृगः, बन्धनं प्राप्तोऽपि बद्धोऽपि, त्वया तावत् मे मम, ["षष्ठी चानादरे" (२।३।३८ पा०) इत्यनादरे षष्ठी] सामनाहत्य इत्यर्थः, हृतः गृहीतः; कमठः कच्छपः, सम्प्राप्तः, मयेति शेषः, स चापि स कच्छपोऽपि, नियतं निश्चितं, तव आदेशतः आज्ञया, नष्टः पलायितः; भार्यया पत्न्या, शिशुकैः बालकैः, पुत्रैरित्यर्थः, समं समकालं, त्यक्तः विरहितः, पुत्रकलत्रविमुक्त इत्यर्थः, अत्र वने क्षुत्क्षामः क्षुधया निपीडितः सन्, भ्रमामि पर्यटामि, यच्च अन्यत्, अनिष्टमिति शेषः, ते त्वयेत्यर्थः, [त्वया मया इत्यर्थे ते मे इत्यवगन्तव्यौ। तथा च वामन.,—"ते मे शब्दौ निपातेषु" (५म अधि० २अ० १० सू०) अव्ययार्थेषु उक्तौ,—"त्वया मया इत्यभिन्नार्थे ते मे शब्दौ निपातेषु द्रष्टव्यौ"] न कृतं, तत् कुरु, तच्चापि, सर्वमिति शेषः, मया सह्यं सोढव्यम्; जगति तव नियोगस्य अमोघपरिहारत्वात् इति भावः। शार्दूलविक्रीडितं वृत्तम्॥ १९९॥

(ङ) विवेकिना—विज्ञेन।

मित्रसङ्गृहः कार्यः। न च मित्रेण सह (ङ) व्याजेन वर्त्तितव्यमिति। उक्तञ्च यतः,—

यो मित्राणि करोत्यत्र न कौटिल्येन वर्त्तते।
तैः समं न पराभूतिं सम्प्राप्नोति कथञ्चन ॥ २०० ॥

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे मित्रसम्प्राप्तिर्नाम द्वितीयं तन्त्रम् ॥ २ ॥

अथ तृतीयं तन्त्रम्।

अथ इदमारभ्यते (क) काकोलूकीयं नाम तृतीयं तन्त्रम्; यस्य अयमाद्यः श्लोकः,—

"न विश्वसेत् पूर्वविरोधितस्य शत्रोश्च मित्रत्वमुपागतस्य।
दग्धां गुहां पश्य उलूकपूर्णां काकप्रणीतेन हुताशनेन" ॥ १ ॥

(ङ) व्याजेन—कपटेन।

अकपटमित्रतायां गुणमाह, य इति।—अत्र संसारे, यः मित्राणि करोति, तैः मित्रैः, समं सह, कौटिल्येन कापट्येन, न वर्त्तते च, सः कथञ्चन कदाचन, पराभूतिं पराभवम्, अतिबलवद्भ्योऽपि शत्रुभ्यः इति शेषः, न सम्प्राप्नोति; तथा च कापट्यरहिता मैत्री कर्त्तव्या, तया च परमैश्वर्यलाभः भवतीति निष्कर्षः ॥ २०० ॥

(क) काकोलूकीयं—काकश्च उलूकश्च तयोः समाहारः काकोलूकं, तस्य संबन्धी वर्णितो यस्मिन् तत्; तदधिकृत्य कृतमेतत् इति वा।

अग्नौ विश्वासस्थानार्थकरत्वमाह, नेति।—पूर्वविरोधितस्य पूर्वं विद्वेषमापादितस्य, शत्रोः रिपोः, पश्चात् मित्रत्वं बन्धुताम्, उपागतस्य प्राप्तस्य, अपीति शेषः, न च नैव, विश्वसेत्, अग्नौ मित्रभावमापन्नेऽपि विश्वासो नैव कर्त्तव्य इत्यर्थः. [श्वसितेगादादिकत्वात् "विश्वस्यात्" इति पदमेवात्र साधुतया प्रतिभाति]; तथा हि. उलूकपूर्णां पेचकाऽऽकीर्णां, गुहां काकप्रणीतेन काकेन वायसेन, मित्रतया प्रविष्टेनेति भावः; प्रणीतः दत्तः तेन, हुताशनेन अग्निना, दग्धां भस्मीकृतां, पश्य अवलोकय। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः। उपजातिः वृत्तम् ॥ १ ॥

तत् यथा अनुश्रूयते,—

अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्; तस्य समीपस्थः (ख) अनेकशाखासनाथः (ग) अतिघनतरपत्रच्छन्नो न्यग्रोधपादपोऽस्ति । तत्र च मेघवर्णो नाम वायसराजोऽनेककाकपरिवारः प्रतिवसति स्म । स तत्र (घ) विहितदुर्गरचनः सपरिजनः कालं नयति स्म । तथा अन्यः (ङ) अरिमर्दनो नाम उलूकराजोऽसङ्ख्योलूकपरिवारः (च) गिरिगुहादुर्गाऽऽश्रयः प्रतिवसति स्म । स च रात्रौ अभ्येत्य सदा एव तस्य न्यग्रोधस्य समन्तात् परिभ्रमति ।

अथ उलूकराजः (छ) पूर्वविरोधवशात् यं कञ्चिद्दायसं (ज) समासादयति, तं व्यापाद्य गच्छति। एवं नित्याभिगमनात् शनैः शनैः तत् न्यग्रोधपादपदुर्गं तेन समन्तात् निर्वायसं कृतम् । अथवा भवत्येवम् ।

उक्तञ्च,—य उपेक्षेत शत्रुं स्वं प्रसरन्तं यदृच्छया ।
रोगञ्चालस्यसंयुक्तः स शनैस्तेन हन्यते ॥ २ ॥

(ख) अनेकेति ।—बहुविटपमण्डितः इत्यर्थः ।

(ग) अतीति ।—अतिघनतरैः,—अतिनिबिडैरित्यर्थः, पत्रैः छन्नः,—आकीर्णः । न्यग्रोधपादपः,—वटतरुः ।

(घ) विहितेति ।—विहिता—कृता, दुर्गस्य—कोट्टस्य, शत्रुप्रवेशनिवारणार्थे दुर्गमस्थानविशेषस्येत्यर्थः, रचना—निर्माणं येन तथाभूतः ।

(ङ) अरिमर्दनः,—शत्रुनाशकः ।

(च) गिरीति ।—गिरेः,—पर्वतस्य गुहा—कन्दरः एव, दुर्गं—कोट्टं, शत्रुप्रवेशनिवारणार्थं दुर्गमस्थानविशेषः इत्यर्थः, आश्रयः यस्य तथोक्तः ।

(छ) पूर्वविरोधवशात्—पूर्ववैरहेतुना ।

(ज) समासादयति—प्राप्नोति । व्यापाद्य—विनाश्य ।

अत्रोपेक्षायां दोषमाह, य इति ।—यः आलस्यसंयुक्तः सन्, यदृच्छया स्वेच्छया, प्रसरन्तं इतिं गच्छन्तं, स्वं स्वकीयं, शत्रुं रिपुं, रोगञ्च व्याधिञ्च, उपेक्षेत ईक्षया न

तथा च,—जातमात्रं न यः शत्रुं व्याधिञ्च प्रशमं नयेत् ।
अतिपुष्टाङ्गयुक्तोऽपि स पश्चात् तेन हन्यते ॥ २ ॥

अथ अन्येद्युः स वायसराजो सर्वान् वायससचिवान् आहूय प्रोवाच,—"भोः ! (झ) उत्कटः तावत् अस्माकं शत्रुः (ञ) उद्यमसम्पन्नश्च, कालवशात् नित्यमेव निशाऽऽगमे समेत्य (ट) अस्मत्पक्षकदनं करोति ; तत् कथमस्य (ठ) प्रतिविधानम् ? वयं तावत् रात्रौ न पश्यामः, न च तस्य (ड) दिवा दुर्गं विजानीमः, येन गत्वा प्रहरामः ; तदत्र विषये किं युज्यते सन्धिविग्रहयानासनसंश्रयद्वैधीभावानाम् एकतमस्य क्रियमाणस्य ? तदिचार्य्य शीघ्रं कथयन्तु भवन्तः" ।

अथ ते प्रोचुः,—"युक्तम् अभिहितं देवेन, यदा एष प्रश्नः कृतः ।

अपृष्टेन तु वक्तव्यं सचिवेनात्र किञ्च न ।
पृष्टेन तु ऋतं पथ्यं वाच्यञ्च प्रियमप्रियम् ॥ ४ ॥

प्रतिकुर्य्यादिति भावः, सः शत्रुः क्रमेणेत्यर्थः, तेन शत्रुणा, रोगेण च, हन्यते विनाश्यते ; अतः एतयोः प्रथमतः एव प्रतीकारः श्रेयान् इति भावः ॥ २ ॥

पूर्वोक्तमेव भङ्ग्यन्तरेणाह, जातमात्रमिति ।—यः जातमात्रं जातमेव, [स्वरूपार्थे मात्रच्] उत्पत्तिमात्रेणैवेत्यर्थः, शत्रुं व्याधिञ्च प्रशमं शान्तिं, न नयेत् न प्रापयेत्, न प्रतिकुर्य्यात् इत्यर्थः, सः अतिपुष्टैः अतिप्रबलैः, अतिस्थूलैश्च, अङ्गैः अमात्यादिभिः राज्याङ्गैः, दलपटादिभिश्च युक्तोऽपि पश्चात् अनन्तरं, तेन शत्रुणा, व्याधिना च, हन्यते ; उपेक्षितौ व्याधिः शत्रुश्च विनाशनकारणं सर्वेषाम्, अतः समूलघातं हन्तव्यः इति भावः ॥ ३ ॥

(झ) उत्कटः,—दारुणः, प्रबल इत्यर्थः ।

(ञ) उद्यमसम्पन्नः,—समुत्साहान्वितः ।

(ट) अस्मत्पक्षकदनम्—अस्माकं पक्षीयप्राणिविनाशम् ।

(ठ) प्रतिविधानं—प्रतीकारः ।

(ड) दिवा—दिवसे, [अव्ययमेतत्] ।

राज्ञः सचिवेषु विश्वासाया औचित्यमाह, अपृष्टेनेति ।—अत्र संसारे, सचिवेन

यो न पृष्टो हितं ब्रूते परिणामे सुखावहम्।
सुमन्त्री प्रियवक्ता च केवलं स रिपुः स्मृतः॥ ५॥
तस्मादेकान्तमासाद्य कार्य्यो मन्त्रो महीपतेः।
येन तस्य वयं कुर्मो निर्णयं कारणं तथा" ॥ ६॥

अथ स मेघवर्णः (ढ) अन्वयागतोज्जीवि-सञ्जीवि-अनुजीवि-प्रजीवि-चिरञ्जीविनाम्नः पञ्च (ण)सचिवान् प्रत्येकं प्रष्टुमारब्धः। तत्र एतेषामादौ तावत् उज्जीविनं पृष्टवान्,—"भद्र! एवं (त) स्थिते किं मन्यते भवान्?" स आह,—"राजन्! बलवता

अमात्येन, अपृष्टेन अनिज्ञातेनेत्यर्थः, अननुयुक्तेन सता इत्यर्थः, किञ्च किमपि, न तु नैव वक्तव्यम; "नापृष्टः कस्यचित् ब्रूयात्" इति स्मरणात्; पृष्टेन तु, अमात्येन इति शेषः, ऋतं सत्यं, पथ्यं हितं, प्रियं प्रीतिकरम्, अप्रियञ्च अप्रियमपि, वाक्यं वक्तव्यम्; अत इदानीं कथनावसरोऽस्माकमिति भावः॥ ४॥

पृष्टस्यापि सचिवस्य हितानुपदेशे दोषमाह, य इति।—यः पृष्टः सन्, अपीति शेषः, परिणामे उत्तरकाले, सुखावहं सुखकरं, हितम्, अप्रियमपीति भावः, न ब्रूते न कथयति, नोपादिशति इत्यर्थः, स सुमन्त्री, प्रियवक्ता च प्रियवक्ता वा, यद्देव भवतु इति शेषः, केवलं रिपुः शत्रुः, स्मृतः; यद्वा,—यः सुमन्त्री पृष्टः सन्नपि परिणामे सुखावहं हितं न ब्रूते, केवलं प्रियवक्ता च प्रियवादी एव, न तु अप्रियसत्यस्य वक्ता इति भावः, सः रिपुः स्मृतः; पयोमुखविषकुम्भवत् स वर्जनीय एव इति भावः॥ ५॥

मन्त्रणायाः करणीयतामाह, तस्मादिति।—तस्मात् हितकथनौचित्यात्, एकान्तं निर्जनदेशम्, आसाद्य प्राप्य, गत्वा इत्यर्थः, महीपतेः राज्ञः, वायसराजस्येति भावः, मन्त्रः कार्य्यः, मन्त्रिभिरिति शेषः, येन मन्त्रेण, वयं तस्य राज्ञः, निर्णयं निर्द्धारणं, सन्धिविग्रहादीनामिति शेषः, तथा कारणं हेतुञ्च, कथं स दुष्टाशयमाचरति तस्य हेतुनिर्द्धारणञ्चेत्यर्थः; यद्वा,—कारणं—करणम्, अनुष्ठानमित्यर्थः, निर्णीतविषयस्येति भावः; ("कारणं करणे हेतुवधयोश्च नपुंसकम्" इति मेदिनी) कुर्मः विदधीम इत्यर्थः; प्रकाशेन मन्त्रभङ्गभयात् एकान्ते एव मन्त्रणविधिः कार्य्य इति भावः॥ ६॥

(ढ) अन्वयेति।—अन्वयागतान्—कुलक्रमागतान्, उज्जीव्यादिसंज्ञकान्।

(ण) सचिवान्—मन्त्रिणः।

(त) स्थिते—उपस्थिते। मन्यते—कर्त्तव्यत्वेनावधारयतीत्यर्थः।

सह (थ) विग्रहो न कार्य्यः ; यतः स बलवान् (द) कालप्रहर्त्ता च। उक्तञ्च यथा,—

बलीयसे प्रणमतां काले प्रहरतामपि।
सम्पदो नापगच्छन्ति प्रतीपमिव निम्नगाः ॥ ७ ॥

तथा च,—सन्त्याज्यो धार्मिकश्चार्य्यो भ्रातृसङ्घातवान् बली।
अनेकविजयी चैव सन्धेयः स रिपुर्भवेत् ॥ ८ ॥
सन्धिः कार्य्योऽप्यनार्य्येण विज्ञाय प्राणसंशयम्।
प्राणैः संरक्षितैः सर्वं यतो भवति रक्षितम् ॥ ९ ॥

(थ) विग्रहः,—युद्धमित्यर्थः, ("युद्धमाजीवनं……। ……कलहविग्रहौ" इत्यमरः)।

(द) कालप्रहर्त्ता—समयानुसारेणागत्य प्रहारकः, रन्ध्रप्रहर्त्ता इत्यर्थः।

दैवकालानुसारेण सन्धिविग्रहयोरुपकारितामाह, बलीयसे इति।—बलीयसे प्रबलाय, प्रणमतां बलवन्तं रिपुं प्रणत्या प्रसादयताम् इत्यर्थः, अपि किञ्च, काले समर्थोपस्थिते, प्रहरतां रन्ध्रं प्राप्य तमपि घ्नताम् इत्यर्थः, जनानामिति शेषः, सम्पदः विभवाः, निम्नगाः निम्नवाहिन्यः नद्यः, प्रतीपं प्रतिकूलमिव, ऊर्द्धदेशमिवेत्यर्थः, प्रतीपं प्रतिकूलं, अनुपक्षमित्यर्थः, न अपगच्छन्ति नापयान्तीत्यर्थः, अनुद्वहनगता भूत्वा न विनश्यन्तीति भावः ; निम्नगा यथा नीचगामित्वस्वभावात् जलमपि नीचैर्हं प्रवहन्ति, तद्वत् चञ्चला अपि सम्पदः अवसरज्ञत्वादिगुणसम्पन्नान् दुर्बलानपि स्वस्वामिनः परित्यज्य न प्रबलान् आश्रयन्ति इति निष्कर्षः ॥ ७ ॥

कः सन्धेयः इत्याह, सन्त्याज्य इति।—धार्मिकः धर्मपरः, आर्य्यः साधुः, भ्रातृसङ्घातवान् बहुभ्रातृपरिवृतः, बली प्रबलः, अनेकविजयी बहुसङ्ग्रामजेता च, रिपुः शत्रुः, सन्त्याज्यः परिहरणीयः ; न तेन विग्रहः कर्त्तव्यः, दुर्जेयत्वादिति भावः ; स सन्धेय एव सन्धिना शान्तीकरणीय एव इत्यर्थः, भवेत् ॥ ८ ॥

सन्दिग्धविजये कर्त्तव्यमाह, सन्धिरिति।—प्राणानां संशयं प्राणास्थिरन्ति न वा इत्येवं सन्देहं, विज्ञाय अनार्य्येण दुर्जनेनापि, सन्धिः कार्य्यः, जनैरिति शेषः ; यदि दुर्जनेन सह विग्रहे प्राणसंशयो बुध्यते, तदा तेनापि सन्धिं कुर्य्यात् इत्यर्थः ; यतः प्राणैः संरक्षितैः सद्भिः, सर्वं रक्षितं भवति ; "जीवन्नरो भद्रशतानि पश्यति" इत्याशयः ; लोके प्रकृतबन्धुत्वयोः जीवितपर्य्यन्तपर्य्यवसायित्वादिति भावः ॥ ९ ॥

(ध) येन अनेकयुद्धविजयी (न) सः, तेन विशेषात् (प) सन्दधनीयः । उक्तञ्च,—

अनेकयुद्धविजयी सन्धानं यस्य गच्छति ।
तत्प्रभावेण तस्याऽऽशु वशं गच्छन्त्यरातयः ॥ १० ॥
सन्धिमिच्छेत् समेनापि सन्दिग्धो विजयो युधि ।
न हि सांशयिकं कुर्यादित्युवाच बृहस्पतिः ॥ ११ ॥
सन्दिग्धो विजयो युद्धे जनानामिह युध्यताम् ।
उपायत्रितयादूर्द्धं तस्मात् युद्धं समाचरेत् ॥ १२ ॥

(ध) येन—येन हेतुना ।

(न) सः,—उलूकराजः ।

(प) सन्दधनीयः,—सन्धेयः, [सम्पूर्वकात् भ्वादिगणीयदधधातोरनीयर्] ।

बलवता सह सन्धानस्य गुणमाह. अनेकेति ।—अनेकयुद्धविजयी बहुसङ्ग्रामजेता, नृपतिः इति शेषः, यस्य सन्धानं सन्धिना मित्रभावमित्यर्थः, गच्छति प्राप्नोति, येन संहितः भवति इत्यर्थः, तस्य अरातयः शत्रवः, तस्य संहितस्य, अनेकयुद्धजयिनः इत्यर्थः, प्रभावेण प्रतापेन, आशु शीघ्रं, वशं गच्छन्ति वश्या भवन्ति ॥ १० ॥

पुनरपि विजयसंशये कार्य्यमुपादिशति, सन्धिमिति ।—यदि युधि युद्धे, विजयः सन्दिग्धः संशयापन्नः, भवेदिति शेषः, तदा समेन तुल्यबलेनापि, सन्धिम् इच्छेत्; सांशयिकं सन्देहसङ्कुलं, सन्दिग्धफलकमिति यावत्, किमपि कार्य्यमिति शेषः, न हि कुर्यात् इति बृहस्पतिः उवाच ॥ ११ ॥

बहुसा विग्रहस्याकर्त्तव्यतामाह, सन्दिग्ध इति ।—इह संसारे, युध्यतां सङ्ग्रामं कुर्वतां, [यद्यपि युधधातोः दैवादिकस्य आत्मनेपदित्वात् "युध्यताम्" इत्यत्र "युध्यमानानाम्" इत्येव साधु, तथाऽपि वामनमते—आत्मनः युधमिच्छतामित्यर्थे "सुप आत्मनः क्यच्" (३।१।८ पा०) इति क्यचि अतरि लते "युध्यताम्" इति पदं भवितुमर्हति, तथा च सूत्रं "युध्येदिति युधः क्यचि" (५ अधि० २ अ० २८ सू०)] जनानां युद्धे विजयः सन्दिग्धः सन्देहपूर्णः, तस्मात् उपायानां सामदानभेदानां, त्रितयात् ऊर्द्धं पञ्च दित्यर्थः, सामादिभिः कार्य्यञ्च असिद्धौ इति भावः, युद्धं समाचरेत् कुर्य्यात् ; तथा च युद्धे विजयसन्देहात् प्रथमतः सामाद्युपाय एव अनुष्ठेयः, विफलीभूतेषु च तेषु पश्चात् युद्धम् आश्रयणीयम् इति तात्पर्य्यम् ॥ १२ ॥

असन्दधानो मानात् यः समेनापि हतो भृशम् ।
आमकुम्भ इवान्येन करोत्यभयसङ्क्षयम् ॥ १३ ॥
समं शक्तिमता युद्धमशक्तस्य हि मृत्यवे ।
दृषत् कुम्भं यथा भित्त्वा तावत् तिष्ठति शक्तिमान् ॥१४॥

अन्वयः—भूमिर्मित्रं हिरण्यं वा विग्रहस्य फलत्रयम् ।
नास्त्येकमपि यद्येषां विग्रहं न समाचरेत् ॥ १५ ॥

पूर्वं समेनापि सन्धिः कार्यः इत्युक्तम्, इदानीं तदकरणे दोषमाह, असन्दधान इति ।—यः समबल इत्यर्थः, मानात् गर्वात्, ("गर्वोऽभिमानोऽहङ्कारी मानश्चित्तसमुन्नतिः" इत्यमरः) अहं समेन अनेन सह सन्धिं न करिष्यामीत्यभिमानादिति भावः, समेनापि समबलेनापि, का कथा प्रबलेन इत्यपिशब्दार्थः, असन्दधानः सन्धिम कुर्वन्, तिष्ठतीति शेषः ; अत्र स इति कर्तृपदमूहनीयं, सः अन्येन समबलेन अन्यत रिपुणेत्यर्थः, भृशम् अत्यर्थं, हतः ताडितः सन्, आमकुम्भ इव अपक्वघट इव, उभयसङ्क्षयम् आत्मनः रिपोश्च द्वयोरपि नाशं, करोति विदधाति ; समेन सह विग्रहे सत्यामघटयोरिव स्वस्य परस्य च उभयोरपि नाशस्यावश्यम्भावित्वात् समेनापि सन्धिः करणीयः, न तु विग्रह इति फलितार्थः ॥ १३ ॥

बलवद्विग्रहस्य दोषमाह, समेनेति ।—अशक्तस्य अक्षमस्य, दुर्बलस्य इत्यर्थः, नृपतेरिति शेषः, शक्तिमता प्रबलेन, रिपुणेति शेषः, समं सह, युद्धं सङ्ग्रामः, मृत्यवे हि निधनकारणमेव इत्यर्थः, भवतीति शेषः ; शक्तिमान् जनः, दृषत् पाषाणः, कुम्भं यथा मृन्मयं कलसमिवेति यावत्, भित्त्वा विदार्य, दुर्बलमिति शेषः, तिष्ठति तावत् स्थितिं करोत्येव ; ("यावत्तावच्च साकल्ये एवार्थे च समुच्चये" इति मेदिनी) पाषाणो यथा मृन्मयं कलसं विनाश्य स्वयमभग्न एव तिष्ठति, एवं शक्तिमान् रिपुरपि दुर्बलं प्रतिपक्षं विजित्य स्वयमक्षतशरीर एव वर्त्तते इति निष्कर्षः ॥ १४ ॥

लाभालाभौ विचार्य्य युद्धं कर्त्तव्यमित्याह, भूमिरिति ।—भूमिः राज्यं, मित्रं सुहृत्, हिरण्यं सुवर्णं वा, (वक्ष्यमाणलक्षणमेतत्) एतत् विग्रहस्य सङ्ग्रामस्य, फलत्रयम् एषां त्रयाणामन्यतम एव लाभ इत्यर्थः ; एषां त्रयाणां प्राप्त्यर्थमेव जिगीषवः युद्धे प्रवर्त्तन्ते इति भावः ; यदि एषां भूम्यादीनाम्, एकमपि नास्ति न लभ्यं भवतीत्यर्थः, तदा विग्रहं युद्धं, न समाचरेत् न कुर्यादित्यर्थः ; प्रयोजनमुद्दिश्यैव सर्वेषां सर्वत्र प्रवर्त्तनादिति भावः ॥ १५ ॥

खनन्नाखुविलं सिंहः पाषाणशकलाकुलम् ।
प्राप्नोति नखभङ्गं वा फलं वा मूषको भवेत् ॥ १६ ॥
तस्मान्न स्यात् फलं यत्र दृष्टं युद्धन्तु केवलम् ।
न तत् स्वयं समुत्पाद्यं कर्त्तव्यं न कथञ्चन ॥ १७ ॥
बलीयसा समाक्रान्तो वैतसीं वृत्तिमाचरेत् ।
वाञ्छन् अभ्रंलिहीं लक्ष्मीं न भोजङ्गीं कदाचन ॥ १८ ॥
कुर्वन् हि वैतसीं वृत्तिं प्राप्नोति महतीं श्रियम् ।
भुजङ्गवृत्तिमापन्नो वधमर्हति केवलम् ॥ १९ ॥

खनन्निति ।—सिंहः पाषाणशकलैः प्रस्तरखण्डैः, अतितच्छैरिति भावः; आकुलं पूर्णम्, आखोः मूषिकस्य, ("उन्दुरमूषिकोऽप्याखुः" इत्यमरः) विलं गर्त्तं, खनन् विदारयन् सन्, नखानां भङ्गं वा प्राप्नोति, वा अथवा, मूषकः मूषिकप्राप्यमात्रमित्यर्थः, फलं भवेत्, तस्मात् हेतोः; अतिसामान्यलाभाकाङ्क्षया, सामान्यस्यापि कदाचित् लाभविरहसम्भावनाया महान् प्रयत्नो न आश्रयणीय इति भावः, "अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम्" इति तात्पर्य्यम् ॥ १६ ॥

तस्मादिति ।—तस्मात् यत्र यस्मिन् कार्य्ये, फलं लाभः, भूम्यादिषु विषु कस्यापि वस्तुनः प्राप्तिः इत्यर्थः, ("फलं जातीफले शस्ये हेतुत्वे व्यष्टिलाभयोः" इति मेदिनी) न दृष्टं न खचितं, स्यात्, तु किन्तु, केवलं निरर्थकमित्यर्थः, युद्धं विरोधः, भवेदिति शेषः, तत् कार्य्यं, स्वयं न समुत्पाद्यं न उत्पादनीयं, स्वचेष्टया न पुनः तादृशं कार्य्यं विधेयमित्यर्थः, कथञ्चन न कर्त्तव्यञ्च अन्येन समुत्पादितमपि तादृशं कार्य्यं सर्वथा वर्जनीयमिति भावः ॥ १७ ॥

बलीयसेति ।—अभ्रंलिहीम् अत्यर्थं, लक्ष्मीं सम्पदं, वाञ्छन् अभिलषन्, जनः इति शेषः, बलीयसा प्रबलेन शत्रुणा, समाक्रान्तः अभिभूतः सन्, वैतसीं वृत्तिं वेतसलतावत् व्यवहारं, नम्रतामिति भावः, आचरेत् आश्रयेत्, कदाचन कदाऽपि, भोजङ्गीं सर्पसम्बन्धिनीं, शिरःसमुत्थापनरूपामिति यावत्, दुर्नम्रत्वरूपामिति भावः, वृत्तिमित्यनुषङ्गः, न, आचरेत् इति पूर्वानुषङ्गः; तथा हृते पलनम्रत्वाभावाद्विलादिति भावः ॥१८॥

कुर्वन्निति ।—वैतसीं वैतससम्बन्धिनीं, वृत्तिम् आचरणमिति भावः, कुर्वन् आश्रयन्, महतीं श्रियं विपुलां सम्पदं, प्राप्नोति हि, भुजङ्गवृत्तिम् अनम्रत्वव्यवहारम्, आपन्नस्तु केवलं वधं विनाशम्, अर्हति विनश्यतीत्यर्थः ॥ १९ ॥

कौर्मं सङ्कोचमास्थाय प्रहारानपि मर्षयेत् ।
काले काले च मतिमान् उत्तिष्ठेत् कृष्णसर्पवत् ॥ २० ॥
आगतं विग्रहं मत्वा सुसान्त्वा प्रशमं नयेत् ।
विजयस्य ह्यनित्यत्वात् रभसश्च समुत्सृजेत् ॥ २१ ॥
तथा च,—बलिना सह योद्धव्यमिति नास्ति निदर्शनम् ।
प्रतिवातं न हि घनः कदाचिदुपसर्पति" ॥ २२ ॥

एवम् (क) उज्जीवो सामसन्धं सन्धिकारं कृतवान् ।

कौर्मेति । —मतिमान् बुद्धिमान् जनः, कूर्मस्यायं कौर्मः तं कौर्मं कूर्मसम्बन्धिनं, सङ्कोचम् आकुञ्चनभावं, प्रतिप्रहारचेष्टां विसृज्य करपादायङ्गसङ्कोचनरूपमिति भावः, आस्थाय अवलम्ब्य, प्रहारानपि मर्षयेत् सहेत ; तथा काले काले सुसमयं प्राप्येति भावः, कृष्णसर्पवत् कालभुजङ्ग इव, उत्तिष्ठेत् अवसरं दर्शयेदिति भावः ; तथा च बलवता सह विरोधे कदाचित् कूर्मवृत्तिः कदाचिच्च भुजङ्गवृत्तिः आश्रयणीया इत्यभिप्रायः । ["उत्तिष्ठेत्" इत्यत्र "उदोऽनूर्ध्वकर्मणि" (१।३।२४ पा०) इति सूत्रेण अनूर्ध्वतायामात्मनेपदविधानार्थकत्वाभावप्रतीतेः नात्मनेपदमिति विभाव्यम्] ॥ २० ॥

आगतमिति ।—विग्रहं युद्धम्, आगतम् उपस्थितं, मत्वा सुसान्त्वा ["सुसामादिषु च" (८।३।९८ पा०) इत्यत्र उदाहरणद्वारा बहुव्रीहावेव षत्वदर्शनात् अत्र न मूर्धन्यषकारः] श्लोभनेन सान्त्वेन, सामप्रयोगेणेत्यर्थः, प्रशमं प्रकृष्टा शान्तिं, नयेत् प्रापयेत् ; विजयस्य अनित्यत्वात् कादाचित्कत्वादिति भावः, रभसं वेगञ्च, युद्धादुपायान्तरमित्यर्थः, समुत्सृजेत् हि त्यजेदेव, बुद्धिमान् जन इति शेषः ; तत्र च पराजयस्यापि सम्भवादिति भावः ॥ २१ ॥

बलिनेति । —बलिना बलवता, सह योद्धव्यम् इति अत्र निदर्शनं दृष्टान्तः, न अस्ति न विद्यते, अन्वयेन इति शेषः । यद्यपि अन्वयदृष्टान्तस्यात्र न सुलभः, तथापि व्यतिरेकदृष्टान्तस्य यत्रैवं तत्रैवमित्याद्याकारकस्य सर्वत्र सुलभतया वैधर्म्येण तमेवोत्थापयति, प्रतिवातमित्यादिना ।—हि तथा हि, घनः मेघः, प्रतिवातं वातस्य प्रतिकूलेनेति भावः, कदाचित् न उपसर्पति न उद्गच्छति, वातस्य प्रबलत्वादिति भावः ॥ २२ ॥

(क) उज्जीवो—तदाख्यमन्त्री । सामसन्धं—साम्नः सन्धम् । सन्धिकारं—सन्धिकरणोपयोगिनमित्यर्थः । कृतवान्—रचितवान्, वर्णयामासेत्यर्थः ।

अथ तत् श्रुत्वा सञ्जीविनम् आह,—"भद्र ! तव अभिप्रायमपि श्रोतुम् इच्छामि"। स आह,—"देव ! (ब) न मम एतत् प्रतिभाति, यत् शत्रुणा सह सन्धिः क्रियते। उक्तञ्च यतः,—

शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ २३ ॥

अपरञ्च, स क्रूरोऽत्यन्तलुब्धो धर्मरहितः; तत् त्वया विश्वेषात् न मन्तव्यः। उक्तञ्च यतः,—

सत्यधर्मविहीनेन न सन्दध्यात् कथञ्चन ।
सुसन्धितोऽप्यसाधुत्वादचिरात् याति विक्रियाम् ॥ २४ ॥

तस्मात् तेन सह योद्धव्यमिति मे मतिः। उक्तञ्च यतः,—

क्रूरो लुब्धोऽनृतोऽसत्यः प्रमादी भीरुरस्थिरः ।
मूढो युद्धावमन्ता च सुखोच्छेद्यो भवेद्रिपुः ॥ २५ ॥

(ब) एतत्—साम इत्यर्थः, न प्रतिभाति—न रोचते इति भावः।

शत्रुणेति।—सुश्लिष्टेनापि सुघटितेनापि, सन्धिना षड्गुणान्तर्गतसन्ध्याख्यगुणेनेत्यर्थः, शत्रुणा सह न हि नैव, सन्दध्यात् सन्धिलक्षणं कुर्यादित्यर्थः, जलः इति शेषः, पूर्ववैरप्रतिविधानाऽऽशङ्कया इति भावः; पानीयं जलं, सुतप्तम् अत्युष्णमपि, शैत्यगुणत्यागेन उष्णगुणमाश्रितमपीति भावः, पावकम् अग्निं, शमयत्येव निर्वापयत्येव; सहजवैरित्वादिति भावः; पानीयं पावकस्य शत्रुः, तत्तु पावकेन नितरामनुप्रवेशेन उष्णीकृतमपि समर्थं प्राप्य यथा तमेवाग्निं नाशयति, तथा कृतसन्धिं पूर्वशत्रुरपीति तात्पर्यम् ॥ २३ ॥

सत्येति।—सत्यधर्मविहीनेन सत्यपालनरूपधर्मभ्रष्टेन, कपटाऽऽचरणपरेण इत्यर्थः, जनेन सह इति शेषः, कथञ्चन न सन्दध्यात् न सन्धिं कुर्यात; सुसन्धितोऽपि सन्धिना सुनियन्त्रितोऽपि, ["सुसन्धितः" इत्यत्र तारकादित्वादितच्।] विक्रियापदेन अन्यत्र तु षष्ठ्याः तस्मिन् इति केचित] असाधुत्वात् दुष्टत्वात्, सत्यधर्मविहीनत्वादित्यर्थः, अचिरात् शीघ्रं, विक्रियां विकारम्, अन्यथाभावमित्यर्थः, याति गच्छति, सन्धिं विघटयतीत्यर्थः ॥ २४ ॥

क्रूर इति।—क्रूरः निष्ठुरः, लुब्धः लोभपरः, अनृतः चिरायितकर्मा, असत्यः

अपरं, तेन पराभूता वयम् ; तत् यदि (भ) सन्धानकीर्त्तनं करिष्यामः, स भूयोऽत्यन्तं कोपं करिष्यति। उक्तञ्च,—

चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया।
खेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति ? ॥ २६ ॥
सामवादाः सकोपस्य शत्रोः प्रत्युत दीपकाः।
प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः ॥ २७ ॥

यदेव एतत् वदति रिपुर्बलवान्, तदपि अकारणम्। यतः,—

मिथ्यावादी, प्रमादी अनवधानवान्, भीरुः भयशीलः, अधीरः अधीरः, मदः निर्बोधः, युद्धावमन्ता युद्धनिरुत्सुकः, रिपुः शत्रुः, सुखाच्छेद्यः सुखेन उन्मूलनीयः, भवेत् ; अत एव युद्धे निरुत्साहताप्रदर्शनं नोचितम् इति भावः ॥ २५ ॥

(भ) सन्धानकीर्त्तनं—सान्त्वप्रयोगम्।

चतुर्थोपायेति।—चतुर्थेन उपायेन युद्धेन इत्यर्थः, "सामदानभेददण्डाः इत्युपायचतुष्टयम्" इत्यनेन युद्धस्य चतुर्थत्वेन परिगणनादिति भावः, साध्ये प्रतिकार्य्ये, दमनीये इत्यर्थः, रिपौ शत्रौ, सान्त्वं सामप्रयोगः, ("साम सान्त्वमुभे समे" इत्यमरः) अपक्रिया अपकारः, अनिष्टकारणम् इत्यर्थः। तथा हि, कः प्राज्ञः, खेद्यं खेदक्रियया चिकित्स्यम्, तथोपचारेण प्रतिकार्य्यम् इत्यर्थः, ("खेदस्तु खेदने घर्मे" इति विश्वः) आमज्वरं नवज्वरम्, अपक्वज्वरमिति यावत्, ("आमो रोगे रोगभेदे आमोऽपक्वे तु वाच्यवत्" इति विश्वः) अम्भसा जलेन, परिषिञ्चति ? ["उपसर्गात् सुनोति—" (८।३।६५ पा०) इति षत्वम्] न कोऽपीत्यर्थः ; तादृशशत्रौ सान्त्ववादैः नवज्वरे जलसेक इव उद्दीपनकारः, अतो दण्ड्य एव इति भावः। तदुक्तज्वरितस्याम्भसेको यथा तद्वृद्धये, न तूपशमाय, तथा सकोपे रिपौ सान्त्वमुद्दीपनकरमिति वाक्यभेदेन बिम्बप्रतिबिम्बतार्चेपात् दृष्टान्तालङ्कारः,—"दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्" इति लक्षणात् ॥ २६ ॥

सामेति।—सकोपस्य क्रुद्धस्य, शत्रोः सामवादाः सान्त्ववाक्यानि, प्रतप्तस्य अत्युष्णस्य, सर्पिषः घृतस्य, सहसा हठात्, तोयबिन्दवः जलबिन्दवः इव, जलबिन्दुप्रक्षेप इवेत्यर्थः, प्रत्युत वैपरीत्येन, दीपकाः उद्दीपयितारः, न तु शान्तिकारा इत्यर्थः ; अतः कोपहेतुसामाचरणं तव न कर्त्तव्यम्, अपि तु स दण्ड्य एवेति भावः ॥ २७ ॥

सोत्साहशक्तिसम्पन्नो हन्याच्छत्रुं लघुर्गुरुम् ।
यथा कण्ठीरवो नागे सुखान्राज्यं प्रपद्यते ॥ २८ ॥
मायया शत्रवो वध्या अवध्याः स्युर्बलेन ये ।
यथा स्त्रीरूपमास्थाय हतो भीमेन कीचकः ॥ २९ ॥

तथा च,—मृत्योरिवोग्रदण्डस्य राज्ञो यान्ति वशं द्विषः ।
शष्पतुल्यं हि मन्यन्ते दयालुं रिपवो नृपम् ॥ ३० ॥

सोत्साहेति ।—नागे इस्तिनि, महाकाये इति भावः, वर्त्तमाने सत्यपीति शेषः, यथा कण्ठीरवः सिंहः, ("सिंहो मृगेन्द्रः पञ्चास्यो हर्य्यक्षः केसरी हरिः । कण्ठीरवो नखरिप्रर्मृगहृष्टिर्मृगाशनः ॥" इति कोषः) नागापेक्षया क्षुद्रकायोऽपि इति भावः, यथा सुखान्राज्यं प्रपद्यते सुखेन साम्राज्यं करोति ; उत्साहशक्तिसम्पन्नत्वात् इति भावः ; तथा लघुः क्षुद्रो जनः, सोत्साहा अध्यवसायसमन्विता, या शक्तिः तया सम्पन्नः संयुक्तः, उत्साहशक्तिसंयुक्तश्चेत् इत्यर्थः, गुरुं महान्तमपि, प्रबलमपीत्यर्थः, शत्रुं हन्यात् ॥ २८ ॥

माययेति ।—ये शत्रवः बलेन पराक्रमेण, अवध्याः स्युः, ते मायया छलेन, वध्याः हन्तव्याः ; यथा भीमेन स्त्रीरूपं नारीरूपं, मैरिन्ध्रीवेशमिति यावत्, आस्थाय अवलम्ब्य, कीचकः विराटसेनापतिः, द्रौपदीधर्षणोद्यत इति यावत्, हतः विनाशितः, तद्वदिति शेषः ; पुरा अज्ञातवासावस्थायां पाण्डवाः सह पाञ्चाल्या कृष्णवेशेन विराटनगरसन्निधिवसन्ति स्म । तदा अन्तःपुरवासिनीं सैरिन्ध्रीवेशां पाञ्चालीं कीचकी विराटसेनानीः कामयाञ्चक्रे । सा तु तदार्त्ता महानसाधिकृतं भीमाय समाचचक्षे । तदाकर्ण्य भीमः "अहमेव तव वेशेन सङ्केतस्थानं गत्वा तं निपातयिष्यामि" इत्युक्त्वा तां प्रियां समाश्वास्य कीचकाय सङ्केतं कर्त्तुमादिदेश । ततश्च रात्रौ कीचकं प्राप्य कृष्णवेशेन तत्रैव निहतवानिति भारतीया कथाऽत्रानुसन्धेया ॥ २९ ॥

मृत्योरिति ।—द्विषः शत्रवः, मृत्योरिव यमस्येव, उग्रदण्डस्य तीक्ष्णतेजसः इत्यर्थः, राज्ञो वशम् अधीनतां, यान्ति वशगाः भवन्ति इत्यर्थः । रिपवः शत्रवः, दयालुं कृपाशीलं, युद्धविमुखमिति भावः, [दयालुरिति "सृहि-गृहि पति-दयि-निद्रा तन्द्राश्रद्धाभ्य आलुच्" (३।२।१५८ पा०) इति आलुच्] नृपं शष्पतुल्यं तृणसमं, हेयमिति भावः, मन्यन्ते हि ; तथा च जानति प्रभुचक्रवालानां नृपाणां वैशसिका महाविद्यापि न परित्यक्ता इति भावः ॥ ३० ॥

प्रयाति भ्रमनं यस्य तेजस्तेजस्विनेजसा ।
वृथा जातेन किं तेन मातुर्यौवनहारिणा ? ॥ ३१ ॥
या लक्ष्मीर्नानुलिप्ताङ्गी वैरिस्त्रीरुधिरकुङ्कुमैः ।
कान्ताऽपि मनसः प्रीतिं न सा धत्ते मनस्विनाम् ॥३२॥
रिपुरक्तेन संसिक्ताऽरिस्त्रीनेत्राम्बुभिस्तथा ।
न भूमिर्यस्य भूपस्य का श्लाघा तस्य जीवने ?" ॥ ३३ ॥

एवं सञ्जीवी विगर्हमानं विज्ञापयामास ।

अथ तत् श्रुत्वा अनुजीविनम् अपृच्छत्,—"भद्र ! त्वमपि स्वाभिप्रायं निवेदय" । सोऽब्रवीत्,—"देव ! दुष्टः स बलाधिकः; (म) निर्मर्यादश्च, तत् तेन सह सन्धिविग्रहौ न युक्तौ, केवलं (य) यानम् अर्हं स्यात् ।

प्रयातीति ।—यस्य तेजः प्रतापः, तेजस्विनः प्रतापवतः, तेजसा प्रभावेण, भ्रमनं भ्रान्तिं, प्रयाति गच्छति, पराभवं प्राप्नोतीति भावः ; मातुः जनन्याः, यौवनहारिणा तारुण्यक्षयकारिणा, वृथा जातेन निरर्थकमुत्पन्नेन, तेजोहीनत्वेन सर्वस्यैव पराभवस्थानत्वादिति भावः ; तेन नरेण, किम ? न किमपि प्रयोजनमित्यर्थः ॥ ३१ ॥

यैति ।—या लक्ष्मीः वैरिणां शत्रूणां, स्त्रीणितान्येव कुङ्कुमानि काश्मीरजानि, रक्तरूपद्रव्यविशेषाः इति यावत्, तैः, नानुलिप्तं न सञ्चितम्, अङ्गं यस्याः तादृशी, भवतीति शेषः, सा लक्ष्मीः, कान्ताऽपि रमणीयाऽपि, सुदृश्याऽपि इत्यर्थः, मनस्विनां वीराणां, मनसः चित्तस्य, प्रीतिम् आनन्दं, न धत्ते नोत्पादयति ; युद्धप्रियत्वात् अस्निग्धतया स्वयङ्कृतस्त्रीसुखभोगानां मनस्विनां न कलाधारसलाभे प्रीतिरिति भावः ॥ ३२ ॥

रिपुरक्तेनेति ।—यस्य भूपस्य राज्ञः, भूमिः रिपूणां रक्तेन, तथा अरीणां रिपूणां, याः स्त्रियः तासां नेत्राम्बुभिः नयनजलैः, पतिपुत्रादिशोकजनितैरिति भावः, न संसिक्ता न सम्यक् आर्द्रा, न सिञ्चिता इत्यर्थः, तस्य जीवने का श्लाघा ? का प्रशंसा ? न काऽपि इत्यर्थः ॥ ३३ ॥

(म) निर्मर्यादः,—मर्यादालङ्घनकारी, अनिष्टाचार इत्यर्थः ।

(य) यानं—स्वराज्यस्य रक्षाविधानं कृत्वा रिपुविनाशार्थं गमनम् ; अरीभीत्युत्पादनाय युद्धोद्योग इति भावः । अर्हं—योग्यम् ।

उक्तञ्च,—बलोत्कटेन दुष्टेन मर्य्यादारहितेन च।
न सन्धिविग्रहौ नैव विना यानं प्रशस्यते ॥ २४ ॥
द्विधाऽऽकारं भवेत् यानं भयत्रस्तप्ररक्षणम्।
एकमन्यज्जिगीषोश्च यात्रालक्षणमुच्यते ॥ २५ ॥
कार्त्तिके वाऽथ चैत्रे वा विजिगीषोः प्रशस्यते।
यानमुत्कृष्टवीर्य्यस्य शत्रुदेशे न चान्यदा ॥ २६ ॥
अवस्कन्दप्रदानस्य सर्वे कालाः प्रकीर्त्तिताः।
व्यसने वर्त्तमानस्य शत्रोश्छिद्रान्वितस्य च ॥ २७ ॥
स्वस्थानं सुदृढं कृत्वा शूरैश्चामैर्महाबलैः।
परदेशं ततो गच्छेत् प्रणिधिस्थात्तमग्रतः ॥ २८ ॥

बलोत्कटेनेति।—बलोत्कटेन बलाधिकेन, दुष्टेन अनार्य्येण, मर्य्यादा शिष्टाचारः, तद्रहितेन, शत्रुणा सहेति शेषः, चकारः समुच्चये, सन्धिविग्रहौ नैव, कार्य्यौ इति शेषः, तत्र यानं विना यात्राव्यतिरेकेण, अन्यदिति शेषः, न प्रशस्यते न पूज्यते; यानमेव तत्र योग्यमिति भावः॥ २४ ॥

द्विधेति।—यानं द्विधाऽऽकारं द्विप्रकारं, भवेत्, एकं, तथोरिति शेषः, भयत्रस्तप्ररक्षणं भयत्रस्तानां रिपुभयार्त्तानां, प्रकर्षेण रक्षणम्; अन्यत् द्वितीयं, जिगीषोः [जिघांसोः सकाशात् उपलक्षयः] जयार्थिनः, यात्रालक्षणं युद्धार्थं शत्रुं प्रति गमनस्वरूपं, नो चेत् रिपुभीताः, अपि तु युद्धकामाः इत्येव प्रकटनमिति भावः; उच्यते कथ्यते॥ २५ ॥

कार्त्तिके इति।—उत्कृष्टवीर्य्यस्य अधिकतेजसः, विजिगीषोः विजयार्थिनः, राज्ञः इति शेषः, कार्त्तिके वा, अथवा चैत्रे शत्रुदेशे यानं यात्रा, प्रशस्यते, अन्यदा अन्यस्मिन् काले, न च नैव, प्रशस्यते इत्यनुषङ्गः॥ २६ ॥

अवस्कन्देति।—व्यसने स्त्रीमद्यादौ, वर्त्तमानस्य प्रसक्तस्य, तथा छिद्रान्वितस्य च प्रकृतिकोपादिकदोषवतस्तस्य इत्यर्थः, शत्रोः अवस्कन्दप्रदानस्य अवस्कन्दः आक्रमणं, तस्य यत् प्रदानं विधानं तस्य, सर्वे कालाः प्रकीर्त्तिताः कथिताः; तादृशशत्रुनिधनाय कालाकालविचारः न कार्य्यः इति भावः॥ २७ ॥

स्वस्थानमिति।—शूरैः वीरैः, महाबलैः आप्तैः विश्वस्तैः पुरुषैः, स्वस्थानं स्वं नगरं, सुदृढं शत्रुदुरासदमित्यर्थः, कृत्वा, सुसंरक्ष्येति हृदयं, राज्यरक्षाय तथाविधा-

अज्ञातविवधासार-तोयग्रस्थो व्रजेत् तु यः ।
परराष्ट्रं स ना भूयः स्वराष्ट्रमधिगच्छति ॥ ३९ ॥

तत् तं युक्तं कर्त्तुम् (र) अपसरणम् ।

अथ,—न विग्रहो न सन्धानं बलिना तेन पापिना ।
कार्य्यलाभमपेक्ष्याप-सरणं क्रियते बुधैः ॥ ४० ॥

उक्तञ्च यतः,—यदपसरति मेषः कारणं तत् प्रहर्त्तुं
मृगपतिरपि कोपात् सङ्कुचत्युत्पतिष्णुः ।
हृदयविहितवैरा गूढमन्योपचाराः
किमपि विगणयन्तो बुद्धिमन्तः सहन्ते ॥ ४१ ॥

ऽऽप्तपुरुषान् मंत्र्याद्य इति निष्कर्षः . ततः अनन्तरम्, अथतः पुनः, प्रणिधिभिः चारैः, अन्यां छिद्रज्ञानार्थे स्वप्रेरितैरिति भावः, व्याप्तम् आकीर्णं, परदेशं अन्यराज्यं, गच्छेत ; राज्ञः चक्षुःसदृशा एव चाराः, अतः तान् अथतः अतियोज्य अन्यराज्याभिगमने अन्यत्र पदे पद स्खलनमिति तात्त्विकम ॥ ३८ ॥

अज्ञातेति ।—अज्ञातानि अविदितानि, विवधः अध्वा, अन्यदेशगमनमार्ग इत्यर्थः, ("विवधो वीवधस्थापि पथ्योढारऽध्वभारयोः" इति विश्वः) आसारः सुहृद्बलम्, "आसारस्तु सुहृद्बलम् । प्रसारस्तृणकाष्ठादेः प्रवेशः ॥" इति वैजयन्ती) तोयग्रस्थं, ग्रस्थश्च तानि विवधासारतोयग्रस्थानि येन तादृशः, अन्यराज्ये गमनाय सुगममार्गे तथा स्वबलस्य अन्यबलस्य च महायस्त्राद्यपानीयादीनां प्राचुर्य्यादिकमनुसन्धाय इत्यर्थः, यस्तु राजा, परराष्ट्रं अन्यदेशं, व्रजेत गच्छेत, सः भूयः पुनः, स्वराष्ट्रं न अधिगच्छति न प्राप्नोति ; अन्यैः पराजीयते इति भावः ॥ ३९ ॥

(र) अपसरणं—यानम् ।

नेति ।—बलिना बलवता, पापिना सदाचारभ्रष्टेन, तेन दुष्टेन, विग्रहो युद्धं, न, सन्धानं सन्धिश्च, न, कर्त्तव्यमिति शेषः ; कार्य्यलाभं कार्य्यस्य विजयरूपस्य, लाभं प्राप्तिम्, अपेक्ष्य प्रतीक्ष्य, बुधैः विद्वद्भिः, अपसरणं यानं, क्रियते ॥ ४० ॥

यदिति ।—मेषः भेडकः, यत् अपसरति पश्चात् गच्छति, अपसर्पणाकाङ्क्षः इति शेषः, तत् अपसरणं, प्रहर्त्तुं कारणम् आक्रामकमेवास्य प्रहारनिमित्तमित्यर्थः ; भवतीति शेषः, कोपात् उत्पतिष्णुः उत्पतनेच्छुः, [उत्पूर्वकपतधातोः "अलंकञ्निराकञ्प्रजनोत्पतोन्मदरुचपपतपतुदुषमदचर इष्णुच्" (३।२।१३६ पा०) इतीष्णुचि रूपम] सङ्कुचति सङ्कोचं प्राप्नोति, अस्यापि उक्त्यु

अन्यच्च,—बलवन्तं रिपुं दृष्ट्वा देशत्यागं करोति यः ।
युधिष्ठिर इवाप्नोति पुनर्जीवन् स मेदिनीम् ॥ ४२ ॥
युध्यतेऽहङ्कृतिं कृत्वा दुर्बलो यो बलीयसा ।
स तस्य वाञ्छितं कुर्यादात्मनश्च कुलक्षयम् ॥ ४३ ॥
तत् बलवताऽभियुक्तस्य अपसरणसमयोऽयं न सन्धेर्विग्रहस्य च"।

एवम् अनुजीविमन्त्रोऽपसरणस्य ।

अथ तस्य वाक्यं समाकर्ण्य प्रजीविनमाह,—"भद्र ! त्वमपि आत्मनोऽभिप्रायं वद"। सोऽब्रवीत्,—"देव ! मम सन्धि-विग्रहयानानि त्रीणि अपि (ल) न प्रतिभान्ति, विशेषतश्च (व) आसनं प्रतिभाति। उक्तञ्च यतः,—

नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानाच्छुनाऽपि परिभूयते ॥ ४४ ॥

भूतस्य प्राणिन उपरि उत्पतनात् प्राक् स्वार्ङ्गं सङ्कोच्य तत्कालावच्छेदेन उत्पतनात् निवर्त्तते इत्यर्थः; तत् इयोरपि कार्य्यं समुचितम् इति भावः। तथा हि, बुद्धिमन्तो जनाः, हृदये विहितं वैरं यैः तथोक्ताः अपि, गूढः अपकाङ्क्षितः, मन्त्रः मन्त्रणमेव, उपचारः मनोवृत्तिविशेषः येषां तथाभूताः मन्त्रः, किमपि कारणविशेषं, विगणयन्तः विचारयन्तः, सहन्ते, अतृणाभ्युपपन्नमिति शेषः। मालिनी वृत्तम् ॥ ४१ ॥

बलवन्तमिति।—यः बलवन्तम् अधिकबीर्यं, रिपुं शत्रुं, दृष्ट्वा देशत्यागं करोति, स पुनर्जीवन् पुनरभ्युदयं गच्छन्, युधिष्ठिर इव मेदिनीं राज्यम्, आप्नोति; अतः न्यायतः प्रबले वैरिणि भाविराज्यस्थैर्यमिच्छुना देशत्यागोऽपि कर्त्तव्य इति भावः ॥४२॥

युध्यत इति।—यः दुर्बलः अहङ्कृतिं गर्वं, कृत्वा बलीयसा प्रबलेन सह, युध्यते, सः तस्य बलीयसः रिपोः, वाञ्छितम् अभिप्रेतं, स्वपराभवरूपम् इत्यर्थः, आत्मनः कुलक्षयस्य वंशनाशस्य च, कुर्य्यात् ॥ ४३ ॥

(ल) न प्रतिभान्ति—न रोचन्ते, मनसि न जायन्ते इति भावः।

(व) आसनं—नायं युद्धकालः किन्तु दुर्गादिः संस्कार्यः इति कालादि-प्रतीक्षया स्वस्थाने अवस्थितिः।

नक्र इति।—नक्रः कुम्भीरः, स्वस्थानम् आसाद्य स्वस्मिन् स्थाने स्थित्वेत्यर्थः, गजेन्द्रमपि गजराजमपि, स्वस्मात् बलवन्तमपि इति भावः, कर्षति; स एव गजेन्द्रादपि

अन्वय,—अभियुक्तो बलवता दुर्गे तिष्ठेत् प्रयत्नवान्।
तत्रस्थः सुहृदाह्वानं प्रकुर्वीताऽऽत्ममुक्तये ॥ ४५ ॥
यो रिपोरागमं श्रुत्वा भयसन्त्रस्तमानसः।
स्वस्थानं सन्त्यजेत् तत्र न स भूयो वसेन्नरः ॥ ४६ ॥
दंष्ट्राविरहितः सर्पो मदहीनो यथा गजः।
स्थानहीनस्तथा राजा गम्यः स्यात् सर्वजन्तुषु ॥ ४७ ॥
निजस्थानस्थितोऽप्येकः शतं योद्धुं सहेन्नरः।
शक्तानामपि शत्रूणां तस्मात् स्थानं न सन्त्यजेत् ॥ ४८ ॥

नक्तः एव, स्थानात् स्वस्थानात्, जलादित्यर्थः, प्रच्युतः भ्रष्टः चेत्, यदा कुक्कुरेणापि, क्षीणबलेनेति भावः, परिभूयते पराजीयते, बध्यते इत्यर्थः; "स्थानस्थितः कापुरुषोऽपि सिंहः" इति भावः ॥ ४४ ॥

अभियुक्त इति।—बलवता प्रबलेन, शत्रुणा इति शेषः, अभियुक्तः आक्रान्तः, जनः इति शेषः, प्रयत्नवान् सावहितः सन्, दुर्गे तिष्ठेत, तत्रस्थः दुर्गस्थितः, आत्ममुक्तये आत्मनस्त्राणाय, सुहृदां मित्राणाम्, आह्वानं प्रकुर्वीत, साहाय्यार्थं मन्त्रणार्थं वा इति भावः ॥ ४५ ॥

य इति।—यः रिपोः शत्रोः, आगमम् आगमनं, युद्धार्थमिति भावः, श्रुत्वा अरेर्मन्त्रसम्भं भवितव्यं मानसं यस्य तथाभूतः सन्, स्वस्थानं सन्त्यजेत्, स नरः, तत्र स्वस्थाने, भूयः पुनः, न वसेत् न वसतिं कर्तुं शक्नुयादित्यर्थः; अतः स्थानभ्रष्टेन भवितव्यमिति भावः ॥ ४६ ॥

दंष्ट्रेति।—दंष्ट्राविरहितः भग्नदन्तः सर्पः, मदहीनः मदस्रावशून्यः, गजश्च, यथा यतो यथा निर्वीर्यत्वात् सर्वैरेव अभिभवनीयो ज्ञातस्तथेत्यर्थः, तथा स्थानहीनः स्वस्थानात् भ्रष्टः, राजा सर्वेषु जन्तुषु प्राणिषु मध्ये, येन केनचिदिति शेषः, गम्यः सुधर्षणीयः, स्यात् ॥ ४७ ॥

निजेति।—एकोऽपि असहायोऽपि, नरः निजस्थानस्थितः स्वदुर्गावस्थितः सन्, शक्तानामपि शक्तिमतामपि, प्रबलानामित्यर्थः, शत्रूणां शतं योद्धुं शतेन वीरैः सह विग्रहं कर्तुमित्यर्थः, सहेत् क्षमेत, शक्नुयादित्यर्थः, [उभयपदिनः सहेः चौरादिकस्य वैकल्पिकतया णिचः अभावपक्षे रूपमिदम्]; तस्मात् स्थानं स्वाऽऽवासं, न सन्त्यजेत् ॥ ४८ ॥

तस्माद्दुर्गं दृढं कृत्वा सुभटाऽऽसारसंयुतम्।
प्राकारपरिखायुक्तं यन्त्रादिभिरलङ्कृतम् ॥ ४९ ॥
तिष्ठ मध्यगतो नित्यं युद्धाय कृतनिश्चयः।
जीवन् सम्प्राप्स्यसि क्षाऽऽन्तं मृतो वा स्वर्गमेष्यसि ॥५०॥

अन्वयः,—बलिनाऽपि न बध्यन्ते लघवोऽप्येकसंश्रयाः।
विपक्षेणापि मरुता यथैकस्थानवीरुधः ॥ ५१ ॥
महानप्येकजो वृक्षः बलवान् सुप्रतिष्ठितः।
प्रसह्य इव वातेन शक्यो धर्षयितुं यतः ॥ ५२ ॥
अथ ये संहता वृक्षाः सर्वतः सुप्रतिष्ठिताः।
न ते शीघ्रेण वातेन हन्यन्ते ह्येकसंश्रयात् ॥ ५३ ॥

व्याकरणम्,—तस्मादित्यादिद्वाभ्याम्।—तस्मात् युद्धाय कृतनिश्चयः, दृढसङ्कल्पः सन्, दुर्गं सुभटैः सुभटैर्वा, आसारैः सुदृढबलैश्च, ("आसारस्तु सुदृढबलम्" इति वैजयन्ती) संयुतं, प्राकारैः, प्राचीरैः, परिखाभिश्च युक्तं, यन्त्रादिभिः प्रहरणादिभिः, प्रहारसाधनैरित्यर्थः, अलङ्कृतं सज्जितम्, अत एव दृढं शत्रुदुर्भेद्यमिति भावः, कृत्वा मध्यगतः तन्मध्यवर्ती सन्, नित्यं सततं, तिष्ठ, एवं कृते जीवन् प्राणान् निष्ठन्, क्षान्तं पृथिव्याम्, मनया पृथिवीमित्यर्थः, सम्प्राप्स्यसि, मृतो वा मृतश्चेत्, युद्धे इति शेषः, स्वर्गम् एष्यसि प्राप्स्यसि; धर्मार्थयोः द्वयोरेव पुरुषार्थत्वात् युगपत् उभयप्राप्तेरसम्भवाच्च तटेऽवतराभ्युदय एव महोदयः, पुरुषार्थानाम्, स च इत्थं कृते भवितव्यमेव इति भावः ॥ ४९। ५० ॥

बलिनेति।—महता वायुना, प्रबलेनापीति भावः, एकस्य लघोरपि स्वस्थाने एव सजातीयाभिः बहुभिः सह अवस्थिताः, लताः यथा न बध्यन्ते न विनाश्यन्ते, तथा बलिनाऽपि प्रभूतबलिनाऽपि, विपक्षेण शत्रुणा, एकः संश्रयो यैषां तथोक्ताः एकस्थानस्थाः, स्वस्थाने एव निजवर्गैः सह अवस्थिताः इत्यर्थः, लघवोऽपि दुर्बला अपि, न बध्यन्ते इति पूर्वान्वयः ॥ ५१ ॥

महानिति।—महान् विशालः, बलवान् सुप्रतिष्ठितोऽपि सुदृढमूलोऽपि, एकजः एकाकी एव स्थित इत्यर्थः, वृक्षः यतः वातेन वायुना, प्रसह्य इव बलादिव, धर्षयितुं भङ्क्तुं, शक्यः समर्थः, तस्मात् एकाकी न स्थातव्यमिति भावः ॥ ५२ ॥

अथेति।—अथ पक्षान्तरे, ये वृक्षाः संहताः मिलिताः, अपरस्परैरिति शेषः, सर्वतः सकलात्, सुप्रतिष्ठिताः सुदृढमूलाः, ते शीघ्रेण वेगवताऽपि, प्रबलेनापि इत्यर्थः,

एवं मनुष्यमेकञ्च शौर्य्येणापि समन्वितम् ।
अक्षं हिंसन्तो मन्यन्ते हिंसन्ति च ततः परम्" ॥ ५४ ॥

एवं प्रजीविसन्धम् इदम् आसनमंशकम् ।

एतत् समाकर्ण्य चिरञ्जीविनं प्राह,—"भद्र! त्वमपि स्वाभिप्रायं वद"। सोऽब्रवीत्,—"देव! (अ) षाड्गुण्यमध्ये मम संशयः सम्यक् प्रतिभाति; तत् तस्य अनुष्ठानं कार्य्यम्।

उक्तञ्च,—असहायः समर्थोऽपि तेजस्वी किं करिष्यति?।
निवाते ज्वलितो वह्निः स्वयमेव प्रशाम्यति ॥ ५५ ॥
सङ्घातिः श्रेयसी पुंसां स्वपक्षे च विशेषतः।
तुषैरपि परिभ्रष्टा न प्ररोहन्ति तण्डुलाः ॥ ५६ ॥

वातेन एकसंशयात् एकवाक्यत्वात्, न इत्यन्तो हि नैव विनाश्यन्ते इत्यर्थः, अत एव स्वाऽऽवासं एव सर्वैः मिलित्वा अवस्थातव्यमिति भावः ॥ ५३ ॥

एवमिति।—हिंसन्तः अवयः, शौर्य्येण विक्रमेण, समन्वितमपि युक्तमपि, एकम् असहायं, मनुष्यम्, एवम् एकं हंसं वायुरिवेति भावः, अक्षम्, अभिभवितुमिति शेषः, मन्यन्ते, ततः परं तदनन्तरम्, अभिभवनीयज्ञानानन्तरमित्यर्थः, हिंसन्ति च; शौर्य्यवन्तमपि प्रभुम् एकाकिनम् अवलोक्य को नाम विरमेत्? इति भावः ॥ ५४ ॥

(अ) षाड्गुण्यमध्ये—सन्धिविग्रहयानाऽऽसनद्वैधीभावसमाश्रयमध्ये। संशयः,—दुर्बलस्य बलवद्भामर्कविग्रहिनृपसमाश्रयणम्।

संशयस्य प्रयोजनमाह, असहाय इति।—तेजस्वी शक्तिमान् जनः, समर्थोऽपि शौर्य्योऽपि, युद्धं कर्त्तुमिति शेषः, असहायः चेत् किं करिष्यति? न किमपि कर्त्तुं शक्नोतीत्यर्थः; तथा हि, निर्वाते वायुसञ्चारहीने, वह्निः वायुसहचरत्वात् सहायाभाववति स्थाने इति भावः, ज्वलितो वह्निः तेजोमयोऽपीति भावः, स्वयमेव आत्मनैव, प्रशाम्यति निर्वाणमेति; सहायाभावादिति भावः; वायोः सहायतामन्तरेण यथा तेजसा प्रदीप्तोऽपि वह्निः स्वयमुपशाम्यति, तथा तेजःप्रदीप्तः शक्तिसम्पन्नोऽपि पुमान् सहायहीनश्चेत् अनतामेव धत्ते इति निष्कर्षः। दृष्टान्तालङ्कारः ॥ ५५ ॥

तदेव भङ्ग्यन्तरेणाह, सङ्घातिरिति।—पुंसां पुरुषाणां, सङ्घातिः सम्मेलनं, सहायसङ्गतिः इत्यर्थः, बहुभिरेकावयवज्ञानम् इत्यर्थो वा, विशेषतः विशेषेण, [प्रज्ञाद्यादित्वात् ष्टतोवा, ततः तसिल्] स्वपक्षे श्रेयसी अतिशयेन श्रेयस्करीत्यर्थः, तथा हि, तण्डुलाः

तदत्रैव स्थितेन त्वया कश्चित् (ष) समर्थः समाश्रयणीयः, यो विपत्प्रतीकारं करोति। यदि पुनस्त्वं स्वस्थानं त्यक्त्वा अन्यत्र यास्यसि, तत् कोऽपि ते वाक्यादेषापि सहायत्वं न करिष्यति। उक्तञ्च यतः,—

वनानि दहतो वह्नेः सखा भवति मारुतः।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ? ॥ ५७ ॥

अथवा न एतत् (स) एकान्तं यत् बलिनमेकं समाश्रयेत्, लघूनामपि संश्रयो रक्षार्थ एव भवति। उक्तञ्च यतः,—

सङ्घातवान् यथा वेणुर्निविडो वेणुभिर्वृतः।
न शक्यः स समुच्छेत्तुं दुर्बलोऽपि तथा नृपः ॥ ५८ ॥

यदि पुनरुक्तमसंश्रयो भवति, तत् किमुच्यते ? उक्तञ्च,—

महाजनस्य सम्पर्कः कस्य नोन्नतिकारकः ?।
पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम् ॥ ५९ ॥

तुषैरपि तुषैरपि, परिभ्रष्टाः विच्युताः सन्तः, न प्ररोहन्ति नोत्पद्यन्ते, माकुरिता भवन्तीत्यर्थः, संहत्यभावादिति भावः ॥ ५६ ॥

(ष) समर्थः,—शक्तिमान्, शत्रुपराजयक्षम इत्यर्थः।

वनानीति।—मारुतः वायुः, वनानि दहतः भस्मीकुर्वतः, प्रबलस्येति भावः, वह्नेः सखा सहाय इत्यर्थः, भवति, स एव प्रबलवह्नेः सखा स मारुतः एवेत्यर्थः, दीपनाशाय प्रदीपनिर्वापणाय, वर्त्तिकां दहतः दीपस्य वह्नेः ध्वंसाय इति भावः, प्रभवतीति शेषः; तथा हि, कृशे क्षीणे जने, कस्य सौहृदं सद्भावः, अस्ति ? न कस्यापीत्यर्थः ॥ ५७ ॥

(स) एकान्तं—दृढं, सिद्धान्तितमित्यर्थः।

सङ्घातवानिति।—वेणुभिः वंशैः, वृतः वेष्टितः, सङ्घातवान् समूहालम्बनः, अत एव निबिडः घनः, सः प्रसिद्धः वेणुः यथा समुच्छेत्तुं विनाशयितुं, न शक्यः, तथा दुर्बलोऽपि, सबलाय इति शेषः, नृपः, न समुच्छेत्तुं शक्यः इति पूर्वानुषङ्गः; "स्वल्पानामपि बहूना संहतिः कार्यसाधिका" इति भावः ॥ ५८ ॥

महाजनस्येति।—महाजनस्य महतो जनस्य, सम्पर्कः सम्बन्धः इत्यर्थः, कस्य जनस्य, उन्नतिकारकः न ? अपि तु सर्वस्यैवेत्यर्थः; तथा हि, पद्मपत्रस्थितं तोयं जलं, मुक्ताफलस्य श्रियं कान्तिं, धत्ते धारयति; सङ्गत्या संसर्गादिति भावः ॥ ५९ ॥

तदेवं संशयं विना न कश्चित् प्रतीकारो भवति; तस्मात् संशयः कार्यः इति मेऽभिप्रायः" ।

एवं चिरञ्जीविनक्रः ।

अथ एवमभिहिते स मेघवर्णो राजा (ङ) चिरन्तनं प्रिय-सचिवं दीर्घायुषं सकलनीतिशास्त्रपारङ्गतं स्थिरजीविनामानं प्रणम्य प्रोवाच,—"तात ! यत् एते मया पृष्टाः सचिवाः तावत् (क) अत्र स्थितस्यापि तव, तत् परीक्षार्थं, येन त्वं सकलं श्रुत्वा यदुचितं, तन्मे समादिशसि, तत् यत् युक्तं भवति, तत् समादेक्ष्यम्" । सः आह,—"वत्स ! सर्वैरपि एतैः (ख) नीतिशास्त्राश्रयमुक्तं सचिवैः, तदुपयुज्यते (ग) स्वकालोचितं सर्वमेव; परमेष द्वैधीभावस्य कालः । उक्तञ्च,—

अविश्वासं सदा तिष्ठेत् सन्धिना विग्रहेण च ।
द्वैधीभावं समाश्रित्य नैव शत्रौ बलीयसि ॥ ६० ॥

(ङ) चिरन्तनं—चिरकालादागतं, कुलक्रमागतमित्यर्थः ।

(क) अत्र स्थितस्यापि तव—अत्र स्थाने स्थितं त्वामनादृत्येत्यर्थः, [अनादरे षष्ठी; अथवा सप्तम्यर्थविवक्षया षष्ठी, त्वयि अत्र स्थितेऽपि इत्यर्थः; तत्र "तत्परीक्षार्थम्" इति एकं पदम्; तेषां परीक्षार्थं भवानेव मध्यस्थो भविष्यतीति भावः] ।

(ख) नीतिशास्त्राश्रयं—नीतिशास्त्रानुसारिदं, वचनमिति शेषः ।

(ग) स्वकालोचितं—स्वसमयोचितं, स्वावस्थानुरूपमित्यर्थः । द्वैधीभावस्य—प्रबलारिभयमध्ये काकादिवदनुचिततया स्थितः "इदं राज्यमहञ्च तवैव" इति वाचा उभयत्र आत्मानं समर्पयन् अवस्थानस्य ।

अविश्वासमिति ।—बलीयसि प्रबले, शत्रौ सन्धिना मैत्रीस्थापनेन, विग्रहेण युद्धेन च, सदा अविश्वासं सन्दिग्धं यथा तथा, तिष्ठेत्, केनापि कुलीन सन्धिभङ्गभयात् युद्धे पराजयाशङ्कया च इति भावः; किन्तु द्वैधीभावं प्रबलारिभयमध्ये काकादिवदनुचितभावेनावस्थितः "राज्यमहञ्च तवैव" इति उभयत्र वाचा आत्मानं समर्पयन् दुर्गमाश्रित्य स्वाभ्युदयापेक्षया अवस्थानं, समाश्रित्य अवलम्ब्य, नैव अविश्वासं तिष्ठेत्, एकेन वैरिणा कदाचिदकाले अपरसाहाय्येन आत्मानं रक्षयामि इति निश्चित्य [निश्चिन्तोऽहमिति भावः ॥ ६० ॥

तत् शत्रुं विश्वास्य अविश्वस्तैर्लोभं दर्शयद्भिः सुखेन उच्छिद्यते रिपुः। उक्तञ्च,—

उच्छेद्यमपि विद्वांसो वर्द्धयन्त्यरिमेकदा।
गुडेन वर्द्धितः श्लेष्मा सुखं हत्वा निपात्यते ॥ ६१ ॥

तथा च,—स्त्रीणां शत्रोः कुमित्रस्य पण्यस्त्रीणां विशेषतः।
यो भवेदेकभावेन न स जीवति मानवः ॥ ६२ ॥

ज्ञात्वं दैवद्विजातीनामात्मनश्च गुरोस्तथा।
एकभावेन कर्त्तव्यं शेषं द्वैधं समाश्रितम् ॥ ६३ ॥

एको भावः सदा शस्तो यतीनां भावितात्मनाम्।
स्त्रीलुब्धानां न लोकानां विशेषेण महीभृताम ॥ ६४ ॥

उच्छेद्यमिति।—विद्वांसः पण्डिताः, उच्छेद्यमपि विनाश्योऽपि, अरिं रिपुम्, एकदा एकस्मिन् काले, कदाचिदित्यर्थः, वर्द्धयन्ति तस्य विश्वासोत्पादनाय अभ्युदयादिकमुपेक्षन्ते इत्यर्थः, तथा हि, गुडेन वर्द्धितः श्लिष्टं नीतः, श्लेष्मा हत्वा वर्द्धनेनैव, सुखम् अनायासेन, निपात्यते निहन्यते; यथा कश्चित् गुडेन श्लाघ्यः श्लेष्माणं वर्द्धयित्वा पश्चात् तं श्लेष्माणम् अनायासेन निपातयति, तद्वत् प्रथमं विश्वासमुत्पाद्य उपेक्ष्य च शत्रुं वर्द्धयन् पश्चात् अनवद्धितं तं सुखेन निपातयेदिति भावः ॥ ६१ ॥

स्त्रीणामिति।—य मानवः, स्त्रीणां, शत्रोः, कुमित्रस्य निन्दितबन्धोः, विशेषतश्च पण्यस्त्रीणां वेश्यानां सम्बन्धे, एकभावेन एकरूपमनोवृत्त्या उपलक्षयति, भवेत्, मनसा अन्यं वचसा च अन्यं भावं न दर्शयेदिति भावः, स मानवः न जीवति; स्त्र्यादिभिरेव स हन्यते, अत स्त्रीजोविश्वासे तत्र तादृशविश्वासः न कर्त्तव्य इति भावः ॥ ६२ ॥

ज्ञात्वामिति।—दैवद्विजातीनां दैवतब्राह्मणानाम्, आत्मनः स्वस्य, तथा गुरोः ज्ञात्वं ज्ञातव्यम्, एकभावेन वाङ्मात्मनैक्येनेति भावः, कर्त्तव्यं विधेयं, शेषम् अवशिष्टं, दैवादिज्ञात्वादन्यादित्यर्थः, ज्ञात्वमिति शेषः, द्वैधं द्विभावं, समाश्रितं प्राप्तं, द्विभावमेव यत्नात्मत्यर्थः; कर्त्तव्यमिति पूर्वानुषङ्गः; तदन्यथाऽनर्थपातसम्भवतीति भावः ॥६३॥

एक इति।—भावितात्मनां शुद्धस्वरूपाणां, ईश्वरासक्तचेतसामित्यर्थः, यतीनां योगिनां सम्बन्धे, सदा एको भावः अनुरागः, विश्वासः वा, शस्तः प्रशंसनीयः; स्त्रीषु लुब्धानां लोभपरायणानां, स्त्र्यासक्तानामित्यर्थः, लोकानां, विशेषेण महीभृतां राज्ञां, एको भावः शस्त इति पूर्वानुषङ्गः; तेषां तु द्वैधीभावः विधेयः इत्यर्थः ॥ ६४ ॥

तत् द्वैधीभावं संश्रितस्य तव स्वस्थाने वासो भविष्यति, (घ) लोभाश्रयाच्च शत्रुम् (ङ) उच्चाटयिष्यसि ; अपरं, यदि किञ्चित् छिद्रं तस्य पश्यसि, तत् गत्वा आपादयिष्यसि"। मेघवर्ण आह,—"तात ! मया सः (च) अविदितसंश्रयः, तत् कथं तस्य छिद्रं ज्ञास्यामि ?" स्थिरजीवी आह,—"वत्स ! न केवलं स्थानं, छिद्राण्यपि तस्य (छ) प्रकटीकरिष्यामि प्रणिधिभिः। उक्तञ्च,—

गावो गन्धेन पश्यन्ति वेदैः पश्यन्ति वै द्विजाः।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ ६५ ॥

उक्तञ्चात्र विषये,—

यस्तीर्थानि निजे पक्षे परपक्षे विशेषतः।
गुप्तेश्चारैर्नृपो वेत्ति न स दुर्गतिमाप्नुयात्" ॥ ६६ ॥

मेघवर्ण आह,—"तात! कानि तीर्थानि उच्यन्ते ? कति-सङ्ख्यानि च ? कीदृशाः गुप्तचराः ? तत् सर्वं निवेद्यताम्"इति। स आह,—"तत्र विषये भगवता नारदेन युधिष्ठिरः प्रोक्तः यत्, शत्रुपक्षेऽष्टादश तीर्थानि, स्वपक्षे पञ्चदश ; त्रिभिः त्रिभिः

(घ) लोभाश्रयात्—लोभपरवशत्वात्, शत्रोरिति शेषः।

(ङ) उच्चाटयिष्यसि—दूरीकरिष्यसि।

(च) अविदितसंश्रयः,—अज्ञातावासः।

(छ) प्रकटीकरिष्यामि—प्रकाशयिष्यामि। प्रणिधिभिः,—चारैः।

गाव इति।—गावः गन्धेन पश्यन्ति जानन्ति, पदार्थान् निरूपयन्ति इत्यर्थः, द्विजाः ब्राह्मणाः, वेदैः सामादिभिः, पश्यन्ति सदसतौ विचारयन्ति इति भावः, राजानः चारैः प्रणिधिभिः, पश्यन्ति परराष्ट्रव्यापारं जानन्तीत्यर्थः, इतरे जनाः द्विजातिनृपतिव्यतिरिक्ता इत्यर्थः, चक्षुर्भ्यां, पश्यन्तीत्यनुषङ्गः ॥ ६५ ॥

य इति।—यः नृपः, गुप्तैः कृत्यवेदिभिः, चारैः निजे पक्षे, विशेषतः परपक्षे शत्रुपक्षे, तीर्थानि सन्त्याश्रयष्टादशस्थानानि, ("तीर्थं शास्त्रेऽवरे वेदीपायोपाध्यायमन्त्रिषु। योनौ लक्षावतारेषु सन्त्याश्रयष्टादशस्वपि ॥" इति विश्वः) वेत्ति जानाति, सः दुर्गतिं दुरवस्थां, न आप्नुयात् न पराभवं लभेत ॥ ६६ ॥

गुप्तचरैः तानि ज्ञेयानि। तैः ज्ञातैः स्वपक्षः परपक्षश्च वश्यो भवति। उक्तञ्च नारदेन युधिष्ठिरं प्रति,—

"कांश्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च।
त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः?" ॥६७॥

तीर्थशब्देन (ज) अयुक्तकर्माभिधीयते, तत् यदि तेषां क्लृप्तितं भवति, तदा स्वामिनोऽभिघाताय भवति; यदि प्रधानं भवति, तदा हृदये स्यादिति। तत् यथा—मन्त्री, पुरोहितः, सेनापतिः, युवराजः, (झ) दौवारिकः, अन्तर्वंशिकः, प्रशासकः, समाहर्त्तृ-सन्निधातृ-प्रदेष्टृ-ज्ञापकाः, साधनाध्यक्षः, गजाध्यक्षः, (ञ) कोशाध्यक्षः, दुर्गपाल-करपाल-सीमापाल प्रोत्कटभृत्याः;

कांश्चिदिति।—त्रिभिः त्रिभिः अविज्ञातैः गूढैः, छद्मवेशाङ्कितैरित्यर्थः, चारकैः प्रणिधिभिः, अन्येषु विपक्षेषु इत्यर्थः, अष्टादश, स्वपक्षे दश पञ्च च पञ्चदश, तीर्थानि वेत्सि कांश्चित्? जानासि किम्? अपि तु जानास्येव इत्यभिप्रायवेदनं कांश्चित् ग्रहणार्थः, ("कांश्चित् कानप्रवेदने" इत्यमरः)॥ ६७॥

(ज) अयुक्तकर्म—अयुक्तः—अनवस्थितः रिपौ, कर्म—विनाशचेष्टादिरूपमित्यर्थः, अयुक्तः—आपद्गत प्रभौ, कर्म—आपदुद्धर" रूपमित्यर्थो वा, यस्य सः, मन्त्र्यादीत्यर्थः। तत्—तीर्थम्।

(झ) दौवारिकः,—द्वाररक्षकः। अन्तर्वंशिकः,—अन्तर्वंश—अन्तःपुरे नियुक्तः, ["तत्र नियुक्तः" (४।४।६९ पा०) इति सूत्रेण नियुक्तार्थे ठक्, संज्ञापूर्वकविधरनित्यत्वात् न ढञ्। अन्तर्वंशः नार्योऽत्यतया अस्ति अस्य इति व्युत्पत्त्या वा]। अन्तःपुररक्षायां नियुक्तः, कञ्चुक्यादिरिति यावत्। (अन्तर्वंशिकशब्दोऽप्येवं अर्थे व्यवस्थियते,—"अन्तःपुरे लब्धिकृतः स्यादन्तर्वंशिको जनः" इत्यमरः)। प्रशासकः,—प्रकर्षेण शासनकर्त्ता, सर्वशासनाध्यक्षः इत्यर्थः। समाहर्त्तेत्यादि।—समाहर्त्ता—करसङ्ग्रहकर्त्ता, सन्निधाता—सङ्गृहीतकराणां सन्निधानकारकः। प्रदेष्टा—मार्गोपदेष्टा। ज्ञापकः,—वेदयिता, संवादस्येति भावः। साधनाध्यक्षः,—बलाध्यक्षः।

(ञ) कोशाध्यक्षः,—धनाध्यक्षः। दुर्गेत्यादि।—दुर्गपालः,—दुर्गरक्षिता। करपालः,—राजकरधकः। सीमापालः,—सीमाध्यक्षः। प्रोत्कटभृत्यः,—प्रवृद्धकर्मचारी।

एषां (ट) भेदेन द्राक् रिपुः (ठ) साध्यते। स्वपक्षे च (ड) देवी, जननी, (ढ) कञ्चुकी, मालिकः, अश्वापालकः, (ण) स्पर्शाध्यक्षः, सांवत्सरिकः, भिषक्, जलवाहकः, ताम्बूलवाहकः, (त) आचार्यः, अङ्गरक्षकः, स्थानचिन्तकः, छत्रधरः, (थ) विलासिनी; एषां वैरदारेण स्वपक्षे विघातः।

तथा च,—वैद्यवात्सरिकाऽऽचार्याः स्वपक्षेऽधिकृताश्चराः।
यथाऽऽहितुण्डिकोन्मत्ताः सर्वं जानन्ति यत्नतः ॥ ६८ ॥

तथा च,—कृत्वा कृत्यविदस्तीर्थेष्वन्तः प्रणिधयः पदम्।
विदाङ्कुर्वन्तु मद्वतस्तं विहिषटभ्रमः" ॥ ६९ ॥

(ट) भेदेन—उपजापेन, स्वामिनं उपरि वैरुद्यसम्पादनेन इत्यर्थः। द्राक्—झटिति, ("झाम्झटित्यञ्जसाद्राय द्राक्झ सपदि द्रुते" इत्यमरः)।

(ठ) साध्यते—वशीक्रियते।

(ड) देवी—कृताभिषेका स्त्री, ("देवी कृताभिषेकायाम्" इत्यमरः)।

(ढ) कञ्चुकी—"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः। सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते॥" इत्युक्तलक्षणः। मालिकः,—मालाकरः, राज्ञः अन्तःपुरे नित्यमाल्यदायकः इत्यर्थः। अश्वापालकः,—अश्वारक्षिता।

(ण) स्पर्शाध्यक्षः,—राज्ञः स्पर्शेन्द्रियग्राह्याणाम् अनुलेपनादीनाम् अधिपतिः। सांवत्सरिकः,—दैवज्ञः। भिषक्—चिकित्सकः। जलवाहकः,—पानीयभारी।

(त) आचार्यः,—गुरुः। अङ्गरक्षकः,—शरीररक्षी। स्थानचिन्तकः,—उपवेशनस्थानस्य सदसद्भावविवेचकः।

(थ) विलासिनी—वेश्या। एषां—देवीप्रभृतीनां, वैरदारेण—शत्रुतासम्पादनद्वारा; राजसभीपे अबाधगतित्वात् एषां वैरदारेण हननस्य सुकरत्वादिति भावः।

वैद्येति।—चराः गूढचारिणः, आहितुण्डिकोन्मत्ताः विषवैद्याः विषाय खलः, गूढचराः विषवैद्यवेषम् उन्मत्तवेषञ्च परिगृह्य चरन्त इति निष्कर्षः, यथा शत्रुषु सर्वं रहस्यमित्यर्थः, जानन्ति, तथा अधिकृताः प्राप्ताधिकाराः, अतीवविश्वासात् तदधिकारे नियुक्ता इत्यर्थः, वैद्यवात्सरिकाऽऽचार्याः भिषग्दैवज्ञगुरवः, स्वपक्षे, सर्वं जानन्तीति पूर्वान्वयः; अत एषां वैरदारेण स्वपक्षे विघातः इति बीजम् ॥ ६८ ॥

कृत्वेति।—कृत्यावदः कार्यज्ञाः विधिज्ञाश्च, प्रधिधीयन्ते इति प्रणिधयः गूढ-

एवं मन्त्रिवाक्यम् आकर्ण्य मेघवर्णः आह,—"तात ! अथ किं निमित्तम् एवंविधं (द) प्राणान्तिकं सदैव वायसोलूकानां वैरम् ?" स आह,—

कथा १ ।

"वत्स ! कदाचित् हंस-शुक-बक-कोकिल-चातकोलूक-मयूर-कपोत-पारावत-विष्किर-प्रभृतयः सर्वेऽपि पक्षिणः समेत्य सोद्वेगं मन्त्रयितुम् आरब्धाः,—'अहो ! अस्माकं तावत् (घ) वैनतेयो राजा, स च वासुदेवभक्तः न कामपि चिन्ताम् अस्माकं करोति : तत् किं तेन वृथास्वामिना, यो लुब्धकपाशैः नित्यं निबध्यमानानां न रक्षां विधत्ते ?—

यो न रक्षति विश्रब्धान् पीड्यमानान् परैः सदा ।
जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः ॥ ७० ॥

पुरुषाः, गुप्तचराः इति यावत्, ("प्राणाधर्मदंपुरुषः" इति हलायुधः) तीर्थेषु मन्त्र्याद्यष्टादशस्थानेषु, जलावतारेषु च, ("योनौ जलावतारे च मन्त्र्याद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यात्" इति हलायुधः) अन्तः पदं स्थानं पादप्रक्षेपश्च, कृत्वा सहतः प्रबलस्य, गभीरस्य च, विदिवन् शत्रोरिवास्य; तस्य तत्र स्वरूपम्, आश्रयमिति यावत्, अधस्य. ("अधः स्वरूपयोरस्तौ तलम्" इत्यमरः) विदाङ्कुर्वन्तु [विदधातोर्लोटि "विदाङ्कुर्वन्त्वित्यपतरस्याम्" (३।१।४१ पा०) इति निपातः] जानन्तु ॥६९॥

(द) प्राणान्तिकं—जीवनान्तकरम् । वायसेति ।—["येषां विरोध—" (२।४।९ पा०) इति सूत्रेण नित्यद्वन्द्वैकवद्भावव्यवस्थितेः; "वायसोलूकानाम्" इत्यत्र "वायसोलूकस्य" इत्येव भवितुं युक्तम् ; "काकोलूकमित्यादौ परत्वात् विभाषा वृक्षमृगेति पात्र चकारेण बाध्यते" इति दीक्षितोक्तेः ; बहुवचनमेतज्ज्ञापनार्थं सिद्धसत्यापो (२२१) पृथग्योगारम्भो वार्तिकाभ्यामि: प्रदर्शितम् इत्यवधेयम्] ।

(घ) वैनतेयः,—विनतानन्दनः, गरुड इत्यर्थः । लुब्धकपाशैः,—व्याधजालैः, य इति ।—यः परैः शत्रुभिः, पीड्यमानान्, अत एव सदा विश्रब्धान् भीतान्, जन्तून् प्रजा इत्यर्थः, न रक्षति, स पार्थिवरूपेण राजरूपेण, राजरूपोत्पन्नः, ["प्रकृत्यादिभ्य उपसङ्ख्यानम्" (वा०) इति ततीया] कृतान्तो यमः, अत्र संशयः न नास्ति ॥ ७० ॥

यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव ॥ ७१ ॥
षड्भिमान् पुरुषो जह्याद्भिन्नां नावमिवार्णवे।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ ७२ ॥
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम्।
ग्रामकामञ्च गोपालं वनकामञ्च नापितम् ॥ ७३ ॥

तत् सञ्चिन्त्य अन्यः कश्चित् राजा विहङ्गमानां क्रियताम्' इति। अथ तैः (न) भद्राऽऽकारम् उलूकम् अवलोक्य सर्वैः अभिहितं,—'यत् एष उलूको राजा अस्माकं भविष्यति, तत् आनीयन्तां नृपाभिषेकसम्बन्धिनः (प) सम्भाराः' इति।

अथ (फ) साधिते विविधतीर्थोदकैः, (ब) प्रगुणीकृते

यदीति।—यदि सम्यक् सुष्ठु, नेता नायकः, परिचालक इत्यर्थः, नरपतिः न स्यात्, ततः तदा, प्रजा जलधौ समुद्रे, अकर्णधारा नाविकशून्या, नौः तरणिः इव, इह संसारे, विप्लवेत विपर्यासं गच्छेत, क्षियेत इत्यर्थः ॥ ७१ ॥

षड्भिरिति त्याज्यानाह, षड्भिरादि।—पुरुषः अर्थवे समुद्रे, [अर्णसशब्दात् अस्त्यर्थे मत्वर्थः, नलोपश्च निपातनात्] भिन्नां त्रुटितां, नावमिव तरणिमिव, अप्रवक्तारं प्रकृष्टवाक्यकथनालङ्कम्, असम्यगुपदेष्टारमित्यर्थः यावत्, मौनिनमिति वा, आचार्यं गुरुम्, अनधीयानम् अध्ययनवर्जितं, मूर्खमित्यर्थः, ऋत्विजं पुरोहितम्; अरक्षितारं रक्षणपराङ्मुखं, राजानम्; अप्रियवादिनीं कर्कशभाषिणीं, भार्याम्; ग्रामकामं ग्रामलुब्धं, गोचारणाय ग्रामं विहाय प्रचुरतृणसम्पन्नं वनमगच्छन्तमित्यर्थः, गोपालं गोपम्; वनकामम् अरण्यानिलाषिणं, लोकालयं विहाय केवलं वनं गन्तुमुत्सुकमित्यर्थः, वने लोकाभावात् विश्रब्धचौरकार्यमिति भावः, नापितञ्च; इमान् षट् जनात् त्यजेत्; एषां परित्यागे कार्यवैफल्यस्यावश्यम्भावित्वादिति भावः ॥ ७२।७३ ॥

(न) भद्राऽऽकारं—शोभनाकारं, प्रशान्तमूर्त्तिमित्यर्थः।

(प) सम्भाराः,—द्रव्याणि।

(फ) साधिते—आहृते इत्यर्थः।

(ब) प्रगुणीकृते—प्रकर्षेण सज्जीकृते, यथाप्रयोजनं सकृत्य गत्वा आनीते इत्यर्थः।

(भ) अष्टोत्तरशतमूलिकासङ्घाते, प्रदत्ते सिंहासने, वर्त्तिते सप्तद्वीपसमुद्रभूधरविचित्रे धरित्रीमण्डले, प्रसारिते व्याघ्रचर्मणि, (म) आपूरितेषु हेमकुम्भेषु दीपेषु वाद्येषु च, सज्जीकृतेषु दर्पणादिषु माङ्गल्यवस्तुषु, पठत्सु (य) वन्दिमुख्येषु, वेदोच्चारणपरेषु (र) समुदितमुखेषु ब्राह्मणेषु, गीतपरे युवतीजने, आनीतायाम् (ल) अग्रमहिष्यां कृकालिकायाम्, उलूकोऽभिषेकार्थं यावत् सिंहासने उपविशति, तावत् कुतोऽपि वायसः समायातः । सोऽचिन्तयत्,—'अहो ! किमेष सकलपक्षिसमागमो महोत्सवश्च ?'

अथ तं पक्षिणः तं दृष्ट्वा मिथः प्रोचुः,—'पक्षिणां मध्ये वायसः चतुरः श्रूयते । उक्तञ्च,—

नराणां नापितो धूर्त्तः पक्षिणाञ्चैव वायसः ।
दंष्ट्रिणाञ्च शृगालस्तु श्वेतभिक्षुस्तपस्विनाम् ॥ ७४ ॥

(भ) अष्टेत्यादि ।—अष्टाधिकशतविधमूलसमूहे । वर्त्तिते—उपस्थिते । प्रसारिते—विस्तारिते, पातिते इत्यर्थः ।

(म) आपूरितेष्विति ।—विशेषणमिदं हेमकुम्भदीपवाद्येषु यथासम्भवं योज्यम ; तथा च, प्रथमम आपूरितेषु पूर्णेषु, जलेन इति शेषः ; द्वितीयं तैलेन, तृतीयं शब्देन इति यथार्हं शेषानुसन्धानं कार्यम ।

(य) वन्दिमुख्येषु—स्तुतिपाठकप्रमुखेषु ।

(र) समुदितमुखेषु—समुदितानि—परस्परं मिलितानि, मुखानि—कण्ठस्वराः इत्यर्थः, येषां तेषु, समस्वरेण वेदपाठं कुर्वत्सु इति निष्कर्षः ; [समपूर्वकवदधातोः क्तप्रत्ययेन रूपमिदम्] ।

(ल) अग्रमहिष्यां—प्रधानमहिष्यां, कृकालिकायां—तदाख्यपेचकपत्न्याम् ।

नराणामिति ।—नराणां मनुष्याणां मध्ये, नापितः, पक्षिणां मध्ये वायसः चतुरः, दंष्ट्रिणां जन्तूनां मध्ये शृगालः, तथा तपस्विनां मुनीनां मध्ये, [सर्वत्र निर्द्धारणे षष्ठी] श्वेतभिक्षुः श्वेताम्बर' उपपदभेदः, धूर्त्तः ; जैनसम्प्रदायेषु श्वेताम्बराः दिगम्बराश्च परिव्राजकभेदाः दृश्यन्ते, तेषां निन्दितत्वेनात्र धूर्त्तत्वमुक्तम् ; जिनदत्तसूरिणा जैनं

तदस्यापि वचनं ग्राह्यम् । उक्तञ्च,—

बहुधा बहुभिः सार्द्धं चिन्तिताः सुनिरूपिताः ।
कथञ्चिन्न विलीयन्ते विहङ्गिश्चिन्तिता नयाः' ॥ ७५ ॥

अथ वायसः समेत्य तान् आह,—'अहो ! किं महाजन-समागमोऽयं परममहोत्सवश्च ?' ते प्रोचुः,—'भोः ! नास्ति कश्चित् विहङ्गमानां राजा ; तदस्य उलूकस्य विहङ्गराज्याभिषेको निरूपितः तिष्ठति समस्तपक्षिभिः ; तत् त्वमपि स्वमतं देहि, (व) प्रस्तावे समागतोऽसि' ।

अथ असौ काको विहस्य आह,—'अहो! न युक्तमेतत्, यन्मयूर-हंस-कोकिल चक्रवाक-शुक-कारण्डव-हारीत--सारसादिषु पक्षिप्रधानेषु विद्यमानेषु दिवाऽन्धस्य अस्य (ग) करालवक्त्रस्य अभिषेकः क्रियते ; तत्र एतत् मम मतम् । यतः,—

वक्रनासं सुजिह्मात्तं क्रूरमप्रियदर्शनम् ।
अकुडस्येदृशं वक्त्रं भवेत् कुडस्य कीदृशम् ? ॥ ७६ ॥

मतनित्यमुक्तं, यथा,—"भुङ्क्ते न केवलं न स्नौं भोचमीति दिगम्बरः । प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सह ॥" इति । अपरे तु,—श्वेतभिक्षुः श्वेतः श्वेतवर्णः, भिक्षुः परिव्राजकः, नारद इत्यर्थः, धूर्तः ; तस्य श्वेतवर्णत्वात्, "सुनिधूर्तश्च नारदः" इति पाठान्तरात्च इत्याहुः ॥ ७४ ॥

बहुधेति ।—विहङ्गैः विचक्षणैः जनैः, चिन्तिताः स्वयमवगतैः सद्भिः तर्किताः, तथा बहुभिः सार्द्धं बहुधा चिन्तिताः भाविताः, अत एव सुनिरूपिताः सुनिश्चायिताः, नयाः नीतयः, नीतिप्रयोगा इत्यर्थः, कथञ्चित् न विलीयन्ते न विकृतिं गच्छन्ति, ["लीयन्ते" इति देवादिकस्य लीधातोर्लटि रूपम्] ॥ ७५ ॥

(व) प्रस्तावे—प्रसङ्गे, प्रारम्भे इति यावत् ।

(ग) करालवक्त्रस्य—भीषणवदनस्य ।

वक्रनासमिति ।—अकुडस्य कोपमकुर्वतोऽपि, अस्येति शेषः, वक्त्रं वदनम्, ईदृशम् इत्थं, विकृतमिति शेषः, तथा हि, वक्रा नासा यत्र तथोक्तं, कुटिलनासिकमित्यर्थः, सुनिम्ने अत्यर्थं कुत्रिते, कोटरप्रविष्टे इत्यर्थः, अविधौ नेत्रे यत्र ताद्दशं, क्रूरं विकटम्,

तथा च,—स्वभावरौद्रमत्यर्थं क्रूरमप्रियवादिनम् ।
उलूकं नृपतिं ज्ञात्वा का नः सिद्धिर्भविष्यति ? ॥ ७७ ॥

अपरं, (घ) वैनतेये स्वामिनि क्षितं किमेषः (ङ) दिवान्धः क्षियते राजा ? तत् यद्यपि गुणवान् भवति, तथाऽपि एकस्मिन् स्वामिनि क्षितं नान्यो भूपः प्रशस्यते,—

एक एव हितार्थाय तेजस्वी पार्थिवो भुवः ।
युगान्त इव भास्वन्तो बहवोऽत्र विपत्तये ॥ ७८ ॥

तत् (च) तस्य नाम्नाऽपि यूयं (क) परेषाम् अगम्याः भविष्यथ। उक्तञ्च,—गुरूणां नाममात्रेऽपि गृहीते स्वामिसम्भवे ।
दुष्टानां पुरतः क्षेमं तत्क्षणादेव जायते ॥ ७९ ॥

अत एव अप्रियदर्शनं विकृताकारम् ; क्रुद्धस्य कुप्यतः सतः, अस्य इति शेषः, मुखं कीदृशं किमाकारं, भवेत् ? नूनं तदतिभीषणमिति भावः ॥ ७६ ॥

स्वभावेति।—स्वभावेन रौद्रं भीषणम्, अत्युग्रम् अतिदारुणं, क्रूरं निष्ठुरम्, अप्रियवादिनं कर्कशभाषिणम्, उलूकं पेचकं, नृपतिं ज्ञात्वा नः अस्माकं, का सिद्धिः भाविष्यति ? किं फलं भविष्यति ? न काऽपि इति भावः ; "कुलाचारसदाचारैरतिगूढः प्रतापवान्। धार्मिको नीतिकुशलः स राजा युज्यते भुवि ॥" इत्युक्तेः, एतादृशलक्षणाक्रान्तस्यैव राजासनार्हत्वादित्याशयः ॥ ७७ ॥

(घ) वैनतेये—गरुडे [विनताशब्दात् अपत्यार्थे ढक्प्रत्ययः]।

(ङ) दिवान्धः,—उलूकः ।

एक इति।—एक एव, न तु द्वौ बहवो वा इत्यर्थः, तेजस्वी विक्रान्तः, पार्थिवः नृपः, भुवः पृथिव्याः, हितार्थाय कल्याणसाधनाय, भवतीति शेषः ; युगान्ते प्रलये, बहवो दादशेत्यर्थः, भास्वन्तः सूर्याः इव, अत्र संसारे, बहवो नृपाः, विपत्तये, भवन्तीति शेषः ; बहूनां परस्परद्वेषात्, तैः प्रजानामेव उच्छेदः सम्पद्यते इति भावः ॥ ७८ ॥

(च) तस्य—वैनतेयस्य ।

(क) परेषां—शत्रूणाम् । अगम्याः,—दुर्ज्ञेयाः इत्यर्थः।

गुरूणामिति।—स्वामिसम्भवे स्वामित्वसम्भवति इत्यर्थः, गुरूणां महतां, नाममात्रे गृहीते उच्चारिते, अपि "अमुकस्य महानहिनग्राहिणः प्रजा वयम्" इति कीर्त्यतेऽपीति भावः, दुष्टानां दुर्जनानां, पुरतः समीपे, तत्क्षणादेव नाममात्रत

तथा च,—व्यपदेशेन महतां सिद्धिः सञ्जायते परा।
अग्निनो व्यपदेशेन वसन्ति शशकाः सुखम्' ॥ ८० ॥

ते ऊचुः,—'कथमेतत् ?' स आह,—

कथा २।

'कस्मिंश्चित् वने चतुर्दन्तो नाम महागजो यूथाधिपः प्रतिवसति स्म। तत्र कदाचित् महती अनावृष्टिः सञ्जाता (ख) प्रभूतवर्षाणि यावत्,(ग)तया तडागकूपपल्वलसरांसि शोषमुपगतानि।

अथ तैः समस्तगजैः स गजराजः प्रोक्तः,—'देव ! पिपासाऽऽकुलाः (घ) गजकलभा मृतप्रायाः, अपरे मृताश्च; तत् अन्विष्यतां कश्चित् जलाशयः, यत्र जलपानेन स्वस्थतां व्रजन्ति'। ततश्चिरं ध्यात्वा तेन अभिहितम्,—'अस्ति महान् ह्रदः (ङ) विविक्ते प्रदेशे स्थलमध्यगतः पातालगङ्गाजलेन सदैव पूर्णः; तत् तत्र गम्यताम्' इति। तथाऽनुष्ठिते (च) पञ्चरात्रम्

एव, क्षेमं सङ्कुलं जायते; ते च नामयशसातिशेन भीता नापकुर्वन्तीति भावः ॥ ७९ ॥

व्यपदेशेनेति।—महतां व्यपदेशेन नामकीर्त्तनेन, परा महती, सिद्धिः सञ्जायते। तथा हि, शशकाः अग्निः चन्द्रस्य, व्यपदेशेन सुखं वसन्ति ॥ ८० ॥

(ख) प्रभूतवर्षाणि—बहून् वत्सरान् व्याप्य, [अत्यन्तसंयोगे द्वितीया]।

(ग) तया—अनावृष्ट्या। तडागेति।—तडागः,—सपद्माजाधजलाशयः, कूपः,—अगाधजलाशयः, पल्वलं—क्षुद्रजलाशयः, सरः,—सरोवरः, पुष्करिणीत्यर्थः, तानि। शोषमुपगतानि—शुष्काणि।

(घ) गजकलभाः,—करिशावकाः। मृतप्रायाः,—मृततुल्याः, [प्रायेण मृता इति राजदन्तादिवत् पूर्वनिपातः]। अपरे—अन्ये, कलभव्यतिरिक्ता इत्ययोधिहादय इत्यर्थः।

(ङ) विविक्ते—विजने। पातालगङ्गाजलेन—भोगवतीसलिलेन।

(च) पञ्चरात्रं—पञ्चानां रात्रीणां समाहारः इति समाहारद्विगुः ["अहःसर्वैक—" (५। ४। ८७ पा०) इति अच्प्रत्ययः, अत्यन्तसंयोगे द्वितीया]; द्विगा

उपसर्पद्भिः समासादितः तैः स ह्रदः। तत्र स्वेच्छया जलमवगाह्य (छ) अस्तमनवेलायां निष्क्रान्ताः। तस्य च ह्रदस्य (ज) समन्तात् शशकविलानि असङ्ख्यानि सुकोमलभूमौ तिष्ठन्ति, तानि च समस्तैरपि तैः गजैः इतस्ततो भ्रमद्भिः परिभग्नानि, बहवः शशका भग्नपादशिरोग्रीवाः (झ) विहिताः, केचिन्मृताः, केचित् (ञ) जीवशेषा जाताः।

अथ गते तस्मिन् गजयूथे, शशकाः मोहेगाः (ट) गजपादक्षुण्णसमावासाः केचिद्भग्नपादाः, अन्ये जर्जरितकलेवराः (ठ) रुधिरप्लुताः, अन्ये हतशिशवः (ड) वाष्पपिहितलोचनाः समेत्य(ढ)मिथो मन्त्रं चक्रुः,—'अहो! विनष्टा वयम्; नित्यमेव एतद्गजयूथमागमिष्यति, यतो नान्यत्र जलमस्ति; तत् सर्वेषां नाशो भविष्यति। उक्तञ्च,—

स्मयन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः।
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः॥ ८१॥

आसन्नतापेन गमनस्य अतीवक्लेशकरत्वात् इति भावः। उपसर्पद्भिः,—गच्छद्भिः। समासादितः,—प्राप्तः। तैः,—गजैः।

(छ) अस्तमनवेलायां—मध्याह्नसमये। निष्क्रान्ताः,—ह्रदात् निर्गताः।

(ज) समन्तात्—चतुर्दिक्षु। तानि—विलानि। परिभग्नानि—विदलितानीत्यर्थः।

(झ) विहिताः,—कृताः, गजैरिति शेषः।

(ञ) जीवशेषाः,—जीवनमात्रावशिष्टाः, इतस्ततो भ्रमणात्मृतप्राया इति यावत्।

(ट) गजैति।—गजानां पादैः क्षुण्णाः,—दलिताः, समावासाः,—संघयाः, वासभूमय इत्यर्थः, यैषां तथाभूताः।

(ठ) रुधिरप्लुताः,—रक्तलिप्तकलेवराः इत्यर्थः।

(ड) वाष्पपिहितलोचनाः,—साश्रुनेत्राः।

(ढ) मिथः,—परस्परम्। मन्त्रं—मन्त्रणाम्।

स्मयन्निति।—गजः स्मयन्नपि सर्वं कुर्वन्नपि, भुजङ्गमः सर्पः, जिघ्रन्नपि गन्धं गृह्णन्

तच्चिन्त्यतां कश्चिदुपायः'। ततस्तैकः प्रोवाच,—'गम्यतां देशत्यागेन, किमन्यत् ? उक्तञ्च मनुना व्यासेन च,—

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ८२ ॥
क्षेम्यां शस्यप्रदां नित्यं पशुवृद्धिकरीमपि ।
परित्यजेन्नृपो भूमिमात्मार्थमविचारयन् ॥ ८३ ॥
आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि' ॥ ८४ ॥

ततश्च अन्ये प्रोचुः,—'भोः ! पितृपैतामहं स्थानं न शक्यते सहसा त्यक्तुम् ; तत् क्रियतां(ण)तेषां शान्तये काचित् विभीषिका,

ब्रवि, आत्मार्थं कुर्वन्नपीति यावत्, नृपः दमनकमपि स्वैरमुखोऽपीति भावः, दुर्जनः सज्जनमपि स्वज्ञानं दर्शयन्नपि, हन्ति नाशयति ॥ ८१ ॥

त्यजेदिति।—कुलस्य वंशस्य, अर्थे निमित्तम्, एकं, जनमिति शेषः, त्यजेत् एकत्यागे यदि कुलरक्षा स्यात्, तदा तदपि कर्त्तव्यमित्यर्थः ; ग्रामस्य अर्थे कुलं त्यजेत् यदि कुले त्यक्ते ग्रामरक्षा स्यात्, तदा तदपि कर्त्तव्यमित्यर्थः ; जनपदस्य देशस्य, अर्थे ग्रामं त्यजेत् यदि ग्रामे त्यक्ते देशरक्षा स्यात्, तदा तदपि कर्त्तव्यमित्यर्थः ; आत्मार्थे आत्मरक्षार्थे, पृथिवीं पृथिवीस्थनिखिलद्रव्यं, पृथिवीव्यवस्तुनावे यत्र पृथिवी-शब्दोपचार इति बोध्यं, त्यजेत् यदि पृथिवीस्थसर्वद्रव्यत्यागेऽपि आत्मरक्षा स्यात्, तदा तदपि कार्य्यमित्यर्थः ; "सततमेवाऽऽत्मानं गोपायेत्" इति श्रुतेरिति भावः ॥ ८२ ॥

क्षेम्यामिति।—नृपः अविचारयन् किमपि विचारमकुर्वन्, परिताडित अविचिन्त्यैव इत्यर्थः, आत्मार्थे स्वहितार्थे, क्षेम्यां क्षेमकरीं, नित्यं शस्यप्रदां बहुशस्यात्पादिनीमित्यर्थः, पशु-वृद्धिकरीं दुग्धशस्यादुत्पादनेन पशून् वर्द्धयन्तीं, सर्वदा सुखकरीमित्यर्थः, भूमिम् अपि, भूमिशब्दोऽत्र सर्वस्ववाची, सर्वस्वमपीत्यर्थः, परित्यजेत् ; नयि जीवति कदाचिदपि सकलमेतद्विनष्टमर्हतीति मत्वा इति भावः ॥ ८३ ॥

आपदर्थं इति।—आपदर्थं विपत्प्रतिकारार्थं, धनं वित्तं, रक्षेत् ; धनैः वित्तैः, सर्वधनव्ययेनापीत्यर्थः, महता आयासेन सञ्चितैः रक्षितैरिति भावः, दारान् स्त्रियः, रक्षेत् ; दारैरपि धनैरपि सर्वथा आत्मानं स्वं, स्वजीवनमित्यर्थः, सततं रक्षेत् ; येन केनापायेनैव आत्मा रक्षणीय इति भावः ॥ ८४ ॥

(ङ) तेषां—शत्रूणाम्। विभीषिका—भयप्रदर्शनोपायः।

(त) यत् कथमपि (थ) दैवात् न (द) समायान्ति । उक्तञ्च,—

निर्विषेणापि सर्पेण कर्त्तव्या महती फटा ।
विषं भवतु मा वाऽस्तु फटाऽऽटोपो भयङ्करः' ॥ ८५ ॥

अथ अन्ये प्रोचुः,—'यदि एवं, ततः तेषां महद्विभीषिकाख्यानम् अस्ति, येन न आगमिष्यन्ति ; सा च (ध) चतुरदूतायत्ता विभीषिका । तत्र विजयदत्तो नाम राजा अस्मत्स्वामी शशकः चन्द्रमण्डले निवसति ; तत् प्रेष्यतां कश्चित् मिथ्यादूतो यूथाधिपमकार्ग्रं, यत् चन्द्रः त्वाम् अत्र ह्रदे आगच्छन्तं निषेधयति ; यतः (न) अस्मत्परिग्रहोऽस्य समन्ताद्वसति । एवम् अभिहितं (प) अदेयवचनात् कदाऽपि निवर्त्तते' ।

अथ अन्ये प्रोचुः,—'यदि एवं, तदस्ति लम्बकर्णो नाम शशकः ; स च (फ) वचनरचनाचतुरो दूतकर्मज्ञः ; स तत्र प्रेष्यताम् इति । उक्तञ्च,—

(त) यत—येनेत्यर्थकमव्ययं, येन भयप्रदर्शनेन हेतुनेत्यर्थः ।

(थ) दैवात्— भाग्यात्, अस्माकं भाग्यबलेनेति भावः ।

(द) समायान्ति—समागच्छन्ति ।

निर्विषेणेति ।—निर्विषेणापि विषशून्येनापि, सर्पेण भुजगेन, महती प्रशस्ता इत्यर्थः, फटा फणा, ("फटायान्तु फणा द्वयोः" इत्यमरः) कर्त्तव्या क्रियते इति भावः ; विषं भवतु, मा अस्तु वा—न भवतु वा, फटाऽऽटोपः फणाविस्तारः, तस्य इति शेषः, भयङ्कर , भवतीति शेषः ; भयप्रदर्शनेनापि कदाचित् शत्रवः स्यादिति भावः ॥८५॥

(ध) चतुरेति ।—चतुरस्य—विज्ञस्य, दूतस्य—वार्त्ताविहस्य, आयत्ता—अधीना, तत्साध्या इत्यर्थः ।

(न) अस्मत्परिग्रहः,—अस्मत्परिजनः, ("परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः" इति मेदिनी) अस्य—ह्रदस्य ।

(प) अदेयवचनात्—दैवादेयत्वेन समादरयोग्यवाक्यात् ।

(फ) वचनरचनाचतुरः,—वाक्यविन्यासपटुः । दूतकर्मज्ञः,—वार्त्ताविहकार्य्याभिज्ञः ।

साकारो निःस्पृहो वाग्मी नानाशास्त्रविचक्षणः।
परचित्तावगन्ता च राज्ञो दूतः स इष्यते ॥ ८६ ॥

अन्यच्च,—यो मूर्खं लौल्यसम्पन्नं राजद्वारिकमाचरेत्।
मिथ्यावादं विशेषेण तस्य कार्यं न सिध्यति ॥ ८७ ॥

तदन्विष्यतां यथा अस्मात् (ब) व्यसनात् आत्मनां सुनिर्मुक्तिः'। अथ अन्ये प्रोचुः,—'अहो! युक्तमेतत्, न अन्यः कश्चिदुपायोऽस्माकं जीवितस्य ; तथा एव क्रियताम्'।

अथ लम्बकर्णो गजयूथाधिपसमीपे (भ) निरूपितो गतश्च। तथाऽनुष्ठिते लम्बकर्णोऽपि गजमार्गम् आसाद्य अगम्यं स्थलम् आरुह्य तं गजम् उवाच,—'भो भो दुष्टगज! किमेवं लीलया निःशङ्कतया अत्र चन्द्रकन्दे आगच्छसि? तत्र आगन्तव्यं, निवर्त्यताम्' इति। तदाकर्ण्य विस्मितमना गज आह,—'भोः! कस्त्वम्?' स आह,—'अहं लम्बकर्णो नाम शशकः, चन्द्रमण्डले वसामि ; साम्प्रतं भगवता चन्द्रमसा तव पार्श्वे प्रहितो दूतः ; जानाति एव भवान्, यथार्थवादिनो दूतस्य न दोषः करणीयः, दूतमुखाः हि राजानः सर्व एव। उक्तञ्च,—

साकार इति।—अत्र य इत्यध्याहार्यं, तच्छब्देन परामर्शात्। यः साकारः शोभनावयवसम्पन्नः, निःस्पृहः अलुब्धः, वाग्मी वाक्पटुः, नानाशास्त्रेषु विचक्षणः अभिज्ञः, परचित्तावगन्ता परचित्तावबोधक्षमः, अन्यहृदयभावाभिज्ञ इत्यर्थः, स तादृशः, राज्ञः दूतः इष्यते काम्यते, अभीष्ट इत्यर्थः ॥ ८६ ॥

य इति।—यः मूर्खं निर्बोधं, लौल्यसम्पन्नं लुब्धं, विशेषेण मिथ्यावादम् असीकवादरतं, जनम् इति शेषः, राजद्वारिकं राजद्वारे नियुक्तं, दूतमित्यर्थः, आचरेत् कुर्यात्, तस्य कार्ये न सिध्यति न फलति ॥ ८७ ॥

(ब) व्यसनात्—विपदः। आत्मनां—स्वेषां, अस्मत्कानामिति यावत्। सुनिर्मुक्तिः,—सुष्ठु निर्वाणं, भवेदिति शेषः।

(भ) निरूपितः,—तत्सनाथैः सद्भिर्निर्द्धारित इत्यर्थः।

उद्यतेष्वपि शस्त्रेषु बन्धुवर्गवधेष्वपि।
पक्षवाक्षेपि जल्पन्तो वध्या दूता न भूभुजा' ॥ ८८ ॥

तत् श्रुत्वा स आह,—'भोः शशक! तत्कथय भगवतः चन्द्रमसः सन्देशं, येन सत्वरं क्रियते'। स आह,—'भवता अतीतदिवसे यूथेन सह आगच्छता प्रभूताः शशका निपातिताः; तत् किं न वेत्ति भवान्, यत् मम (म) परिग्रहोऽयम्? तत् यदि जीवितेन ते प्रयोजनं, तदा केनापि प्रयोजनेन अत्र ह्रदे न आगन्तव्यमिति सन्देशः'। गज आह,—'अद्य क्व वर्त्तते भगवान् स्वामी चन्द्रः?' स आह,—'अत्र ह्रदे साम्प्रतं शशकानां (य) भवदूयूथमथितानां हतशेषाणां समाश्वासनाय समायातः तिष्ठति। अहं पुनः तवान्तिकं प्रेषितः'। गज आह,—'यदि एवं, तदर्शय मे तं स्वामिनं, येन प्रणम्य अन्यत्र गच्छामि'। शशक आह,—'भोः! आगच्छ मया सह (र) एकाकी, येन दर्शयामि'। तथाऽनुष्ठिते शशको निशासमये तं गजं ह्रदतीरे नीत्वा जलमध्ये स्थितं चन्द्रबिम्बम् अदर्शयत्, आह च,—'भोः! एष नः स्वामी जलमध्ये (ल) समाधिस्थः

उद्यतेष्विति।—शस्त्रेषु उद्यतेषु उत्तोलितेष्वपि, सङ्घातसमारम्भकालेऽपि इति भावः, बन्धुवर्गाणां स्वजनानां, वधेषु अपि सत्सु, स्वजनविनाशानन्तरमपीत्यर्थः, दूताः शशप्रेरिता इति भावः, पक्षवाक्षि निष्ठुराणि, जल्पन्तः कथयन्तोऽपि, भूभुजा राज्ञा, न वध्याः न हन्तव्याः ॥ ८८ ॥

(ल) परिग्रहः,—परिजनः, आश्रितः इत्यर्थः। अयं—शशकसमूह इत्यर्थः। सन्देशः,—वाचिकादेश इत्यर्थः।

(य) भवदूयूथमथितानां—भवतां गजानामित्यर्थः, यूथेन सङ्घातेन, मथितानां विपर्ययाणाम्। हतशेषाणां—हतावशिष्टानाम्। समाश्वासनाय—सम्यक्सान्त्वनायेत्यर्थः।

(र) एकाकी—असहायः, ["एकादाकिनिच् चासहाये" (५।३।५२ पा०), इति एकशब्दात् आकिनिच्प्रत्ययः]।

(ल) समाधिस्थः,—ध्यानस्थः।

तिष्ठति, तत् (व) निभृतं प्रणम्य सत्वरं व्रज, नो चेत् समाधि-भङ्गात् भूयोऽपि प्रभूतं कोपं करिष्यति'।

अथ गजोऽपि त्रस्तमनाः तं प्रणम्य पुनर्गमनाय प्रस्थितः। शशकाश्च तद्दिनात् आरभ्य सपरिवाराः सुखेन स्वेषु स्थानेषु तिष्ठन्ति स्म। अतोऽहं ब्रवीमि,—'व्यपदेशेन महताम्' इत्यादि। अपि च,—क्षुद्रमलसं कापुरुषं व्यसनिनमकृतज्ञं जीवितकामः।

पृष्ठप्रलपनशीलं स्वामित्वेन नाभियोजयेत् ॥ ८९ ॥
क्षुद्रमर्थपतिं प्राप्य न्यायान्वेषणतत्परौ।
उभावपि क्षयं प्राप्तौ पुरा शश-कपिञ्जलौ' ॥ ९० ॥

ते प्रोचुः,—'कथमेतत् ?' स आह,—

कथा ३।

'कस्मिंश्चिद्वृक्षे पुरा अहम् अवसम्। तस्य अधस्तात् कोटरे कपिञ्जलो नाम चटकः प्रतिवसति स्म। अथ सदैव अस्तमनवेलायाम् आगतयोः (श) द्वयोः अनेकसुभाषितगोष्ठ्या देवर्षिब्रह्मर्षिराजर्षिपुराणचरितकीर्त्तनेन च पर्य्यटनदृष्टानेक-

(व) निभृतं—निःशब्दम्।

क्षुद्रमिति।—जीवितकामः जीवनार्थी जनः, क्षुद्रं नीचम्, अलसम् आलस्यपरं, कर्मानुत्साहिनमित्यर्थः, कापुरुषं निन्द्यं, [गतसमासे कोः कादेशः वैभाषिकः] व्यसिनं मृगयाद्यासक्तम्, अकृतज्ञम् उपकारादिदं, तथा पृष्ठे पश्चात्, अलपनशीलं परोक्षे कृत्याकारिणमित्यर्थः, पुरुषमिति शेषः, स्वामित्वेन प्रभुत्वेन, न अभियोजयेत् न स्वामिनं कुर्य्यादित्यर्थः ॥ ८९ ॥

क्षुद्रमिति।—पुरा पूर्वजन्मनि काले, न्यायान्वेषणतत्परौ न्यायविचारानुसन्धानपरायणौ इत्यर्थः, शशकपिञ्जलौ उभौ अपि, क्षुद्रं नीचान्तःकरणम् इत्यर्थः, अर्थपतिं प्रभुं, विचारक्षमिति यावत्, प्राप्य क्षयं निधनं, प्राप्तौ गतौ ॥ ९० ॥

(श) द्वयोः,—मम चटकस्य च इत्यर्थः। अनेकेति।—विविधसदालापयुक्तसम्भाषणेन। देवर्षीति।—देवर्षिः,—नारदादिः, ब्रह्मर्षिः,—ब्रह्मा—ब्राह्मणः चतुर्मुखतुल्यो वा ऋषिः वसिष्ठादिः, राजर्षिः,—राजा—क्षत्रियः सन् ऋषिः

कौतूहलप्रकथनेन च परमसुखमनुभवतोः कालो व्रजति। अथ कदाचित् कपिञ्जलः प्राणयात्रार्थमन्यैः चटकैः सह अन्यं पक्वशालिप्रायं देशं गतः। ततो यावत् निशासमयेऽपि न आयातः, तावदहं सोद्वेगमनाः तद्वियोगदुःखितः चिन्तितवान्, —'अहो! किमद्य कपिञ्जलो न आयाति? किं केनापि पाशेन बद्धः? उताऽऽहोस्वित् केनापि व्यापादितः? सर्वथा यदि कुशली भवति, तन्मां विना न तिष्ठति' एवं मे चिन्तयतो बहूनि अहानि व्यतिक्रान्तानि। ततश्च तत्र कोटरे कदाचित् शीघ्रगो नाम शशकोऽस्तमनवेलायाम् आगत्य प्रविष्टः। मया अपि कपिञ्जलनिराशत्वेन न निवारितः।

अथ अन्यस्मिन् अहनि कपिञ्जलः शालिभक्षणात् अतीवपीवरतनुः स्वयम् आश्रयं स्मृत्वा भूयोऽपि तत्रैव समायातः। अथवा साधु इदमुच्यते,—

'न तादृक् जायते सौख्यमपि स्वर्गे शरीरिणाम्।
दारिद्र्येऽपि हि यादृक् स्यात् स्वदेशे स्वपुरे गृहे'॥९१॥

अथ असौ (ष)कोटरान्तर्गतं शशकं दृष्ट्वा (स)माक्षेपमाह,—

जनकादिः, तेषां यत् पुराणचरितं—पुराणवर्णितचरितं, तस्य कीर्त्तनेन—वर्णनेन। पर्य्यटनेति।—पर्य्यटनेन—समन्तात् विचरणेन, दृष्टं यत् अनेककौतूहलं—बहुविस्मयकरो व्यापारः, तस्य प्रकथनेन—प्रकृष्टवर्णनेन।

नेति।—स्वदेशे निजजनपदे, स्वपुरे स्वनगरे, गृहे स्वे भवने, स्थितस्य इति शेषः, दारिद्र्येऽपि दरिद्रावस्थायामपि, यादृक् सौख्यं सुखं, स्यात्, स्वर्गेऽपि शरीरिणां देहिनां, तादृक् सौख्यं, न जायते, हि निश्चये; "दिवसस्याष्टमे भागे शाकं पचति यो नरः। अऋणी चाप्रवासी च स मोद इति कथ्यते॥" इति स्मरणात्। "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" इति भावः॥ ९१॥

(ष) कोटरान्तर्गतं—इचरन्धमध्यस्थितम्।

(स) साक्षेपं—सभर्त्सनं, सतिरस्कारम् इत्यर्थः, ("आक्षेपो भर्त्सनाऽऽक्षिप्तव्याख्याखण्डितेषु स्मृतः" इति मेदिनी)।

'भोः शशक! न त्वया सुन्दरं कृतं, यत् मम (ङ) आवसथस्थाने प्रविष्टोऽसि, तत् शीघ्रं निष्क्रम्यताम्'। शशक आह,—'न तव इदं गृहं, किन्तु मम एव; तत् किं मिथ्या (क) परुषाणि जल्पसि? उक्तञ्च,—

वापीकूपतडागानां देवालयकुजन्मनाम्।
उत्सर्गात् परतः स्वाम्यमपि कर्त्तुं न शक्यते ॥ ९२ ॥

या च,—प्रत्यक्षं यस्य यत् भुक्तं चैत्राद्यं दश वत्सरान्।
तत्र भुक्तिः प्रमाणं स्यान्न साक्षी नाक्षराणि वा ॥ ९३ ॥
मानुषाणामयं न्यायो मुनिभिः परिकीर्त्तितः।
तिरश्चाञ्च विहङ्गानां यावदेव समाश्रयः ॥ ९४ ॥

(ङ) आवसथस्थाने—वासस्थाने इत्यर्थः।

(क) परुषाणि—कर्कशानि, वचनानीति शेषः।

वापीति।—वापी दीर्घिका, कूपः प्रसिद्धः, तडागः सपद्मसरोवरः तेषां, तथा देवालयानां, कुजन्मनाञ्च भौमानां, जन्म येषां तेषां, मट्टीकृष्णामित्यर्थः, उत्सर्गात् यागाद्यनुष्ठानपूर्वकं साधारणमुद्दिश्य दानादित्यर्थः, [अत्र परशब्दयोगेन "अन्यारादितर—" (२।३।२९ पा०) इति पञ्चमी] परतोऽपि अनन्तरमेवेत्यर्थः, स्वाम्यं प्रभुत्वं, स्वाधिकारसंस्थापनमित्यर्थः, कर्त्तुं न शक्यते, कैरपीति शेषः; वाप्यादीनां प्रतिष्ठानन्तरं तत्र सर्वेषां समानाधिकारात् उत्सर्गीकृते अस्मिन् इत्थे तव एकस्यैव स्वामित्वाभावादिति भावः ॥९२॥

प्रत्यक्षमिति।—दश वत्सरान् व्याप्य [अत्र "कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा०) इति द्वितीया] यस्य प्रत्यक्षम् अक्ष्णोः अभिमुखम्, [अक्ष्णोरभिमुख्ये अव्ययीभावसमासः, "प्रतिपर—" (ग०) इति टच्प्रत्ययः समासान्तः] साक्षादित्यर्थः, यत् चैत्राद्यं मुख्यादिकं वस्तु, भुक्तं, भोगेनेति शेषः, तत्र भुक्तिः भोगः एव, दश वार्षिकीति भावः, प्रमाणं तस्य स्वत्वनिश्चायिका, स्वत्वकारणमित्यर्थः, न साक्षी न साक्षात् द्रष्टा, अक्षराणि लेख्यमित्यर्थः, वा न, प्रमाणमिति शेषः; साक्षिलेख्यादिभ्योऽपि दशवर्षीया भुक्तिरधिकं स्वत्वे प्रमाणमिति भावः ॥ ९३ ॥

मानुषाणामिति।—मुनिभिः मानुषाणाम् अयं न्यायः पूर्वोक्ता क्रियादत्तिर्न्यायिका

तन्त्रम एतत् गृहं, न तव' इति । कपिञ्जल आह,—'भोः ! यदि (ख) स्मृतिं प्रमाणीकरोषि, तदागच्छ मया सह, येन स्मृतिपाठकं पृच्छामि, स यस्य ददाति,स गृह्णातु'। तथाऽनुष्ठिते मया अपि चिन्तितं,—'किमत्र भविष्यति ? मया द्रष्टव्योऽयं (ग) न्यायः'। ततः कौतुकात् अहमपि (घ) तावत् प्रस्थितः। अत्रान्तरे तीक्ष्णदंष्ट्रो नाम आरण्यमार्जारः तयोर्विवादं श्रुत्वा, (ङ) मार्गासन्नं नदीतटम् आसाद्य कृतकुशोपग्रहो निमीलितनयन ऊर्द्ध्वबाहुः अर्द्धपादस्पृष्टभूमिः श्रीसूर्य्याभिमुख इमां (च)धर्मोपदेशनाम् अकरोत्,—'अहो ! असारोऽयं (छ) संसारः, क्षणभङ्गुराः प्राणाः, स्वप्नसदृशः प्रियसमागमः, इन्द्रजालवत्

नीतिरित्यर्थः, परिकीर्त्तितः कथितः ; तिरश्चां पशूना, ["तिर्यक् तिरोऽर्थे वक्रे च विहङ्गादौ क्लीबत्रयम्" इति मेदिनीवचने विहङ्गादौ इत्यत्र आदिपदेन पश्वादीनां ग्राह्या, "विहङ्गानाम्" इत्यस्य श्लोके पृथगुपादानादत्र पश्वर्थक एव तिर्यक्शब्दः इति बोद्धव्यम्] विहङ्गानाञ्च, यावदेव यावन्ति दिनानि व्याप्येत्यर्थः, समाप्तयः अवस्थितिः, तावदेव तत्र तत्र स्थलमिति भावः ॥ ९४ ॥

(ख) स्मृतिं—धर्मशास्त्रं, व्यवहारतत्त्वमित्यर्थः, ("स्मृतिस्तु धर्मसंहिता" इत्यमरः)। प्रमाणीकरोषि—अस्मिन् विषये याथार्थ्यनिर्णायकत्वेन जानासीत्यर्थः। यस्य ददाति—यस्मै अर्पयति, [सम्प्रदाने सम्बन्धविवक्षया षष्ठी]।

(ग) न्यायः,—विचारः।

(घ) तावत्—तर्यो: पश्चात्, [अव्ययानुयोगे "लक्षणेत्थम्भूता—" (२।४।९० पा०) इति कर्मप्रवचनीयत्वात् द्वितीया]।

(ङ) मार्गासन्नं—पथसमीपस्थम्। कृतेति।—कृतः कुशस्य उपग्रहः,—ग्रहणं येन तथोक्तः, दर्भपाणिरित्यर्थः, अतिपवित्रभावज्ञापनार्थमिति भावः। अर्द्धेति।—अर्द्धपादेन—पादार्द्धेन, पादाग्रमात्रेणेत्यर्थः, स्पृष्टा—अवलम्बिता, भूमिः येन सः ; एकचरणस्य अग्रभागमात्रेण धरणीं स्पृशन्नित्यर्थः।

(च) धर्मोपदेशनां—धर्मशास्त्रोपदेशम्।

(छ) संसारः,—जगत्, पुत्रकलत्रादिरूपदृश्यमानवस्तुनिचया इत्यर्थः। क्षणभङ्गुराः,—अचिरविनाशिनः।

(ज) कुटुम्बपरिग्रहोऽयम्। तत् धर्मं (भ) मुक्त्वा नान्या गतिः अस्ति। उक्तञ्च,—

अनित्यानि शरीराणि विभवो नैव शाश्वतः।
नित्यं सन्निहितो मृत्युः कर्त्तव्यो धर्मसङ्ग्रहः॥ ८५॥
यस्य धर्मविहीनानि दिनान्यायान्ति यान्ति च।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति॥ ८६॥
आच्छादयति कौपीनं यो दंशमशकापहम्।
शुनः पुच्छमिव व्यर्थं पाण्डित्यं धर्मवर्जितम्॥ ८७॥

(ज) कुटुम्बपरिग्रहः,—स्त्रीपुत्रादिपरिजनः।

(भ) मुक्त्वा—विहाय। गतिः,—उपायः।

* अनित्यानीति।—शरीराणि जीवदेहाः, अनित्यानि नश्वराणि, विभवः सम्पत्, नैव शाश्वतः न हि नित्यः, मृत्युः मरणं, यमः वा, नित्यं सततं, सन्निहितः आसन्नः; अत एव धर्मसङ्ग्रहः धर्मस्य उपार्जनं, कर्त्तव्यः; धर्मस्य अविनश्वरत्वात् लोकान्तरेऽपि सुखहेतुत्वाच्च तदालम्बनमेव श्रेय इति भावः॥ ८५॥

यस्येति।—यस्य दिनानि दिवसाः, धर्मविहीनानि धर्मशून्यानि सन्ति, कैनापि धर्मकार्येण अनुपलक्षितानीव इत्यर्थः, आयान्ति आगच्छन्ति, यान्ति च, स लोहकारस्य कर्मकारस्य, भस्त्रा चर्मप्रसेविका, अन्यद्दोषनाशे चर्मनिर्मितयन्त्रविशेष इति यावत्, ("भस्त्रा चर्मप्रसेविका" इत्यमरः) सा इव, श्वसन् श्वासं त्यजन्नपि, न जीवति न प्राणिति; धर्मबहिर्भूतस्य जीवनं वृथैव इति भावः॥ ८६॥

आच्छादयतीति।—यो जनः, दंशमशकापहं वनमक्षिका-मशकाख्यक्षुद्रकीट-निवारकं, केवलं दंशादिदंशनेभ्य आत्मरक्षार्थं न धर्मार्थमिति भावः, कौपीनं मुनिवार्य्यचीरमिति यावत्; आच्छादयति परिदधाति, तत् धर्मवर्जितं पाण्डित्यं वैराग्य-सूचककौपीनधारणेन संसारोऽयमसार इत्यादिज्ञानोत्पत्तिजन्यविदुषत्वं, शुनः सारमेयस्य, पुच्छमिव लाङ्गूलमिव, व्यर्थं विफलम्; तथा च यस्य चीरादिधारणं केवलं दंश-मशकादिदंशननिवारणार्थं, न तु जीवक्लेशापनोदनाय, तस्य तद्धारणं दंशनमात्रवारण-प्रयोजनं कुक्कुरलाङ्गूलमिव अकिञ्चित्करत्वेन हेयमेवेति निष्कर्षः; कुक्कुरलाङ्गूलं यथा कुटिलमेव तिष्ठति, न कदाऽपि सरलं जायते, तथा अधार्मिकस्य वैराग्यज्ञापकं कौपीनाधरणं कुटिलताचरणार्थमेव, न सरलव्यवहारार्थमिति भावः॥ ८७॥

अपरञ्च,—पुलाका इव धान्येषु पूतिका इव पक्षिषु ।
मशका इव मर्त्येषु येषां धर्मो न कारणम् ॥ ९८ ॥
श्रेयः पुष्पं फलं वृक्षात् दध्नः श्रेयो घृतं स्मृतम् ।
श्रेयस्तैलञ्च पिण्याकात् श्रेयान् धर्मस्तु मानुषात् ॥९९॥
सृष्टा मूत्रपुरीषार्थमाहाराय च केवलम् ।
धर्महीनाः परार्थाय पुरुषाः पशवो यथा ॥ १०० ॥
श्रेयं सर्वेषु कृत्येषु शंसन्ति नयपण्डिताः ।
बह्वन्तरायुक्तस्य धर्मस्य त्वरिता गतिः ॥ १०१ ॥

पुलाका इति ।—धर्मः येषां मनुष्याणां न कारणं न प्रमाणमित्यर्थः, संसारस्थिता-विति शेषः, ये धर्मं प्रमाणीकृत्य न व्यवहरन्तीति भावः, ते धान्येषु मध्ये, पुलाका इव अल्पसारशून्यधान्यविशेषा इव, पक्षिषु पूतिका इव तदाख्यक्षुद्रपक्षिविशेषा इव, मर्त्येषु मरणधर्मिषु, प्राणिषु इति यावत्, मशका इव, अतिहीना इति भावः ॥ ९८ ॥

श्रेय इति ।—वृक्षात् पुष्पं फलञ्च श्रेयः श्रेष्ठं, दध्नः घृतं श्रेयः स्मृतं, पिण्याकात् तिलकल्कात्, ("अथ सिक्थके तिलकल्के च पिण्याकः" इत्यमरः) तैलञ्च श्रेयः, मानुषात् तु धर्म एव श्रेयान् ; [इह सर्वत्र वृक्षादित्यादौ "पञ्चमी विभक्तेः" (२।३।४० पा०) इति पञ्चमी] : यथा हि सारतया वृक्षादिषु फलादीनां श्रेयस्त्वं, मानुषस्यापि तथैव सारत्वेन धर्मस्य श्रेष्ठत्व मिति निष्कर्षः ॥ ९९ ॥

सृष्टा इति ।—ये पुरुषाः, केवलं मूत्रपुरीषार्थं मलमूत्रत्यागार्थं, तथा आहाराय च भोजनार्थञ्च, सृष्टाः निर्मिताः, विधात्रेति शेषः, ते धर्महीनाः पुरुषाः, पशवो यथा गवादय इव, परार्थाय अन्येषां प्रयोजनाय, भवन्तीति शेषः ; जनाः नीचोचितं कर्म साधयन्तीत्यर्थः ; उत्तमपुरुषार्थरूपधर्मज्ञानापेक्षणात् इथैव तेषां जन्म इति भावः ॥ १०० ॥

श्रेय इति ।—नयपण्डिताः नीतिज्ञा जनाः, सर्वेषु निखिलेषु, कृत्येषु कार्येषु, धर्मानुष्ठानव्यतिरिक्तेषु इति भावः, श्रेयं श्रियतां, विविच्य करणमित्यर्थः, शंसन्ति प्रशंसन्ति ; विवेकसहकृतकार्यस्य नियतफलोत्पादकत्वादिति भावः; किन्तु बह्वन्तराय-युक्तस्य बहुविघ्नसमन्वितस्य, धर्मस्य गतिः त्वरिता सवेगा ; कालविलम्बे सति विघ्ना-ऽऽपातस्य सम्भवात् धर्मः विचारं विनैव त्वरितम् अनुष्ठातव्यः, "शुभस्य शीघ्रम्" इति नीतिस्मरणात् इति भावः ॥ १०१ ॥

सङ्क्षेपात् कथ्यते धर्मो जनाः ! किं विस्तरेण वः ।
परोपकारः पुण्याय पापाय परपीड़नम् ॥ १०२ ॥
श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्' ॥ १०३ ॥

अथ तस्य तां धर्मोपदेशनां श्रुत्वा शशक आह,—'भो भोः कपिञ्जल ! एष नदीतीरे तपस्वी धर्मवादी तिष्ठति, तदेनं पृच्छावः'। कपिञ्जल आह,—'ननु स्वभावतोऽस्माकं शत्रुभूतोऽयमस्ति ; तत् दूरे स्थितौ पृच्छावः ; कदाचित् अस्य (अ) व्रतवैकल्यं सम्पद्यते'। ततो दूरस्थितौ ऊचतुः,—'भो भोः तपस्विन् ! धर्मोपदेशक ! आवयोर्विवादो वर्त्तते ; तत् धर्मशास्त्रद्वारेण अस्य (ट) निर्णयं कुरु ; यो हीनवादी, स ते भक्ष्यः' इति। स आह,—'भद्रौ ! मा मैवं वदतं, निवृत्तोऽहं (ठ) नरकपातकमार्गात्, अहिंसैव धर्ममार्गः। उक्तञ्च,—

सङ्क्षेपादिति।—हे जनाः ! सङ्क्षेपात् वः युष्मभ्यम्, [अत्र क्रियायोगात् चतुर्थी] धर्मः कथ्यते, विस्तरेण किम ? बाहुल्येन न प्रयोजनमित्यर्थः, परोपकारः पुण्याय, परपीड़नं पापाय, भवतीति शेषः ; तथा च परोपकारकरणम् एव जगति मुख्यो धर्मः, परपीड़नन्तु महत पापम् इति निष्कर्षः ॥ १०२ ॥

श्रूयतामिति।—धर्मस्य सर्वस्वं सारभूतमित्यर्थः, 'यत' 'तत्' इति पदद्वयमध्याहरणीयं, श्रूयतां, श्रुत्वा च अवधार्यतां निश्चीयताम् ; आत्मनः प्रतिकूलानि विरुद्धानि, अस्य क्लेशकराणीत्यर्थः, परेषाम् [अत्र सर्वनामत्वं चिन्त्यं. "पराणाम्" इति तु सम्यक्, व्यवस्थायामेव पूर्वादेः सर्वनामत्वस्वीकारादिति दिक्] अन्येषां सम्बन्धे, न समाचरेत् न कुर्यात्, येन कर्मणा परकृतेन आत्मा क्लिश्यते, तत् कर्म परान् प्रति न प्रयुञ्जीत इति निष्कर्षः ; आत्मवत् सर्वभूतानि द्रष्टव्यानीति भावः ॥ १०३ ॥

(अ) व्रतवैकल्यं—व्रतभङ्गः, अस्माद्वधस्वीकारादिति भावः।

(ट) निर्णयं—निश्चयं, विचारद्वारा सत्यमिथ्यानिरूपणमित्यर्थः। हीनवादी—मिथ्यावादीत्यर्थः।

(ठ) नरकेति।—नरके पातयतीति नरकपातकः, यः मार्गः,—पन्थाः, तस्मात्। धर्ममार्गः,—धर्मस्य पन्थाः।

अहिंसापूर्वको धर्मो यस्मात् सद्भिरुदाहृतः।
यूकमत्कुणदंशादींस्तस्मात् तानपि रक्षयेत् ॥ १०४ ॥
हिंसकान्यपि भूतानि यो हिनस्ति स निर्घृणः।
स याति नरकं घोरं किं पुनर्यः शुभानि च ? ॥ १०५ ॥

एतेऽपि ये याज्ञिका यज्ञकर्मणि पशून् व्यापादयन्ति, ते मूर्खाः (ड) परमार्थं श्रुतेः न जानन्ति। तत्र किल एतदुक्तम्,—(ढ) 'अजैः यष्टव्यम्', 'अजाः',—व्रीहयः तावत् सप्तवार्षिकाः कथ्यन्ते, न पुनः पशुविशेषाः। उक्तञ्च,—

वृक्षांश्छित्त्वा पशून् हत्वा कृत्वा रुधिरकर्दमम्।
यद्येवं गम्यते स्वर्गं नरकं केन गम्यते ? ॥ १०६ ॥

तत्र अहं भक्षयिष्यामि ; परं जयपराजयनिर्णयं करिष्यामि। *

अहिंसेति।—यस्मात् सद्भिः साधुभिः, धर्मः अहिंसापूर्वकः अहिंसा पूर्वं प्रधानं यस्य तथाविधः, उदाहृतः उक्तः, 'अहिंसा एव परमो धर्मः' इति कथितः इत्यर्थः, तस्मात् तान् क्षुद्रानिति भावः, यूकमत्कुणदंशादीन् अपि रक्षयेत् [स्वार्थे णिच्] मा हिंस्यात्, अन्येषां मानवादीनान्तु का कथा इति भावः ॥ १०४ ॥

हिंसकानीति।—यः हिंसकानि हिंसाकारकाणि, प्राणिपीडकानीत्यर्थः, अपि भूतानि प्राणिनः, हिनस्ति, स निर्घृणः निर्दयः, अपि च, स हिंसकहिंसकोऽपीत्यर्थः, घोरं भीषणं, नरकं याति ; यस्य शुभानि अहिंसकानि भूतानि, हिनस्तीति शेषः, तस्य पुनः किम् ? वक्तव्यमिति शेषः, अवश्यमेव तेन अतिघोरे नरके गन्तव्यमिति भावः ॥ १०५ ॥

(ङ) परमार्थं—याथार्थ्यम्। श्रुतेः,—वेदस्य।

(ढ) अजैः,—छागैः। यष्टव्यं—यागः कर्त्तव्यः। व्रीहयः,—धान्यानि। सप्तवार्षिकाः,—सप्तवर्षसुस्थिताः, वर्षसप्तकस्थ पुराणानि धान्यानीत्यर्थः।

वृक्षानिति।—वृक्षान् छित्त्वा, यूपार्थमिति भावः, पशून् हत्वा, यागार्थमिति भावः, रुधिरेण तेषां शोणितेन, कर्दमं कृत्वा यदि एव चेत्, स्वर्गं [अत्र कर्मणि अधिकरणविवक्षया सप्तमी] गम्यते, लोकैरिति शेषः, तदा नरकं केन गम्यते ? ते एव नरकगामिनः, न अन्ये केऽपीत्यर्थः ; पशुवधादिकं विधाय यत् यज्ञनस्तिष्ठन्ति लोकाः, तत् केवलं नरकायेति भावः ॥ १०६ ॥

किन्तु अहं हृद्दः, दूरात् युवयोः (ण) भाषान्तरं सम्यक् न शृणोमि; एवं ज्ञात्वा मम समीपवर्त्तिनौ भूत्वा मम अग्रे (त) न्यायं वदतं, येन विज्ञाय (थ) विवादपरमार्थं वचो वदतो मे (द) परलोकबाधो न भवति। उक्तञ्च यतः,—

मानाद्वा यदि वा लोभात् क्रोधाद्वा यदि वा भयात्।
यो न्यायमन्यथा ब्रूते स याति नरकं नरः॥ १०७॥
पञ्च पञ्चनृते हन्ति दश हन्ति गवानृते।
शतं कन्याऽनृते हन्ति सहस्रं पुरुषानृते॥ १०८॥

(ण) भाषान्तरं—वाक्यभेदम्।

(त) न्यायं—युक्तियुक्तं, सत्यमित्यर्थः।

(थ) विवादपरमार्थं—विवादे—परस्परविरुद्धवादे, व्यवहारकर्मणि इत्यर्थः, परमार्थं—सिद्धान्तानुगुणतया प्रकृतार्थं, कस्य सत्याभियोगः, कस्य वा मिथ्या? इत्यं नयसिद्धमित्यर्थः। वचः,—वाक्यं, जयपराजयसूचकं सिद्धान्तमित्यर्थः।

(द) परलोकबाधः,—स्वर्गप्रतिरोधः, अन्यायविचारकरणादिति भावः।

धनाधिकरणे विचारार्थमुपगतयोर्वादिप्रतिवादिनोः अन्यतरपक्षपातकरणे प्राड्-विवाकानां दोषमाह, मानादिति।—यः नरः, मानात् वा सम्मानलाभादेव इत्यर्थः, अत्र वाशब्दः एवार्थे; बलीयसा जयसम्पादने स्वस्य विशेषसम्मानलाभो भवेदित्याशयेति भावः; यदि वा लोभात् लाभसाध्यात्, धनादीनाम् इति शेषः, वा अथवा, क्रोधात् कोपात्, केनापि कारणेन विचारकस्य क्रोधोत्पत्तेरित्यर्थः, यदि वा अथवा, भयात् त्रासात्, बलवत्तरपक्षादित्यर्थः, न्यायं सङ्गतं, सत्यमिति भावः, अन्यथा ब्रूते विरुद्धं वदति, पक्षपातात् असङ्गतं कथयति इति यावत्, स नरकं याति॥ १०७॥

मिथ्याकथनस्य विषयभेदेन पापन्यूनाधिक्यं दर्शयति, पञ्चेति।—पञ्चनृते साधारणपशुविषयकमिथ्याकथने, पञ्च, पुरुषानिति शेषः, हन्ति नरके पातयतीति भावः, गवानृते गोरूपविशेषपशुविषयकमिथ्याकथने, दश, पुरुषान् इति शेषः, हन्ति; कन्याऽनृते कन्याविषयकमिथ्याकथने, शतं हन्ति; पुरुषानृते पुरुषविषयकमिथ्याकथने, सहस्रं, पुरुषान् इति शेषः, हन्ति; अतो न मिथ्या वक्तव्यमिति भावः। (मनुसंहितायां द्वितीयाध्याये ८८ श्लोकेऽपि)॥ १०८॥

उपविष्टः सभामध्ये यो न वक्ति स्फुटं वचः ।
तस्माद्दूरेण सत्याज्यो न्यायो वा कीर्त्तयेदृतम् ॥ १०९ ॥

तस्मात् (ध) विश्वस्यो मम (न) कर्णोपान्तिके स्फुटं निवेदयतम्' । किं बहुना ? तेन (प) क्षुद्रेण तथा (फ) तौ तूर्णं विश्वासितौ, यथा तस्य (ब) उत्सङ्गवर्त्तिनौ सञ्जातौ ; ततश्च तेनापि (भ) समकालम् एव एकः (म) पदान्तेन आक्रान्तः, अन्यः (य) दंष्ट्राक्रकचेन च ; ततो गतप्राणौ भक्षितौ इति । अतोऽहं ब्रवीमि,—'क्षुद्रमर्थपतिं प्राप्य' इत्यादि ।

भवन्तोऽपि एनं दिवाऽन्धं क्षुद्रम् अर्थपतिम् आसाद्य नावज्ञाः सन्तः प्रश्न-कपिञ्जलमार्गेण यास्यन्ति । एवं ज्ञात्वा यदुचितं, तद्विधेयम् अतःपरम्' ।

मिथ्याभाषणे एवं दोषमुक्त्वा इदानीमर्थिप्रत्यर्थिनौ सत्यं वाचयितुं प्रवोदयति, उपविष्ट इति ।—यः, जन इति शेषः, सभामध्ये धर्माधिकरणे इत्यर्थः, उपविष्टः सन्, स्फुटं विशदं, स्पष्टमित्यर्थः, यथा तथा वचः वाक्यं, सत्यमिति भावः, न वक्ति न भाषते, विशदभावेन तत्त्वार्थं न प्रकाशयति इति भावः, सः अस्फुटभाषी, मिथ्यावादी इति यावत्, तस्मात् अस्फुटकथनात्, यथार्थस्याप्रकाशनादित्याशयः, दूरेण दूरादेव, त्याज्यः परिवर्जनीयः, सभामण्डपात् बहिष्कारणीय इत्यर्थः ; न्यायो वा तदभिहिता युक्तिरपीत्यर्थः, दूरेण त्याज्यः इत्यनुषङ्गः, न विश्वसनीय इत्यर्थः ; तर्हि एतादृशवस्तुस्थितौ सत्यां किमु कर्त्तव्यमिति प्रश्ने सामान्यतः फलितमाह, ऋतमिति ।—ऋतं सत्यं, कीर्त्तयेत् कथयेत् ॥ १०९ ॥

(ध) विश्वस्यौ—निःशङ्कौ, विश्वस्तौ वा ।
(न) कर्णोपान्तिके—कर्णसमीपे । स्फुटं—स्पष्टं, सत्यमित्यर्थः ।
(प) क्षुद्रेण—नीचेन, पापाशयेनेति यावत् ।
(फ) तौ—अजकपिञ्जलौ । तूर्णं—शीघ्रम् ।
(ब) उत्सङ्गवर्त्तिनौ—क्रोडस्थितौ, समीपस्थौ इत्यर्थः ।
(भ) समकालं—युगपत्, एकदा इत्यर्थः ।
(म) पदान्तेन—चरणाग्रेण ।
(य) दंष्ट्राक्रकचेन—दन्तरूपेण करपत्रेण ।

अथ तस्य तत् वचनम् आकर्ण्य 'साधु अनेन अभिहितम्' इति उक्त्वा 'भूयोऽपि पार्थिवार्थं समेत्य मन्त्रयिष्यामहे' इति ब्रुवाणाः सर्वे पक्षिणो यथाऽभिमतं जग्मुः; केवलम् अवशिष्टः (र) भद्रासनोपविष्टः अभिषेकाभिमुखो दिवान्धः क्रकालिकया सह आस्ते; आह च,—'कः कोऽत्र भोः! किमद्यापि न क्रियते मम अभिषेकः?' इति श्रुत्वा क्रकालिकया अभिहितं,—'भद्र! तव अभिषेके कृतोऽयं विघ्नो वायसेन; गताश्च सर्वेऽपि विहगाः (ल) यथेप्सितासु दिक्षु, केवलमेकोऽयं वायसोऽवशिष्टः केनापि हेतुना तिष्ठति, तत् त्वरितमुत्तिष्ठ, येन त्वां (व) स्वाश्रयं प्रापयामि'। तत् श्रुत्वा सविषादम् उलूको वायसम् आह,—'भो भो दुष्टात्मन्! किं मया ते अपकृतं, यत् राज्याभिषेको मे विघ्नितः? तत् अद्य प्रभृति (श) सान्वयम् आवयोर्वैरं सञ्जातम्। उक्तञ्च,—

रोहति सायकैर्विद्धं छिन्नं रोहति चासिना।
वचो दुरुक्तं बीभत्सं न प्ररोहति वाक्क्षतम्' ॥ ११० ॥

एवमभिधाय क्रकालिकया सह स्वाश्रयं गतः।

(र) भद्रासनोपविष्टः,—[भद्राय लोकक्षेमाय आस्यते अत्रेति व्युत्पत्त्या आसेरधिकरणे ल्युट्] भद्रासनं—नृपासनं, ("नृपासनं यत्तत् भद्रासनम्" इत्यमरः) तत्र उपविष्टः,—आसीनः।

(ल) यथेप्सितासु—यथाऽभिलषितासु, [अत्र "सुसुपा" इति समासः]।

(व) स्वाश्रयं—स्वस्थानम्।

(श) सान्वयं—सवंशं, कुलानुक्रमनित्यर्थः।

रोहतीति।—सायकैः शरैः, विद्धं, इत्यादिकम् अङ्गं वा इति शेषः, रोहति पुनः पूर्णं भवति, क्षतं वा सिंचेन वा इति भावः, असिना खड्गेन, छिन्नमपि रोहति, किन्तु वाक्-क्षतं वाचा जनितं क्षतं, दुर्वाक्यविद्धमित्यर्थः, हृदयमिति शेषः, न प्ररोहति न स्वास्थ्य-मापद्यते, न पूर्णताम् अधिगच्छतीति भावः; अतएवयुक्तं दुर्वाक्यं न कदाचित् विस्मर्यते लोकैरिति तात्पर्यम्; तस्मात् दुरुक्तं दुष्टं वचः, बीभत्सम् अतीव दुष्टाक्षरम् ॥११०॥

अथ भयव्याकुलो वायसो व्यचिन्तयत्,—'अहो ! अकारणं (ष) वैरम् आसादितं मया ; किमिदं (स) व्याहृतम् !! उक्तञ्च,—

अदेशकालज्ञमनायतिक्षमं
यदप्रियं लाघवकारि चात्मनः ।
योऽब्राव्रवीत् कारणवर्जितं वचः
न तद्वचः स्यात् विषमेव तद्वचः ॥ १११ ॥
बलोपपन्नोऽपि हि बुद्धिमान् नरः
परं नयेन्न स्वयमेव वैरिताम् ।
भिषक् ममास्तीति विचिन्त्य भक्षयेत्
अकारणात् को हि विचक्षणो विषम् ? ॥ ११२ ॥
परपरिवादः परिषदि न कथञ्चित् पण्डितेन वक्तव्यः ।
सत्यमपि तन्न वाच्यं यदुक्तमसुखाऽऽवहं भवति ॥११३॥

(ष) वैरं—विरोधः, ("वैरं विरोधो विद्वेषः" इत्यमरः) । आसादितं—प्राप्तम् ।

(स) व्याहृतम्—उक्तं, ("व्याहार उक्तिर्लपितम्" इत्यमरः) ।

अदेशेति ।—अत्र संसारे, यः अदेशकालज्ञं देशकालज्ञानवर्जितं, यत्र देशे यस्मिन् काले वा यत् युक्तं, तद्विपरीतमित्यर्थः, अनायतिक्षमं परिणामविषमम् इत्यर्थः, अप्रियम् अप्रीतिकरं, लोकानामिति शेषः, आत्मनः स्वस्य च, लाघवकारि लघुत्वप्रकाशकं, कारणवर्जितम् अकारणञ्च, निर्हेतुकमित्यर्थः, यत् वचः अब्रवीत्, तद्धि तत् वचः, वचः न स्यात् वाक्यमिति संज्ञायोग्यमेव न भवेत्, अपि तु तद्वचः विषमेव, स्यादित्यन्वयः ; विषवत् तत् सदा धीसद्भिरुपेक्ष्यते स्वापकारजननभयादिति भावः। वंशस्थविलं वृत्तम् ॥ १११ ॥

बलोपपन्न इति ।—बुद्धिमान् नरः बलोपपन्नोऽपि सबलोऽपि, स्वयम् आत्मना, परम् अन्यं, वैरितां शत्रुतां, न हि नयेत् नैव प्रापयेत् ; तथा हि, विचक्षणः सदसद्विवेचकः, को हि जनः, मम भिषक् चिकित्सकः, विषवेगनिवारणक्षम इति भावः, अस्ति इति विचिन्त्य अकारणात् हेतुं विना, विषं भक्षयेत् ? न कोऽपीत्यर्थः ; प्रथमतो वैरमुत्पाद्य बलेन पश्चात् तद्दमनयत्नप्रयासः विषभक्षणानन्तरं चिकित्सकानुसन्धानवत् नितरां हेय इति भावः । वंशस्थविलं वृत्तम् ॥ ११२ ॥

परेति ।—पण्डितेन विप्रेण जनेन, परिषदि सभायां, परपरिवादः परनिन्दा,

सुदुष्टशीलैरसकृद्विचारितं
स्वयञ्च बुद्ध्या प्रविचारितात्मयम् ।
करोति कार्य्यं खलु यः स बुद्धिमान्
स एव लक्ष्म्या यशसश्च भाजनम्' ॥ ११४ ॥

एवं विचिन्त्य काकोऽपि प्रयातः । तदा प्रभृति अस्माभिः सह (ङ) कौशिकानाम् अन्वयगतं वैरमस्ति" ।

मेघवर्ण आह,—"तात ! एवं गते अस्माभिः किं कृतम् अस्ति ?" स आह,—"वत्स ! एवं गतेऽपि (क) षाड्गुण्यात् अपरः स्थूलोऽभिप्रायोऽस्ति, तम् (ख) अङ्गीकृत्य स्वयमेव अहं तद्विजयाय यास्यामि, रिपून् वञ्चयित्वा बधिष्यामि च । उक्तञ्च यतः,—

बहुबुद्धिसमायुक्ताः सुविज्ञाना बलोत्कटान् ।
शक्ता वञ्चयितुं धूर्त्ता ब्राह्मणं छागलादिव" ॥ ११५ ॥

कथञ्चित् केनापि प्रकारेण, न वक्तव्यः ; यत् उक्तं वचनम्, असुखाऽऽवहम् अप्रीतिकरं, लोकस्येति शेषः, भवति, तत् सत्यमपि न वाच्यम् ; "न ब्रूयात् सत्यमप्रियम्" इति नीतिस्मरणादिति भावः । आर्य्या छन्दः ॥ ११३ ॥

सुदुष्टशीलैरिति ।—यः आर्यैः विज्ञैः, सुदुष्टैः सह असकृत् पुनः पुनः, विचारितं विशेषेण कर्त्तव्यतया निर्द्धारितं, स्वयञ्च बुद्ध्या निजबुद्ध्यनुसारेणेत्यर्थः, प्रविचारितात्मयं प्रविचारितः विशेषेण विचार्य्य निर्णीतः, आशयः आधारः, कस्मिन् कौटजं कार्य्यं करणीयमित्येवंरूपः इति भावः, यस्य तथाविधः प्रकृष्टाविचारसङ्कल्पः इत्यर्थः, कार्य्यं करोति, स खलु स एव बुद्धिमान्, स एव लक्ष्म्याः सम्पदः, यशसश्च भाजनं पात्रं, भवतीति शेषः ; न कदाचिदप्यसौ विपद्यते इति फलितम् ॥ ११४ ॥

(ङ) कौशिकानां—पेचकानां, ("महेन्द्रगुग्गुलूलूककव्यालयाडिषु कौशिकः" इत्यमरः) । अन्वयगतं—वंशपरम्परागतम् ।

(क) षाड्गुण्यात्—सन्ध्यादिगुणषट्कात् । अपरः,—अन्यः । स्थूलः,—महान्, अतिसूक्ष्मषाड्गुण्यादिचिन्तायाः बहायासकरत्वेन ततः सुकरः तीक्ष्णधीमात्रसाध्योऽर्थसिद्धिकारकः इत्यर्थः । अभिप्रायः,—उपायः, कौशलमिति यावत् ।

(ख) अङ्गीकृत्य—अवलम्ब्य ।

बहुबुद्धीति ।—बहुबुद्धिसमायुक्ताः विविधविषयेषु तीक्ष्णमतिसम्पन्नाः, सुविज्ञानाः

मेघवर्णं आह,—"कथमेतत् ?" सोऽब्रवीत्,—

कथा ४ ।

"कस्मिंश्चित् अधिष्ठाने मित्रशर्मा नाम ब्राह्मणः (ग)क्रताग्नि-होत्रपरिग्रहः प्रतिवसति स्म। तेन कदाचित् माघमासे (घ) सौम्यानिले प्रवाति, मेघाच्छादिते गगने, मन्दं मन्दं प्रवर्षति (ङ) पर्जन्ये, पशुप्रार्थनाय ग्रामान्तरे गत्वा कश्चित् यजमानो याचितः,—'भो यजमान! आगामिन्याम् अमा-वस्यायाम् अहं यक्ष्यामि यज्ञम्; तत् देहि मे पशुम् एकम्'।

अथ तेन तस्य शास्त्रोक्तः (च) पीवरतनुः पशुः प्रदत्तः। सोऽपि तं (छ) समर्थम् इतश्चेतश्च गच्छन्तं विज्ञाय स्कन्धे कृत्वा सत्वरं स्वपुराभिमुखः प्रतस्थे।

अथ तस्य गच्छतो मार्गे त्रयो धूर्ताः क्षुत्क्षामकण्ठाः सम्मुखा बभूवुः। तैस्तं तादृशं पीवरतनुं स्कन्धे आरूढम् अवलोक्य मिथोऽभिहितम्,—'अहो! अस्य पशोः भक्षणात्

सुविचक्षणाः, जनाः इति शेषः, धूर्ताः वञ्चकाः, ग्राम्यं छागलादिव, वन्यौरभ्रादीन् प्रवरान्, अपि अनूनमिति शेषः, वञ्चयितुं प्रतारयितुं, स्वाधिकारात् विश्वासयितुमिति भावः, मन्ये मन्यामः, भवन्तीति शेषः ॥ ११५ ॥

(ग) कृतेति।—कृतः अग्निहोत्रपरिग्रहः,—अग्निहोत्रस्य—नित्यं गृहस्थापिते वैवाहिकसंस्कृतायौ होमकर्मणि नियतविशेषस्य, परिग्रहः,—स्वीकारः येन तथोक्तः, अग्निहोत्री, साग्निक इति यावत्।

(घ) सौम्यानिले—शीतलवायौ। प्रवाति—प्रवहति, [अत्र भावे लसनी]।

(ङ) पर्जन्ये—मेघे। पशुप्रार्थनाय—बलिलाभार्थं, यज्ञोपच्छागयाज्ञार्थ-मित्यर्थः, (पशुर्नूनाऽऽदिदेवाजि नाऽन्यद् पशु दर्शने" इति मेदिनी)।

(च) पीवरतनुः,—स्थूलकायः।

(छ) समर्थं—बलवन्तं, यज्ञकर्मप्रयोगयोग्यमिति भावः। इतश्चेतश्च—अस्यां तस्यां दिशि, सञ्चलादित्यर्थः, [अत्र सार्वविभक्तिकः तसिल्]।

(ज) अद्यतनो हिमपातो व्यर्थतां नीयते ; तत् एनं वञ्चयित्वा पशुम् आदाय (झ) शीतत्राणं कुर्मः'।

अथ तेषाम् एकतमो वेशपरिवर्त्तनं विधाय सम्मुखो भूत्वा (ञ) अपमार्गेण तम् (ट) आहिताग्निम् ऊचे,—'भो भोः (ठ) बालाग्निहोत्रिन् ! किम् एवं जनविरुद्धं हास्यकार्य्यम् अनुष्ठीयते, यदेषः (ड) सारमेयोऽपवित्रः स्कन्धाधिरूढो नीयते ? उक्तञ्च यतः,—

श्वानकुक्कुटचाण्डालाः समस्पर्शाः प्रकीर्त्तिताः।
रामभोष्ट्रौ विशेषेण तस्मात् तान् नैव संस्पृशेत्' ॥ ११६॥

ततश्च तेन कोपाभिभूतेन अभिहितम्,—'अहो ! किमन्धो

(ज) अद्यतनः,—अद्यभवः। हिमपातः,—शीतोऽऽगमः, तुहिनपतनं वा। व्यर्थतां—विफलताम् ; मांसभक्षणात् शरीरे उष्णे सञ्जाते शीतनिवृत्तिः भविष्यति इत्याशयः।

(झ) शीतत्राणं—शीतात् त्राणं—रक्षणम्, आत्मन इति शेषः।

(ञ) अपमार्गेण—अपरमार्गेण, शेन मार्गेण ब्राह्मण आयाति, तद्विपरीतमार्गेणेत्यर्थः, पश्चाद्भागेन वा, आगत्य इति शेषः।

(ट) आहिताग्निं—कृताग्निहोत्रम्। [अत्र 'अग्न्याहितम्' इत्यपि भवति, "वाऽऽहिताग्न्यादिषु" (२।२।३७ पा०) इति सूत्रात्]।

(ठ) बालाग्निहोत्रिन्।—बालः,—शिशुः, अनभिज्ञ इत्यर्थः, स चासौ अग्निहोत्री चेति तत्सम्बुद्धौ ; कदाऽपि प्राक् भवता अग्निहोत्रयागः नानुष्ठित इत्यनुमीयते, अन्यथा कथं सारमेयेण अग्निहोत्रं चिकीर्षुरसि ? इत्याशयात् सोल्लुण्ठम् एवमामन्त्रितमिति श्लेषम्।

(ड) सारमेयः,—सरमा—कुक्कुरी, तस्या अपत्यं पुमान् सारमेयः [सरमाशब्दादपत्यार्थे ढक् प्रत्ययः]।

श्वानेति।—[श्वा एवेति षण्, न टिलोपः] श्वानाः कुक्कुराः, कुक्कुटाश्च, चाण्डालाश्च ते, विशेषेण रामभोष्ट्रौ गर्दभोष्ट्रौ, समस्पर्शाः तुल्यस्पर्शाः, प्रकीर्त्तिताः कथिताः ; तस्मात् तान् श्वानादीन्, नैव संस्पृशेत् ; एतेषां स्पर्शस्य अपवित्रताकरत्वेन तुल्यपापजनकत्वादिति भावः ॥ ११६ ॥

भवान्, यत् पशुं सारमेयं प्रतिपादयसि ?' सोऽब्रवीत्,—'ब्रह्मन् ! कोपः त्वया न कार्य्यः, यथेच्छया गम्यताम्' इति । अथ यावत् किञ्चित् (ढ) अध्वनोऽन्तरं गच्छति, तावत् द्वितीयो धूर्त्तः सम्मुखे समुपेत्य तमुवाच,—'भो ब्रह्मन् ! कष्टं कष्टम् !! यद्यपि (ण) वल्लभोऽयं ते (त) मृतवत्सः, तथाऽपि स्कन्धमारोपयितुमयुक्तम् । उक्तञ्च यतः,—

तिर्य्यञ्चं मानुषं वाऽपि यो मृतं संस्पृशेत् कुधीः ।
पञ्चगव्येन शुद्धिः स्यात् तस्य चान्द्रायणेन च' ॥ ११७ ॥

अथासौ सकोपमिदमाह,—'भोः ! किमन्धो भवान्, यत् पशुं मृतवत्सं वदसि ?' सोऽब्रवीत्,—'भगवन् ! मा कोपं कुरु, अज्ञानान्मयाऽभिहितम् ; तत् त्वम् (थ) आत्मरुचि समाचर' इति । अथ यावत् (द) स्तोकं वनान्तरं गच्छति, तावत् तृतीयोऽन्यवेशधारी धूर्त्तः सम्मुखे समुपेत्य तमुवाच,—भोः !

(ढ) अध्वनः,—पथः । अन्तरं—दूरम् ।

(ण) वल्लभः,—प्रियः ।

(त) मृतवत्सः,—मृतो गोशिशुः ।

तिर्य्यञ्चमिति ।—यः कुधीः दुर्बुद्धिः नरः, मृतं तिर्य्यञ्चं पशुपक्ष्यादिकं, मानुषं वाऽपि संस्पृशेत् परामृशेत्, तस्य मृतस्पृष्टः जनस्य, पञ्चगव्येन पञ्चानां गव्यानां समाहारः पञ्चगव्यम् [इति द्विगुसमासः] तेन दधिदुग्धघृतगोमयगोमूत्ररूपेणेत्यर्थः, भक्षितेनेति शेषः, चान्द्रायणेन च चन्द्रस्य अयनमिव अयनं गतिः यस्य तथाभूतेन ; यद्वा, —चान्द्रे चन्द्रलोके, अयनं गतिः, वासः इति यावत्, येन तादृशेन मासमाध्यव्रतविशेषेणेत्यर्थः, कृष्णप्रतिपदम् आरभ्य पौर्णमासीं यावदनुष्ठेयेनेति यावत्, "एकैकं ग्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत्" इति स्मृत्यादिति भावः ; शुद्धिः तज्जनितपापक्षय इत्यर्थः, स्यात् ॥ ११७ ॥

(थ) आत्मरुचि—स्वाभिलषितं यथा तथा ।

(द) स्तोकम्—अल्पम् । वनान्तरं—वनावयवांशं, वनमध्यमित्यर्थः ।

अयुक्तमेतत्, यत् त्वं (ध) रासभं स्कन्धाधिरूढं नयसि ; तत् त्यज्यतामेषः। उक्तञ्च,—

यः स्पृशेद्रासभं मर्त्यो ज्ञानादज्ञानतोऽपि वा।
सचेलं स्नानमुद्दिष्टं तस्य पापप्रशान्तये ॥ ११८ ॥

तत् त्यजैनं, यावदन्यः कश्चिन्न पश्यति'।

अथासौ तं पशुं रासभं मन्यमानो भयाद्भूमौ प्रक्षिप्य स्वगृहमुद्दिश्य प्रपलायितः। ततस्ते त्रयो मिलित्वा तं पशुमादाय यथेच्छया भक्षितुमारब्धाः। अतोऽहं ब्रवीमि,—'बहुबुद्धिसमायुक्ताः' इत्यादि।

अथवा साध्विदमुच्यते,—

अभिनवसेवकविनयैः प्राघुणिकोक्तैर्विलासिनीरुदितैः।
धूर्तजनवचननिकरैरिह कश्चिदवञ्चितो नास्ति ॥११९॥

किञ्च, दुर्बलैरपि बहुभिः सह विरोधो न युक्तः। उक्तञ्च,—

बहवो न विरोद्धव्या दुर्जया हि महाजनाः।
स्फुरन्तमपि नागेन्द्रं भक्षयन्ति पिपीलिकाः" ॥ १२० ॥

(ध) रासभं—गर्दभम्।

य इति।—यः मर्त्यः ज्ञानात् अज्ञानतो वाऽपि रासभं गर्दभं, स्पृशेत्, तस्य पापप्रशान्तये रासभस्पर्शजनितपातकोपशमायेत्यर्थः, सचेलं स्वपरिधेयोत्तरीयवस्त्रसहितं, स्नानम् उद्दिष्टं कथितम् ॥ ११८ ॥

अभिनवेति।—इह कश्चित् जगति, कश्चित् कोऽपि जनः, अभिनवस्य नवागतस्य, सेवकस्य भृत्यस्य, विनयैः विनीतव्यवहारैः, प्राघुणिकोक्तैः आगन्तुकवचनैः, ("व्याहारेप्सिक आगन्तुरतिथिर्नो गृहागते। प्राघुणिकः प्राघुणकः" इति कोषः) विलासिनीनां नारीणां, दुष्टानामिति भावः, रुदितैः विलापैः, धूर्तजनानां प्रतारकाणां, वचननिकरैः वाक्प्रपञ्चैः, अवञ्चितः अप्रतारितः, नास्ति ; सर्व एव प्रतारितो भवतीत्यर्थः ; एते कार्यार्थमाधनाय मधुरवचनादिभिः जनान् विश्राव्य प्रतारयन्ति इति निष्कर्षः। आर्या छन्दः ॥ ११९ ॥

बहव इति।—बहवः सङ्घशक्तयः इत्यर्थः, दुर्बला अपीति शेषः, न विरोद्धव्याः न

मेघवर्ण आह,—"कथमेतत् ?" स्थिरजीवी कथयति,—

कथा ५ ।

"अस्ति कस्मिंश्चिद्वल्मीके महाकायः (न) कृष्णसर्पोऽतिदर्पो नाम । स कदाचित् (प) विलानुसारमार्गमुत्सृज्य अन्येन लघुद्वारेण निष्क्रमितुमारब्धः । निष्क्रामतश्च तस्य महाकायत्वात् दैववशतया लघुविवरत्वाच्च शरीरे (फ) व्रणः समुत्पन्नः । अथ व्रणशोणितगन्धानुसारिणीभिः पिपीलिकाभिः सर्वतो व्याप्तो व्याकुलीकृतश्च कांश्चि व्यापादयति कांश्चि वा ताड़यति । अथ प्रभूतत्वात् विस्तारितबहुव्रणः क्षतमर्माङ्गोऽतिदर्पः पञ्चत्वमुपागतः । अतोऽहं ब्रवीमि,—'बहवो न विरोद्धव्याः' इत्यादि ।

तत् अचास्ति किञ्चित् मे वक्तव्यं, तदवधार्य्य यथोक्तम् अनुष्ठीयताम्" । मेघवर्ण आह,—"तत् समादेशय, तवादेशो नान्यथा कर्त्तव्यः" । स्थिरजीवी प्राह,—"वत्स ! समाकर्णय तर्हि सामादीनतिक्रम्य यो मया पञ्चम उपायो निरूपितः ;—मां (ब) विपक्षभूतं कृत्वा, अतिनिष्ठुरवचनैः निर्भर्त्स्य, यथा (भ) विपक्षप्रणिधीनां प्रत्ययो भवति, तथा (म) समाहृतबुद्धिरैः

विरोधनीयाः, हि यतः, महाजनाः महान्तः बहवः, समवेता इति भावः, जनाः, दुर्जया जेतुमशक्याः ; तथा हि, पिपीलिकाः क्षुद्रा अपि समवेताः इति भावः, स्फुरन्तं दीप्यमानं, गर्जन्तमिति यावत, क्षतेजसमिति भावः, नागेन्द्रमपि भुजगेन्द्रमपि, भक्षयन्ति ; नातिदुष्करं किञ्चित् सङ्घ कुर्वाणः इति निष्कर्षः ॥ १२० ॥

(न) कृष्णसर्पः,—तीव्रविषधरसर्पविशेषः, [नित्यसमासः] ।

(प) विलानुसारमार्गं—गर्त्तात् बहिर्निःसरणस्य प्रशस्तं पन्थानम् । निष्क्रमितुं —निर्गन्तुम् ।

(फ) व्रणः,—क्षतः, घर्षणादिति भावः ।

(ब) विपक्षभूतं—शत्रुभूतम् ।

(भ) विपक्षप्रणिधीनां—शत्रुचाराणाम् । प्रत्ययः,—विश्वासः ।

(म) समाहृतबुद्धिरैः,—कुतश्चित् आनीतैः रक्षैः ।

आलिप्य, अस्थैव (य) न्यग्रोधस्य अधस्तात् प्रक्षिप्य मां, गम्यतां पर्वतम् ऋष्यमूकं प्रति; तत्र सपरिवारस्तिष्ठ, यावदहं समस्तान् (र) सपक्षान् सुप्रणीतेन विधिना विश्वास्य अभिमुखान् कृत्वा कृतार्थो ज्ञातदुर्गमध्यः दिवसे तान् अन्वतां प्राप्तान् ज्ञात्वा व्यापादयामि। ज्ञातं मया सम्यक्, नान्यथा अस्माकं (ल) सिद्धिरिति; यतो (व) दुर्गम् एतत् अपसार-रहितं केवलं बधाय भविष्यति। उक्तञ्च यतः,—

अपसारसमायुक्तं नयज्ञैर्दुर्गमुच्यते।
अपसारपरित्यक्तं दुर्गं व्याजेन बन्धनम्॥ १२१॥

न च त्वया मदर्थे कृपा कार्या। उक्तञ्च,—

अपि प्राणसमानिष्टान् पालितान् लालितानपि।
भृत्यान् युद्धे समुत्पन्ने पश्येच्छुष्कमिवेन्धनम्॥ १२२॥

(य) न्यग्रोधस्य—वटवृक्षस्य।

(र) सपक्षान्—अनुजीविनः, ("रिपौ वैरिसपत्नारिद्विषद्देवद्विषद्दृषः। द्विड्विपक्षा-हितामित्रविद्वदस्यूग्रावबन्धवः॥" इत्यमरः)। सुप्रणीतेन—सुकल्पितेन। विधिना—उपायेन। अभिमुखान्—मुखापेक्षिणः इत्यर्थः, मां प्रति अनुकूलानिति यावत्।

(ल) सिद्धिः,—फललाभः इत्यर्थः, कार्यसेति शेषः।

(व) दुर्गम् एतत्—अस्माकमावासः इति भावः। अपसाररहितं—पलायनो-पायशून्यमित्यर्थः, गुप्तद्वारविरहितमिति भावः।

अपसारेति।—नयज्ञैः नीतिकुशलैः जनैः, दुर्गम् अपसारसमायुक्तं पलायनोपाय-समन्वितं, गुप्तद्वारविशिष्टमित्यर्थः, कार्यक्षमतीति शेषः, उच्यते; अपसारपरित्यक्तं पलायनमार्गरहितं, दुर्गं व्याजेन छलेन, दुर्गरूपेणेत्यर्थः, बन्धनं कारागृहम्, एवेति शेषः॥ १२१॥

अपीति।—युद्धे समुत्पन्ने समुपस्थिते सति, प्राणसमान् जीविततुल्यान्, इष्टान् प्रियान् अपि, तथा पालितान् रक्षितान्, लालितान् पोषितान् अपि, भृत्यान् परिजनानित्यर्थः, शुष्कम् इन्धनमिव काष्ठम् इव, पश्येत्; लोको यथा यत्नरक्षित-अपि शुष्कं काष्ठं ज्वलत्यग्नौ क्षिपति, तथा विजिगीषुः साहसादपि जनान् युद्धरङ्गे आहुतिं दद्यात् इति भावः॥ १२२॥

तथा च,—प्राणवद्रक्षयेत् भृत्यान् स्वकायमिव पोषयेत्।
सदैकदिवसस्यार्थे यत्र स्याद्रिपुसङ्गमः ॥ १२१ ॥

तत् त्वया अहं न अत्र विषये (ग) प्रतिषेधनीयः" इत्युक्त्वा तेन सह (घ) शुष्ककलहं कर्तुमारब्धः।

अथ अन्ये (ङ) तस्य भृत्याः स्थिरजीविनम् उच्छृङ्खलवचनैः जल्पन्तम् अवलोक्य तस्य वधाय उद्यताः मेघवर्णेन अभिहिताः, —"अहो! निवर्त्तध्वं यूयम्; अहमेवं अस्य शत्रुपक्षपातिनो दुरात्मनः स्वयं निग्रहं करिष्यामि" इत्यभिधाय तस्योपरि समारुह्य, लघुभिश्चञ्चुप्रहारैस्तं प्रहृत्य, आहृतरुधिरेण प्लावयित्वा, तदुपादिष्टम् ऋष्यमूकपर्वतं सपरिवारो गतः।

एतस्मिन्नन्तरे क्रकालिकया (च) हिरण्यनिधीभूतया तत् सर्वं मेघवर्णस्य अमात्यस्य व्यसनम् उलूकराजस्य निवेदितं यत्,— "तव अरिः सम्प्रति भीतः क्वचित् प्रचलितः सपरिवारः" इति। अथ उलूकाधिपः तदाकर्ण्य अस्तमनवेलायां सामात्यः सपरिजनो वायसवधार्थं प्रचलितः, प्राह च,—"त्वर्य्यतां त्वर्य्यताम्!! भीतः शत्रुः पलायनपरः पुण्यैर्लभ्यते। उक्तञ्च,—

प्राणेति।—एकस्य दिवसस्य अर्थे निमित्ते, युद्धदिवसमात्रप्रयोजनार्थमित्यर्थः, तदानीन्तनविपदुद्धारार्थमिति भावः, सदा यावज्जीवमित्यर्थः, भृत्यान् प्राणवत् स्यात् प्राणानिव, रक्षयेत्, तथा स्वकायमिव आत्मशरीरमिव, पोषयेत् प्रतिपालयेत्। स च दिवसः कः इत्याकाङ्क्षायामाह, यत्रेति।—यत्र यस्मिन् दिवसे, रिपुसङ्गमः शत्रुसङ्गमनं, स्यात् रिपुभिः सह सङ्गमः भवेदित्यर्थः, स्वामिनः कर्त्तव्यमिदं यदापिदापतिष्यद्विपदः परित्राणार्थं यावज्जीवं भृत्यप्रतिपालनं, भृत्यस्य च समागमिष्यत्-कादाचित्कस्वामिविपदुद्धारणम्, अतोऽनुचरेण नयेतत् कर्त्तव्यमेवेति भावः ॥१२१॥

(ग) प्रतिषेधनीयः,—निवारणीयः।

(घ) शुष्ककलहम्—अनर्थकविवादं, कृतकविवादमित्यर्थः।

(ङ) तस्य—मेघवर्णस्य। उच्छृङ्खलवचनैः,—अभिष्टवाक्यैः। जल्पन्तं—कथयन्तम्।

(च) हिरण्यनिधीभूतया—अनुपक्षीयधनरत्नादिनिधियुक्तया।

शत्रोः प्रचलने छिद्रमेकमन्यच्च संश्रयम् ।
कुर्वाणो जायते वश्यो व्यग्रत्वे राजसेविनाम्" ॥ १२४ ॥

एवं ब्रुवाणः समन्तात् न्यग्रोधपादपमधः परिवेष्ट्य व्यवस्थितः। यावत् न कश्चित् वायसो दृश्यते, तावत् शाखाग्रम् अधिरूढो हृष्टमनाः (क) वन्दिभिः अभिष्टूयमानोऽरिमर्दनः तान् परिजनान् प्रोवाच,—(ख) "अहो! ज्ञायतां तेषां मार्गः, कतमेन मार्गेण प्रनष्टाः काकाः? तत् यावत् न दुर्गं समाश्रयन्ति, तावत् एव (ग) पृष्ठतो गत्वा व्यापादयामि। उक्तञ्च,—

हृतिमप्याश्रितः शत्रुरबध्यः स्याज्जिगीषुणा ।
किं पुनः संश्रितो दुर्गं सामग्र्या परया युतम्?" ॥१२५॥

अथ एतस्मिन् (घ) प्रस्तावे स्थिरजीवो चिन्तयामास—

शत्रोरिति।—शत्रोः प्रचलने पलायने, एकं छिद्रं रन्ध्रं, पलायनसाधकमित्यर्थः, अन्यच्च संश्रयम् आवासं, पलायितस्य शत्रोरेवेति भावः; राजसेविनां राजसम्बन्धिनां, व्यग्रत्वे शत्रोश्छिद्रानुसरणावासमज्ञानतत्परत्वे; यदि भृत्याः शत्रोश्छिद्रानुसरणार्थमावासमज्ञानार्थञ्च तत्पराः भवन्ति, तर्हीति भावः; कुर्वाणः ज्ञापयित्र्यर्थः, नृप इति शेषः, वश्यः वशं गतः, तेषामिति शेषः, जायते; स्वप्रियकार्य्यकारिणामेव राजा वश्यतां गच्छतीति भावः; पलायनपरस्य शत्रोः छिद्रमावासञ्च सत्वरमनुसन्धाय यूयं राज्ञः प्रियमनुतिष्ठत राजानं वशीकुर्वन्तु इति सन्दर्भाशयः ॥ १२४ ॥

(क) वन्दिभिः,—स्तावकैः। अभिष्टूयमानः,—सम्यक् स्तुतः।

(ख) अहो!—इति सम्बोधनार्थकमव्ययम्। कतमेन मार्गेण—परिदृश्यमानेषु एतेषु बहुषु पथिषु मध्ये केन यथा। प्रनष्टाः,—पलायिताः।

(ग) पृष्ठतः,—पश्चात्।

हृतिमिति।—हृतिं वेष्टनं, ("वेड़ा" इति बङ्गभाषा) आश्रितोऽपि अवलम्बितोऽपि, युद्धोपकरणसामग्रीहीनः केवलं हृतिमाश्रित्य स्थितोऽपि इत्यर्थः, शत्रुः जिगीषुणा विजयार्थिना, नृपेण इति शेषः, अवश्यः विनाशयितुमशक्यः, स्यात्, परया महत्या, सामग्र्या प्रहरणाद्युपायेन, युतं दुर्गं संश्रितः अवलम्बितः, किं पुनः? वक्तव्यम् इति शेषः; तादृशः शत्रुर्जेय एवेति भावः ॥ १२५ ॥

(घ) प्रस्तावे—प्रसङ्गे।

"यत् एते अस्मच्छत्रवः (ङ) अनुपलब्धास्मद्वृत्तान्ता यथाऽऽगतमेव यान्ति ; ततो मया न किञ्चित् कृतं भवति । उक्तञ्च,—

अनारम्भो हि कार्य्याणां प्रथमं बुद्धिलक्षणम् ।
प्रारब्धस्यान्तगमनं द्वितीयं बुद्धिलक्षणम् ॥ १२६ ॥

तदहम् अनारम्भः, न च आरम्भविघातः । तदहमेतान् शब्दं संश्राव्य आत्मानं दर्शयामि" इति विचार्य्य मन्दं मन्दं शब्दमकरोत् । तत् श्रुत्वा ते सकला अपि उलूकाः तद्धाय प्रजग्मुः । अथ तेनोक्तम्,—"अहो! अहं स्थिरजीवी नाम मेघवर्णस्य मन्त्री, मेघवर्णेन एव दृष्टशोम् अवस्थां नीतः ; तन्निवेदयत आत्मस्वाम्यग्रे, तेन सह बहु वक्तव्यम् अस्ति" । अथ तैः निवेदितः स उलूकराजो विस्मयाविष्टस्तत्क्षणात् तस्य सकाशं गत्वा प्रोवाच,—"भो भोः ! किमेतां दशां गतस्त्वम् ? तत् कथ्यताम्" । स्थिरजीवी प्राह,—"देव ! श्रूयतां मदवस्थाकारणम्—अतीतदिने स दुरात्मा मेघवर्णो युष्मद्व्यापादितप्रभूतवायसानां पीड़या युष्माकम् उपरि कोपशोकग्रस्तो युद्धार्थं प्रचलित आसीत् । ततो मया अभिहितं,—'स्वामिन् ! न युक्तं भवतस्तदुपरि गन्तुम् ; बलवन्त एते, बलहीनाश्च वयम् । उक्तञ्च,—

(ङ) अनुपलब्धेति ।—अनुपलब्धः,—अज्ञातः, अस्माकं वृत्तान्तः,—व्यापारः यैः तथाभूताः, अस्मद्वृत्तान्तमजानन्त इत्यर्थः । यथाऽऽगतं—यत्प्रदेशादागतं तत्रैवेत्यर्थः ।

अनारम्भ इति ।—कार्य्याणां, विघ्नबहुलानामिति भावः, अनारम्भः आरम्भाकरणं, हि, प्रथमम् आद्यं, बुद्धिलक्षणं प्रज्ञाचिह्नम् ; सत्यमेतत्, परन्तु समारब्धे किं कारणीयम् ? तदेवाह, प्रारब्धस्येति ।—प्रारब्धस्य कृताऽऽरम्भस्य, अन्तगमनं पारगमनं, सम्यक् कार्य्यस्य साधनम् इत्यर्थः, द्वितीयं बुद्धिलक्षणम् ; विघ्नबाहुल्यप्रदर्शया तन्नाशभयात् बुद्धिमन्तः प्रथमं कार्यं नारभन्ते एव, यदि आरभेरन् तर्हि तत् नूनं निष्पादयेयुरिति भावः ॥ १२६ ॥

बलीयसा हीनबलो विरोधं
न भूतिकामो मनसाऽपि वाञ्छेत्।
न बध्यतेऽत्यन्तबलो हि यस्मात्
व्यक्तं प्रणाशोऽस्ति पतङ्गवृत्तेः॥ १२७॥

तत् तस्य (च) उपायनप्रदानेन सम्भ्रिरेव युक्तः। उक्तञ्च,—

बलवन्तं रिपुं दृष्ट्वा सर्वस्वमपि बुद्धिमान्।
दत्त्वा हि रक्षयेत् प्राणान् रक्षितैस्तैर्धनं पुनः' ॥ १२८॥

तत् श्रुत्वा तेन दुर्जनप्रकोपितेन त्वत्पक्षपातिनं माम् आशङ्कमानेन इमां दशां नीतः। तत् तव पादौ साम्प्रतं मे शरणम्; किं बहुना विघ्नेन, यावत् अहं प्रचलितुं शक्नोमि, तावत् त्वां तस्य आवासे नीत्वा सर्ववायसक्षयं विधास्यामि" इति।

अथ अरिमर्दनः तदाकर्ण्य पितृपितामहक्रमागतमन्त्रिभिः सार्द्धं मन्त्रयाञ्चक्रे। तस्य च पञ्च मन्त्रिणः; तद्यथा,—

बलीयसेति।—भूतिकामः सम्पदर्थी, हीनबलः दुर्बलः, जनः इति शेषः, बलीयसा बलवत्तरेण, [अयमनयोरतिशयेन बलवानित्यर्थे बलवत्-शब्दात् "द्विवचनविभज्या—" (५।३।५७ पा०) इति ईयसुन्प्रत्ययः, ततः "विन्मतोर्लुक्" (५।३।६५ पा०) इति मतुपः लुक्] सह मनसाऽपि विरोधं न वाञ्छेत् नेच्छेत्, न चिन्तयेदित्यर्थः; यस्मात् अत्यन्तबलः अतिप्रबलः, न बध्यते हि नैव जीयते इत्यर्थः, किन्तु पतङ्गस्य वृत्तिरिव वृत्तिर्यस्य तादृशस्य, दुर्बलस्येत्यर्थः, व्यक्तं निश्चितं, प्रणाशः विनाशः, अस्ति; अग्निना पतङ्गवत् प्रबलेन दुर्बलः प्रणश्यते इति भावः। उपजातिः वृत्तम्॥ १२७॥

(च) उपायनप्रदानेन—उपढौकनदानेन।

बलवन्तमिति।—बुद्धिमान् जनः, रिपुं शत्रुं, बलवन्तं प्रबलं, दृष्ट्वा, सर्वस्वमपि प्राणातिरिक्तं सर्वमेव इत्यर्थः, दत्त्वा, तस्मै इति शेषः, प्राणान् रक्षयेत्; हि यतः, तैः प्राणैः, रक्षितैः सद्भिः, पुनः धनं, भवतीति शेषः; प्राणसद्भावे सर्वेषां सद्भावः, स्वजीवनमूलत्वात् सर्वेषां जीव्यवस्तूनाम् इति भावः; "जीवन्नरो भद्रशतानि पश्येत्" इति तात्पर्यम्॥ १२८॥

रक्ताक्षः, क्रूराक्षः, दीप्ताक्षः, वक्रनासः, प्राकारकर्णश्चेति । तत्रादौ रक्ताक्षम् अपृच्छत्,—"भद्र ! एष तावत् तस्य रिपोर्मन्त्री मम हस्तगतः ; तत् किं क्रियताम् ?" इति । रक्ताक्षः आह,—"देव ! किमत्र चिन्त्यते ? (छ) अविचारितमयं हन्तव्यः । यतः,—

हीनः शत्रुर्निहन्तव्यो यावन्न बलवान् भवेत् ।
प्राप्तस्वपौरुषबलः पश्चाद्भवति दुर्जयः ॥ १२९ ॥

किञ्च, स्वयम् (ज) उपागता श्रीस्त्यज्यमाना (झ) अपतीति लोके (ञ) प्रवादः । उक्तञ्च,—

कालो हि सकृदभ्येति यत्नरं कालकाङ्क्षिणम् ।
दुर्लभः स पुनस्तेन कालकर्माचिकीर्षता ॥ १३० ॥

श्रूयते च यथा,—

चितिकां दीपितां पश्य फटां भग्नां ममैव च ।
भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्द्धते" ॥ १३१ ॥

(छ) अविचारितं—विचारम् अकृत्वा, अविविच्यैव इत्यर्थः ।

हीन इति ।—हीनः दुर्बलः, शत्रुः यावत् बलवान् न भवेत्, तावदेव निहन्तव्यः निःशेषेण वध्यः ; यतः प्राप्तस्वपौरुषबलः प्राप्तं स्वं पौरुषं पराक्रमः, बलं सैन्यञ्च, सहायः इत्यर्थः, येन तादृशः सः, पश्चात् परिणामे, दुर्जयः जेतुमशक्यः, भवति ; शत्रुर्हि अप्रबल एव सुजय इति भावः ॥ १२९ ॥

(ज) उपागता—उपस्थिता । श्रीः,—लक्ष्मीः, सम्पदित्यर्थः ।

(झ) अपति—आक्षीणति, अभिसम्पातेन भाविविध्वंससूचकेन द्योतयतीत्यर्थः ।

(ञ) प्रवादः,—प्रसिद्धिः, ऐतिह्यमित्यर्थः ।

काल इति ।—यत् यतः, कालः समयः, सौभाग्योदयश्चेति भावः, कालकाङ्क्षिणं सुखसमयार्थिनं, नरं सकृत् एकवारमेव, अभ्येति प्राप्नोति, न तु प्रतिनियतं, तस्य दुर्लभत्वात् इति भावः ; अतः काले समये, कर्म कार्य्यं, सौभाग्याऽऽपादकमिति भावः, अचिकीर्षता सम्पादयितुमनिच्छता, तेन नरेण, सः कालः, सुखमय इत्यर्थः, पुनर्दुर्लभः दुष्प्रापः ; सुखमये गते पुनस्तत्प्राप्तिर्दुर्घटेति भावः ; अतः रन्ध्रप्रहारी भव इत्याशयः ॥ १३० ॥

चितिकामिति ।—[हे ब्राह्मण ! इति अध्याहार्य्यम्] दीपितां प्रज्वलितां,

अरिमर्दनः प्राह,—"कथमेतत् ?" रक्ताक्षः कथयति,—

कथा ६ ।

"अस्ति कस्मिंश्चित् अधिष्ठाने हरिदत्तो नाम ब्राह्मणः, तस्य च कृषिं कुर्वतः सदा एव (ट) निष्फलः कालः (ठ) अतिवर्त्तते। अथ एकस्मिन् दिवसे स ब्राह्मण (ड) उष्णकालावसाने घर्मार्त्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तः अनतिदूरे वल्मीकोपरि प्रसारितं वृहत्फटायुक्तं भीषणं भुजङ्गमं दृष्ट्वा चिन्तयामास,—'नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता, तेन इदं मे कृषिकर्म विफलीभवति ; तदस्या अहं पूजाम् अद्य करिष्यामि' इति अवधार्य्य कुतोऽपि क्षीरं याचित्वा, (ढ) शरावे निक्षिप्य वल्मीकान्तिकमुपागम्य उवाच,—'भोः क्षेत्रपाल ! मया (ण) एतावन्तं कालं न ज्ञातं यत्, त्वम् अत्र वससि, तेन पूजा न कृता; तत् साम्प्रतं क्षमस्व' इत्येवमुक्त्वा दुग्धञ्च

चितिकां चितां, प्रज्वालनाग्निमिति यावत्, तथा मम भग्नां मर्दिताम्, आहतामित्यर्थः, फटां फणाञ्च, पश्य अवलोकय ; तव पुत्रो मां शिरसि आहतवान्, तेन मम फणा भग्ना, तव पुत्रश्चाहं ततो दष्टवानिति स चितायां दग्ध इति निष्कर्षः ; अतः, भिन्ना चासौ श्लिष्टा चेति तथोक्ता, आदौ खण्डिता पश्चात् पुनर्योजितेत्यर्थः, [ज्ञातानुक्लिनवत् पूर्वकाले कर्मधारयः] या प्रीतिः सा क्षेत्रेण पुनः प्रदार्शितेन इत्यर्थः, न वर्द्धते एव, न तत्र प्रीतिर्भवत्येवेति भावः ॥ १३१ ॥

(ट) निष्फलः,—व्यर्थः, कृषेः फलविरुद्धादिति भावः ।

(ठ) अतिवर्त्तते—अतिक्रामति ।

(ड) उष्णकालावसाने—ग्रीष्मस्यापराह्णे, ग्रीष्मर्तुशेषे वा इत्यर्थः । घर्मार्त्तः,—ग्रीष्मपीडितः । प्रसुप्तः,—शयितः, ("ष्वापः शयननिद्रयोः" इति मेदिनी) । वल्मीकोपरि—वल्मीकम्—"उद" इति प्रसिद्धकीटविशेषैरुन्नतमृत्तिकाकूपः, तदुपरि तदूर्ध्वदेशे इत्यर्थः ।

(ढ) शरावे—मृत्पात्रविशेषे, "शरा" इति वङ्गभाषायां प्रसिद्धे ।

(ण) एतावन्तं कालमिति—["कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा०) इति ज्ञापनार्थं द्वितीया] ।

निवेद्य, गृहाभिमुखं प्रायात्। अथ प्रातः यावत् आगत्य पश्यति, तावत् (त) दीनारम् एकं शरावे दृष्टवान्। एवं च प्रतिदिनमेकाकी समागत्य तस्मै क्षीरं ददाति, एकैकञ्च दीनारं गृह्णाति।

अथ एकस्मिन् दिवसे वल्मीके (थ) क्षीरनयनाय पुत्रं निरूप्य ब्राह्मणो ग्रामान्तरं जगाम। पुत्रोऽपि क्षीरं तत्र नीत्वा संस्थाप्य च पुनर्गृहं समायातः। दिनान्तरे तत्र गत्वा दीनारमेकञ्च दृष्ट्वा गृहीत्वा च चिन्तितवान्,—'नूनं सौवर्णदीनारपूर्णोऽयं वल्मीकः; तत् एनं हत्वा सर्वमेकवारं ग्रहीष्यामि' इत्येवं सम्मधार्य्य अन्येद्युः क्षीरं ददता ब्राह्मणपुत्रेण सर्पः (द) लगुडेन शिरसि ताडितः, ततः कथमपि दैववशात् (ध) असृक्प्राणोवित एव रोषात् तमेव (न) तीव्रविषदशनैः तथा अदशत्, यथा (प) सद्यः पञ्चत्वमुपागतः, स्वजनेश्च नातिदूरे क्षेत्रस्य (फ) काष्ठसञ्चयैः संस्कृतः। अथ द्वितीयदिने तस्य पिता समायातः स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा (ब) तथैव समर्थितवान्, अब्रवीच्च,—

(त) दीनारं—स्वर्णमुद्राभेदम्।

(थ) क्षीरनयनाय—दुग्धप्रापणाय। निरूप्य—नियुज्य।

(द) लगुडेन—दण्डेन।

(ध) असृक्प्राणोवितः,—अत्यक्तप्राणः।

(न) तीव्रविषदशनैः,—तीक्ष्णविषयुक्तदन्तैः।

(प) सद्यः,—तत्क्षणात्, दंशनसमये एव इत्यर्थः। पञ्चत्वमुपागतः,—मृतः।

(फ) काष्ठसञ्चयैः,—काष्ठसमूहैः, प्रज्वलितचिताग्निचितैरित्यर्थः। संस्कृतः,—अग्निसंस्कारः कृतः, दग्धः इति यावत्।

(ब) तथैव—सर्पदंशनरूपविनाशकारणस्य यार्थार्थमेवेत्यर्थः। समर्थितवान्—अनुमोदितवान्, विश्वासघातकस्य अतिलुब्धस्य स्वपुत्रस्य तादृशमृत्युरेव उचितः इति स्वीकृतवानित्यर्थः।

'भूतान् यो नानुगृह्णाति स्वात्मनः शरणागतान्।
भूतार्थास्तस्य नश्यन्ति हंसाः पद्मवने यथा' ॥ ११२ ॥

पुरुषैरुक्तं,—'कथमेतत् ?' ब्राह्मणः कथयति,—

कथा ७।

'अस्ति कस्मिंश्चित् (भ) अधिष्ठाने चित्ररथो नाम राजा, तस्य योधैः सुरक्ष्यमाणं पद्मसरो नाम सरस्तिष्ठति। तत्र च (म) प्रभूता जाम्बूनदमया हंसास्तिष्ठन्ति, (य) षण्मासे षण्मासे (र) पिच्छमेकैकं परित्यजन्ति। अथ तत्र सरसि (ल) सौवर्णो बृहत् पक्षी समायातः। (व) तैरुक्तः,—'अस्माकं मध्ये त्वया न वस्तव्यम्; येन कारणेन अस्माभिः षण्मासान्ते पिच्छैकैकदानं कृत्वा गृहीतमेतत् सरः'। एवञ्च किं बहुना, परस्परं (श) द्वैधम् उत्पन्नम्। स च राज्ञः शरणं गतोऽब्रवीत्, —'देव! एते पक्षिण एवं वदन्ति यत्,—'अस्माकं राजा किं करिष्यति ? न (ष) कस्यापि आवासं दद्मः'। मया च उक्तं,—'न

भूतानिति।—यः स्वात्मनः स्वस्य, शरणागतान् आश्रयप्राप्तान्, भूतान् प्राणिनः, न अनुगृह्णाति न दयते, तस्य भूतार्थाः निश्चितार्थाः, अवधारितविषयाः इत्यर्थः, पद्मवने हंसा यथा हंसा इव, नश्यन्ति हि नाशं प्राप्नुवन्ति एव, दूरं गच्छन्तीत्यर्थः ॥११२॥

(भ) अधिष्ठाने—पुरे, नगरे इत्यर्थः, ("अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि" इत्यमरः)। योधैः,—सैन्यैः।

(म) प्रभूताः,—बहवः। जाम्बूनदमयाः,—हिरण्मयाः। ("—हिरण्यं हेम जाटरूपम्।·····। जाम्बूनदम्—" इत्यमरः)।

(य) षण्मासे—षण्णां मासानां समाहारः षण्मासः तस्मिन्,["इत्तिविषये सङ्ख्यावाचकशब्दस्य पूरणार्थत्वम्" इति नियमात् पूरणार्थता]।

(र) पिच्छं—बर्हं, पक्षमित्यर्थः, ("पिच्छबर्हं नपुंसके" इत्यमरः)।

(ल) सौवर्णः,—सुवर्णमयः।

(व) तैः,—जाम्बूनदमयैः हंसैः।

(श) द्वैधं—विरोधः।

(ष) कस्यापि इति—[सम्बन्धविवक्षया सम्प्रदाने षष्ठी]।

शोभनं युष्माभिः अभिहितम् ; अहं गत्वा राज्ञे निवेदयिष्यामि'। एवं स्थिते (स) देवः प्रमाणम्'। ततो राजा भृत्यान् अब्रवीत्, —'भो भोः ! गच्छत, सर्वान् पक्षिणः (ङ) गतासून् कृत्वा शीघ्रमानयत'। राजादेशानन्तरमेव (क) प्रचेलुः ते। अथ लगुड़हस्तान् राजपुरुषान् दृष्ट्वा तत्र एकेन पक्षिणा हृष्टेन उक्तं,—'भोः स्वजनाः ! न (ख) शोभनम् आपतितम् ; (ग) ततः सर्वैः एकमतीभूय शीघ्रम् (घ) उत्पतितव्यम्'। तैश्च तथा अनुष्ठितम्। अतोऽहं ब्रवीमि,—'भूतान् यो नानुगृह्णाति' इत्यादि'।

इत्युक्त्वा पुनरपि ब्राह्मणः प्रत्यूषे क्षीरं गृहीत्वा, तत्र गत्वा तारस्वरेण सर्पमस्तौत्। तथा सर्पशिरं वल्मीकद्वारान्तर्लीन एव ब्राह्मणं प्रत्युवाच,—'त्वं लोभादत्र आगतः पुत्रशोकमपि विहाय, अतः परं तव मम च प्रीतिर्नोचिता।

चितिकां दीपितां पश्य फटां भग्नां ममैव च।
भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्धते ॥ इति।

तव पुत्रेण यौवनोन्मदेन अहं ताड़ितः, मया स दष्टः ; कथं मया लगुड़प्रहारो विस्मर्त्तव्यः ? त्वया च पुत्रशोकदुःखं कथं विस्मर्त्तव्यम् ?' इत्युक्त्वा बहुमूल्यं क्षीरकमणिं तस्मै दत्त्वा —'अतः परं पुनस्त्वया न आगन्तव्यम्' इति पुनरुक्त्वा विवरान्तर्गतः। ब्राह्मणश्च मणिं गृहीत्वा पुत्रवृद्धिं निन्दन् स्वगृहम् आगतः। अतोऽहं ब्रवीमि,—'चितिकां दीपितां पश्य' इत्यादि।

(स) देवः प्रमाणं—राजा एव यथार्थनिरूपयिता, भवद्भ्यो यद्रोचते, तत् क्रियताम् इत्यर्थः।

(ङ) गतासून्—गतप्राणान्, निहतानित्यर्थः।

(क) प्रचेलुः,—प्रस्थिताः। ते—राजभृत्याः।

(ख) शोभनं—भद्रम्। आपतितम्—उपस्थितम्।

(ग) ततः,—तस्मात् कारणात्। एकमतीभूय—एकमतमवलम्ब्येत्यर्थः।

(घ) उत्पतितव्यम्—उड्डयनीयम्।

तदस्मिन् हते यत्नादेव राज्यमकण्टकं भवतो भवति"। तस्य एतद्वचनं श्रुत्वा क्रूराक्षं पप्रच्छ,—"भद्र! त्वन्तु किं मन्यसे?" सोऽब्रवीत्,—"देव! निर्दयम् एतत्, यदनेन अभिहितम्; यत्कारणं शरणागतो न बध्यते; सुष्ठु खलु इदम् आख्यातम्;—

श्रूयते हि कपोतेन शत्रुः शरणमागतः।
पूजितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः" ॥ १३३ ॥

अरिमर्दनोऽब्रवीत्,—"कथमेतत्?" क्रूराक्षः कथयति,—

कथा ८।

"कश्चित् क्षुद्रसमाचारः प्राणिनां कालसन्निभः।
विचचार महारण्ये घोरः शकुनिलुब्धकः ॥ १३४ ॥
नैव कश्चित् सुहृत् तस्य न सम्बन्धी न बान्धवः।
स तैः सर्वैः परित्यक्तस्तेन रौद्रेण कर्मणा ॥ १३५ ॥

श्रूयते इति।—श्रूयते इदानीमप्याकर्ण्यते, पौराणिकात् अस्माभिरिति शेषः, एतच्चेतिहासरूपत्वादित्याशयः, कपोतेन पक्षिविशेषेण, केनचिदिति शेषः, शरणमागतः आश्रयं प्राप्तः, शत्रुः व्याध इत्यर्थः, पक्षिघातकत्वादिति भावः, यथान्यायं यथार्हं, विधिपूर्वकमित्यर्थः, पूजितश्च, स्वैः निजैः, मांसैः निमन्त्रितः तर्पितश्च। द्वितीयोऽवधारणे ॥ १३३ ॥

तत्कथामवतारयति, कश्चिदिति।—क्षुद्रसमाचारः क्षुद्रः नीचः, समाचारः व्यवहारः यस्य तथोक्तः, प्राणिनां भूतानां, कालसन्निभः यमसदृशः, प्राणिसंहारकत्वादिति भावः, घोरः दारुणः, कश्चित् शकुनिलुब्धकः व्याधः, महारण्ये निबिडवने, विचचार बभ्राम ॥ १३४ ॥

नैवेति।—तेन रौद्रेण दारुणेन, प्राणिहिंसारूपेण इत्यर्थः, कर्मणा कार्येण हेतुना, कश्चित् जनः, तस्य व्याधस्य, न सुहृत् न मित्रं, न सम्बन्धी न सम्पर्कवान्, न बान्धवः न ज्ञातिः, तत्समीपे आसीदिति शेषः; स व्याधः, तैः सर्वैः सुहृदादिभिः, परित्यक्तः, जनैरिति शेषः; को हि नाम क्रूरकर्मणा दुर्जनेन सह सम्बन्धं स्वीकरोति? इति भावः ॥ १३५ ॥

अथवा,—ये नृशंसा दुरात्मानः प्राणिनां प्राणनाशकाः ।
उद्वेजनीया भूतानां व्याला इव भवन्ति ते ॥ १३६ ॥
स पञ्जरकमादाय पाशञ्च लगुडं तथा ।
नित्यमेव वनं याति सर्वप्राणिविहिंसकः ॥ १३७ ॥
अन्येद्युर्भ्रमतस्तस्य वने काऽपि कपोतिका ।
जाता हस्तगता तां स प्राक्षिपत् पञ्जरान्तरे ॥ १३८ ॥
अथ कृष्णा दिशः सर्वा वनस्थस्याभवन् घनैः ।
वातवृष्टिश्च महती क्षयकाल इवाभवत् ॥ १३९ ॥
ततः सन्त्रस्तहृदयः कम्यमानो मुहुर्मुहुः ।
अन्वेषयन् परित्राणमाससाद वनस्पतिम् ॥ १४० ॥

ये इति ।—ये जनाः, नृशंसाः निष्ठुराः, दुरात्मानः दुराचाराः, प्राणिनां प्राणनाशकाः, ते व्याला इव हिंसजन्तव इव, भूतानां प्राणिनाम्, उद्वेजनीया भीतिजनकाः, भवन्ति, [उत्पूर्वात् विजतेः कर्त्तरि अनीयर्प्रत्ययः प्रयोगादेव साधुर्बोद्धव्यः, अन्यत्रापि दृश्यते च, यथा—"वाक्यम्" इत्यत्र वसेः कर्त्तरि तव्यप्रत्ययः] ॥१३६॥

स इति ।—सर्वप्राणिविहिंसकः सकलभूताहिंसारतः, स व्याधः, पञ्जरकं क्षुद्रपिञ्जरं, (पिँजरा) पाशं रज्जुं, तथा लगुडं दण्डञ्च, आदाय गृहीत्वा, नित्यमेव प्रतिदिनमेव, वनं याति ॥ १३७ ॥

अन्येद्युरिति ।—अन्येद्युः ["सद्यःपरुत्—" (५।३।२२ पा०) इति अन्यशब्दात् द्युस्प्रत्ययः निपातितः] अन्यस्मिन् दिने, वने भ्रमतः विचरतः, तस्य व्याधस्य, काऽपि कपोतिका क्षुद्रकपोती हस्तगता हस्तप्राप्ता, जाता, स व्याधः, तां कपोतिकां, पञ्जरान्तरे पञ्जरमध्ये, प्राक्षिपत् निक्षिप्तवान् ॥ १३८ ॥

अथेति ।—वनस्थस्य वने तिष्ठत एव तस्य, वनस्थं तलनाट्येत्यर्थः, ["षष्ठी चानादरे" (२।३।३८ पा०) इति अनादरे षष्ठी], सर्वा दिशः, घनैः मेघैः, कृष्णा नीलवर्णाः, आच्छन्ना इत्यर्थः, अभवन् ; तथा क्षयकाल इव प्रलयकाल इव, महती प्रबला, वातवृष्टिः वायुना सह वृष्टिश्च, [वायुयुक्ता वृष्टिरिति "शाकपार्थिवादीनां—" (वा०) इति उत्तरपदलोपी कर्मधारयः] अभवत् ॥ १३९ ॥

तत इति ।—ततः अनन्तरं, व्याधः इति कर्तृपदमत्र अध्याहार्यम् ; सन्त्रस्तं भीतं, हृदयं यस्य तथोक्तः, तथा मुहुः मुहुः पुनः पुनः, कम्यमानः वेपमानशरीर इत्यर्थः,

मुहूर्त्तं पश्यतं यावद्दृश्यत् विमलतारकम् ।
प्राप्य वृक्षं वदत्येव 'योऽत्र तिष्ठति कश्चन ॥ १४१ ॥
तस्याहं शरणं प्राप्तः स परित्रातु मामिति ।
शीतेन म्रियमाणञ्च क्षुधया गतचेतनम्' ॥ १४२ ॥
अथ तस्य तरोः स्कन्धे कपोतः सुचिरोषितः ।
भार्य्याविरहितस्तिष्ठन् विललाप सुदुःखितः ॥ १४३ ॥
'वातवर्षी महानासीन्न चागच्छति मे प्रिया ।
तया विरहितं ह्येतत् शून्यमद्य गृहं मम ॥ १४४ ॥

स्वम्, परित्राणम् आत्मरक्षाम्, अन्वेषयन् [स्वार्थे णिचि, अन्वेषं कुर्वन्नित्यर्थे "तत्करोति—" (ग०) इति णिचि वा साध्यं] विचिन्वन्, वनस्पतिम् अपुष्पफलवन्महातरुविशेषम्, ("अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः" इति मनुः) आससाद प्राप ॥ १४० ॥

मुहूर्त्तमित्यादि ।—मुहूर्त्तम् अल्पक्षणमात्रेण इत्यर्थः, ["कालाध्वनो—" (२।३।५ पा०) इति द्वितीया] यावत् अन्तरीक्ष, यावत् विमलाः प्रसन्नाः, तारका यत्र तादृशं, तारकाभीभितमित्यर्थः, पश्यति, [अत्र आत्मनेपदमार्षम्] दृष्ट्वेत्यर्थः, मेघापगमादिति भावः, तावदिति ऊहनीयम् ; वृक्षं तं वनस्पतिं, प्राप्यैव वदति उवाच इत्यर्थः, क्विमित्याह, य इति ।—अत्र वनस्पतौ, यः कश्चन, प्राणीति शेषः, तिष्ठति, अहं तस्य शरणम् आश्रयं, प्राप्तः, स शीतेन म्रियमाणम् अत्यर्थं पीड्यमानं, तथा क्षुधया गतचेतनञ्च अचेतनप्रायमित्यर्थः, मां परित्रातु इति रक्षतीति, शीतात् क्षुधाऽनलाच्चेति भावः ॥ १४१॥१४२ ॥

अथेति ।—अथ अनन्तरं, तस्य तरोः वनस्पतेः, स्कन्धे प्रकाण्डे, स्कन्धशाखायामित्यर्थः, सुचिरोषितः सुचिरमुषितः, ["अत्यन्तसंयोगे च" (२।१।२९ पा०) इति द्वितीयासमासः] बहुकालसहवासवान् इत्यर्थः, कपोतः, कश्चिदिति शेषः, भार्य्याविरहितः प्रागुक्तकपोतिकाविधुरः, अत एव सुदुःखितः अतिदुःखितः, तिष्ठन् विललाप विलापमकरोत् ॥ १४३ ॥

विलापप्रकारमाह, वातवर्ष इति ।—महान् प्रबलः, वातवर्षः वायुना सह वृष्टिः, आसीत्, मे मम, प्रिया भार्य्या, कपोतिका इत्यर्थः, न च आगच्छति, अद्य तया प्रियया, विरहितं शून्यं, मम एतत् गृहं, शून्यं हि शून्यमेव, प्रतिभातीति शेषः ॥१४४॥

पतिव्रता पतिप्राणा पत्युः प्रियहिते रता।
यस्य स्यादीदृशी भार्या धन्यः स पुरुषो भुवि ॥ १४५ ॥
न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
गृहं हि गृहिणीहीनमरण्यसदृशं मतम्' ॥ १४६ ॥
पञ्जरस्था ततः श्रुत्वा भर्त्तुर्दुःखान्वितं वचः।
कपोतिका सुसन्तुष्टा वाक्यञ्चेदमथाऽऽह सा ॥ १४७ ॥
'न सा स्त्रीत्यभिमन्तव्या यस्यां भर्त्ता न तुष्यति।
तुष्टे भर्त्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ॥ १४८ ॥
दावाग्निना विदग्धेव सपुष्पस्तवका लता।
भस्मीभवतु सा नारी यस्यां भर्त्ता न तुष्यति ॥ १४९ ॥

पतिव्रतेति।—पतिव्रता पतिप्राणा साध्वीति यावत्, पत्युः प्रियहिते रता, यस्य ईदृशी भार्या स्यात्, स पुरुषः भुवि पृथिव्यां, धन्यः प्रशस्यः, सुखी इत्यर्थः, भवतीति शेषः; प्रियायाः प्रियवादित्वाच्च पत्युः सुखनिदानत्वादित्याशयः ॥ १४५ ॥

प्रोक्तार्थमेव पुनः विशदीकर्तुं व्यनक्ति, नेति।—गृहं निकेतनं, गृहम इति न आहुः न कथयन्ति, विद्वांस इति शेषः, गृहिणी गृहस्थिता भार्या एव, गृहम् उच्यते कथ्यते; हि यतः, गृहिणीहीनं भार्यायून्यं, गृहम् अरण्यसदृशं कानन-तुल्यं, मतम् उक्तं, पण्डितैरिति शेषः; उभयत्रापि सुखराहित्येन साम्यादिति भावः ॥ १४६ ॥

पञ्जरस्थेति।—ततः पञ्जरस्था, व्याधस्येति शेषः, सा कपोतिका भर्तुः स्वामिनः, दुःखान्वितं दुःखपूर्णं, वचः वाक्यं, विलापभूयिष्ठमित्यर्थः, श्रुत्वा, सुसन्तुष्टा अतीव प्रीता सती, (अत्र सन्तोषः पत्युः अनुरागपूर्णवाक्यश्रवणजन्यः, न तु तस्य विलापश्रवण-जनितः, तस्याः पतिव्रतात्वादित्यवधेयम्) इदं वक्ष्यमाणं, वाक्यम् आह च कथयामास च ॥ १४७ ॥

नेति।—यस्यां स्त्रियां, भर्त्ता न तुष्यति न प्रीयाति, सा स्त्री इति न अभिमन्तव्या स्त्रीति न वाच्या इत्यर्थः; भर्त्तरि पत्यौ, तुष्टे प्रीते सति, नारीणां सर्वदेवताः; तुष्टाः स्युः भवेयुः; नारीणां पत्युः सर्वदेवमयत्वात् तत्सन्तोषेणैव सकलदेवानां सन्तोष इति भावः ॥ १४८ ॥

दावेति।—भर्त्ता यस्यां स्त्रियां, न तुष्यति, सा नारी दावाग्निना वनवह्निना,

मितं ददाति हि पिता मितं भ्राता मितं सुतः।
अमितस्य हि दातारं भर्त्तारं का न पूजयेत् ?' ॥१५०॥

पुनश्च अब्रवीत्,—

'शृणुष्वावहितः कान्त ! यत् ते वक्ष्याम्यहं हितम्।
प्राणैरपि त्वया नित्यं संरक्ष्यः शरणागतः ॥ १५१ ॥
एष आकुनिकः शेते तवावासं समाश्रितः।
शीतार्त्तश्च क्षुधार्त्तश्च पूजामस्मै समाचर ॥ १५२ ॥

सूचने च,—यः सायमतिथिं प्राप्तं यथाशक्ति न पूजयेत्।
तस्यासौ दुष्कृतं दत्त्वा सुकृतञ्चापकर्षति ॥ १५३ ॥

विदग्धा विशेषेण दग्धा, सपुष्पस्तवका पुष्पगुच्छवती, स्तवेव भर्त्रीभवतु ; भर्तुः अप्रियाणां पुत्रादिसमन्वितानामपि रमणीनां मरणमेव श्रेय इति भावः ॥ १४९ ॥

ददानीं भर्तुः अन्येभ्यः स्वाप्रियजनेभ्यः उत्कर्षमाह, मितमिति।—पिता मितं हि परिमितमेव, ददाति, कस्यार्थे इति शेषः, भ्राता मितं ददाति, मातरं इति शेषः, सुतः पुत्रः, मितं ददाति, मातरं इति शेषः, का नारी, प्रतिव्रतेत्यर्थः, अमितस्य अपरिमितस्य, धर्मार्थादिपुरुषार्थानिधयस्येति भावः, दातारं भर्त्तारं न पूजयेत् ? सर्वैव पूजयेदित्यर्थः ; स्वामिनः स्त्रीषु अदेयं किमपि नास्ति, अतः सर्वथा स्त्रीणा स्वामी एव परं पूजनीय इति भावः ॥ १५० ॥

शृणुष्वेति।—हे कान्त ! अहं ते तुभ्यं, ["हितयोगे च" (वा०) इति हितशब्द-योगात् चतुर्थी] हितं हितकरं, यत् वचनं, वक्ष्यामि, तत् अवहितः एकाग्रचित्तः सन्, शृणुष्व, [अत्र आत्मनेपदं महाकविप्रयोगात् सौष्ठवं] त्वया शरणागतः आश्रितः जनः, नित्यं सततं, प्राणैरपि किमुत धनादिभिरिति भावः, संरक्ष्यः परि-पालनीयः ; शरणागतरक्षणं हि महाप्रत्यवायजनकम्, अतः अवश्यमेव आश्रितरक्षणं विधेयमिति भावः ॥ १५१ ॥

एष इति।—शीतार्त्तश्च हिमपीडितश्च, क्षुधार्त्तश्च बुभुक्षितश्च, एषः आकुनिकः व्याधः, तव आवासम् आलयं, समाश्रितः समागतः, शेते मृत्या लुठति इत्यर्थः, शीतेन क्षुधया च अवसन्नदेहत्वादिति भावः, अस्मै आकुनिकाय, ["क्रियया यमभिप्रैति—" (वा०) इति चतुर्थी] पूजां सत्कारं, समाचर विधेहि, कुरु इत्यर्थः ॥ १५२ ॥

सूचने इति।—यः जनः, सायं प्राप्तं दिवाऽवसानकालोपस्थितं, सायमागतञ्च प्रत्या-

मा चास्मै त्वं कृथा द्वेषं बद्धाऽनेनेति मत्प्रिया ।
स्वकृतैरेव बद्धाऽहं प्राक्तनैः कर्मबन्धनैः ॥ १५४ ॥
दारिद्र्यरोगदुःखानि बन्धनव्यसनानि च ।
आत्मापराधवृक्षस्य फलान्येतानि देहिनाम् ॥ १५५ ॥
तस्मात् त्वं द्वेषमुत्सृज्य मद्बन्धनसमुद्भवम् ।
धर्मे मनः समाधाय पूजयैनं यथाविधि' ॥ १५६ ॥

व्याजे रात्रौ विविधविपदुपस्थितिसम्भावनया तस्य स्थानान्तरगमने असमर्थत्वादिति भावः ; अतिथिम् अभ्यागतं, यथाशक्ति निजशक्त्यनुसारेण, न पूजयेत न सत्कुर्यात्, यस्तौ अतिथिः, तस्य जनस्य, तस्मै जनायेत्यर्थः, [सम्बन्धविवक्षया षष्ठी] दुष्कृतं पापं, स्वमिति शेषः, दत्त्वा सुकृतञ्च प्राक्तनं पुण्यञ्च, तस्माज्जनादिति शेषः, अपकर्षति आकृष्य गच्छतीत्यर्थः ॥ १५३ ॥

अतिथेः सर्वथा समादरणीयत्वेन इदानीं तत्र विरागबीजमन्यथा उपपादयति, नेति ।—अनेन व्याधेन, मत्प्रिया मम प्रिया, बद्धा बद्धा, पञ्जरे इति शेषः, इति हेतोः, त्वम अस्मै अतिथये, व्याधाय इत्यर्थः, द्वेषं कोपं, मा च कृथाः न कुरु, ["माङि लुङ्" (३।३।१७५ पा०) इति करोतेः लुङ्, "न माङ्योगे" (६।४।७४ पा०) इत्यडागम-प्रतिषेधश्च] ; अहं स्वकृतैरेव निजकृतैः एव, प्राक्तनैः पूर्वकालिकैः, कर्मबन्धनैः बध्यन्ते एभिरिति बन्धनानि, कर्मायत्तेव बन्धनानि तैः, कर्मपाशैरित्यर्थः, बद्धा संयता, अवामीति शेषः ; निजकर्मफलस्य अवश्यभोक्तव्यत्वादिति भावः ॥ १५४ ॥

दारिद्र्येति ।—दारिद्र्यं निर्धनत्वं, रोगः व्याधिः, दुःखञ्च तानि, तथा बन्धनानि व्यसनानि च विपदः, एतानि देहिनां प्राणिनाम्, आत्मापराधवृक्षस्य आत्मनः स्वस्य, अपराध एव अन्यायाचरणमेव, वृक्षस्य निजदोषतरोः, फलानि ; प्राक्तनान्यपि स्वकर्मफलानि भुञ्जते प्राणिन इति भावः ॥ १५५ ॥

अथ अतिथिसत्काराय स्वामिनमेवं प्रबोध्य उपसंहरति, तस्मादिति ।—तस्मात् दुःखस्य स्वकर्मफलजन्यत्वात्, त्वं मद्बन्धनसमुद्भवं मम बन्धनसमुत्पन्नं, बन्धं श्रुत्वा ज्ञातमित्यर्थः, द्वेषं कोपम्, उत्सृज्य त्यक्त्वा, धर्मे मनः समाधाय निवेश्य, धर्मार्थी सन् इत्यर्थः, एनं प्राकृतिकं, यथाविधि [विधिमनतिक्रम्य इति अनतिक्रमेऽव्ययी-भावः । क्रियाविशेषणञ्चैतत्] यथाशास्त्रं, पूजय सत्कुरु ; तथाकृते तव धर्मो भविष्यतीति भावः ॥ १५६ ॥

तस्यास्तद्वचनं श्रुत्वा धर्मयुक्तिसमन्वितम् ।
उपगम्य ततोऽभ्यष्टः कपोतः प्राह लुब्धकम् ॥ १५७ ॥
'भद्र ! सुस्वाऽऽगतं तेऽस्तु ब्रूहि किं करवाणि ते ।
सन्तापश्च न कर्त्तव्यः स्वगृहे वर्त्तते भवान्' ॥ १५८ ॥
तस्य तद्वचनं श्रुत्वा प्रत्युवाच विहङ्गमम् ।
'कपोत ! खलु शीतं मे हिमत्राणं विधीयताम्' ॥ १५९ ॥
स गत्वाऽङ्गारकं नीत्वा पातयामास पावकम् ।
ततः शुष्केषु पर्णेषु तमाशु समदीपयत् ॥ १६० ॥
सुसन्दीप्तं ततः कृत्वा तमाह शरणागतम् ।

तस्या इति ।—ततः अनन्तरं, कपोतः तस्याः स्वकान्तायाः कपोतिकायाः, तत् धर्मयुक्तिसमन्वितं धर्म्ये युक्तियुक्तञ्च, वचनं श्रुत्वा आकर्ण्य, लुब्धकं व्याधम्, उपगम्य अभ्येत्य, अभ्यष्टः आसीनः सन्, विनीतः सन्नित्यर्थः, ("स्यादभ्यष्टे तु आसीनः" इत्यमरः) प्राह ब्रवीति ॥ १५७ ॥

भद्रेति ।—हे भद्र ! ते तव, सुस्वाऽऽगतं स्वागतं, शुभसम्पादकम् आगमनमित्यर्थः, अस्तु ; ते तव, किं करवाणि ? किं कार्यं साधयामि ? ब्रूहि कथय ; सन्तापश्च मनःपीडा पुनः, निःसहायतयेति भावः, न कर्त्तव्यः, भवान् स्वगृहे निजालये एव, वर्त्तते ; मदावासे निःसहायावस्थाजनितः कोऽपि क्लेशः ते नैव भविष्यतीति भावः ॥ १५८ ॥

तस्येति ।—तस्य कपोतस्य, तद्वचनं तादृशविनयपूर्णवाक्यमित्यर्थः, श्रुत्वा विहङ्गमं तं कपोतं, प्रत्युवाच, व्याध इति शेषः । किमित्याह, कपोतेति ।—हे कपोत ! मे मम, शीतं खलु अतिमात्रमित्यर्थः, वर्त्तते इति शेषः, ["शीतम्" इत्यत्र "शीघ्रम्" इति पाठान्तरः समीचीनः] तस्मात् हिमत्राणं शीतात् परित्राणं, विधीयतां यथा शीतापनयनं भवेत्, तथा क्रियताम् इत्यर्थः ॥ १५९ ॥

स इति ।—सः कपोतः, गत्वा, कुत्रचिदिति शेषः, अङ्गारकं ज्वलन्तं दाहस्वरूपविशेषं, ("अङ्गारकः कुजेऽपि स्यात् दग्धकाष्ठे कुकट्टके" इति मेदिनी) नीत्वा, कृतस्थितिरिति शेषः, पातयामास स्थापितवान् ; ततः शुष्केषु नीरसेषु, पर्णेषु पत्रेषु, तं पावकम् आनीतं तमग्निम्, आशु शीघ्रं, समदीपयत् ज्वालयामास ॥ १६० ॥

सुसन्दीप्तमिति ।—ततः अनन्तरं, सुसन्दीप्तं प्रज्वलितम्, अग्निमिति शेषः,

'सन्तापयस्व विश्रब्धं स्वगात्राण्यत्र निर्भयः ।
न चास्ति विभवः कश्चिन्नाशये येन ते क्षुधम् ॥ १६१ ॥
सहस्रं भरते कश्चिच्छतमन्यो दशापरः ।
मम स्वकृतपुण्यस्य क्षुद्रस्यात्माऽपि दुर्भरः ॥ १६२ ॥
एकस्याप्यतिथेरन्नं यः प्रदातुं न शक्तिमान् ।
तस्यानेकपरिक्लेशे गृहे किं वसतः फलम् ? ॥ १६३ ॥
तत् तथा साधयाम्येतच्छरीरं दुःखजीवितम् ।
यथा भूयो न वक्ष्यामि नास्तीत्यर्थिसमागमे ॥ १६४ ॥

ज्ञात्वा तं शरणागतम् आह.—हे शाकुनिक ! इत्यासन्नपदमत्र ऊह्यनीयम् ; निर्भयः सन् अत्र प्रज्वलितेऽग्नौ, स्वगात्राणि निजानि अङ्गानि, विश्रब्धं गाढं यथा तथा, सम्यक् इत्यर्थः, ("विश्रब्धोऽनङ्कटेऽपि स्यात् गाढविश्वस्तयोस्त्रिषु" इति मेदिनी) सन्तापयस्व उष्णीकुरु, त्वमिति शेषः ; कश्चित् कोऽपि, विभवः सम्पत्, न चास्ति, ममेति शेषः, येन विभवेन, ते तव, क्षुधं बुभुक्षां, नाशये अपनयामि ॥ १६१ ॥

सहस्रमिति ।—कश्चित् जनः, सहस्रं [शतसहस्रादयस्तु नित्यमेकवचनान्ताः "विंशत्यादयः सदैकत्वे" इति अमरकोषदर्शनात्] जनान्, अन्यः शतं जनान्, अपरः दश जनान्, भरते प्रतिपालयति, अकृतपुण्यस्य सुकृतिरहितस्य, पापकारिण इत्यर्थः, अत एव क्षुद्रस्य नीचस्य, मम ["न लोकाव्यय—" (२।३।६९ पा०) इति खलर्थप्रयोगे षष्ठीप्रतिषेधेऽपि "षष्ठी शेषे" (२।३।५० पा०) इति षष्ठी] तु आत्माऽपि दुर्भरः भर्तुमशक्यः ; अधन्यः अहम् आत्मानमपि प्रतिपालयितुं न शक्नोमि, किं पुनः भरणे अन्येषामिति भावः ॥ १६२ ॥

एकस्येति ।—यः एकस्यापि अतिथेः आगन्तुकस्य, गृहागतस्य इत्यर्थः, अन्नं प्रदातुं न शक्तिमान् न समर्थः, तस्य अनेकपरिक्लेशे बहुक्लेशसङ्कुले, गृहे वसतः वासं कुर्वतः, किं फलम् ? न किमपि इत्यर्थः । अतिथिसत्कारस्य गृहस्थकर्त्तव्येषु सारभूततया तदभावतो गृहवासः वृथैव इति भावः ॥ १६३ ॥

तदिति ।—तत् तस्मात्, दुःखजीवितं क्लेशबहुलजीवनम्, एतत् शरीरं तथा तादृशं, साधयामि करोमि, यथा अर्थिसमागमे याचकोपस्थितौ, नास्तीति भूयः पुनः, न वक्ष्यामि न कथयिष्यामि ; दैवं पातयामीति भावः ॥ १६४ ॥

स निनिन्द किलात्मानं न तु तं लुब्धकं पुनः ।
उवाच 'तर्पयिष्ये त्वां मुहूर्तं प्रतिपालय' ॥ १६५ ॥
एवमुक्त्वा स धर्मात्मा प्रहृष्टेनान्तरात्मना ।
तमग्निं सम्परिक्रम्य प्रविवेश स्ववेश्मवत् ॥ १६६ ॥
ततस्तं लुब्धको दृष्ट्वा कृपया पीड़ितो भृशम् ।
कपोतमग्नौ पतितं वाक्यमेतदभाषत ॥ १६७ ॥
'यः करोति नरः पापं न तस्यात्मा ध्रुवं प्रियः ।
आत्मना हि कृतं पापमात्मनैव हि भुज्यते ॥ १६८ ॥
सोऽहं पापमतिश्चैव पापकर्मरतः सदा ।
पतिष्यामि महाघोरे नरके नात्र संशयः ॥ १६९ ॥

स इति ।—स कपोतः, आत्मानं स्वं, निनिन्द तिरस्कृतवान्, किल इति वार्त्तायाम्, ईदृशी एव जनस्तुतिरित्यर्थः, तं लुब्धकं व्याधं, पुनः न तु, निनिन्द इत्यनुषङ्गः, जायाया बन्धने कृतेऽपीति भावः ; उवाच च,—हे लुब्धक ! इत्यामन्त्रणपदमत्र ऊहनीयम् ; त्वां तर्पयिष्ये हृतं कारयिष्ये, आत्मनांसदानेनेति शेषः, मुहूर्तं क्षणं, प्रतिपालय अपेक्षस्व ॥ १६५ ॥

एवमिति ।—स धर्मात्मा धार्मिकः, कपोतः इति शेषः, एवमुक्त्वा प्रहृष्टेन प्रीतेन, अन्तरात्मना मनसा, तदुपलक्षितः सन्नित्यर्थः, तम् अग्निं सम्परिक्रम्य प्रदक्षिणीकृत्य, स्ववेश्मवत् स्वं गृहमिव, अनायासेन इति भावः, प्रविवेश ॥ १६६ ॥

तत इति ।—ततः अनन्तरं, लुब्धकः तं कपोतम् अग्नौ पतितं दृष्ट्वा कृपया भृशम् अतिमात्रं, पीड़ितः आक्रान्तः सन्, एतत् वक्ष्यमाणं, वाक्यम् अभाषत उक्तवान् ॥१६७॥

य इति ।—यः नरः पापं दुष्कर्म, करोति, ध्रुवं नूनं, तस्य आत्मा प्रियः प्रीतिकरः, न, भवतीति शेषः, पापस्य दुःखजनकतया आत्मनि दुःखोत्पत्तेरवश्यम्भावित्वादिति भावः ; हि यतः, आत्मना कृतम् अनुष्ठितं, पापम् आत्मना एव स्वयमेव, भुज्यते हि ; नूनं मत्कृतस्य पापकर्मणः फलं मयैव भोक्तव्यमिति भावः ॥ १६८ ॥

स इति ।—पापमतिः दुष्टबुद्धिः, सदा पापकर्मरतः दुष्कर्मासक्तश्च, सोऽहं महाघोरे अतिदारुणे, नरके पतिष्यामि एव, अत्र नरकपतने, संशयः सन्देहः, न, अस्तीति शेषः ; पापरतानां नरकपतनस्यावश्यम्भावित्वादिति भावः ॥ १६९ ॥

नूनं मम नृशंसस्य प्रत्यादर्शः सुदर्शितः ।
प्रयच्छता स्वमांसानि कपोतेन महात्मना ॥ १७० ॥
अद्य प्रभृति देहं स्वं सर्वभोगविवर्जितम् ।
तोयं स्वल्पं यथा शोषः शोषयिष्याम्यहं पुनः ॥ १७१ ॥
शीतवातातपसहः क्षुधाक्लो मलिनस्तथा ।
उपवासैर्बहुविधैश्चरिष्ये धर्ममुत्तमम्' ॥ १७२ ॥
ततो यष्टिं शलाकाञ्च जालकं पञ्जरं तथा ।
बभञ्ज लुब्धको दीनां कपोतीञ्च मुमोच ताम् ॥ १७३ ॥

नूनमिति ।—नूनं निश्चितं, महात्मना कपोतेन स्वमांसानि प्रयच्छता प्रददता सता, नृशंसस्य निर्दयस्य, मम प्रत्यादर्शः प्रति प्रतिरूपः, विपरीत इति यावत, आदर्शः उदाहरणं, सुदर्शितः सुष्ठु प्रकाशित इत्यर्थः ; पापमतिरहं स्वहितार्थं परान् विनाशयन् नृशंसतायाः प्रत्यक्षोदाहरणता गतः, अयन्तु कपोतः परहितार्थमात्मानं प्रयच्छन् कृपालुतायाः चरमदृष्टान्तः सञ्जात इति भावः ॥ १७० ॥

अद्येति ।—अहं पुनः अद्य प्रभृति अद्यात् दिनादारभ्य, स्वं देहं सर्वभोग-विवर्जितं सर्वेभ्यः भोगेभ्यः सुखादिभ्यः, विवर्जितं विहीनं, क्लेति शेषः, शोषः निदाघ-समयः, स्वल्पं तोयं जलं, यथा, शोषयति इति शेषः, तथा शोषयिष्यामि अनशनेन शुष्कं करिष्यामि ; प्राक्तनपापसङ्क्षयार्थं प्रायोपवेशनं चान्द्रायणव्रतं वा आचरि-ष्यामीति भावः ॥ १७१ ॥

अथेदानीं स्वपापक्षयकरमुपायं स्वयमेव स्वबुद्ध्या स्थिरीकृत्य अनक्ति, शीतेति ।—शीतवातातपसहः शीतं शीतलं जलादिकमित्यर्थः, तुषारपतनमित्यर्थो वा, वातं प्रबलं वायुम्, आतपं सूर्यातपञ्च, सहते इति तथोक्तः, शीतादिजनितक्लेश-सहिष्णुरित्यर्थः ; शरीरशोषकरकर्मरूपे तपसि इन्द्रसहिष्णुतायाः एव सर्वोपकारक-त्वादित्याशयः ; क्षुधाक्लः क्षीणदेहः, तथा मलिनः संस्काररहितत्वात् विवर्णशरीरः सन्, बहुविधैः अनेकैः, उपवासैः अनशनैः, उत्तमं धर्मं चरिष्ये [आत्मनेपदमार्षम्] तपश्चरिष्यामि इत्यर्थः ॥ १७२ ॥

तत इति ।—ततः अनन्तरं, लुब्धकः व्याधः, यष्टिं लगुडं, शलाकां जालनिर्माण-द्रव्यविशेषं, तोत्रं वा, जालकं पाशं, तथा पञ्जरञ्च बभञ्ज ; तां दीनां आतरां, अपुत्रशोकेन व्याकुलामिति भावः, कपोतीं मुमोच तत्याज च ॥ १७३ ॥

लुब्धकेन ततो मुक्ता दृष्ट्वाऽग्नौ पतितं पतिम् ।
कपोती विललापार्त्ता शोकसन्तप्तमानसा ॥ १७४ ॥
'न कार्य्यमद्य मे नाथ ! जीवितेन त्वया विना ।
दीनायाः पतिहीनायाः किं नार्य्या जीविते फलम् ?॥१७५॥
मनोदर्पस्वहङ्कारः कुलपूजा च बन्धुषु ।
दासभृत्यजनेष्वाज्ञा वैधव्येन प्रणश्यति' ॥ १७६ ॥
एवं विलप्य बहुशः कृपणं भृशदुःखिता ।
पतिव्रता सुसन्दीप्तं तमेवाग्निं विवेश सा ॥ १७७ ॥
ततो दिव्याम्बरधरा दिव्याभरणभूषिता ।
भर्त्तारं सा विमानस्थं ददर्श स्वं कपोतिका ॥ १७८ ॥

लुब्धकेनेति ।—ततः अनन्तरं, लुब्धकेन व्याधेन, मुक्ता परित्यक्ता, कपोती पतिं कपोतम्, अग्नौ पतितं दृष्ट्वा, आर्त्ता कातरा, तथा शोकसन्तप्तमानसा शोकेन पतिवियोगजनितदुःखेन, सन्तप्तं व्यथितं, मानसं यस्याः सथाभूता सती, विललाप ॥ १७४ ॥

नेति ।—हे नाथ ! अद्य त्वया विना तव विरहेण इत्यर्थः, मे मम, जीवितेन प्राणैः, न कार्य्यं न प्रयोजनं, पतिहीनायाः विधवायाः, अत एव दीनायाः दुःखिन्याः, नार्य्याः जीविते प्राणधारणे, किं फलम् ? न किमपि प्रयोजनम् इत्यर्थः ॥ १७५ ॥

मन इति ।—वैधव्येन पतिवियोगेन, मनोदर्पः मनस ऊष्मा, मानसिकं तेजः इत्यर्थः, तेजश्चितेति यावत्, अहङ्कारः धनरूपादिजतः गर्वः, कुलपूजा कुले स्वामिनः पितुर्वा गृहे, पूजा समादरः, तथा बन्धुषु ज्ञातिषु, दासभृत्यजनेषु दासेषु किङ्करेषु, भृत्यजनेषु पोष्यवर्गेषु च, भरणीयजनेषु इत्यर्थः, आज्ञा कञ्चिदपि कार्य्ये नियोगः, प्रणश्यति, नारीणामिति शेषः ; पतिगौरवेणैव नारीणां गौरवं, तदभावे तासां सुखकरं किमपि नास्तीति भावः ॥ १७६ ॥

एवमिति ।—भृशदुःखिता अतिमात्रमार्त्ता, पतिव्रता स्वामिपरायणा, सा कपोती, एवम् उक्तप्रकारेण, बहुशः पुनः पुनः, कृपणं दीनं यथा तथा, विलप्य तमेव पतिदेहदाहकारकमेवेत्यर्थः, सुसन्दीप्तं प्रज्वलितम्, अग्निं विवेश प्रविष्टवती, अन्वारोहणमनुमृतेति भावः ॥ १७७ ॥

अथ नारीणां सहमरणमिश्रमनुपालनञ्च फलमभिदधाति, तत इति ।—ततः अग्नि-

सोऽपि दिव्यतनुर्भूत्वा यथार्थमिदमब्रवीत् ।
'अहो ! मामनुगच्छन्त्या कृतं साधु शुभे ! त्वया ॥ १७९ ॥
तिस्रः कोट्योऽर्धकोटी च यानि रोमाणि मानुषे ।
तावत्कालं वसेत् स्वर्गे भर्त्तारं याऽनुगच्छति' ॥ १८० ॥
कपोतदेवः सूर्य्यास्ते प्रत्यहं सुखमन्वभूत् ।
कपोतदेववत् सासीत् प्राक्पुण्यप्रभवं हि तत् ॥ १८१ ॥

प्रवेशानन्तरं, सा कपोतिका दिव्याम्बरधरा दिव्यवस्त्रपरिधाना, दिव्याभरणभूषिता रुचिरालङ्कारशोभिता च सती, विमानस्थं देवयानस्थं, स्वं भर्त्तारं पतिं, ददर्श ॥ १७८ ॥

स इति ।—सोऽपि कपोतोऽपि, दिव्यतनुः स्वर्गीयदेहधारी, भूत्वा इदं वक्ष्यमाणं, यथार्थम् उचितं, शास्त्रानुसारि इत्यर्थः, वाक्यमिति शेषः, अब्रवीत् ; अहो शुभे ! भो कल्याणि ! मामनुगच्छन्त्या अनुसरन्त्या, त्वया साधु सुष्ठु, कृतम् ; भर्तुः अनुमरणस्य पातिव्रत्यधर्मानुपालिकाभिरवश्यमेव अनुष्ठातव्यतया शास्त्रानुमोदितत्वादिति भावः ॥ १७९ ॥

तिस्र इति ।—या नारी, भर्त्तारम् अनुगच्छति अनुम्रियते इत्यर्थः, सा मानुषे मानवशरीरे, यानि तिस्रः कोट्यः अर्धकोटी च सार्द्धत्रिकोटीसङ्ख्यकानीत्यर्थः, रोमाणि, सन्तीति शेषः, तावत्कालं तत्परिमितवत्सरानित्यर्थः, स्वर्गे वसेत् ॥ १८० ॥

कपोतदेव इति ।—कपोतदेवः यः इदानीमतिथिसपर्य्यया देवत्वमागतः, पुरा च धृतकपोतकायः सः, सूर्य्यास्ते सायंसन्ध्यायां, रात्रावित्यपि ध्वन्यते, अधिरात्र्याख्यायां, सूर्य्यास्तेऽपि, सर्वदैव इत्यर्थः, प्रत्यहं प्रतिदिनं, सुखमन्वभूत सुखं बुभुजे ; देवत्वमात्रानां सर्वदैव सुखभोग इति भावः ; तिरश्चां रजन्यामापतितायामेव निसर्गतः दर्शनशक्तेर्हानोदयात् कपोतजनुषि तयोः सायं तादृक् सुखोपभोगः नाभूत्, इदानीं देवशरीरमासाद्य का कथा दिवसस्य ? सायमपि नितरां सुखं बुभुजे इति सूचयितुमेव सूर्य्यास्तपदमुपात्तमिति वेदितव्यम् । सा कपोती, कपोतदेववत् कपोतरूपपतिर्यथा, तथा आसीत्, पतिरिव दिव्यं वपुरासाद्य अनिशं सुखं भोक्तुमारेभे इत्यर्थः ; हि यतः, तत् तयोः देवशरीरपरिग्रहणं, प्राक्पुण्यप्रभवं पूर्वजन्मकृतकर्मणां फलत्वादेव आयातमित्यर्थः ; पूर्वात्मनां निगृहीतेन्द्रियग्रामाणामपि जीवानां कर्मवैचित्र्यादेव जननवैचित्र्यं दृश्यते, कस्यचित् जन्मान्तरीयकर्मणः विपाकवशेनैव तयोः कपोतयोनित्वलाभः समभूत्, वस्तुतस्तु तौ पूर्वात्मानौ आत्मानित्यपि ध्वन्यते ॥ १८१ ॥

हर्षाविष्टस्ततो व्याधो विवेश्य च वनं घनम् ।
प्राणिहिंसां परित्यज्य बहुनिर्वेदवान् भृशम् ॥ १८२ ॥
तत्र दावानलं दृष्ट्वा विवेश्य विरताशयः ।
निर्दग्धकल्मषो भूत्वा स्वर्गसौख्यमवाप्तवान् ॥ १८३ ॥
अतोऽहं ब्रवीमि,—'श्रूयतां हि कपोतेन' इत्यादि" ।

तत् श्रुत्वा अरिमर्दनो दीप्ताक्षं पृष्टवान्,—"एवमवस्थिते किं भवान् मन्यते ?" सोऽब्रवीत्,—"देव ! न हन्तव्य एवायम् । यतः,—

या ममोद्विजते नित्यं सा मामभ्यवगूहते ।
प्रियकारक ! भद्रं ते यन्ममास्ति हरस्व तत् ॥ १८४ ॥

चौरेण चापि उक्तम्,—

हर्त्तव्यं ते न पश्यामि हर्त्तव्यं चेद्भविष्यति ।
पुनरप्यागमिष्यामि यदीयं नावगूहते" ॥ १८५ ॥

हर्षाविष्ट इति ।—ततः अनन्तरं, बहुनिर्वेदवान् अतिमात्रवैराग्ययुक्तः, व्याधः प्राणिहिंसां परित्यज्य भृशम् अत्यन्तं, हर्षाविष्टः आनन्दितः, हिंसादत्तिपरित्यागादिति भावः, घनं निबिडं, वनं विवेश, तपश्चरणार्थमिति शेषः ॥१८२॥

तत्रेति ।—विरताशयः विषयवासनाशून्यः, स इति शेषः, तत्र वने, दावानलं दृष्ट्वा विवेश, निर्दग्धकल्मषः निःशेषेण दग्धं, कल्मषं पापं यस्य तथाभूतः, दावानलप्रवेशेन विगतपापः इत्यर्थः, भूत्वा स्वर्गसौख्यं स्वर्गवासजनितमानन्दम्, अवाप्तवान् प्राप ॥१८३॥

येति ।—या, मत्प्रीतिः शेषः, नित्यं सततं, मम सन्तप्ते, मां दृष्ट्वा इत्यर्थः, उद्विजते उद्विग्ना भवति, भीता भवति इत्यर्थः, अत्र सा माम् अवगूहते आलिङ्गति, हे प्रियकारक ! प्रियालिङ्गनरूपसुखसाधक ! चौर इति शेषः, ते तव, भद्रं कुशलम्, अस्तु इति शेषः, मम यत् अस्ति, तत् हरस्व सर्वस्वं गृह्य ; सर्वस्वदानेनापि मेतदुपकारक प्रतिदानं सम्भवतीति भावः । चौरं प्रति कश्चित् युवजानेर्वृद्धस्य भार्यारियम् ॥१८४॥

हर्तव्यमिति ।—ते तव, हर्तव्यं हरणयोग्यं, धनमिति शेषः, न पश्यामि, चेत् यदि, हर्तव्यं भविष्यति, यदि इयं नारी, न अवगूहते नालिङ्गति च, तदा पुनरपि आगमिष्यामि ॥ १८५ ॥

अरिमर्दनः पृष्टवान्,—"का च नावगृहते? कथं चायं चौरः? इति विस्तरतः श्रोतुमिच्छामि"। दीप्ताक्षः कथयति,—

कथा ९।

"अस्ति कस्मिंश्चित् अधिष्ठाने कामातुरो नाम हुडवणिक्; तेन च कामोपहतचेतसा मृतभार्य्येण काचिन्निर्धनवणिक्सुता प्रभूतं धनं दत्त्वा उद्वाहिता। अथ सा दुःखाभिभूता तं हुडवणिजं दृष्ट्वापि न ग्रथ्नाक। युक्तञ्चैतत्,—

श्वेतं पदं शिरसि यत्तु शिरोरुहाणां
स्थानं परं परिभवस्य तदेव पुंसाम्।
आरोपितास्थिशकलं परिहृत्य यान्ति
चाण्डालकूपमिव दूरतरं तरुण्यः॥ १८६॥

तथा च,—गात्रं सङ्कुचितं गतिर्विगलिता दन्ताश्च नाशं गताः
दृष्टिर्भाम्यति रूपमप्युपहतं वक्त्रञ्च लालायते।

श्वेतमिति।—शिरसि मस्तके, शिरोरुहाणां केशानां, यत्तु श्वेतं शुक्लं, पदं चिह्नं, धावल्यम् इत्यर्थः, तदेव पुंसां परिभवस्य तरुणजनोक्तानादरस्य, परं स्थानम्; तरुण्यः युवत्यः, चाण्डालकूपमिव चण्डालखातं लक्षाग्रयावग्रैवमिव, तस्य अपेयजलत्वादिति भावः, आरोपितानि आवस्थितानि, वर्द्धितानि इत्यर्थः, अस्थ्नां कङ्कालानां, शकलानि खण्डानि यस्य तादृशम्, अस्थिनावावग्रैवमित्यर्थः, हुडमिति शेषः, [विशेषणमिदं कूपपक्षेऽपि योजनीयम्; तत्र—आरोपितानि संस्थापितानि, अस्थ्नां शकलानि यत्र तादृशं, निहतपशुमांसानां प्रक्षालनावसरे तद्रुधिरकङ्कालादिभिः निरन्तरं परिपूर्णत्वेन कूपस्य इति भावः] परिहृत्य परित्यज्य, दूरतरम् अतिदूरं, यान्ति गच्छन्ति; हुडं पतिं नेच्छन्तीति भावः। वसन्ततिलकं वृत्तम्॥ १८६॥

गात्रमिति।—गात्रं शरीरं, हुडस्येति शेषः; सङ्कुचितं सर्वावयवानां शैथिल्यात् सङ्कीर्णमासं, लुलितचर्म इत्यर्थः, गतिः पादन्यासः, विगलिता स्खलिता, मज्जतः तस्य स्खलनमेव नियतमिति भावः; दन्ताः दशनाश्च नाशं गताः पतिता इत्यर्थः; दृष्टिः ज्ञेयं, भाम्यति भ्रान्ता भवति, चौरत्वात् सर्वं यथायथं न पश्यतीत्यर्थः; रूपं सौन्दर्यमपि, उपहतं विनष्टम्; वक्त्रं मुखञ्च, लालायते लालामुद्वमतीत्यर्थः, [लालाशब्दादुद्वमने

वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते
धिक् कष्टं !! जरयाऽभिभूतपुरुषं पुत्रोऽप्यवज्ञायते ॥१८७॥

अथ कदाचित् सा तेन सह एकशयने (ङ) पराङ्मुखी यावत् तिष्ठति, तावत् गृहे चौरः प्रविष्टः। सा अपि तं चौरं दृष्ट्वा भयव्याकुलिता दृढमपि तं पतिं गाढं समालिलिङ्ग। सोऽपि विस्मयात् पुलकाञ्चितसर्वगात्रः चिन्तयामास,—'अहो! किम् एषा माम् अद्य अवगूहते !!' यावत् निपुणतया पश्यति, तावत् गृहकोणैकदेशे चौरं दृष्ट्वा व्यचिन्तयत्,—'नूनम् एषा अस्य भयात् माम् आलिङ्गति' इति ज्ञात्वा तं चौरम् आह,—

'या ममोद्विजते नित्यं सा मामद्यावगूहते।
प्रियकारक! भद्रं ते यन्ममास्ति हरस्व तत्' ॥१८८॥

ष्वङि खटि च रूपम्; स च "वार्योगस्यासुहमने" (३।१।२६ पा०) इत्यत्र धूम-शब्दाभावेऽपि "दिशो धूमायन्ते" इति महाभाष्यीयप्रयोगदर्शनात् यथा धूमशब्दात् क्वङ् सङ्गीकार्यः, तथा अत्रापि "तत्र लालायते फणी" इति भाष्यकृद्दृष्टिदर्शनात् प्रयोगोऽयं साधुरिति मन्तव्यम्] बान्धवजनः वाक्यं नैव करोति नाऽऽलपतीत्यर्थः, पत्नी न शुश्रूषते न सेवते, ["शासिवसिघसीनां च" (८।३।६० पा०) इति आत्मनेपदम्] धिक् कष्टं !! पुत्रोऽपि, का कथाऽन्येषामित्यपेरर्थः, जरया अभिभूतम् आक्रान्तं, पुरुषं, दृढमित्यर्थः, अवज्ञायते अवमन्यते, ["अवज्ञायते" इति आर्षप्रयोगः इति कैश्चित्; केचित्तु "कण्ड्वादिराकृतिगणत्वात् यक्" इति कृत्वा 'अवज्ञां करोति' इति व्याख्या-नयन्ति; अन्ये तु—"जरयाऽभिभूतपुरुषः पुत्रैरवज्ञायते" इति कर्मणि प्रयोगात्मकं पाठं प्रकल्प्य समादधति]। यद्वा,—पुत्रोऽपि जरयाऽभिभूतपुरुषं, न शुश्रूषते इति पूर्वानुषङ्गः; अतः अवज्ञायते अवमन्यते, इत्यं सर्वैरेवासाविति शेषः; सर्वकार्येषु असामर्थ्यात् गात्रसङ्कोचादिविकृतिदर्शनाच्च इति भावः। अद्यैकलक्षेण सार्द्धं सर्वमेव विफलं भवति इति तात्पर्यम्। शार्दूलविक्रीडितं वृत्तम् ॥ १८७ ॥

(ङ) पराङ्मुखी—पराङ्मुखवदना, ["ऋक्पूरब्धूपथामानक्षे—" (५।४।७४ पा०) इति ङीष्]।

येति।—व्याख्यातोऽयं प्राक् ॥ १८८ ॥

तत् श्रुत्वा चौरोऽपि आह,—

'हर्त्तव्यं ते न पश्यामि हर्त्तव्यं चेद्भविष्यति।
पुनरप्यागमिष्यामि यदीयं नावगूहते' ॥ १८९ ॥

तस्मात् चौरस्यापि उपकारिणः (च)श्रेयः चिन्त्यते,किं पुनर्नः शरणागतस्य ? अपि च, अयं (छ) तैः विप्रकृतोऽस्माकमेव (ज) पुष्टये भविष्यति, तदीयरन्ध्रदर्शनाय चेति, अनेन कारणेन अयम् अवध्यः" इति। एतदाकर्ण्य अरिमर्दनोऽन्यं सचिवं वक्रनासं पप्रच्छ,—"भद्र! साम्प्रतमेवंस्थिते किं कर्त्तव्यम् ?" सोऽब्रवीत्,—"देव! अवध्योऽयम्। यतः,—

शत्रवोऽपि हितायैव विवदन्तः परस्परम्।
चौरेण जीवितं दत्तं राक्षसेन तु गोयुगम्" ॥ १९० ॥

अरिमर्दनः प्राह,—"कथमेतत् ?" वक्रनासः कथयति,—

कथा १० ।

"अस्ति कस्मिंश्चित् अधिष्ठाने दरिद्रो द्रोणनामा ब्राह्मणः (झ) प्रतिग्रहधनः, सततं विशिष्टवस्त्रानुलेपनगन्धमाल्यालङ्कार-

हर्त्तव्यमिति।—व्याख्यातोऽयं प्राक् ॥ १८९ ॥

(च) श्रेयः,—मङ्गलम्।

(छ) तैः,—वायसैः। विप्रकृतः,—अवमानितः, ताडित इति यावत्।

(ज) पुष्टये—हृद्धये। तदीयरन्ध्रदर्शनाय—तदीयानां—वायससम्बन्धिनां, रन्ध्राणां—छिद्राणां, राज्याङ्गविषयकल्पनतानामित्यर्थः, दर्शनाय।

शत्रव इति।—परस्परं विवदन्तः विरुद्धोक्तिकथं मृषा विवादं कुर्वन्तः, [वि-पूर्वक-वदधातोः विरुद्धोक्तिकविवादार्थे "विभाषा विप्रलापे" (१।३।५० पा०) इति आत्मनेपदस्य वैभाषिकत्वेन व्यवस्थितत्वात् शतृप्रत्ययः] शत्रवोऽपि हितायैव, भवन्तीति शेषः, तथा हि, चौरेण जीवितं प्राणाः, दत्तं, राक्षसेन तु गोयुगं गोद्वयं, दत्तमित्यन्वयः ॥ १९० ॥

(झ) प्रतिग्रहधनः,—दानग्रहणमात्रजीवी इत्यर्थः।

ताम्बूलादिभोगपरिवर्जितः, (अ) प्ररूढकेशश्मश्रुनखरोमोपचितः, शीतोष्णवातवर्षादिभिः परिशोषितशरीरः। तस्य च केनापि यजमानेन (ट) अनुकम्पया शिशुगोयुगं दत्तम्; ब्राह्मणेन च (ठ) बालभावात् आरभ्य (ड) याचितघृततैलयवसादिभिः संवर्द्ध सुपुष्टं कृतम्। तच्च दृष्ट्वा सहसा एव कश्चित् चौरः चिन्तितवान्,—'अहमस्य ब्राह्मणस्य गोयुगमिदम् अपहरिष्यामि' इति निश्चित्य निशायां (ढ) बन्धनपाशं गृहीत्वा यावत् प्रस्थितः, तावत् अर्द्धमार्गे (ण) प्रविरलतीक्ष्णदन्तपङ्क्तिः, उन्नतनासावंशः, प्रकटरक्तान्तनयनः, अपचितस्नायुसन्ततिः, नतगात्रः, शुष्ककपोलः, सुहुतहुतवहपिङ्गलश्मश्रुकेशशरीरः कश्चित् दृष्टः। दृष्ट्वा च तं तीव्रभयत्रस्तोऽपि चौरोऽब्रवीत्,—'को भवान्?' इति। स आह,—

(अ) प्ररूढेति।—प्ररूढैः,—प्रकर्षेण वृद्धिं गतैरित्यर्थः, केशैः, श्मश्रुभिः, नखैः, —जरद्भिः, रोमभिः,—तनुरूहैश्च, उपचितः,—व्याप्तः, अर्थविरहेण चौरकर्माभावादिति भावः।

(ट) अनुकम्पया—दयया। शिशुगोयुगं—गोवत्सद्वयम्।

(ठ) बालभावात्—तयोः वत्सयोः शैशवात्।

(ड) याचितेति।—याचितैः,—भिक्षितैः, घृतैः, तैलैः, यवसादिभिः,—घासादिभिश्च।

(ढ) बन्धनपाशं—बन्धनरज्जुम्।

(ण) प्रविरलेति।—प्रविरला—अल्पाल्पा, दूरे दूरे अवस्थिता इत्यर्थः, तीक्ष्णा —जराजा च, दन्तपङ्क्तिर्यस्य तथोक्तः। उन्नतनासावंशः,—उन्नतुङ्गनासिकादण्डः। प्रकटेति।—प्रकटे—उज्ज्वले, रक्तान्ते—लोहितप्रान्ते, नयने—नेत्रे यस्य सः। अपचितेति।—अपचिता—ह्रासत्वात् बहिर्निस्सृता, स्नायुसन्ततिः,—धमनीसमूहो यस्य तथाभूतः। नतगात्रः,—नम्रदेहः। शुष्ककपोलः,—क्षीणगण्डः, क्षयत्वादिति भावः। सुहुतेति।—सुष्ठु हुतः,—क्षतहोमः, ऋत्विग्भिरिति शेषः, तथाविधः यः हुतवहः,—अग्निः, तद्वत् पिङ्गलं—कपिशं, श्मश्रुकेशशरीरं यस्य तथाविधः।

(त) 'सत्यवचनोऽहं ब्रह्मराक्षसः, भवान् अपि आत्मानं निवेदयतु' । सोऽब्रवीत्,—'अहं (थ) क्रूरकर्मा चौरः, दरिद्रब्राह्मणस्य गोयुगं हर्तुं प्रस्थितोऽस्मि' । अथ (द) ज्ञातप्रत्ययो राक्षसोऽब्रवीत्—'भद्र ! षष्ठाङ्शकालिकोऽहम्, अतः तमेव ब्राह्मणम् अद्य भक्षयिष्यामि ; तत् सुन्दरमिदम् ; (ध) एककार्यौ एव आवाम्' ।

अथ तौ तत्र गत्वा (न) एकान्ते कालम् (प) अन्वेषयन्तौ स्थितौ ; प्रसुप्ते च ब्राह्मणे तद्भक्षणार्थं प्रस्थितं राक्षसं दृष्ट्वा चौरोऽब्रवीत्,—'भद्र ! नैषः (फ) न्यायः, यतो गोयुगे मया अपहृते पश्चात् त्वम् एनं ब्राह्मणं भक्षय' । सोऽब्रवीत्,—'कदाचित् अयं ब्राह्मणो गोशब्देन (ब) बुध्येत, तदा अनर्थकोऽयं मम (भ) आरम्भः स्यात्' । चौरोऽपि अब्रवीत्—

(त) सत्यवचनः,—यथार्थवाक्, सत्यं ब्रवीमि इत्यर्थः, अथवा तन्नाम्ना प्रसिद्धः ।

(थ) क्रूरकर्मा—निष्ठुरकार्यकारकः ।

(द) ज्ञातप्रत्ययः,—विश्वस्तः । षष्ठाङ्शकालिकः,—अङ्शः षष्ठो भागः षष्ठाङ्शः, [षष्ठमर्हति विंशं "राजार्हःसखिभ्यः—" (५।१।८१ पा०) इति टच्प्रत्ययः, ततः "अङ्शोऽङ्श एतेभ्यः" (५।४।८८ पा०) इति अङ्शब्दस्याङ्शादेशः] स एव कालः षष्ठाङ्शकालः, तत्र भुङ्क्ते इति षष्ठाङ्शकालिकः [भुक्त्यर्थे ठञ्प्रत्ययः] ; दिवसस्य षष्ठे यामार्धे एव कृतनियतभोजनः, दिवसम् अष्टभिः यामार्धैः विभज्य तस्य षष्ठे एव यामार्धे अपराह्णसमयरूपे यः सततमेव भुङ्क्ते तथाभूत इत्यर्थः, अपराह्णसमयस्यैव राक्षसानां भोजनकालत्वेनावधारितत्वात् इति निष्कर्षः ।

(ध) एककार्यौ—एकं—तुल्यं, हयोरेवापहरणकर्मणि नियुक्ततया एकविधमित्यर्थः, कार्यं—गोहरणब्राह्मणप्राणहरणरूपं कर्म इत्यर्थः, ययोस्तौ ।

(न) एकान्ते—निर्जने । कालं—समयम्, अवसरमिति यावत् ।

(प) अन्वेषयन्तौ—अपेक्षमाणौ ।

(फ) न्यायः,—नीतिः, औचित्यमिति यावत् ।

(ब) बुध्येत—जानीयात् ।

(भ) आरम्भः,—उपक्रमः, अनायासरूप इत्यर्थः ।

'तवापि यदि भक्षणाय उपस्थितस्य (म) अन्तरे एकोऽपि अन्तरायः स्यात्, तदाऽहमपि न शक्नोमि गोयुगम् अपहर्त्तुम्; अतः प्रथमं मया अपहृते गोयुगे, पश्चात् त्वया ब्राह्मणो भक्षयितव्यः'। इत्यश्च (य) अहम्पूर्विकया तयोर्विवदतोः समुत्पन्ने (र) हैधे प्रतिरवबशात् ब्राह्मणो जजागार। अथ तं चौरोऽब्रवीत्,—'ब्राह्मण! त्वामेव अयं राक्षसो भक्षयितुमिच्छति'। राक्षसोऽपि आह,—'ब्राह्मण! चौरोऽयं गोयुगं ते अपहर्त्तुमिच्छति'। एवं श्रुत्वा उत्थाय ब्राह्मणः सावधानो भूत्वा (ल) इष्टदेवतामन्त्राध्यायेन आत्मानं राक्षसात्, (व) उद्भूर्णलगुड़ेन च चौरात् गोयुगं ररक्ष। अतोऽहं ब्रवीमि,—'शत्रवोऽपि हितायैव' इत्यादि"।

अथ तस्य वचनम् अवधार्य्य अरिमर्दनः पुनरपि प्राकारकर्णम् अपृच्छत्, —"कथय, किमत्र मन्यते भवान्?" सोऽब्रवीत्, —"देव! अबध्य एवायं, यतो रात्रितेन अनेन कदाचित् परस्परप्रीत्या कालः सुखेन गच्छति। उक्तञ्च,—

परस्परस्य मर्माणि ये न रक्षन्ति जन्तवः।
त एव निधनं यान्ति वल्मीकोदरसर्पवत्" ॥ १८१ ॥

(म) अन्तरे—मध्ये। अन्तरायः,—विघ्नः।

(य) अहम्पूर्विकया—अहमेवाये चौरयिष्यामि, अहमेवाये भक्षयिष्यामि इत्येवंरूपयेत्यर्थः, ("अहं पूर्वमहं पूर्वमित्यहम्पूर्विका स्त्रियाम्" इत्यमरः)।

(र) हैधे—शब्दे, कलहे इत्यर्थः। प्रतिरवबशात्—प्रतिकूलशब्दस्य जायमानत्वात्, कलहजनितकलरवादित्यर्थः, [हेत्वर्थे पञ्चमी]।

(ल) इष्टेति।—इष्टाया देवताया: मन्त्राध्यायेन मन्त्रोच्चारणेन इत्यर्थः।

(व) उद्भूर्णलगुड़ेन—उद्भूर्णेन—उच्चिप्तेन, उद्यतेनेत्यर्थः, ("उद्भूर्णितं" इत्यमरः) लगुड़ेन—दण्डेन।

परस्परस्येति।—ये जन्तव: प्राणिनः, परस्परस्य मर्म्माण्यस्य, ["कर्मण्यतिहारे—" (वा०) इति परस्परशब्दस्य द्वित्वे, "षष्ठ्यास्त्रसाद्वा—" (वा०) इति सुलोपे च,

अरिमर्दनोऽब्रवीत्,—"कथमेतत् ?" प्राकारकर्णः कथयति,—

कथा ११।

"अस्ति कस्मिंश्चित् नगरे देवशक्तिर्नाम राजा, तस्य च पुत्रः (ग) जठराग्नयेण उरगेण प्रतिदिनं प्रत्यङ्गं (ष) क्षीयते; अनेकोपचारैः सद्वैद्यैः सच्छास्त्रोपदिष्टौषधयुक्त्याऽपि चिकित्स्यमानो न स्वास्थ्यमाप्नोति। अथ असौ राजपुत्रः (स) निर्वेदात् देशान्तरं गतः कस्मिंश्चित् नगरे (ह) भिक्षाऽटनं कृत्वा महति देवालये कालं यापयति।

अथ तत्र नगरे बलिर्नाम राजा आस्ते, तस्य च द्वे दुहितरौ (क) यौवनस्थे तिष्ठतः; ते च प्रतिदिवसमादित्योदये पितुः (ख) पादान्तिकमागत्य नमस्कारं चक्रतुः। तत्र च एका

दित्वात् विसर्गस्य सः] मर्माणि आत्मरक्षस्थानि, गोप्यविषयाणीत्यर्थः, न रक्षन्ति, त एव बल्मीकोदरसर्पवत् बल्मीकोदरथोः; बल्मीके उदरे च स्थितो सर्पौ इव, ["न लिङ्गवचने भिन्ने न हीनाधिकताऽपि वा। उपमादूषणायालं यतोऽयंगी न धीमताम्॥" इति नियमात् अवांपसानीपमेयथोः भिन्नवचनप्रयोगो न दोषायेति सुधीभिर्विभाव्यम्] निधनं यान्ति नियन्त इत्यर्थः॥ १९१॥

(ग) जठरेति।—जठरमुदरमेव, अग्नयो यस्य तेन, उदरस्थेन इत्यर्थः। उरगेण—सर्पेण। प्रत्यङ्गं—प्रत्यवयवं, हस्तपादादिषु अवयवेषु इत्यर्थः; [अङ्गमङ्गं प्रति इति विप्सायां अव्ययीभावः]।

(ष) क्षीयते—क्षीणीभवति, कार्श्यमापद्यते इत्यर्थः, [क्षीयते इति पदं कर्मकर्तरि साधु, तथा च वामनः,—"क्षीयते इति कर्मकर्तरि" (५ अधि० २अ० ५ सू०)]। अनेकोपचारैः,—नानाविधाभिः प्रक्रियाभिः। सद्वैद्यैः,—सुचिकित्सकैः। सच्छास्त्रेति।—सच्छास्त्रेषु—उत्कृष्टशास्त्रेषु, आयुर्वेदादिग्रन्थेषु, उपदिष्टानि—निर्दीतानि, यानि औषधानि—भेषजानि, तेषां युक्त्या—प्रयोगेण।

(स) निर्वेदात्—वैराग्यात्।

(ह) भिक्षाऽटनं—भिक्षार्थं पर्यटनम्।

(क) यौवनस्थे—युवत्यौ इत्यर्थः।

(ख) पादान्तिकं—चरणसमीपम्।

अब्रवीत्,—'विजयस्व महाराज! यस्य प्रसादात् सर्वं सुखं लभ्यते'। द्वितीया तु—(ग) 'विहितं भुङ्क्ष्व महाराज!' इति ब्रवीति। तत् श्रुत्वा प्रकुपितो राजा अब्रवीत्,—'भो मन्त्रिणः! एनां (घ) दुष्टभाषिणीं कुमारिकां कस्यचित् (ङ) वैदेशिकस्य प्रयच्छत, येन (च) निजविहितम् इयमेव भुङ्क्ते'। अथ 'तथा' इति (छ) प्रतिपद्य, अल्पपरिवारा सा कुमारिका मन्त्रिभिः तस्य (ज) देवकुलाश्रितराजपुत्रस्य प्रतिपादिता। सा अपि (झ) प्रहृष्टमानसा तं पतिं देववत् (ञ) प्रतिपद्य आदाय च अन्यविषयं गता।

ततः कस्मिंश्चित् दूरतरनगरप्रदेशे (ट) तड़ागतटे राजपुत्रम् आवासरक्षायै (ठ) निरूप्य, स्वयञ्च घृततैललवणतण्डुलादि-क्रयनिमित्तं सपरिवारा गता। कृत्वा च क्रयविक्रयं यावत्

(ग) विहितं—स्वकर्मोपार्जितम्।

(घ) दुष्टभाषिणीम्—अप्रियवादिनीम्।

(ङ) वैदेशिकस्य—[विदेशे वसतीति ठक्, तस्य] विदेशीयजनस्य, [सम्बन्धविवक्षया सम्प्रदाने षष्ठी]। प्रयच्छत—प्रदत्त।

(च) निजविहितं—स्वकृतं, कर्मफलमिति भावः।

(छ) प्रतिपद्य—स्वीकृत्य। अल्पपरिवारा—अल्पमात्रानुचरी।

(ज) देवेति।—देवकुलं—देवभवनं, देवालयमित्यर्थः, ("कुलं जनपदे गोत्रे.....। भवने च तनौ क्लीबम्" इति मेदिनी) आश्रितस्य—तत्रावस्थितस्य, ["द्वितीया श्रितातीत—" (२।१।२४ पा०) इति द्वितीयासमासः] राजपुत्रस्य। प्रतिपादिता—अर्पिता।

(झ) प्रहृष्टमानसा—आनन्दितचित्ता।

(ञ) प्रतिपद्य—स्वीकृत्य, मत्वा इत्यर्थः। अन्यविषयं—भिन्नदेशं, देशान्तरमित्यर्थः, ("विषयो गोचरे देशे तथा जनपदेऽपि च" इति मेदिनी)।

(ट) तड़ागतटे—जलाशयतीरे।

(ठ) निरूप्य—नियुज्य।

आगच्छति, तावत् स राजपुत्रो वल्मीकोपरि क्षतमूर्धा प्रसुप्तः। तस्य च मुखात् भुजगः फणां निष्क्रम्य वायुमश्नाति। तत्र एव च वल्मीकेऽपरः सर्पो निष्क्रम्य तथा एव आसीत्। अथ तयोः परस्परदर्शनेन क्रोधसंरक्तलोचनयोः मध्यात् वल्मीकस्थेन सर्पेण उक्तं,—'भो भो दुरात्मन्! कथं सुन्दर-सर्वाङ्गं राजपुत्रमित्थं (ड) कदर्थयसि?' मुखस्थोऽहिरब्रवीत्, —'भो भोः! त्वया अपि दुरात्मना अस्य वल्मीकस्य मध्ये कथमिदं दूषितं (ढ) हाटकघूर्णं कलसयुगलम्?' इति। एवं तौ परस्परस्य (ण) मर्माणि उद्घाटितवन्तौ। पुनः वल्मीक-स्थोऽहिरब्रवीत्,—'भो दुरात्मन्! (त) भेषजमिदं ते किं कोऽपि न जानाति यत्, (थ) जीर्णोत्फालितकाञ्जिकराजिका-पानेन भवान् विनाशम् उपयाति?' अथ उदरस्थोऽहिरब्रवीत्, —'तवापि एतत् भेषजं कश्चिदपि न वेत्ति यत्, उष्णतैलेन वा महोष्णोदकेन तव विनाशः स्यात्?' इति।

एवञ्च सा राजकन्या (द) विटपान्तरिता तयोः पर-स्परालापान् (ध) मर्ममयान् आकर्ण्य तथा एव

(ड) कदर्थयसि—क्लेशयसि।

(ढ) हाटकघूर्णं—सुवर्णपूर्णम्; ("स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्" इत्यमरः)। कलसयुगलं—कुम्भद्वयम्।

(ण) मर्माणि—रहस्यानि इत्यर्थः। उद्घाटितवन्तौ—प्रकाशितवन्तौ।

(त) भेषजम्—औषधम्।

(थ) जीर्णेति।—जीर्णयोः,—पुरातन्योः, उत्फालितयोः,—आलोडितयोः, काञ्जिकराजिकयोः,—काञ्जिकं—"कांजी" इति प्रसिद्धं, राजिका—राजसर्षपः, "राइ" इति प्रसिद्धः, तयोः पानेन, ("राजिकाऽपि च कैदारे राजसर्षपरेखयोः" इति मेदिनी)।

(द) विटपान्तरिता—वृक्षशाखाऽन्तरावस्थिता।

(ध) मर्ममयान्—रहस्यपूर्णान् इत्यर्थः।

(न) अनुष्ठितवती, विधाय अव्यङ्गं नीरोगं भर्त्तारं, (प) निधिञ्च परमम् आसाद्य स्वदेशाभिमुखं प्रायात्। तत्र च पितृमातृस्वजनैः (फ) प्रतिपूजिता विहितोपभोगं प्राप्य सुखेन अवस्थिता। अतोऽहं ब्रवीमि,—'परस्परस्य मर्माणि' इत्यादि"।

तच्च श्रुत्वा स्वयम् अरिमर्दनोऽपि एवं (ब) समर्थितवान्। तथा च (भ) अनुष्ठितं दृष्ट्वा (म) अन्तर्लीनं विहस्य रक्ताक्षः पुनरब्रवीत्,—"कष्टम् !! विनाग्निनोऽयं भवद्भिः अन्यायेन स्वामी। उक्तञ्च,—अपूज्या यत्र पूज्यन्ते पूज्यानाञ्च विमानना।

त्रीणि तत्र प्रवर्त्तन्ते दुर्भिक्षं मरणं भयम् ॥ १८२ ॥

तथा च,—प्रत्यक्षेऽपि कृते पापे मूर्खः सान्त्वा प्रशाम्यति।

रथकारः स्वकां भार्य्यां सजारां शिरसाऽवहत्" ॥१८३॥

(न) अनुष्ठितवती—कृतवती सती। विधाय—कृत्वा। अव्यङ्गम्—अविगलिताङ्गं, परिपुष्टशरीरमित्यर्थः।

(प) निधिं—वल्मीकाभ्यन्तरस्थितं सुवर्णपूर्णकलशम् इत्यर्थः।

(फ) प्रतिपूजिता—प्रत्यभिनन्दिता, आदृता इत्यर्थः। विहितोपभोगं—भाग्यलभ्यमैश्वर्य्यम्।

(ब) समर्थितवान्—शरणागतस्य श्रवीः रक्षणं कर्त्तव्यमिति स्थिरीचकार इत्यर्थः।

(भ) अनुष्ठितम्—अनुष्ठानं, शरणागतं काकं रक्षितुं परिगृहीतं व्यापारमिति भावः।

(म) अन्तर्लीनम्—अन्तर्निगूढम्, अस्पष्टम् इत्यर्थः।

अपूज्या इति।—यत्र देशे, अपूज्या अपूजनीयाः, पूजाऽनर्हा इत्यर्थः, नीचा इति यावत्, जनाः इति शेषः, पूज्यन्ते सत्क्रियन्ते, पूज्यानाञ्च पूजार्हाणाञ्च, विमानना अवमानना, क्रियते इति शेषः, तत्र दुर्भिक्षं भिक्षाऽभावः, अन्नदुर्लभमिति यावत्, मरणं मृत्युः, भयञ्च, रोगादिजनितमिति भावः, मरणादिमिति शेषः, एतानि त्रीणि प्रवर्त्तन्ते सञ्जायन्ते; "प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः" इति कारणात् अकार्य्यकरणेन तस्मिन् राष्ट्रे नियतम् अनङ्गलक्षणमेव जायते इति भावः॥ १८२॥

प्रत्यक्षे इति।—मूर्खो बुद्धिहीनः, जनः इति शेषः, प्रत्यक्षे साक्षात्, पापे कृतेऽपि सान्त्वा सन्तोषजनकवाक्येनेत्यर्थः, पापकारिण इति शेषः, प्रशाम्यति प्रसीदति इत्यर्थः;

मल्लिनः प्राह,—"कथमेतत् ?" रक्ताक्षः कथयति,—

कथा १२ ।

"अस्ति कस्मिंश्चित् अधिष्ठाने वीरधरो नाम रथकारः, तस्य भार्या कामदमनी, सा च (य) पुंश्चलीति जनापवादसंयुक्ता । सोऽपि तस्याः परीक्षणार्थं व्यचिन्तयत्,—'अथ मया अस्याः परीक्षणं कर्त्तव्यम् । उक्तञ्च यतः,—

यदि स्यात् पावकः शीतः प्रोष्णो वा शशलाञ्छनः ।
स्त्रीणां तदा सतीत्वं स्यात् यदि स्यात् दुर्जनो हितः ॥१८४॥

जानामि च एनां लोकवचनात् असतीम् । उक्तञ्च,—

यच्च वेदेषु शास्त्रेषु न दृष्टं न च संश्रुतम् ।
तत् सर्वं वेत्ति लोकोऽयं यत् स्यात् ब्रह्माण्डमध्यगम्' ॥१८५॥

एवं सम्प्रधार्य्य भार्य्याम् अवोचत्,—'प्रिये ! प्रभातेऽहं ग्रामान्तरं यास्यामि, तत्र कतिचिद्दिनानि लगिष्यन्ति, तत् त्वया

तथा हि, रथकारः सुवधरः, स्वजारां सोपपतिकां, स्वस्यां निजां, ["स्वस्याम्" इत्यत्र "अस्त्रैषा" (७।३।४७ पा०) इति सूत्रेण वैकल्पिके इकारे कृते "स्विकाम्" इत्यपि भवति] भार्य्यां शिरसा अवहत् वहति स्म ॥ १८३ ॥

(य) पुंश्चली—असती, परपुरुषगामिनीत्यर्थः, भ्रष्टा इति यावत्, ("पुंश्चली धर्षिणी बन्धकसती कुलटेत्वरी" इत्यमरः)। जनापवादसंयुक्ता—लोकनिन्दायुता ।

यदीति ।—यदि पावकः अग्निः, शीतः शीतलः, वा अथवा, शशलाञ्छनः चन्द्रः, प्रोष्णः प्रकर्षेण उष्णः, स्यात्, यदि दुर्जनः हितः हितकरः, सुजनः इत्यर्थः, स्यात्, तदा स्त्रीणां सतीत्वं स्यात्; यथा एते असम्भवाः भावाः कदाचिदपि न सम्भवन्ति, तथा नारीणामपि सतीत्वं न सम्भवति इति निष्कर्षः; चपलाः स्त्रियः प्रायेणासत्य इति भावः ॥ १८४ ॥

यच्चेति ।—वेदेषु सामादिषु, शास्त्रेषु पुराणादिषु, च यत् न दृष्टं, न च संश्रुतं, ब्रह्माण्डमध्यगं जगतीस्थं, यत् स्यात्, सर्वं लोकः सांसारिकजनः, तत् सर्वं वेत्ति जानाति; लोकेषु किमपि गुप्तं न तिष्ठति इति भावः; अतः सर्वविदां तेषां वाक्यस्य नावज्ञेयतया परीक्षणमवश्यमेव विधेयमित्याशयः ॥ १८५ ॥

किमपि पाथेयं मम योग्यं विधेयम्'। साऽपि तद्वचनं श्रुत्वा (र) हर्षितचित्ता, औत्सुक्यात् सर्वकार्याणि सन्त्यज्य, सिद्धमन्नं घृतशर्कराप्रायमकरोत्। अथवा साधु इदमुच्यते,—

दुर्दिवसे घनतिमिरे वर्षति जलदे महाऽटवीप्रभृतौ।
पत्युर्विदेशगमने परमसुखं जघनचपलायाः ॥ १८६ ॥

अथ असौ प्रत्यूषे उत्थाय स्वगृहात् निर्गतः। साऽपि तं प्रस्थितं विज्ञाय प्रहसितवदना (ल) अङ्गसंस्कारं कुर्वाणा कथञ्चित् तद्दिवसम् (व) अत्यवाहयत्। अथ (श) पूर्वपरिचितविटगृहे गत्वा तं प्रत्युक्तवती,—'स दुरात्मा मे पतिर्ग्रामान्तरं गतः; तत् त्वया अस्मद्गृहे प्रसुप्ते जने समागन्तव्यम्'। (ष) तथाऽनुष्ठिते स रथकारोऽरण्ये दिनम् (स) अतिवाह्य, प्रदोषे स्वगृहे (ह) अपरद्वारेण प्रविश्य शय्याऽधस्तले निभृतो भूत्वा स्थितः।

(र) [हर्षितेत्यत्र तारकादित्वादितच्]। औत्सुक्यात्—उत्कण्ठावशात्, उपनायकार्थमिति भावः। घृतशर्कराप्रायं—घृतमिश्रितशर्करावहुलम्।

दुर्दिवसे इति।—घनतिमिरे सान्द्रतमसि, गाढान्धकारे इत्यर्थः, दुर्दिवसे मेघाच्छन्नदिने, जलदे मेघे, वर्षति, महाऽटवीप्रभृतौ महाऽरण्यप्रभृतिप्रदेशे, तथा पत्युर्विदेशगमने जघनचपलायाः कामुक्याः, भर्तुरा इत्यर्थः, परमसुखं महती प्रीतिः, भवतीति शेषः; दुर्दिनादौ च अन्यैः ज्ञातुमशक्यत्वात्, पत्युर्विदेशगमने च गृहेऽपि सर्वथा विघ्नाभावादिति भावः। जघनचपलानाम आर्या उक्तम् ॥ १८६ ॥

(ल) अङ्गसंस्कारं—शरीरशोधनपूर्वकमङ्गरागादिधारणम्।

(व) अत्यवाहयत्—यापयामास।

(श) पूर्वेति।—पूर्वपरिचितस्य—प्राक् संस्तुतस्य, ("संस्तवः स्यात् परिचयः" इत्यमरः) विटस्य—जारस्य इत्यर्थः, गृहे।

(ष) तथाऽनुष्ठिते—तथा—तादृशे व्यापारे, आरब्धेतरूपे इत्यर्थः, अनुष्ठिते—कृते, व्यवस्थापिते इति भावः, तथा कुलटयेति शेषः।

(स) अतिवाह्य—गमयित्वा। प्रदोषे—रजनीमुखे।

(ह) अपरद्वारेण—पृष्ठद्वारेण इत्यर्थः, खिड्की" इति वङ्गभाषया प्रसिद्धेन। निभृतः,—प्रच्छन्न इत्यर्थः।

एतस्मिन्नन्तरे सः (क) देवदत्तः समागत्य तत्र (ख) अरणे उपविष्टः । तं दृष्ट्वा रोषाविष्टचित्तो रथकारो व्यचिन्तयत्,—'किम् एनम् उत्थाय हन्मि ? अथवा (ग) हेलया एव प्रसुप्तौ द्वौ अपि एतौ व्यापादयामि ? परं पश्यामि तावदस्याः (घ) चेष्टितं, शृणोमि च अनेन सह आलापान्' । अत्रान्तरे (ङ) सा गृहद्वारं निभृतं विधाय शयनतलम् आरूढा ।

अथ तस्याः तत्र आरोहन्त्या रथकारशरीरे पादौ विलग्नः । ततः सा व्यचिन्तयत्,—'नूनम् एतेन दुरात्मना रथकारेण मत्परीक्षणार्थं (च) भाव्यम् ; ततः (छ) स्त्रीचरित्रविज्ञानं किमपि करोमि' । एवं तस्याः चिन्तयन्त्याः स देवदत्तः स्पर्शोत्सुको बभूव । अथ तया (ज) कृताञ्जलिपुटया अभिहितं,—'भो महाऽनुभव ! न मे शरीरं त्वया स्पर्शनीयं,यतोऽहं पतिव्रता महामती च ; न चेत्, शापं दत्त्वा त्वां भस्मसात् करिष्यामि' । स आह,—'यदि एवं, तर्हि त्वया किमहम् आज्ञप्तः ?' सा अब्रवीत्,—'भोः ! शृणुष्व एकाग्रमनाः, अहमद्य प्रत्यूषे देवतादर्शनार्थं (झ) चक्षुष्काऽऽयतनं गता, तत्र अकस्मात् खे वाणी

(क) देवदत्तः,—तदाख्यो विटः ।

(ख) अरणे—गृहे, ("अरणं गृहरक्षित्रोर्वैश्वरक्षयोरपि" इति मेदिनी) ।

(ग) हेलया—अनायासेन, प्रसुप्तत्वादिति भावः ।

(घ) चेष्टितं—व्यवहारम् ।

(ङ) सा—रथकारजाया । निभृतं—यत्नमित्यर्थः ।

(च) भाव्यं—भवितव्यम् ।

(छ) स्त्रीति ।—स्त्रीणां चरित्रज्ञं विज्ञानं—विशेषेण ज्ञानं, ज्ञानोपायम् इत्यर्थः, अभिचितपटूनां स्त्रीणां वाक्चेष्टितज्ञाभाविकबुद्धिविज्ञानस्य किञ्चित् परिचयमत्रे ददामीति यावत् ।

(ज) कृताञ्जलिपुटया—कृतः अञ्जलिपुटः,—यत्नकरः यया तया, कृतयुग्मसंयोजित्य इत्यर्थः, ("द्वौ युतावञ्जलिः पुमान्" इत्यमरः) ।

(झ) चक्षुष्काऽऽयतनं—चक्षोमन्दिरम् । खे वाणी—आकाशवाणी इत्यर्थः ।

सञ्जाता, 'पुत्रि ! किं करोमि ? भक्षाऽसि मे त्वं, परं षण्मासाभ्यन्तरे (ञ) विधिनियोगात् विधवा भविष्यसि'। ततो मया अभिहितं,—'भगवति ! यथा त्वम् आपदं वेत्सि, तथा तत्प्रतीकारमपि जानासि ; तत् अस्ति कश्चित् उपायः, येन मे पतिः शतसंवत्सरजीवी भवति ?' ततः तया अभिहितं—'वत्से ! (ट) सन्नपि नास्ति, यतः तव (ठ) आयत्तः स प्रतीकारः'। तत् श्रुत्वा मया अभिहितं,—'देवि ! यदि तत् मम प्राणैर्भवति, तत् आदिश, येन करोमि'। अथ देव्या अभिहितं,—'यदि अद्यदिने परपुरुषेण सह एकस्मिन् शयने समारुह्य आलिङ्गनं करोषि, तत् तव (ड) भर्तृसङ्गोऽपमृत्युः (ढ) तस्य सञ्चरति, भर्त्ताऽपि पुनः वर्षशतं जीवति'। तेन त्वं मया (ण) अभ्यर्थितः ; तत् यत् किञ्चित् कर्त्तुमनाः तत् कुरुष्व, न हि देवतावचनम् अन्यथा भविष्यति इति निश्चयः'। ततः (त) अन्तर्हासविकाशमुखः स तदुचितम् आचचार। सोऽपि रथकारो मूर्खः तस्याः तद्वचनमाकर्ण्य (थ) पुलकाङ्किततनुः शय्याऽधस्तलात् निष्क्रम्य तामुवाच,—'साधु पतिव्रते ! साधु

(ञ) विधिनियोगात्—दैवनिर्बन्धात्।

(ट) सन् अपि—विद्यमानोऽपि, प्रतीकार इति शेषः।

(ठ) आयत्तः,—अधीनः।

(ड) भर्तृसङ्गः,—पतिगतः, पत्यौ अवश्यमेव समापतिष्यन् इत्यर्थः।

(ढ) तस्य—परपुरुषस्य, सञ्चरति—समापतति, संक्रामति इत्यर्थः, तव भर्तुरपमृत्युरुक्तिन् परपुरुषे सङ्क्रामति इति भावः।

(ण) अभ्यर्थितः,—याचितः।

(त) अन्तर्हासेति।—प्रच्छन्नहासेन प्रफुल्लवदनः, ईषद्धसित इत्यर्थः।

(थ) पुलकेति।—पुलकैः,—रोमाञ्चैः, अङ्किता—चिह्निता, व्याप्ता इत्यर्थः, तनुः,—शरीरं यस्य तथाभूतः, रोमाञ्चितकलेवर इत्यर्थः।

(द) कुलनन्दिनि! अहं (ध) दुर्जनवचनग्रन्थितहृदयः त्वत्परीक्षानिमित्तं (न) ग्रामान्तरव्याजं कृत्वा अत्र खट्वाऽधस्तले (प) निभृतं लीनः; तत् एहि, आलिङ्ग्य माम्; त्वं (फ) स्वभर्तृभक्तानां मुख्या नारीणां, यत् एवं ब्रह्मव्रतं परसङ्गेऽपि पालितवती, (ब) मदायुर्वृद्धिकृते अपमृत्युविनाशार्थञ्च त्वमेवं कृतवती'। तामेवमुक्ता सस्नेहम् आलिङ्गितवान्, ततः स्वस्कन्धे ताम् आरोप्य, तमपि देवदत्तम् उवाच,—'भो मच्छाऽनुभव! मत्पुण्यैः त्वमिह आगतः, त्वत्प्रसादात् मया प्राप्तं वर्षशतप्रमाणमायुः, तत् त्वमपि माम् आलिङ्ग्य मत्स्कन्धे समारोह'। इति जल्पन् अनिच्छन्तमपि देवदत्तमालिङ्ग्य बलात् स्वकीयस्कन्धे आरोपितवान्। ततश्च नृत्यं कृत्वा,—'हे ब्रह्मव्रतधराणां (भ) धुरीण! त्वयाऽपि मयि उपकृतम्' इत्यादि उक्त्वा स्कन्धात् उत्तार्य्य, यत्र यत्र स्वजनगृहद्वारादिषु बभ्राम, तत्र तत्र तयोः उभयोरपि तद्गुणवर्णनम् अकरोत्। अतोऽहं ब्रवीमि,—'प्रत्यक्षेऽपि कृते पापे' इत्यादि।

(द) कुलनन्दिनि।—वंशानन्ददायिनि! सत्कुलप्रसूते! इत्यर्थो वा।

(ध) दुर्जनेति।—दुष्टजनवाक्येन सन्दिग्धचित्तः।

(न) ग्रामान्तरव्याजं—ग्रामान्तरगमनरूपं कृत्वम्।

(प) निभृतं—प्रच्छन्नम्। लीनः,—स्थितः।

(फ) स्वभर्तृभक्तानां—पतिपरायणानाम्। मुख्या—श्रेष्ठा। ब्रह्मव्रतं—तपोरूपनियमम्; यद्वा,—ब्रह्मव्रताख्यव्रतविशेषतुल्यं कष्टसाध्यं नियमविशेषमित्यर्थः; यथोक्तं पद्मपुराणे,—"ब्रह्माणं कायनं कृत्वा शिखराग्निसमन्वितम्।.....॥ सम्पूज्य विप्रदत्तस्थं साध्यवस्त्रविभूषितम्।.....॥ एतद्ब्रह्मव्रतं नाम निर्वाणफलदं नृणाम्॥" इति। परसङ्गे—परपुरुषसङ्गमे। पालितवती—रक्षितवती।

(ब) मदिति।—मम आयुषः वृद्धिकृते—मदीयजीवनकालवर्द्धनाय इत्यर्थः।

(भ) धुरीण!—अग्रणीः!

तत् सर्वथा (म) मूलोत्खाता वयं विनष्टाः स्मः। सुष्ठु खलु इदमुच्यते,—

मित्ररूपा हि रिपवः सम्भाव्यन्ते विचक्षणैः।
ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः ॥ १८७ ॥

तथा च,—सन्तोऽप्यर्था विनश्यन्ति देशकालविरोधिनः।
अप्राप्तान् मन्त्रिणः प्राप्य तमः सूर्योदये यथा" ॥१८८॥

ततः तद्वचोऽनादृत्य सर्वे ते स्थिरजीविनम् (य) उत्क्षिप्य स्वदुर्गमानेतुमारब्धाः।

अथ आनीयमानः स्थिरजीवी आह,—"देव ! अद्य (र) अकिञ्चित्करेण एतदवस्थेन किं मया (ल) उपसृष्टेन ?

(म) मूलोत्खाताः,—मूलम् उत्खातम्—उन्मूलितं येषां ते तथोक्ताः, मूलेन सह उन्मूलिताः इत्यर्थः।

मित्रेति।—ये जनाः, हितं हितकरं, वाक्यं वचनम्, उत्सृज्य परित्यज्य, अनभिधाय इत्यर्थः, विपरीतोपसेविनः विपरीतम् अहितम्, उपसेवन्ते अभिदधति इति तथोक्ताः, भवन्तीति शेषः, अन्याय्यमुपदिशन्ति इत्यर्थः, विचक्षणैः विदुषिः, ते मित्ररूपा बन्धुरूपधारिणः, रिपवः हि शत्रवः एव, सम्भाव्यन्ते मन्यन्ते ; अहितोपदेष्टार एव शत्रवः, हितोपदेष्टार एव मित्राणीति फलितम् ॥ १८७ ॥

सन्त इति।—सूर्योदये तमः यथा अन्धकारमिव, अन्धकारं यथा विनश्यति, तथा इत्यर्थः, देशकालविरोधिनः यस्मिन् देशे काले वा यत्कर्तव्यं, तद्विपरीतमाचरतः, देशकालविरुद्धबुद्धीनित्यर्थः, अत एव अप्राप्तान् अविचक्षणान्, मूर्खानित्यर्थः, मन्त्रिणः प्राप्य लब्ध्वा, तदधमागत्य इत्यर्थः, सन्तोऽपि सत्फलोन्मुखा अपीत्यर्थः, अर्थाः वस्तूनि, राज्य इति शेषः, विनश्यन्ति विनाशं यान्ति ; मन्त्रिबुद्धिकौशलमेव कार्यसिद्धौ हेतुरिति भावः ॥ १८८ ॥

(य) उत्क्षिप्य—उत्थाप्य।

(र) अकिञ्चित्करेण—किमपि कर्तुमक्षमेण इत्यर्थः। एतदवस्थेन—एतादृशावस्थां प्राप्तेन।

(ल) उपसृष्टेन—शत्रुणा गृहीतेन।

(व) यत्कारणमिच्छामि दीर्घं वक्ष्यमनुवेष्टुम्; तत् अर्हसि मामग्निप्रदानेन (श) समुद्धर्त्तुम्"। अथ रक्ताक्षः तस्य अन्तर्गतभावं ज्ञात्वा अब्रवीत्,—"किमर्थम् अग्निपतनमिच्छसि ?" सोऽब्रवीत्,—"अहं तावत् युष्मदर्थे इमाम् आपदं मेघवर्णेन प्रापितः; (ष) तदिच्छामि तेषां वैरयातनार्थम् उलूकत्वम्" इति। तच्च श्रुत्वा राजनीतिकुशलो रक्ताक्षः प्राह,—"भद्र! कुटिलस्त्वं, (स) कृतकवचनचतुरश्च, उलूकयोनित्वाभावेऽपि तव स्वकीया एव वायसयोनिः श्लाघ्या। श्रूयते च एतत् (ह) आख्यानकम्;—

सूर्य्यं भर्त्तारमुत्सृज्य पर्जन्यं मारुतं गिरिम्।
स्वजातिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा" ॥ १९९॥

मन्त्रिणः प्रोचुः,—"कथमेतत् ?" रक्ताक्षः कथयति,—

कथा १३।

"अस्ति (क) विषमग्निलातल-स्खलिताम्बुनिर्घोष-श्रवण-सन्त्रस्तमत्स्यपरिवर्त्तनसञ्जनितखतफेनशबलतरङ्गाया गङ्गायाः

(व) यत्कारणं—यदर्थमतोऽहमित्यर्थः। दीर्घं—प्रज्वलितम्। अनुवेष्टुं—प्रवेष्टुम्।

(श) समुद्धर्त्तुं—सम्यक् परित्रातुम् इत्यर्थः, मरणे सर्वयत्नवानिवारणादिति भावः।

(ष) तदिति।—तत्—अत एव, उलूकत्वं—पेचकत्वम्, इच्छामि—अभिलषामि, यतः अहम् उलूकीभूय स्ववैरिणः निर्व्याहतमभिलषामि इत्यर्थः।

(स) कृतकेति।—कृत्रिमवाक्यविन्यासपटुः, चाटुवचनरचनानिपुण इत्यर्थः।

(ह) आख्यानकम्—इतिहासम्।

सूर्य्यमिति।—मूषिका उन्दुरी, सूर्य्यं पर्जन्यं मेघं, मारुतं वायुं, गिरिं पर्वतं, भर्त्तारं पतिम्, उत्सृज्य विहाय, स्वजातिं निजजातीयं, भर्त्तारमित्यनुषङ्गः, प्राप्ता, अतः स्वजातिः दुरतिक्रमा दुरत्यया, नैव स्वजात्यनुरागत्यक्तुं शक्यते इत्यर्थः ॥१९९॥

(क) विषमेति।—विषमेषु—उन्नताऽऽवनतेषु, शिलातलेषु—उपलखण्डेषु,

तटे (ख) जपनियमतपःस्वाध्यायोपवासयोगक्रियानुष्ठानपरायणैः, परिपूतपरिमितजलजिघृक्षुभिः, (ग) कन्दमूलफलशैवलाभ्यवहारकदर्थितशरीरैः, (घ) वल्कलक्लृप्तकौपीनमात्रप्रच्छादनैः तपस्विभिः (ङ) आकीर्णमाश्रमपदम्। तत्र याज्ञवल्क्यो नाम (च) कुलपतिः आसीत्। तस्य (छ) जाह्नव्यां स्नात्वा (ज) उपस्पृष्टुम् आरब्धस्य करतले, (झ) श्येनमुखात् परिभ्रष्टा मूषिका पतिता।

स्खलितानां—पतितानां, प्रतिहतानामित्यर्थः, अम्भसा—जलानां, निर्घोषेण—कलकलरवेण, श्रवणात्, सन्त्रस्ताः,—सम्यक् भीताः, ये मत्स्याः, तेषां यत् परिवर्तनम्—उद्ग्रस्तग्रीवोष्ठनरूपमित्यर्थः, तेन सङ्क्षोभिताः,—जाताः, ये श्वेताः,—शुक्लाः, फेनाः,—हिल्लोराः, तैः श्रवणात्,—चकिताः, मिश्रिता इत्यर्थः, तरङ्गा यस्याः तथाभूतायाः।

(ख) जपेति।—जपः,—निःशब्दमनसोक्तं मन्त्रोच्चारणं, नियमः,—इन्द्रियनिग्रहः, तपः,—चान्द्रायणादि, स्वाध्यायः,—वेदपाठः, उपवासः,—अहोरात्रभोजनरूपः, अनशनमित्यर्थः, योगः,—समाधिः, औपनिषदैरध्यात्मचिन्तनमित्यर्थः, क्रिया—होमादिका, एतासाम् अनुष्ठानम्—आचरणं, परं—श्रेष्ठम्, एकमात्रमिति यावत्, अयनम्—आश्रयः, कर्तव्यमित्यर्थः, येषां तैः, जपादिषु एकान्तासक्तैरित्यर्थः। परिपूतेति।—परिपूतानि—विशुद्धानि, पवित्रताकराणि इत्यर्थः, परिमितानि—अल्पानि, जलानि—सलिलानि, जिघृक्षुभिः,—ग्रहीतुमिच्छुभिः; आवश्यकानुरूपजलमात्रादिच्छुभिरिति भावः।

(ग) कन्देति।—कन्दानां—मूलाधश्शेषाणां, मूलानां—शिफानां, फलानां—कदल्यादीनां, शैवलानां—जलनीलीनाञ्च, अभ्यवहारेण—भोजनेन, कदर्थितानि—क्लेशितानि, शरीराणि यैः तथाभूतैः।

(घ) वल्कलेति।—वल्कलेन—तरुत्वचा, कृतं—विहितं, यत् कौपीनं—चीरखण्डं, तन्मात्रं—तदेव, प्रच्छादनम्—आच्छादनं, वसनमित्यर्थः, येषां तपोधनैः।

(ङ) आकीर्णं—व्याप्तम्। आश्रमपदं—तपोवनम् इत्यर्थः।

(च) कुलपतिः,—"मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्। अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृतः॥" इत्येवंलक्षणः।

(छ) जाह्नव्यां—गङ्गायाम्।

(ज) उपस्पृष्टुम्—आचमितुम्। आरब्धस्य—उपक्रान्तस्य।

(झ) श्येनमुखात्—श्येनस्य—तदाख्यपक्षिविशेषस्य, मुखात्—चञ्चुपुटादित्यर्थः।

तां दृष्ट्वा (अ) न्यग्रोधपत्रेऽवस्थाप्य, पुनः स्नात्वा उपस्पृश्य च, (ट) प्रायश्चित्तादिक्रियां कृत्वा च, मूषिकां तां स्वतपोबलेन कन्यकां कृत्वा समादाय स्वाश्रमम् आनिनाय; (ठ) अनपत्याच्च जायामाह,—'भद्रे! गृह्यतामियं, तव दुहितोत्पन्ना, प्रयत्नेन संवर्द्धनीया' इति। ततः (ड) तया संवर्द्धिता लालिता पालिता च यावत् द्वादशवर्षा संजज्ञे। अथ विवाहयोग्यां तां दृष्ट्वा भर्त्तारमेवं जाया उवाच,—'भो भर्त्तः! किमिदं न अवबुध्यसे, यथा अस्याः स्वदुहितुर्विवाहसमयातिक्रमो भवति?' असौ आह,—'साधु उक्तम्। उक्तञ्च,—

स्त्रियः पूर्वं सुरैर्भुक्ताः सोमगन्धर्वपावकिभिः।
भुञ्जते मानुषाः पश्चात् तस्माद्दोषो न विद्यते॥ २००॥
सोमस्तासां ददौ शौचं गन्धर्वाः शिक्षितां गिरम्।
पावकः सर्वमेध्यत्वं तस्मान्निष्कल्मषाः स्त्रियः॥ २०१॥

(अ) न्यग्रोधपत्रे—वटपत्रे। अवस्थाप्य—संस्थाप्य।

(ट) प्रायश्चित्तादिक्रियाम्—अपवित्रस्पर्शजनितदुरदृष्टनाशकादिव्यापारम्।

(ठ) अनपत्यात्—निःसन्तानात्।

(ड) तया—यात्रयवल्कपत्न्या। संजज्ञे—सञ्जाता।

स्त्रिय इति।—स्त्रियः, पूर्वं प्राक्, सोमगन्धर्वपावकिभिः सुरैः देवैः, भुक्ताः, पश्चात् अनन्तरं, मानुषाः भुञ्जते, [अत्र "स्त्रियः" इति पदस्य "भुक्ताः" इत्यस्य कर्मत्वे प्रथमाबहुवचनान्तत्वं, मानुषा भुञ्जते इत्यस्य कर्मत्वे द्वितीयाबहुवचनान्तत्वेनानुषङ्ग इति ज्ञातव्यम्] तस्मात् भोगहेतोरित्यर्थः, दोषः भोगजनित इति भावः, तासामिति शेषः, न विद्यते॥ २००॥

सोम इति।—सोमचन्द्रः, तासां भुक्तानां स्त्रीणामित्यर्थः, शौचं शुद्धिं, पवित्रतामित्यर्थः, ददौ, भोगेन प्रीतः सन् 'यूयं पवित्रा भवत' इति वरदादित्यर्थः; अतः स्त्रियः सर्वाः पवित्रा इति भावः; गन्धर्वाः तासां शिक्षितां स्वभावतः कृतशिक्षामित्यर्थः, सुसंस्कृतामिति यावत्, गिरं वाक्यं, भोगसन्तुष्टतया वरत्वेन ददुरिति विभक्तिविपरिणामेन योजनीयम्; पावकः अग्निः, सर्वमेध्यत्वं सर्वाङ्गेषु पवित्रत्वं,

असम्प्राप्तरजा गौरी प्राप्ते रजसि रोहिणी।
अव्यञ्जना भवेत् कन्या कुचहीना च नग्निका ॥ २०२ ॥
व्यञ्जनैस्तु समुत्पन्नैः सोमो भुङ्क्ते हि कन्यकाम्।
पयोधराभ्यां गन्धर्वो रजस्याग्निः प्रतिष्ठितः ॥ २०३ ॥
तस्मादिवाहयेत् कन्यां यावन्नर्तुमती भवेत्।
विवाहश्चाष्टवर्षायाः कन्यायास्तु प्रशस्यते ॥ २०४ ॥
व्यञ्जनं हन्ति वै पूर्वं परश्चैव पयोधरौ।
रतिरिष्टांस्तथा लोकान् हन्याच्च पितरं रजः ॥ २०५ ॥

भोगयोग्यतया वरत्वेन दत्ता प्रत्यूह्यते, तस्मात् स्त्रियः निष्कन्यका निष्पापाः, भवन्ति इति शेषः ॥ २०१ ॥

असम्प्राप्तेति।—असम्प्राप्तम् अनागतं, रजः आर्त्तवं यस्याः सा, ("रजो रेणौ परागे स्यादार्त्तवे च गुणान्तरे" इति मेदिनी) गौरी तदाख्या इत्यर्थः; रजसि प्राप्ते आगते, जाते इत्यर्थः, रोहिणी; अव्यञ्जना—न व्यञ्जनम् दूषदुद्भिन्नथौवनचिह्नं कुचोद्गमादि यस्याः तादृशी, ("व्यञ्जनं तेमने चिह्ने प्रसन्नेषूपवयंवेऽपि" इति मेदिनी) कन्या, कुचहीना च अनुद्भिन्नस्तना चेत्यर्थः, नग्निका भवेत्, स्तनोद्गमात् प्राक् नग्निकावस्था इत्यर्थः ॥ २०२ ॥

व्यञ्जनैरिति।—सोमचन्द्रः, समुत्पन्नैः समुद्गतैः, व्यञ्जनैः चिह्नैः, कुचादिभिरित्यर्थः, उपलक्षितामिति शेषः, दूषदुद्भिन्नस्तनीमिति यावत्, कन्यकां भुङ्क्ते हि साम्प्रतमपि भुङ्क्ते इत्यर्थः; गन्धर्वः पयोधराभ्यां स्तनाभ्याम्, उपलक्षिता, भुञ्जते इति शेषः; रजसि, जाते इति शेषः, अग्निः प्रतिष्ठितः भोक्तुं प्रवृत्तः, भवतीति शेषः ॥ २०३ ॥

तस्मादिति।—तस्मात् यावत् यत्कालपर्य्यन्तम्, ऋतुमती रजस्वला, न भवेत्, तावत् तत्कालमध्ये, ऋतुप्रकाशात् प्रागेवेत्यर्थः, कन्यां विवाहयेत् उद्वाहयेत्; अष्टवर्षायास्तु कन्यायाः गौर्य्यां इत्यर्थः, असम्प्राप्तरजस्कायाः इति भावः, विवाहः प्रशस्यते प्रशस्त इत्यर्थः। तुशब्दोऽवधारणार्थः ॥ २०४ ॥

व्यञ्जनमिति।—व्यञ्जनम् दूषत्प्रकटितस्त्रीचिह्नविशेषः, अनूढायाः कन्यायाः इति भावः, पूर्वं प्राक्तनं, पितुः पुण्यमिति भावः, हन्ति नाशयति, पयोधरौ स्तनौ, उद्गतौ इति शेषः, परं परच्च जन्मनि लभ्यं, पितुः पुण्यमिति भावः, हत इति शेषः, रतिः सुरतम्, अविवाहितायाः इति भावः, इष्टान् प्रियान्, लोकान् स्वर्गादीन्,

ऋतुमत्यान्तु तिष्ठन्त्यां स्वेच्छादानं विधीयते ।
तस्मादुद्वाहयेन्नग्नां मनुः स्वायम्भुवोऽब्रवीत् ॥ २०६ ॥
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता ।
अविवाह्या तु सा कन्या जघन्या वृषली स्मृता ॥ २०७ ॥
श्रेष्ठेभ्यः सदृशेभ्यश्च जघन्येभ्यो रजस्वला ।
पित्रा देया विनिश्चित्य यतो दोषो न विद्यते ॥ २०८ ॥

अतोऽहमेनां सदृशाय प्रयच्छामि, न अन्यस्मै । उक्तञ्च,—

ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोर्विवाहः सख्यञ्च न तु पुष्टविपुष्टयोः ॥ २०९ ॥

पित्रोरिति शेषः, तथा रजः आर्षवञ्च, पितरं हन्यात् पातयेदित्यर्थः; यौवन-चिह्नादीनां सम्भवात् प्राक् कन्यादानं कर्त्तव्यमिति भावः ॥ २०५ ॥

ऋतुमत्यामिति ।—ऋतुमत्यां रजस्वलायां, कन्यायामिति शेषः, तिष्ठन्त्यां सत्यां, स्वेच्छादानं कन्याया इच्छानुसारेण दानं, विधीयते, न तदानीं पित्रादीनां पात्रापात्र-परीक्षणं कर्त्तव्यम् ; कन्या यमभिलषेत्, तस्मै एव सा दातव्येति भावः ; तस्मात् नग्नाम् अनागताऽऽर्त्तवाम्, अरजस्कामित्यर्थः; ("नग्निकाऽनागताऽऽर्त्तवा" इत्यमरः) उद्वाहयेत्, स्वायम्भुवः ब्रह्मसुतः, मनः अब्रवीत् बभाषे ॥ २०६ ॥

पितृवेश्मनीति ।—या कन्या पितृगृहे, स्थितेति शेषः, असंस्कृता अविवाहिता एव, रजः आर्षवं, पश्यति ऋतुमती भवति इत्यर्थः, जघन्या अधमा, तथा वृषली शूद्रा, शूद्रतुल्या सा कन्या अविवाह्या तु नैव उद्वाह्या, स्मृता ; यद्वा,—वृषली तत्संज्ञाविशिष्टा, "पितुर्गेहे च या नारी रजः पश्यत्यसंस्कृता । भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥" इति स्मरणात् ॥ २०७ ॥

श्रेष्ठेभ्य इति ।—यतो यस्मात् कारणात्, दोषः तादृशानवस्थायां नीचपात्रेऽपि कन्यादानरूपः इत्यर्थः, न विद्यते न भवति, तस्मात् पित्रा विनिश्चित्य विचार्य्य, रजस्वला ऋतुमती, [रजस्शब्दात्"रजःकृषा—"(५ । २ । ११२ पा०) इति अस्त्यर्थे वलच्प्रत्ययः] श्रेष्ठेभ्यः स्वस्मात् प्रकृष्टेभ्यः, सदृशेभ्यः स्वसमानान्वयगुणेभ्यः, तथा जघन्येभ्यश्च अधमेभ्यो वा, अत्र चकारो वाऽर्थे ; देया ; यस्मै यस्मैचित् दातव्या इत्यर्थः ; कन्यायाम् ऋतुमत्यां पात्रापात्रविचारो न कर्त्तव्य इति भावः ॥ २०८ ॥

ययोरिति ।—ययोः, जनयोरिति शेषः, वित्तं धनं, समं तुल्यं, ययोरेव कुलं

तथाच,—कुलञ्च शीलञ्च सनाथता च
विद्या च वित्तञ्च वपुर्वयश्च।
एतान् गुणान् सप्त विचिन्त्य देया
कन्या बुधैः शेषमचिन्तनीयम् ॥ २१० ॥

तत् यदि अस्या रोचते, तदा भगवन्तम् आदित्यमाहूय तस्मै प्रयच्छामि'। सा प्राह,—'इह को दोषः ? क्रियताम् एतत्'। अथ मुनिना रविराहूतः। (ढ) वेदमन्त्रामन्त्रणप्रभावात् तत्क्षणादेवाभ्युपगम्यादित्यः प्रोवाच,—'भगवन्! किमहम् आहूतः ?' सोऽब्रवीत्,—'एषा मदीया कन्यका तिष्ठति, यदि एषा त्वां वृणोति, तर्हि उद्वहस्व' इति। एवमुक्ता स्वदुहितरम् उवाच,—'पुत्रि! किं (ण) तव रोचते एष भगवान् त्रैलोक्यदीपको भानुः ?' पुत्रिका अब्रवीत्,—'तात! अतिदहनात्मकोऽयं, न अहमेनम् अभिलषामि। तदस्मात् अन्यः

बंधुः, सखं, तयोरेव विवाहः परिणयः, सख्यं मैत्री च, अस्तमिति शेषः; पुष्टविपुष्टयोः सधननिर्धनयोः, न तु नैव, अस्तमिति शेषः; तादृशपरिणयादिकं परिणामे दुःखावहमेव भवेदिति भावः ॥ २०९ ॥

कुलञ्चेति।—बुधैः विद्वद्भिः; कुलञ्च वंशश्च, शीलञ्च चरित्रञ्च, सनाथता च सहायवत्त्वञ्च, विद्या च, वित्तञ्च धनञ्च, वपुः शरीरं, सौष्ठवान्वितमिति भावः, वयश्च यौवनञ्च, एतान् सप्त गुणान् विचिन्त्य विचार्य, कन्या देया, पूर्वोक्तगुणसप्तकशालिने वराय दातव्येत्यर्थः, शेषम् अतः परम्, अचिन्तनीयं न चिन्तनीयं, चिन्तायाः आवश्यकं नास्तीत्यर्थः; यत् भवितव्यं तदवश्यमेव भवति, भाग्यायत्तत्वात् सर्वस्येति भावः। उपजातिः वृत्तम् ॥ २१० ॥

(ढ) वेदमन्त्रेति।—वेदमन्त्रेण यत् आमन्त्रणम्—आह्वानं, तस्य प्रभावात्—सामर्थ्यात्।

(ण) तव—तुभ्यमित्यर्थः, ["कर्मधानां प्रीयमाणः" (१।४।३३ पा०) इति सूत्रेण चतुर्थीप्राप्तौ सत्यामपि सम्बन्धविवक्षया षष्ठी]। त्रैलोक्यदीपकः,—त्रिलोकीप्रकाशक इत्यर्थः। भानुः,—सूर्यः।

(त) प्रकृष्टतरः कश्चित् आह्वयताम्'। अथ तस्याः तद्वचनं श्रुत्वा मुनिः भास्करमुवाच,—'भगवन्! त्वत्तः (थ) अधिकोऽस्ति कश्चित्?' भास्करः प्राह,—'अस्ति मत्तोऽपि अधिको मेघः, येन आच्छादितोऽहमदृश्यो भवामि'। अथ मुनिना मेघमपि आहूय कन्या अभिहिता,—'पुत्रिके! अस्मै त्वां प्रयच्छामि?' सा प्राह,—'कृष्णवर्णोऽयं (द) जड़ात्मा च; तदस्मात् (ध) अन्यस्य प्रधानस्य कस्यचित् मां प्रयच्छ'। अथ मुनिना मेघोऽपि पृष्टः,—'भो भो मेघ! त्वत्तोऽपि अधिकोऽस्ति कश्चित्?' मेघेनोक्तं,—'मत्तोऽपि अधिकोऽस्ति वायुः, वायुना (न) हतोऽहं सहस्रधा यामि'। तत् श्रुत्वा मुनिना वायुराहूतः, आह च,—'पुत्रिके! किम् एष वायुस्ते विवाहाय उत्तमः प्रतिभाति?' सा अब्रवीत्,—'तात! (प) अतिचपलोऽयं, तदस्मादपि अधिकः कश्चित् आनीयताम्। मुनिः आह,—'वायो! त्वत्तोऽपि अधिकोऽस्ति कश्चित्?' पवनेन उक्तं,—'मत्तोऽपि अधिकोऽस्ति पर्वतः, (फ) येन संस्तभ्य बलवानपि अहं धिये'। अथ मुनिः पर्वतमाहूय कन्यामुवाच,—'पुत्रिके! त्वाम् अस्मै प्रयच्छामि?' सा प्राह,—'तात! (ब) कठिनात्मकोऽयं स्तब्धश्च, तत् अन्यस्मै देहि माम्'। मुनिना

(त) प्रकृष्टतरः,—अत्युत्कृष्टः।

(थ) अधिकः,—अधिकशक्तिमान्।

(द) जड़ात्मा—जलयोरैक्यात् जलात्मा, जलमयतया अतिशीतलः इत्यर्थः; यद्वा,—जड़ः,—दृष्टानिष्टज्ञानरहितः, आत्मा यस्य तादृशः, मूर्खः इति यावत्।

(ध) अन्यस्येति।—[सम्बन्धविवक्षया सम्प्रदाने षष्ठी]।

(न) हतः,—ताड़ितः। सहस्रधा—सहस्रभागेन।

(प) अतिचपलः,—अतिचञ्चलस्वभावः।

(फ) येन—पर्वतेन। संस्तभ्य—सन्निरुध्य, बाधां प्राप्येत्यर्थः।

(ब) कठिनात्मकः,—कठोरशरीरः, निर्दय इति भावः। स्तब्धः,—निश्चलः।

पर्वतः पृष्टः,—'भोः पर्वतराज! त्वत्तोऽपि अधिकोऽस्ति कश्चित्?' गिरिणा उक्तं,—'मत्तोऽपि अधिकाः सन्ति मूषिकाः, ये मच्छरीरं बलात् विदारयन्ति'। ततो मुनिः मूषिकमाहूय तस्या अदर्शयत्, आह च,—'पुत्रिके! त्वाम् अस्मै प्रयच्छामि, किम् एष प्रतिभाति ते मूषिकराजः?' साऽपि तं दृष्ट्वा स्वजातीय एष इति मन्यमाना (भ) पुलकोद्भूषितशरीरोवाच,—'तात! मां मूषिकां कृत्वा अस्मै प्रयच्छ, येन (म) स्वजातिविहितं गृहधर्मम् अनुतिष्ठामि'। ततः सोऽपि स्वतपोबलेन तां मूषिकां कृत्वा तस्मै प्रादात्। अतोऽहं ब्रवीमि,—'सूर्यं भर्त्तारमुत्सृज्य' इत्यादि"।

अथ रक्ताक्षवचनम् अनादृत्य तैः स्ववंशविनाशाय स स्वदुर्गम् उपनीतः। नीयमानश्च अन्तर्लीनमवहस्य स्थिरजीवी अचिन्तयत्—

"हन्यतामिति येनोक्तं स्वामिनो हितवादिना।
स एवैकोऽत्र सर्वेषां नीतिशास्त्रार्थतत्त्ववित् ॥ २११ ॥

तत् यदि तस्य वचनम् अकरिष्यन् एते, ततो न स्वल्पोऽपि अनर्थोऽभविष्यत् एतेषाम्"। अथ दुर्गद्वारं प्राप्य अरिमर्दनोऽब्रवीत्,—"भो भोः! हितैषिणोऽस्य स्थिरजीविनो यथासमीहितं स्थानं प्रयच्छत"। तच्च श्रुत्वा स्थिरजीवी अचिन्तयत्,—

(भ) पुलकेति।—पुलकेन—आनन्दजनितरोमाञ्चेन, उद्भूषितम्—अलङ्कृतं, शरीरं यस्याः तथाभूता।

(म) स्वजातिविहितं—मूषिकजात्यनुरूपम्। गृहधर्मं—गृहकार्यम्।

हन्यतामिति।—स्वामिनः प्रभोः, हितवादिना येन रक्ताक्षेण, हन्यताम् इति उक्तम्, अत्र सर्वेषाम् उलूकानां मध्ये, [इति निर्द्धारणे षष्ठी] स एव एकः केवलः, नान्य इति भावः, ("एकः सङ्ख्याऽन्यरे श्रेष्ठे केवलेतरयोस्त्रिषु" इति मेदिनी) नीतिशास्त्रार्थतत्त्ववित् नीतिशास्त्रार्थस्य तत्त्वं याथार्थ्यं, वेत्तीति तथोक्तः, भवतीति शेषः ॥ २११ ॥

"मया तावत् एतेषां बधोपायः चिन्तनीयः; स मया (य) मध्यस्थेन न साध्यते, यतो मदीयम् (र) इङ्गिताद्दिकं विचारयन्तः तेऽपि सावधाना भविष्यन्ति। तत् दुर्गद्वारम् (ल) अधिष्ठितोऽभिप्रेतं साधयामि" इति निश्चित्य उलूकपतिमाह,—"देव! युक्तमिदं यत् स्वामिना प्रोक्तम्; परमहमपि नीतिशास्त्रे (व) अहितश्च; यद्यपि (श) अनुरक्तः शुचिः, तथाऽपि दुर्गमध्ये (ष) आवासो न मेऽर्हः; तत् अहमत्र एव दुर्गद्वारस्थः प्रत्यहं भवत्पादपद्मरजःपवित्रीकृततनुः सेवां करिष्यामि"। "तथा" इति (स) प्रतिपन्ने, प्रतिदिनम् उलूकपतिसेवकास्ते प्रकाममाहारं ज्ञात्वा उलूकराजादेशात् प्रहृष्टमांसाहारं स्थिरजीविने प्रयच्छन्ति। अथ कतिपयैः एव (ह) अहोभिः मयूर इव स बलवान् संवृत्तः।

अथ रक्ताक्षः स्थिरजीविनं (क) पीथमाणं दृष्ट्वा सविस्मयो मन्त्रिजनं राजानञ्च प्रत्याह,—"अहो! मूर्खोऽयं मन्त्रिजनो भवांश्च, इत्येवमहम् अवगच्छामि। उक्तञ्च,—

(य) मध्यस्थेन—दुर्गमध्यस्थितेन। न साध्यते—न कर्तुं शक्यते।

(र) इङ्गिताद्दिकं—इङ्गितचेष्टादिकम्। विचारयन्तः,—विवेचयन्तः।

(ल) अधिष्ठितः,—अवलम्बितः।

(व) अहितः,—अन्यः, स्वभावशत्रुरित्यर्थः।

(श) अनुरक्तः,—भक्तः। शुचिः,—निर्दोषः, अकलुषमिति शेषः।

(ष) आवासः,—अवस्थानं, मनेति शेषः। न अर्हः,—न योग्यः, अनुचितः इत्यर्थः।

(स) प्रतिपन्ने—अङ्गीकृतवति इत्यर्थः, उलूकराजे इति शेषः। प्रकामं—यथेष्टम्।

(ह) अहोभिः इति।—["अपवर्गे तृतीया" (२।३।६ पा०) इति तृतीया]।

(क) पीथमाणं—पीवरतां नीयमानमित्यर्थः, (पुष्यतेः चिपि कर्मणि आनचि रूपं, पीथ्यमानमित्यर्थः)।

पूर्वं तावदहं मूर्खो द्वितीयः पाशबन्धकः ।
ततो राजा च मन्त्री च सर्वं वै मूर्खमण्डलम्" ॥२१२॥

इति प्राहुः,—"कथमेतत् ?" इत्याहः कथयति,—

कथा १४ ।

"अस्ति कस्मिंश्चित् पर्वतैकदेशे महान् वृक्षः, तत्र च चित्रकनामा कोऽपि पक्षी प्रतिवसति स्म । तस्य (ख) पुरीषे सुवर्णमुत्पद्यते । अथ कदाचित् तमुद्दिश्य व्याधः कोऽपि समाययौ । स च पक्षी तदयत एव पुरीषम् (ग) उत्ससर्ज । अथ (घ) पातसमकालमेव तत् सुवर्णीभूतं दृष्ट्वा व्याधो विस्मयम् अगमत्—'अहो ! मम शिशुकालात् आरभ्य (ङ) शकुनिबन्धव्यसनिनः अशीतिवर्षाणि समभूवन् ; न च कदाचित् अपि पक्षिपुरीषे सुवर्णं दृष्टम्' इति विचिन्त्य तत्र वृक्षे पाशं बबन्ध । अथ असौ अपि पक्षी मूर्खस्तथैव (च) विस्रब्धचित्तो यथापूर्वम् उपविष्टः, (छ) तत्कालमेव पाशेन बद्धः । व्याधस्तु

पूर्वमिति ।—अहं तावत् पूर्वं प्रथमं, मूर्खः, भवानीति शेषः, पाशेन बध्नातीति पाशबन्धकः व्याधः, द्वितीयः, मूर्खं इत्यनुषङ्गः, भवतीति शेषः ; ततः अनन्तरं, राजा च, मन्त्री च, मूर्खं इति पूर्वानुषङ्गः ; अतः सर्वं वै सर्वमेव, [विधेयप्राधान्यात् क्लीवत्वं] मूर्खमण्डलं मूर्खाणां समष्टिः इत्यर्थः ॥ २१२ ॥

(ख) पुरीषे—विष्ठायाम् ।

(ग) उत्ससर्ज—तत्याज ।

(घ) पातसमकालमेव—पतनसमयमेव, पतनक्षण एवेत्यर्थः । तत्—पुरीषमित्यर्थः । सुवर्णीभूतम्—असुवर्णं सुवर्णं भूतमिति तथोक्तं, ["अभ्यासयोगे—" (५।४।५० पा०) इति अभूततद्भावे च्विप्रत्ययः] ।

(ङ) शकुनिबन्धव्यसनिनः,—पक्षिबन्धनासक्तस्य । पाशं—जालम् ।

(च) विस्रब्धचित्तः,—निःशङ्कमनाः । यथापूर्वं—पूर्ववत् । [पूर्वम् अनतिक्रम्य इति अनतिक्रमार्थे अव्ययीभावसमासः] ।

(छ) तत्कालमेव—उपवेशनसमकालमेव ।

तं पाशात् (ज) उन्मुच्य पञ्जरके संस्थाप्य निजावासं नीतवान्। अथ चिन्तयामास,—'किमनेन (झ) सापायेन पक्षिणा अहं करिष्यामि? यदि कदाचित् कोऽपि अमुमीदृशं ज्ञात्वा राज्ञे निवेदयति, तत् नूनं प्राणसंशयो मे भवेत्; अतः स्वयमेव पक्षिणं राज्ञे निवेदयामि' इति विचार्य्य तथैव अनुष्ठितवान्।

अथ राजाऽपि तं पक्षिणं दृष्ट्वा विकसितनयनवदनकमलः परां तुष्टिमुपागतः, प्राह च एवं, (ञ)—'हंहो! रक्षापुरुषाः! एनं पक्षिणं यत्नेन रक्षत, अशनपानादिकञ्च अस्य यथेच्छं प्रयच्छत'। अथ मन्त्रिणा अभिहितं,—किमनेन (ट) अयष्टेय-व्याधवचनप्रत्ययमात्रपरिगृहीतेन अपण्डितेन? किं कदाचित् पक्षिपुरीषे सुवर्णं सम्भवति? तन्मुच्यतां पञ्जरबन्धनादयं पक्षी' इति मन्त्रिवचनात् राज्ञा मोचितोऽसौ पक्षी (ठ) उन्नतद्वार-तोरणे समुपविश्य सुवर्णमयीं विष्ठां विधाय,—'पूर्वं तावदहं मूर्खः' इति श्लोकं पठित्वा यथासुखम् आकाशमार्गेण (ड)प्रायात्। अतोऽहं ब्रवीमि,—'पूर्वं तावदहं मूर्खः' इत्यादि"।

(ज) उन्मुच्य—मोचयित्वा, निःसार्य्य इत्यर्थः।

(झ) सापायेन—सविपदा, अपत्तिजनकेनेत्यर्थः; लुब्धस्य राज्ञः लोभोत्पादक-त्वादेतस्येति भावः। अमुं—पक्षिणम्। ईदृशं—सुवर्णमयपुरीषमित्यर्थः।

(ञ) हंहो!—भोः! रक्षापुरुषाः,—रक्षिजनाः। अस्य—पक्षिण इत्यर्थः। [सम्बन्धविवक्षया सम्प्रदाने षष्ठी]।

(ट) अयष्टेयेति।—अयष्टेयम्—अविश्वसनीयं, यत् व्याधस्य वचनं, तस्मिन् प्रत्ययमात्रेण परिगृहीतः तेन। अपण्डितेन—अविज्ञेन, ("अकुलपक्षिप्रकृति·····। ·····पतत्यवरथाख्याः॥" इत्यमरः)।

(ठ) उन्नतेति।—उन्नतम्—उच्चैः, द्वारं—बहिर्निर्गमनस्थानं यस्य तादृशं यत् तोरणं तस्मिन्, बहिर्द्वारप्रदेशे इत्यर्थः, ("तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः)। विधाय—कृत्वा, उत्सृज्य इत्यर्थः।

(ड) प्रायात्—प्रस्थितः।

अथ ते पुनरपि (ढ) प्रतिकूलदैवतया हितमपि रक्षाक्ष-वचनम् अनाहृत्य, (ण) भूयस्तं (त) प्रभूतमांसादिविविधाहारेण पोषयामासुः। अथ रक्षाक्षः (थ) स्ववर्गमाहूय रहः प्रोवाच,—"अहो! एतावत् एव अस्मद्भूपतेः कुशलं दुर्गञ्च; तदुपदिष्टं मया यत् कुलक्रमागतः सचिवोऽभिधत्ते; तत् वयमन्यत् पर्वत-दुर्गं सम्प्रति समाश्रयामः। उक्तञ्च यतः,—

अनागतं यः कुरुते स शोभते
स शोच्यते यो न करोत्यनागतम्।
वनेऽत्र संस्थस्य ममागता जरा
विलम्ब वाणो न कदाऽपि मे श्रुता" ॥ २१३ ॥

ति प्रोचुः,—"कथमेतत्?" रक्षाक्षः कथयति,—

कथा १५।

"कस्मिंश्चित् वनोद्देशे (द) खरनखरो नाम सिंहः प्रतिवसति

(ढ) प्रतिकूलदैवतया—विमुखभागधेयतया, दुर्भाग्यतयेत्यर्थः।

(ण) भूयः,—पुनः। तं—स्थिरजीविनम्।

(त) प्रभूतेति।—प्रचुरपिशितप्रभृतिबहुविधभोजनदानेन।

(थ) स्ववर्गम्—आत्मपक्षपातिनं अज्ञातीयसमूहमित्यर्थः। रहः,—एकान्ते। तदिति।—कुलक्रमागतः,—वंशपरम्परागतः। सचिवः,—मन्त्री, यत् अभिधत्ते—वदति, तत् मया उपदिष्टं—तथा उपदेशो दत्त इत्यर्थः।

अनागतमिति।—यः जनः, अनागतम् अनुपस्थितं, कुरुते आविपदमाशङ्क्य उपायं करोतीत्यर्थः, स शोभते सुखेन वर्त्तते इत्यर्थः, यः अनागतं न करोति, स शोच्यते सुखाद्विरिति शेषः, विपदस्य तस्य बन्धुभिः तदर्थं शोकः क्रियते इत्यर्थः; अत्र वने संस्थस्य स्थितस्य, मम इति शेषः, जरा वार्द्धकं, समागता उपस्थिता, किन्तु कदाऽपि विलम्ब मन्दस्य, वाणी वचनं, मे मया इत्यर्थः, [मयेत्यर्थे मे इति शब्दः निपातेषु दृश्यः, "ते मे शब्दौ निपातेषु" (५म अधि० २य पा० १० सू०) इति वामनः] न श्रुता न आकर्णिता। संग्रहश्लोकः उक्तम् ॥ २१३ ॥

(द) खरनखरः,—खराः,—तीक्ष्णाः, नखराः यस्य सः।

क्ष । स कदाचित् इतश्चेतश्च परिभ्रमन् (ध) क्षुत्क्षामकण्ठो न किञ्चिदपि (न) सत्त्वम् आससाद । ततश्च (प) अस्तमनसमये महतीं गिरिगुहाम् आसाद्य प्रविष्टः चिन्तयामास,—(फ)'नूनम् एतस्यां गुहायां रात्रौ केनापि सत्त्वेन आगन्तव्यम् ; तत् (ब) निभृतो भूत्वा तिष्ठामि' । एतस्मिन्नन्तरे (भ) तत्स्वामी दधिपुच्छो नाम शृगालः समायातः । स च यावत् पश्यति, तावत् (म) सिंहपदपद्धतिर्गुहायां प्रविष्टा, न च निष्क्रमणं गता इति दृष्टवान् । ततश्च अचिन्तयत्,—'अहो ! विनष्टोऽस्मि ! नूनमस्याम् (य) अन्तर्गतेन सिंहेन भाव्यम् ; तत् किं करोमि ? कथं स्नास्यामि ?' एवं विचिन्त्य हारस्वः (र) फूत्कर्तुम् आरब्धः, —'अहो विल ! अहो विल !' इत्युक्त्वा (ल) तूष्णीम्भूय भूयोऽपि तथा एव प्रत्यभाषत,—'भोः ! किं न स्मरसि, यत् मया त्वया सह (व) समयः कृतोऽस्ति, यत् 'मया वाह्यात् समागतेन त्वं (श) वक्तव्यः, त्वया च अहम् आकारणीय

(ध) क्षुदिति ।—क्षुधा—बुभुक्षया, क्षामः,—शुष्कः, कण्ठो यस्य तादृशः ।

(न) सत्त्वं—प्राणिनम् । आससाद—प्राप ।

(प) अस्तमनसमये—सायङ्काले ।

(फ) नूनं—निश्चितम् । सत्त्वेन—जीवेन । आगन्तव्यम्—आगम्य खादितव्यमित्यर्थः ।

(ब) निभृतः,—निःशब्दः ।

(भ) तत्स्वामी—गुहाधिकारी ।

(म) सिंहेति ।—सिंहस्य पद्धतिः,—पदक्षेपपङ्क्तिः ।

(य) अन्तर्गतेन—अन्तः,—मध्यं, गतेन—प्राप्तेन, तत्र स्थितेन इत्यर्थः ।

(र) फूत्कर्तुं—चीत्कर्तुम्, आह्वातुम् इत्यर्थः ।

(ल) तूष्णीम्भूय—मौनी भूत्वा । तथा एव—फूत्कृत्य एवेत्यर्थः ।

(व) समयः,—नियमः । वाह्यात्—बहिर्देशात् ।

(श) वक्तव्यः,—आह्वातव्यः इत्यर्थः । आकारणीयः,—आमन्त्रणीयः,

इति ? तत् यदि मां न आह्वयसि, ततोऽहं द्वितीयं विलं यास्यामि'। अथ तत् श्रुत्वा सिंहः चिन्तितवान्,—'नूनम् एषा गुहा अस्य समागतस्य सदा समाह्वानं करोति, परम् अद्य भङ्गयात् न किञ्चित् ब्रूते। अथवा साधु इदमुच्यते,—

भयसन्त्रस्तमनसां हस्तपादादिकक्रियाः।
प्रवर्त्तन्ते न वाणी च वेपथुश्चाधिको भवेत् ॥ २१४ ॥

तत् अहमस्य आह्वानं करोमि, येन तदनुसारेण प्रविष्टोऽयं मे भोज्यतां यास्यति'। एवं सम्प्रधार्य्य सिंहः तस्याह्वानम् अकरोत्। अथ सिंहशब्देन सा गुहा (ष) प्रतिरवसम्पूर्णा अन्यान् अपि दूरस्थान् आरण्यजीवान् त्रासयामास। शृगालोऽपि पलायमान इमं श्लोकम् अपठत्,—

'अनागतं यः कुरुते स शोभते
स शोच्यते यो न करोत्यनागतम्।
वनेऽत्र संस्थस्य समागता जरा
विलस्य वाणी न कदापि मे श्रुता' ॥२१५॥

तदेवं मत्वा युष्माभिर्मया सह गन्तव्यम्" इति।

भयेति।—भयेन सन्त्रस्तं व्याकुलम्, अतिभयाकुलमित्यर्थः, मनो येषां तथाभूतानां, जनानामिति शेषः, हस्तपादादिकक्रियाः हस्तौ च पादौ च हस्तपादं, ["हस्तस्य प्राचितृतीयसेनाङ्गानाम्" (२।४।२ पा०) इत्येकवद्भावः] तदादि येषां ते तेषां हस्तपादादिकानां, क्रियाः व्यापाराः, न प्रवर्त्तन्ते न भवन्तीत्यर्थः, ते करचरणसञ्चालनादिकमपि कर्तुं न शक्नुवन्ति इति निष्कर्षः; तथा वाणी च वाक् च, न प्रवर्त्तते इति शेषः, वेपथुः [वेपयतीति: "ट्टितोऽथुच्" (३।३।८९ पा०) इति भावे अथुच्प्रत्यये सिद्धम्] कम्पस्य, अधिकः अतिशयः, भवेत् ॥ २१४ ॥

(ष) प्रतिरवसम्पूर्णा—प्रतिध्वनिपूरिता। दूरस्थान्—दूरस्थितान्। आरण्यजीवान्—वन्यजन्तून्, ["गतिबुद्धि—" (१।४।५२ पा०) इति अधिकर्तुः कर्मत्वम्]।

अनागतमिति।—आख्यातं प्राक् ॥ २१५ ॥

एवमभिधाय (स) आत्मानुयायिपरिवारानुगतो दूरदेशान्तरं रक्ताक्षो जगाम ।

अथ रक्ताक्षे गते क्षिरजीवी अतिहृष्टमना व्यचिन्तयत्,—"अहो! कल्याणमस्माकम् उपस्थितं, यत् रक्ताक्षो गतः; यतः स दीर्घदर्शी, एते च (ह) मूढमनसः, ततो मम सुखघात्याः सञ्जाताः । उक्तञ्च यतः,—

न दीर्घदर्शिनो यस्य मन्त्रिणः सुमहीपतेः ।
क्रमायाता ध्रुवं तस्य न चिरात् स्यात् परिक्षयः ॥ २१६ ॥

अथवा साधु इदमुच्यते,—

मन्त्रिरूपा हि रिपवः सम्भाव्यन्ते विचक्षणैः ।
ये सन्तं नयमुत्सृज्य सेवन्ते प्रतिलोमतः" ॥ २१७ ॥

एवं विचिन्त्य (क) स्वकुलाये एकैकां वनकाष्ठिकां

(स) आत्मानुयायीति ।—स्वानुचरपरिजनवर्गयुक्तः ।

(ह) मूढमनसः,—अविवेकिचित्ताः, अज्ञाना इत्यर्थः । सुखघात्याः,—सुखेन विनाश्याः; [घात्याः इति इनघातोः "कृदभोक्ष्यन्" (३।१।१२४ पा०) इति ण्यत्, "इनसोरल्लोपश्च" (७।३।९२ पा०) इति तस्य, "हो हन्तेः—" (७।३।५४ पा०) इति कुत्वम् ; अनुपसर्गे सुप्युपपदे तु "इनस्त च" (३।१।१०८ पा०) इत्यनेन क्यप्-प्रत्ययो भवति, यथा ब्रह्मघ्नो इनसं ब्रह्महत्येति] ।

नेति ।—यस्य महीपतेः राज्ञः, मन्त्रिणः सचिवाः, क्रमायाताः कुलक्रमागताः, तथा दीर्घदर्शिनः भविष्यदर्थदर्शनशीलाः, दूरदृष्टय इत्यर्थः, न स्युः, तस्य न चिरात् अविलम्बेनैव, ध्रुवं निश्चितं, परिक्षयः विनाशः, स्यात् ; मन्त्रिणः वैचक्षण्येनैव राज्ञः स्वास्थ्यसुखेः निदानमिति भावः ॥ २१६ ॥

मन्त्रिरूपा इति ।—ये सन्तं शोभनं, नयं नीतिमार्गम्, उत्सृज्य विहाय, प्रतिलोमतः प्रतिकूलेन नयेन, दुर्नयेनेत्यर्थः, सेवन्ते, प्रभुमिति शेषः, विचक्षणैः विदद्भिः, ते मन्त्रिरूपाः अमात्यव्यपदेशिनः, रिपवः शत्रवः, सम्भाव्यन्ते हि मन्यन्ते एव ; इत्याक्षादित-कूपवत् विपरीतनीतिप्रक्षिप्तः सचिवः नियतमनर्थमुत्पादयतीति भावः ॥२१७॥

(क) स्वकुलाये—निजनीडे । वनकाष्ठिकां—वनस्य सुदं काष्ठमित्यर्थः, [कृतं काष्ठमित्यर्थे "कृते" (५।१।८६ पा०) इति ठनि, "प्रत्ययस्थात् कात्—"

गृहादीपनार्थं दिने दिने प्रक्षिपति। न च ते मूर्खा उलूका विजानन्ति यत्, एष कुलायम् अस्माकं हाहाय वृद्धिं नयति। अथवा साधु इदमुच्यते,—

अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च।
शुभं वेत्त्यशुभं पापं भद्रं दैवहतो नरः॥ २१८॥

अथ (ख) कुलायव्याजेन दुर्गद्वारे कृते काष्ठनिचये, सञ्जाते सूर्योदयेऽन्धतां प्राप्तेषु उलूकेषु सत्सु, स्थिरजीवी शीघ्रं गत्वा मेघवर्णमाह,—"स्वामिन्! (ग) दाहसाध्या कृता रिपुगुहा; तत् सपरिवारः समेत्य एकैकां वनकाष्ठिकां ज्वलन्तीं गृहीत्वा गुहाद्वारे अस्माकं कुलाये प्रक्षिप, येन सर्वे शत्रवः (घ) कुम्भीपाकनरकप्रायेण दुःखेन म्रियन्ते"। तत् श्रुत्वा प्रहृष्टो मेघवर्ण आह,—"तात! कथय आत्मवृत्तान्तं, चिरात् अद्य दृष्टोऽसि"। स आह,—"वत्स! नार्यं कथनस्य कालः, यतः कदाचित् तस्य रिपोः कश्चित् (ङ) प्रणिधिर्मम इह आगमनं

(७।३।४४ पा०) इति चकारस्य दत्वम्]। गृहादीपनार्थं—दुर्गप्रज्वालनार्थम्। दिने दिने—प्रतिदिनम्।

अमित्रमिति।—दैवहतः दैवेन दुर्भाग्येण, हतो विनाशितः, प्रतिकूलदैव इत्यर्थः, नरः, अमित्रं शत्रुं मित्रं कुरुते, तस्मिन् मित्रबुद्धिं विदधातीत्यर्थः, मित्रं सुहृदं, द्वेष्टि तदुद्दिश्य द्वेषं करोति, हिनस्ति पीडयति च, शुभम् अशुभं तथा पापम् अमङ्गलं, भद्रं मङ्गलं, वेत्ति बुध्यते च, दैवे प्रतिकूले बुद्ध्यादिकं सर्वमेव विपर्येति इति भावः॥ २१८॥

(ख) कुलायव्याजेन—नीडनिर्माणच्छलेन।

(ग) दाहसाध्या—दाहस्य योग्या, भस्मीकरणार्हा इत्यर्थः

(घ) कुम्भीपाकेति।—कुम्भीपाकाख्यनरकभाजनजन्यदुःखसदृशेन। म्रियन्ते—निधनं यान्ति, यथा कुम्भीपाकाख्ये नरके नारकिणः पच्यन्ते, तथा रिपवोऽपि अग्निना दग्धा भविष्यन्तीत्यर्थः।

(ङ) प्रणिधिः,—चारः।

निवेदयिष्यति, तज्ज्ञानात् अन्योऽन्यत्र (च) अपसरणं करिष्यति ; तत् त्वर्यताम् !! उक्तञ्च,—

शीघ्रकृत्येषु कार्य्येषु विलम्बयति यो नरः ।
तत्कृत्यं देवतास्तस्य कोपाद्विघ्नत्वसंशयम् ॥ २१९ ॥

तथा च,—यस्य यस्य हि कार्य्यस्य फलितस्य विशेषतः ।
क्षिप्रमक्रियमाणत्वं कालः पिबति तत्फलम् ॥ २२० ॥

तत् गुहायाम् (छ) आयातस्य ते हतशत्रोः सर्वं सविस्तरं निर्व्याकुलतया कथयिष्यामि" ।

अथ असौ तद्वचनम् आकर्ण्य सपरिजन एकैकां ज्वलन्तीं घनकाष्ठिकां चञ्चुग्रेण गृहीत्वा तद्गुहाद्वारं प्राप्य स्थिरजीविकुलाये प्राक्षिपत् । ततः सर्वे ते दिवाऽन्धा रक्षाच्छवाक्यानि स्मरन्तो द्वारस्य (ज) आवृतत्वात् अनिःसरन्तो गुहामध्ये कुम्भीपाकन्यायम् आपन्नाः मृताश्च । एवं शत्रून् निःशेषतां नीत्वा भूयो-

(च) अपसरणं—पलायनम् । त्वर्यतां—त्वरा क्रियताम् ।

शीघ्रेति ।—यो नरः शीघ्रकृत्येषु अविलम्बेन करणीयेषु, कार्य्येषु विलम्बयति चिरयति, [विलम्बं करोतीत्यर्थे "तत्करोति—" (ग०) इति णिचि सति कपम्] देवताः कोपात् तं प्रति क्रोधात्, तस्य तत् कृत्यं कार्य्यम्, असंशयं निःसन्देहं, विघ्नन्ति विनाशयन्ति ; अलसस्य कार्य्यविघातः अवश्यम्भावीति भावः ॥ २१९ ॥

यस्येति ।—अस्य यस्य विशेषतः फलितस्य फलोन्मुखस्य, कार्य्यस्य क्षिप्रं शीघ्रम्, अक्रियमाणत्वम् अननुष्ठीयमानत्वं, विलम्बेन अनुष्ठानम् इत्यर्थः, आदिति शेषः, कालः विलम्बरूपः इत्यर्थः, अचिराननुष्ठानोपलक्षितः समयः इति भावः, तस्य कार्य्यस्य, फलं पिबति यथति, विफलयति इत्यर्थः ; विलम्बे कार्य्यहानिसम्भावना, अतस्तया शीघ्रमागलम्बनिति तात्पर्य्यम् ॥ २२० ॥

(छ) आयातस्य,—आगतस्य । हतशत्रोः,—निहतवैरिणः । निर्व्याकुलतया—निःसङ्कटतया ।

(ज) आवृतत्वात्—रुद्धत्वात् । अनिःसरन्तः,—निर्गन्तुमशक्नुवन्तः । कुम्भीपाकन्यायं—कुम्भीपाकाख्यनरकपचनतुल्यदुःखमित्यर्थः । आपन्नाः,—प्राप्ताः, तथैव इत्था इति भावः ।

ऽपि मेघवर्णः तमेव न्यग्रोधपादपदुर्गं जगाम। ततः सिंहासनस्थो भूत्वा सभामध्ये (झ) प्रमुदितमनाः स्थिरजीविनम् अपृच्छत्,—"तात! कथं त्वया शत्रुमध्ये गतेन एतावत्पर्यन्तं कालो नीतः? तदत्र कौतुकम् अस्माकं वर्त्तते, तत् कथ्यताम्। यतः,—

वरमग्नौ प्रदीप्ते तु प्रपातः पुण्यकर्मणाम्।
न चारिजनसंसर्गो मुहूर्त्तमपि सेवितः" ॥ २२१ ॥

तत् आकर्ण्य स्थिरजीवी आह,—"भद्र! (ञ) आगामिफलवाञ्छया कष्टमपि सेवको न जानाति। उक्तञ्च यतः,—

उपनतभयैर्यो यो मार्गो हितार्थकरो भवेत्
स स निपुणया बुद्ध्या सेव्यो महान् क्षपणोऽपि वा।

(झ) प्रमुदितमनाः,—हृष्टान्तःकरणः।

वरमिति।—पुण्यकर्मणां पुण्यं पूतं, कर्म क्रिया येषां तेषां, पवित्रचरित्राणामित्यर्थः, जनानामिति शेषः, [यत्र हि विशेषणमात्रप्रयोगात् जनानामिति विशेष्यस्यापि प्रतीतिः, तथा च वामनः,—"विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ" (५म अधि० १म अ० १० सू०) इति] प्रदीप्ते प्रज्वलिते, अग्नौ ज्वलति, प्रपातस्तु प्रपतनमपि, वरं नमाक्रियः, न किन्तु, मुहूर्त्तमपि क्षणमपि, ["कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा०) इति द्वितीया], सेवितः कृतः इत्यर्थः, अरिजनसंसर्गः शत्रुलोकसम्पर्कः, न, वरमित्यनुषङ्गः; यतस्तदाहादपि अधिकसन्तापकरः शत्रुसंसर्गः इति हृदयम् ॥ २२१ ॥

(ञ) आगामीति।—आगामिनः,—भाविनः, फलस्य—कार्यस्य, शुभफलस्येत्यर्थः, वाञ्छया—प्रत्याशया। जानाति—बुध्यते, गणयति इत्यर्थः।

अथ बहुभिः श्लोकैः पञ्चानां पाण्डवानां द्रौपद्याश्च अज्ञातवासकालिकाचारवचनमुखेन लक्षाख्यैरङ्गारयाय क्षेत्रकरः नीचजनाचारोऽपि सबलोऽयं इत्याह, उपनतेति।—उपनतम् उपस्थितं, भयं येषां तैः विपन्नैरित्यर्थः, जनैः इति शेषः, यो यो मार्गः पन्थाः, उपाय इत्यर्थः, हितार्थकरः हितकार्यसाधकः; यद्वा,—हितञ्च चेमञ्च, अर्थश्च धनञ्च, तत्करः प्रदायक इत्यर्थः, भवेत्; निपुणया शोभनया, चतुरया इत्यर्थः, बुद्ध्या महान् प्रभूतः, क्षपणोऽपि वा क्षपणोऽपि वा, विपन्नदुःखोऽपि वा इत्यर्थः, स स मार्गः, सेव्यः

करिकरनिभौ व्यायऽघाताङ्की महार्थविशारदौ
रचितवलयैः स्त्रीवद् बद्धौ करौ हि किरीटिना ॥ २२२॥
म्लेनापि सदा नरेन्द्र ! विदुषा कालान्तरापेक्षिणा
वक्तव्यं खलु वाक्यवज्रविषमे क्षुद्रेऽपि पापे जने ।
दर्वीव्यग्रकरेण धूमसलिनेनायाससंक्लेशिना च
भीमेनातिबलेन मत्स्यभवने किं नोषितं सूदवत् ?॥२२३॥

आश्रयणीयः । नीलमेवार्थसुदाहरणप्रदर्शनेन विशदीकरोति, करीत्यादिना ।—हि तथा हि, किरीटिना अर्जुनेन, करिकरनिभौ इतिशुण्डसदृशौ, व्यायऽघाताङ्की नीलीजिष्णुचिह्नितौ, महार्थविशारदौ विपुलार्थसाधने अभिज्ञौ इत्यर्थः, करौ बाहू, स्त्रीवत् नारीवत्, रचितवलयैः कल्पितकङ्कणैः, अपटेन परिहितैः वलयैः इति यावत्, बद्धौ योजितौ, अलङ्कृतौ इत्यर्थः, अज्ञातवासे विराटालये स्त्रीवेशधारिणा बभूवे इत्यर्थः ; पुरा वीरप्रधानस्य अर्जुनस्य तुच्छस्त्रीवेशधारणं युज्यत एव विपत्प्रतिकारार्थमिति भावः । अस्य सामान्यस्य भीतपुरुषजनसङ्कल्पपाण्डवतरमानसेवनस्य विशेषेण किरीटिनस्त्रीजनोचितकरबन्धनेन सोपपत्तिकत्वकरणात् विशेषेण सामान्यसमर्थनरूपोऽयमर्थान्तरन्यासः । हरिणी वृत्तम् ॥ २२२ ॥

म्लेनेति ।—हे नरेन्द्र ! राजन् ! विदुषा विज्ञेन, म्लेनापि समर्थेनापि, सदा सर्वदा असमर्थानामित्यपिकारार्थः, कालान्तरापेक्षिणा सुसमयप्रतीक्षणेन, परिज्ञानहितार्थिना इत्यर्थः, तादृशेन सता, वाक्यमेव वज्रम् अतिकठोरत्वात् कुलिशोपमम् इत्यर्थः, तेन विषमे दुःसहे, दुर्वाक्यप्रयोगकारिणि इत्यर्थः, क्षुद्रे नीचे, पापे दुराचारे, जनेऽपि, दुर्जनसमीपेऽपि इत्यर्थः, सदा वक्तव्यं खलु, वाच्यः कर्तव्यः एव, आ-स्वकार्यसमुद्धारादिति भावः । एतदेव सोपपत्तीकरोति, दर्वीत्यादिना ।—तथा हि, अतिबलेन महाबलशालिना, भीमेन, मत्स्यभवने विराटगृहे, दर्वीव्यग्रकरेण दर्वी पाकसाधनद्रव्यविशेषः, ("डाता" इति बङ्गभाषा) तस्यां तद्गृहीते इति भावः, व्यग्रः व्याकुलः, करो यस्य तादृशेन, धूमसलिनेन धूमलिप्तेन इत्यर्थः, पाकार्थं सततं रन्धनशालायामवस्थानादिति भावः, आयाससंक्लेशिना क्लेशसहेन च सता, सूदवत् पाचकवत्, किं न उषितम् ? न स्थितम् ? अपि तु स्थितमेव इत्यर्थः ; कार्यार्थिना नीचसंसर्गोऽपि न गर्हणीय इति भावः । पूर्ववत् विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः । आर्यावृत्तविलोडितं वृत्तम् ॥ २२३ ॥

यद्वा तद्वा विषमपतितः साधु वा गर्हितं वा
कालापेक्षी हृदयनिहितं बुद्धिमान् कर्म कुर्यात्।
किं गाण्डीवस्फुरदुरुघनास्फालनक्रूरपाणिः
नासील्लीलानटनविलसन् मेखली सव्यसाची? ॥२२४॥
सिद्धिं प्रार्थयता जनेन विदुषा तेजो निगृह्य स्वकं
सत्त्वोत्साहवतापि दैवविधिषु स्थेय्यं प्रकार्यं क्रमात्।
देवेन्द्रद्रविणेश्वरान्तकसमैरभ्यन्विता भ्रातृभिः
किं क्लिष्टः सुचिरं विदग्धमवहत् श्रीमान् धर्मात्मजः? ॥२२५॥

प्रीक्षमेव वस्तु अपृथग्भूतेनैवार्थान्तरोपन्यासेन भङ्गा सोपपत्तीकरोति, यद्वेति।—विषमे विपदि, पतितः अत एव कालापेक्षी समयं प्रतीक्षमाणः, बुद्धिमान्, जनः इति शेषः, साधु वा सतां सम्मतं वा, गर्हितम् असाधु वा, यद्वा तद्वा यत्तदेव कर्मास्तु समीचीनमसमीचीनं, हीनमहीनं वेत्यर्थः, हृदयनिहितं हृदय मनसि, निहितम् अवस्थितं, सङ्कल्पितमित्यर्थः, कर्म कुर्यात्; तदा सदसतीः विचारं न कुर्यात् इत्यर्थः। तथा हि, सव्यसाची अर्जुनः, गाण्डीवस्य खवनुषः, स्फुरता प्रसरता, उरुणा महता, घनेन सान्द्रेण, गम्भीरेणेत्यर्थः, आस्फालनेन अनवरतटङ्कारेण, मौर्वीयोजनेन इषुसन्धानेन च इत्यर्थः, क्रूरो कठिनो, पाणी यस्य तथाभूतोऽपि, मेखली काञ्चीधारी सन्, स्त्रीवेषं धृत्वा इत्यर्थः, लीलया विलासेन, यत् नटनं नर्त्तनं, ("ताण्डवं नटनं नाट्यं लास्यं तूर्यत्रं नर्त्तने" इत्यमरः) तेन विलसन् विहरन्, न आसीत्? अपि तु आसीदेव इत्यर्थः। विशेषेण सामान्यसमर्थनरूपोऽयमपि अर्थान्तरन्यासः। मन्दाक्रान्ता वृत्तम् ॥ २२४ ॥

सिद्धिमिति।—विदुषा विचक्षणेन, सिद्धिं साफल्यं, कार्य्यस्येति शेषः, प्रार्थयता अभिलषता, [अर्थयते: चौरादिकस्य आत्मनेपदत्वेनाव प्रार्थयमानेनेति प्रयोगस्यैव साधुत्वं, अवन्तप्रयोगस्तु महाकविप्रयोगात् सङ्गतोऽव एवेति] जनेन, सत्त्वोत्साहवतापि बलवता उत्साहिनाऽपि च इत्यर्थः, स्वकं स्वीयं, तेजः प्रभावं, निगृह्य नियम्य, अप्रकाश्य इत्यर्थः, दैवविधिषु दुर्दैवघटनासु इत्यर्थः, क्रमात् स्थैर्य्यं धैर्य्यम् इत्यर्थः, प्रकार्य्यम् आश्रयणीयम्। तथा हि,—श्रीमान् साम्राज्यलक्ष्मीसम्पन्नः, धर्मात्मजः युधिष्ठिरः, देवेन्द्रद्रविणेश्वरान्तकसमैः इन्द्रकुबेरयमतुल्यैः, विक्रमशालिभिरित्यर्थः, भ्रातृभिः भीमादिभिरित्यर्थः, अन्वितोऽपि परिवृतोऽपि, सुचिरं दीर्घकालं, क्लिष्टः विपदि

रूपाभिजनसम्पन्नौ कुन्तीपुत्रौ बलान्वितौ।
गोकर्मरक्षाव्यापारे विराटप्रेष्यतां गतौ॥ २२६॥
रूपेणाप्रतिमेन यौवनगुणैः श्रेष्ठे कुले जन्मना
कान्त्या श्रीरिव याऽत्र साऽपि विदशां कालक्रमादागता।
सैरिन्ध्रीति सगर्वितं युवतिभिः साक्षेपमज्ञातया
द्रौपद्या ननु मत्स्यराजभवने घृष्टं न किं चन्दनम्?"॥२२७॥

वर्तितः सन्, विदशं दशानां वासनःक्लायसञ्ज्ञानां क्लेशानां समाहारः विदशं विविधं दुःखमित्यर्थः, यद्वा,—दशानां पात्रचतुष्टयानां समाहारः विदशं, मत्स्यराजभवने वर्षमेकमुषित्वा पात्रत्रयमित्यर्थः, किं न अवहत्? अपि तु अज्ञातकीकीलूकीवरव्याजेन खलसाम्राज्ये प्रभावं प्रख्याप्य विराटराजभवने अवसत् इत्यर्थः। अत्रापि पर्यायान्तरन्यासोऽलङ्कारः। शार्दूलविक्रीडितं वृत्तम् ॥२२५॥

रूपेति।—रूपाभिजनसम्पन्नौ परमरूपवन्तौ महाकुलप्रसूतौ च, बलान्वितौ महाबलौ, कुन्तीपुत्रौ नकुलसहदेवौ, [माद्रीपुत्राविति च पाठः] गोकर्मरक्षा-व्यापारे गवां पयूनां, ("खर्गेषुपशुवाग्वज्र.....। लक्ष्म्यद्वया स्त्रियां पुंसि गौः॥" इत्यमरः) कर्मणि गोपालकत्वपालकत्वसाध्ये सेवाकार्ये, तथा रक्षाव्यापारे तेषां पालनकर्मणि च, तेभ्यः यत्नेन भीमसेनादिकं दत्त्वा, तान् सततं विघ्नेभ्यः संरक्ष्य सेवा-ग्रयः; (यद्यपि विराटराजभवने माद्रीसुतौ गोरक्षेषु गवां रक्षणे अश्वसंरक्षणे च पृथक्तया नियुक्तौ आस्तां, तथाऽत्र गोशब्देन पशुमात्रवाचकत्वेन वस्तुगतिमनुसृत्य यथाश्रुते भारतनिर्दिष्टे कर्मण्येव तौ नियुक्तावभवतामित्येवायोजनमिति शेषम्) विराटस्य प्रेष्यतां दासत्वं, गतौ प्राप्तौ; विपत्प्रतिकारेच्छुभिः किमपि पक्षपाते न गणनीयम् इति भावः। पद्यावृत्तं वृत्तम्;—"युजोश्चतुर्थतो जेन पद्यावृत्तं प्रकीर्तितम्" इति लक्षणात्॥ २२६॥

रूपेणेति।—अत्र जगति, या अप्रतिमेन निरुपमेन, रूपेण, यौवनगुणैः यौवनेन विरञ्जिरेणेति भावः, गुणैर्दयादाक्षिण्यादिभिश्च, श्रेष्ठे महति, कुले वंशे, जन्मना उत्पत्त्या, तथा कान्त्या लावण्येन च, एतैः कारणैरित्यर्थः, श्रीरिव लक्ष्मीरिव, आकीर्तिति शेषः, सा द्रौपदीत्यर्थः, साद्यपादिसम्पन्ना वर्त्तमानाऽपीति भावः, कालक्रमात् दुःसमयवशात्, विदशां विपरीतावस्थाम्, आगता प्राप्ता। एतदेव अष्टोत्तरशतं पुन-राह, सैरिन्ध्रीति।—ननु तथा हि, युवतिभिः कामिनीभिः, सत्यराज्ञाज्ञप्तामिः इत्यर्थः,

मेघवर्ण आह,—"तात! (ट) असिधाराव्रतमिदं मन्ये, यत् अरिणा सह संवासः"। सोऽब्रवीत्,—"देव! एवमेतत्; परं न तादृग्मूर्खसमागमः क्वापि मया दृष्टः; न च (ठ) महाप्राज्ञम् अनेकशास्त्रेषु अप्रतिमबुद्धिं रत्नाक्षं विना धीमान्; यत्कारणं, तेन मदीयं यशाऽवस्थितं चित्तं ज्ञातम्। ये पुनः अन्ये मन्त्रिणः, ते महामूर्खाः (ड) मन्त्रिमात्रव्यपदेशोपजीविनोऽतत्त्वकुशलाः, यैः इदमपि न ज्ञातम्। यतः,—

अरितोऽभ्यागतो भृत्यो दुष्टस्तत्सङ्गतत्परः।
अपसर्प्यं सधर्मत्वाच्चित्योद्वेगो च दूषितः॥ २२८॥

स्वैरिण्यीति परगृहेषु स्वाधीना गिल्यकारिकीति, ("स्वैरिण्यौ परवेश्मस्था स्ववशा गिल्यकारिका" इत्यमरः) सगर्वितं साहङ्कारं, साक्षेपं सतिरस्कारं, वचनम् उक्तया इति शेषः, अज्ञातया प्रच्छन्नया, द्रौपद्या द्रुपदराजतनयया, मत्स्यराजभवने मत्स्यराजस्य विराटस्य, भवने गृहे, चन्दनं किं न घृष्टम्? न मर्दितम्? अपि तु घृष्टमेवेत्यर्थः; दुर्दैववशात् महाकुलप्रसूता कृष्णपञ्चालिनी सत्यशालिनी अपि विपन्ना भूत्वा नीचकर्म आश्रयति इति भावः। आर्दूलविक्रीडितं वृत्तम्॥ २२७॥

(ट) असिधाराव्रतम्—असिधारोपरि क्षितावप्यक्षलनेव यथा शरीरच्छेदः सञ्जायते इति निश्चयः, तथैव प्रभुसहवासे भृत्यः सुनिश्चितः; सावधानावस्थितावपि शरीरकर्त्तनवत् भृत्यः सर्वमपि परिकर्त्तनमेव एवेति भावः; यद्वा,—तदाख्यं यत् व्रतं नियमः; तद्यथा,—"युवा युवत्या सार्द्धं यन्मुग्धभर्तृवदाचरेत्। अलिंहन्नसृक्कः आदसिधाराव्रतं हि तत्॥" इति। शोरविक्रतिकारके सत्यपि अविक्रतभावेन स्थितिरिति फलितार्थः।

(ठ) महाप्राज्ञं—सुपण्डितम्। अप्रतिमबुद्धिम्—अतुलनीयज्ञानम्, अकुण्ठितधियमित्यर्थः। धीमान्—बुद्धिमान्, दृष्ट इति पूर्वेणान्वयः।

(ड) मन्त्रीति।—मन्त्रिमात्रमेव अपदेशः,—आख्या, तेन उपजीवन्ति इति तथोक्ताः, नामसारेण मन्त्रिण इत्यर्थः। अतत्त्वकुशलाः,—अतत्त्वविदः, नीतिशास्त्रस्य मर्मानभिज्ञा इत्यर्थः।

इदानीं भृत्यानां दूषकतामभिधत्ते, अरित इति।—अपसर्प्यं गूढं चारकर्म नीतित्वं इत्यर्थः, अरितः शत्रुसकाशात्, अभ्यागतः उपस्थितः, तथा तत्सङ्गतत्परः तस्य

आसने शयने याने पानभोजनवस्तुषु ।
दृष्टादृष्टप्रमत्तेषु प्रहरन्त्यरयोऽरिषु ॥ २२८ ॥
तस्मात् सर्वप्रयत्नेन त्रिवर्गनिलयं बुधः ।
आत्मानमाहृतो रक्षेत् प्रमादाद्धि विनश्यति ॥ २२९ ॥

साधु चेदमुच्यते,—

सन्तापयन्ति कमपथ्यभुजं न रोगाः ?
दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः ? ।

अवोः, सदा सदवासे, तत्परः उत्कटाभिलाषी, तत्सदवासस्वामसमाकाङ्क्षन् इत्यर्थः, भृत्यः भृत्योचितं कर्म कर्तुं सततमीहमानः अनुचर इत्यर्थः, न तु तात्त्विकः भृत्य इति भावः, दुष्टः दुर्जनः, तथा सधर्मत्वात् समानो धर्मः येषां तेषां भावः तत्त्वात्, चाराणां तुल्यधर्मवत्त्वादित्यर्थः, गूढपुरुषिवत् कार्यकरत्वादिति भावः, नित्योद्वेगी च सततम् उद्वेगकारकः, नियतं भीतिजनकः इति भावः ; मन्तव्य इति शेषः, अतः तथाविधः भृत्यः दूषितः निन्दितः, नीतिविशिष्टरिति शेषः, सुगूढं चारकर्म कर्तुं प्रभुसकाशादुपस्थिताः तथा तत्सङ्गकाङ्क्षिण्य भृत्या दुष्टा नित्योद्वेगकराश्च, यत एते भृत्यपाशाः चारसधर्माण एव, ततः न कदाचिदेते विस्रासभूमयः इति भावः ॥२२८॥

कदा ते भृत्यपाशाः स्वप्रभुकार्य्यं साधयन्ति, तदेवाह, आसने इति ।—अरयः शत्रवः, आसने अवस्थानसमये, शयने निद्रावस्थायां, याने गमने, पानभोजनवस्तुषु पानभोजनव्यापारेषु, दृष्टादृष्टप्रमत्तेषु दृष्टेषु अदृष्टेषु प्रमत्तेषु अनवहितेषु च इत्यर्थः, अरिषु शत्रुषु, प्रहरन्ति ; तदृत्यसाहाय्येन इति शेषः, शत्रुनिर्यातनञ्च येन केनाप्युपायेन सर्वथा कर्त्तव्यत्वात्, ते हि नानाविधच्छलेन नानासमयं स्वभर्त्रे गूढरूपां समाचरन्तीति भावः ॥ २२९ ॥

एवञ्च सति कथमात्मा संरक्षणीयः ? इत्याशङ्क्याह तन्त्रतीकारमुपदिशति, तस्मादिति ।—तस्मात् कारणात्, बुधः पण्डितः, आहृतः [आहृतम् आदरः अस्यास्तीति "अर्श आदिभ्यः अच्" (५।२।१२७ पा०) इत्यच्प्रत्यये रूपम्] सन्नवान् सन्, अवहितः सन् इत्यर्थः, त्रिवर्गनिलयं धर्मार्थकामाश्रयम्, आत्मानं स्वं, सर्वप्रयत्नेन सर्वप्रकारेण, रक्षेत् ; हि यतः, प्रमादात् अनवधानात्, विनश्यति विनाशं प्राप्नोति, आत्मा इति शेषः ; सर्वात्मना प्रमादो हातव्य इति भावः ॥ २३० ॥

सन्तापयन्तीति ।—रोगाः व्याधयः, कम् अपथ्यभुजं पथ्योपभोगेतरं पुरुषं, ["पुंसः

कं श्रीर्न दर्पयति ? कं न निघ्नन्ति मृत्यु: ?
कं स्त्रीलता न विषया: परिपीड़यन्ति ? ॥ २११ ॥
लुब्धस्य नश्यति यश: पिशुनस्य मैत्री
नष्टक्रियस्य कुलमर्थपरस्य धर्म: ।
विद्याफलं व्यसनिन: कृपणस्य सौख्यं
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥ २१२ ॥

पथ्यर्थेभ्यो ढकञपेते" (४।४।९२ पा०) इति सूत्रेण यत्प्रत्यय:] न पथ्यम् अपथ्यं, तत् भुङ्क्ते इति अपथ्यभुक् तम अपथ्यसेविनं, न सन्तापयन्ति ? न पीड़यन्ति ? अपि तु सर्वमेव इत्यर्थ: ; अपथ्यानि: खलु सततमेव रोगै: सन्तप्ता भवन्तीति भाव: ; नीतिदोषा: दुर्नीतय:, कं दुर्मन्त्रिणं दुष्ट: मन्त्री ताड़यं, न उपयान्ति ? न प्राप्नुवन्ति ? अपि तु सर्वमेव इत्यर्थ: ; कुसचिवा: खलु सततं दुर्नीतिपरायणा भवन्ति इति भाव: ; स्त्रीलक्ष्मी:, सम्पदित्यर्थ:, कं जनं, न दर्पयति ? साहङ्कारं न करोति ? [दर्पयतीति दर्पशब्दात् मतुप्, ततो दर्पवन्तं करोतीति णिच्, णाविष्ठवद्भावे "विन्मतोर्लुक्" (५।३।६५ पा०) इति सूत्रेण मतुपो लोपेन सिद्धम्] यद्वा,—दर्पयति ? अहङ्कार-यति, अहङ्कृतं कारयतीत्यर्थ: ; [दृप्यते: णिचि लटि रूपम्, अकर्मकधातुधीयोगात् "कर्म" इत्यत्र अधिकर्तु: "गतिबुद्धि—" (१।४।५२ पा०) इति कर्मत्वमिति ध्येयम्] अपि तु सर्वमेव दर्पयति इत्यर्थ: ; गर्वितानि भवन्ति खलु चेतांसि ऐश्वर्यमदमत्तानामिति भाव: ; कृत्य: अन्तक:, कं जनं, न निघ्नन्ति ? न नाशयति ? अपि तु सर्वमेव इत्यर्थ: ; सर्वेषां मरणम् अवश्यम्भावीति भाव: ; स्त्रीलता: स्त्रीघटिता:, विषया: व्यापारा:, कं जनं, न परिपीड़यन्ति ? न व्यथयन्ति ? अपि तु सर्व एव स्त्रीभोगासक्ता: सन्तापिन एव इति भाव: । वसन्ततिलकं वृत्तम् ॥ २११ ॥

लुब्धस्येति ।—लुब्धस्य लोभपरस्य, जनस्य इति शेष:, यश: कीर्ति:, नश्यति विनष्टं भवति, पिशुनस्य खलस्य, दुर्जनस्य इत्यर्थ:, मैत्री प्रणय इत्यर्थ:, नश्यतीति पूर्वेणान्वय: ; एवं सर्वत्र ; नष्टक्रियस्य भ्रष्टाचारस्य, कुलं वंश: ; अर्थपरस्य सततं धनचिन्तापरा-यणस्य, धर्म: ; व्यसिन: कामाद्यासक्तस्य, विद्याफलम् ; कृपणस्य व्ययकुण्ठस्य जनस्य, सौख्यम् ; तथा प्रमत्ता अनवहिता:, सचिवा: अमात्या: यस्य तस्याविवेकस्य, नराधिपस्य राज्ञ:, राज्यं राष्ट्रं, नश्यतीति पूर्वेणान्वय: ; न खलु लुब्धादिषु: यश आदि नष्टं भवति, अनुदारादिप्रकृतिकत्वात् इति भाव: । वसन्ततिलकं वृत्तम् ॥ २१२ ॥

तत् राजन् ! असिधारावृतं मया (ढ) आचरितम् अरिसंसर्गात्, इति यद्भवता उक्तं, तन्मया साक्षात् एवानुभूतम् । उक्तञ्च,—

अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः ।
स्वार्थमभ्युद्धरेत् प्राज्ञः स्वार्थभ्रंशो हि मूर्खता ॥ २१३ ॥
स्कन्धेनापि वहेच्छत्रुं कालमासाद्य बुद्धिमान् ।
मङ्कता कृष्णसर्पेण मण्डूका बहवो हताः" ॥ २१४ ॥

मेघवर्णः आह,—"कथमेतत् ?" स्थिरजीवी कथयति,—

कथा १६ ।

"अस्ति वर्धमानाद्रिसमीपे एकस्मिन् प्रदेशे (ण) परिणतवयाः मन्दविषो नाम कृष्णसर्पः । स एवं चित्ते सञ्चिन्तितवान्,—'कथं नाम मया (त) सुखोपायवृत्त्या वर्त्तितव्यम् ?' इति ।

(ढ) आचरितम्—अनुष्ठितम् । अरिसंसर्गात्—शत्रुसम्पर्कात् । साक्षात् एव अनुभूतं—स्वयमेवानुभूतम् इत्यर्थः ।

अपमानमिति ।—प्राज्ञः पण्डितो जनः, अपमानम् अवज्ञां, निन्दामित्यर्थः, पुरस्कृत्य अग्रतः कृत्वा, स्वीकृत्येति यावत्, मानं सम्मानं, तु पृष्ठतः पश्चात्, कृत्वा न लक्ष्यीकृत्य इत्यर्थः, मानापमाने अविगणय्येति भावः, स्वार्थं स्वकार्यम्, अभ्युद्धरेत् साधयेत् ; हि यतः, स्वार्थभ्रंशः स्वकार्यक्षतिः, मूर्खता स्वविवेकशून्यता बालिशता इत्यर्थः ॥ २१३ ॥

स्कन्धेनेति ।—बुद्धिमान् विचक्षणः जनः, कालं दुःसमयमिति यावत्, आसाद्य प्राप्य, विपन्नो भूत्वा इत्यर्थः, स्कन्धेनापि अंसेनापि, शत्रुं वहेत् नयेत् ; विपक्षवधोचितं सुसमयं समपेक्ष्येति भावः । अत्रानुरूपमुदाहरणं प्रदर्शयितुमुपाख्यानान्तरं प्रस्तौति, मङ्कतेति ।—मङ्कता विज्ञानेन, कृष्णसर्पेण कालाहिना, तीव्रविषधरेण इत्यर्थः, बहवः मण्डूकाः भेकाः, हताः मारिताः । ["हताः" इत्यत्र "यथा" इति पाठान्तरम्] ॥२१४॥

(ण) परिणतवयाः,—स्थविरः ।

(त) सुखोपायवृत्त्या—अनायासलभ्यजीविकया । वर्त्तितव्यं—ज्ञातव्यं, जीवितव्यम् इत्यर्थः ।

ततो बहुनष्टूकं ह्रदम् उपगम्य (थ) धृतिपरीतमिव आत्मानं दर्शितवान्। अथ तथा स्थिते तस्मिन्, उदकप्रान्तगतेन एकेन मण्डूकेन पृष्टः,—(द) 'मामः! किमद्य यथापूर्वम् आहारार्थं न विहरसि?' सोऽब्रवीत्—'भद्र! कुतो मे मन्दभाग्यस्य आहाराभिलाषः? यत्कारणम्, अद्य (ध) प्रदोषे एव मया आहारार्थं (न) विहरमाणेन दृष्ट एको मण्डूकः, तद्ग्रहणार्थं मया क्रमः सज्जितः। सोऽपि मां दृष्ट्वा मृत्युभयेन (प) स्वाध्यायप्रसक्तानां ब्राह्मणानाम् अन्तरमपक्रान्तः, न विभावितो मया क्वापि गतः। (फ) तत्सदृशमोहितचित्तेन मया कस्यचित् ब्राह्मणस्य सूनोः क्रूरतटजलान्तःस्थो-ऽकृष्टो दृष्टः। ततोऽसौ (ब) सपदि पञ्चत्वमुपागतः। अथ तस्य पित्रा दुःखितेन अहं (भ) शप्तः, यथा,—'दुरात्मन्! त्वया निरपराधो मत्सुतो दृष्टः, तत् अनेन दोषेण त्वं मण्डूकानां वाहनं भविष्यसि, तत्प्रसादलब्धजीविकया

(थ) धृतिपरीतमिव—धैर्याविष्टमिव, वैराग्यग्रस्तमिवेत्यर्थः।

(द) मामः!—मातुलः!।

(ध) प्रदोषे—सायंसन्ध्यायां, रजनीमुखे इत्यर्थः।

(न) विहरमाणेन—विचरता। क्रमः,—परिकरः, आक्रमणोपक्रम इत्यर्थः। सज्जितः,—बद्धः, कृतः इत्यर्थः।

(प) स्वाध्यायप्रसक्तानां—वेदपाठरतानां, सन्ध्यासमुपासनाप्रवृत्तानामित्यर्थः। अन्तरमपक्रान्तः,—अभ्यन्तरं प्रविष्टः, मध्ये पलायित इत्यर्थः। विभावितः,—लक्षितः।

(फ) तदिति।—तस्य—मण्डूकस्य, सदृशे—अनुरूपे, ब्राह्मणसूनोरकृष्टे इत्यर्थः, मोहित—भ्रान्तिं गतं, मण्डूकविशेषेऽपि तस्मिन् मण्डूकबुद्धिमागतमित्यर्थः, चित्तं यस्य तादृशेन। सूनोः,—पुत्रस्य, सन्ध्यासमुपासनारतस्य इति यावत्। क्रूरतटेति।—क्रूरा अशुभतीरस्योपरिस्थजलमध्यवर्ती।

(ब) सपदि—तत्क्षणात्, वंशनमात्रेण इत्यर्थः, [चन्द्रयमितत्]।

(भ) शप्तः,—आक्रुष्टः, अभिसम्पातेन योजितः इत्यर्थः।

(म)वर्त्तिष्यसे' इति । ततोऽहं युष्माकं वाहनार्थम् आगतोऽस्मि' । तेन च सर्वमण्डूकानाम् इदमावेदितम् । ततः तैः प्रहृष्टमनोभिः सर्वैरेव गत्वा जलपादनाम्नः(य)दर्दुरराजस्य विज्ञप्तम् । अथ असौ अपि मन्त्रिपरिवृतः 'अत्यद्भुतम् इदम्' इति मन्यमानः, (र) ससम्भ्रमं ह्रदात् उत्तीर्य मन्दविषस्य फणिनः फणप्रदेशम् अधिरूढः । शेषा अपि (ल) यथाज्येष्ठं तत्पृष्ठोपरि समारुरुहुः ; किं बहुना ? तदुपरि स्थानमप्राप्नुवन्तः तस्य (व) अनुपदं धावन्ति । मन्दविषोऽपि तेषां तुष्ट्यर्थम् अनेकप्रकारान् गतिविशेषान् अदर्शयत् । अथ जलपादो लब्धतदङ्गसंस्पर्शसुखः तमाह,—

'न तथा करिणा यानं तुरगेण रथेन वा ।
नरयानेन वा यानं यथा मन्दविषेण मे' ॥ २२५ ॥

अथ अन्येद्युः मन्दविषः (श) छद्मना मन्दं मन्दं विसर्पति । तच्च दृष्ट्वा जलपादोऽब्रवीत्,—'भद्र मन्दविष ! यथापूर्वं

(म) वर्त्तिष्यसे—जीविष्यसि [परन्तूपदे तु "वत्स्यसि" इत्यपि । "ह्रांतर्वर्त्तने-जीवने" इत्यमरः] ।

(य) दर्दुरराजस्य—मण्डूकाधिपतेः, [दर्दुराणां राजा इति समासे "राजाहः-सखिभ्यष्टच्" (५।४।९१ पा०) इति टच्प्रत्ययः] । विज्ञप्तं—विशेषेण निवेदितम् ; [ज्ञाधातोः विचि ज्ञप्रत्यये "वा दान्तशान्त" (७।२।२३ पा०) इत्यनेन निषातनात् विज्ञप्तमिति सिद्धम् ; पक्षे च विज्ञापितमिति] ।

(र) ससम्भ्रमं—सत्वरं, ("सम्भ्रमस्त्वरा" इत्यमरः) ।

(ल) यथाज्येष्ठं—यथाप्रधानं, प्रधानानुक्रमेण इत्यर्थः ।

(व) अनुपदं—पदस्य पश्चात्, पृष्ठत इत्यर्थः ।

नेति ।—मन्दविषेण तदाख्येन सर्पराजेन, यथा वाहनं, सुखकरमिति शेषः, नै मनं, यानं गमनं, भवतीति शेषः, करिणा हस्तिना, तुरगेण अश्वेन, रथेन वा स्यन्दनेनापि, नरयानेन वा शिबिकया च, तथा यानं गमनं, न, भवतीति शेषः, धनस्यन्दनमेतत् यानम् इत्यर्थः ॥ २२५ ॥

(श) छद्मना—छलेन । विसर्पति—गच्छति ।

किम् अद्य साधु न भुज्यते ?' मन्दविषोऽब्रवीत्—'देव ! अद्य (घ) आहारवैकल्यात् न मे वोढुं शक्तिरस्ति'। अथ असौ अब्रवीत्,—'भद्र ! भक्षय क्षुद्रमण्डूकान्'। तत् श्रुत्वा (ङ) प्रहर्षितसर्वगात्रो मन्दविषः ससम्भ्रमम् अब्रवीत्,—'मम अयमेव विप्रियापोऽस्ति। तत् तव अनेन (च) अनुग्रहवचनेन प्रीतोऽस्मि'। ततोऽसौ (छ) नैरन्तर्येण मण्डूकान् भक्षयन् कतिपयैः एवाहोभिः बलवान् संवृत्तः; प्रहृष्टश्च अन्तर्लीनम् अवहस्य इदमब्रवीत्,—

'मण्डूका विविधा दृष्टे छलपूर्वोपसाधिताः।
कियन्तं कालमक्षीणा भवेयुः खादिता मया ?' ॥ २२६ ॥

जलपादोऽपि मन्दविषेण (ज) कृतकवचनव्यामोहितचित्तः किमपि न अवबुध्यते। अत्रान्तरेऽन्यो महाकायः कृष्णसर्पः तमुद्देशं समायातः। तञ्च मण्डूकैः वाह्यमानं दृष्ट्वा विस्मयम्

(घ) आहारवैकल्यात्—भोजनव्याघातात्, भोजनाभावात् इत्यर्थः। वोढुं—वहनं कर्तुम्।

(ङ) प्रहर्षितेति।—उत्फुल्लसर्वाङ्गः।

(च) अनुग्रहवचनेन—आदेशवाक्येन।

(छ) नैरन्तर्येण—सततमित्यर्थः। अन्तर्लीनं—निगूढम्, अप्रकाशमित्यर्थः। अवहस्य—हसित्वा।

मण्डूका इति।—छलपूर्वोपसाधिताः छलपूर्वं कापट्येन इत्यर्थः, उपसाधिताः वशीकृताः, विश्वासोत्पादनपूर्वकेन छद्मनाधीनीकृता इति भावः, अक्षीणा इति शेषः, विविधाः बहुप्रकाराः, एते मण्डूकाः मेकाः, मया खादिताः भक्षिताः, कियन्तं कालं कियत्कालं यावत्, [अत्यन्तसंयोगे द्वितीया], अक्षीणाः अक्षयरहिताः, भवेयुः किं ? सिद्धेयुः ? नैव बहुदिनम् अक्षीणाक्षिष्टेत्यर्थः, सत्वरमेव एते क्षयं गमिष्यन्तीति भावः ॥२२६॥

(ज) कृतकेति।—कृतकं—कपटं, यत् वचनं, तेन व्यामोहितं—विमुग्धं, अभीप्सितविषयविमुखमित्यर्थः, चित्तं यस्य तथाभूतः।

अगमत्, आह च,—'वयस्य! यत् अस्माकम् (ग) अशनं, तैः कथं वाह्यसे? विरुद्धमेतत्'। मन्दविषोऽब्रवीत्,—

'सर्वमेतद्विजानामि यथा वाह्योऽस्मि दर्दुरैः।
किञ्चित् कालं प्रतीक्ष्योऽहं घृतान्धो ब्राह्मणो यथा' ॥२१७॥

सोऽब्रवीत्,—'कथमेतत्?' मन्दविषः कथयति,—

कथा १७।

'अस्ति कस्मिंश्चित् अधिष्ठाने यज्ञदत्तो नाम ब्राह्मणः। तस्य भार्या (घ) पुंश्चली अन्यासक्तमना अजस्रं विटाय सक्तुकघृतान् घृतपूरान् कृत्वा भर्तुश्चौरिकया प्रयच्छति।

(ग) अशनं—भोजनं, खाद्यमित्यर्थः।

सर्वमिति।—दर्दुरैः भेकैः, अखाद्यभूतैरिति भावः, यथा वैनैव ऊतुना, वाह्यः नीयमानः, भेकाना वाहनभूत इत्यर्थः, अस्मि भवामि, अहमिति शेषः, यथा अहं भेकान् वहामीदानीमित्यर्थः, एतत् सर्वं विजानामि विशेषेण वेद्मि; कालज्ञानतिक्रमशीलत्वात् सर्वमधुना सहे इति भावः; किन्तु घृतान्धः घृतेन घृतसंस्कृतद्रव्यभक्षणेन, अन्धः नेत्राभ्यां हीनः, हतेन आत्मानम् अन्धवत् प्रकाशमान इति यावत्, ब्राह्मणः यथा किञ्चित् कालम् अपेक्षित इति शेषः, अहं तथा प्रतीक्ष्यः प्रतिपालनीयः, अपेक्षणीय इत्यर्थः, त्वयेति शेषः; कथमहमीदृक् गर्हितमाचरामि, तत्तु क्रियत्कालानन्तरमेव व्यक्तीभविष्यतीति भावः॥ २१७॥

(घ) पुंश्चली—[पुंसः पत्युः सकाशात्, चलति पुरुषान्तरार्थं गच्छति वा सैति व्युत्पत्त्या, पुंसः चलतेः कर्त्तरि अच् प्रत्ययः ङीष् च,] कुलटा इत्यर्थः। अन्यासक्तमनाः,—अन्यस्मिन् पुरुषे अनुरक्तचित्ता। अजस्रं—निरन्तरम्। विटाय—जाराय। सक्तुकघृतान्—गुडघृतसंयुतान्। घृतपूरान्—तदाख्यपिष्टकविशेषान्। भर्तुः,—भर्तारमनादृत्य इत्यर्थः, [अनादरे षष्ठी] भर्तारमप्रदत्तेति फलितार्थः। चौरिकया—तस्करसुलभरूपया, सततं गोपायित्वा इत्यर्थः, भर्तुरक्षणमेवेति यावत्; यद्वा —भर्तुः चौरिकया भर्तुरपहृत्य, भर्त्ता यथा खं न पश्यति, तथा कृत्वेति यावत्, ["अनादौ—" (१।४।२८ पा०) इत्यात्मादर्शनकर्तृत्वेनेहस्य भर्तुरपादानत्वात् पञ्चमी]।

अथ कदाचित् भर्त्ता दृष्ट्वा अब्रवीत्,—'भद्रे! किमेतत् परिदृश्यते? कुत्र वा अजस्रं नयसि इदम्? कथय सत्यम्'। सा च (ङ) उत्पन्नप्रतिभा कृतकवचनैः भर्त्तारम् अब्रवीत्,—'अस्ति अत्र नातिदूरे भगवत्या देव्या आयतनं, तत्र अहमुपोषिता सती बलिं भक्ष्यविशेषांश्च अपूर्वान् नयामि'। अथ (च) तस्य पश्यतो गृहीत्वा तत् सकलं देव्यायतनाभिमुखी प्रतस्थे, यत्कारणं, देव्या निवेदितेन अनेन मदीयो भर्त्तैवं मंस्यते यत्, 'मम ब्राह्मणी भगवत्याः कृते भक्ष्यविशेषान् नित्यमेव नयति' इति। अथ देव्यायतने गत्वा स्नानार्थं नद्याम् अवतीर्य्य यावत् स्नानक्रियां करोति, तावत् भर्त्ता मार्गान्तरेण आगत्य देव्याः पृष्ठतोऽदृश्यः (छ) अवतस्थे।

अथ सा ब्राह्मणी स्नात्वा देव्यायतनम् आगत्य स्नानानुलेपनमाल्यधूपबलिक्रियादिकं कृत्वा देवीं प्रणम्य व्यजिज्ञपत्,—'भगवति! केन प्रकारेण मम भर्त्ता अन्धो भविष्यति?' तत् श्रुत्वा (ज) स्वरभेदेन देवीपृष्ठस्थितो ब्राह्मणो जगाद,—'यदि त्वम् अजस्रं घृतपूरादिभक्ष्यं तस्मै भर्त्रे प्रयच्छसि, ततः शीघ्रमन्धो भविष्यति'। सा तु (झ) वन्धकी कृतकवचनवञ्चितमानसा तस्मै ब्राह्मणाय तदेव नित्यं प्रददौ। अथ अन्येद्युः

(ङ) उत्पन्नप्रतिभा—प्रत्युत्पन्नमतिः, समयोचितसुविशदबुद्धिरित्यर्थः। कृतकवचनैः—कृत्रिमवाक्यैः, कल्पितवचोभिरिति यावत्। अपूर्वान्—अभिनवान्।

(च) तस्य पश्यतः,—पश्यन्तं तं प्रतिमनादृत्य इत्यर्थः, ["षष्ठी चानादरे" (२।३।३८ पा०) इति षष्ठी]। मंस्यते—भोक्ष्यते, अवगमिष्यति इत्यर्थः।

(छ) अवतस्थे—स्थितः, ["समवप्रविभ्यः स्थः" (१।३।२२ पा०) इत्यात्मने पदम्]।

(ज) स्वरभेदेन—भिन्नस्वरं विधाय, स्वं स्वरं विकृत्य इत्यर्थः।

(झ) वन्धकी—कुलटा।

ब्राह्मणेन अभिहितं,—'भद्रे ! नाहं (अ) सुतरां पश्यामि' । तत् श्रुत्वा चिन्तितम् अनया,—'दैव्याः प्रमादोऽयं प्राप्तः' इति ।

अथ तस्याः (ट) हृदयवल्लभो विटस्तत्सकाशम् 'अन्धीभूतोऽयं ब्राह्मणः किं मम करिष्यति ?' इति निःशङ्कः प्रतिदिवसमभ्येति । अथ अन्येद्युस्तं प्रविशन्तम् (ठ) अभ्यासगतं दृष्ट्वा केशेषु गृहीत्वा लगुडपार्ष्णिप्रभृतिप्रहारैः तावत् अताड़यत्, यावत् असौ पञ्चत्वमाप ; तामपि दुष्टपत्नीं छिन्ननासिकां कृत्वा विससर्ज । अतोऽहं ब्रवीमि,—'सर्वमेतद्विजानामि' इत्यादि' ।

अथ मन्दविषोऽन्तर्लीनम् अवहस्य पुनरपि 'मण्डूका विविधा श्लेते' इति तमेवम् अब्रवीत् । अथ जलपादः तत् श्रुत्वा सुतरां (ड) व्यग्रहृदयः 'किमनेन अभिहितम् ?' इति सम्यक् नावगम्य तम् अपृच्छत्,—'भद्र ! किं त्वया अभिहितम् इदं विरुद्धं वचः ?' अथ असौ (ढ) आकारप्रच्छादनार्थं 'न किञ्चित्' इति अब्रवीत् । तथैव कृतकवचनव्यामोहितचित्तो जलपादः तस्य (ण) दुष्टाभिसन्धिं न अवबुध्यत ; किं बहुना ? तथा तेन सर्वेऽपि भक्षिताः, यथा बीजमात्रमपि न अवशिष्टम् । अतोऽहं ब्रवीमि,—'स्वल्पेनापि वहेच्छत्रम्' इत्यादि ।

(अ) सुतराम्—अतिमात्रम् ।

(ट) हृदयवल्लभः,—मनःप्रियः ।

(ठ) अभ्यासगत—समीपस्थम् ; ("समीपे निकटासन्न···। सटेशाभ्यास···॥" इत्यमरः) । केशेषु इति—[अवच्छेद सप्तमी] । गृहीत्वा—बलवदाकृष्येत्यर्थः । लगुड़ेति ।—लगुडः,—दण्डः, पार्ष्णिः,—गुल्फस्य अधोभागः, ("गोंड़ासि" इति वङ्गभाषा) तौ एव प्रभृती—आदिभूतौ येषां ते: ये प्रहाराः,—ताड़नानि तैरित्यर्थः ।

(ड) व्यग्रहृदयः,—व्याकुलाऽऽत्मा, व्यग्रचित्त इत्यर्थः । अभिहितम्—उक्तम् ।

(ढ) आकारप्रच्छादनार्थं—भावगोपनार्थम् ।

(ण) दुष्टाभिसन्धिं—दुष्टाशयम् । बीजमात्रम्—अङ्कुरकारणं, पुनरुत्पत्तिसम्भावनाऽपीत्यर्थः ।

अथ राजन्! यथा मन्दविषेण बुद्धिबलेन मक्षिका निहताः, तथा मयाऽपि सर्वे वैरिणः हति। साधु चैदमुच्यते,—

वने प्रज्वलितो वह्निर्दहन् मूलानि रक्षति।
स मूलोन्मूलनं कुर्याद्वायुर्यो मृदुशीतलः" ॥ २२८ ॥

मेघवर्ण आह,—"तात! सत्यमेवैतत्, ये महात्मानो भवन्ति, ते महासत्त्वा आपन्नता अपि (त) प्रारब्धं न सर्जन्ति। उक्तञ्च यतः,—

महत्त्वमेतन्महतां नयालङ्कारधारिणाम्।
न मुञ्चन्ति यदारब्धं क्षुद्रेऽपि व्यसनोदये ॥ २२९ ॥

तथा च,—प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।

प्रायशः सर्वत्र सुतीक्ष्णभावात् मार्दवमेव कार्यसाधकम् इत्यावेदयितुमशुष्कपत्रमादरचनाह, वने इति।—वने प्रज्वलितः प्रदीप्तः, वह्निः अनलः, दहन्, अपिशब्दोऽत्र अध्याहरणीयः, वनमिति शेषः, मूलानि, इत्यादिभिति शेषः, रक्षति, दग्धानां इत्यर्थः मूलानि नाभिधित्सुं न शक्नोतीति भावः; किन्तु यः वायुः मृदुशीतलः मन्दबहनशीलः अनुष्णः, सः, अपिरत्राप्यध्याहार्यः, सोऽपीत्यर्थः, मूलोन्मूलनं मूलोत्पाटनं, इत्यादिभिति शेषः, कुर्यात्, येन पुनर्न प्ररोहेदिति भावः ॥२२८॥

(त) प्रारब्धम्—आरब्धव्यम्। सर्जन्ति—त्यजन्ति, त्यजन्ति इत्यर्थः, [धातूनामनेकार्थत्वात् सर्जनार्थस्यापि भौवादिकस्य सर्जधातोः त्यागार्थत्वम् अवधेयम्]।

महापुरुषस्यवसायमाह, महत्त्वमिति।—नयः नीतिः एव, अलङ्कारः भूषणं, तं धरन्तीति तथोक्तानां नीतिविदामित्यर्थः, महतां महात्मनाम्, एतत् एव महत्त्वं महिमा, यत क्षुद्रे अतिक्षुद्रजनके, व्यसनोदये विपदागमे सत्यपि, आरब्धम् उपक्रान्तं, कार्यमिति शेषः, न मुञ्चन्ति न त्यजन्ति, आ फलोदयात् ते हि कर्म कुर्वन्ति इत्याशयः; स्थिरसङ्कल्पा हि महान्तः इति भावः ॥ २२९ ॥

उत्तमनध्यवसायानां तारतम्यं प्रदर्शयति, प्रारभ्यते इति।—नीचैः क्षुद्रैः, हीनस्वभावैः जनैरित्यर्थः, विघ्नभयेन अन्तरा कार्यविघातमाशङ्क्य इत्यर्थः, न खलु नैव, प्रारभ्यते कार्यारम्भः क्रियते; नीचस्वभावाः खलु 'कार्ये विघ्नसम्भावना यदि' इति मत्वा प्रायेण ततो निवर्तन्ते इत्यर्थः; मध्या मध्यमविधाः, किञ्चिदुन्नतस्वभावा जनाः

विघ्नैः सहस्रगुणितैरपि हन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ २४० ॥

तत् ज्ञातं निष्कण्टकं मम राज्यं यत्नेन निःशेषतां नयता लेया ; अथवा—युक्तमेतत् नयवेदिनाम्। उक्तञ्च यतः,—

ऋणशेषञ्चाग्निशेषं शत्रुशेषं तथैव च।
व्याधिशेषञ्च निःशेषं कृत्वा प्राज्ञो न सीदति" ॥ २४१॥

सोऽब्रवीत्,—"देव! भाग्यवान् त्वमेवासि, यस्य आरब्धं सर्वमेव संसिध्यति ; तत्र केवलं शौर्यं कृत्यं साधयति ; किन्तु प्रज्ञया यत् क्रियते, तदेव विजयाय भवति। उक्तञ्च,—

अस्त्रैर्हता न हि हता रिपवो भवन्ति
प्रज्ञाहतास्तु रिपवः सुहता भवन्ति।

इत्यर्थः, प्रारभ्य उपक्रम्य, आर्य्यमिति भावः, विघ्नेन अन्तरायेण, विहताः प्रतिरुद्धाः सन्तः, विरमन्ति निवर्त्तन्ते, ["व्याङ्परिभ्यो रमः" (१।३८२ पा०) इति परस्मैपदम्] आर्य्यस्य क्रियमाणं प्रसाध्य अन्तरा विघ्निताः ततो निवर्त्तन्ते इत्यर्थः; उत्तमगुणा महान्तस्तु, सहस्रगुणितैः बहुभिरिति भावः, विघ्नैः प्रत्यूहैः, हन्यमाना अपि प्रतिरुध्यमाना अपि, प्रारब्धं प्रक्रान्तं, न परित्यजन्ति न विजहति ; अलीकारम्भाः खलु महान्तः इति भावः। ["विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः" इति पाठान्तरं दृश्यते, तदपि अर्थतः एकमेवेति]। वसन्ततिलकं वृत्तम् ॥ २४० ॥

समूलमुन्मूलीयात् तथा उन्मूलनञ्च फलवाह, ऋणशेषमिति।—प्राज्ञः विद्वान् जनः, ऋणशेषम् अग्निशेषं शत्रुशेषं तथा व्याधिशेषञ्च निःशेषं शेषरहितं, सम्यक् समूलं विनष्टमिति यावत्, कृत्वा विधाय, न सीदति न विपन्नो भवति ; अणिःशेषितेषु एतेषु पुनरभ्युत्थानसम्भवेनैतेषां मूलोऽपि कष्टप्रदत्वादिति भावः ॥ २४१ ॥

भाग्यवन्त एव कदाचित् शौर्यपूर्विकया क्रियया फलं लभन्ते, न तु सर्वे, बुद्धिपूर्वकक्रियाकारिणां फलं सुनिश्चितमेवेत्याह, अस्त्रैरिति।—अस्त्रैः प्रहरणैः, हताः समुत्खाताः, युद्धे विजिता इत्यर्थः, रिपवः शत्रवः, न हि हता नूनं न विनष्टाः, भवन्ति, पुनरुत्थानसम्भवादिति भावः ; प्रज्ञया बुद्धिबलेन, हतास्तु विनाशितास्तु, रिपवः सुहताः सम्यक् हताः, भवन्ति ; समूलमुन्मूलनात् तेषां पुनरुत्थानासम्भवादिति

अस्त्रं निहन्ति पुरुषस्य शरीरमेकं
प्रज्ञा कुलञ्च विभवञ्च यशश्च हन्ति ॥ २४२ ॥

तदेवं प्रज्ञापुरुषकाराभ्यां युक्तस्य अयत्नेन कार्य्यसिद्धयः सम्भवन्ति । उक्तञ्च,—

प्रसरति मतिः कार्य्यारम्भे दृढ़ीभवति स्मृतिः
स्वयमुपनयत्यर्थान् मन्त्रो न गच्छति विप्लवम् ।
स्फुरति सफलस्तर्कोत्तिप्तं समुन्नतिमश्नुते
भवति च रतिः साध्ये कृत्ये नरस्य भविष्यतः ॥ १४३ ॥

तथा च, (ध) नयत्यागशौर्य्यसम्पन्ने पुरुषे राज्यमिति । उक्तञ्च,—त्यागिनि शूरे विदुषि च संसर्गरुचिर्जनो गुणी भवति ।
गुणवति धनं धनाच्छ्रीः श्रीमत्याज्ञा ततो राज्यम्” ॥२४४॥

भावः । अथमेवमभिसम्बन्धे इत्याशङ्क्यायमेव युक्तं प्रदर्शयति, अस्त्रमिति ।—अस्त्रं पुरुषस्य एकं केवलं, शरीरं निहन्ति, प्रज्ञा बुद्धिः, कुलञ्च वंशश्च, विभवश्च सम्पदश्च, यशश्च कीर्त्तिश्च, हन्ति, एतत् सर्वमेव विनाशयतीत्यर्थः ; समूलोन्मूलनकरी खलु नश्यतां प्रज्ञा इति भावः । वसन्ततिलकं वृत्तम् ॥ २४२ ॥

प्रज्ञापूर्वकपौरुषानुष्ठानस्य गुणमाह, प्रसरतीति ।—अविद्यतः अभ्युदयनाधस्यज्ञानस्य इत्यर्थः, प्रज्ञापुरुषकाराभ्यां युक्तस्य इति भावः, नरस्य, कार्य्यारम्भे कार्य्यारम्भविषये, मतिः प्रसरति प्रवर्त्तते, श्रुतमेधा, दृढ़ीभवति चक्षुस्थिता वर्त्तते, मन्त्रः स्वयम् अर्थान् कृत्यवस्तूनि, उपनयन् उद्भावयन्, हृदये उपस्थापयन् इत्यर्थः, विप्लवं विपरीतं, न गच्छति, अविप्लुतो वर्त्तते इत्यर्थः; स्फुरः विचारशक्तिरित्यर्थः, सफलः सन् स्फुरति प्रसरति, चित्तं मनः, समुन्नतिम् उदारतां, निर्भयतामिति यावत्, अश्नुते भजते, तथा साध्ये प्रशंसनीये, कृत्ये कार्य्ये, रतिः अनुरागश्च भवति ; प्रज्ञापौरुषवतः यथा कार्य्याणि सिध्यन्ति, न तथा बुद्धिप्रबलहीनानामिति हृदयम् । हरिणी वृत्तम् ॥ २४३ ॥

(ध) नयेति ।—नयश्च त्यागश्च शौर्य्यञ्च तैः सम्पन्ने नीतिसम्पन्ने त्यागशौर्य्ये शूरे च इत्यर्थः ।

नयादिसम्पन्ने राज्यमिति यदुक्तं, तदेव सदृष्टान्तमाह, त्यागिनीति ।—त्यागिनि वदान्ये, शूरे विक्रमवति, पौरुषनिष्ठे इत्यर्थः, तथा विदुषि च विद्यावति, नीतिज्ञे

मेघवर्णं आह,—"नूनं सद्यःफलानि नीतिशास्त्राणि, यत् त्वया (द) अनुक्रत्येन अनुप्रविश्य अरिमर्दनः सपरिजनो निःशेषितः"। स्थिरजीवो आह,—

"तीक्ष्णोपायप्राप्तिगम्योऽपि योऽर्थः
तस्माद्यादौ संश्रयः साधुयुक्तः।
उत्तुङ्गाग्रः सारभूतो वनानाम्
मान्याभ्यर्च्यश्छिद्यते पादपेन्द्रः॥ २४५॥

ज्ञ अने इत्यर्थः, एतच्चितयवति महापुरुषे इत्याशयः, संसर्गरुचिः सम्बन्धाभिलाषी, अनुरागी इत्यर्थः, जनः गुणी गुणवान्, भवति; संसर्गजा दोषगुणा भवन्तीति भावः; गुणवति बहुगुणसम्पन्ने, जने इति शेषः, धनं वित्तं, धनात् श्रीलक्ष्मीः, श्रीमति जने, आज्ञा अप्रतिहतादेशः, ततः आज्ञावति जने इत्यर्थः, राज्यं, सर्वत्र तिष्ठतीति शेषः; श्रीमतश्चस्वाम्यं दानं शूरत्वप्रज्ञानत्वं राज्यमूलमिति भावः। आर्या छन्दः॥ २४४॥

(द) अनुक्रत्येन—मतवर्त्तिना, नीत्वा तन्मतानुकरणेन वा इत्यर्थः। अनुप्रविश्य—अभ्यन्तरीभूय।

दण्डसाध्येऽपि विषये प्राक् सामप्रयोगप्रशंसामाह, तीक्ष्णोपायेति।—तीक्ष्णैर्दारुणैः, उपायैः साधनैः, सामादिभिः चतुर्भिः दण्डदर्पैः उपायैरित्यर्थः, या प्राप्तिः स्वीकरणमिति यावत्, तया गम्योऽपि लभ्योऽपीत्यर्थः, यः अर्थः वस्तु, अरिविजयरूप इति भावः, तस्मादपि आदौ अथतः, संश्रयः समाश्रयः, आक्रुष्यमयोगेषु षष्ठः सामपूर्वको बन्धुताखीकार इत्यर्थः, साधुयुक्तः युक्तियुक्तः, सत्नीतेन एवेत्यर्थः,—"साम्ना दानेन भेदेन समस्तैरथवा पृथक्। विजेतुं प्रयतेतारीन् न दण्डेन कदाचन॥" इति भगवन्मनूक्तेरित्याशयः, अतिदुष्करार्थसाधनेऽपि प्रथमं सान्त्वेनैव प्रवर्त्तितव्यमिति भावः; "चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया" इत्युक्तिस्तु औजस्विताविजृम्भितमेवेति शेषम्। अत्र दृष्टान्तं लौकिकमुदाहरणमुपन्यस्यति, उत्तुङ्गेति।—उत्तुङ्गम् अत्युन्नतम्, अग्रं यस्य तत्तादृशः, वनानां सारभूतः श्रेष्ठ इत्यर्थः, पादपेन्द्रः वनस्पतिः, मान्याभ्यर्च्यः आदौ लोकितः, अभ्यर्चितश्च सन्, छिद्यते, जनैरिति शेषः; यथा हि लोके वनस्पतिच्छेदे कर्त्तव्ये प्रथमं तत्सन्मानसत्कारौ प्रयुज्यते, तथा महारिपुसाधने कर्त्तव्ये प्रथमं सान्त्वेनैव तदहः प्रवेशस्यमिति तात्पर्यम्। विजेतेव सामाद्यसमर्थनदण्डोद्यारम्भात्। आर्याछन्दः॥ २४५॥

अथवा स्वामिन्! किं तेन अभिहितेन, यत् अनन्तरकाले क्रियारहितम् असुखसाध्यं वा भवति? साधु चेदुच्यते,—

अनिश्चितैरध्यवसायभीरुभिः
पदे पदे दोषशतानुदर्शिभिः।
फलैर्विसंवादमुपागता गिरः
प्रयान्ति लोके परिहासवस्तुताम् ॥ २४६ ॥

न च लघुषु अपि कर्त्तव्येषु धीमद्भिः (ध) अनादरः। यतः,—

प्रक्ष्यामि कर्त्तुमिदमल्पमयत्नसाध्यम्
अत्रादरः कः? इति कृत्यसुपेक्षमाणाः।
केचित् प्रमत्तमनसः परितापदुःखम्
आपत्समक्षसुलभं पुरुषाः प्रयान्ति ॥ २४७ ॥

अनिश्चितैरिति।—अनिश्चिते: संशयापन्नैः, सन्दिग्धैरित्यर्थः, अध्यवसायभीरुभिः कृत्यमभीतैः, उत्साहशून्यैः इति यावत्, पदे पदे प्रतिपदं, सर्वत्र इति यावत्, दोषशतानुदर्शिभिः, क्षिद्रान्वेषणतत्परैः, अन्यैः कर्तृभिः प्रयुक्ताः इति शेषः, गिरः वाक्यानि, फलैः विसंवादं वैपरीत्यम्, अनैकान्तिकत्वमित्यर्थः, उपागताः प्राप्ताः, विफलफलभाजः सत्य इति भावः, लोके जगति, परिहासवस्तुतां उपहासास्पदतां, प्रयान्ति; विफलवाग्व्यापारैश्च ते केवलमात्मनो वाचर्यं प्रकाशयन्ते, तस्मात् तैरलमिति भावः। इत्यनिश्चितं कृत्यम् ॥ २४६ ॥

(ध) अनादरः,—अवहेला।

प्रक्ष्यामीति।—केचित् पुरुषाः इदं कार्यम्, अल्पं लघु, अयत्नसाध्यञ्च सर्वं विना निश्चयञ्च, अत एव कर्तुं प्रक्ष्यामि सम्पादयितुं शक्तौ भविष्यामि, अत्र अस्मिन् कार्यसाधने, आदरः यत्नः, कः? कर्त्तव्य इति शेषः; न कोऽपीत्यर्थः, इति पक्षं विचिन्त्य इत्यर्थः, कृत्यं तत् कार्यम्, उपेक्षमाणाः ईक्षया परित्यजन्तः, अत एव प्रमत्तम् अनवहितं, मनो येषां तादृशाः सन्तः, आपदां प्रसङ्गेन समागमेन, सुलभं सुप्राप्यं, परितापदुःखम् अनुतापकष्टम्, उपेक्षया कार्यनाशादिति भावः, प्रयान्ति प्राप्नुवन्ति। "ईक्षयाऽकुर्वतां कार्ये प्रधानायो भवेत् ध्रुवम्" इति भावः। इत्यनादरः कृत्यम् ॥ २४७ ॥

तत् अद्य (न) जितारेः महिमोः यथापूर्वं निद्राभावो भविष्यति। उच्यते चेतत्,—

निःसर्पे बहुसर्पे वा भवने सुप्यते सुखम् ।
सदादृष्टभुजङ्गे तु निद्रा दुःखेन लभ्यते ॥ २४८ ॥

तथा च,—

विद्वीर्णव्यवसायसाध्यमहतां खिन्धोपभुक्ताग्रिमां
कार्य्याणां नयसाहसोन्नतिमतामिच्छापदारोहिणाम् ।
मानोल्लेकपराक्रमव्यसनिनः पारं न यावद्गताः
सामर्षे हृदयेऽवकाशविषया तावत् कथं निर्वृतिः ?॥२४९॥

(न) जितारेः,—पराजितमन्त्रीः । यथापूर्वं—पूर्ववत्, [पूर्वम् अनतिक्रम्य इति अनतिक्रमार्थे अव्ययीभावः] ।

निःसर्पे इति ।—निःसर्पे सर्परहिते, बहुसर्पे घृतसर्पे वा, भवने गृहे, सुखम् अनायासेन, निःसङ्गं यथा तथेत्यर्थः, सुप्यते निद्रायते, जनेन इति शेषः, सदा दृष्टा भुजङ्गा यत्र तादृशे तु सर्पयुक्ते तु इत्यर्थः, भवने इति पूर्वेणान्वयः, निद्रा संवेद्यः, दुःखेन कष्टेन, लभ्यते ; सर्पदंशनभयात् नैव लभ्यते इति भावः ; कुटिलमतिमन्त्रिणां विनाशात् इदानीं सुखसुप्तिर्भवती भविष्यति इति निष्कृष्टार्थः ॥ २४८ ॥

का कथा सुखसुप्तेः ? अखलान्वयिनीषच्च कुत्रापि क्वियत्यपि ग्लानिर्नास्तीत्याह, विद्वीर्णेति ।—मानोल्लेकपराक्रमव्यसनिनः मानस्य गर्वस्य, उल्लेकः उद्रेकः, पराक्रमस्य, तत्र व्यसनिनः आसक्ताः, अभिमानवशाः विपुलपराक्रमाश्च, सर्वंसहाः इति शेषः, विद्वीर्णैः विपुलैः, व्यवसायैः उद्योगैः, साध्यानि निष्पाद्यानि, अत एव महान्ति प्रभूतानि, दुष्करतया आयाससाध्यानीति यावत्, तेषां, तथा खिन्धैः बन्धुभिः, उपभुक्ताः सततमनुध्यायमानाः, आग्रिमाः मङ्गलाग्रंशाः येषु तेषां, प्रीतिस्निग्धैः बन्धुभिः सततमेव चिन्त्यमानानाम् इत्यर्थः, नयः नीतिः, साहसम् उत्साहः, उन्नतिः आत्मनः अभ्युदयस्य, एताः विद्यन्ते येषु तथोक्तानां, नीत्युत्साहाभ्युन्नतिसमन्वितानामित्यर्थः, इच्छापदम् अभीष्टरूपं स्थानम्, आरोहन्तीति तथोक्तानाम्, अभिलषितानामिति भावः ; कार्य्याणां पारम् अन्तं, यावत् न गताः न प्राप्ताः कार्य्या इत्यर्थः, तावत् सामर्षे अक्षमापरीते, अतिव्याकुले इत्यर्थः, हृदये, अवकाशविषया अवकाशः, क्षुब्धस्थितियोग्यस्थानमेव, विषयः निमग्नावस्थितिरूपव्यापारः यस्याः तथाविधा, पदार्थो-

तत् (घ) अवसितकार्य्यारम्भस्य विश्राम्यतीव मे हृदयम्।
तत् इदम् अधुना (ङ) निष्कण्टकं राज्यं प्रजापालनतत्परो
भूत्वा पुत्रपौत्रादिक्रमेण (च) अचलच्छत्रासनश्रीः चिरं भुङ्क्ष्व।
अपि च,—प्रजा न रञ्जयेत् यस्तु राजा रक्षादिभिर्गुणैः।
अजागलस्तनस्येव तस्य राज्यं निरर्थकम् ॥ २५० ॥
गुणेषु रागो व्यसनेष्वनादरो
रतिः सुभृत्येषु च यस्य भूपतेः।

ज्वरानासक्तमानसैकस्थायिनी इत्यर्थः, निर्वृतिः सौख्यं, कथम्? नैव निर्वृतिर्लभ्यते इत्यर्थः; अकृतकार्य्याणां महामहिमशालिनां हृदयं सर्वदा औत्सुक्येन त्वरापूरितं यादृक् वर्तते, अतः सुखानि तत्र न स्थातुमर्हन्ति, स्थानाभावात्; एतस्थानपञ्चरणे अयम् अपरस्य तत्र स्थानमिति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ २४९ ॥

(घ) अवसितकार्य्यारम्भस्य—समाप्तारब्धकर्मणः, कृतकार्यस्य इत्यर्थः।

(ङ) निष्कण्टकं—विनाशितक्षुद्रशत्रुम्। ("कण्टको न स्त्रियां क्षुद्रशत्रौ मत्स्यादिकीकसे" इति मेदिनी)।

(च) अचलेति।—अचलाः,—स्थिराः, छत्रासनश्रियः,—छत्रं—नृपचिह्नम् आतपत्रम्, आसनं—सिंहासनं, श्रीः,—राजलक्ष्मीः यस्य तादृशः, स्थिराधिपत्ये स्थितः सन्नित्यर्थः।

प्रजा इति।—यस्तु राजा रक्षादिभिः पालनादिभिः, गुणैः तत्तत्कर्मजन्यैरित्यर्थः, प्रजा न रञ्जयेत् न सन्तोषयेत्, अजागलस्तनस्येव छागविशेषकण्ठलम्बकुचस्येव, तस्य राज्ञः, राज्यं [राज्ञः भावः कर्म वा इत्यर्थे राजशब्दात् "राजाऽसे" इति मत्सूत्रेण राजशब्दाद्यक्] राजकर्म, प्रजापालनादिरूपमित्यर्थः, निरर्थकं विफलं, भवतीति शेषः, पालनाद्यकरणादिति भावः; पक्षान्तरे,—तस्य राज्यं राजपदव्यपदेश्यमेवेन सङ्केतितं लिङ्गिनराजकर्मभूतमिति यावत्, निरर्थकम् अर्थशून्यं, व्युत्पत्तिशून्यमित्यर्थः; "राजा प्रकृतिरञ्जनात्" इत्यर्थमुपजीव्य रञ्जधातुनैव राजशब्दस्य व्युत्पादितत्वादिति भावः; वस्तुतस्तु राजतेः कनिनि सिद्धमेतदिति ज्ञेयम् ॥ २५० ॥

अथाऽपि तृपस्य कीदृशे राज्ञि अचञ्चला तिष्ठति, तदेवाह, गुणेष्विति।—यस्य भूपतेः नृपस्य, गुणेषु दयादाक्षिण्यादिषु, रागः अनुरागः, व्यसनेषु जुगुप्सादिषु, अनादरः, अनास्था, अनासक्तिरित्यर्थः, सुभृत्येषु च सत्सचिवादिषु च, रतिः प्रीतिः,

चिरं स भुङ्क्ते चलचामरांशुकां
सितातपत्राभरणां नृपश्रियम् ॥ २५१ ॥

न च त्वया "प्राप्तराज्योऽहम्" इति मत्वा (भ) श्रीमदेन आत्मा व्यंसयितव्यः, यत् कारणं, चला हि राज्ञो विभूतयः, (म) वंशारोहणवत् राजलक्ष्मीः दुरारोहा, (य) क्षणविनिपातरता, प्रयत्नशतैरपि धार्य्यमाणा दुर्द्धरा, (र) प्रशस्ताराधिताऽपि अन्ते (ल) विप्रलम्भिनी, वानरजातिरिव (व) विद्रुतानेकचित्ता, पद्मपत्रोदकम् इव (श) अघटितसंश्लेषा, पवनगतिः इव अतिचपला, (ष) अनार्य्यसङ्गतमिव अस्थिरा, आशीविष इव दुरुपचारा, सन्ध्याऽभ्रलेखेव मुहूर्त्तरागा, जलबुद्बुदावलीव

खेदप्रदर्शनम् इत्यर्थः, स नृपः, चलं चञ्चलं, चामरमेव बालव्यजनमेव, अंशुकं वस्त्रं यस्याः तादृशीं, तथा सितं शुभ्रम्, आतपत्रं छत्रम् एव, आभरणं यस्याः तथाभूता, नृपश्रियं राजलक्ष्मीं, चिरं दीर्घकालं, भुङ्क्ते ["भुजोऽनवने" (१।३।६६ पा०) इत्यनेनात्मनेपदम्] ; चिरस्थायिनी भवति तस्य राजश्रीरिति भावः। वंशस्थविलं वृत्तम् ॥२५१॥

(भ) श्रीमदेन—विभवगर्वेण । व्यंसयितव्यः,—प्रतारयितव्यः।

(म) वंशारोहणवत्—यथा वंशे—वेणुविशेषे, आरोहणं दुःसाध्यं, तद्वदिति भावः।

(य) क्षणेति।—क्षणेन विनिपातः,—विध्वंसनं, तत्र रता—तदासक्ता, क्षणविनाशिनी इत्यर्थः।

(र) प्रशस्तेति।—प्रशस्तं—सुष्ठु यथा स्यात् तथा, अतिनिपुणतयेति यावत्, आराधिताऽपि—सेविताऽपि।

(ल) विप्रलम्भिनी—प्रतारणाकारिणी।

(व) विद्रुतेति।—विद्रुतं—व्याकुलीकृतं, धनलवेनेति भावः, अनेकेषां चित्तं यया तादृशी ; वानरपक्षे,—विद्रुतं—चञ्चलम्, अत एव अनेकम्—अनेकविधं, चित्तं यस्याः तादृशी।

(श) अघटितेति।—अघटितसंश्लेषा, असम्पृक्ता इत्यर्थः।

(ष) अनार्य्येति।—अनार्य्यान्—असाधूनां, सङ्गतमिव—सङ्गमिव, अस्थिरा—अचञ्चलस्वभावा। आशीविष इव—सर्प इव। दुरुपचारा—दुःसेव्या। सन्ध्याऽभ्रेति।—सन्ध्यायां या अभ्रलेखा—मेघराजिः सैव, मुहूर्त्तं—क्षणं, रागः,—अनुरागः;

स्वभावभङ्गुरा ; (ग) सौरप्रकृतिरिव कृतघ्ना, स्वप्नलब्धद्रव्यराशिरिव (घ) क्षणदृष्टनष्टा। अपि च,—

यदैव राज्ये क्रियतेऽभिषेकः
तदैव बुद्धिर्व्यसनेषु योज्या।
घटा हि राज्ञामभिषेककाले
सद्यःप्रसेवापदमुद्धिरन्ति ॥ २५२ ॥

न च कस्मिंत् (क) अनधिगमनीयो नाम अस्ति आपदाम्।

अन्वय,—क्षोदिष्ठं यथाः तथाविधा। जलबुद्बुदावलीव—जलानां—तोयानां, यानि बुद्बुदानि—क्षीटाः, विद्यानीति यावत्, तेषाम् आवलीव—श्रेणिरिव, स्वभावभङ्गुरा—प्रकृत्यैव अपगमनशीला ; अन्वय,—असारत्वात् स्वभावत एव विनश्वरशीला।

(ग) सौरप्रकृतिरिव—स्वाभाविकस्वभाव इव, कृतघ्ना—कृतोपकारस्यापि पुरुषस्य उपकारं विस्मृत्य अपकारपरायणेत्यर्थः ; अन्वय,—कृतघ्नेषु मनुष्याधिकजननाय पुनः कर्षणेन पूर्वकर्षणाच्चक्रविशेषकारिणीति भावः।

(घ) क्षणदृष्टनष्टा—क्षणेन दृष्टा क्षणेन नष्टा च, अचिरस्थायिनीत्यर्थः ; आगमन-निर्गमनयोः क्षणेनैव सम्भवादिति भावः, [लिङ्गविपरिणामोऽत्र कर्तव्यः]।

यदैवेति।—यदैव राज्ये अभिषेकः क्रियते, तदैव बुद्धिः, राज्ञामिति शेषः, व्यसनेषु विपत्तिषु, योज्या योजनीया ; राज्यस्थिरतया बहूनां सद्भावात् "अभिषेकसमय एव मन्त्रिभिः मन्त्रितव्यम्" इति सततमेव प्रत्यवस्थितासनसमाकर्दैर्नृपतिभिः मन्तव्यम् इति भावः ; अथवा,—व्यसनेषु कामादिषु, योज्या आसञ्जनीया, भवतीति शेषः, सदान्याः नृपतयः व्यसनेषु आसक्ता भवन्तीत्यर्थः ; अतएवाभिमतमन्त्रिणश्च नृपतयः प्रायशः एव विवेकरहिताः सदोद्धताश्च सन्तः स्वेच्छाचारिणः भवन्तीति भावः। हि यस्मात् हि, राज्ञामभिषेककाले घटाः अभिषेकार्थं तीर्थोदकपरिपूर्णाः कुम्भाः, अन्यत्र अलीन, सद्य आपदम् उद्धिरन्ति इव उद्वमन्ति इव, तत्क्षरन्ति पातयन्तीवेत्यर्थः ; नृपतयः अभिषेकसमयकालमेव विपन्ना भवन्तीति भावः। [अत्र द्वितीयपादे,—"तदेव याति व्यसनेषु बुद्धिः" इति पाठे तु—तदैव व्यसनेषु मनयादिष्टादृश्यासु दोषेषु, बुद्धिर्याति यावति ; तदा मनलाभात् कर्तव्यज्ञानशून्या भवन्ति राजानः इति भावः। उत्प्रेक्षाऽलङ्कारः]। उपजातिः छन्दः ॥ २५२ ॥

(ङ) अनधिगमनीय इति।—अनधिगमनीयः,—अप्रधर्षणीयः, अविषयीकृतः प्रभवैः ; अपि तु सर्व एव आपदा आक्रम्यन्ते इति भावः।

तत्त्व,—रामस्य व्रजनं, बलेर्नियमनं, पाण्डोः सुतानां वनं,
दृष्णीनां निधनं, नलस्य नृपतेः राज्यात् परिभ्रंशनम् ।
नाभ्याचार्थ्यकमर्जुनस्य, पतनं सञ्चिन्त्य लङ्केश्वरे
सर्वं कालवशाज्जनोऽत्र सहते, कः कं परित्रायते ?॥२५३॥
क्व स दशरथः स्वर्गं भूत्वा महेन्द्रसुहृत् गतः ?
क्व स जलनिधेर्वेलां बद्ध्वा नृपः सगरस्तथा ? ।
क्व स करतलाज्जातो वैण्यः ? क्व सूर्यतनुर्मनुः ?
मनु बलवता कालेनैते प्रबोध्य निमीलिताः ॥ २५४ ॥

रामस्येति ।—रामस्य राघवस्य, व्रजनम् अरण्यगमनं, बलेः दैत्यराजस्य, नियमनं बन्धनं, पाण्डोः सुतानां युधिष्ठिरादीनां, वनं वनवासं, दृष्णीनां यदूनां, निधनं ध्वंसं, नलस्य नृपतेः राज्यात् परिभ्रंशनं च्युतिम्, अर्जुनस्य नाभ्याचार्थ्यकं नाभ्याचार्थ्यपद-स्वीकरणं, विराटभवने अज्ञातवासे बालिकानां नृत्यशिक्षादाननिमित्तं, तथा लङ्केश्वरे रावणे, त्रिभुवनजयिनि इति भावः, पतनं, सञ्चिन्त्य विचार्य, अत्र संसारे, जनः प्राणवशात् सर्वं सहते, को जनः, कं परित्रायते ? न कोऽपि कम् इत्यर्थः ; यदि दृष्टप्राणां भूरिधाम्नां महीयसामेतादृशी गतिः, तदा अल्पीयोभिरस्मत्परिरक्षणं सुतरामेव दुष्करमिति भावः । प्रार्दूलविक्रीडितं वृत्तम् ॥ २५३ ॥

क्वेति ।—यः महेन्द्रस्य देवराजस्य, सुहृत् सखा, भूत्वा स्वर्गं अमरलोकं, मानुषं-दुर्गमे इत्यर्थः, गतः, स दशरथः क्व ? तथा, जलनिधेः समुद्रस्य, वेलां तीरभूमिं, बद्ध्वा, लोकं पालयन्निति शेषः, समुद्रवेलामपि नियम्य सागरपरिवृतां भूमिं प्राप्तवानित्यर्थः, स नृपः सगरः क्व ? करतलात् वैण्यनृपतेः करतलमन्थनादित्यर्थः, जातः अयोनिसम्भव इत्यर्थः, स वैण्यः पृथुः, क्व ? (पुरा किल दुर्दान्तं यज्ञदेवद्विजद्वेषिणं पापीयांसमुत्पथं गतं वेणं महीभृतम् अच्युतनिन्दया प्रागेव हतप्रायं कुर्वतैः विनाश्य नष्टवंश्यः महीं-मिमां प्राप्तकरहितां दस्युपरीताचावलोक्य ऋषया तस्य हतस्य राज्ञः दक्षिणं करं मथित्वा पृथुमुत्पादयामासुरिति श्रीमद्भागवतचतुर्थस्कन्धीय-चतुर्दशाध्यायस्य वार्त्ताऽनुसन्धेया) तथा स तृतीयतनुः सूर्य एव तनुः पितृलक्षणत्वात् शरीरभूतः यस्य तथोक्तः, तृतीयश्च पुत्र इत्यर्थः, ["आत्मा वै जायते पुत्रः" इति श्रुतेः ; "तृतीयमस्य सावित्रं सावर्णिर्भवितां मनुः" इति च देवीभागवतम् । "तृतीयतनुः" इति क्वचित्पाठः] मनुः श्राद्धदेवः, क्व ? मनु भोः ! बलवता प्रबलेन, कालेन एते दशरथादयः,

मान्धाता क्व मतस्त्रिलोकविजयी राजा ? क्व सत्यव्रतः ?
दैवानां नृपतिर्मतः क्व नहुषः ? सच्छास्त्रवान् कैटवः ? ।
मन्यन्ते सरथाः सकुञ्जरवराः शक्रासनाध्यासिनः
कालेनैव महात्मना त्वनुगता कालेन निर्वासिताः ॥ २५५ ॥

अपि च,—

स च नृपतिस्ते सचिवास्ताः प्रमदास्तानि काननवनानि ।
स च ते च ताश्च तानि च कृतान्तदृष्टानि नष्टानि ॥ २५६ ॥

एवं मत्तकरिकर्णचञ्चलां राज्यलक्ष्मीम् अवाप्य नान्यैकनिष्ठो भूत्वा उपभुङ्क्ष्व" ।

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे काकोलूकीयं नाम तृतीयं तन्त्रम् ॥ ३ ॥

प्रवीक्ष्य आविर्भाव्य, उत्पाद्य इत्यर्थः, निर्मीलिताः निधनं नीताः; कालो हि बलवत्तरः इति भावः ॥ २५४ ॥

मान्धातेति ।—त्रिलोकविजयी राजा मान्धाता क्व गतः ? सत्यव्रतः भीष्मः, क्व ? गतः इति पूर्वानुषङ्गः ; देवानां नृपतिः इन्द्रत्वपदमापन्नः इत्यर्थः, नहुषः क्व गतः ? तथा सच्छास्त्रवान् गीतोपनिषदादिसच्छास्त्रोपदेष्टा, कैटवः कृष्णः, क्व गतः ? इति शेषः, महात्मना प्रबलेन, कालेनैव सरथाः सकुञ्जरवराः सबाहना इत्यर्थः, शक्रासनाध्यासिनः इन्द्रेण सह एकासनस्थायिनः, एते इति शेषः, अनुगताः निर्मिताः, तु पुनः, कालेन निर्वासिताः ध्वंसिताश्च, मन्यन्ते, जनैरिति शेषः ; "कालो हि दुरतिक्रमः" इति भावः । आर्यासविक्रीडितं वृत्तम् ॥ २५५ ॥

स चेति ।—स च नृपतिः राजा, ते सचिवाः मन्त्रिणः, ताः प्रमदाः कान्ताः, तानि काननवनानि उपवनानि, विविधानि तरुगुल्मलतादिपूर्णानि विपिनानि वा इत्यर्थः, स च ते च ताश्च तानि च सर्वाणि, कृतान्तेन कालेन, दैवेन वा, दृष्टानि अवलोकितानि, यत्नानीति यावत्, [दृष्टानीति वा पाठः] नष्टानि कृतानि च ; "कालो हि जगदाधारः कालाधारो न विद्यते" इति न्यायप्रवादात् सर्वं कालेनैव जायते, कालेनैव विलीयते इति भावः ॥ २५६ ॥

अथ लब्धप्रणाशं नाम चतुर्थं तन्त्रम् ।



अथ इदम् आरभ्यते लब्धप्रणाशं (क) नाम चतुर्थं तन्त्रं, यस्य अयम् आदिमः श्लोकः,—

"समुत्पन्नेषु कार्य्येषु बुद्धिर्यस्य न हीयते ।
स एव दुर्गं तरति जलस्थो वानरो यथा" ॥ १ ॥

तत् यथा अनुश्रूयते,—

अस्ति कस्मिंश्चित् (ख) समुद्रोपकण्ठे महान् जम्बूपादपः सदाफलः ; तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म । तत्र च तस्य तरोरधः कदाचित्(ग) करालमुखो नाम मकरः समुद्र-सलिलात् निष्क्रम्य (घ) सुकोमलबालुकासनाथे तीरोपान्ते

(क) लब्धप्रणाशं—लब्धस्य—प्राप्तस्य, प्रणाशो यत्र तत्तत् तथाविधम् ; प्राप्तमपि वस्तु कथं प्रणश्यति, इत्येतद्विषयकम् इत्यर्थः, तथाविधादनिष्टोत्पादात् मानवस्थितभव-नोपदेशविधायकमेतत् तन्त्रमिति यावत् । आदिमः,—अयिमः, [आदिमच्छब्दात् "प्रत्ययादिपचाड्डिमच्" इति वार्त्तिकसूत्रेण डिमच्प्रत्ययः] ।

समुत्पन्नेष्विति ।—कार्य्येषु करणीयवस्तुषु, विपत्तिसङ्कुलव्यापारेष्विति यावत्, समुत्पन्नेषु उपस्थितेषु सत्सु, यस्य बुद्धिः मतिः, न हीयते [हाधातोः कर्मकर्त्तरि लट्, कर्मवद्भावात् आत्मनेपदं यक् च] न क्वचं गच्छति, प्रत्युत प्रस्फुरतीति भावः, स एव जलस्थः जलमध्यस्थितः, वानरो यथा वानर इव, दुर्गं [दुःखेन गच्छत्यत्र इत्यधि-करणे दुरुपपदात् गमधातोः "सुदुरोरधिकरणे" इति वार्त्तिकसूत्रेण डप्रत्ययः, कर्मणि तु खल् एव, यद्वा दुःखेन गम्यते इति दुर्गमः यत्वाः] सङ्कटं, तरति विपदुत्तीर्णं प्राप्नोति इत्यर्थः ; प्रत्युत्पन्नमतेः सर्वत्रैव विजयलाभः इति भावः ॥ १ ॥

(ख) समुद्रोपकण्ठे—सागरसमीपे । सदाफलः,—अविरतफलः, सर्वर्तुष्वेव फलभरावनतः इत्यर्थः ।

(ग) करालमुखः,—करालं—विकटं, मुखं यस्य तथाविधः ।

(घ) सुकोमलबालुकासनाथे—मृदुसिकतासमन्विते ।

(ङ) न्यविशत। ततश्च रक्तमुखेन स प्रोक्तः,—"भोः! भवान् समभ्यागतोऽतिथिः; तत् भक्षयतु मया दत्तानि अक्षततुल्यानि जम्बूफलानि। उक्तञ्च,—

प्रियो वा यदि वा द्वेष्यो मूर्खो वा यदि पण्डितः।
वैश्वदेवान्तमापन्नः सोऽतिथिः स्वर्गसङ्क्रमः॥ २॥
न पृच्छेत् चरणं गोत्रं न च विद्यां कुलं न च।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत्॥ ३॥
दूरमार्गश्रमश्रान्तं वैश्वदेवान्तमागतम्।
अतिथिं पूजयेत् यस्तु स याति परमां गतिम्॥ ४॥

(ङ) न्यविशत—अवास्थित, विश्रामजनसुखोपभुक्तये तत्तीरभूमिमधिशिश्रियेः इत्यर्थः, [निपूर्वकात् विशतेः "नेर्विशः" (१।३।१७ पा०) इति सूत्रेण आत्मनेपदम्]।

प्रिय इति।—प्रियो वा अनुरागभाजनं वा, द्वेष्यो यदि वा विरागभाजनं वा, मूर्खो वा अज्ञानोपहतविवेकः वा, यदि वा पण्डितः ज्ञानी वा, भवतु इति शेषः, वैश्वदेवान्तं विश्वेभ्यो देवेभ्यो देयः बलिः वैश्वदेवः, तस्य अन्तम् अवसानं; [विश्वदेवशब्दात् अणि ऋपम्] गृह्यैः नित्यमनुष्ठीयमानात् वैश्वदेवाख्यबलिकर्मणः परम् इत्यर्थः, आपन्नः उपस्थितः, भगवता मनुना एव एवं आहः अतिथीनां विधिः इति वेदितव्यम्; सः उक्तप्रियादिरूपः, अतिथिः गृहागतः, [अतति गच्छति, न तिष्ठति इत्यर्थे, अतधातोः इनिप्रत्ययः] "एकरात्रं हि निवसन् अतिथिर्ब्राह्मणः स्मृतः। अनित्याद्धि गतिर्यस्मात् तस्मादतिथिरुच्यते॥" इत्युक्तलक्षणे ब्राह्मणशब्दः सामान्यवाची; स्वर्गसङ्क्रमः दुर्गमस्वर्गमार्गे सञ्चरणोपायभूतः, स्वर्गस्य अधिरोहणीभूत इत्यर्थः; ("सङ्क्रमो दुर्गसञ्चरः" इत्यमरः) भवतीति शेषः; ताडग्भातिथिसत्कारात् स्वर्गलाभो जायते इति भावः॥२॥

वैश्वेति।—वैश्वदेवान्ते वैश्वदेवबलिकर्मसमापनानन्तरं, तथा श्राद्धे पिण्डक्रिये च, उपस्थितमिति शेषः, अतिथिम् अभ्यागतं, चरणं गोत्रं, न, गोत्रं पितृादिकं, च न, विद्यां तथा कुलञ्च वंशञ्च, न पृच्छेत्, जिज्ञासानन्तरमेवासौ सत्कर्तव्य इति भावः, एवं मनुरब्रवीत्॥ ३॥

दूरेति।—यस्तु दूरेण मार्गेण दीर्घाध्वपर्यटनेन, यः श्रमः, तेन श्रान्तं क्लान्तं, वैश्वदेवान्तं गृह्यैः यथाविधि तत्कर्मसमापनानन्तरम्, आगतम् अतिथिं पूजयेत् भोजनशयनादिना तोषयेदित्यर्थः, स परमां गतिं मुक्तिमित्यर्थः, याति प्राप्नोति॥ ४॥

अपूजितोऽतिथिर्यस्य गृहात् याति विनिश्वसन् ।
गच्छन्ति विमुखास्तस्य पितृभिः सह देवताः" ॥ ५ ॥

एवम् उक्त्वा तस्मै जम्बूफलानि ददौ । सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखम् अनुभूय भूयोऽपि स्वभवनम् अगात् । एवं नित्यमेव तौ वानर-मकरौ जम्बूच्छायास्थितौ विविधशास्त्रगोष्ठ्या कालं नयन्तौ सुखेन तिष्ठतः । सोऽपि मकरो भक्षितशेषाणि जम्बूफलानि गृहं गत्वा स्वपत्न्याः प्रयच्छति ।

अथ अन्यतमे दिवसे तया स पृष्टः,—"नाथ ! क्व एवंविधानि अमृतफलानि प्राप्नोषि ?" स आह,—"भद्रे ! मम अस्ति परमसुहृत् रक्तमुखो नाम वानरः, स प्रीतिपूर्वम् इमानि फलानि प्रयच्छति" । अथ तया अभिहितं,—"यः सदा एव (च) अमृतप्रायाणि ईदृशानि फलानि भक्षयति, तस्य हृदयम् अमृतमयं भविष्यति !! तत् यदि मया भार्यया ते प्रयोजनं, ततः तस्य हृदयं मह्यं प्रयच्छ, येन तद्भक्षयित्वा जरामरणरहिता त्वया सह भोगान् भुनज्मि" । स आह,—"भद्रे ! मा मा एवं वद !! यतः स (छ) प्रतिपन्नोऽस्माकं भ्राता, अपरं

अपूजित इति ।—अतिथिः अपूजितः असत्कृतः, अत एव विनिश्वसन् अमनीरवतया दीर्घं निश्वसन्, यस्य गृहात् भवनात्, याति प्रतिनिवर्त्तते, तस्य देवताः, गृहस्था इति शेषः, पितृभिः पितृलोकैः सह, विमुखाः परासुखाः, रुष्टाः सन्तः इत्यर्थः, गच्छन्ति तद्गृहं त्यजन्तीत्यर्थः; इतोऽपि अतिथिः सत्कार्य्य इति भावः ॥ ५ ॥

(च) अमृतप्रायाणि—अमृततुल्यानि, [प्रायेणाधिक्यादिषु इति "राजदन्तादिषु" पूर्वनिपातः] । भुनज्मि—उपभोगं करोमि [भुजेः उपभोगार्थत्वात् अत्र भुजे इति प्रयोगस्त्वेव साधुत्वम्, अतः परस्मैपदं चिन्त्यम्] ।

(छ) प्रतिपन्नः,—अङ्गीकृतः ।

फलदाता, ततो व्यापादयितुं न शक्यते; तत् त्वज एनं (ज) मिथ्याग्रहम्। उक्तञ्च,—

एकं प्रसूयते माता द्वितीयं वाक् प्रसूयते।
वाग्जातमधिकं प्रोचुः सोदर्य्यादपि बन्धुवत्" ॥ ६ ॥

अथ मकरी आह,—"त्वया कदाचित् अपि मम वचनं न अन्यथा कृतम्; तत् (झ) नूनं सा वानरी भविष्यति, यतः तस्या अनुरागतः सकलमपि दिनं तत्र गमयसि, तत् त्वं ज्ञातो मया सम्यक्। यतः,—

साङ्गादं वचनं प्रयच्छसि न मे, नो वाञ्छितं किञ्चन,
प्रायः प्रोच्छ्वसिषि द्रुतं हुतवहज्वालासमं रात्रिषु।
कण्ठाश्लेषपरिग्रहे शिथिलता, यन्नादराद्युज्यसे
तत्ते धूर्त्त! हृदि स्थिता प्रियतमा काचिन्ममैवापरा"॥ ७॥

(ज) मिथ्याग्रहं—निष्फलाभिनिवेशम्, अयुक्तमाग्रहमित्यर्थः, ("अभिनिवेशोपरागाग्रहाः" इत्यमरः)

एकेति।—माता जननी, एकं, सोदरमिति शेषः, प्रसूयते जनयति, वाक् वाणी, द्वितीयं, भ्रातरमिति शेषः, प्रसूयते, (तत्र) वाग्जातं, भ्रातरमिति भावः, सोदर्य्यादपि सहोदराद्भ्रातुरपि, बन्धुवत् मित्रमिव, अधिकं श्रेष्ठं, प्रियमिति भावः, प्रोचुः, पण्डिता इति शेषः॥ ६॥

(झ) नूनं—निश्चितम्। सा—तव प्रियतमा, वानरी, न तु वानर इति भावः।

साङ्गादमिति।—हे धूर्त्त! मे मम, साङ्गादं सागस्कं, सादरमिति यावत्, वचनं वाक्यं, न, तथा किञ्चन वाञ्छितम् अभिलषितं, नो प्रयच्छसि प्रददासि, त्वमिति शेषः; रात्रिषु प्रायः बाहुल्येन, हुतवहज्वालासमम् अग्निशिखासदृशम्, उष्णमिति भावः, द्रुतं पुनः पुनः, प्रोच्छ्वसिषि निश्वासं त्यजसि; कण्ठे यः आश्लेषः आलिङ्गनं, तस्य परिग्रहे स्वीकरणे, कण्ठग्रहणपूर्वकमालिङ्गने इत्यर्थः, शिथिलता शैथिल्यम्, अनाद्रा इत्यर्थः, तवेति शेषः, यत् यादरात् आग्रहातिशयात्, न युज्यसे न युक्तं करोषि, [अत्रालमनेपदं मत्वं, परन्तु "प्रियामुखं किम्पुरुषश्चुम्बे" इतिवत् कर्मण्यतोऽन्यतरस्यां अपि चात्मनेपदं भवितुमर्हतीति विभाव्यम्] तत् तस्मात्, ममैव मदपेक्षयापीत्यर्थः,

सोऽपि पद्मायाः (अ) पादोपसङ्ग्रहं कृत्वा मूर्ध्नोपरि निधाय तस्याः (ट) कोपकोटिमापन्नायाः (ठ) सुदीनम् उवाच,—

"मयि ते पादपतिते किङ्करत्वमुपागते ।
त्वं प्राणवल्लभे ! कस्मात् कोपने ! कोपमेष्यसि ?" ॥८॥

सा अपि तद्वचनम् आकर्ण्य (ड) अश्रुप्लुतमुखी तमुवाच,—

"सार्द्धं मनोरथशतैस्तव धूर्त्त ! कान्ता
सैव स्थिता मनसि कृत्रिमभावरम्या ।
अस्माकमस्ति न कथञ्चिदिहावकाशः
तस्मात् कृतं चरणपातविडम्बनाभिः !! ॥ ९ ॥

प्रियतमा अतिशयेन प्रिया, काचित् अपरा नारी, ते हृदि स्थिता, इति मत्वे इति अध्याहार्यम् । मार्दूलविक्रीडितं वृत्तम् ॥ ७ ॥

(अ) पादोपसङ्ग्रहं—चरणधारणम् ।

(ट) कोपकोटिं—क्रोधप्रकर्षं, कोपस्य परां काष्ठामित्यर्थः, ("कोटिः स्त्री धनुषोऽग्रेऽस्त्री सङ्ख्याभेदप्रकर्षयोः" इति मेदिनी) आपन्नायाः,—प्राप्तायाः, अति-क्रुद्धाया इत्यर्थः ।

(ठ) सुदीनम्—अतिकातरम् ।

मयीति ।—हे कोपने ! हे मानिनि ! कोपनस्वभावे ! इत्यर्थः, अत्यल्पेनैव कारणेन कोपकरणादिति भावः, प्राणवल्लभे ! जीवितेश्वरि ! मम जीवनादपि अधिकप्रियत्वात् प्रिरूपायां त्वयि न जीवितुमपि शक्नोमि इति भावः ; ते तव, पादपतिते किङ्करत्वं दासत्वम्, उपागते प्राप्ते, मयि त्वं कस्मात् कोपम् एष्यसि प्राप्स्यसि ? कस्मात् कुप्यसि इत्यर्थः ; चरणनिपतिते भर्त्तरि कोपो न युज्यते इति भावः ॥ ८ ॥

(ड) अश्रुप्लुतमुखी—नेत्रजलसिक्तवदना ।

सार्द्धमिति ।—हे धूर्त्त ! मनोरथशतैः अभीष्टसमूहैः, 'तया सह एवं वसामि' तथा 'स्वमात्मानं विनोदयामि' इत्याद्यसङ्ख्यैः कल्पनाजालैरित्यर्थः, सार्द्धं सह, कृत्रिमेण कृत्रिमया निर्व्याजं कृत्रिमं तेन, [कृञ्धातोः "क्विप्-क्तिः क्तिः" (३।३।८८ पा०) इति क्तिप्प्रत्ययः, ततः "चेर्कृञ्यम" (७।४।२० पा०) इति सम्प्रत्ययः] भावार्थेन, अप्रकटेन इत्यर्थः, न तु वास्तवेन इति भावः, भावेन विलासविशेषेण, रम्या मनोहारिणी, सैव कान्ता प्रिया, तव मनसि चेतसि, स्थिता वर्त्तते, तस्मात् तव नितरामसम्भावात् इति भावः ;

अपरं, सा यदि तव वल्लभा न भवति, तत् किं मया भणितेऽपि तां न व्यापादयसि ? अथ यदि (ढ) स वानरः, तत् कः तेन सह तव खेदः ? तत् किं बहुना ? यदि तस्य हृदयं न भक्षयामि, तर्हि मया प्रायोपवेशनं कृतं विद्धि"। एवं तस्याः तं निश्चयं ज्ञात्वा चिन्ताव्याकुलितहृदयः स प्रोवाच,—"अहो ! साधु इदमुच्यते,—

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलीमद्यपयोस्तथा" ॥१०॥ इति ।

"तत् किं करोमि ? कथं स मे वध्यो भवति ?" इति विचिन्त्य वानरपार्श्वम् अगमत्। वानरोऽपि चिरेणायान्तं तं सोद्वेगम् अवलोक्य प्रोवाच,—"भो मित्र ! किम् अद्य (ण) चिरवेलायां समायातोऽसि ? कस्मात् साङ्गादं न आलपसि ? न वा सुभाषितानि पठसि ?" स आह,—"मित्र ! अहं तव (त) भ्रातृजायया निष्ठुरतरैर्वाक्यैः अभिहितः,—'भोः

इष्ट तव मनसि इत्यर्थः, अज्ञातं कथञ्चित् केनापि प्रकारेणेत्यर्थः, अवगतः ज्ञातं, नासि, तस्मात् चरणपातविकम्पनादिभिः पादपतनरूपप्रतारणाभिः, कृतम अलम्, न किमपि प्रयोजनम् इत्यर्थः ; यदा ते मनसि सदीर्घं ज्ञातं नासि, तदा वाक्प्रपञ्चप्रदर्शनार्थं चरणपतनमनर्थकमेव इति भावः। वसन्ततिलकं वृत्तम् ॥ ९ ॥

(ढ) सः,—तव प्रियजनः, वानरः,—पुंल्लोपलक्षितः कश्चित् मर्कटः, तत्—तदा, तेन—पुंवानरेण सह, तव—पुरुषस्य इति भावः, कः खेदः ?—कः प्रत्ययः ? पुरुषेण सह पुरुषस्य ताडनप्रेमासम्भवात् नूनं सा स्त्रीलम्पटीति भावः। प्रायोपवेशनम्—'अभोजनेन प्राणान् त्यक्ष्यामि' इति सङ्कल्प्य अनशनव्रतपरिपालनम्।

वज्रलेपस्येति।—मत्कृतिग्रन्थावलिकाग्रततमे पृष्ठे, १८२ सङ्ख्यके श्लोके, प्रथमे तत्रे ऽप्रतनकाग्रां श्लोकोऽयं व्याख्यातः ॥ १० ॥

(ण) चिरवेलायाम्—चिरतरवेलायाम्।

(त) भ्रातृजायया—भ्रात्रा इति भावः। निष्ठुरतरैः,—अतिनिष्ठुरैः।

(थ) कृतघ्न ! मा मे त्वं स्वमुखं दर्शय, यतः त्वं प्रतिदिनं नित्यम् (ट) उपजीवसि, न च तस्य पुनः प्रत्युपकारं (ध) गृहदर्शनमात्रेण अपि करोषि ; तत् ते (न) प्रायश्चित्तम् अपि नास्ति । उक्तञ्च,—

ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते व्रते ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ ११ ॥

तत् त्वं मम देवरं गृहीत्वा अद्य प्रत्युपकारार्थं गृहम् आनय, नो चेत् त्वया सह मे (प) परलोके दर्शनम्' । अतः अहं तया एवं प्रोक्तः तव सकाशम् आगतः । तत् अद्य तया

(थ) कृतघ्न !—उपकारविस्मर्तः !

(ट) उपजीवसि—उपकारकत्वेन आश्रयसि, नित्यात् उपकारं प्राप्नोषि इत्यर्थः ।

(ध) गृहदर्शनमात्रेण—[दर्श्यते इति दर्शनं, दृशिगत्यात् दर्शिधातोः भावे ल्युट्], गृहस्य दर्शनं गृहदर्शनं, तदेव इति [स्वार्थे मात्रच्], तेन ।

(न) प्रायश्चित्तं—पापक्षयमात्रसाधनत्वेन विधिबोधितं कर्म ।

ब्रह्मघ्ने इति ।—ब्रह्मघ्ने [ब्रह्म हन्ति इति वाक्यार्थे ब्रह्मकर्मकहन्धातोः "ब्रह्म-भ्रूणवृत्रेषु क्विप्" (३।२।८७ पा०) इत्यनेन क्विपो विधानात् ब्रह्महा इत्येव भवितुमर्हति, "ब्रह्मादिष्वेव, क्विबेव" इति विधिनियमस्य भाष्यकारोक्तत्वेऽपि, अभिधानादेव मूलविभुजादित्वात् कप्रत्यये सिद्धम्] ब्रह्मघातिनि, सुरापे मद्यपायिनि, चौरे तस्करे, भग्नव्रते भङ्गनियमे, तथा व्रते धूर्ते, प्रतारके इत्यर्थः, सद्भिः साधुभिः, धर्मशास्त्रज्ञैरित्यर्थः, निष्कृतिः प्रायश्चित्तं, विहिता निरूपिता, किन्तु कृतघ्ने उपकारास्वीकर्तरि, अथवा अकृतघ्ने जने इत्यर्थः, [कृतं हन्ति इति कृतघ्नः, कृतोपपदात् हन्तेः "कृष्यकरणे मूलविभुजादिभ्य उपसङ्ख्यानम्" (वा०) इति सूत्रेण कप्रत्ययः, न तु टक्प्रत्ययः मनुष्यकर्तृकत्वात् ; तथा हि टगधिकारे "अननुष्यकर्तृके च" (३।२।५३ पा०) इत्यत्र प्रतिज्ञा पाणिरेखा, पित्तघ्नं घृतं, मनुष्यकर्तृके कर्मण्युपपदे च अयमेव, आखुघातः शूद्रः, इत्यादिकं दर्शितम्] निष्कृतिः नास्ति ; सर्वेभ्यः अधिकपापपङ्कितः हि कृतघ्नत्वमिति भावः ॥ ११ ॥

(प) परलोके—लोकान्तरे, दर्शनं, भविष्यतीति शेषः, अहं मरिष्यामीति भावः ।

सह त्वदर्थं (फ) कलहायतो मम इयती वेला (ब) विलग्ना ; तत् आगच्छ मे गृहम्। तव भ्रातृपत्नी (भ) रचितचतुष्का प्रगुणितवस्त्रमणिमाणिक्याद्युचिताभरणा द्वारदेशबद्धवन्दनमाला सोत्कण्ठा तिष्ठति"। मर्कट आह,—"भो मित्र! युक्तम् अभिहितं भ्रातृपत्न्या। उक्तञ्च,—

वर्जयेत् कौलिकाकारं मित्रं प्राज्ञतरो नरः।
आत्मनः सम्मुखं नित्यं य आकर्षति लोलुपः॥ १२॥

तथा च,—ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्॥ १३॥

(फ) कलहायतः,—कलहं कुर्वतः, [कलहशब्दात् "अस्मद्येरकलहात्—" (३।१।१७ पा०) इत्यादिना क्यङ्, ततः शटः प्रत्ययः। कलहायमानस्येति साधु, क्यङ्लक्षाऽऽत्मनेपदित्वात् ; कलहयतः इत्यपि वा पाठः]।

(ब) विलग्ना—सञ्जाता इत्यर्थः।

(भ) रचितचतुष्का—रचितं—कल्पितं, खचितं वा, चतुष्कं—चतुःसंख्युक्तसंख्यं यया तादृशी, अतिथेरुपवेशनार्थेनिति भावः ; यद्वा,—गुम्फितचतुर्यष्टिनाभिका, "चार नरी माला" इति वङ्गभाषा। प्रगुणितेति।—प्रगुणितानि—प्रकृष्टगुणानि, भङ्गाङ्गीत्यर्थः, यानि वस्त्रमणिमाणिक्यादीनि, तान्येव उचितानि—योग्यानि, यद्वे धृतानीत्यर्थः ; यद्वा,—उचितानि—समञ्जसानि, उपयुक्तानीत्यर्थः, ("उचितस्तु भवेद्योग्ये नित्ये स्याने समञ्जसे" इति मेदिनी) आभरणानि—अलङ्काराः यया यस्या वा तादृशी, समयोचितनानाऽलङ्कारभूषिता इत्यर्थः। द्वारेति।—द्वारदेशे बद्धा—लम्बीकृता, सम्भोजनार्थम् इत्यर्थः, वन्दनमाला—वन्दनयोग्यपुष्पमाला यया सा।

वर्जयेदिति।—यः कपटसुहृदिति भावः, लोलुपः लुब्धः सन्, नित्यं सततम्, आत्मनः सम्मुखम् अभिमुखम्, आकर्षति, मित्रं वशयित्वा सर्वाणि स्वार्थसाधनानि स्वयमेवाकर्षति इत्यर्थः, प्राज्ञतरः अतिप्रज्ञावान्, नरः कौलिकाकारं तन्तुवायसदृशम्, स्वार्थपरमिति यावत्, यथा तन्तुवायः वस्त्रवयनार्थं तन्तूनि प्रगुणीकृत्य वस्त्रेण आत्माभिमुखमेव आकर्षति, तद्वत् इति भावः, मित्रं वर्जयेत् त्यजेत् ; स्वार्थतत्परः सन्नपि यदीमुखविपक्षसदृशः हेयः इति निष्कर्षः॥ १२॥

ददातीति।—प्रीतेः प्रणयस्य, लक्षणं चिह्नं, षड्विधमेव,—ददाति,

परं, वयं वनचराः, युष्मदीयश्च (म) जलान्ते गृहं, तत् कथं शक्यते तत्र गन्तुम् ? तस्मात् तामपि मे भ्रातृपत्नीम् अत्र आनय, येन प्रणम्य तस्या आशीर्वादं गृह्णामि"। स आह, —"भो मित्र ! अस्ति (य) समुद्रान्तरे सुरम्ये (र) पुलिनदेशे-ऽस्माद्दृढम्। तत् मम पृष्ठम् आरूढः सुखेन अक्षतभयो गच्छ"। सोऽपि तत् श्रुत्वा सानन्दम् आह,—"भद्र ! यदि एवं, तत् किं विलम्ब्यते ? त्वर्यताम् ; एषोऽहं तव पृष्ठम् आरूढः"। तथा-ऽनुष्ठिते (ल) अगाधे जलधौ गच्छन्तं मकरम् आलोक्य भय-त्रस्तमना वानरः प्रोवाच,—"भ्रातः ! शनैः शनैः गम्यताम् ; (व) जलकल्लोलैः म्लाप्यते मे शरीरम्"। तत् आकर्ण्य मकरः चिन्तयामास,—"असौ अगाधं जलं प्राप्तो मे वशः सञ्जातः, मत्पृष्ठगतः तिलमात्रमपि चलितुं न शक्नोति ; तस्मात् कथ-यामि अस्य निजाभिप्रायं, येन अभीष्टदेवतास्मरणं करोति"। आह च,—"मित्र ! त्वं मया बधाय समानीतो भार्यावाक्येन

धेति शेषः, प्रतिगृह्णाति, प्रीतिपात्रादिति शेषः, गृह्णं रहस्यम्, आख्याति आख्यति, प्रीतिपात्रेभ्य इति शेषः, पृच्छति, प्रीतिपात्रं गुह्यमेवेति शेषः, भुङ्क्ते, प्रथयिष्यते इति शेषः, ["भुजोऽनवने" (१।३।६६ पा०) इत्यात्मनेपदम्, अवने तु भुनक्ति नदीं राजा इति परस्मैपदमेव] भोजयते च अन्नं कारयति च, प्रथयिष्यतीति शेषः, [भुजधातोः "हेतुमति च" (३।१।२६ पा०) इति णिच्, "णिचश्च" (१।३।७४ पा०) इति कर्तृगे क्रियाफले णिजन्तत्वादात्मनेपदम्] ; दानं, यज्ञं, रहस्यवचनं, रहस्यप्रश्नः, भोजनं, भोजनदानञ्च एतत् षट्कं प्रीतिलक्षणमिति ॥ १२ ॥

(म) जलान्ते—जलमध्ये।

(य) समुद्रान्तरे—समुद्रमध्यभागे, समुद्रमध्ये वा।

(र) पुलिनदेशे—जलोल्लसितभूमौ, ("चड़ा" इति बङ्गभाषा)।

(ल) अगाधे—अतलस्पर्शे। जलधौ—समुद्रे। भयत्रस्तमनाः,—भयेन भग्नं—, समाकुलं, मनः यस्य सः।

(व) जलकल्लोलैः,—जलस्य कल्लोलैः,—तरङ्गैर्निमित्तैः, प्रबलतरङ्गैरित्यर्थः, ("कल्लो-लिनु। तरङ्गभङ्गीजलजीवौ" इत्यमरः)। म्लाप्यते—जलसात् भावीत्यियते इत्यर्थः।

विख्याप्य ; तत् सार्थ्यताम् अभीष्टदेवता"। स आह,—"भ्रातः ! किं मया तस्याः तवापि च अपकृतं, येन मे वधोपायः चिन्तितः ?" मकर आह,—"भोः ! तस्याः तावत् तव हृदयस्य (ग) अमृतमयफलरसास्वादनसृष्टस्य भक्षणे (घ) दोहदः सञ्जातः, तेन एतदनुष्ठितम्"। प्रत्युत्पन्नमतिः वानरः आह, —"भद्र ! यदि एवं, तत् किं त्वया मम तत्र एव न (ङ) व्याहृतम् ? येन स्वहृदयं (च) जम्बूकोटरे सदा एव मया (क) सुगुप्तं कृतं, तत् (ख) भ्रातृपत्न्या अर्पयामि। त्वया अहं शून्यहृदयोऽत्र कस्मात् आनीतः ?" तदाकर्ण्य मकरः सानन्दमाह,—"भद्र ! यदि एवं, तदर्पय मे हृदयं, येन सा दुष्टपत्नी तद्भक्षयित्वा (ग) अनशनात् उत्तिष्ठति। अहं त्वां तमेव जम्बूपादपं प्रापयामि"। एवमुक्त्वा निवर्त्य जम्बूतलम् अगात्। वानरोऽपि कथमपि (घ) जल्पितविविधदेवतोपचारपूजः

(ग) अमृतमयेति।—अमृतमयम्—अमृततुल्यं, यत् फलं—जम्बूफलमित्यर्थः, तस्य रसास्वादनं—रसानुभवः, तेन सृष्टस्य—गृहीतस्य, मधुरास्वादस्य इत्यर्थः।

(घ) दोहदः,—लालसा, आत्यन्तिकी भोगकाङ्क्षा इत्यर्थः।

(ङ) व्याहृतम्—उक्तम्।

(च) जम्बूकोटरे—जम्बूवृक्षरन्ध्रे।

(क) सुगुप्तं—सुरक्षितम्।

(ख) भ्रातृपत्न्यै—भ्रातृजायायै, [भ्रातृपत्न्या अर्पयामि इति सम्बन्धे यकारलोपः; केचित्तु "भ्रातृपत्न्याः" इति विकल्पया षष्ठीमपि वदन्ति]।

(ग) अनशनात्—प्रायोपवेशनरूपम् अनशनव्रतं परित्यज्य इत्यर्थः, ["ल्यब्लोपे कर्मण्यधिकरणे च" (वा०) इति ल्यब्लोपे पञ्चमी]।

(घ) जल्पितेति।—जल्पिताः,—"यदि अहम् अस्मात् सङ्कटात् उत्तीर्णो भवेयं तदा एवमेवंरूपेण देवताः अर्चयामि" इति मनसोक्ताः, विविधानां—बहूनां, देवतानाम् उपचारैः,—उपकरणैः, नीराजनादिभिः दशरूपैः वा इत्यर्थः, पूजा येन तथोक्तः।

तीरमासादितवान्; ततश्च (ङ) दीर्घतरचङ्क्रमणेन तमेव जम्बूपादपमारूढः चिन्तयामास,—"अहो! लब्धाः तावत् प्राणाः। अथवा साधु इदमुच्यते,—

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ १४ ॥

तन्मम एतदद्य पुनर्जन्मदिनमिव सञ्जातम्" इति चिन्त्यमानं मकरं आह,—"भो मित्र! अपैय तत् हृदयं, यत् ते भ्राद्धपक्षो भक्षयित्वा अनयनात् उत्तिष्ठति"। अथ विहस्य निर्भर्त्सयन् वानरः तमाह,—"धिक् धिक् मूर्ख! विश्वासघातक! किं कस्यचित् हृदयद्वयं भवति? तदाशु गम्यतां जम्बूवृक्षस्य अधस्तात्, न भूयोऽपि त्वया अत्र आगन्तव्यम्। उक्तञ्च यतः,—

सकृद्दुष्टञ्च यो मित्रं पुनः सन्धातुमिच्छति।
स मृत्युमुपगृह्णाति गर्भमक्षतरो यथा" ॥ १५ ॥

(ङ) दीर्घतरचङ्क्रमणेन—सुदीर्घकुटिलगत्या, भ्रमम् उत्प्लवनेन इत्यर्थः; [कुटिलं क्रमणमित्यर्थे "नित्यं कौटिल्ये गतौ" (३।१।२३ पा०) इति यङ्, ततः "यङोऽचि च" (२।४।७४ पा०) इति तस्य लुकि ख्युट्प्रत्यये चङ्क्रमणमिति सिद्धम्]।

नेति।—अविश्वस्ते विश्वासस्य अभाजने जने, न विश्वसेत्, ["विश्वसेत्" इत्यत्र आदादिकस्यापि श्वसधातोः गत्यर्थत्वात् भ्वादित्वं, तत्र श्ना वेट्कत्वञ्च; वस्तुतस्तु भ्वादिलादपि स इत्र आचरतीति क्वौ साध्यमिति तु कविकल्पद्रुमटीकायां दुर्गादासः] विश्वस्ते विश्वासभाजनेऽपि जने, न अतिविश्वसेत् न दृढप्रत्ययं कुर्यात्; विश्वासात् उत्पन्नं जातं, भयं मूलानि अपि निकृन्तति निःशेषेण छिनत्ति; विश्वस्तत्वेन अनवहितत्वया अवज्ञानादिति भावः। साकल्येन मनुजहृदयमज्ञानद्भिः पुरुषैः सततमेव सावहितैः भवितव्यमिति तात्पर्यम् ॥ १४ ॥

सकृदिति।—यः सकृत् एकवारं, दुष्टं दोषयुक्तं, विश्वासघननरूपापराधेनापराद्धमित्यर्थः, मित्रं पुनः सन्धातुं सन्धोषयितुं, मित्ररूपेण पुनर्ग्रहीतुमित्यर्थः, इच्छति, सः अक्षतरो गर्भं यथा गर्भमिव, मृत्युम् उपगृह्णाति आश्रयति; "मित्रञ्च वैरमापन्नं अनुयोऽपि सुहृदचनम्" इति भावः ॥ १५ ॥

तत् श्रुत्वा मकरः (च) सविलक्षं चिन्तितवान्,—"अहो! मया अतिमूढेन किमस्य स्वचित्ताभिप्रायो निवेदितः!! तत् यदि असौ पुनरपि कथञ्चिद्विश्वासं गच्छति, तदनयोऽपि विश्वासयामि"; आह च,—"मित्र! (छ) हास्येन मया तेऽभिप्रायो लब्धः, तस्मा न किञ्चित् तव हृदयेन प्रयोजनम्; तत् आगच्छ (ज) प्राघुणिकन्यायेन अस्मद्गृहम्; तव भ्रातृपत्नी सोत्कण्ठा वर्त्तते"। वानर आह,—"भो दुष्ट! गम्यताम् अधुना, नाहम् आगमिष्यामि। उक्तञ्च,—

बुभुक्षितः किं न करोति पापं
क्षीणा जना निष्करुणा भवन्ति।
आख्याहि भद्रे! प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम्" ॥ १६ ॥

मकर आह,—"कथमेतत्?" स आह,—

(च) सविलक्षं—सविस्मयम्।

(छ) हास्येन—उपहासच्छलेन इत्यर्थः। अभिप्रायः,—ममोपरि ते कौटिल्यः आशयः, विश्वासः अविश्वासः वा अहह ते, इत्याकारकः हृद्गतो भाव इत्यर्थः। लब्धः,—ज्ञात इत्यर्थः।

(ज) प्राघुणिकन्यायेन—अतिथिरूपेण।

बुभुक्षित इति।—बुभुक्षितः क्षुधितः जनः, [बुभुक्षा अस्य सञ्जाता इत्यर्थे "तदस्य सञ्जातं तारकादिभ्यः—" (५।२।३६ पा०) इत्यादिना इतच्] किं पापं न करोति? बुभुक्षानिवारणार्थं सर्वमेव पापं करोति इत्यर्थः; क्षीणाः क्षयमापन्नाः, भोज्याद्यभावादिति भावः, [क्षीणाः इति क्षिधातोरकर्मकत्वात् कर्तरि क्तः "निष्ठायामण्यदर्थे (६।४।६० पा०) इति दीर्घः, ततः "क्षियो दीर्घात्" (८।२।४६ पा०) इति निष्ठातस्य नकारः, भावकर्मणोस्तु क्षितः क्षामो मया इत्यादिकं स्यात्] जनाः लोकाः, निष्करुणाः निर्दयाः, भवन्ति, हे भद्रे! प्रियदर्शनस्य तन्नाम्नः सर्पस्य, [सम्बन्धविवक्षया षष्ठी] आख्याहि कथय, गङ्गदत्तः तन्नामको भेकविशेषः, पुनः कूपं न एति न आगच्छति। उपजातिः छन्दः ॥ १६ ॥

कथा १।

"कस्मिंश्चित् कूपे गङ्गदत्तो नाम मण्डूकराजः प्रतिवसति स्म। स कदाचित् (झ) दायादैः उद्वेजितोऽरघट्टघटीम् आरुह्य (ञ) निष्क्रान्तः। अथ तेन चिन्तितं यत्,—'कथं तेषां दायादानां मया (ट) प्रत्यपकारः कर्त्तव्यः? उक्तञ्च,—

आपदि येनापकृतं येन च हसितं दशासु विषमासु।
अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये' ॥ १७ ॥

एवं चिन्तयन् बिले प्रविशन्तं कृष्णसर्पम् अपश्यत्। तं दृष्ट्वा भूयोऽपि अचिन्तयत् यत्,—'एनं तत्र कूपे नीत्वा सकलदायादानाम् उच्छेदं करोमि। उक्तञ्च,—

शत्रुभिर्योजयेच्छत्रुं बलिभिर्बलवत्तरम्।
स्वकार्य्याय यतो न स्यात् काचित् पीड़ाऽत्र तत्क्षये ॥१८॥

(झ) दायादैः,—दायं—पैतृकधनम्, आददते—गृह्णन्ति ये ते दायादैः, ज्ञातिभिः। उद्वेजितः,—विरक्तीकृतः। अरघट्टघटीं—महाकूपस्योपरि निबद्धस्य जलोत्तोलनसाधनीभूतदृढकाष्ठदण्डसंलग्नरज्ज्वा निबद्धं क्षुद्रघटम्।

(ञ) निष्क्रान्तः,—कूपात् निर्गतः।

(ट) प्रत्यपकारः,—अपकार-प्रतीकार इत्यर्थः।

आपदीति।—येन जनेन, आपदि विपत्तिसमये, अपकृतम् अनिष्टं कृतं, येन च विषमासु प्रतिकूलासु, दशासु अवस्थासु, हसितं हास्यं कृतं, तयोरुभयोः [विषयाधिकरणे सप्तमी] यो हि छिद्रमनुसन्धाय तत्रातिकठोरं पीडयति, यश्च स्वयमनिष्टं कर्त्तुमसमर्थतया अन्यकृतमपकारमवलोक्य दुर्मनः हसति, इयोरेतयोः इत्यर्थः, अपकृत्य अपकारं कृत्वा, स्थितमिति शेषः, नरं पुनरपि जातं मन्ये विवेचयामि; एतयोः इयोरेव समत्वादित्याशयः। आर्य्या छन्दः ॥ १७ ॥

शत्रुभिरिति।—स्वकार्य्याय स्वं कार्य्यं साधयितुं, बलिभिः प्रबलैः, शत्रुभिः रिपुभिः सह, बलवत्तरम् अतिप्रबलं, प्रबलरिपुभोऽपीति भावः, शत्रुं योजयेत् सङ्गमयेत्; इयोरेकतरविनाशेऽपि स्वार्थसिद्धिसम्भवादिति भावः; यतः अत्र संसारे, तत्क्षये तयोः शत्रोः क्षये, काचित् पीड़ा न स्यात्, प्रत्युत सुखमेव स्यादिति भावः ॥ १८ ॥

तथा च,—अनुमुन्मूलयेत् प्राज्ञस्तीक्ष्णं तीक्ष्णेन यत्नवा ।
व्यथाकरं सुखार्थाय कण्टकेनेव कण्टकम् ॥ १८ ॥

एवं स विभाव्य विलद्वारं गत्वा तम् आहूतवान्,—'एहि एहि (ठ) प्रियदर्शन ! एहि' । तत् श्रुत्वा सर्पः चिन्तयामास,—'य एष माम् आह्वयति, स स्वजातीयो न भवति, यतो नैषा सर्पवाणी, अन्येन केनापि सह मम मर्त्यलोके (ड) सन्धानं नास्ति ; तदत्र एव दुर्गे स्थितः तावत् वेद्मि कोऽयं भविष्यति । उक्तञ्च,—

यस्य न ज्ञायते शीलं न कुलं न च संश्रयः ।
न तेन सङ्गतिं कुर्यादित्यवाच बृहस्पतिः ॥ २० ॥

कदाचित् कोऽपि (ढ) मन्त्रवादी औषधचतुरो वा माम् आह्वय बन्धने क्षिपति ? अथवा कश्चित् पुरुषो वैरमाश्रित्य कस्यचिद्भक्षणार्थं मामाह्वयति ?' आह च,—'भोः ! को भवान् ?' स आह,—'अहं गङ्गदत्तो नाम मण्डूकाधिपतिः, त्वत्सकाशे मैत्र्यर्थम् अभ्यागतः' । तत् श्रुत्वा सर्प आह,—

अनुमिति ।—प्राज्ञः बुद्धिमान् जनः, तीक्ष्णेन दारुणेन, अतीव बलवता इत्यर्थः, स्वयम्भोः प्रबलतरेणेति यावत्, कण्टकपक्षे—तीक्ष्णायेण ; अनुना रिपुणा, तीक्ष्णं दारुणं, कण्टकपक्षे—सूक्ष्मायं, अमुं व्यथाकरं क्लेशप्रदं, कण्टकम्, अरुन्तुदमिति शेषः, कण्टकेनेव सुदृढेनेति भावः, सुखार्थाय सौख्यनिमित्तं, भाविसुखोपभोगाय इत्यर्थः, अभ्याहतं सुखं सेवितुमिति यावत् ; एवम्,—अनुविनाशात्, अन्यत्र,—शरीरस्थकण्टकापसरणादिति भावः ; उन्मूलयेत् उत्पाटयेत्, समूलमेव समुत्पाटयितुं यतेत इत्यर्थः ॥ १९ ॥

(ठ) प्रियदर्शन !—प्रियं दर्शनं यस्य तत्सम्बुद्धौ, सौम्यमूर्ते ! इत्यर्थः ।

(ड) सन्धानं—सम्बन्धनं, सख्यम् इत्यर्थः ।

यस्येति ।—यस्य जनस्य, शीलं चरितं न, कुलं वंशः न, संश्रयः आधारश्च, न ज्ञायते, तेन जनेन, सङ्गतिं सम्बन्धं, न कुर्यादिति बृहस्पतिः उवाच ॥ २० ॥

(ढ) मन्त्रवादी—सर्पमन्त्रोच्चारणकुशलः । औषधचतुरः,—औषधाभिज्ञः ।

'भोः! (ध) अश्रद्धेयमेतत्, यत् कृष्णानां वह्निना सह (त) सङ्गमः। उक्तञ्च,—

यो यस्य जायते बध्यः स स्वप्नेऽपि कथञ्चन।
न तत्समीपमभ्येति तत् किमेवं प्रजल्पसि?' ॥ २१ ॥

गङ्गदत्त आह,—'भोः! सत्यमेतत्, स्वभाववैरी त्वम् अस्माकम्; परं परपरिभवात् प्राप्तोऽहं ते सकाशम्। उक्तञ्च,—

सर्वनाशे च सञ्जाते प्राणानामपि संशये।
अतिश्रयं प्रणश्यापि रक्षेत् प्राणान् धनानि च' ॥ २२ ॥

सर्प आह,—'कथय कस्मात् ते परिभवः?' स आह,—'दायादेभ्यः'। सोऽपि आह,—'क्व ते (थ) आश्रयः? वाप्यां कूपे तड़ागे ह्रदे वा?' तेनोक्तं,—(द) 'पाषाणचयनिबद्धे

(ध) अश्रद्धेयम्—अनादरणीयम्, अविश्वास्यम् इति यावत्।

(त) सङ्गमः,—मेलनम्।

य इति।—यः यस्य जनस्य, ["कृत्यानां कर्तरि वा" (२। ३। ७१ पा०) इति कर्तरि षष्ठी] बध्यः हन्तव्यः, [हन्धातोः "हनो वा यत् वधश्च वक्तव्यः" (वा०) इति वार्त्तिकसूत्रेण यत्प्रत्ययः वधादेशश्च, पक्षे तु—खलपि, यथा चाह इति] जायते भवति, स स्वप्नेऽपि कथञ्चन तत्समीपं न अभ्येति न गच्छति, वैरिसमीपे कदाऽपि न गन्तव्यमित्यर्थः, "आत्मानं सततं गोपायेत्" इति श्रुतेरिति भावः; तत् तस्मात्, किं कथम्, एवं प्रजल्पसि? प्रलपसि? अहं तव सहजवैरी, त्वयि तत्समीपमागच्छति एव मया बध्यसे, तथाऽपि किमर्थं त्वमेवं मामाश्वासयसीति भावः॥ २१॥

सर्वनाशे इति।—सर्वनाशे धनजनादीनां ध्वंसे, तथा प्राणानामपि च संशये सङ्कटे इत्यर्थः, सञ्जाते उपस्थिते सति, अतिश्रयं प्रबलरिपुमपि, प्रणम्य चरणं प्रपद्य इत्यर्थः, प्राणान् धनानि च रक्षेत्; प्राणधनरक्षार्थं लाघवकरकार्य्यमपि कर्त्तव्यमिति भावः॥ २२॥

(थ) आश्रयः,—आवासः। वाप्यां—दीर्घिकायाम्। कूपे—क्षुद्रजलाधारे। तड़ागे—पुष्करिण्याम्। ह्रदे—अगाधजलसरसि।

(द) पाषाणचयनिबद्धे—प्रस्तरसमूहरचिते।

कूपे'। सर्प आह,—'अहो! (ध) अपदा वयं, तन्नास्ति तव मे प्रवेशः, प्रविष्टस्य च स्थानं नास्ति, यत्र स्थितः तव दायादान् व्यापादयामि ; तत् गम्यताम्। उक्तञ्च,—

यत् शक्यं ग्रसितुं ग्रस्तं ग्रस्तं परिणमेच्च यत्।
हितञ्च परिणामे यत् तदाद्यं भूतिमिच्छता' ॥ २३ ॥

*गङ्गदत्त आह,—'भोः! समागच्छ त्वम्, अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि ; तथा, तस्य मध्ये जलोपान्ते रम्यतरं कोटरम् अस्ति, तत्र स्थितः त्वं (न) लीलया दायादान् व्यापादयिष्यसि'। तत् श्रुत्वा सर्पो व्यचिन्तयत्—'अहं तावत् (प) परिणतवयाः, कदाचित् कथञ्चित् मूषकमेकं प्राप्नोमि, सुखावहश्च जीवनोपायोऽयमनेन (फ) कुलाङ्गारेण मे दर्शितः ; तत् गत्वा तान् मण्डूकान् भक्षयामि इति। अथवा साधु इदमुच्यते,—

यो हि प्राणपरिक्षीणः सहायपरिवर्जितः।
स हि सर्वसुखोपायां वृत्तिमारचयेत् बुधः' ॥ २४ ॥

(ध) अपदाः,—चरणरहिताः।

यदिति।—यत् यस्तु, ग्रसितुं भक्षयितुं, शक्यं समर्थं, [शक्लृधातोः "असिसचीय" (३।१।९९ पा०) इति यति रूपम्] तथा यत् भक्षितञ्च, यत् ग्रस्तं प्रशस्तं, सुखं यथा तथेत्यर्थः, परिणमेत् परिपाकं गच्छेत्, यच्च परिणामे परिपाके, हितं हितकरं, आदिति शेषः, भूतिमिच्छता अभ्युदयार्थिना, तत् आद्यं भक्षणीयम् [अदधातोः ण्यति रूपम्] ॥ २३ ॥

(न) लीलया—अनायासेन। दायादान्—भ्रातॄन्।

(प) परिणतवयाः,—जरिरः।

(फ) कुलाङ्गारेण—कुलेषु अङ्गार इव, भस्मदूषकत्वादिति भावः, तेन, पापाचारिणा इत्यर्थः, भस्मसात्कारिणेति भावः।

य इति।—यः जनः, प्राणैः बलैः, ("प्राणो बलान्तरे वायौ जीवनेऽपि च जीवनोपेऽनिले बले। पुंलिङ्गः पूरिते वाच्य-लिङ्गः पुं भूमि जीवितेषु॥" इति मेदिनी) परिक्षीणः दुर्बलः, अतः सहायसुखस इति वा भावः, तथा सहायैः परिवर्जितः विहीनः, स हि बुधः विज्ञः,

एवं विचिन्त्य तमाह,—'भो गङ्गदत्त! यदि एवं, तदयं भव, येन तत्र गच्छावः'। गङ्गदत्त आह,—'भोः प्रियदर्शन! अहं त्वां सुखोपायेन तत्र नेष्यामि, स्थानञ्च दर्शयिष्यामि; परं त्वया अस्मत्परिजनो रक्षणीयः; केवलं यानहं तव दर्शयिष्यामि, ते एव भक्षणीयाः' इति। सर्प आह,—'साम्प्रतं त्वं मे मित्रं जातं, तन्न मेतव्यम्; तव वचनेन भक्षणीयाः ते दायादाः'। एवमुक्त्वा विलात् निष्क्रम्य तम् आलिङ्ग्य च तेनैव सह प्रस्थितः।

अथ कूपम् आसाद्य अरघट्टघटिकामार्गेण सर्पः तेन (ब) आत्मना स्वालयं नीतः। ततश्च गङ्गदत्तेन कृष्णसर्प कोटरे क्षिप्त्वा दर्शिताः ते दायादाः। ते च तेन शनैः शनैः भक्षिताः। अथ मण्डूकाभावे सर्पेण अभिहितं,—'भद्र! निःशेषिताः ते रिपवः, तत् प्रयच्छ अन्यत् मे किञ्चित् भोजनं, यतोऽहं त्वया अत्र आनीतः'। गङ्गदत्त आह,—'भद्र! कृतं त्वया मित्रकृत्यम्; तत् साम्प्रतम् अनेन एव घटिकायन्त्रमार्गेण गम्यताम्' इति। सर्प आह,—'भो गङ्गदत्त! न सम्यगभिहितं त्वया; कथमहं तत्र गच्छामि? (भ) मदीयविलदुर्गम् अन्येन रुद्धं भविष्यति; तस्मात् अवश्यञ्च मे मण्डूकम् एकैकं (म) स्ववर्गीयं प्रयच्छ, नो चेत् सर्वानपि भक्षयिष्यामि' इति। तत् श्रुत्वा गङ्गदत्तो व्याकुलमना व्यचिन्तयत्,—'अहो!

स्यादिति शेषः, तदा सर्वसुखोपायां सर्वप्रकारेण सुखकरीम्, अनायासलभ्यामित्यर्थः, वृत्तिं जीविकाम्, आरभेत विदध्यात्; यत्नसहायद्वीनानां हि यया वृत्त्या सुखेन प्राणयात्रा भवेत्, सा एव अवलम्बनीया इत्यर्थः, तत् एतत्प्रदर्शितः मण्डूकभक्षणरूपोऽयं सुखावहः जीवनोपायः अवश्यमेव मया अवलम्बनीय इति भावः॥ २४॥

(ब) आत्मना—स्वयम्।

(भ) मदीयविलदुर्गे—मम गर्तरूपः कोटः, आवासगर्तः इत्यर्थः। रुद्धम्—व्याप्तम्, अधिकृतमित्यर्थः, तवेदानीं तत्प्रवेशाधिकारो नास्तीति भावः।

(म) स्ववर्गीयम्—आत्मपक्षीयम्, आत्मसन्निधमित्यर्थः।

किमेतत् मया कृतं सर्पमानयता !! तत् यदि निषेधयिष्यामि, तदा सर्वानपि भक्षयिष्यति । अथवा युक्तमुच्यते,—

योऽमित्रं कुरुते मित्रं वीर्य्याभ्यधिकमात्मनः ।
स करोति न सन्देहः स्वयं हि विषभक्षणम् ॥ २५ ॥

तत् प्रयच्छामि अस्य एकं प्रतिदिनं सुहृदम् । उक्तञ्च,—

सर्वस्वहरणे युक्तं यत्नं बुद्धियुता नराः ।
तोषयन्त्वल्पदानेन बाडवं सागरो यथा ॥ २६ ॥

तथा च,— यो दुर्बलोऽगुनपि याच्यमानो
बलीयसा यच्छति नैव सान्त्वा ।
प्रयच्छते नैव च दर्श्यमानं
खारीं स चूर्णस्य पुनर्ददाति ॥ २७ ॥

य इति ।—यः जनः, आत्मनः स्वजात्, वीर्य्येण बलविक्रमेण अभ्यधिकम् अधिकबलम् इत्यर्थः, अमित्रं शत्रुं, मित्रं कुरुते, स स्वयं हि आत्मनैव, विषभक्षणं करोति, अत्र सन्देहः न ; मुग्धमतिविनाशार्थे प्रबलेन रिपुणा सह मित्रत्वसम्पादनस्य स्वयं विषभक्षणमिव अवश्यम्भावित्वात्तत्सदृशत्वम्, अत्र संशयो नास्ति इति निर्ज्ञेतार्थः ; अत एव सम्भवदसम्भवोरेतयोः अमित्रमैत्रीकरणविषभक्षणयोः बिम्बप्रतिबिम्बभावबोधात् निदर्शनाऽलङ्कारः ॥ २५ ॥

सर्वस्वेति ।—बुद्धियुताः बुद्धिमन्तः, नराः सागरः बाडवं यथा बाडवानलम् इव, यथा हि समुद्रः अपां निर्शोषकं बाडवानलं गर्भैकदेशमधितिष्ठन्तं प्रभुभूतं शोषयितुं किञ्चित् सामर्थ्यं सलभ्यं आत्मानं संरक्षति, तद्वदित्यर्थः, सर्वस्वहरणे युक्तम् उचितमित्यर्थः, यत्नम् अल्पदानेन किञ्चिन्मात्रदानेन, तोषयन्ति प्रीणयन्ति ; "सर्वनाशे समुत्पन्ने किञ्चित् त्यजति पण्डितः" इति भावः ॥ २६ ॥

य इति ।—यः दुर्बलः बलीयसा प्रबलेन, याच्यमानः अभ्यर्थ्यमानः, सान्त्वा सान्त्वेन, अणुनापि अल्पेनापि, चूर्णस्येति शेषः, नैव यच्छति न ददाति, तथा दर्श्यमानञ्च एतत् देहीति दृष्टिविषयीक्रियमाणमपि स्तोकं वस्तु इति यावत्, बलीयसैत्यनुषङ्गः, नैव प्रयच्छते [अत्र आत्मनेपदम् अनुसन्धेयम्] न ददाति, स पुनः बलीयसा आक्रमणात् परभित्यर्थः, चूर्णस्य सुधायाः, खारविंशप्रस्थेत्यर्थः, खारीम्, अधिकम् अभ्याढ्यार्थे, तदाख्यपरिमाणविशेषेणापि, द्विशतत्र्यधिकप्रस्थशतमपीति यावत्, प्रस्थाधिक्यप्रस्थाधिक्यप्रस्थशतमपीति वा,

तथा च,—सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः।
अर्धेन कुरुते कार्यं सर्वनाशो हि दुस्सहः॥ २८॥
न स्वल्पस्य कृते भूरि नाशयेन्मतिमान् नरः।
एतदेव हि पाण्डित्यं यत् स्वल्पात् भूरिरक्षणम्'॥ २९॥

एवं निश्चित्य स नित्यमेकैकं मण्डूकं तम् (ग) आदियति। सोऽपि तं भक्षयित्वा तस्य परोक्षेऽन्यानपि भक्षयति। अथवा साधु इदमुच्यते,—

यथा हि मलिनैर्वस्त्रैर्यत्र तत्रोपविश्यते।
एवं चलितवित्तस्तु वित्तशेषं न रक्षति॥ ३०॥

अथ अन्यदिने तेन अपरान् मण्डूकान् भक्षयित्वा गङ्ग-

दृदाति; यस्यश्चिरिवीक्षस्य दुरदर्कतया ते सद्यैव लोपयोग्या इति भावः, यतः या क्षया महार्घाणाम्, अतितृष्णानामपि बहूनामन्नदानजनितमानभङ्गं बहिनः मानिनः न सहन्ते, तेन हि भोजनमपि चूर्णं बाधितो जनः तददाने तैराक्रान्तः चूर्णराशिं दत्त्वा पश्चात् तान् सान्त्वयति इत्याशयः। उपजातिः छन्दः॥ २७॥

सर्वेति।—पण्डितो जनः, सर्वनाशे सर्वस्वक्षये, समुत्पन्ने समुपस्थिते सति, अर्धं त्यजति, अर्धेन त्यक्तावशिष्टेनेति भावः, कार्यं, स्वमिति शेषः, कुरुते; हि यतः, सर्वनाशः सर्वेषां नाशः, दुस्सहः दुःसह इत्यर्थः, सर्वैरिति शेषः॥ २८॥

नेति।—मतिमान् नरः स्वल्पस्य कृते निमित्तं, भूरि प्रभूतं, बहु इत्यर्थः, न नाशयेत्; स्वल्पात् स्वल्पव्ययात्, स्वल्पं दत्त्वेत्यर्थः, ["स्वल्पोपे कर्मण्यधिकरणे च" इति वार्त्तिकसूत्रेण पञ्चमी] यत् भूरिरक्षणं बहुरक्षणम्, एतदेव पाण्डित्यं हि चातुर्यम् इत्यर्थः॥ २९॥

(ग) आदियतीति—भक्षयितुं ददातीत्यर्थः।

मलेति।—मलिनैः मलैः उपलक्षितैः [इति उपलक्षणे करणे वा तृतीया] मलिनवसनैर्नरैरित्यर्थः, यथा यत्र तत्र उपविश्यते, अतः एव मलिनतया तत्र तत्रस्थ पुनः सञ्चिन्यमङ्गादिरङ्गादिति भावः, एवं तथा, चलितवित्तः व्यथितधनः, जनः इति शेषः, वित्तशेषं धनावशेषं, चिरचिन्तासाध्यमिष्टं धनमित्यर्थः, न रक्षति, यत् प्राप्नोति तदैव व्ययं करोति इत्यर्थः; सर्वधननाशानन्तरं चिरचिन्तासाध्यरक्षणे सञ्चयसम्भवाभावतया आयङ्गातिव्ययविरङ्गादिति भावः॥ ३०॥

दत्तश्रुती यमुनादत्तो भक्षितः। तं भक्षितं मत्वा गङ्गदत्तः तारस्वरेण 'धिक् !! धिक् !!' इति प्रलापपरः कथञ्चिदपि न विरराम। ततः खपञ्चया अभिहितः,—

'किं क्रन्दसि ? दुराक्रन्द ! खपक्षक्षयकारक !।
खपक्षक्ष क्षये जाते को नस्त्राता भविष्यति ? ॥ ३१ ॥

तत् अद्यापि विचिन्त्यताम् आत्मनः (ट) निष्क्रमणम्, अन्यं वधोपायञ्च'।

अथ गच्छता कालेन सकलमपि (ठ) कवलितं मण्डूककुलं, केवलमेको गङ्गदत्तः तिष्ठति। ततः प्रियदर्शनेन भक्षितं,—'भो गङ्गदत्त ! बुभुक्षितोऽहम् ; निःशेषिताः सर्वे मण्डूकाः ; तद्दीयतां मे किञ्चित् भोजनं, यतोऽहं त्वया अत्र आनीतः'। स आह,—'भो मित्र ! न त्वया अत्र विषये मयि अवस्थिते काऽपि चिन्ता कार्य्या ; तत् यदि मां प्रेषयसि, तदा अन्यकूपस्थान् अपि मण्डूकान् विश्वास्य अत्र आनयामि'। स आह,—'मम तावत् त्वम् अभक्ष्यो भ्रातृस्थाने ; तत् यदि एवं करोषि, तदा साम्प्रतं पितृस्थाने भवसि ; तदेवं क्रियताम्' इति। सोऽपि तत् आकर्ण्य अरघट्टघटिकाम् आश्रित्य (ड) विविधदेवतोपकल्पितपूजोपयाचितः तस्मात् कूपात् विनि-

---

किमिति।—हे दुराक्रन्द ! दुस्तरोदन ! वृथारोदिन् ! इत्यर्थः, खपक्षक्षयकारक ! स्वपक्षविनाशिन् ! किं वृथा, क्रन्दसि ? रोदिषि ? खपक्षक्ष स्वपक्षक्ष, क्षये विनाशे, जाते सति, को जनः, नः अस्माकं, त्राता रक्षिता, भविष्यति ? न कोऽपि इत्यर्थः ; तस्मैव स्वजन एव रक्षकः भवति, यदि रक्षितरि परस्मात्स्वमेव रक्षणमिति भावः ॥ ३१ ॥

(ट) निष्क्रमणं—निर्गमनम्।

(ठ) कवलितं—भक्षितम्।

(ड) विविधेति।—विविधाभ्यः, बहीभ्यः, दैवताभ्यः उपकल्पितया—कल्पितया, प्रत्यहितं वस्तु दैवेभ्यः दत्त्वैव भक्षणीयतया इति भावः, ("नानविध"

प्क्रान्तः। प्रियदर्शनोऽपि (ग) तदाकाङ्क्षया तत्रस्थः प्रतीक्षमाणः तिष्ठति। अथ चिरात् अनागते गङ्गदत्ते प्रियदर्शनः (घ) अन्धकोटरनिवासिनीं गोधाम् उवाच,—'भद्रे! क्रियतां (ङ) स्तोकं साहाय्यम्; यतः चिरपरिचितः ते गङ्गदत्तः; तत् गत्वा कुत्रचित् जलाशये तम् अन्विष्य मम (च) सन्देशं कथय यत्,—'आगम्यताम् एकाकिना अपि भवता द्रुततरं, यदि अन्ये मण्डूका न आगच्छन्ति; अहं त्वया विना नात्र वस्तुं शक्नोमि। तथा, यदि अहं तव विरुद्धम् आचरामि, (छ) तत् सुकृतमन्तरे मया विधृतम्' इति'। गोधा अपि तद्वचनात् गङ्गदत्तं द्रुततरम् अन्विष्य आह,—'भद्र गङ्गदत्त! स तव सुहृत् प्रियदर्शनः तव मार्गं (ज) समीक्षमाणः तिष्ठति; तत् शीघ्रम् आगम्यताम्। अपरञ्च, तेन तव (झ) विरूपकरणे

इति बङ्गभाषा) पूजया उपचारितं प्रार्थितं, सपादालपरिभाषणनिमित्तं:, तेन सजीवः, सजीवनरक्षणाय देवैः: सङ्कल्पितविविधपूजोपचारः इत्यर्थः।

(ग) तदाकाङ्क्षया—तेषाम्—अन्धकूपस्थितानां मण्डूकानाम्, आकाङ्क्षया—अन्वेषणाकाङ्क्षया।

(घ) अन्धकोटरनिवासिनीं—अन्धान्तरङ्गाविनीम्। गोधां—गोधिकाम्; "गोधाप" इति बङ्गभाषा।

(ङ) स्तोकम्—चलम्।

(च) सन्देशं—वार्त्तिकम्। एकाकिना—असहायेन, ["एकादाकिनिचासहाये" (५।३।५२ पा०) इत्याकिनिच्प्रत्ययः]।

(छ) तदिति।—तत्—तदा, सुकृतं—पुण्यं, धर्म इत्यर्थः, मदीयमिति भावः, अन्तरे—व्यवधानेऽपि इत्यर्थः, विधृतं—वारितभूतत्वेन स्थापितम् इत्यर्थः; मम धर्मं एवास्य प्रतिभूरस्त इति भावः; अथवा,—सुकृतं—पुण्यम्, अन्तरे—दूरे, विधृतं—स्थापितम्; अथवाहं त्वयि अन्यथाचरेयं, तदा मया पुण्यं परित्यक्तं भवेत्, सर्वथा वारीक्षया मया भाव्यम् इति भावः।

(ज) समीक्षमाणः,—प्रतीक्षमाणः।

(झ) विरूपकरणे—विरुद्धाचरणे।

सुव्रतमन्तरे भूतम्; तत् निःग्रहेण मनसा समागम्यताम्' इति। तत् आकर्ण्य गङ्गदत्त आह,—

'बुभुक्षितः किं न करोति पापम् ?
क्षीणा नरा निष्करुणा भवन्ति।
आख्याहि भद्रे! प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम्' ॥ ३२ ॥

एवमुक्त्वा स तां विसर्जयामास। तत् भो दुष्टजलचर! अहमपि गङ्गदत्त इव त्वद्गृहे न कथञ्चित् अपि यास्यामि"। तत् श्रुत्वा मकर आह,—"भो मित्र! न एतत् युज्यते; सर्वथा एव मे (घ) कृतघ्नतादोषम् अपनय मद्गृहागमनेन; अन्यथा, अत्र अहम् (ङ) अनशनात् प्राणत्यागं तव उपरि करिष्यामि"। वानर आह,—"मूढ! किम् अहं लम्बकर्णो मूर्खः यत् (च) दृष्टापायोऽपि स्वयमेव तत्र गत्वा आत्मानं व्यापादयामि ?—

आगतस्य गतस्यैव दृष्टा सिंहपराक्रमम्।
अकर्णहृदयो मूर्खो यो गत्वा पुनरागतः" ॥ ३३ ॥

बुभुक्षित इति।—४५० पृष्ठे पूर्वं व्याख्यातम् ॥ ३२ ॥

(घ) कृतघ्नतादोषम्—अकृतघ्नताऽपराधम्। अपनय—त्यजय।

(ङ) अनशनात्—अनाहारात्। तव उपरि—त्वदनधिगम्यः।

(च) दृष्टापायोऽपि—दृष्टः अपायः,—आसन्नविपत्तिः येन तथाभूतः, विनाशोपक्रमं दृष्टाऽपि इत्यर्थः।

आगत इति।—आगतः क्षीणजीवितः सन् पूर्वं सिंहसमीपं समागतः, पश्चात् सिंहपराक्रमं सिंहस्य विक्रमं, तद्दमनाय सिंहस्य तथाविधं क्रमनिक्षेपं, दृष्ट्वैव स्वयं स्वचक्षुषा सम्यक् अवलोक्यैव, गतश्च पलायितोऽपि, मूर्खः मूढः, सर्वं दृष्टाऽपि विनष्टुमक्षम इत्यर्थः, यः, राक्षस इति शेषः, गत्वा प्राणत्यागात् पश्चात्; "गत्वा" इत्यत्र "तत्र" इति पाठस्वरूपं सङ्गतम्; पुनः मूर्खः, आगतः स्वप्राणरक्षणार्थं सिंहं निजगा समुपस्थितः, अत एव अकर्णहृदयः कर्णौ च हृदयञ्चेति ["हृदय—"

मकर आह,—"भद्र! स को लम्बकर्णः? कथं दृष्टापायोऽपि मृतः? तत् मे निवेद्यताम्"। वानर आह,—

कथा २।

"कस्मिंश्चित् वनोद्देशे (छ) करालकेशरो नाम सिंहः प्रतिवसति स्म। तस्य च धूसरको नाम शृगालः सदा एव (ज) अनुयायी परिचारकोऽस्ति। अथ कदाचित् तस्य हस्तिना सह (झ) युध्यमानस्य शरीरे गुरुतराः (ञ) प्रहाराः सञ्जाताः, यैः पदमेकमपि चलितुं न शक्नोति। तस्य (ट) अचलनाच्च धूसरकः क्षुत्क्षामकण्ठो दौर्बल्यं गतः। अन्यस्मिन् अहनि शृगालः तम् अवोचत्,—'स्वामिन्! बुभुक्षया पीड़ितोऽहं पदात् पदमपि चलितुं न शक्नोमि; तत् कथं ते शुश्रूषां करोमि?' सिंह आह,—'भोः! गच्छ, अन्वेषय किञ्चित् सत्त्वं, येन इमाम् अवस्थां गतोऽपि व्यापादयामि'। तदाकर्ण्य शृगालोऽन्वेषयन् कञ्चित् समीपवर्त्तिनं ग्रामम् आसादितवान्। तत्र लम्बकर्णो नाम गर्दभः (ठ) तड़ागोपान्ते प्रविरलदूर्वाङ्कुरान् क्षुच्छात्

(२।४।२ पा०) इति एकत्वं] तत्र अग्रजन्मं यस्य सः, असम्यक्शीतेन्द्रियमानसः-शालीत्यर्थः, दीर्घकर्णहृदयवत्त्वेऽपि शृगालवचसा सिंहसमीपे पुनर्गमनेन तच्छून्यत्वेन परिचायितः इति भावः, "किमहं लम्बकर्णो मूर्खः?" इति पूर्वेणान्वयः॥ ३१॥

(छ) करालेति।—कराला:,—उत्कटाः, भीतिप्रदा इत्यर्थः, केसराः,—जटाः यस्य तथोक्तः, यस्य जटादर्शनेनैव भयं जायते इति भावः।

(ज) अनुयायी—अनुगतः। परिचारकः,—सेवकः।

(झ) युध्यमानस्य—युद्धं कुर्वतः।

(ञ) प्रहाराः,—आघाताः, [प्रहियते इति भावे घञ्] यद्वा,—प्रहाराः,—सुतीव्राः वेदनाः इत्यर्थः, [प्रहियते अस्मै इति सम्प्रदाने घञि रूपम्]।

(ट) अचलनात्—गमनाभावात्, सगत्यर्थमिति शेषः।

(ठ) तड़ागोपान्ते—सरसीसमीपे। प्रविरलेति।—प्रविरलाः,—अल्पाः, दूर्वाणाम् अङ्कुराः,—प्ररोहाः तान्।

(ङ) आस्वादयन् दृष्टः। ततश्च समीपवर्त्तिना भूत्वा तेन अभिहितः,—'माम ! नमस्कारोऽयं मदीयः (ढ) सभाव्यताम् ; चिरात् दृष्टोऽसि !! तत् कथय, किमेवं दुर्बलतां गतः ?' स आह,—'भो भगिनीपुत्र ! किं कथयामि !! रजकोऽतिनिर्दयोऽतिभारेण मां पीड़यति, (ण) घासमुष्टिम् अपि न प्रयच्छति ; केवलं दूर्वाङ्कुरान् धूलिमिश्रितान् भक्षयामि, तत् कुतो मे शरीरे पुष्टिः ?' शृगाल आह,—'माम ! यदि एवं, तदस्ति (त) मरकतसदृशशष्पप्रायो नदीसनाथो रमणीयतरः प्रदेशः, तत्र आगत्य मया सह सुभाषितगोष्ठीसुखम् अनुभवन् तिष्ठ'। लम्बकर्ण आह,—'भो भगिनीसुत ! युक्तमुक्तं भवता ; परं वयं ग्राम्याः पशवोऽरण्यचारिणां वध्याः, तत् किं तेन (थ) भव्यप्रदेशेन ?' शृगाल आह,—'माम ! मैवं वद, मद्गुजपञ्जरपरिरक्षितः स देशः ; तन्नास्ति कस्यचित् अपरस्य तत्र प्रवेशः। परमनेन एव दोषेण (द) रजककदर्थिताः तत्र तिस्रो रासभ्यः (ध) अनाथाः सन्ति ; ताश्च (न) पुष्टिमापन्ना यौवनोत्कटा इदं माम् ऊचुः,—'यदि त्वम् अस्माकं सत्यो मातुलः, तदा

(ङ) आस्वादयन्—भक्षयन्।

(ढ) सभाव्यतां—गृह्यताम्, अनुमोद्यतामित्यर्थः।

(ण) घासमुष्टिं—मुष्टिमितघासम्।

(त) मरकतेति।—मरकतैः,—हरिन्मणिभिः, तत्किरणैरित्यर्थः, सदृशानि यानि शष्पाणि—बालतृणानि, तत्प्रायः,—तद्बहुलः। नदीसनाथः,—नदीयुक्तः, नदीसमीपस्थित इत्यर्थः। रमणीयतरः,—सुरम्यः, पानीयस्यापि सौलभ्यादिति भावः।

(थ) भव्यप्रदेशेन—उत्कृष्टस्थानेन।

(द) रजककदर्थिताः,—रजकेन क्लेशिताः।

(ध) अनाथाः,—अस्वामिकाः।

(न) पुष्टिमापन्नाः,—परिपुष्टशरीराः। यौवनोत्कटाः,—उद्दामयौवनसम्पन्नाः, परिपूर्णयौवनेन रम्याः इत्यर्थः।

किञ्चित् ग्रामान्तरं गत्वा भक्षादयोग्यं कञ्चित् पतिमानय' तदर्थं त्वामहं तत्र नयामि'। अथ शृगालवचनानि श्रुत्वा कामपीडिताङ्गः तम् अवोचत्,—'भद्र! यदि एवं, तदग्रे भव, येन आगच्छामि'। अथवा साधु इदमुच्यते,—

नामृतं न विषं किञ्चिदेकां मुक्त्वा नितम्बिनीम्।
यस्याः सङ्गेन जीव्येत म्रियेत च वियोगतः॥ २४॥

तथा च,—यासां नाम्नाऽपि कामः स्यात् सङ्गमं दर्शनं विना।
तासां दृक्सङ्गमं प्राप्य यन्न द्रवति कौतुकम्॥ २५॥

तथाऽनुष्ठिते शृगालेन सह गर्दभः सिंहान्तिकमागतः। सिंहोऽपि व्यथाकुलितस्तं दृष्ट्वा यावत् समुत्तिष्ठति, तावत् रासभः पलायितुम् आरब्धवान्। अथ तस्य पलायमानस्य सिंहेन (प) तलप्रहारो दत्तः; (फ) स च मन्दभाग्यस्य व्यवसाय इव व्यर्थतां गतः। अत्रान्तरे शृगालः कोपाविष्टस्तम् उवाच,

---

नामृतं।—एका कामिनी, नितम्बिनी रमणी, मुक्त्वा विहाय, किञ्चिदपि वस्तु, अमृतं न, विषञ्च न, रमण्यैव एकाधारेण अमृतरूपिण्यै विषरूपिण्यै चेत्यर्थः, तत्संयोगस्य स्वर्गसुखोपमपरमप्रीतिजनकत्वात्, वियोगस्य च मृत्युक्लेशतुल्यक्लेशप्रदत्वादिति भावः। एतदेव उपपादयितुमाह, यस्या इति।—यस्याः नितम्बिन्याः, सङ्गेन सम्भोगेन, जीव्यते प्राप्येत, वियोगतः विच्छेदेन, म्रियेत च नश्येत च, जनेन इति शेषः। एकैव रमणी संयोगवियोगजनितकालविशेषवर्शेन अमृतविषोभयरूपा भवतीति भावः॥२४॥

यासामिति।—यासां सङ्गमं मेलनम्, अथ वा दर्शनं विनाऽपि नाम्नाऽपि नामग्रहणेनैव, कामः मदनोद्रेकः, स्यात्, तासां नारीणां, दृक्सङ्गमं नेत्रसङ्गं, दृष्टिपातम् इत्यर्थः, प्राप्य, यत् न द्रवति आर्द्रीभवति, जीवजातम् इति शेषः, तत् कौतुकम् आश्चर्यकरम्, ते जीवाः प्रस्तरवदतिकाठिनहृदया इति भावः॥ २५॥

(प) तलप्रहारः,—चपेटाघातः।

(फ) स इति।—स च—तलप्रहारः इत्यर्थः, मन्दभाग्यस्य—मन्दं भाग्यं यस्य तस्य, दुर्भाग्यस्य इत्यर्थः, व्यवसाय इव—चेष्टितमिव, पुरुषकार इवेत्यर्थः, व्यर्थतां गतः,—निष्फलोऽभवत् इत्यर्थः; तेन तलप्रहारेण रासभस्य न किमपि अनिष्टं जातम् इति भावः।

—'भोः ! किमेवंविधः प्रहारस्ते, यत् गर्दभोऽपि तव पुरतो बलात् गच्छति, तत् कथं गजेन सह युद्धं करिष्यसि ? तत् दृष्टं ते बलम्'। अथ (ब) विलक्षस्मितं सिंह आह,—'भोः ! किम् अहं करोमि !! मया न क्रमः सञ्जीक्षत आसीत् ; अन्यथा, गजोऽपि मत्क्रमाक्रान्तो न गच्छति'। शृगाल आह,—'अहं पुनरपि एकवारं तवान्तिके तमानेष्यामि ; परं त्वया सञ्जीक्षतक्रमेण स्थातव्यम्'। सिंह आह,—'भद्र ! यो मां प्रत्यक्षं दृष्ट्वा गतः, स पुनः कथम् अत्र आगमिष्यति ? तदन्यत् किमपि सत्त्वम् अन्विष्यताम्'। शृगाल आह,—'किं तव अनेन (भ) व्यापारेण ? त्वं केवलं सञ्जितक्रमः तिष्ठ'।

तथा अनुष्ठिते शृगालो यावत् रासभमार्गेण गच्छति, तावत् तत्रैव स्थाने (म) चरन् सः दृष्टः। अथ शृगालं दृष्ट्वा रासभः प्राह,—'भो भगिनीसुत ! शोभनस्थाने त्वया अहं नीतः, यत् (य) द्राक् मृत्युवशं गतः !! तत् कथय किं तत् सत्त्वं, यस्य अतिरौद्रवज्रसदृशकरप्रहारात् अहं मुक्तः ?' तत् श्रुत्वा प्रहसन् शृगाल आह,—'भद्र ! रासभो त्वाम् (र) आयान्तं दृष्ट्वा सानुरागम्

(ब) विलक्षस्मितं—सविस्मयहासम्, ईषत् विस्मयेन हसन् सस्मित्यर्थः। क्रमः,—परिचरन्यः, आक्रमणार्थमवस्थानपरिपाटी इत्यर्थः, ("ओत् पाता" इति बङ्गभाषा)। सञ्जीक्षतः,—असञ्जः सञ्जः क्षतः तथोक्तः, [अभूततद्भावे चिप्रत्ययः]। अदिति।—क्रम क्रमेच—आक्रमणेन, रिपुविनाशार्थमनुष्ठीयमानोद्रम्यविशेषेत्यर्थः, "आँप" इति बङ्गभाषा, ("क्रमवादुक्रमे प्राप्तौ कल्पे आक्रमणेऽपि च" इति मेदिनी), आक्रान्तः,—अभिभूतः।

(भ) व्यापारेण—पर्य्यालोचनया इत्यर्थः।

(म) चरन्—भ्रमन्। सः,—रासभः।

(य) द्राक्—झटिति, सपदि वा। यतीति।—अतिरौद्रः,—अतिदारुणः, वज्रसदृशः यः करः तस्य प्रहारात्—आघातात्।

(र) आयान्तम्—आगच्छन्तम्। सानुरागं—सप्रणयम्।

आलिङ्गितुं समुत्थिता । त्वच्च कातरत्वात् (ल) नष्टः, सा पुनर्न शक्ता त्वां विना स्थातुम् ; तया तु नश्यतः ते अवलम्बनार्थं हस्तः क्षिप्तः, न अन्धकारेण ; तत् आगच्छ, सा त्वत्कृते प्रायोपवेशना उपविष्टा तिष्ठति । एतत् वदति यत्,—'लक्ष्य-कर्णौ यदि मे भर्त्ता न भवति, तत् अहमग्नौ जले वा प्रविशामि, न पुनस्तस्य वियोगं सोढुं शक्नोमि' । तत् प्रसादं कृत्वा तत्र आगम्यतां, नो चेत् तव स्त्रीहत्यापातकं भविष्यति । अपरं, भगवान् कामः कोपं तव उपरि करिष्यति । उक्तञ्च,—

स्त्रीमुद्रां मकरध्वजस्य जयिनीं सर्वार्थसम्पत्करीं
ये मूढाः प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ।
ते तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः
केचिद्वल्कटजीकृताश्च जटिलाः कापालिकाश्चापरे' ॥३६॥

(ल) नष्टः,—पलायितः । नश्यतः,—पलायमानस्य । अवलम्बनार्थं—धारणार्थम् । क्षिप्तः,—प्रसारितः । त्वत्कृते—तव निमित्तम् । प्रायोपवेशना—अनशनव्रतधारिणी ।

स्त्रीमुद्रामिति ।—ये मूढाः मूर्खाः, कुधियः दुर्बुद्धयः, मकरध्वजस्य कामस्य, जयिनीं जयसाधनीं, त्रिभुवनविजयसाधनास्त्रविशेषरूपिणीमित्यर्थः, स्त्रीमुद्राख्यास्त्रवशेन सर्वेषां स्वायत्तीकरणादिति भावः ; सर्वार्थसम्पत्करीं [सर्वार्थसम्पदुपपदात् करोतेः" कृञो हेतुताच्छील्यानुलोम्येषु" (३।२।२० पा०)इति टप्रत्ययः, स्त्रियां ङीष्] प्रभूतधनसम्पत्ति-लाभेन यत् सुखं तादृशसुखविधायिनीम् इत्यर्थः, स्त्रीमुद्रां स्त्रिया मुद्रा चिह्नविशेषः तां, योषिदवयवानित्यर्थः, प्रविहाय परित्यज्य, मिथ्याफलानाम् अलीकभूतानां स्वर्गादीना-मित्यर्थः, अन्वेषिणः अन्विष्य खलाः, यान्ति विचरन्ति इत्यर्थः, तपश्चरणार्थमिति भावः, ते तेनैव स्त्रियः विहाय गमनेनैवेत्यर्थः, निर्दयतरम् अतिनिष्ठुरं यथा तथा, निहत्य बाधित्वा, केचित् नग्नीकृता विवसनाः कृताः, तथा मुण्डिताः केचित् कृतशिरोमुण्डनाः, वल्कटीकृताः केचित् वल्कवसनाः कृताः, जटिलाः केचित् जटाधारिणः कृताः, अपरे न अन्ये च केचित्, कापालिकाः नरास्थिनालाञ्छितभूरिभूषणाः, श्मशानवासिनः इत्यर्थः, कृताः ज्ञानेन इति सर्वत्रोह्यनीयम् ; ये खलु जगति दिगम्बरादिसम्प्रदायाः, ते स्त्रीज्ञानपरिक्षयात् ज्ञानेनैव विवस्त्रीकृता इति स्त्रीमुण्डनजटाधारणादिप्रायः ; न हि एते

अथ असौ तद्वचनं अद्वेयतया श्रुत्वा भूयोऽपि तेन सह प्रस्थितः। अथवा साधु इदमुच्यते,—

जानन्नपि नरो दैवात् प्रकरोति विगर्हितम्।
कर्म किं कस्यचिल्लोके गर्हितं रोचते कथम् ? ॥ २७ ॥

अत्रान्तरे सञ्जितक्रमेण सिंहेन स लम्बकर्णो व्यापादितः। ततस्तं हत्वा शृगालं रक्षकं निरूप्य स्वयं स्नानार्थं नद्यां गतः। शृगालेनापि (व) लोभौत्सुक्यात् तस्य कर्णहृदयं भक्षितम्। अत्रान्तरे सिंहो यावत् स्नात्वा (श) कृतदेवार्चनः प्रतर्पितपितृगणः समायाति, तावत् कर्णहृदयरहितो दासभः तिष्ठति। तं दृष्ट्वा (ष) कोपपरीतात्मा सिंहः शृगालम् आह,—'पाप ! किमिदमनुचितं कर्म समाचरितं, यत् कर्णहृदयभक्षणेन मयमुच्छिष्टतां नीतः ?' शृगालः सविनयमाह,—'स्वामिन् !

चित्तवृत्तिनिरोधेन तत्त्वतः योगिनः, अपि तु स्वापराधतयैव विरूपीकृताः ; वस्तुतस्तु आत्मनोऽयोगवत्त्व एव योगिन इत्युच्यन्ते, इति तु वक्तुराशयः। आर्द्रस्वविक्रोडितं इवम् ॥ २६ ॥

जानन्निति।—नरः मानवः, जानन्नपि सकलं विदन्नपि, दैवात् नियतिबलादित्यर्थः, न तु स्वेच्छयेति भावः, विगर्हितं विशेषेण निन्दितं, कर्म प्रकरोति अनुतिष्ठति। ननु दुर्जनास्तु स्वभावादेव गर्हितमाचरन्ति, तत् कथं विगर्हितानुष्ठानस्य दैवमेव हेतुः ? इति प्रश्नावतारेतं तदेव समर्थयन्नाह, किमिति।—लोके जगति, कस्यचित् कस्यापि जनस्य इत्यर्थः, [वक्ष्यमाणयोगात् चतुर्थीप्रातावपि षष्ठी श्रूयते षष्ठी इति शेषम्] गर्हितं निन्दितं, कर्म इति शेषः, कथं केनापि प्रकारेणेत्यर्थः, रोचते किम् ? नैव रोचते इत्यर्थः ; गर्हितकर्माचरणे बहुजनदोषात् जानतामपि जनानां तदाचरणे केषाञ्चित् प्रवृत्तिः केषाञ्चिच्चाप्रवृत्तिर्दृश्यते, दैवमेव तत्र हेतुरिति भावः ॥ २७ ॥

(व) लोभौत्सुक्यात्—लोभात्—अतिशोभनरसत्वात्, औत्सुक्यात्—बुभुक्षितत्वेन सत्वरभोजनाय चलुलत्वादित्यर्थः।

(श) कृतदेवार्चनः,—प्रातरहौ दैवपूजां कृत्वा इत्यर्थः। प्रतर्पितेति।—पितृगणान् तर्पयित्वा इत्यर्थः।

(ष) कोपपरीतात्मा—क्रोधाक्रान्तहृदयः।

मा मा एवं वद ; (स) कर्णहृदयरहितोऽयं राजभ आसीत्, येन इह आगत्य त्वाम् अवलोक्य भूयोऽपि आगतः[1]। अथ तद्वचनं (ह) श्रद्धेयं मत्वा सिंहः तेनैव सह संविभज्य निःशङ्कितमनाः तं भक्षितवान्। अतोऽहं ब्रवीमि,—'आगतश्च गतश्चैव' इत्यादि।

तन्मूर्ख! कापेटं कृतं त्वया, परं (क) युधिष्ठिरेणैव सत्य-वचनेन विनाशितम्। अथवा साधु वदसुच्यते,—

स्वार्थमुत्सृज्य यो दम्भो सत्यं ब्रूते सुमन्दधीः।
स स्वार्थात् भ्रश्यते नूनं युधिष्ठिर इवापरः" ॥ १८ ॥

मकर आह,—"कथमेतत्?" स कथयति,—

(स) कर्णहृदयरहितः,—अत्र कर्णसत्वे सिंहगर्जनं श्रुत्वापि कदापि नैव पुनरागच्छेत्, तथा हृदयसत्वे किञ्चित् पूर्वं सिंहस्य तत्प्रकारात् अवलम्बि मरिष्यतोऽपि कपटि विकृततत्प्रकारः पुनर्नागच्छेत्, तस्मात् कर्णहृदयरहितः एवायमिति भावः।

(ह) श्रद्धेय—विश्वासम्; एतस्य युक्तिपूर्वकमुपन्यसनादिति भावः। संविभज्य—विभाग कृत्वा। निःशङ्कितमनाः,—असन्दिग्धचित्तः।

(क) युधिष्ठिरेणैव—तन्नामकेन केनचित् कुम्भकारेणैव इत्यर्थः। सत्यवचनेन—तथ्यवचनेन। विनाशितं—विफलीकृतं, त्वयेति पूर्वानुषङ्गः, पूर्वमनुच्चारितं चापल्य-ज्ञापनमिति शेषः, युधिष्ठिरेण यथा प्राक् आत्मपरिचयमदत्त्वा राज्ञा राजपुत्रवदाहूतेन अवस्थितं, पश्चात् सत्यवचनेन निजपरिचयप्रदानात् प्रागेव च स्वस्य ब्रह्मतपरिचया-प्रकाशनरूपः कपटव्यवहारः विनाशितः, तथा त्वयापि प्राक् कृतेन मां नीत्वा, पश्चात् सत्यकथनेन तत्कपटजालं स्वयमेव विनाशितमिति निष्कर्षः। इदानीं तेनैव कापट्येन तव नीत्वा मां नाशयितुं तव वचनात् सर्वथा विफलः एवेति तात्पर्यार्थः।

स्वार्थमिति।—यः दम्भी कपटाचारः, अत्र सुमन्दधीः, अतिमूढमतिः, नरः इति शेषः, स्वार्थं स्वप्रयोजनम्, उत्सृज्य विहाय, विमृज्य इत्यर्थः, सत्यं ब्रूते, इदानीं सत्यकथने न विलम्बः घटितं सम्भवेदिति मन्यते इति भावः, स. कपटः वाक्छलेतरः, युधिष्ठिर इव नूनं निश्चितं, स्वार्थात् भ्रश्यते [देशादिकञ्च भ्रश्यते; कर्मकर्तरि वट्] स्वयमेव मूर्खो भवति ॥ १८ ॥

कथा ३ ।

"कस्मिंश्चित् अधिष्ठाने कश्चित् कुम्भकारः प्रतिवसति स्म । स कदाचित् (ख) प्रमादात् अर्द्धभग्नघटकर्परतीक्ष्णाग्रस्य उपरि महता वेगेन धावन् पतितः । ततः (ग) कर्परकोट्या पाटित-ललाटो रुधिरप्लाविततनुः क्षणात् उत्थाय स्वाश्रयं गतः । ततश्च अपथ्यसेवनात् स प्रहारस्तस्य (घ) करालतां गतः, कृच्छ्रेण च नीरोगतां नीतः । अथ कदाचित् दुर्भिक्षपीड़िते देशे, स कुम्भकारः स्वल्पामकण्ठः कैश्चित् राजसेवकैः सह देशान्तरं गत्वा कस्यापि राज्ञः सेवको बभूव । स च राजा तस्य ललाटे (ङ) विकरालं प्रहारक्षतं दृष्ट्वा चिन्तयामास यत्, 'वीरः पुरुषः कश्चित् अयं नूनं, तेन ललाटपट्टे सम्मुखप्रहारः' । अतस्तं सम्मानादिभिः सर्वेषां राजपुत्राणां मध्ये विशेषप्रसादेन पश्यति स्म । तेऽपि राजपुत्राः तस्य तं (च) प्रसादातिरेकं पश्यन्तः परमौर्ष्याधर्मं वहन्तो राजभयात् न किञ्चित् ऊचुः ।

(ख) प्रमादात्—अनवधानात्, केनचित् कारणेनाऽनवधानस्यतयेति भावः । अर्द्धेति ।—अर्द्धं यथा तथा भग्नः यः घटः तस्य कर्परस्य—कपालस्य, घटादेरवयव-विशेषस्येत्यर्थः, ("स्यात् कर्परः कपालोऽस्त्री" इत्यमरः) यत् तीक्ष्णाग्रं तस्य ।

(ग) कर्परकोट्या—कपालस्य अग्रभागेन । पाटितेति ।—पाटितं—विदारितं, ललाटं यस्य तथाभूतः । रुधिरेति ।—रक्ताक्लशरीरः । स्वाश्रयं—स्वभवनम् ।

(घ) करालतां—भीषणत्वं, ("करालो दन्तुरे तुङ्गे भीषणे चाभिधेयवत्" इति मेदिनी) । नीरोगताम्—आरोग्यम् ।

(ङ) विकरालम्—अत्युत्कटम् । तेन—वीरपुरुषत्वलेन हेतुना इत्यर्थः । ललाट-पट्टे—भालतटे । सम्मुखप्रहारः,—सम्मुखसङ्ग्रामे जातः इत्यर्थः, भालोऽनेनेति शेषः । राजपुत्राणां मध्ये—राजपुत्रापेक्षया अन्तरे, [ग्रामे सप्तमी । "मध्यं विषये न स्त्री स्यात् स्यादन्तरेऽन्तरीक्षवत्" इति मेदिनी] । विशेषप्रसादेन—अनुग्रहातिशयेन ।

(च) प्रसादातिरेकम्—अनुग्रहातिशयम् । परम्—अत्यर्थम्, ईर्ष्याधर्मं—विद्वेषरूपं मानसविकारम् ।

अथ अन्यस्मिन्दिने तेन भूपतिना (छ) वीरसम्भावनायां क्रियमाणायां, विग्रहे समुपस्थिते, प्रकल्प्यमानेषु गजेषु, सज्ज्यमानेषु वाजिषु, योधेषु प्रमुखीक्रियमाणेषु, तेन भूभुजा स कुम्भकारः प्रस्तावानुगतं पृष्टो निर्जने,—'भो राजपुत्र! किं ते नाम? का च जातिः? कस्मिन् सङ्ग्रामे प्रहारोऽयं ते ललाटे लग्नः?' इति। स आह,—'देव! नायं शस्त्रप्रहारः, युधिष्ठिराभिधः (ज) कुलालोऽहं, प्रकृत्या मद्गेहेऽनेककर्परा आसन्। अथ कदाचित् मद्यपानं कृत्वा निर्गतः प्रधावन् कर्परोपरि पतितः, तस्य प्रहारविकारोऽयं मे ललाटे एवं विकरालतां गतः'। तदाकर्ण्य राजा (झ) सव्रीडमाह,—'अहो! वञ्चितोऽहं राजपुत्रानुकारिणा अनेन कुलालेन!! तत् टीयतां द्राक् एतस्य चन्द्रार्द्धः'। तथानुष्ठिते कुम्भकार आह,—'मा मा एवं कुरु, पश्य मे रणे (ञ) हस्तलाघवम्'। राजा प्राह,—'भोः! सर्वगुणसम्पन्नो भवान्, तथापि गम्यताम्।

(छ) वीरेति।—वीराणां सम्भावना—परीक्षा 'अयं वीरो न वा?' इति संशयनिरूपणार्थम् इत्यर्थः, तस्याम्; यद्वा,—सम्भावना—सम्मानना, समादर इति यावत्, तस्याम्। विग्रहे—सङ्ग्रामे, क्रियमाणयुक्ते इति भावः, समुपस्थिते—सन्निहिते। प्रकल्प्यमानेषु—सज्ज्यमानेषु। सज्ज्यमानेषु—आरोह्यमाणपल्ययनादिषु, वाजिषु—अश्वेषु। योधेषु—वीरेषु। प्रमुखीक्रियमाणेषु—समरसुदक्षीक्रियमाणेषु, सज्जीक्रियमाणेषु वा। भूभुजा—राज्ञा। प्रस्तावानुगतम्—अवसरप्राप्तं यथा तथा, प्रसङ्गमनुसृत्येत्यर्थः।

(ज) कुलालः,—कुम्भकारः। प्रकृत्या—स्वभावतः, कुम्भकारजातिरीत्यनुसारेणेत्यर्थः।

(झ) सव्रीडं—सलज्जम्। वञ्चितः,—प्रतारितः। राजपुत्रानुकारिणा—राजकुमाराणामनुकरणपरायणेन। द्राक्—शीघ्रम्। चन्द्रार्द्धः,—अर्द्धचन्द्रः, गलहस्त इत्यर्थः।

(ञ) हस्तलाघवं—विग्रहकलाम्।

शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक !।
यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते' ॥ १९ ॥

कुलाल आह,—'कथमेतत् ?' राजा कथयति,—

कथा ४ ।

'कस्मिंश्चित् (८) उद्देशे सिंहदम्पती प्रतिवसतः स्म। अथ सिंही पुत्रद्वयम् अजीजनत्। सिंहोऽपि नित्यमेव मृगान् व्यापाद्य सिंह्यै ददाति। अथ अन्यस्मिन्नहनि तेन किमपि न आसादितं, वनं भ्रमतोऽपि रविरस्तं गतः। अथ तेन खगृहम् आगच्छता मृगालग्निशुरेकः प्राप्तः। सिंहश्च 'बालकोऽयम्' इति अवधार्य, तं यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्या जीवन्तमेव समर्पितवान्। ततः सिंह्या अभिहितं,—'भोः कान्त! त्वया आनीतं किञ्चित् अस्माकं भोजनम ?' सिंह आह,—'प्रिये! मया अद्य एनं मृगालग्निशुं परित्यज्य न किञ्चित् सत्त्वम्

पुत्रवत्सला आत्मनः कैश्चिदेव प्रकारान्तरैराख्यानकान्तरेण स्वपुत्रद्वयेन विरहदुःखार्तां तां च जिघांसुं कृतपुत्रकं मृगालशिशुं तस्योद्देशं सान्त्वयन्नित्यमाह, शूरोऽसीति।—हे पुत्रक! त्वं शूरः, बलवान्, असि, कृतविद्यः, शिक्षितोत्कृष्टकविद्याव्यापारं गतः, असि भवसि, तथा दर्शनीयः मनोहराकृतिः, असि, तथाऽपि, यस्मिन् कुले वंशे, त्वम् उत्पन्नः जातः, तत्र तस्मिन् कुले, उत्पन्नेन प्राणिना इति शेषः, गजः न हन्यते न विनाश्यते ; सिंहजातेरुचित गजमारणरूपम् अतिदुष्करं कर्म मृगालशिशवस्त्वादेव अवश्यमिति भावः ; [अत्र "सिंहस्तत्र न हन्यते" इति केचित् पठन्ति, सिंहसुतद्वयवर्धनस्यात्र प्राकरणिकतया तत्स्वीकारे, सिंहहननं तया क्षुद्धरमेव हन्यादेवासौ यति इति क्रियम्] ॥ १९ ॥

(८) उद्देशे—प्रदेशे। सिंहदम्पती—सिंहमिथुनं, [सिंही च सिंहश्च सिंहौ इति स्वरूपैक्यशेषः, ततः सिंहौ एव दम्पती इति कर्मधारयः, दम्पती तु जाया च पतिश्चेति हैमे जायाशब्दस्य दमादेशात्, यथा—अम्पती जायापती च ; वृद्धात् शिवचन्द्रालंकारः]।

आसादितम्। (ठ) न च बालोऽयमिति मत्वा न व्यापादितः, विशेषात् स्वजातीयश्च। उक्तञ्च,—

स्त्रीविप्रलिङ्गिबालेषु प्रहर्त्तव्यं न कर्हिचित्।
प्राणत्यागेऽपि सञ्जाते विश्वस्तेषु विशेषतः॥ ४०॥

इदानीं त्वम् एनं भक्षयित्वा पथ्यं कुरु, प्रभातेऽन्यत् किञ्चित् उपार्जयिष्यामि'। सा प्राह,—'भोः कान्त! त्वया बालकोऽयं विचिन्त्य न हतः, तत् कथम् एनमहं स्त्रोदरार्थे विनाशयामि? उक्तञ्च,—

अकृत्यं नैव कर्त्तव्यं प्राणत्यागेऽपि संस्थिते।
न च कृत्यं परित्याज्यं धर्म एष सनातनः॥ ४१॥

तस्मात् मम अयं हतोयः पुत्रो भविष्यति' इति, एवमुक्ता तमपि (ड) स्वस्तनक्षीरेण परां पुष्टिम् अनयत। एवं ते त्रयोऽपि शिशवः परस्परम् (ढ) अज्ञातजातिविशेषा एकाचार-विहारा बाल्यमयं निर्वाहयन्ति।

अथ कदाचित् तत्र वने भ्रमन् अरण्यगजः समायातः। तं

(ठ) स इति।—स च—मया आसादितः प्रमादविशिष्टरित्यर्थः। अजातीयः,—आपदत्वेन स्वधर्मीय इत्यर्थः।

स्त्रीति।—प्राणत्यागे प्राणसंशये इत्यर्थः, सञ्जाते उपस्थितेऽपि, स्त्रीविप्रलिङ्गिबालेषु स्त्रीषु विप्रेषु लिङ्गिषु ब्रह्मचार्यादिषु, बालेषु शिशुषु, विशेषतः विशेषेण, विश्वस्तेषु कृत-विश्वासेषु, जनेषु इति शेषः, कर्हिचित् कदाचित्, ["अनद्यतने हिंलन्यतरस्याम्" (५।३।२१ पा०) इत्यनेन किम् इतिशब्दात् हिंल्] न प्रहर्त्तव्यं न प्रहारः कर्त्तव्यः॥४०॥

अकृत्यमिति।— प्राणत्यागे संस्थिते उपस्थितेऽपि, अकृत्यम् अकार्य्यं, नैव कर्त्तव्यं, कृत्यं कर्त्तव्यञ्च, न परित्याज्यम्; ["अजेर्व" इति वार्त्तिकसूत्रात् "परित्याज्यम्" इत्यत्र क्यति न कृते]-एषः सनातनः नित्यः, ["सना" इत्यव्ययशब्दात् तनप्रत्ययात् सिद्धम्। "सना नित्ये" इत्यमरः] धर्मः; यतः कथमहमकृत्यं करोमि? इति भावः॥ ४१॥

(ड) स्वस्तनक्षीरेण—निजस्तनदुग्धेन।

(ढ) अज्ञातजातिविशेषाः,—अविदितस्वस्वजातीयपरिचयाः इत्यर्थः। निर्वाह-यन्ति—यापयन्ति।

दृष्ट्वा तौ सिंहसुतौ द्वौ अपि कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत् तेन शृगालसुतेन अभिहितम्,—'अहो! गजोऽयं युष्मत्कुलक्षयम्; तत्र गन्तव्यमेतस्य अभिमुखम्' एवमुक्ताऽसौ गृहं प्रधावितः। तौ अपि (ण) ज्येष्ठबान्धवभङ्गाविह्वलाहतां गतौ। अथवा साधु इदमुच्यते,—

एकेनापि सुधीरेण सोत्साहेन रणं प्रति।
सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात् ॥ ४२ ॥

तथा च,—अत एव हि वाञ्छन्ति भूपा योधान् महाबलान्।
शूरान् वीरान् कृतोत्साहान् वर्जयन्ति च कातरान् ॥४३॥

अथ तौ द्वौ अपि गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितम् ऊचतुः, यथा—'गजं दृष्ट्वा दूरतोऽपि नष्टः'। सोऽपि तदाकर्ण्य कोपाविष्टमनाः (त) प्रस्फुरिताधरपल्लवः ताम्रलोचनः त्रिशिखां भ्रकुटिं कृत्वा तौ निर्भर्त्सयन् परुषतर-

---

(ण) ज्येष्ठेति।—ज्येष्ठबान्धवस्य—प्रधानस्वजनस्य, ज्येष्ठभ्रातुरित्यर्थः, शृगालसुतस्येति भावः, ("स्वगोत्रबान्धवश्चातिबन्धुस्वजनाः समाः" इत्यमरः) भङ्गात्—पलायनात्, विह्वलाहतां—भग्नोत्साहत्वम्, उद्यमहीनतामित्यर्थः।

एकेनेति।—एकेनापि सुधीरेण बुद्धिमता, धैर्यशालिना वा, सोत्साहेन रणोत्साहवता इत्यर्थः, सेनानायकेन इति शेषः, सैन्यं सेनासमूहः, रणं युद्धं, प्रति सोत्साहम् उत्साहान्वितं, जायते, भग्ने पलायनीयते, हतोत्साहे इत्यर्थः, एकस्मिन्नेव सेनानायके इति शेषः, भङ्गं विह्वलाहत्वम्, अवाप्नुयात् प्राप्नोति इत्यर्थः; प्रधानसेनानायकेनिमित्तं हि सैन्यमिति भावः ॥ ४२ ॥

अत इति।—अत एव हि यस्मादेव हेतोः, भूपाः राजानः, महाबलान् प्रभूतशक्तियुक्तान्, शूरान् पराक्रान्तान्, वीरान् धैर्यवतः, कृतोत्साहान् उत्साहवतः, योधान् सैनिकान्, वाञ्छन्ति अभिलषन्ति, कातरान् रणभीरून्, वर्जयन्ति त्यजन्ति च ॥ ४३ ॥

(त) प्रस्फुरितेति।—कम्पितविह्वलयत्कोमलरदनच्छदः। ताम्रलोचनः,—आरक्तनेत्रः। त्रिशिखां—तिस्रः शिखाः,—रेखाः, यत्रभायां यस्यां ताडयौ, भाव-

वचनानि उवाच । ततः सिंह्या एकान्ते नीत्वा प्रबोधितोऽसौ,—'वत्स ! मैवं कदाचित् (थ) जल्प, भवदीयलघुभ्रातरौ एतौ' इति । अथ असौ प्रभूतकोपाविष्टः तामुवाच,—'किमहम् एताभ्यां शौर्येण रूपेण विद्याऽभ्यासेन कौशलेन वा हीनः, येन माम् उपहसतः ? तन्मया अवश्यम् एतौ व्यापादनीयौ' । तदाकर्ण्य सिंही तस्य जीवितमिच्छन्ती अन्तर्विहस्य प्राह,—

'शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक ! ।
यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥ ४४ ॥

तत् सम्यक् शृणु वत्स ! त्वं शृगालीसुतः, कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः । तत् यावत् एतौ मत्पुत्रौ शिशुत्वात् त्वां शृगालं न जानीतः, तावत् द्रुततरं गत्वा स्वजातीयानां मध्ये मिलितो भव, नो चेत् आभ्यां हतो मृत्युपथं समेष्यसि' । सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैः अपसृत्य स्वजात्या मिलितः । तस्मात् त्वमपि, यावत् एते राजपुत्राः त्वां कुलालं न जानन्ति, तावत् द्रुततरम् अपसर, नो चेत् एतेषां सकाशात् (द) विडम्बनां प्राप्य मरिष्यसि' । कुलालोऽपि तदाकर्ण्य सत्वरं प्रनष्टः । अतोऽहं ब्रवोमि,—'स्वार्थमुत्सृज्य यो दम्भी' इत्यादि । धिक् मूर्ख ! यत् त्वया

देशाकृष्टेन भूदयमध्यवर्तिस्थाने विद्युच्चवत् प्रतीयमानामित्यर्थः । भकुटिं—भ्रूभङ्गीम् । ["भभ्रुकुंसादीनाम्" इति वार्त्तिकसूत्रे अत्र "भ्रुकुटिः" "भ्रूकुटिः" इत्यपि रूपद्वयं भवति ; सम्प्रसारणे तु भ्रकुटिरित्यपि पदान्तरं भवतीति ; अत्र वार्त्तिकसूत्रे दीक्षिताः,—"भकारोऽनेन विधीयते इति व्याख्यानरम् ; भकंसः भकुटिः" इति। अतः भकुटिशब्दसिद्धिरिति श्रेयम्] ।

(थ) जल्प—कथय । भवदीयलघुभ्रातरौ—त्वदीयकनिष्ठभ्रातरौ ।

शूरोऽसीत्यादि ।—श्लोकस्यायं ४७० पृष्ठे प्राक् व्याख्यातः ॥ ४४ ॥

(द) विडम्बनां—विशेषेण अवमाननाम् ।

स्त्रियोऽर्थे एतत् कार्यम् अनुष्ठातुम् आरब्धम्। न हि स्त्रीणां कथञ्चिद्विश्वासम् उपगच्छेत्।

उक्तञ्च,—यदर्थे स्वकुलं त्यक्तं जीवितार्हञ्च हारितम्।

सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ?"॥४५॥

मकर आह,—"कथमेतत् ?" वानरः कथयति,—

कथा ५।

"अस्ति कस्मिंश्चित् अधिष्ठाने कोऽपि ब्राह्मणः। तस्य च (घ) भार्या प्राणेभ्योऽपि अतिप्रिया आसीत्; साऽपि प्रतिदिनं कुटुम्बेन सह कलहं कुर्वाणा न विश्राम्यति। सोऽपि ब्राह्मणः कलहम् असहमानः (न) भार्यावात्सल्यात् स्वकुटुम्बं परित्यज्य, ब्राह्मण्या सह विप्रकृष्टं देशान्तरं गतः। अथ

यदर्थे इति।—यदर्थे यस्याः पत्न्याः, अर्थे कृते, स्वकुलम् आत्मीयवर्गः, त्यक्तं विसृष्टं, परित्यज्य आगतमित्यर्थः, जीवितार्हञ्च आयुषः अर्हञ्च, हारितं परित्यक्तम् इत्यर्थः, सा निःस्नेहा त्यक्तप्रणया सती, मां त्यजति; अतः को नरः स्त्रीणां [सम्बन्धविवक्षया षष्ठी] विश्वसेत् ? विश्वासं कुर्यात् ? [श्वसितेरादादिकतया विश्वआदित्वेन प्रयोगो भवितुं युक्त इत्यवधेयम्], अस्य दृष्टान्तेन न कैरपि स्त्रीषु विश्वासः कर्तव्य इत्यर्थः॥ ४५॥

(घ) भार्या—पत्नी, [विभर्त्तेर्घोण्यात् भृ इति धातोः क्यादेर्या "ऋहलोर्ण्यत्" (३।१।१२४ पा०) इति सूत्रेण कर्मणि ण्यति कृते भार्या इति सिद्धम्। भरतेस्तु "भृञोऽसंज्ञायाम्" (३।१।११२ पा०) इति सूत्रेण असंज्ञार्थे क्यपा भार्यम्; तेन च भृत्य इति स्यात्। संज्ञार्थेऽपि "संज्ञायां समजनिषदनिपतमनविदपुद्भ्रोदुभ्रिञः" (३।३।९९ पा०) इति सूत्रेण क्यपैव भार्य्य, तेन भृत्या इत्येव रूपं स्यात्, न तु भार्येति; यद्वा,—येषां मते भावे स्त्रियामस्य सूत्रस्य विषयः, तन्मते भरतेरपि कर्मणि ण्यता भार्येति सिद्धमेव; तथा चोक्तं काशिकायां,—"संज्ञायां पुंसि दृष्टत्वात् न ते भार्यां प्रसिध्यति। स्त्रियां भावाधिकारोऽस्ति तेन भार्यां प्रसिध्यति॥" इति। कुटुम्बेन—परिजनेन। विश्राम्यति—निवर्तते।

(न) भार्यावात्सल्यात्—पत्नीस्नेहात्। विप्रकृष्टम्—अतिदूरम्।

महाऽटवीमध्ये ब्राह्मणा अभिहितम्,—'आर्य्यपुत्र! तृष्णा मां बाधते, तदुदकं क्वापि अन्वेषय'। अथ असौ तद्वचनानन्तरं यावत् उदकं गृहीत्वा समागच्छति, तावत् तां मृताम् अपश्यत्। ततः सः (प) अतिवल्लभतया विषादं कुर्वन् यावत् विलपति, तावत् आकाशे वाचं शृणोति; तथा हि,—'ब्राह्मण! यदि त्वं स्वकीयजीवितस्यार्द्धं ददासि, ततः ते जीवति ब्राह्मणी' इति। तत् श्रुत्वा ब्राह्मणेन शुचीभूय तिसृभिः वाचाभिः स्वजीवितार्द्धं दत्तम्; वाक्सममेव च ब्राह्मणी जीविता सा। अथ तौ जलं पीत्वा वनफलानि च भक्षयित्वा गन्तुम् आरब्धौ। ततः क्रमेण कस्यचित् नगरस्य प्रदेशे पुष्पवाटिकां प्रविश्य ब्राह्मणो भार्य्याम् अभिहितवान्,—'भद्रे! यावत् अहं भोजनं गृहीत्वा समागच्छामि, तावत् अत्र त्वया स्थातव्यम्'। इत्यभिधाय ब्राह्मणो नगरमध्ये जगाम।

अथ तस्यां (फ) पुष्पवाटिकायां पङ्गुः कश्चित् अरघट्टं खेलयन् दिव्यगिरा गीतमुद्गिरति। तच्च श्रुत्वा (ब) कुसुमेषुणा अर्दितया ब्राह्मण्या तत्सकाशं गत्वा अभिहितं,—'भद्र! यदि मां न कामयसे, तत् मत्सत्का स्त्रीहत्या तव भविष्यति'। पङ्गुरब्रवीत्,

(प) अतिवल्लभतया—अति—अतिशयेन, वल्लभः,—प्रियः, अनुरागपात्रम् इत्यर्थः, तस्य भावः तत्ता तया, अतिप्रियतया। विषादं—शोकम्।

(फ) पुष्पवाटिकायां—पुष्पाणाम् इत्यर्थः। पङ्गुः,—गमनशक्तिहीनः पुरुषः, ["खञ्जि गतिवैकल्ये" इति खञ्जधातोः कुप्रत्यये खञ्ज पकारः, अस्य च गकारः, नुगागमश्च औणादिकः, तेन च सिद्धं पङ्गुरिति। तथा च उणादिसूत्रं "खञ्जमञ्जु—" (१म पा० २७ सू०) इत्यादिसूत्रे—"खञ्जि गतिवैकल्ये बाहुलकादतोऽपि कुः। खञ्जेः पनौ नुगागमश्च पङ्गुः॥" इति]। अरघट्टं—कूपोपरिनिबद्धजलोत्तोलनकाष्ठदण्डम्। खेलयन्—हस्तेन रज्जुं धृत्वा उच्चावचं क्षिपन्निति भावः। दिव्यगिरा—मधुरवचसा। गीतम् उद्गिरति—उच्चारयति, गायति इत्यर्थः।

(ब) कुसुमेषुणा—कामेन। अर्दितया—पीडितया। मां न कामयसे—मां नेच्छसि

—'किं व्याधिग्रस्तेन मया करिष्यसि ?' सा अब्रवीत्,—'किम् अनेन उक्तेन, अवश्यं त्वया सह मया सङ्गमः कर्त्तव्यः'। तत् श्रुत्वा पङ्गुः तथा कृतवान्। सुरतानन्तरं सा अब्रवीत्,—'इतः प्रभृति यावज्जीवं मया आत्मा भवते दत्तः, इति ज्ञात्वा भवानपि अस्माभिः सह आगच्छतु'। सोऽब्रवीत्,—'एवमस्तु'।

अथ ब्राह्मणो भोजनं गृहीत्वा समागत्य तया सह भोक्तुम् आरब्धः। सा अब्रवीत्,—'एष पङ्गुः बुभुक्षितः, तत् एतस्यापि कियन्तमपि ग्रासं देहि' इति। तथा अनुष्ठिते ब्राह्मण्या अभिहितं,—'ब्राह्मण! सहायहीनः त्वं यदा ग्रामान्तरं गच्छसि, तदा मम वचनसहायोऽपि नास्ति, तत् एनं पङ्गुं गृहीत्वा गच्छावः'। सोऽब्रवीत्,—'न शक्नोमि आत्मानमपि आत्मना (भ) वोढुं, किं पुनः एनं पङ्गुम् ?' सा अब्रवीत्,—(म) 'पेटाभ्यन्तरस्थम् एनमहं नेष्यामि'। अथ तत् (य) कृतकवचनव्यामोहितचित्तेन तेन प्रतिपन्नम्। तथाऽनुष्ठिते, अन्यस्मिन् दिने (र) कूपोपकण्ठे विश्रान्तो ब्राह्मणः तया पङ्गुपुरुषासक्तया सम्भेत्थं कूपान्तःपातितः। साऽपि पङ्गुं गृहीत्वा कस्मिंश्चित् नगरे प्रविष्टा। तत्र (ल) शुल्कचौर्यैरक्षानिमित्तं राज-

---

मनाभिलाषं पूरयसीत्यर्थः। मत्सङ्गा—मत्सम्बन्धिनी। स्त्रीहत्या—स्त्रीविनाशजनितं पातकम् इत्यर्थः, [स्त्रियाः हननं स्त्रीहत्या, हनधातोः भावे "हनश्च" (३।१।१०८ पा०) इति क्यपि कृते रूपमिदम्]।

(भ) वोढुं—वहनं कर्तुं, स्वदेहभारम् ऊढ्वा स्वयं गन्तुम् इत्यर्थः।

(म) पेटाभ्यन्तरस्थं—पेटकमध्यवर्त्तिनम्।

(य) कृतकेति।—कृतकेन—कपटेन, वचनेन व्यामोहितं चित्तं यस्य तादृशेन। तेन—ब्राह्मणेन। प्रतिपन्नम्—अङ्गीकृतम्।

(र) कूपोपकण्ठे—कूपसमीपे। सम्भेत्थ—सञ्चाल्य, ("धक्का दिया" इति व्रजभाषा)। कूपान्तः,—कूपमध्ये।

(ल) शुल्कचौर्येति।—शुल्कञ्च—राजदेयकरविशेषश्च, यत् चौर्यम्—अप-

पुरुषैः इतस्ततो भ्रमद्भिः तन्मस्तकस्था पेटा दृष्टा, बलात् आच्छिद्य राजाग्रे नीता च। राजा च यावत् ताम् उद्घाटयति, तावत् तं पङ्कुं ददर्श। ततः सा ब्राह्मणी विलापं कुर्वती (व) राजपुरुषानुपदम् एव तत्र आगता राज्ञा दृष्टा,—'को वृत्तान्तः?' इति। सा अब्रवीत्,—'मम एष भर्त्ता (ग) व्याधिबाधितो दायादसमूहैः उद्वेजितो मया स्नेहव्याकुलितमानसया शिरसि कृत्वा भवदीयनगरे आनीतः'। तत् श्रुत्वा राजा अब्रवीत्,—'ब्राह्मणि! त्वं मे भगिनी, ग्रामद्वयं गृहीत्वा भर्त्रा सह भोगान् (घ) भुञ्जाना सुखेन तिष्ठ'।

अथ स ब्राह्मणो दैववशात् केनापि साधुना कूपात् उत्तारितः परिभ्रमन् तदेव नगरम् आयातः, तया दुष्टभार्यया कदाचित् दृष्टश्च राज्ञे निवेदितः,—'राजन्! अयं मम भर्त्तुः वैरी समायातः'। राज्ञा अपि तस्य वध आदिष्टः। सोऽब्रवीत्,—'देव! अनया मम (ङ) सत्त्वं किञ्चित् गृहीतम् अस्ति, यदि त्वं धर्मवत्सलः, तदा तद्दापय'। राजा अब्रवीत्,—'भद्रे! यत् त्वया अस्य सत्त्वं किञ्चित् गृहीतम् अस्ति, तत् समर्पय'। सा

हरणं, प्रतारणापूर्वकमपहरणमित्यर्थः, तस्य रक्षानिमित्तं—निवारणार्थम् इत्यर्थः। राजपुरुषैः,—शुल्कापहरणं वारयितुं राजनियुक्तपुरुषैरिति भावः।

(व) राजेति।—राजपुरुषाणां—नगरपालानाम् इत्यर्थः, अनुपदं—पश्चात्, [पश्चादर्थेऽव्ययीभावः]।

(ग) व्याधिबाधितः,—रोगपीडितः। दायादसमूहैः,—दायं—धनपितृपितामहिस्वजनस्य धनम्, आददते—गृह्णन्ति ये ते दायादाः, तेषां समूहैः, पितृधनांशभागिभिः बान्धवादिभिरित्यर्थः, ("दायादौ सुतबान्धवौ" इत्यमरः)। उद्वेजितः,—उत्पीडितः।

(घ) भुञ्जाना—सेवमाना इत्यर्थः, ["भुजोऽनवने" (१।३।६६ पा०) इति आत्मनेपदविधानात् आनच्प्रत्ययः]।

(ङ) सत्त्वं—सद्धनम्। धर्मवत्सलः,—धर्मप्रियः, धार्मिक इत्यर्थः। तत्—प्राक् गृहीतं वस्तु। दापय—तस्मै दातुमादिशेत्यर्थः।

प्राह,—'देव ! मया न किञ्चित् गृहीतम्'। ब्राह्मण आह,—'यन्मया (ङ) त्रिवाचिकं स्वजीवितार्हं दत्तं, तद्देहि'। अथ सा राजभयात् तत्र एव 'त्रिवाचिकम् एव जीवितम् अनेन दत्तम्' इति (क) जल्पन्ती प्राणैर्विमुक्ता। ततः सविस्मयं राजा अब्रवीत्, —'किमेतत् ?' इति। ब्राह्मणेनापि पूर्ववृत्तान्तः सकलोऽपि (ख) तस्मै निवेदितः, प्राह च,—'यदर्थं स्वकुलं त्यक्तम्' इति। अतोऽहं ब्रवीमि,—'यदर्थं स्वकुलं त्यक्तम्' इत्यादि"।

वानरः पुनराह,—"साधु च इदमुपाख्यानकं श्रूयते,—

न किं ददाति किं कुर्यात् स्त्रीभिरभ्यर्थितो नरः ?।
अनङ्गा यत्र क्लेषन्ते शिरः पर्वणि मुण्डितम्" ॥ ४६ ॥

मकरः आह,—"कथमेतत् ?" वानरः कथयति,—

(ङ) त्रिवाचिकम्—यस्मै स्वजीवितार्हं ददामि ददामि ददामीति वारत्रयमुक्त्वा प्रतिश्रुतम् इत्यर्थः।

(क) जल्पन्ती—कथयन्ती। प्राणैः विमुक्ता—हता इत्यर्थः।

(ख) तस्मै—राज्ञे, निवेदितः,—ज्ञापितः [क्रियायोगात् चतुर्थी]।

प्रस्तावोपाख्यानवर्णितेन नन्दराजेन मुण्डनहेतुः पृष्टः तत्सचिवः राजानं प्रति तदुत्तरमाह, नेति।—स्त्रीभिः अभ्यर्थितः सन्नाभ्यर्थनः, नरः किं न ददात् ? किं वा न कुर्यात् ? सर्वमेव ददात्, सर्वमेव कुर्यात् इत्यर्थः। यत्र यस्मिन् देशे, यस्मात्सकाशाद्वा, आपतितायां वा, अनङ्गा अशरीरे, अपीति शेषः, क्लेशन्ते अत्यन्तं क्लेशवत्वं कुर्वन्ति, [राज्ञा सुप्तं मुण्डनमध्ये एतदनुचितमपि वरकचिना ज्योतिर्विद्याप्रभावात् तत् सर्वमवगतम्, एवञ्च तदाधिक्यमौद्धत्यं वधः नासङ्कतमित्यवेक्षणीयम्। अत्र यच्छब्दस्य साकाङ्क्षतया तच्छब्दः पदम् अध्याहार्यम्] तत्र तस्मिन् देशे, तस्मात्सकाशाद्वा समापतितायां वा, पर्वणि पर्वदिनेऽपि, शिरः मुण्डितं, नवेति शेषः ;—"चतुर्दश्यष्टमी चैव अमावस्याऽऽत्र पूर्णिमा। पर्वाण्येतानि राजेन्द्र ! रविसङ्क्रान्तिरेव च ॥" इति शास्त्रवचनात् 'चतुर्दश्यादीनि पञ्च पर्वाणि, तेषु मुण्डनस्य निषिद्धत्वात् कथं तस्मिन् एव दिने मुण्डनम्?' इति प्रश्ने उत्तरमिदमिति बोध्यम्। स्त्रिया यत्र गत्वा कार्यार्थाय किमपि न विज्ञाप्य भवाद्दशाः यथा रात्रौ क्लेशवत्तथार्तुः तथा सर्वदापि पर्वणि शिरः मुण्डितमिति वक्तुः तात्पर्यम् ॥ ४६ ॥

कथा ६ ।

"अस्ति (ग) प्रख्यातबलपौरुषः, अनेकनरेन्द्रवृन्दमुकुटमरीचिजालजटिलीकृतपादपीठः, अरच्छशाङ्कविरुचिनिर्मलयशाः, समुद्रपर्य्यन्तायाः पृथिव्या भर्त्ता नन्दो नाम राजा। तस्य (घ) सर्वशास्त्राधिगतसमस्ततत्त्वः सचिवो वररुचिर्नाम ; तस्य च प्रणयकलहेन जाया कुपिता। सा च (ङ) अतीव वल्लभा अनेकप्रकारं परितोष्यमाणाऽपि न प्रसीदति। ब्रवीति च भर्त्ता,—'भद्रे! येन प्रकारेण तुष्यसि, तं वद, निश्चितं करोमि'। ततः कथञ्चित् तया उक्तं—'यदि शिरो मुण्डयित्वा मम पादयोः निपतसि, तदा प्रसादाभिमुखी भवामि। तथाऽनुष्ठिते च सा प्रसन्ना आसीत्।

अथ नन्दस्य भार्य्याऽपि तथा एव कृष्टा प्रसाद्यमानाऽपि न तुष्यति। ततः तेन उक्तं,—'भद्रे! त्वया विना मुहूर्त्तमपि न जीवामि, पादयोः पतित्वा त्वां प्रसादयामि'। सा अब्रवीत्—'अहं तव मुखे (च) खलीनं प्रक्षिप्य पृष्ठे समारुह्य च त्वां

(ग) प्रख्यातेति—प्रख्यातं—प्रसिद्धं, बलं—सैन्यं, सामर्थ्यं वा, ("स्तोकसामर्थ्यसैन्येषु बलं ना काकतौरिषो." इत्यमरः) पौरुषं—पराक्रमश्च यस्य तथाभूतः। अनेकेति।—अनेकानां नरेन्द्राणां—राज्ञां, वृन्दं—समूहः, तस्य मुकुटानां—किरीटानां, मरीचिजालैः,—प्रभापुञ्जैः, जटिलीकृतं—प्रबलीकृतमिति यावत्, पादपीठं—चरणासनं यस्य तथोक्तः, प्रबलराजमण्डलमुकुटमणिरञ्जितचरणनिधानासनविशेष इत्यर्थः। अरदिति।—अरदि यः प्रभाङ्कः,—चन्द्रः, तस्य किरणवत् निर्मलं—धवलं, सुविशुद्धमित्यर्थः, यशः यस्य तादृशः। समुद्रपर्य्यन्तायाः पृथिव्याः,—सागरपरिच्छिन्नाया भूमेः, आ-समुद्राक्षितेः इत्यर्थः।

(घ) सर्वेति।—सर्वेषां शास्त्राणाम् अधिगतं—ज्ञातं, समस्तं तत्त्वं—यथार्थं, निगूढार्थं इत्यर्थः, येन सः।

(ङ) अतीव वल्लभा—अतिप्रेयसी।

(च) खलीनं—कविका, वल्गाधीनतार्थं मुखाभ्यन्तरे दीयमानः; "कविकाख"

धावयामि, धावितस्तु यदि अश्ववत् क्लेषसे, तदा प्रसन्ना भवामि'। राज्ञाऽपि तथा एव अनुष्ठितम्।

अथ प्रभातसमये सभायामुपविष्टस्य राज्ञः समीपे वररुचिः आयातः। तञ्च दृष्ट्वा राजा पप्रच्छ—'भो वररुचे! किं पर्वणि मुण्डितं शिरस्त्वया!!' सोऽब्रवीत्—

'न किं दद्यान्न किं कुर्य्यात् स्त्रीभिरभ्यर्थितो नरः?।
अनखा यत्र क्लेषन्ते शिरः पर्वणि मुण्डितम्॥ ४७॥

तत् भोः दुष्टमकर! त्वमपि नन्द-वररुचिवत् (छ) स्त्री-वश्यः, ततोऽभद्रः; आगतेन त्वया मां प्रति (ज) वधोपाय-प्रयासः प्रारब्धः, परं स्ववाग्दोषेण एव प्रकटीभूतः। अथवा साधु इदमुच्यते,—

आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः।
वकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम्॥ ४८॥

इति ख्यातः लौहखुरविशेष इत्यर्थः, ("कविका तु खलीनोऽस्त्री" इत्यमरः)। प्रक्षिप्य —स्थापयित्वा। धावयामि—द्रुतं चालयामि। क्लेषसे—लदसि, क्लेशवन्तं करोषि इत्यर्थः।

नेति।—पूर्वं व्याख्यातम्। अत्र वानरस्यायमाशयः,—ये खलु महाप्राज्ञा नन्दसदृशाः महान्तः नरपतयः वररुचिसदृशाः सुधियः मन्त्रिणश्च, तेऽपि कदाचित् स्त्रियाः वशं गताः विमुग्धाश्च सन्तः अकृत्यमपि साधयन्ति; रजन्यां मुद्राले तथा स्त्रीसन्निधौ रहसि स्वयंकृतं किमपि सुगुप्तं रचितुं नालं भवन्ति च, अतः भवादृशस्य क्षुद्रस्य स्त्रीपारतन्त्र्यं, तेन च मम वधप्रयासः, रहःकृतकापट्याभिप्रायप्रकाशनचा-पलमेव सूचयतीति॥ ४७॥

(छ) स्त्रीवश्यः,—भार्याधीनः, स्त्रैण इत्यर्थः।

(ज) वधोपायेति।—वधस्य उपायः,—साधनं, कौशलं वा, तस्मिन् प्रयासः,—तदनुष्ठानप्रयत्नः। प्रारब्धः,—प्रक्रान्तः। स्वेति।—स्वस्य—आत्मनः, वाग्दोषेण—वाचो दोषेणैव, प्रकटीभूतः,—प्रकाशतां गतः।

"जानन्नपि हि मेधावी बालवल्लोक आचरेत्" इत्युक्तेः, सर्वत्र सर्वार्थसिद्धिकारक-तया मौनमेवावश्यकमित्युपदिशति, स्वस्येति।—आत्मनः स्वस्य, मुखदोषेण

तथा च,—सुगुप्तं रक्ष्यमाणोऽपि दर्शयन् दारुणं वपुः।
व्याघ्रचर्मप्रतिच्छन्नो वाकृते रासभो हतः" ॥ ४८ ॥

मकर आह,—"कथमेतत् ?" वानरः कथयति,—

कथा ७।

"कस्मिंश्चित् (झ) अधिष्ठाने गुडपटो नाम रजकः प्रतिवसति स्म। तस्य च गर्दभः एकोऽस्ति, स च घासाभावात् अतिदुर्बलतां गतः। अथ तेन रजकेन अटव्यां परिभ्रमता मृतो व्याघ्रो दृष्टः, चिन्तितञ्च,—'अहो! शोभनम् आपतितम्!! अनेन व्याघ्रचर्मणा (ञ) प्रतिच्छाद्य रासभं रात्रौ यवक्षेत्रेषु उत्सृज्यामि, येन व्याघ्रं मत्वा समीपवर्त्तिनः क्षेत्रपाला एनं न निष्काशयिष्यन्ति'। तथा अनुष्ठिते रासभो यथेच्छया यवभक्षणं करोति, प्रत्यूषे भूयोऽपि रजकः स्वाश्रयं नयति। एवं

मौनविरुद्धवाचालतामप्रसूनेन दोषेणेत्यर्थः, मधुरभाषिलक्षणेनेति भावः, शुकसारिकाः शुकाः कीराः, तथा सारिकाः तदाख्याः पक्षिण्यश्च इत्यर्थः, ("मयना" इति वङ्गभाषा) बध्यन्ते संयम्यन्ते, पिञ्जरे शाकुनिकैः इति शेषः, बकास्तु तत्र न बध्यन्ते ; तेषां तद्दोषाभावात् इति भावः ; तस्मात् मौनं तूष्णीम्भावः, सर्वार्थसाधनं सर्वकार्यसिद्धिकरं, [सर्वे अर्थाः साध्यन्ते अनेनेति करणे ल्युट्] ; अतः मौनमेव अवलम्बनीयं, न तु वाचालता, तस्या बहुविपज्जनकत्वादिति भावः ॥ ४८ ॥

श्लोकैः दार्ष्टान्तिकमुपाख्यानविशेषं प्रकाशयति, सुगुप्तमिति।—व्याघ्रचर्मणा प्रतिच्छन्नः आवृतशरीरः, अत एव सुगुप्तं सुगूढं यथा तथा, रक्ष्यमाणः स्वाश्रितोऽपि, रजकेनेति शेषः, रासभः गर्दभः, दारुणं गर्दभोचितस्वभावेन अतिदुर्दान्तात् कठोरनिनादस्वरेण भयङ्करं, वपुः शरीरं, दर्शयन् प्रकटयन्, वाकृते वाग्व्यापारनिमित्तं, वचनहीनेषेति भावः, हतः विनाशितः, क्षेत्रस्वामिनेति शेषः ॥ ४८ ॥

(झ) अधिष्ठाने—नगरे। गुडपटः,—गुडाः,—निर्मक्षीकताः, शोधिताः इत्यर्थः, पटाः,—वस्त्राणि, अत्रेवास्तीति भावः, येन तथोक्ताः।

(ञ) प्रतिच्छाद्य—संवार्य्य, छादयित्वेति शेषः। यवक्षेत्रेषु—यवशस्यपूर्णभूमिषु। उत्सृज्यामि—मोक्ष्यामि। निष्काशयिष्यन्ति—ताडयित्वा दूरीकरिष्यन्ति।

गच्छता कालेन स रासभः (ट) पीवरतनुर्जातः, लक्षात् बन्धनस्थानमपि नीयते।

अथ अन्यस्मिन् अहनि स मदोद्धतो दूरात् रासभीशब्दम् अशृणोत्। तच्छ्रवणमात्रेण एव स्वयं शब्दायितुम् आरब्धः। अथ ते क्षेत्रपालाः 'रासभोऽयं व्याघ्रचर्मप्रतिच्छन्नः' इति ज्ञात्वा लगुडशरपाषाणप्रहारैः तं व्यापादितवन्तः। अतोऽहं ब्रवीमि, —'सुगुप्तं रक्ष्यमाणोऽपि' इत्यादि"।

अथ एवं तेन सह वदतो मकरस्य, जलचरेण एकेन आगत्य अभिहितं,—"भो मकर! त्वदीया भार्या अनशनोपविष्टा त्वयि (ठ) चिरयति प्रणयाभिमवाद्विपन्ना"। एवं तत् वज्रपात-सदृशवचनम् आकर्ण्य अतीव व्याकुलितहृदयः प्रलपितमेवं चकार,—"अहो! किमिदं सञ्जातं मे मन्दभाग्यस्य!! उक्तञ्च,—

माता यस्य गृहे नास्ति भार्या च प्रियवादिनी।
अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम्॥ ५०॥

तत् मित्र! क्षम्यतां, मया तेऽपराधः कृतः; सम्प्रति अहं तु स्त्रीवियोगात् (ड) वैश्वानरप्रवेशं करिष्यामि"। तत् श्रुत्वा

(ट) पीवरतनुः,—स्थूलदेहः, बन्धनस्थानं—बन्धनागारं, राज्ञो भक्षणापनयौग्यं गृहमित्यर्थः।

(ठ) चिरयति—विलम्बं कुर्वति सति। प्रणयाभिभवात्—प्रेमावमाननात्, अतिप्रेमभङ्गजनिततीव्रवेदनासहिष्णुतया इत्यर्थः। विपन्ना—मृता।

मातेति।—यस्य गृहे माता जननी, प्रियवादिनी हितमधुरभाषिणी, भार्या पत्नी च, नास्ति, तेन माङ्ग-पत्नीहीनेन जनेन इत्यर्थः, [तेन इति कर्तरि तृतीया, पक्षे तु "कृत्यानां कर्तरि वा" (२।३।७१ पा०) इत्यनेन षष्ठ्यपि भवति] अरण्यं गन्तव्यम्। कथं हि स्वजनरहितं सापदसङ्कुलमरण्यं गन्तुमुपदिश्यते इत्याशङ्क्याह, तस्य इयोरेतयोः कश्चित् विशेषो नास्तीत्याह, यतेति।—अरण्यं यथा गृहस्थ तथा, तस्य इति शेषः, युष्मदोर्निरभिमानत्वात्; तस्य भवनस्य वनकल्पतया दुःखमयं जनानाम् इत्यर्थः॥ ५०॥

(ड) वैश्वानरप्रवेशम्—अग्निप्रवेशम्।

वानरः प्रहसन् प्रोवाच,—"भोः ! ज्ञातं मया प्रथममेव यत्, त्वं स्त्रीवश्यः स्त्रीजितश्च, साम्प्रतञ्च (ढ) प्रत्ययः सञ्जातः। तत् मूढ ! आनन्देऽपि जाते त्वं विषादं गतः !! तादृग्भार्य्यायां मृतायाम् उत्सवं कर्त्तुं युज्यते। उक्तञ्च यतः,—

या भार्य्या दुष्टचारित्रा सततं कलहप्रिया।
भार्य्यारूपेण सा ज्ञेया विदग्धैर्दारुणा जरा ॥ ५१ ॥
तस्मात् सर्वप्रयत्नेन नामापि परिवर्जयेत्।
स्त्रीणामिह हि सर्वासां य इच्छेत् सुखमात्मनः ॥५२॥
यदन्तस्तत्र जिह्मायां यज्जिह्मायां न तद्दृढिः।
यद्धितं तन्न कुर्वन्ति विचित्रचरिताः स्त्रियः ॥ ५३ ॥

(ढ) प्रत्ययः,—विश्वासः, नूनं त्वं स्त्रीवश्यः स्त्रीजितश्च इत्याकारकः निश्चयः इत्यर्थः; प्राक् तु मे संशयः आसीत्, इदानीन्तु एवं दृष्ट्वा त्वं तथैवेति निश्चयः सञ्जातः इति भावः।

यैति।—या भार्य्या दुष्टं चारित्रं यस्याः तथाभूता दुश्चरित्रा, पापिष्ठा इत्यर्थः, सततं कलहप्रिया च अहेतुकमेव विवदितुमभिलषति इत्यर्थः, विदग्धैः पण्डितैः जनैः, सा भार्य्यारूपेण भार्य्यारूपतया, संस्थितेति शेषः, पत्नीव्यपदेशा इत्यर्थः, दारुणा भीषणा, जरा वार्द्धकं, सर्वथा शान्तिविघातकत्वात् स्वशरीरक्षयकरीति भावः, ज्ञेया वेदितव्या; भार्य्याकाराकारिता जरा एव सा, न तु तात्त्विकी पत्नी इति भावः॥ ५१॥

तस्मादिति।—तस्मादेतोः, इह संसारे, यः आत्मनः सुखम् आनन्दम्, इच्छेत्,स सर्वप्रयत्नेन सर्वप्रकारेणेत्यर्थः, विशेषचेष्टयेति यावत्, सर्वासामेव स्त्रीणां नामापि परिवर्जयेत् परित्यजेत्, हि निश्चये, का कथा सङ्गवासस्य इत्यधिकारार्थः; इह भुवि स्त्रीपरतन्त्राणां नास्ति मनागपि सुखमिति समुदिताशयः॥ ५२॥

यदिति।—स्त्रियः विचित्रचरिताः अद्भुतस्वभावसम्पन्नाः, भवन्तीति शेषः। तदेवोपपादयति, यदिति।—आसाम् अन्तः मनसि, यत्, विद्यते इति शेषः, जिह्मायां रचनायां, तत् न; जिह्मायां यत्, विद्यते इति शेषः, तत् बहिः बाह्ये, व्यवहारे इत्यर्थः, न प्रकाशं न ब्रूते इत्यर्थः; एता हि यत् हितं तत्र न कुर्वन्ति, हितबुद्धिरासां कदापि नोदेति, अतस्ता सर्वथैव परित्याज्या एता इति भावः॥५३॥

के नाम न विनश्यन्ति मिथ्याज्ञानात् नितम्बिनीम् ?।
रम्यां य उपसर्पन्ति दीपाभां शलभा यथा ॥ ५४ ॥
अन्तर्विषमया स्फोटा बहिरेव मनोरमाः।
गुञ्जाफलसमाकाराः स्त्रभावादेव योषितः ॥ ५५ ॥
ताडिता अपि दण्डेन शस्त्रैरपि विखण्डिताः।
न वशं योषितो यान्ति न दानैर्न च संस्तवैः ॥ ५६ ॥
आस्तां तावत् किमन्येन दौरात्म्येनेह योषिताम्।
विधृतं खोदरेणापि घ्नन्ति पुत्रं स्वकं क्षुधा!! ॥ ५७ ॥

के इति।—ये मोहोपहतचेतसः इति भावः, मिथ्याज्ञानात् बुद्धिविपर्ययात्, मोहवशादित्यर्थः, शलभाः पतङ्गाः, दीपाभां यथा ज्वालीकशिखामिव, नितम्बिनीं रमणीं, रम्याम् एवम्—मधुराकृतिम्, अन्यत्र—शोभनदर्शनां, युवतिं शेषः, उपसर्पन्ति सेवन्ते इत्यर्थः, तेषां के नाम न विनश्यन्ति ? विनाशं गच्छन्ति ? सर्व एव विनश्यन्ति इत्यर्थः ; शलभा यथा प्रदीप्तं रमणीयतरमालोकमवलोक्य तत्पतिता विनाशमुपयान्ति, सुखलाभाशया रमणीमुपगता अपि तथा इति निष्कर्षः ॥ ५४ ॥

अन्तरिति।—हि यतः, एता योषितः नार्यः, स्वभावादेव प्रकृत्यैव, अन्तर्विषमयाः विषकल्पोपमाः, [उपसर्जनत्वात् नेह ङीप्, "बहुव्रीहेरूधसो" इतिवत् बोध्यम्] बहिश्च मनोरमाः बहुदृश्यकारिण्यः, जघन्यविलासादिभिरेव नितरां चेतः मथ्नन्ति इति भावः, अत एव गुञ्जाफलैः सदृशः आकारो यासां तादृश्यः एव। गुञ्जाफलानि यथा बाह्यवर्णानि बहिरेव सुदृश्यानि, सेव्यमानानि तु विषवदनिष्टजनकानि भवन्ति, तथा नार्यः अपि बहिरेव रमणीयाः, सेव्यमानाः तु प्राणनाशिन्यः ; अतः खलनाजनस्य कदोपमीनखलसङ्गः सुधीभिः सर्वथैव हेय इति निष्कर्षः। पयोमुखविषकुम्भकल्पाः हि भवन्ति रमण्यः इति भावः ॥ ५५ ॥

ताडिता इति।—योषितः स्त्रियः, दण्डेन ताडिताः प्रहृता अपि, शस्त्रैः विखण्डिता विक्षतविग्रहा अपि, न, दानैर्न च, संस्तवैः सम्यक् स्तुतिभिः, आदरातिशयैरित्यर्थः, परिचयैर्वा, ("संस्तवः स्यात् परिचयः" इत्यमरः) न वशं यान्ति न आयत्ता भवन्ति ; अदम्या अवशीभूताश्च ताः सर्वथैवेति भावः ॥ ५६ ॥

आस्तामिति।—इह संसारे, योषितां अन्येन वर्ण्यमानादितरेणेत्यर्थः, दौरात्म्येन, वर्ण्यतेनेति शेषः, किम् ? अन्यत् दौरात्म्यं किमु वक्तव्यमिति भावः ; यतश्च

रूक्षायां स्नेहसद्भावं कठोरायां सुमार्दवम् ।
नीरसायां रसं बालो बालिकायां विकल्पयेत्" ॥ ५८ ॥

मकर आह,—"भो मित्र ! अस्तु एतत्, परं किं करोमि ? मम अनर्थहयमेतत् सञ्जातम्, एकः तावत् (ण) गृहभङ्गः, अपरः त्वद्विधेन मित्रेण सह चित्तविश्लेषः ; अथवा, भवति एवं दैवयोगात् । उक्तञ्च यतः,—

यादृशं मम पाण्डित्यं तादृशं द्विगुणं तव ।
नाभूज्जारो न भर्त्ता च किं निरीक्षसि नग्निके ! ?" ॥ ५९ ॥

वानर आह,—"कथमेतत् ?" मकरोऽब्रवीत्,—

आस्तां तावत् अन्यदीरात्मोपवर्णनं तिष्ठतु तावत्, एताः स्त्रीष्वेव निजजठरेण, विधृतं स्वकं निजं, पुत्रमपि कृपा क्रोधेन, घ्नन्ति नाशयन्ति ; तेष्वपि जीवितोपमेषु तासां वात्सल्यं नास्ति, अन्येषु का कथेति भावः ॥ ५७ ॥

रूक्षायामिति ।—बालः मूढमतिरेवेति भावः, बालिकायां स्त्रियामिति यावत्, रूक्षायां कर्कशत्वभावायां, स्नेहसद्भावं प्रणयभावं, तथा कठोरायां निष्ठुरायां, सुमार्दवम् अतिकोमलतां, तथा नीरसायां निरनुरागायाः, रसम् अनुरागम् ; रूक्षाऽपि स्नेहवती, कठोराऽपि कोमला, नीरसाऽपि सानुरागा इत्येवमित्यर्थः, विकल्पयेत् [वि-पूर्वात् कल्पतेः पचाद्यचि विकल्प इति पदात् तत्कृत्यादित्यर्थे णिचि णिङ् सिद्धम्] विरुद्धकल्पनां कुर्यात् इत्यर्थः ; विदग्धास्तु न तथा, ते तु तासु रूक्षासु कठोरासु नीरसासु च स्त्रीषु दूषयन्ति स्नेहमार्दवरसयोगो नास्तीति विभावयन्तीति भावः ॥ ५८ ॥

(ण) गृहभङ्गः,—गृहिणीविनाशः, "न गृहं गृहमित्याहुर्गृहिणी गृह-मुच्यते" इति आरण्यात् गृहशब्दोऽत्र गृहिणीपरः मन्तव्यः । चित्तविश्लेषः,—मनोभङ्गः ।

यादृशमिति ।—मम पाण्डित्यं [पण्डाशी: "अमन्तात् डः" (उणा० १ पा० ११३ सू०) इति डप्रत्यये पण्डा बुद्धिरित्यर्थः, सा अस्यास्तीति तारकादित्वादितच्प्रत्यये पण्डित इति रूपं सिद्धं, तस्य भावः पाण्डित्यम्] बुद्धिमत्त्वमित्यर्थः, यादृशं यद्विधं, तव, पाण्डित्यमिति शेषः, द्विगुणं द्विराहत्तं, तादृशं तद्विधं, जारः उपपतिः, न अभूत्, भर्त्ता पतिः, च न, अभूदिति पूर्वानुषङ्गः, जारभर्त्तारौ उभावपि हारितौ इत्यर्थः, हे नग्निके ! दृतावुक्तत्वात् दिगम्बरे ! किं निरीक्षसि ? किं पश्यसि ? [अत्र निरीक्षसे इत्यत्र साधुत्वेऽपि परस्मैपदं विवक्षितम्] ॥ ५९ ॥

कथा ८।

"कस्मिंश्चित् अधिष्ठाने (त) हालिकदम्पती प्रतिवसतः स्म। सा च हालिकभार्या पत्युर्वृद्धभावात् सदैव अन्यचित्ता न कथञ्चित् गृहे स्थैर्यम् आलम्बते, केवलं परपुरुषान् (थ) अन्वेषमाणा परिभ्रमति। अथ केनचित् परवित्तापहारकेण धूर्त्तेन सा लक्षिता, विजने प्रोक्ता च,—'सुभगे! मृतभार्योऽहं, त्वद्दर्शनेन स्मरपीड़ितश्च, तद्दीयतां मे रतिदक्षिणा' इति। ततः तया अभिहितं,—'भोः सुभग! यदि एवं, तदस्ति मे पत्युः प्रभूतं धनं, स च वृद्धत्वात् प्रचलितुमपि असमर्थः; ततः तद्धनम् आदाय अहमागच्छामि, येन त्वया सह अन्यत्र गत्वा यथेच्छया रतिसुखम् अनुभविष्यामि'। सोऽब्रवीत्,—(द) 'रोचते मह्यमपि एतत्; प्रत्यूषेऽत्र स्थाने शीघ्रमेव समागन्तव्यं, येन शुभतरं किञ्चित् नगरं गत्वा त्वया सह जीवलोकः सफलीक्रियते'। साऽपि 'तथा' इति प्रतिज्ञाय, प्रहसितवदना स्वगृहं गत्वा रात्रौ प्रसुप्ते भर्त्तरि, सर्वं वित्तम् आदाय, प्रत्यूषसमये तत्कथितस्थानम् (ध) उपाद्रवत्। धूर्त्तोऽपि तामग्रे विधाय दक्षिणां दिशम् आश्रित्य सत्वरगतिः प्रस्थितः।

एवं तयोः व्रजतोः योजनद्वयमात्रेण अग्रतः काचित् नदी समुपस्थिता। (न) तां दृष्ट्वा धूर्त्तः चिन्तयामास,—'किम् अहमनया यौवनप्रान्ते वर्त्तमानया करिष्यामि? किञ्च, कदाऽपि

(त) हालिकदम्पती—हलोपजीविनो स्त्रीपुंसौ, क्षयवयस्त्वाद्या च इत्यर्थः।

(थ) अन्वेषमाणा—अनुसन्दधाना, [अनुपूर्व-भ्वादात्मनेपदिनः 'एष'-धातोः कृदम्]।

(द) रोचते—रुचते, तथार्थं प्रस्तावः मम अनुमतं एवेत्यर्थः। शुभतरं—सत्वरमित्यर्थः। जीवलोकः,—संसारः इत्यर्थः, इह जगति जननं वा।

(ध) उपाद्रवत—धावितवती, पलायिष्ट इत्यर्थः।

(न) तां—नदीमित्यर्थः। यौवनप्रान्ते—यौवनसीमायां, प्रौढ़ावस्थायामित्यर्थः, वर्त्तमानया—स्थितया, विगतयौवनया इत्यर्थः, अनया—एतया हालिकस्त्रिया,

अस्या: पृष्ठत: कोऽपि समेष्यति, तत्रो महान् अनर्थ: स्यात्; तत् केवलमस्या वित्तम् आदाय गच्छामि' इति निश्चित्य ताम् उवाच,—'प्रिये! सुदुस्तरा इयं महानदी; तदहं (प) द्रव्यमात्रं पारे धृत्वा समागच्छामि, तत: त्वाम् एकाकिनीं स्वपृष्ठमारोप्य सुखेन उत्तारयिष्यामि'। सा प्राह,—'सुभग! एवं क्रियताम्' इत्युक्ता अशेषं वित्तं तस्मै समर्पयामास। अथ तेन अभिहितं,—'भद्रे! परिधानाच्छादनवस्त्रमपि समर्पय, येन जलमध्ये नि:शङ्का व्रजसि'। तथा अनुष्ठिते धूर्त्तो वित्तं वस्त्रयुगलञ्च आदाय (फ) यथाचिन्तितविषयं गत:। साऽपि (ब) कण्ठनिवेशितहस्तयुगला सोद्वेगा नदीपुलिनदेशे उपविष्टा यावत् तिष्ठति, तावत् काचित् शृगालिका मांसपिण्डगृहीतवदना तत्र आजगाम; आगत्य च यावत् पश्यति, तावत् नदीतीरे महान् मत्स्य: सलिलात् निष्क्रम्य बहि: स्थित: आस्ते; एतच्च दृष्ट्वा सा मांसपिण्डं समुत्सृज्य तं मत्स्यं प्रति उपाद्रवत्। अत्रान्तरे आकाशात् अवतीर्य कोऽपि गृध्र: तं मांसपिण्डमादाय पुन: खमुत्पपात; मत्स्योऽपि शृगालिकां दृष्ट्वा नद्यां प्रविवेश। सा शृगालिका व्यर्थश्रमा गृध्रम् अवलोकयन्ती तया नग्निकया सस्मितम् अभिहिता,—

चयितयौवनया एतया सार्द्धं सुरतसम्भोगे बहुशोऽसम्भोगसहमसुखमनुभवादिति भाव:। पश्चा: पृष्ठत:,—पश्चा: पश्चात्, एतानतुल्य इत्यर्थ:। अनर्थ:,—विपत्।

(प) द्रव्यमात्रं—केवलं धनं, ("द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु" इत्यमर:)। पारे—नद्या अपरतीरे, ("पारं परतटे प्राप्ते न स्त्री" इति मेदिनी)। धृत्वा—संस्थाप्य।

(फ) यथाचिन्तितविषयं—यथेप्सितदेशम्; ("विषयी गोचरे देशे तथा जनपदेऽपि च" इति मेदिनी)।

(ब) सोद्वेगेति।—लज्जया बधीजहयप्रच्छादनार्थं विपर्ययसम्भोगेन नवदेशविन्यस्तकरयुगेत्यर्थ:। उपाद्रवत्—अभावत।

'गृध्रेणापहृतं मांसं मत्स्योऽपि सलिलं गतः।
मत्स्यमांसपरिभ्रष्टे! किं निरीक्षसि जम्बुकि!?' ॥६०॥

तच्छ्रुत्वा शृगालिका तामपि (भ) पति-धन-जारपरिभ्रष्टां दृष्ट्वा सोपहासमाह,—

'यादृशं मम पाण्डित्यं तादृशं द्विगुणं तव।
नाभूज्जारो न भर्त्ता च किं निरीक्षसि नग्निके!?' ॥६१॥इति"।

एवं तस्य कथयतः पुनरन्येन जलचरेण आगत्य निवेदितं यत्,—"अहो! त्वदीयं गृहमपि अपरेण महामकरेण गृहीतम्"। तत् श्रुत्वा असौ अतिदुःखितमनाः तं गृहात् निःसारयितुं मनसि उपायं चिन्तयामास,—"अहो! पश्यतां मे (म) दैवोपहतत्वम्,—

मित्रं ह्यमित्रतां यातमपरं मे प्रिया मृता।
गृहमन्येन च व्याप्तं किमद्यापि भविष्यति!! ॥६२॥

अथवा युक्तमिदमुच्यते.—

क्षते प्रहारा निपतन्त्यभीक्ष्णम्
अन्नक्षये वर्द्धति जाठराग्निः।

गृध्रेणेति।—गृध्रेण मांसम् अपहृतं, मत्स्योऽपि सलिलं जलं, गतः प्रविष्टः, हे मत्स्यमांसपरिभ्रष्टे! मीनपललाभ्यां वञ्चिते! जम्बुकि! शृगालि! किं निरीक्षसि? अतिशोभात्र त्वमिदानीं द्राक्षामेव वञ्चिता इति तात्पर्यम्। [अद्यापि निरीक्षसे इत्यत्रैव साधुत्वं ज्ञेयम्] ॥ ६० ॥

(भ) पतीति।—पतिश्च धनानि च जारस्य तेभ्यः परिभ्रष्टा विच्युता ताम्।

यादृशमिति।—४८५ पृष्ठे प्राक् व्याख्यातम् ॥ ६१ ॥

(म) दैवोपहतत्वं—दुर्दैवग्रस्तत्वम्।

मित्रमिति।—मित्रं सुहृत्, वानरः इति यावत्, हि निश्चयेन, अमित्रतां यातम्, अपरम् अन्यत्, मे मम, प्रिया मृता; गृहञ्च अन्येन अपरेण, जलचरेणेति शेषः, व्याप्तम् आक्रान्तम्, अद्यापि अतः परमित्यर्थः, किं भविष्यति, तन्न जाने इति शेषः ॥ ६२ ॥

आपत्सु वैराणि समुद्भवन्ति
वामे विधौ सर्वमिदं नराणाम् ॥ ६३ ॥

तत् किं करोमि ? किमनेन सह युद्धं करोमि ? किंवा (य) साम्ना एव सम्बोध्य गृहात् निःसारयामि ? किंवा भेदं दानं वा करोमि ? अथवा अमुमेव वानरं मित्रं पृच्छामि ? उक्तञ्च,—यः पृष्ट्वा कुरुते कार्यं प्रष्टव्यान् स्वहितान् गुरून् ।
न तस्य जायते विघ्नः कस्मिंश्चिदपि कर्मणि" ॥६४॥

एवं सम्मधार्य्य भूयोऽपि तमेव जम्बूवृक्षम् आरूढं कपिम् अपृच्छत्,—"भो मित्र ! पश्य मे मन्दभाग्यतां यत्, सम्प्रति गृहमपि मे बलवत्तरेण मकरेण रुद्धम् ; तदहं त्वां (र) प्रष्टुम् अभ्यागतः, कथय, किं करोमि ? सामादीनाम् उपायानां मध्ये कस्य अत्र विषयः ?" स आह,—"भोः कृतघ्न ! पापचारिन् ! मया निषिद्धोऽपि किंभूयो माम् अनुसरसि ? नाहं

चते इति ।—वामे वक्रे, ("विधिर्विधाने दैवे च" इत्यमरः) वामे प्रतिकूले सति, नराणाम् इदं सर्वं, घटते इति शेषः ; तथा हि, चते चतस्थाने एव, अक्षीणां चततं, प्रहारा आघाताः, निपतन्ति भवन्ति, अन्नक्षये अन्नाभावे सति, जाठराग्निः उदरानलः, वर्द्धति वृद्धिं गच्छति, ["परस्मैपदमिच्छन्ति आत्मनेपदिनां क्वचित् । आत्मनेपदमिच्छन्ति परस्मैपदिनां क्वचित् ॥" इति महाजनवाक्यात् वर्द्धते इत्यस्य साधुत्वेऽपि अत्र परस्मैपद वैवाचकं ज्ञेयम्] तथा आपत्सु विपत्तिकालेष्वेव, वैराणि शत्रुताः, समुद्भवन्ति ; अहो ! विधिविडम्बितम् !! इति भावः । उक्तजातिः इन्द्रवज्रा ॥ ६३ ॥

(य) साम्ना—सामप्रयोगेण, मधुरवचसा इत्यर्थः । सम्बोध्य—आभाष्य इत्यर्थः । भेदम्—उपजापं, तस्य स्वपक्षीयैः सभेदकरणं तृतीयमुपायम् । दानम्—अर्थेन सन्तोषकरण द्वितीयोपायम् ।

य इति ।—यः जनः, प्रष्टव्यान् प्रष्टुमर्हान्, विपश्चित इत्यर्थः, स्वहितान् निजमङ्गलकामिनः, गुरून् महतः, स्वापेक्षया श्रेष्ठानित्यर्थः, जनान् इति शेषः, पृष्ट्वा कार्यं कुरुते, तेषामनुमत्या इति भावः, तस्य कस्मिंश्चिदपि कर्मणि विघ्नः न जायते ॥६४॥

(र) प्रष्टुं—जिज्ञासितुम् । विषयः,—अधिकार इत्यर्थः, सामादीनामुपायानां मध्ये अमुपायमधिकृत्य कार्यं साधयामीति भावः ।

तव मूर्खस्य उपदेशमपि दास्यामि"। तत् श्रुत्वा मकरः प्राह, —"भो मित्र! सापराधस्य मे पूर्वद्रोहम् अनुस्मृत्य हितोपदेशं देहि"। वानर आह,—"नाहं ते कथयिष्यामि, यत् भार्य्या-वाक्येन भवता अहं समुद्रे प्रक्षेप्तुं नीतः, तदेवं न युक्तम्; यद्यपि भार्य्या सर्वलोकादपि वल्लभा भवति, तथाऽपि न मित्राणि बान्धवाश्च भार्य्यावाक्येन समुद्रे प्रक्षिप्यन्ते। तन्मूर्ख! मूढत्वेन नाग्रः तव मया प्रागेव निवेदित आसीत्; यतः,—

सतां वचनमादिष्टं मदेन न करोति यः।
स विनाशमवाप्नोति घण्टोष्ट्र इव सत्वरम्" ॥ ६५ ॥

मकर आह,—"कथमेतत्?" सोऽब्रवीत्,—

कथा ९।

"कस्मिंश्चित् अधिष्ठाने उज्ज्वलको नाम रथकारः प्रति-वसति स्म। स च (ख) अतीव दारिद्र्योपहतः चिन्तितवान्, —'अहो! धिक् इयं दरिद्रता अस्मद्गृहे!! यतः सर्वोऽपि जनः स्वकर्मणा एव रतः तिष्ठति; अस्मदीयः पुनः

सतामिति।—यः मदेन गर्वेण, सतां साधूनां, विपरिक्षिप्तरित्यर्थः, हितैषिभिरिति यावत्, ("विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः" इत्यमरः) आदिष्टम् उपदिष्टं, वचनम् दुष्टं कर्म मा कुरु, क्रते विपत्तिः भवितुमर्हति इत्येवंरूपमित्यर्थः, न करोति न पालयति, स घण्टोष्ट्र इव घण्टया उपलक्षितः उष्ट्रः इव, घण्टा-वाहकोष्ट्र इवेत्यर्थः, सत्वरं शीघ्रं, विनाशं ध्वंसम्, अवाप्नोति लभते; घण्टोष्ट्रो यथा सजातीयानां सावधानताज्ञापकं हितवाक्यमवगणय्य एकाकी आगच्छन् सिंहेन विनष्टः अभूत्, तथा सदुपदेशमनङ्गीकृतां विनाशो भवति इति निष्कर्षः ॥६५॥

(ख) अतीवेति।—अतीव—अत्यर्थं, दारिद्र्योप—निर्धनतया, उपहतः,—पीडितः, आक्रान्तः इत्यर्थः। अहो इति।—अहो! धिक्—हा अतिकष्टमेतदित्यर्थः, इयं दरिद्रता—इदं दारिद्र्यम्, अस्मद्गृहे—मदीयभवने इत्यर्थः, [अत्र धिक्शब्दस्य निन्दा-र्थकत्वेऽपि तद्योगाभावात् न द्वितीया इत्यवधेयम्]। रतः,—आसक्तः, आयत्त इत्यर्थः।

(ब) व्यापारो न अत्र अधिष्ठाने अर्हति; यतः, सर्वलोकानां चिरन्तनाः चतुर्भूमिका गृहाः सन्ति; तत् किं मदीयेन रथकारत्वेन प्रयोजनम्?' इति चिन्तयित्वा देशात् निष्क्रान्तः यावत् किञ्चित् वनं गच्छति, तावत् (भ) गह्वराकारवनगहनमध्ये सूर्यास्तमनवेलायां स्वयूथात् भ्रष्टां प्रसववेदनया पीड्यमानां उष्ट्रीम् अपश्यत्। स च (ष) दासेरकयुक्ताम् उष्ट्रीं गृहीत्वा स्वस्थानाभिमुखः प्रस्थितः; गृहम् आसाद्य रज्जुं गृहीत्वा ताम् उष्ट्रिकां बबन्ध च। ततश्च तीक्ष्णं (स) परशुम् आदाय तस्याः कृते पल्लवानयनार्थं पर्वतकदेशे गतः। तत्र च नूतनानि कोमलानि बहूनि पल्लवानि छित्त्वा शिरसि समारोप्य तस्या अग्रे निचिक्षेप; तया च तानि शनैः शनैः भक्षितानि। पश्चात् पल्लवभक्षणप्रभावात् अहर्निशं पीवरतनुः उष्ट्रो सञ्जाता। सोऽपि दासेरको महान् उष्ट्रः सञ्जातः। ततः स नित्यमेव (ह) दुग्धं गृहीत्वा स्वकुटुम्बं

(ब) व्यापारः,—कार्यं, सुवधरङ्गनिरित्यर्थः। अधिष्ठाने—पुरे, नगरे इत्यर्थः, ("अधिष्ठानं पुरे चक्रे प्रभावेऽध्यासनेऽपि च" इति मेदिनी)। अर्हति—युज्यते। चिरन्तनाः,—प्राचीनाः, ["सार्वचिरंपाट्टे—" (४।३।२३ पा०) इत्यादिना ट्युट्युलौ तुट् च, ततः तुटः प्रागनादेशः] बहुकालिका इत्यर्थः। चतुर्भूमिकाः,—चतुःप्रकोष्ठाः; यद्वा,—चतस्रः भूमयः,—उपर्युपरि अवस्थिताः यत्रादेशा इत्यर्थः, यत्र तादृशाः "चतुरस्र" इति यस्य भाषा, गृहाः,—भवनानि।

(भ) गह्वरेति।—गह्वरस्य आकार इव आकारो यस्य तादृशं, सूर्यास्तिरश्चप्रवेशायोग्यमिति यावत्, यत् वनगहनं—निबिडं वनमित्यर्थः, तस्य मध्ये; ("...गह्वरं कुक्षिले विषु। नपुंसकं गह्वरे स्याद्गुहाजलनयोरपि॥" इति मेदिनी)।

(ष) दासेरकयुक्ताम्—खरयुक्तां, स्त्रियुष्ट्रसहितामित्यर्थः, ("दासेरकस्तु करभे दासीपुत्रे च धीवरे" इति मेदिनी)।

(स) परशुं—कुठारम्। तस्याः कृते—उष्ट्रिकायाः आहारार्थम् इत्यर्थः।

(ह) दुग्धम्, उष्ट्र्या इति शेषः।

परिपालयति। अथ रथकारेण बलभत्वात् दासेरकग्रीवायां महती घण्टा प्रतिबद्धा। पश्चात् रथकारो व्यचिन्तयत्,—'अहो! किमन्यैः (क) दुष्कृतकर्मभिः? यावत् मम एतस्मादेव उष्ट्रीपरिपालनात् अस्य कुटुम्बस्य भव्यं सञ्जातं, तत् किम् अन्येन व्यापारेण?' एवं विचिन्त्य गृहम् आगत्य प्रियामाह,—'भद्रे! (ख) समीचीनोऽयं व्यापारः; तव सम्मतिः चेत् कुतोऽपि धनिकात् किञ्चित् द्रव्यमादाय मया गुर्जरदेशे गन्तव्यं करभग्रहणाय; तावत् त्वया एतौ यत्नेन रक्षणीयौ, यावत् अहमपराम् उष्ट्रीं नीत्वा समागच्छामि'। ततश्च गुर्जरदेशं गत्वा उष्ट्रीं गृहीत्वा स्वगृहम् आगतः। किं बहुना? तेन तथा कृतं, यथा तस्य प्रचुरा उष्ट्राः (ग) करभाश्च सम्मिलिताः। ततस्तेन महत् उष्ट्रयूथं कृत्वा (घ) रक्षापुरुषो धृतः, तस्य वर्षं प्रति वृत्त्या करभम् एकं प्रयच्छति, अन्यच्च, अहर्निशं दुग्धपानं (ङ) तस्य निरूपितम्। एवं रथकारोऽपि नित्यमेव उष्ट्रीकरभव्यापारं कुर्वन् सुखेन तिष्ठति।

(क) दुष्कृतकर्मभिः,—दुःखसाध्यकर्मभिः। भव्यं—कुशलम्; [भूवादीः "अचो यत्" (३।१।९७ पा०) इति यत्प्रत्यये भव्यम्, आवश्यकार्थे तु ण्यति भाव्यं, भावे अनुपसर्गे सुप्युपपदे तु "भुवो भावे" (३।१।१०७ पा०) इति क्यप् च स्यात्। "भावुकं भविकं भव्यं कुशलं चेमनस्तियात्" इत्यमरः]। व्यापारेण—क्रियया।

(ख) समीचीनः,—साधुः। व्यापारः,—उपायः। द्रव्यमादाय—धनं गृहीत्वा। करभग्रहणाय—उष्ट्रापत्यग्रहणाय, ("करभो भविष्यदादिकनिष्ठानीष्टतनुते" इति मेदिनी)।

(ग) करभाः,—उष्ट्रापत्यानि। सम्मिलिताः,—सञ्जाताः।

(घ) रक्षापुरुषः,—रक्षकः। धृतः,—नियुक्तः। तस्य—रक्षापुरुषस्य। वर्षं प्रति—प्रतिवर्षं। वृत्त्या—वेतनेन। करभम्—उष्ट्रापत्यम्।

(ङ) तस्य—रक्षापुरुषस्य। निरूपितं—व्यवस्थापितम्।

अथ ते दासेरकाः (च)अधिष्ठानोपवने आहारार्थं गच्छन्ति, कोमलवल्लीः यथेच्छया भक्षयित्वा महति सरसि पानीयं पीत्वा सायन्तनसमये मन्दं मन्दं लोलया गृहम् आगच्छन्ति । स च (छ) पूर्वदासेरको मदातिरेकात् पृष्ठे आगत्य मिलति । ततस्तैः कलभैः अभिहितम्,—'अहो ! (ज) मन्दमतिः अयं दासेरको यथा यूथाद्भ्रष्टः पृष्ठे स्थित्वा घण्टां वादयन् व्रजति, यदि कस्यापि दुष्टसत्त्वस्य मुखे पतिष्यति, तन्नूनं मृत्युम् अवाप्स्यति' । अथैकदा तैः असकृदेव निषिद्धः सन् अपि स तद्वचनं कर्णेमदत्त्वैव मदातिरेकात् घण्टां वादयन् वनं प्रविष्टः । इत्थं तस्य तद्वनं (झ) गाहमानस्य कश्चित् सिंहः ततस्थः घण्टारवम् आकर्ण्य शब्दानुसारेण दृष्टिं निपात्य अवलोकयति यत्, उष्ट्रोदासेरकाणां यूथं गच्छति । (ञ) स पुनः प्रतिदिवसमिव पृष्ठे क्रीडां कुर्वन् चरंश्च वल्लरीः यावत् गच्छति, तावत् अन्ये दासेरकाः पानीयं पीत्वा स्वगृहे गताः । ततः स वनात् निष्क्रम्य दिशोऽवलोकयन् (ट) न कश्चित् मार्गं पश्यति

(च) अधिष्ठानोपवने—नगरसमीपस्थारण्ये । आहारार्थं—भक्षणार्थम् । कोमलवल्लीः,—सद्दूर्वाः । सायन्तनसमये—प्रदोषे, सायंकाले इत्यर्थः ।

(छ) पूर्वदासेरकः,—प्रथमानीतः उष्ट्रः । मदातिरेकात्—गर्वातिशयात्, प्रभोः बलमतयेति भावः । पृष्ठे—पश्चात्, अन्येषामागमनानन्तरमित्यर्थः ।

(ज) मन्दमतिः,—अल्पबुद्धिः । दुष्टसत्त्वस्य—हिंस्रजन्तोः । अवाप्स्यति—प्राप्स्यति ।

(झ) गाहमानस्य—प्रविशतः । अवलोकयति—पश्यति ।

(ञ) क्रीडां कुर्वन्—विविधविलासं प्रदर्शयन्नित्यर्थः । चरन्—भक्षयन् । वल्लरीः,—सद्वरीः ।

(ट) नेति ।—कश्चित् मार्गं न पश्यति—सायङ्काले अत्यल्पेन तिमिरोदयादिति भावः ।

वेत्ति वा। एवं युधाङ्गुष्टतया (ठ) वृक्षच्छद्यायमाने कियद्दूरं गच्छति च तस्मिन् तच्छब्दानुसारी सिंहः क्रमं ज्ञात्वा निभृतोऽग्रे व्यवस्थितः। ततः यावत् उष्ट्रः समीपम् आगतः, तावत् सिंहेन (ड) लम्फयित्वा ग्रीवायां गृहीतो मारितश्च। अतोऽहं ब्रवीमि,—'सतां वचनमादिष्टम्' इत्यादि"।

अथ तत् श्रुत्वा मकरः प्राह,—"भद्र!—

प्राहुः सप्तपदं मैत्रं जनाः शास्त्रविचक्षणाः।
मित्रताञ्च पुरस्कृत्य किञ्चिद्वक्ष्यामि तत् शृणु ॥ ६६ ॥
उपदेशप्रदातॄणां नराणां हितमिच्छताम्।
परस्मिन्निह लोके च व्यसनं नोपपद्यते ॥ ६७ ॥

तत् सर्वथा कृतघ्नस्यापि मे कुरु प्रसादम् उपदेशप्रदानेन।

(ठ) वृक्षच्छद्यायमाने—वृक्षैः सदृशानाटं कुर्वाणे। क्रमं—परिकरं, लक्ष्यार्थसुखमित्यर्थः। निभृतः,—निश्चलः। व्यवस्थितः,—स्थितौ।

(ड) लम्फयित्वा—उत्प्लुत्य इत्यर्थः, [रभि गत्यामिति भौवादिकस्य इदनुबन्धस्य रभधातोः णिचि क्त्वाप्रत्यये च रूपं, रभयोरभेदाच्च रभ्य लब्धमिति वेदितव्यम्; लम्फधातोस्तरबाहुलकात्]।

प्राहुरिति।—शास्त्रविचक्षणाः शास्त्रज्ञाः, जनाः, मैत्रं सख्यं, सप्तपदं ["सप्तपदीनं सख्यम्" (५।२।२२ पा०) इत्यनेन सख्यार्थे सप्तपदीनम् एव स्यात्; 'सप्तपदं' पदन्तु सुधीभिर्विचार्यम्, अथवा,—सप्तभिः पदैः सुप्तिङन्तलक्षणैः, उक्तादिभिः निर्वृत्तमित्यर्थे, सप्तानां पदानां समाहार इति विग्रहेण स्त्रियात् सप्तपदशब्दात् विवक्षया अपि रूपम्] सप्तसङ्ख्याकपदोच्चार्यपूर्वकमिति यावत्; "सख्यसप्तभावश्चपूर्वमाहुः" इति शास्त्रिदाख्यारणादिति भावः; प्राहुः कथयन्ति; त्वया सह मे बहवः संलापा जाताः, तस्मात् त्वं मे मित्रं नैव नासि सन्देहः, मित्रत्वस्य सप्तपदसाहचर्यसंलापनिष्पाद्यत्वादित्याशयः; अत एव मित्रतां वस्तुतां, प्राक् सञ्जातामिति भावः, पुरस्कृत्य पुरस्कृत्य, किञ्चित् वक्ष्यामि; यदिदानीं कथयिष्यामि तत्तु पूर्वसौहार्दानुरूप्येवेति भावः; तत् शृणु धारयेत्यर्थः ॥ ६६ ॥

उपदेशेति।—इह अस्मिन्, परस्मिंश्च लोके उपदेशप्रदातॄणां तथा हितमिच्छतां सदैवा सौम्यं वाञ्छतां, नराणां व्यसनं विपत्, न उपपद्यते न भवति ॥ ६७ ॥

उक्तञ्च,—उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ?।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते" ॥ ६८ ॥

तदाकर्ण्य वानरः प्राह—"भद्र ! यदि एवं, तर्हि तत्र गत्वा तेन सह युद्धं कुरु। उक्तञ्च,—

हतस्त्वं प्राप्स्यसि स्वर्गं जीवन् भद्रमथो यशः।
युध्यमानस्य ते भावि गुणद्वयमनुत्तमम् ॥ ६९ ॥
उत्तमं प्रणिपातेन शूरं भेदेन योजयेत्।
नीचमल्पप्रदानेन समशक्तिं पराक्रमैः" ॥ ७० ॥

मकरः प्राह,—"कथमेतत् ?" सोऽब्रवीत्,—

उपकारिष्विति।—यः उपकारिषु उपकारकेषु, साधुः सद्व्यवहारपरायणः, स्वोपकारमनपेक्ष्यैव हितैषी इति यावत्, तस्य साधुत्वे को गुणः ? का प्रशंसा ? न कोऽपि गुण इत्यर्थः ; यः अपकारिषु स्वानिष्टकारकेषु, जनेषु अपीति शेषः, साधुः सज्जनधर्मी, स्वोपकारमनपेक्ष्यैव केवलं हितसाधनतत्पर इति यावत्, सद्भिः सज्जनैः, स एव साधुः महानित्यर्थः, उच्यते कथ्यते। "सरघुनि! मुनिकल्पे ! तारयैः पुरुषवन्तं स तरति निजपुण्यैरेव किं ते महत्त्वम् ? यदि च मतिविहीनं तारयैः पापिनं मां तदिह तव महत्त्वं तन्महत्त्वं महत्त्वम्॥" इति श्रीकान्तरचनानुध्येयम् ॥ ६८ ॥

तेनेन सह दण्डरूपोपायावलम्बनस्य फलमाह, हतं इति।—त्वं हतः सन्, तेनेति शेषः, स्वर्गं प्राप्स्यसि, युद्धे मरणस्य स्वर्गसाधनत्वादिति भावः ; अथो पक्षान्तरे, जीवन् प्राक्तन्, भद्रं निर्विघ्नेति शेषः, भद्रं कल्याणं, यशः कीर्तिञ्च, प्राप्स्यसीत्यनुषङ्गः। "हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्" इति स्मरणादिति भावः। अतः युध्यमानस्य युद्धं कुर्वतः, ते तव, अनुत्तमम् अत्युत्कृष्टं, गुणद्वयम् उक्तशुभफल-युगलं, भावि भविष्यति इत्यर्थः ; तथा च समशक्तिना सह अन्तिमः उपायः विग्रह एव स्मरणीयः, न तु सामादितितयम् इति तात्पर्यम् ॥ ६९ ॥

सामादिषु च उपायेषु कुत्र कस्यावलम्बनीय इत्यपेक्षायां तत्प्रयोगस्थानं निर्दिशति, उत्तमनिति।—उत्तमं बलाधिकं, प्रणिपातेन साम्ना, शूरं बलवन्तं, भेदेन उपजापेन, योजयेत्, सह विच्छेदसाधनेन इत्यर्थः, नीचं क्षुद्रं प्रभुं, किन्तु बलासाध्यमिति भावः, अल्पप्रदानेन बलिविहीनेन, तथा समशक्तिं तुल्यबलं, पराक्रमैः शौर्यैः, शौर्यप्रदर्शने-

कथा १० ।

"आसीत् कस्मिंश्चित् वनोद्देशे महाचतुरको नाम शृगालः। तेन कदाचित् अरण्ये स्वयंमृतो गजः समासादितः। अथ शृगालः तस्य समन्तात् परिभ्रमति, परं कठिनां त्वचं भेत्तुं न शक्नोति। (ठ) अत्रावसरे इतश्चेतश्च विचरन् कश्चित् सिंहस्तत्रैव प्रदेशे समाययौ। अथ सिंहं समागतं दृष्ट्वा स (ण) क्षितितलविन्यस्तमौलिमण्डलः संयोजितकरयुगलः सविनयम् उवाच,—'स्वामिन्! त्वदीयोऽहं लागुडिकः स्थितः, त्वदर्थं गजामिमं रक्षामि; तत् एनं भक्षयतु स्वामी'। तं प्रणतं दृष्ट्वा सिंहः प्राह,—'भोः! न अहमन्येन हतं सत्त्वं कदाचिदपि भक्षयामि। उक्तञ्च,—

वनेऽपि सिंहा मृगमांसभक्ष्या
बुभुक्षिता नैव तृणं चरन्ति।

रित्यर्थः, योजयेत् सन्दध्यात्; तत्र तत्र सामादिचतुष्कं प्रयुज्य तात् तान् रिपून् विजयेत इति भावः॥ ७०॥

(ठ) अत्रावसरे—अस्मिन्नवकाशे, शृगालो यदा हतं गजं परितः परिभ्रमति, तदा इत्यर्थः।

(ण) क्षितीति।—क्षितितले—भूमौ, विन्यस्तं—पातितं, मौलिमण्डलं—मस्तकदेशः, ("मण्डलं परिधौ कोठे देशे हादग्रराजसु" इति मेदिनी) येन तथोक्तः, प्रणिपतन् इत्यर्थः। संयोजितेति।—संयोजितं करयुगलं येन तथोक्तः, बद्धाञ्जलिरित्यर्थः। लागुडिकः,—यष्टीकः, लगुडधारी इत्यर्थः, लगुडवाही सन् इति यावत्, [लगुडः प्रहरणमस्येति लगुडशब्दात् "प्रहरणम्" (४।४।१३० पा०) इति ठक्]।

वने इति।—वने मृगमांसभक्ष्याः मृगाणां मांसं भक्ष्यम् आहार्यं येषां तथोक्ताः, पशुमांसभोजिन इत्यर्थः, सिंहाः [सिनस्ति यः सः सिंहः, इदमुपन्यात् सिंह्-धातोः कप्रत्यये वर्णविपर्ययो निपातनात्] बुभुक्षिताः क्षुधिता अपि सन्तः, [भोक्तुमिच्छा बुभुक्षा, भुज् धातोः "धातोः कर्मणः—" (३।१।७ पा०) इति सन्, "अ प्रत्ययात्" (३।३।१०२ पा०) इति स्त्रियाम् अ-प्रत्ययः, ततः टाप्, बुभुक्षा एषां सञ्जाता; इत्यर्थे

एवं कुलीना व्यसनाभिभूता
न नीतिमार्गं परिलङ्घयन्ति ॥ ७१ ॥

तत् तव एव गजोऽयं मया (त) प्रसादीकृतः'। तत् श्रुत्वा शृगालः सानन्दमाह,—'युक्तमिदं स्वामिनो निजभृत्येषु। उक्तञ्च यतः,—

अन्यावस्थोऽपि महान् स्वामिगुणान् न जहाति तु शुद्धतया।
न श्वेतभावमुज्झति शङ्खः शिखिभुक्तिमुक्तोऽपि' ॥ ७२ ॥

अथ सिंहे गते कश्चित् व्याघ्रः समाययौ; तमपि दृष्ट्वा असौ व्यचिन्तयत्,—'अहो! एकस्मादपि दुरात्मा प्रणिपातेन (थ) अपवाहितः, तत् कथमिदानीम् एनम् अपवाहयिष्यामि? नूनं शूरोऽयं, न खलु भेदं विना साध्यो भविष्यति। उक्तञ्च यतः,—

"तदस्य सञ्जातं तारकादिभ्य इतच्" (५।२।३६ पा०) इति इतच्प्रत्यये च सिद्धम्] नैव तृणं चरन्ति भक्षयन्ति; मांसानामलाभेऽपि न हि ते तृणानि भक्षयित्वा सृष्टप्रकृतिका भवन्ति इति भावः; एवं कुलीनाः सत्कुलप्रसूता जनाः, महिमवन्त इत्यर्थः, व्यसनेन विपदा, अभिभूता आक्रान्ताः, अपीति शेषः, नीतिमार्गं न्याय्यपथमित्यर्थः, न परिलङ्घयन्ति न त्यजन्ति; अतोऽनेन विनष्टं जीवं भक्षयित्वा न स्वात्मानं क्षीणं करोमि इत्याशयः; "न हि सिंहः परोक्षेऽपि भीरुमिच्छति" इति साधीयः अर्तव्यम्। उपजातिः छन्दः ॥ ७१ ॥

(त) प्रसादीकृतः,—प्रसन्नत्वेन दत्तः।

अन्यावस्थ इति।—महान् जनः, अन्यावस्थः अपि चरमदशाक्रान्तोऽपि, दुर्दशायाश्चरमसीमां प्राप्तोऽपीत्यर्थः, शुद्धतया पवित्रतया, निर्दोषतया इत्यर्थः, उन्नतान्तःकरणतया इति यावत्, स्वामिगुणान् महतो गुणानित्यर्थः, प्रभुभावानिति यावत्, न तु जहाति नैव त्यजति; शङ्खः कम्बुः, शिखिनः अग्नेः, भुक्तिः दाहः, भक्षीकरणमिति भावः, तथा सुक्तोऽपि परित्यक्तोऽपि, अग्निना दाहानन्तरमपि इत्यर्थः, श्वेतभावं नजशौक्ल्यं, न उज्झति न त्यजति; "प्राप्तान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम्" इति भावः। अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः। आर्या छन्दः ॥७२॥

(थ) अपवाहितः,—दूरीकृतः। अपवाहयिष्यामि—अपसारयिष्यामि,

न यत्र शक्यते कर्तुं साम दानमथापि वा ।
भेदस्तत्र प्रयोक्तव्यो यतः स वधकारकः ॥ ७३ ॥

किञ्च, सर्वगुणसम्पन्नोऽपि भेदेन बध्यते । उक्तञ्च यतः,—

अन्तःस्थेन विरूढेन सुवृत्तेनातिचारुणा ।
अन्तर्भिन्नेन सम्राजं मौक्तिकेनापि बन्धनम्' ॥ ७४ ॥

एवं (द) सम्प्रधार्य्य तस्याभिमुखो भूत्वा गर्वात् उन्नतकन्धरः ससम्भ्रमम् उवाच,—'भाम ! कथम् अत्रभवान् मृत्युमुखे

दूरीकरिष्यामीत्यर्थः । शूरः,—बलवान् । भेदम्—उपजापम् । साध्यः,—प्रतीकार्य्यः ।

नेति ।—यत्र साम सान्त्वप्रयोगः, विनयव्यवहार इत्यर्थः, अथवा दानमपि कर्तुं न शक्यते, अनेरिति शेषः, तत्र भेदः उपजापः, प्रयोक्तव्यः विधेयः, यतः यस्मात्हेतोः, सः भेदः, वधकारकः हतीयः अनुपक्रीकरणोपायः ॥ ७३ ॥

अन्तर्भिन्ना एव हि महान्तः प्रतिपक्षस्य वशतामवाप्नुवन्ति इति भेदोपायमप्रकृतमौक्तिकवर्णनेन प्रशंसति, अन्तःस्थेनेति ।—अन्तःस्थेन अन्तर्गतेन, मुक्तिप्रभृतीनामिति भावः, अन्यत्र,—दुर्गाभ्यन्तरस्थेनेत्यर्थः ; सुवृत्तेन सुवर्तुलेन, अन्यत्र—सुचरित्रेण, नीतिपथावलम्बिना इत्यर्थः ; अतिचारुणा अतिमनोज्ञेन, अन्यत्र—लोकरञ्जकेन, विरूढेन विशेषतो रूढेन, चावरणान्तर्वर्त्तित्वादिति भावः ; अन्यत्र,—विरोधिना, प्रकृत्या विरोधवता इत्यर्थः, किन्तु अन्तर्भिन्नेन अन्तः मध्यस्थाने, भिन्नेन क्षतच्छिद्रेण ; अन्यत्र,—प्रकृतिभिः उपजापं नीतेन, अमात्यादिभिः भेदं प्रापितेनेत्यर्थः, मौक्तिकेन मुक्ताफलेन अपि, दुर्गमसमुद्रान्तर्वर्त्तिनाऽपि तथा कठिनावरणावृतेनापीति भावः, किमुत अपरेषामपिशब्दार्थः, बन्धनं सूत्रसंयमनत्वं, अनेरायत्तीकृतत्वं वा ; अन्यत्र,—प्रकृतिभिः बद्धत्वम्, उपजापत्वादिति भावः, सम्राजं सत्त्वं, प्रोक्तगुणयुक्तानि मौक्तिकानि यथा अन्तर्भिन्नान्येव बन्धनानि अवाप्नुवन्ति, एवमेव बहुसहायशालिनोऽपि वीरपुरुषाः भेदेन बध्यन्ते वश्यते इत्यर्थः ; आत्मीयविच्छेदो हि पराभूतिहेतुरिति भावः । अत्र समादप्रकृतात् मौक्तिकात् सनश्च प्रकृतस्य वैरिणो गम्यता इति अप्रकृतप्रशंसालङ्कारः ॥ ७४ ॥

(द) सम्प्रधार्य्य—निश्चित्य । गर्वात्—गर्वमाश्रित्य, निर्भयमिति यावत् । उन्नतकन्धरः,—उद्धतग्रीवः । ससम्भ्रमं—सत्वरं सत्वरं वा । अत्रभवान्—पूज्यः ।

प्रविष्टः ? येन एष गजः सिंहेन व्यापादितः। स च माम् एतद्रक्षणे नियुज्य नद्यां स्नानार्थं गतः। तेन च गच्छता मम समादिष्टं—'यदि कश्चिदिह व्याघ्रः समायाति, तत् त्वया सुगुप्तं मम आवेदनीयं, येन वनमिदं मया निर्व्याघ्रं कर्त्तव्यम्; यतः पूर्वं व्याघ्रेण एकेन मया व्यापादितो गजः (ध) शून्ये भक्षयित्वा उच्छिष्टतां नीतः; तद्दिनम् आरभ्य व्याघ्रान् प्रति प्रकुपितोऽस्मि' इति'। तत् श्रुत्वा व्याघ्रः (न) सन्त्रस्तः तमाह,—'भो भागिनेय ! देहि मे प्राणदक्षिणाम् !! त्वया तस्य अत्र चिराय आयातस्यापि मदीया काऽपि वार्त्ता न आख्येया' एवमभिधाय सत्वरं पलायाञ्चक्रे।

अथ गते व्याघ्रे तत्र कश्चित् (प) द्वीपी समायातः। तमपि दृष्ट्वा असौ व्यचिन्तयत्,—(फ) 'दृढ़दंष्ट्रोऽयं चित्रकः; तदस्य पार्श्वादस्य गजस्य यथा चर्मच्छेदो भवति तथा करोमि'। एवं निश्चित्य तमपि उवाच,—'भो भगिनीसुत ! किमिति चिरात् दृष्टोऽसि ? कथञ्च बुभुक्षित इव लक्ष्यसे ? तत् अतिथिरसि मे, एष गजः सिंहेन हतः तिष्ठति, अहञ्च अस्य (ब) तदादिष्टो रक्षपालः, परं तथाऽपि यावत् सिंहो न समायाति,

---

(ध) शून्ये—एकान्ते, मम अनुपस्थितदशायाम् इत्यर्थः।

(न) सन्त्रस्तः,—भीतः। प्राणदक्षिणां—जीवनदाननिमित्तं, आख्येया—कथनीया।

(प) द्वीपी—चित्रकाऽऽख्यव्याघ्रविशेष इत्यर्थः, ("शार्दूलद्वीपिनौ व्याघ्रे" इत्यमरः)।

(फ) दृढ़ेति।—दृढ़ा—कठिना, निश्चितेत्यर्थः, दंष्ट्रा—दन्तः यस्य तादृशः, कठिनमपि खलु अयं दंष्ट्रया भेत्तुं शक्नोति इति भावः। चित्रकः,—कर्बूरवर्णो व्याघ्रविशेषः।

(ब) तदादिष्टः,—तेनाघ्रातः। रक्षपालः,—रक्ष्यते इति रक्षः, [चर्मच्छल् प्रत्ययः] ततश्च रक्षं रक्षणीयं पाति रक्षतीति तथोक्तः, रक्षक इति यावत्।

तावत् अस्य गजस्य मांसं भक्षयित्वा छिद्रं कृत्वा द्रुततरं व्रज'। स आह,—'मातः! यदि एवं, तत्र कार्यं मे मांसाशनेन, यतो जीवन् नरो (भ) भद्राणि पश्यति।

उक्तञ्च,—यच्छक्यं ग्रसितुं ग्रस्तं ग्रस्तं परिणमेच्च यत्।

हितञ्च परिणामि यत् तदाद्यं भूतिमिच्छता ॥ ७५ ॥

तत् सर्वथा तदेव भुज्यते, यदेव (म) परिणमति; तत् अहम् इतोऽपयास्यामि'। शृगाल आह,—'भोः (य) अधीर! विश्रब्धो भूत्वा भक्षय त्वं, तस्य आगमनं दूरतोऽपि तव अहं निवेदयिष्यामि'। तथा अनुष्ठिते द्वीपिना (र) भिन्नां त्वचं विज्ञाय जम्बुकेन अभिहितं,—'भो भगिनीसुत! गम्यताम्!! गम्यताम्!! एष सिंहः समायाति'। तत् श्रुत्वा चित्रको दूरं (ल) प्रनष्टः। अथ यावदसौ (व) तद्वेदकृतद्वारेण किञ्चिन्मांसं भक्षयति, तावत् अतिसङ्कुद्धोऽपरः शृगालः समाययौ। अथ तम् आत्मतुल्यपराक्रमं दृष्ट्वा एनं श्लोकम् अपठत्,—

'उत्तमं प्रणिपातेन शूरं भेदेन योजयेत्।

नीचमल्पप्रदानेन समशक्तिं पराक्रमैः' ॥ ७६ ॥

(भ) भद्राणि—बहूनि मङ्गलानि।

यदिति।—श्लोकस्यास्य व्याख्या ४५४ पृष्ठे द्रष्टव्या ॥ ७५ ॥

(म) परिणमति—सुखेन पाकं गच्छति। इतः,—अस्मात् स्थानात्। अपयास्यामि—अपसरिष्यामि।

(य) अधीर!—कातर! भीत इत्यर्थः। विश्रब्धः,—निःशङ्कः।

(र) भिन्नां—छिन्नाम्। त्वचं—चर्म।

(ल) प्रनष्टः,—अदर्शनं गतः, पलायित इत्यर्थः। [द्वीपिनोऽपसारणमिदं "नीचमल्पप्रदानेन" इत्यस्य निदर्शनमिति बोद्धव्यम्]।

(व) तदिति।—तेन—द्वीपिना, भेदात्—दंष्ट्रया छेदनात्, कृतं यत् द्वारं—रन्ध्रमित्यर्थः, भक्षणोपायं इत्यर्थो वा, तेन।

उक्तञ्चेति।—४८५ पृष्ठे ७० सङ्ख्यकश्लोके व्याख्यातं प्राक् ॥ ७६ ॥

ततश्च (ग) तदभिमुखकृतप्रयाणः खट्टाभिः तं विदार्य्य दिशो भागं कृत्वा स्वयं सुखेन चिरकालं हस्तिमांसं बुभुजे।

एवं त्वमपि तं रिपुं स्वजातीयं युद्धेन परिभूय दिशो भागं कुरु, नो चेत्, पश्चात् (घ) बद्धमूलात् अस्मात् त्वमपि विनाशम् अवाप्स्यसि। उक्तञ्च यतः,—

सम्भाव्यं गोषु सम्पन्नं सम्भाव्यं ब्राह्मणे तपः।
सम्भाव्यं स्त्रीषु चापल्यं सम्भाव्यं ज्ञातितो भयम्॥ ७७॥

अपरञ्च,—सुभिक्षाणि विचित्राणि ग्रिथिलाः पौरयोषितः।
एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते" ॥ ७८॥

(ग) तदिति।—तस्य—प्रयाणस्य, अभिमुखे—सम्मुखे, तं प्रतीत्यर्थः, कृतं प्रयाणं—युद्धार्थं गमनं येन तथाभूतः, युद्धाय तदभिमुखं गच्छन् इत्यर्थः। तम्—अपरं प्रयाणम्। विदार्य्य—विदीर्णं कृत्वा, निहत्येत्यर्थः। दिशः,—कक्षुभः, [सम्बन्धे षष्ठी]। भागं—वण्टनम्, अंशमित्यर्थः, बलिरूपलेनेति भावः। कृत्वा—दत्त्वा इत्यर्थः, तस्य मांसं चतुर्दिक्षु विक्षिप्येति यावत्। चिरकालं—सुबहुदिनमित्यर्थः।

(घ) बद्धमूलात्—दीर्घकालाधिकारेण दृढसन्निविष्टादित्यर्थः। अस्मात्—जलचरात्।

सम्भाव्यमिति।—गोषु धेनुषु [गच्छतीति गौः, गम्धातोः "गमेर्डोः" (उणा० २ अध्या० ६७ सू०) इति डो.प्रत्ययः] सम्पन्नं, [सम्पूर्वकात् पद्धातोः भावे क्तः "रदाभ्यां निष्ठातो नः—" (८।२।४२ पा०) इति निष्ठातस्य दस्य च नकारः] ऐश्वर्य्याऽऽधायकत्वं, सम्पत्तिरित्यर्थः, सम्भाव्यं मन्तव्यं, गोषु तर्पितासु प्रचुरसम्पदागमः सम्भाव्यते, यतस्ता लक्ष्मीभूताः; यद्वा,—गोषु, वर्त्तमानासु इति शेषः, सम्पन्नं सम्पदयुक्तं, सम्भाव्यं, धनभूता एव गावः इति भावः, गोधनत्वादयुक्तेः। ब्राह्मणे तपः तपश्चरणं, सम्भाव्यं विश्वासनिति भावः; स्त्रीषु चापल्यं चाञ्चल्यं, सम्भाव्यं, स्त्रियश्चपला इति प्रसिद्धेरिति भावः; ज्ञातितः स्वजातीयात्, भयं सम्भाव्यम्; परस्परमुत्कर्षासहिष्णुत्वादिति भावः॥ ७७॥

सुभिक्षाणीति।—विविधानि, अन्नानि इति शेषः, सुभिक्षाणि अनायासलभ्यानि, विदेशे इति भावः; पौरयोषितः पुरस्त्रियः, ग्रिथिलाः अनवद्धिता इत्यर्थः, किन्तु विदेशस्य एको दोषः यत् स्वजातिः स्वैव जातिः जननं यस्य सः एकजातीयो लोक इत्यर्थः, विरुध्यते विरुद्धमाचरतीत्यर्थः; [विपूर्वकात् रुधादिक-

मकार आह,—"कथमेतत् ?" वानरोऽब्रवीत्,—

कथा ११ ।

"अस्ति कस्मिंश्चित् अधिष्ठाने चित्राङ्गो नाम (ख) सारमेयः। तत्र च चिरकालं (घ) दुर्भिक्षं पतितम्, अन्नाभावात् सारमेयादयो निष्कुलतां गन्तुम् आरब्धाः। अथ चित्राङ्गः (क) क्षुत्क्षामकण्ठः तद्भयात् देशान्तरं गतः। तत्र च कस्मिंश्चित् पुरे कस्यचित् (ङ) गृहमेधिनो गृहिण्याः प्रसादेन प्रतिदिनं गृहं प्रविश्य विविधान्नानि भक्षयन् परां तृप्तिं गच्छति ; परं तद्गृहात् बहिर्निष्क्रान्तोऽन्यैः मदोद्धतसारमेयैः सर्वदिक्षु परिवृत्य सर्वाङ्गं दंष्ट्राभिः विदार्यते। ततः तेन विचिन्तितम्,—'अहो ! वरं स्वदेशः, यत्र दुर्भिक्षेऽपि सुखेन स्थीयते, न च कोऽपि युद्धं करोति ; तत् तदेव स्वनगरं व्रजामि' इति अवधार्य स्वस्थानं प्रति जगाम।

अथ असौ देशान्तरात् समायातः सर्वैरपि स्वजनैः पृष्टः,—'भोः चित्राङ्ग ! कथय अस्माकं देशान्तरवार्त्ताम् ; कीदृक् देशः ? किं चेष्टितं लोकस्य ? कः आहारः ? कश्च व्यव-

---

ह्वध्धातोः "दिवादिभ्यः श्यन्" (३।१।६९ पा०) इति श्यन्] ; सजातजातयः हि अन्योऽन्यस्य अशनव्यसनादेः आपृच्छं न सहन्ते इति भावः ॥ ७८ ॥

(ख) सारमेयः,—कुक्कुरः।

(घ) दुर्भिक्षं—भिक्षाऽभावः, अन्नसङ्कटम् इत्यर्थः। निष्कुलतां—निर्गतं कुलं येषां तेषां भावः तत्ता तां, विनाशमित्यर्थः ; यथा,—अन्नाभावात् स्वदेशं परित्यज्य अन्योऽशनपेक्षनाशा यत्रेच्छितं देशं गन्तुं प्रवृत्तत्वात् वंशाक्षतान् इत्यर्थः।

(क) क्षुत्क्षामकण्ठः,—क्षुधया शुष्ककण्ठः। तद्भयात्—दुर्भिक्षभयात्।

(ङ) गृहमेधिनः,—गृहैः,—दारैः, मेधते—सङ्गच्छते यः स गृहमेधी तस्य, [गृहोपपदात् मेधधातोः विनिः] गृहस्थस्य इत्यर्थः। प्रसादेन—अनुग्रहेण। परिवृत्य —आवेष्य।

कारः तत्र ?' इति। स आह,—'किं कथ्यते विदेशस्थ (ग) स्वरूपविषयः।—

सुभिक्षाणि विचित्राणि शिथिलाः पौरयोषितः।
एको दोषो विदेशस्य स्वजातिर्यद्विरुध्यते' ॥७९॥ इति"।

सोऽपि मकरः तदुपदेशं श्रुत्वा ज्ञातमरणनिश्चयो वानरम् (घ) अनुज्ञाप्य स्वाश्रयं गतः। तत्र च तेन स्वगृहप्रविष्टेन (ङ) आततायिना सह विग्रहं ज्ञात्वा, दृढसत्त्वावष्टम्भनाच्च तं व्यापाद्य, स्वाश्रयञ्च लब्ध्वा सुखेन चिरकालम् अतिष्ठत्। साधु इदमुच्यते,—

अकृत्वा पौरुषं या श्रीः किं तयाऽपि सुभोग्यया ?।
ज्ञरन्नवः समश्नाति दैवादुपगतं क्षणम् ॥ ८० ॥

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे लब्धप्रणाशं नाम चतुर्थं तन्त्रम् ॥ ४ ॥

(ग) स्वरूपविषयः,—चेष्टाव्यवहारादिरूपः इत्यर्थः।

सुभिक्षाणीति।—५०१ पृष्ठे ७८ सङ्ख्याकश्लोके प्राक् व्याख्यातम् ॥ ७९ ॥

(घ) अनुज्ञाप्य—निवेद्य, वानरञ्च अनुज्ञप्तिं ग्राहयित्वेत्यर्थः।

(ङ) आततायिना—आततेन—प्रसारितेन शस्त्रादिना, वधितुं—पीडयितुं शीलमस्य तेन, [आततपूर्वकात् वधधातोः "सुप्यजातौ णिनिः—" (३।२।७८ पा०) इति णिनिः], अनिष्टकारिणा, वानरस्वामिरूपचेतनहरणात् अनुचा इत्यर्थः; "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च एते षट् आततायिनः॥" इति स्मरणात्। दृढेति।—दृढम्—उग्रं, यत् सत्त्वं—बलं, तस्य अवष्टम्भनात्—अवलम्बनात्।

अथ स्वाधिकाररक्षणे स्वमन्त्रिभिः विरोधिभिः सह सख्यसम्बन्धं प्रापयन्नाह-लब्धनाशमकुर्वद्भिः सत्पुरुषैः आकृतोदयं विग्रहः करणीयः इत्युपदिश्य चतुर्थं तन्त्रमुपसंहरति, अकृत्वेति।—पौरुषं पराक्रमम्, अकृत्वा या श्रीः सम्पत्, लभ्यते इति शेषः, सुभोग्यया [सुभुजधातोः ण्यति "भुजोः कुः दिग्वतोः" (३।३।५२ पा०) इति कुत्वं आदेशात् भोग्यमिति रूपम्; स्त्रियान्तु भोग्या इति। सुभजधातोः सम्भजनार्थत्वे तु "भोज्यं भक्ष्ये" (७।३।६९ पा०) इति निपातनात् भोज्यमित्येव भवति] ज्ञानाभावः

अथ पञ्चमं तन्त्रम् ।

अथ इदमारभ्यतेऽपरीक्षितकारकं नाम पञ्चमं तन्त्रम् । तस्य अयम् आदिमः श्लोकः,—

"कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् ।
तन्नरेण न कर्त्तव्यं नापितेनात्र यत् कृतम्" ॥ १ ॥

तद्यथा अनुश्रूयते,—

अस्ति दाक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरम् । तत्र ऋषिभद्रो नाम श्रेष्ठी प्रतिवसति स्म, तस्य च (क) धर्मार्थ-काममोक्षकर्माणि कुर्वतो विधिवशात् धनक्षयः सञ्जातः । ततः स विभवक्षयात् (ख) अपमानपरम्परया परं विषादं गतः, रात्रौ सुप्तः चिन्तितवान्,—"अहो ! धिक् इयं दरिद्रता !! उक्तञ्च,—

लभ्यया, अपि तया स्त्रिया, किम् ? न किमपि प्रयोजनमित्यर्थः ; "लघयन् खलु तेजसा जगत्र महानिच्छति भूतिमन्यतः" इति स्मरणात्, तद्वदिति भावः । अरडवः रड्डः गौः, रड्डोक्ष इत्यर्थः, ["गौरतद्धितलुकि" (५।४।५२ पा० इति टच् समासान्तः] दैवात् भाग्यवशात्, उपगतं प्राप्तं, तृणं खलयाति भक्षयति, तदास्वाद्य उपजीवति इत्यर्थः, [सम्पूर्वकादक्षधातोः "क्त्रादिभ्यः श्ना" (३।१।८१ पा०) इति श्नाप्रत्ययः] असौ तु स्वयं यष्टीतृणमक्षणमर्थतया तथा करोति इत्याशयः । परपौरुषलब्धभक्षणसन्तोषिणस्तु अस्थिहीनरड्डगवयस्तुल्या एव इति ध्वनिः ॥ ८० ॥

कुदृष्टमिति ।—यत्र संसारे, नापितेन केनचित् धूरकर्मिणा, कुदृष्टं सम्यगदृष्टं, कुपरिज्ञातम् अज्ञातगूढहृत्तान्तं, कुश्रुतं सम्यक्तया अनाकर्णितं, अनधिगताभिप्राय-मित्यर्थः, कुपरीक्षितं धीरतया सम्यगविवेचितम्, अक्षमोचितम् इत्यर्थः, यत् कर्म, कृतं, नरेण तत् तथाविधं कर्म, न कर्त्तव्यम् ॥ १ ॥

(क) धर्मेति ।—धर्मः,—इह परत्र च श्रेयःसाधनम्, अर्थः,—धनं, कामः, —कामना, दृप्सितलाभ इत्यर्थः, मोक्षः,—अपवर्गः, तेषां कर्माणि—तत्साधनोपाय-भूताः क्रियाः । धनक्षयः,—अर्थनाशः ।

(ख) अपमानपरम्परया—पुनःपुनरनादरलाभेनेत्यर्थः । सुप्तः,—श्रयितः, ("स्वाप; श्वयनविहृतयोः । स्वापांसुलासावनुप्राणे" इति मेदिनी) ।

शीलं शौचं क्षान्तिर्दाक्षिण्यं मधुरता कुले जन्म।
न विराजन्ति हि सर्वे वित्तविहीनस्य पुरुषस्य ॥ २ ॥
मानो वा दर्पो वा विज्ञानं विभ्रमः सुबुद्धिर्वा।
सर्वं प्रणश्यति समं वित्तविहीनो यदा पुरुषः ॥ ३ ॥
प्रतिदिवसं याति लयं वसन्तवाताहतेव शिशिरश्रीः।
बुद्धिर्बुद्धिमतामपि कुटुम्बभरचिन्तया सततम् ॥ ४ ॥
नश्यति विपुलमतेरपि बुद्धिः पुरुषस्य मन्दविभवस्य।
घृतलवणतैलतण्डुल-वस्त्रेन्धनचिन्तया सततम् ॥ ५ ॥

शीलमिति।—वित्तविहीनस्य वित्तेन विभवेन, विहीनस्य परित्यक्तस्य, निर्धनस्य इत्यर्थः, [विपूर्वकजहातेः क्तप्रत्यये "ओदितश्च" (८।२।४५ पा०) इति निष्ठातस्य नकारः] पुरुषस्य शीलं चरित्रं, शौचं बाह्याभ्यन्तरशुद्धिः, [शुचेर्भावः कर्म वा इत्यर्थे ऋषिवृष्यन्धकेभ्यः प्रतिषेधात् "इगन्ताच्च लघुपूर्वात्" (५।१।१२१ पा०) इति अण्प्रत्ययः] क्षान्तिः क्षमा, अपराधसहनम् इति यावत्, दाक्षिण्यं सारल्यम्, औदार्येणित्यर्थः, मधुरता मिष्टभाषिता, सौन्दर्यादिना मनोहारित्वं वा, तथा कुले जन्म कौलीन्यम्, आभिजात्यम् इत्यर्थः, एते सर्वे गुणा इति शेषः, न हि विराजन्ति नैव स्फुरन्ति; दरिद्रस्य सत्त्वोऽपि एते गुणाः धनाभावादेव सर्वैरनादृतत्वेन नैव विकाशं प्राप्नुवन्तीति भावः। आर्या वृत्तम् ॥ २ ॥

मान इति।—यदा पुरुषः वित्तविहीनः निर्धनः, स्यादिति शेषः, तदा मानो वा चित्तोन्नतिर्वा, यदा,—सम्मानं वा, दर्पो वा गर्वो वा, विज्ञानं विशेषज्ञानं, विभ्रमः विलासित्वं वा, सुबुद्धिः शोभना प्रज्ञा वा, एतत् सर्वं समं युगपत्, प्रणश्यति नाशं गच्छति। आर्या वृत्तम् ॥ ३ ॥

प्रतिदिवसमिति।—वसन्तवातेन मलयमरुता इति यावत्, आहता अभिभूता, शिशिरस्य तदाख्यस्य ऋतोः, श्रीरिव शोभेव, बुद्धिमतामपि, निर्धनानामिति भावः, बुद्धिः ज्ञानं, सततं कुटुम्बभरचिन्तया परिवारभरणभावनया, क्षयं क्षयं, याति, धनराहित्येनेति शेषः; वसन्तवायुना यथा शिशिरस्य श्रीभा विलुप्ता भवति, तथा धनाभावजचिन्तया बुद्धिरपि बुद्धिमतामिति निष्कर्षः। आर्या वृत्तम् ॥ ४ ॥

नश्यतीति।—विपुलमतेः महाबुद्धेरपि, मन्दविभवस्य निर्धनस्य, पुरुषस्य बुद्धिः ज्ञानं, सततं निरन्तरं, घृतलवणतैलतण्डुलवस्त्रेन्धनानां घृतं हविः, लवणं सैन्धवादिकं,

गगनमिव नष्टतारं शुष्कं सरः श्मशानमिव च रौद्रम्।
प्रियदर्शनमपि कृत्तं भवति च मूढं धनक्षीणस्य ॥ ६ ॥
न विभाव्यन्ते लघवो वित्तैर्हीनाः पुरोऽपि निवसन्तः।
सततं जातविनष्टाः पयसामिव बुद्बुदाः पयसि ॥ ७ ॥
सुकुलं कुशलं सुजनं विहाय कुलकुशलशीलविकलेऽपि।
आढ्ये कक्षान्तरादिव नित्यं रज्यन्ति जननिवहाः ॥८॥

तेषां तिलादिभवक्लेदद्रव्यं, तच्छुलं शालिषष्टिकादिसम्भूतमानाद्यं, वस्त्रं वसनम्, इत्यर्थः दारुकाष्ठं, तेषां चिन्तया भावनया, धनाभावतया कथं नित्यप्रयोजनीयान्यपि एतानि द्रव्याणि सङ्कलितव्यानीत्येवंरूपया इति यावत्, नश्यति विलुप्यति। आर्या इत्तम् ॥५॥

गगनमिति।—धनक्षीणस्य, क्षीणकस्येति शेषः, मूढं प्रियदर्शनमपि सुदर्शनमपि, नष्टाः तिरोहिताः, अदृश्या इत्यर्थः, तारा: नक्षत्राणि यस्मात् तथाविधं, विलीननक्षत्रमित्यर्थः, गगनमिव; शुष्कं जलहीनं, ["शुष् शोषणे" इति दैवादिकशुष्धातोः क्तप्रत्यये "शुषः कः" (८।२।५१ पा०) इति निष्ठातस्य ककारः] सरः तडाग इव; रौद्रं भीषणम्, अप्रीतिकरमिति यावत्, श्मशानमिव प्रवदाहस्थानमिव, च [श्मशानः शवाः शेरतेऽत्र इति श्मशानं, श्मशानपदात् शीधातोः आनच् ङिच्च, "श्मशब्देन शवः प्रोक्तः शानः तत्स्थानमुच्यते" इति निरुक्तेऽप्युक्तम्] कृत्तं कर्कशम्, अप्रियम् इत्यर्थः, विगतश्रीकम् इति यावत्, भवति। आर्या इत्तम् ॥ ६ ॥

नेति।—वित्तैः धनैः, हीनाः अत एव लघवः शुद्रत्वेन गण्या इति भावः, जना इति शेषः, सततं पुरः अग्रतः, निवसन्तोऽपि तिष्ठन्तोऽपि, पयसि जले, जाता एव प्रादुर्भूता एव, विनष्टाः लयं गताः, उत्पत्त्यनन्तरमेव विलीना इत्यर्थः, पयसां जलानां, बुद्बुदा इव जलविकारा इव, न विभाव्यन्ते सादरं न लक्ष्यन्ते, कैरपीति शेषः, असारत्वादिति भावः। आर्या इत्तम् ॥ ७ ॥

सुकुलमिति।—जननिवहाः लोकनिवहाः, सुकुलं सत्कुलोत्पन्नं, कुशलं कार्यदक्षं, विज्ञमित्यर्थः, ("प्रवीणे निपुणाभिज्ञ-विज्ञनिष्णातनिर्मिताः। वैशारिकः कृतमुखः कृती कुशल इत्यपि॥" इत्यमरः) सुजनं सत्पुरुषं, निर्धनमिति भावः, विहाय परित्यज्य, कुलकुशलशीलविकलेऽपि अकुलीने अकुशले दुःशीलेऽपि इत्यर्थः, आढ्ये धनिनि, ("इध्म आढ्यो धनी" इत्यमरः) कक्षान्तरादिव कक्षान्तरे इव, नित्यं सततं, रज्यन्ति अनुरक्ता भवन्ति इत्यर्थः, [दैवादिकात् अकर्मकरञ्जधातोः "दिवादिभ्यः श्यन्" (३।१।६९ पा०) इति श्यन्]। आर्या इत्तम् ॥ ८ ॥

विकलमिह पूर्वसुकृतं विद्यावन्तोऽपि कुलसमुद्भूताः।
यस्य यदा विभवः स्यात् तस्य तदा दासतां यान्ति ॥९॥
लघुरयमाह न लोकः कामं गर्जन्तमपि पतिं पयसाम्।
सर्वमलज्जाकरन्तु यत् कुर्वन्तीह परिपूर्णाः" ॥१०॥

एवं सम्प्रधार्य्य भूयोऽपि अचिन्तयत् यत्,—"अहम् अनयनं कृत्वा प्राणान् उत्सृजामि, किमनेन (ग) नो व्यर्थजीवितव्यसनेन !!" एवं निश्चयं कृत्वा सुप्तः।

विकलमिति।—इह संसारे, पूर्वसुकृतं प्राक्कृतः उपकारः, विकलं व्यर्थम्, अफलमित्यर्थः, न किमपि प्रत्युपकारसाधकमिति यावत्, भवेदिति मन्ये इति शेषः, यतः विद्यावन्तः विद्वांसः, कुलसमुद्भूताः सत्कुलीद्भवा अपि, जनाः इति शेषः, केनापि पूर्वसुकृतता इति भावः, वा कथा मूर्खाणां नीचवंशीयानां वा इत्यपेरर्थः; यस्य यदा विभवः सम्पत्, स्यात्, तदा तस्य अनुपकारकस्यापीति भावः, दासतां आनुगत्यमित्यर्थः, यान्ति गच्छन्ति; अकृतज्ञतया क्षयितधनं क्षोपकारिणमपि विहाय धनवन्तं सेवन्ते इति निष्कर्षः। आर्य्या छन्दम् ॥ ९ ॥

संसारेऽस्मिन् धनराहित्यमेव लाघववीजं, न तु ज्ञानकुलसामाजिकतादिगुणत्वमित्यभिप्रेत्याह, लघुरित्यादि।—लोकः जनः, कामं पर्य्याप्तं, यथेच्छमित्यर्थः, गर्जन्तमपि महान्तमपि, इदमत्यन्तपूर्णवाक्यप्रयोगपरमपीति भावः, [अनेन अयं अल्पःसारशून्य इति ध्वन्यते] पयसां पतिं समुद्रं, [रत्नाकरत्वात् धनिनम् इति ध्वनिः] अयं लघुः क्षुद्रः, इति न आह; धनवान् इयमाभाषी अपि लघुप्रकृतिरयमिति न लोकैरुपेक्ष्यते इति भावः; परिपूर्णाः धनवन्तः, इह संसारे, यत् कुर्वन्ति आर्य्यमनार्य्यं वा यत् विदधति, तत् सर्वं तु सर्वमेव, अलज्जाकरं तेषां लज्जां न जनयति इत्यर्थः, प्रत्युत श्लाघाकरमिति भावः; सुप्रचुरधनत्वात् रत्नाकरोपमाः धनिनः यदेव कुर्वन्ति, तदेव शोभते, धनमेवात्र सकलगुणाधानहेतुः इति निष्कर्षः। केचित् तु एवमपि व्याख्यानयन्ति,—लोकः ऐश्वर्यमदमत्तः इत्यर्थः, कामं गर्जन्तं पयसां पतिं समुद्रमपि, लघुरयं लघुवेगं, न आह? इति काकुः, अपि तु आहैव। अन्यत् समानम्। आर्य्या छन्दम् ॥ १० ॥

(ग) नः,—पञ्चाक्षरम्। व्यर्थेति।—व्यर्थेन—विफलेन, जीवितव्यसनेन—जीवनं प्रति मनस्तापेन इत्यर्थः, जीवनधारणरूपविपत्तिर्जीवारिर्येषां वा।

अथ तस्य स्वप्ने (घ) पद्मनिधिः क्षपणकरूपी दर्शनं दत्त्वा प्रोवाच,—"भोः श्रेष्ठिन्! मा त्वं वैराग्यं गच्छ; अहं पद्मनिधिः तव पूर्वपुरुषोपार्जितः, तदनेन एव रूपेण प्रातः त्वद्गृहम् आगमिष्यामि; ततः त्वया अहं लगुडप्रहारेण शिरसि ताडनीयः, येन कनकमयो भूत्वा अक्षयो भवामि"।

अथ प्रातः प्रबुद्धः सन् स्वप्नं स्मरन् एवं (ङ) चिन्ताचक्रम् आरूढः तिष्ठति यत्,—"अहो! सत्योऽयं स्वप्नः, किं वा असत्यो भविष्यति न ज्ञायते; अथवा नूनं मिथ्याऽनेन भाव्यं, यतोऽहं केवलं वित्तमेव चिन्तयामि। उक्तञ्च,—

व्याधितेन सशोकेन चिन्तायस्तेन जन्तुना।
कामार्त्तेनाथ मत्तेन दृष्टः स्वप्नो निरर्थकः" ॥ ११ ॥

एतस्मिन् अन्तरे तस्य भार्यया कयित् नापितः (च) पादप्रक्षालनाय आकृतः। अत्रान्तरे च यथानिर्दिष्टः क्षपणकः सहसा प्रादुर्बभूव। अथ स तमालोक्य प्रहृष्टमना (छ) आसन्नकाष्ठदण्डेन तं शिरसि अताडयत्, सोऽपि सुवर्णमयो भूत्वा तत्क्षणात् भूमौ निपतितः।

(घ) पद्मनिधिः,—पूर्वपुरुषैः अवज्ञानात् दारिद्र्यावज्ञया कृततपसा सन्तोषितः पद्माख्यः धनाधिष्ठैवविशेषः। क्षपणकरूपी—बौद्धसन्न्यासिवेशवान्। अनेन एव रूपेण—क्षपणकवेशेनैव।

(ङ) चिन्ताचक्रं—भावनाजालं, विविधचिन्ताम् इत्यर्थः; यद्वा,—चिन्तारूपं चक्रं—रथाङ्गं, चिन्तायाः चक्रवत् नियतावर्त्तनशीलत्वात् इति भावः।

व्याधितेनेति।—व्याधितेन रोगिणा, सशोकेन शोकार्त्तेन, चिन्तायस्तेन भावनाऽऽकुलेन, कामार्त्तेन कामपीडितेन, अथ मत्तेन धीरेण, उक्तञ्चेन वा, जन्तुना प्राणिना, मनुष्येणेति यावत्, दृष्टः स्वप्नः निद्रावस्थायां विषयविशेषानुभूतिः, निरर्थकः निष्फलः, न सत्यो भवति इत्यर्थः ॥ ११ ॥

(च) पादप्रक्षालनाय—पादशोधनाय, नखकर्त्तनगुल्फसंवाहनोदनादिपूर्वकचरणरञ्जनायेत्यर्थः।

(छ) आसन्नकाष्ठदण्डेन—निकटस्थदारुदण्डेन।

अथ श्रेष्ठी निभृतं स्वगृहमध्ये ज्ञात्वा नापितं सन्तोष्य प्रोवाच,—"तदेतत् धनं वस्त्राणि च मया दत्तानि गृहाण। भद्र! पुनः कस्यचित् न आख्येयोऽयं वृत्तान्तः"। नापितोऽपि स्वगृहं गत्वा अचिन्तयत्,—"नूनमेते सर्वेऽपि (ज) नग्नकाः शिरसि दग्धहताः काञ्चनमया भवन्ति, तदहमपि प्रातः प्रभूतानाहृत्य लगुडैः शिरसि हन्मि, येन प्रभूतं हाटकं मे भवति"। एवं चिन्तयतो महता कष्टेन निशा अतिचक्राम।

अथ प्रभाते अभ्युत्थाय बृहल्लगुडमेकं (झ) प्रगुणीकृत्य श्रमणकविहारं गत्वा, जिनेन्द्रस्य प्रदक्षिणत्रयं विधाय जानुभ्याम् अवनिं स्पृष्ट्वा, वल्कहारन्यस्तोत्तरीयाञ्चलः तारस्वरेण इमं श्लोकम् अपठत्,—

"जयन्ति ते जिना येषां केवलज्ञानशालिनाम्।
आ-जन्मनः स्मरोत्पत्तौ मानसेनोषरायितम्॥ १२॥

(ज) नग्नकाः,—श्रमणकाः, विवसनबौद्धसन्न्यासिश्रेष्ठाः इत्यर्थः। हाटकं—काञ्चनं, ("स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्।...। चामीकरं जातरूपं महारजतकाञ्चने॥—"इत्यमरः)।

(झ) प्रगुणीकृत्य—सज्जीकृत्य। श्रमणकविहारं—श्रमणकानाम् आश्रमं, सौगताश्रयमिति यावत्, ("विहारो भवने स्तम्बे सौधायां सुगताश्रये"इति मेदिनी)। जिनेन्द्रस्य—बौद्धप्रधानस्य, बौद्धगुरोरित्यर्थः, शाक्यसिंहस्य वा। वल्कहारेति।—वल्कस्य—मुखस्य, द्वारि—मुखविवरसमीपे, न्यस्तः,—अर्पितः, करात्यां धृतः इत्यर्थः, उत्तरीयाञ्चलः,—उत्तरीयवसनप्रान्तः येन तथाभूतः; मक्षिकादिजीवविनाशभयेन मुखद्वारं वस्त्रेण विधाय नमोपवसनं कुर्वन्ति बौद्धाः इति भिक्षुचर्यानाचारदर्शनादिति बोद्धव्यम्।

जयन्तीति।—केवलज्ञानशालिनां पूर्णज्ञानवतां, बौद्धशास्त्रोक्तसम्यग्ज्ञानलेशकेवलाख्यपञ्चमज्ञानवतामित्यर्थः, (यथोक्तं बौद्धशास्त्रे,—"यथाऽवस्थिततत्त्वानां सङ्क्षेपात् विस्तरेण वा। योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः॥"इति; तच्च ज्ञानं मतिश्रुतावधिमनःपर्यायकेवलभेदेन पञ्चविधम्; तदुक्तं तत्रैव,—"मतिश्रुतावधिमनःपर्यायकेवलानि ज्ञानम्" इति। तत्र तपःक्रियाविशेषात् यदयं सेवन्ते तपस्विनः, तज्ज्ञानलवज्ञानासंस्पृष्टं केवलमित्युच्यते) येषां बौद्धानां, मानसेन चित्तेन, आ-

अन्वय,—सा जिह्वा या जिनं स्तौति तच्चित्तं यज्जिने रतम्।
तावेव च करौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥१३॥
तथा च,—ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातापि नो रक्षसि ?।
मिथ्या कारुणिकोऽसि !! निर्घृणतरस्त्वत्तः कुतोऽन्यः पुमान् ?
सेर्ष्यं मारवधूभिरित्यभिहितो बौद्धो जिनः पातु वः" ॥१४॥

जन्मनः जन्म आरभ्य, ["पञ्चम्यपाङ्परिभिः" (२।३।१० पा०) इति सूत्रेण जन्मनः इत्यत्र पञ्चमी] अरोत्पत्तौ कामजनने, ऊषरायितम् ऊषरेणेव चारस्त्रक्तिकयेव, आचरितम्; [ऊषरशब्दात् "कर्तुः क्यङ् सलोपश्च" (३।१।११ पा०) इति क्यङ्, ततः ऊषरायधातोः भावे क्तप्रत्ययः], यथा चारभूमौ न किमपि बीजं प्ररोहति, तथा येषां चित्ते कदाऽपि कामाविर्भावो न भवतीति भावः, ते जिनाः बुद्धाः, जयन्ति सर्वोत्कर्षेण वर्तन्ताम्; [जिधातोः लटः प्रथमपुरुषबहुवचने रूपमिदम्, अत्र तु स्तौटि प्रयोगो नाशीर्लिङ्गः] ॥ १२ ॥

सेति।—या जिह्वेत्यर्थः, जिनं बुद्धं, स्तौति स्तवीति, तत्स्तोत्रमुच्चारयति इत्यर्थः, सा जिह्वा रसनापदवाच्या, ज्ञात्वा इति भावः; [जिधातोः "ग्रीवयङ्जिह्वायीवा-ऽऽप्पाशीवाः" (उणा० १ म पा० १५४ सू०) इति वनप्रत्ययान्तनिपातनात् जिह्वेति सिद्धम्] यत् चित्तमित्यर्थः, जिने बुद्धे, रतम् आसक्तं, तत् चित्तं चित्तमित्यर्थः; जिनचिन्ताविरहितं चित्तं न चित्तपदवाच्यमिति भावः; यौ च करौ स्तः, तौ जिनस्य, पूजाकरौ अर्चनारतौ, तौ एव च करौ श्लाघ्यौ प्रशस्यौ, नान्यौ करपदवाच्यौ इति भावः ॥ १३ ॥

अथ कस्यचित् बुद्धोपासकस्य नान्दीमाह, ध्यानेति।—ध्यानव्याजं समाधिरूपं कापट्यम्, अक्षीकसमाधिमित्यर्थः, उपेत्य आश्रित्य, त्वं कामानिति भावः, चिन्तयसि ? क्षणं चक्षुः उन्मील्य उन्मेष्य, अनङ्गशरातुरं कामबाणपीडितम्, इमं जनं कामाङ्गना-रूपमित्यर्थः, पश्य अवलोकय, त्रातापि रक्षणक्षमोऽपि इत्यर्थः, नो रक्षसि ? न त्रायसे ? सहनन्यघात: विपन्ना अज्ञानिति भावः; अतस्त्वं मिथ्याकारुणिकः कपटदयालुः, असि, त्वां यत नीचा: कारुणिकं वदन्ति, तदलीकमित्यर्थः; त्वत्तः [अत्र "अन्यारादि-तरर्ते—"(२।३।२९ पा०) इत्यादिना अन्यशब्दयोगे पञ्चमी, "पञ्चम्याऽऽसल्" (५।३।७ पा०) इत्यनेन तसिल्प्रत्ययः] अन्यः निर्घृणतरः अतिनिर्दयः, पुमान् कुतः ? न कुतोऽपि

एवं संस्तुत्य ततः प्रधानचपणकम् आसाद्य क्षितिनिहित-जानुचरणः,—"नमोऽस्तु, (अ) बन्धे" इति उच्चार्य लब्धधर्म-वृद्धाशीर्वादः सुखमालिकाऽनुग्रहलब्धव्रतादेश उत्तरीयनिबद्ध-ग्रन्थिः सप्रश्रयम् इदमाह,—"भगवन्! अद्य विहरणक्रिया समस्तमुनिसमेतेन अस्माकृहे कर्त्तव्या"। स आह,—"भोः! (ट) श्रावक! धर्मवृद्धोऽपि किमेवं वदसि? किं वयं ब्राह्मण-समानाः, यत् आमन्त्रणं करोषि!! वयं सदैव तत्-कालपरिचर्य्यया भ्रमन्तो भक्तिभाजं श्रावकम् अवलोक्य

इत्यर्थः, यौऽधान् एवम्भूतः दृष्टाऽपि न दयते, स अतिनिष्करुण एव इति भावः; मारवधूभिः कामाकुलाभिः, सैर्य्यम् दुर्यया सह वर्त्तमानं यया तया इत्यर्थः, इति एवम्, अभिहितः उक्तः, बौद्धः बुद्धदेवोपासकः, जिनः तदाख्यः चतुर्विंशतिसङ्ख्यानां जिनानामेकतमः बौद्धधर्मप्रवर्त्तकः कश्चित्; यद्वा,—बौद्धः बौद्धधर्मप्रवर्त्तकः, जिनः बुद्धदेवः, वः युष्मान्, पातु रक्षतु, संसारादिति शेषः। ["वः" इत्यत्र "नः" इत्यपि पाठः]। रतिसदृशीभिः अरवरिंशीभिरनिशमुपभोगार्थं स्वयं याचितोऽपि, जितेन्द्रियोऽसौ न तासां वशंगोऽभूदित्यनया रीत्या केनचिदुपासकेनाग्रे जिनदेवस्य स्तुतिः कृता, न तु निन्देति शेषम्। शार्दूलविक्रीडितं वृत्तम् ॥ १४ ॥

(अ) बन्धे—प्रणमामि। लब्धेति।—लब्धः,—तत्काल चपणकात् प्राप्त इत्यर्थः, धर्मवृद्धये,—धर्मवृद्धिभवनायेत्यर्थः, आशीर्वादः,—'धर्मे मतिस्ते भवतु' इत्येवनाशी-र्वचनमित्यर्थः, येन तथाभूतः। सुखेति।—सुखयति—सुखयति मानसं या तथा-विधा, या मालिका—पुष्पदाम, तया यः अनुग्रहः,—सप्रसादसमर्पणं, तेन लब्धः, —प्राप्तः, व्रते—व्रतचर्य्यायाम्, आदेशः,—आज्ञा येन तथाविधः, सयत्नं नियमं पाल-यितुमुपदिष्ट इत्यर्थः। उत्तरीयेति।—उत्तरीये निबद्धः ग्रन्थिः येन तथोक्तः, गलाधोनिबद्धोत्तरीयैकदेश इति भावः, बौद्धानां तादृशाचारत्वात्। सप्रश्रयं—सविनयम्। विहरणक्रिया—भिक्षापर्य्यटनव्यापार इत्यर्थः।

(ट) श्रावक!—धर्मभ्रातः! आमन्त्रणम्—आह्वानम्। तत्कालेति।—तत्काले—उपयुक्तकाले, या परिचर्य्या—सेवा, उपासनम् इति यावत्, तया, [परि-पूर्वकाच्चरधातोः "परिचर्य्यापरिसर्य्यानुगयाऽटाट्यानामुपसङ्ख्यानम्" इति वार्त्तिक-सूत्रेण यक्प्रत्यये निपातनात् सिद्धम्। "परिचर्या तु शुश्रूषा परिचर्य्याऽप्युपासनम्"

तस्य गृहे गच्छामः; तैन क्षुच्छादनभ्यर्थिताः तद्गृहे प्राणधारण-मात्राम् अशनक्रियां कुर्मः; तत् गम्यतां, नैवं भूयोऽपि वाच्यम्"। तत् श्रुत्वा नापितः,—"भगवन्! वेत्ति अहं युष्मद्धर्मम्; परं (ठ) भवतो बहुश्रावका आह्वयन्ति; साम्प्रतं पुनः पुस्तकाच्छादनयोग्यानि कर्पटानि बहुमूल्यानि प्रगुणी-कृतानि, तथा पुस्तकानां लेखनाय लेखकानाञ्च वित्तं सञ्चि-तम् आस्ते; तत् सर्वथा कालोचितं कार्यम्" इत्युक्त्वा स्वगृहं गतः। तत्र च गत्वा (ड) खादिरमयं लगुडं सज्जीकृत्य कपाटयुगलं द्वारे समाधाय सार्द्धप्रहरैकसमये भूयोऽपि विहार-

---

इत्यमरः]। अशनः,—पर्य्याप्तः। अभिप्रायं—भावम्। श्रावकं—कमपि शिष्यम् इत्यर्थः। क्षुच्छात्—क्षुधात्, अतिशयादित्यर्थः। अभ्यर्थिताः,—प्रार्थिताः। प्राणधारण-मात्रां—जीवनं यया मात्रया प्राणा रक्ष्यन्ते तदुपयोगिनीमिति भावः। अशनक्रियाम्—आहारम्।

(ठ) भवतः,—युष्मानित्यर्थः। पुस्तकाच्छादनयोग्यानि—पुस्तकबन्धनोप-युक्तानि। कर्पटानि—नक्षत्राः, जीर्णवस्त्राणीत्यर्थः, ["सनौ नक्षत्रकर्पटौ" इत्यमर-वचनात् "टीपचः" (लिङ्गानु० ३० सू० पा०) इत्यनेन च कर्पटशब्दस्य पुंसि व्यवस्थितेः पुंलिङ्गप्रयोगस्यौचित्येऽपि "कुटकूटकपटकपाटकर्पटनटनिकटकोट-कटानि नपुंसके च" (लिङ्गानु० ३२ सू० पा०) इत्यनेन पुनः पुंनपुंसकयोर्विधानात् नपुंसकत्वं सनीचीनमित्यवगन्तव्यम्]। प्रगुणीकृतानि—बहुलीकृतानि इत्यर्थः, सङ्गृहे सञ्जीति ग्रैवः। वित्तं—वेतनरूपं धनम् इत्यर्थः। कालेति।—कालोचितं—समया-नुरूपं, भवादृशाः विद्वांसः सर्वदा ग्रन्थरचनायां नियुक्ताः तिष्ठन्ति, न तु रचितग्रन्थानां लेखनाय अवकाशं लभन्ते, अतः लेखकेभ्यो धनं दत्त्वा लेखयितुमर्हन्ति; तत्कार्य्य-सम्पादनार्थं प्रचुरधनानां, लिखितग्रन्थानां सुष्ठ रक्षणाय उपयुक्तावकाशाच्च अत एव प्रयोजनलाभे, मया तु तत् सङ्कल्पितम्, एवञ्च तद्गृहाय गमनं न दोषावहमित्याशयः।

(ड) खादिरमयं—खदिरस्य विकारः इत्यर्थे खदिरशब्दात् ["पलाशादिभ्यो वा" (४।३।१४१ पा०) इति यञ्प्रत्ययः, "पालाशं खादिरम्" इति वामिका; ततश्च "नित्यं डित्समरादिभ्यः" (४।३।१४४ पा०) इति खादिरशब्दात् मयट्प्रत्ययः] खदिरदारुनिर्मितम्; अतिकठिनत्वात् प्रहारमात्रेण विनाशक्षमत्वयोग्यमिति भावः।

द्वारम् आश्रित्य सर्वान् क्रमेण निष्क्रामतो गुरुप्रार्थनया स्वगृहम् आनयत् । तेऽपि सर्वे कपटवित्तलोभेन भक्तियुक्तानपि परिचितश्रावकान् परित्यज्य प्रहृष्टमनसस्तस्य पृष्ठतो ययुः । अथवा साधु वदमुच्यते,—

एकाकी गृहसन्त्यक्तः पाणिपात्रो दिगम्बरः ।
सोऽपि संवाञ्छते लोके तृष्णया पश्य कौतुकम् ॥ १५ ॥
जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
चक्षुःश्रोत्रे च जीर्येते तृष्णैका तरुणायते ॥ १६ ॥

ततः परं गृहमध्ये तान् प्रवेश्य द्वारं निभृतं विधाय लगुडप्रहारैः शिरसि अताडयत् । तेऽपि ताड्यमाना एके मृताः अन्ये भिन्नमस्तकाः (ढ) फूत्कर्त्तुम् उपचक्रमिरे । अत्रान्तरे तम्

सञ्जीवित्य—सञ्जीव्य, स्वकार्य्यानुकूलं कृत्वा इत्यर्थः । निष्क्रामतः,—आश्रमात् निर्गच्छतः । गुरुप्रार्थनया—गुरुत्वा प्रार्थनया, आत्मायत्तेव इत्यर्थः ।

एकाकीति ।—यः एकाकी द्वितीयसहायहीनः, विरागीत्यर्थः, गृहसन्त्यक्तः गृहशून्यः, पाणिपात्रः पाणिरेव पात्रं यस्य सः, करपात्रसहाय इत्यर्थः, करपात्रे भोजनभोक्त इति भावः ; दिगम्बरः दिगेव अम्बरं वस्त्रं यस्य सः, नग्नः इत्यर्थः, सोऽपि लोके संसारे, तृष्णया धनलोभेन, संवाञ्छते लोक्यते, कौतुकम् आश्चर्य्यं, पश्य ; सर्वत्यागिनां दिगम्बराणामपि धनतृष्णा न अपैति, इत्यहो ! धनमाहात्म्यम् !! इति भावः ॥१५॥

जीर्यन्ते इति ।—जीर्यतः वृद्धस्य, केशाः जीर्यन्ते परिक्षयन्ति, [दैवादिकस्य क्षृधातोः परस्मैपदित्वेऽपि विवक्षावशादात्मनेपदमत्रोक्तम्] पक्षाः दन्ताः शीर्णतां व्रजन्तीति भावः ; तथा जीर्यतः जनस्य दन्ताः जीर्यन्ति शिथिलीभवन्ति इत्यर्थः, स्वस्थानात् पतन्तीति वा ; चक्षुःश्रोत्रे च दर्शनेन्द्रियं श्रवणेन्द्रियञ्च इत्यर्थः, जीर्येते निस्तेजसी भवतः इत्यर्थः, सर्वाण्येव जीर्णानि भवन्तीति भावः ; एका केवला, तृष्णा लालसा, तरुणायते नवीभवतीत्यर्थः ; [तदेव इव आचरति इत्यर्थे "कर्तुः क्यङ् सलोपश्च" (३।१।११ पा०) इति क्यङि सति रूपं] तृष्णा न जीर्य्यतीति भावः ॥१६॥

(ढ) फूत्कर्त्तुं—फूत्कृत्यव्ययशब्दं कृत्वा क्रन्दितुं, चीत्कर्त्तुमिति वा । उपचक्रमिरे—आरेभिरे, ["क्रीयाभ्यां सनवांभ्याम्" (१।३।४२ पा०) इति आत्मनेपदम्]।

(ग) आक्रन्दम् आकर्ण्य कोटरचपालेन अभिहितं,—"भो भोः ! किमयं महान् कोलाहलो नगरमध्ये ? तत् गम्यताम् !! गम्यताम् !!"। तेन सर्वैः तदादेशकारिभिः तत्सह वेगात् तद्गृहं गत्वा तावत् रुधिरप्लावितदेहाः पलायमानाः (त)नग्नका दृष्टाः। ततः तैः स नापितो बद्धः, हतशेषैः सह धर्माधिष्ठानं नीतश्च। (घ) तैः नापितः पृष्टः,—"भोः ! किमेतत् भवता कुकृत्यम् अनुष्ठितम् ?" स च,—"किं करोमि ? मया श्रेष्ठिमणिभद्रगृहे दृष्ट एवंविधो व्यतिकरः" इत्युक्ता सर्वं मणिभद्रवृत्तान्तं यथादृष्टम् अकथयत्। श्रुत्वा च तद्वचनं ते श्रेष्ठिनम् आहूय भणितवन्तः,—"भोः श्रेष्ठिन् ! किं त्वया कश्चित् क्षपणको व्यापादितः ?" ततः तेनापि सर्वः क्षपणकवृत्तान्तः (ङ) तेषां निवेदितः। अथ तैः अभिहितम्,—"अहो ! शूलम् आरोप्यताम् असौ दुष्टात्मा कुपरीक्षितकारी नापितः"। तथा अनुष्ठिते तैः अभिहितम्,—

"कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् ।
तत्त्वरेण न कर्त्तव्यं नापितेनात्र यत् कृतम् ॥ १७ ॥

अथवा साधु इदमुच्यते,—

(ग) आक्रन्दं—क्रन्दनं चीत्कारपूर्वकमाह्वानं वा, ("आक्रन्दः क्रन्दने ह्वाने मित्रदारक्षयुद्धयोः" इति मेदिनी)। कोटरचपालेन—दुर्गरक्षकप्रधानेन, प्रधानेन नगररक्षिणा इत्यर्थः। भो भोः ! इति अधीनरक्षिपुरुषाणामाह्वानवचनम्।

(त) नग्नकाः,—क्षपणकाः, ("नग्नो वन्दिक्षपणयोः पुंसि त्रिषु विवाससि" इति मेदिनी)।

(घ) तैः,—धर्माधिष्ठानस्थैः। व्यतिकरः,—व्यसनं, विपज्जनकं दुर्घटनमित्यर्थः, ("अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयोः" इति मेदिनी)।

(ङ) तेषां—धर्माधिष्ठानस्थानां, धर्माधिकरणिकेभ्य इत्यर्थः, [सम्बन्धविवक्षया षष्ठी]।

कुदृष्टमिति।—५०४ पृष्ठे व्याख्यातः प्राक् ॥ १७ ॥

अपरीक्ष्य न कर्त्तव्यं कर्त्तव्यं सुपरीक्षितम्।
पश्चाद्भवति सन्तापो ब्राह्मण्या नकुलार्थतः" ॥ १७ ॥

मणिभद्र आह,—"कथमेतत् ?" ते धर्माधिकारिणः प्रोचुः,—

कथा १।

"कस्मिंश्चित् अधिष्ठाने देवशर्मा नाम ब्राह्मणः प्रतिवसति स्म। तस्य भार्या सुतम् अजनयत्; तस्मिन् एव दिने काचित् नकुली तत्रैव नकुलमेकं प्रसूय मृता। अथ सा सुतवत्सला (ध) दारकवत् तमपि नकुलं स्तन्यदानाभ्यङ्गमर्दनादिभिः पुपोष, परं तस्य न विश्वसिति; अपत्यस्नेहस्य सर्वस्नेहातिरिक्ततया सततम् एवमाशङ्कते यत्—'कदाचित् एष स्वजातिदोषवशात् प्रियस्य स्वदारकस्य विकृतम् आचरिष्यति' इति।

अपरीक्ष्येति।—अपरीक्ष्य परीक्षामकृत्वा, न कर्त्तव्यं, किमपि कार्यमिति शेषः, सुपरीक्षितं सुष्ठु विवेचितमित्यर्थः, कार्यमिति शेषः, कर्त्तव्यं करणीयम्। परीक्षणमन्तरेण कार्यकरणे दृष्टान्तेन दोषमुपदर्शयति, पश्चादिति।—ब्राह्मण्या नकुलार्थतः नकुलनिमित्तं, [नकुलात् यथेति पाठान्तरम्, अर्थश्च सुगमः] पश्चात् चरमे इत्यर्थः, सम्यगपरीक्ष्य कार्यकरणानन्तरमिति यावत्, [अपरशब्दात् "पश्चात्" (५।३।२२ पा०) इत्यनेन आतिप्रत्ययः, पञ्चमाश्च निपात्यते। "पश्चात् प्रतीच्या चरमेऽप्यधिकारेऽपि दृश्यते" इति मेदिनी] सन्तापः अनुतापः, भवति जायते; यतो ब्राह्मण्या अपरीक्ष्य कार्यकरणे केवलमनुताप एव फलमनुभूतम्, अतः केषामपि तन्न विधेयमिति निष्कर्षः ॥ १८ ॥

(ध) दारकवत्—बालकवत्, स्वपुत्रवदित्यर्थः, ("दारको बालभेदको" इत्यमरः)। स्तन्येति।—स्तन्यं—स्तनदुग्धं, [स्तनादुत्पन्नमिति स्तनशब्दात् "प्रीतावयवात् यत्" (५।१।६ पा०) इति यत्] तस्य दानं, तथा अभ्यङ्गः,—तैलेषु तैलादिभिश्चर्षणं, मर्दनं—हस्तपादादीनां संवाहनं, तदादिभिः,—तत्प्रभृतिभिः; यद्वा —अभ्यज्यते अनेन इति अभ्यङ्गः,—तैलादिस्नेहः, तस्य मर्दनादिभिः।

'कुपुत्रोऽपि भवेत् पुंसां हृदयानन्दकारकः।
दुर्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी खलः ॥ १९ ॥
एवञ्च भाषते लोकश्चन्दनं किल शीतलम्।
पुत्रगात्रस्य संस्पर्शश्चन्दनादतिरिच्यते ॥ २० ॥
सौहृदस्य न वाञ्छन्ति जनकस्य हितस्य च।
लोकाः प्रपालकस्यापि यथा पुत्रस्य बन्धनम्' ॥ २१ ॥

अथ सा कदाचित् ग्रथ्यायां पुत्रं शाययित्वा जलकुम्भम् आदाय पतिमुवाच,—'ब्राह्मण! जलार्थम् अहं तडागं यामि, त्वया पुत्रोऽयं रक्षणीयः'। अथ तस्यां गतायां ब्राह्मणोऽपि

कुपुत्र इति।—दुर्विनीतः नितरामविनीत इत्यर्थः, कुरूपोऽपि कुत्सिताकारोऽपि, मूर्खोऽपि, व्यसनी द्यूतादासक्तः, खलो दुर्जनः, दुष्टश्च कुपुत्रोऽपि दुष्टः पुत्रोऽपि, पुंसां हृदयानन्दकारकः चित्तप्रीतिजनकः, भवेत्; अपत्यस्नेहस्य सर्वस्नेहोत्कर्षवत्त्वेन सर्वेषामेव दोषाणां विस्मारकत्वादिति भावः। पुत्रो यादृश एव भवतु, तस्य अनिष्टश्रवणेन चित्तं सदैव उद्विजते पित्रोः इति तात्पर्यम् ॥ १९ ॥

अपत्यस्नेहस्योत्कर्षं दर्शयितुमाह, एवमिति।—लोकः, चन्दनं शीतलं किल, एवञ्च भाषते कथयति, किन्तु पुत्रगात्रस्य संस्पर्शः चन्दनात् चन्दनलेपनादपि, अतिरिच्यते अतिरिक्तः शीतलो भवति इत्यर्थः; "आत्मा वै पुत्रनामासि" (कौषी० उप० २ अध्या० ११ मन्त्रः) इत्यादिना पुत्रस्य आत्माऽभिन्नत्वश्रुतेः, तत्र आत्मवोध स्नेहप्राचुर्योदयात् लोकः तथा मन्यते इति भावः ॥ २० ॥

सौहृदस्येति।—लोकाः मानवाः, सौहृदस्य मैत्र्याः, [सुहृदयशब्दात् युवादिपाठादञ्प्रत्यये सुहृदयस्य हृदादेशे च सौहार्दमित्येव भवति, सौहृदमिति तु "सौहृददौर्हृदयाभ्यामपि हृद्भावात्" (५ म अधि० २ अध्या० ८४ सू०) इति वामनसूत्रात् सिद्धम] जनकस्य पितुः, ("तातस्तु जनकः पिता" इत्यमरः) हितस्य यस्य कस्यचिदपि हितकारकस्य इत्यर्थः, तथा प्रपालकस्य प्रकर्षेण पालयितुरपि, तथा बन्धनं स्नेहपाशेन संयमनम्, अधीनतामित्यर्थः, [बध्यते इति भावे ल्युट्] न वाञ्छन्ति नाभिलषन्ति, यथा पुत्रस्य [पुत्रस्येति कर्तरि षष्ठी] बन्धनम् आत्मनः पुत्रस्नेहरूपपाशेन दृढतरं नियमनं, स्नेहपरवशतामित्यर्थः, वाञ्छन्ति; पुत्रस्य स्नेहबन्धनं दुर्भेद्यत्वात् दुष्छेद्यमिति भावः ॥ २१ ॥

'क्वचित् महात्मा दरिद्रेभ्यः बहुधनं वितरति' इति परम्परया श्रुतां वार्त्तामनुस्मृत्य अतिदरिद्रतया तमुद्देशं गन्तुमिच्छन्, विलम्बे गमनस्य च धनप्राप्तिप्रतिकूलं तर्कयन्, चिरं सुतनिर्विशेषलालितं नकुलं बालकरक्षणाय नियुज्य, (न) प्रतियत्नार्थं निर्गतः। अत्रान्तरे दैववशात् कृष्णसर्पो (प) बिलात् निष्क्रान्तः; नकुलोऽपि तं स्वभाववैरिणं मत्वा भ्रातुः रक्षणार्थं सर्पेण सह युद्ध्वा तं खण्डशः कृतवान्। ततोऽसौ रुधिरा-प्लावितवदनः सानन्दं (फ) स्वव्यापारप्रकाशनार्थं मातुः सम्मुखे गतः। माताऽपि तं रुधिरक्लिन्नमुखम् अवलोक्य,—'अनेन दुरात्मना मे दारको भक्षितः' इति शङ्कितचित्ता कोपात् तस्योपरि तं जलकुम्भं निक्षिप्य व्यापादितवती। ततः (ब) सम्भावितपुत्रवधशोकेन भूयोभूयः आत्मशिरो वक्षःस्थलञ्च ताडयितुम् आरब्धा। एवं सा नकुलं व्यापाद्य यावत् प्रलपन्ती द्रुतम् आगच्छति, तावत् (भ) गृहीतनिर्वापं समायान्तं ब्राह्मणं

(न) प्रतियत्नार्थं—द्विजेभ्यः यथाविधि दत्तधनस्वीकरणार्थं, ("प्रतियत्नः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे। द्विजेभ्यो विधिवद्देये तद्ग्रहे च गृहान्तरे॥" इति मेदिनी)।

(प) बिलात्—तस्मात् गर्त्तात्। स्वभाववैरिणम्—या-जन्मशत्रुम्। भ्रातुः,—ब्राह्मणस्य; एकमातृ: स्वव्यापादिना उभयोरेव शरीरस्य विवर्द्धितत्वात् परस्परं भ्रातृत्वं वेदितव्यम्।

(फ) स्वेति।—स्वस्य—आत्मनः, व्यापारस्य—कृष्णसर्पेण सह सङ्ग्रामं कृत्वा तं निहत्य च भ्रातुः प्राणरक्षणरूपस्य इत्यर्थः, प्रकाशनार्थं—ज्ञापनार्थम्। मातुः,—ब्राह्मण्या इत्यर्थः।

(ब) सम्भावितपुत्रवधशोकेन—आशङ्कितसुतनयविनाशदुःखेन। भूयोभूयः,—पुनः पुनः।

(भ) गृहीतनिर्वापं—गृहीतः,—स्वीकृतः, निर्वापः,—निर्वपणं, दानमित्यर्थः, ("स्यात् विहायितं दानमुत्सर्जनविसर्जने। प्रादेशनं निर्वपणम्" इत्यमरः) येन तथाभूतं, प्रतिगृहीतधनम् इत्यर्थः।

समीक्ष्य शोकसन्तप्तहृदया पुत्रस्य नकुलस्य च वार्त्तां सर्वामेव अवर्णयत्, किञ्चिद्दूरे व्यापाद्यमानं नकुलञ्चादर्शयत्। श्रुत्वैतत् ब्राह्मणोऽपि तया सह विलपन् गृहाभ्यन्तरमागत्य तत्र च सुतः तथैव सुप्तः तिष्ठतीति, पार्श्वे च कृष्णसर्पं खण्डशः कृतम् अवलोक्य, नकुलार्थं परं विषादमुपाययौ। ततः सा ब्राह्मणी सुप्तशरीरसुतमुखदर्शनात् प्रबलशोकावेगे प्रशमिते सति ब्राह्मणमाह,—'भो भो लोभात्मन्! अतिलोभाभिभूतेन त्वया न कृतं (म) मदृचः, तदनुभव साम्प्रतं पुत्रमृत्युदुःखवृक्षफलम्'। अथवा साधु इदमुच्यते,—

अतिलोभो न कर्त्तव्यो लोभं नैव परित्यजेत्।
अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके' ॥ २२ ॥

तत् श्रुत्वा ब्राह्मणः प्राह,—'कथमेतत्?' सा प्राह,—

कथा २।

'कस्मिंश्चित् अधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रतां गता वसन्ति स्म। ते च (य) दारिद्र्योपहताः परस्परं मन्त्रं चक्रुः,—'अहो! धिक् इयं दरिद्रता!! उक्तञ्च,—

(म) मदृचः,—"त्वया पुत्रोऽयं रक्षणीयः" इत्येवंरूपं निर्देशवाक्यम्। तत—तस्मात्, अनुभव—भुङ्क्ष्व। पुत्रेति।—पुत्रस्य—पुत्रतुल्यस्य, नकुलस्येत्यर्थः, मृत्युः,—निधनं, तदुद्भूतं यत् दुःखं, स एव वृक्षः तस्य फलम् अनुभवाऽऽतिशय्यरूपमिति भावः।

अतिलोभ इति।—अतिलोभः महती लालसा, न कर्त्तव्यः, लोभं ["लक्ष्मम्" इति पाठान्तरम्] नैव परित्यजेत् सर्वथा न उत्सृजेत् इत्यर्थः, यथासम्भवं कुर्यादिति भावः; अतिलोभेन अभिभूतस्य आक्रान्तस्य, कामस्य इति शेषः, मस्तके चक्रम् अस्त्रविशेषः, [क्रियतऽनेनेति चक्रं, क्रधातोः क-प्रत्ययः, इत्वञ्च। "चक्रः कोके पुमान् क्लीबं अस्त्रे वैन्यरथाङ्गयोः। राष्ट्रे दण्डान्तरे कुम्भकारोपकरणाङ्गयोः॥ लक्षावर्त्तेऽपि" इति मेदिनी]। भ्रमति घूर्णते, प्राक् एवञ्च अतिलुब्धस्य शिरसि संलग्नमपि नतश्चापस्य अपरस्य तादृशलुब्धस्य शिरः आरुह्य सप्तलादनिशं परिवर्त्तते इत्यर्थः, शिवत्वार्थं क्लेश एवास्य लुब्धदस्य इति भावः॥ २२॥

(य) दारिद्र्योपहताः,—दारिद्र्येण पीडिताः।

वरं वनं व्याघ्रगजादिसेवितं
जनेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम् ॥ २३ ॥

तथा च,—

स्वामी हेष्टि सुसेवितोऽपि सहसा प्रोज्झन्ति सद्बान्धवा
राजन्ते न गुणास्त्यजन्ति तनुजाः स्कारीभवन्त्यापदः ।
भार्य्या साधु सुवंशजाऽपि भजते नो यान्ति मित्राणि च
न्यायारोपितविक्रमाण्यपि नृणां येषां न हि स्याद्धनम् ॥२४॥

वरमिति ।—व्याघ्रगजादिसेवितं शार्दूलहस्त्यादिभिरध्युषितं, जनेन लोकेन, हीनं त्यक्तं, [हाधातोः कर्मणि क्तः "ओदितश्च" (८।२।४५ पा०) इति निष्ठातस्य नत्वम्] बहुभिः कण्टकैः आवृतम् आकीर्णं, वनम् अरण्यं, तथा तृणानि शय्या, तृणोपरि शयनम् इत्यर्थः, [शेरतऽस्यामिति शय्या शीङ्धातोः "सञ्ज्ञायां कनजनिषद—" (३।३।९९ पा०) इत्यादिना स्त्रियां भावे क्यप्] तथा परिधानवल्कलं तरुत्वग्वसनमपि, वरं मनाक् प्रियं, किन्तु बन्धूनां मध्ये धनहीनजीवितं न, वरमित्यनुषङ्गः ; सधनबान्धवसमीपे दरिद्रात्मीयानामादराभावज्ञातौ वासहनीयत्वादिति भावः । बंशस्थविलं वृत्तम् ॥ २३ ॥

निर्धनतायां दुःखहेतुतामुपपादयति, स्वामीति ।—येषां हि नृणां धनं वित्तं, न स्यात्, सुसेवितोऽपि सम्यगुपासितोऽपि, स्वामी प्रभुः, हेष्टि नाद्रियते इत्यर्थः, तानिति शेषः, कदाचित् सेवां त्यक्ष्यतीति भिया प्रभुः धनवन्तं भृत्यम् आद्रियते, न तु निर्धनमिति भावः ; यद्वा,—निर्धनत्वात् लुब्धचौरोऽयमिति मत्वा हेष्टि इति भावः ; सन्तः साधवः, अपि वान्धवाः ज्ञातयः, [बध्नाति मनः स्नेहेन इति बन्धधातोः उ-प्रत्यये बन्धुः, ततः स्वार्थे अण् । "बान्धवो ज्ञातिसुहृदोः"इति मेदिनी] सहसा कारणमात्रेऽपीत्यर्थः, प्रोज्झन्ति त्यजन्ति, नाद्रियन्ते इति भावः ; गुणाः दयादाक्षिण्यादयः, न राजन्ते न शोभन्ते, सत्कारयोग्या न भवन्तीत्यर्थः, तेषामिति शेषः ; तनुजाः पुत्राश्च, त्यजन्ति, तानिति शेषः ; आपदः स्कारीभवन्ति विस्तारं गच्छन्ति, [स्कारशब्दस्तु स्कृधातोः घञि "स्फुरतिस्फुलत्योः घञि" (८।२।४७ पा०) इति षत्वे आत्वम्] तेषामिति शेषः ; सुवंशजा सत्कुलोत्पन्नाऽपि, भार्य्या साधु सुष्ठु यथा तथा, नो भजते न सेवते, तानिति

शूरः सुरूपः सुभगश्च वाग्मी
शस्त्राणि शास्त्राणि विदाङ्करोतु ।
अर्थं विना नैव यशश्च मानं
प्राप्नोति मर्त्योऽत्र मनुष्यलोके ॥ २५ ॥
तानीन्द्रियाण्यविकलानि तदेव नाम
सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव
वाह्यः क्षणेन भवतीति विचित्रमेतत् ॥ २६ ॥

तत् गच्छामः कुत्रचित् अर्थाय' इति सम्मन्त्र्य स्वदेशं पुरञ्च

शेषः ; न्यायेन नीतिमार्गेण, आरोपिताः प्रवर्त्तिताः, विक्रमाः पुरुषकारा यैः ताडशानि अपि, न्यायपराङ्मुखौत्यर्थः, तेषां न्यायपरत्वेन धनेषु अश्रद्धाऽऽतिशय्याभावात् निर्धनमित्रत्यागासम्भवत्वेऽपि तत सम्भवतीति कष्टम् !! इति भावः ; निवाणि च यान्ति गच्छन्ति, नेत्र इति शेषः ; निर्धनता हि सर्वापदामास्पदमिति निष्कर्षः । आर्दूलविक्रीडितं वृत्तम् ॥ २४ ॥

शूर इति ।—अत्र मनुष्यलोके संसारे, मर्त्यः मानवः, [मर्त्ये भूलोके भवः मर्त्यः ; भवार्थे य-प्रत्ययः] शूरः बलवान्, सुरूपः रूपवान्, सुभगः सर्वलोकप्रियः, तथा वाग्मी वचनचतुरश्च, [वाक्शब्दात् "वाचो ग्मिनिः" (५।२।१२४ पा०) इति ग्मिनि-प्रत्ययः] भवतु इति शेषः, शस्त्राणि शास्त्राणि च विदाङ्करोतु वेत्तु, जानातु इत्यर्थः, किन्तु अर्थं विना ["पृथग्विनानानाभिः" (२।३।३२ पा०) इत्यादिना विनाशब्दयोगे द्वितीया, पक्षे तृतीयापञ्चम्यौ च:] यशः मानञ्च नैव प्राप्नोति ; धनमेव कीर्त्तिमानयोर्निदानमिति भावः । इन्द्रवज्रा वृत्तम् ॥ २५ ॥

नीचमपि दरिद्रः सन् एव इति वक्तुमाह, तानीति ।—तानि सम्प्रत्यक्षाणि यथा अवस्थितानीत्यर्थः, इन्द्रियाणि चक्षुरादीनि, अविकलानि अधुना दारिद्र्यग्रस्तानापि तथैव अविकृतानि, तिष्ठन्तीति शेषः, तदेव पूर्वकालिकमेव, नाम अभिधानं, वर्त्तते इति शेषः, नाम अपि न परिवर्त्तितमित्यर्थः, सा पूर्वकालिकीत्यर्थः, बुद्धिः ज्ञानमपि, अप्रतिहता अनुपहता, अविकृतैवेत्यर्थः, अस्तीति शेषः, तदेव च वचनं वाक्यम्, अस्तीति शेषः, किन्तु स एव पुरुषः अर्थोष्मणा धनजनिततेजसा, विरहितः हीनश्चेत्, क्षणेन अल्पेनैव समयेन, वाह्यः सन् एव बहिरवस्थानयोग्यः, सर्वैर्वा त्याज्य इत्यर्थः, [बहिर्भवः वाह्यः, बहिःशब्दात् अञ् टिलोपश्च । "वाह्यः" इत्यत्र "अस्य:"

स्वसुहृत्सहितं बान्धवयुतं गृहञ्च परित्यज्य प्रस्थिताः। अथवा साधु इदमुच्यते,—

सत्यं परित्यजति मुञ्चति बन्धुवर्गं
शीघ्रं विहाय जननीमपि जन्मभूमिम्।
सन्त्यज्य गच्छति विदेशमभीष्टलोकं
चिन्ताकुलीकृतमतिः पुरुषोऽत्र लोके ॥ २७ ॥

एवं क्रमेण गच्छन्तः (र) अवन्तीं प्राप्ताः। तत्र (ल) सिप्राजले कृतस्नाना महाकालं प्रणम्य यावत् निर्गच्छन्ति, तावत् भैरवानन्दो नाम योगी सम्मुखो बभूव। ततस्तं ब्राह्मणोचितविधिना (व) सम्भाव्य तेनैव सह तस्य मठं जग्मुः। अथ तेन ते पृष्टाः,—'कुतो भवन्तः समायाताः? क्व यास्यथ? किं प्रयोजनम्?' ततः तैः अभिहितं,—'वयं (श) सिद्धियात्रिकाः, तत्र यास्यामः, यत्र धनाप्तिः मृत्युर्वा भविष्यति, इत्येव अस्माकं निश्चयः। उक्तञ्च,—

इति पाठे—अन्यः अपरविध एव] भवति, इत्येतत् विचित्रम् आश्चर्यम्; धनिनो विकलेन्द्रिया अङ्गवृद्धयः पक्षपातिषो यदेव भवन्तु सर्वत्र समादियन्ते, न तु अविकलेन्द्रिययासाक्षीत्याधियः प्रियंवदाः ख्यातनामानोऽपि चार्थितधना इति निष्कर्षः। दारिद्र्यादोषो गुणराशिनाशी इति हृदयम्। वसन्ततिलकं वृत्तम् ॥ २६ ॥

सत्यमिति।—अत्र लोके संसारे, पुरुषः दरिद्र इति यावत्, चिन्तया अर्थार्जनमिति भावः, आकुलीकृता मतिर्यस्य तादृशः सन्, सत्यम् ऋतं, परित्यजति, मिथ्यासाक्ष्यादिकं ददातीति भावः, बन्धुवर्गं ज्ञातिसमूहं, सुहृत्समूहं वा, मुञ्चति त्यजति, तथा जननीं मातरं, जन्मभूमिमपि स्वदेशमपि, विहाय त्यक्त्वा, अभीष्टलोकं वाञ्छितजनं, प्रियजनमित्यर्थः, सन्त्यज्य उत्सृज्य च, शीघ्रं विदेशं गच्छति। वसन्ततिलकं वृत्तम्॥२७॥

(र) अवन्तीं—तदाख्यां नगरीम्।

(ल) सिप्राजले—सिप्रा नाम तत्रत्या नदी, तस्या जले। "शिप्रा" इत्यपि। महाकालं—तदाख्यं तत्रत्यशिवमूर्त्तिभेदम् इत्यर्थः।

(व) सम्भाव्य—समाहृत्य, पूजयित्वा इत्यर्थः। मठम्—आश्रमम्।

(श) सिद्धीति।—सिद्धये—कार्य्यसिद्धिनिमित्तं, यात्रा—गमनं प्रयोजनमेषां तादृशाः, [इति ठक्]। धनाप्तिः,—धनार्जनम्। निश्चयः,—दृढ़प्रतिज्ञा।

दुष्प्राप्याणि बहूनि च लभ्यन्ते वाञ्छितानि द्रविणानि ।
अवसरतुलिताभिरलं तनुभिः साहसिकपुरुषाणाम् ॥२८॥

तथा च,—पतति कदाचिन्नभसः खाते पातालतोऽपि जलमेति ।
दैवमचिन्त्यं बलवद्बलवान् ननु पुरुषकारोऽपि ॥ २९ ॥
अभिमतसिद्धिरशेषा भवति हि पुरुषस्य पुरुषकारेण ।
दैवमिति यदपि कथयसि पुरुषगुणः सोऽप्यदृष्टाख्यः ॥३०॥
भयमतुलं गुरुलोकात्तृणमिव तुलयन्ति साधुसाहसिकाः ।
'प्राणानङ्गुलमेतच्चरितं चरितं ह्युदाराणाम् ॥ ३१ ॥'

दुष्प्राप्याणीति ।—साहसिकपुरुषाणाम् अध्यवसायिनां नराणाम्, अवसरे यथासमये, साहसप्रदर्शनोपयुक्तकाले इत्यर्थः, तुलिताभिः सदृशीकृताभिः, कृततुल्यनाभिरित्यर्थः, दृढाङ्गो मे तनुः, कथमङ्गनीदृशं कर्म कर्तुं न शक्नोमि ? इत्येवं विविच्य चेष्टिताभिः इति यावत्, तनुभिः शरीरैः, दुष्प्राप्याणि दुर्लभानि, बहूनि वाञ्छितानि च द्रविणानि धनानि, अलं यथेष्टं, लभ्यन्ते । आर्या छन्दः ॥ २८ ॥

पततीति ।—नभसः आकाशात्, कदाचित् न तु सर्वदा इति भावः, जलं पतति, दैवानुकम्पयेति भावः, खाते पुष्करिण्यादौ, पातालतः पातालात्, भूगर्भादित्यर्थः, अपि, जलमित्यनुषङ्गः, एति उत्तिष्ठति इत्यर्थः, खननादिरूपपौरुषेयेति भावः, दैवम् अचिन्त्यम् अभावनीयं, दर्शनायोग्यतयेति भावः, अत एव बलवत्; पुरुषकारः अपि पौरुषमपि, बलवान् ननु बलवान् एव ; दैवस्य पुरुषकारसाध्यत्वेन "एवं पुरुषकारेण विना दैवं न सिध्यति" इति स्मरणादिति भावः । नभोदेशात् जलवर्षणस्य दैवाधीनतया अनियतत्वं, किन्तु पुरुषप्रयत्नरूपपुरुषकारजन्यतादिना च तत् शीघ्रमपि सिध्यति, किञ्च खननादिपुरुषव्यापारसाध्ये पुष्करिण्यादौ दैवाऽनुकूल्यं विनैव पातालादपि जलमुत्तिष्ठति, अतो दैवस्य बलवत्त्वेऽपि पुरुषकारस्यापि बलवत्त्वमिति निष्कर्षः । आर्या छन्दः ॥२९॥

अभिमतेति ।—पुरुषकारेण हि पुरुषप्रयत्नेनैव, पुरुषस्य अशेषा निखिला, अभिमतसिद्धिः इष्टलाभः, भवति, यदपि यत्, दैवमिति कथयसि, सोऽपि अदृष्टाऽऽख्यः अदृष्टापरनामा, पुरुषस्य गुणः ; प्राक्तन सुकृतं दुष्कृतं हि अदृष्टं, तच्च पुरुषप्रयत्नसाध्यमिति तस्य पुरुषगुणत्वमिति भावः । आर्या छन्दः ॥ ३० ॥

भयमिति ।—साधुसाहसिकाः साधौ सत्कार्ये, साहसिकाः साहसवन्तः, आयाससाध्यसत्कार्ये उद्यता इत्यर्थः, [साहसे प्रवृत्तः इति ठक्] जना इति शेषः, गुरु-

क्लेशस्याङ्कमदत्त्वा सुखमेव सुखानि नेह लभ्यन्ते।
मधुभिन्मथनाऽऽयस्तैरास्थिष्यति बाहुभिर्लक्ष्मीम् ॥ ३२ ॥
तस्य कथं न चला स्यात् पत्नी विष्णोर्नृसिंहकस्यापि ?।
मासांश्चतुरो निद्रां यः सेवति जलगतः सततम् ॥ ३३ ॥
दुरधिगमः परभागो यावत् पुरुषेण साहसं न कृतम्।
जयति तुलामधिरूढो भास्वानिह जलदपटलानि ॥ ३४ ॥

लोकात् पूजाऽङ्गनात्, अतुलम् अतिशयं, भयं, तथा प्राणान् निजजीवितमपि, दृष्ममिव तुलयन्ति अवगणयन्ति, जीवनसङ्कटे सत्यामपि प्रहृष्टा महान्तः गुरुजनेभ्यः प्रतिकूलताचरणादिभयं तथा प्राणनाशभयमपि तुच्छीकृत्यैव प्रवर्तन्ते इति निष्कर्षः; उदाराणां महताम्, [इति सम्बन्धे षष्ठी] एतत् चरितं स्वभावः, अद्भुतम् आश्चर्यं यथा तथा, चरितम् अनुष्ठितं, घटितमिति यावत्, तैरिति शेषः; यद्वा,—उदाराणामेतत् चरितं स्वभावः, अद्भुतं विस्मयकरं, चरितं स्वभावः; विस्मयकरचरिताः एव हि महान्तः इति तात्पर्यम्। अत्र साधुसाङ्गिका इत्यनेनैव उदाराश्चे लब्धे पुनरुदारपदग्रहणात् अर्थपुनरुक्ततादोषो मन्तव्यः। आर्या छन्दः ॥ ३१ ॥

क्लेशस्येति।—इह संसारे, अङ्कं उत्सङ्गादिकं, क्लेशस्य, अंशमिति शेषः, अदत्त्वा क्लेशभागिनमकृत्वेत्यर्थः, सुखानि ऐहिकभोग्यानीति भावः, सुखम् अनायासेनेत्यर्थः, नैव लभ्यन्ते प्राप्यन्ते, कैरपीति शेषः, तथा हि, मधुभित् मधुसूदनः, मथनाऽऽयस्तैः मथनेन क्षीरसमुद्रमन्थनेन, आयस्तैः श्रान्तैः, बाहुभिः भुजैः, लक्ष्मीं श्रियम्, आस्थिष्यति आलिङ्गति; "न हि सुखं दुःखैर्विना लभ्यते" इति भावः; विष्णुरपि श्रमानन्तरमेव सुखं लेभे, का कथा अन्येषाम् ? इति तात्पर्यम्। आर्या छन्दः ॥ ३२ ॥

तस्येति।—यः विष्णुः, जलगतः जले स्थितः सन्, क्षीरोदशायी भूत्वेत्यर्थः, चतुरो मासान् आषाढादीन् इति भावः, सततं निरन्तरं, निद्रां सेवति स्वपिति, "शेते विष्णुः सदाऽऽषाढ कार्त्तिके च विबुध्यते" इति शास्त्रमनानुकूल्यम् [अत्र सेवनेरात्मनेपदिनेऽपि 'परस्मैपदानि शास्त्रात्' इति नियमात् परस्मैपदं बोध्यम्] नृसिंहकस्य असुरानधनार्थं नरसिंहमूर्त्तेः अपि, पुरुषस्येश्वरस्यापीति भावः, तस्य विष्णोः पत्नी लक्ष्मीरित्यर्थः, कथं चला अपलेत्याख्यावती, अथ च चञ्चला, चञ्चलप्रकृतिरित्यर्थः, न स्यात् ? पुरुषकारविहीनस्य लक्ष्मीर्न तिष्ठतीति भावः; अचलप्रकृतेर्निश्चेष्टस्य पत्नी अपि न आसने तिष्ठतीति तात्पर्यम्। आर्या छन्दः ॥ ३३ ॥

दुरधिगम इति।—पुरुषेण जनेन, यावत् यत्नाद्यपर्यन्तं, साहसं यत्नसङ्कट

तत् कथ्यताम् अस्माकं कश्चित् धनोपायः (घ) विवरप्रवेश-शाकिनीसाधन-श्मशानसेवन-महामांसविक्रय-साधकवर्त्तिप्रभृतीनामेकतम इति। अद्भुतशक्तिर्भवान् श्रूयते; वयमपि अतिसाहसिकाः। उक्तञ्च,—

कार्यं, पौरुषमिति यावत्, [साहसा बलेन निर्वृत्तम् इति अण्। "साहसन्तु बलात्कारकृतकार्यं दमेऽपि च" इति मेदिनी] न क्रतं तावल्लज्जितं, तावत् परभागः उत्कर्षः, पराधिकारो वा, दुरधिगमः दुष्प्रापः, परान् विजेतुं न शक्यते इति वा भावः। अत्र दृष्टान्तमाह,—इह जगति, तृष्णा तदाख्यराशिम् इत्यर्थः, [तोलनदण्डमिति ध्वनिः] अधिरूढः आश्रितः, भास्वान् सूर्यः, जलदपटलानि मेघवृन्दानि, जयति; जलदपटलानि किं मां रोद्धं शक्नुयुरिति प्रतिस्पर्द्धिभावमागत्य अतितेजस्विना सूर्येणापि पुरुषकारमाश्रित्य तृष्णा गतेनैव शक्तयो मेघाः जीयन्ते, न तु विना पुरुषकारं, का कथाऽन्येषाम् ? इति भावः। आर्या इत्तम् ॥ ३४ ॥

(घ) विवरेति।—विवरप्रवेशः,—पातालगमनं, मन्त्रौषधादिभिः सुरक्षितदेहस्य रत्नादिसङ्ग्रहार्थं नागलोकगमनमित्यर्थः; शाकिनीसाधनं—शाकिनी—योगिनीविशेषः, तस्याः साधनं—क्रियाविशेषेण वशीकरणम्; श्मशानसेवनं—श्मशाने स्थित्वा मन्त्रादीनां साधनम्; महामांसस्य—नरमांसस्य, बलियोग्यस्य नरस्येत्यर्थः, विक्रयः,—मूल्यग्रहणपूर्वकम् अर्पणमित्यर्थः, कापालिकेभ्यः इति भावः; कापालिका हि अभीष्टदेवताप्रीत्यर्थं नरबलिदानेन बलियोग्यं नरं प्राप्य अमानुषशक्तिमत्त्वया नरपशुदानरूपोपकारविनिमयेन विक्रेतृभ्यो प्रभूतधनादिदानेन प्रत्युपकारं कुर्वन्ति, इति महामांसविक्रयस्य धनार्जनसाधकत्वमिति भावः; यद्वा,—विक्रयः,—विशिष्टमूल्येन ग्रहणं, कापालिकधर्मं स्वीकृत्य महाभैरवसाधनाय अधिकमूल्येन मनुष्यक्रय इत्यर्थः, महाभैरवसिद्धये कापालिका हि बहुमूल्येन नरान् क्रीणन्ति, ततश्च कृतपाके सुरां संस्थाप्य नरमांसेन अग्नौ हुत्वा सिद्धिं लभन्ते सिद्धाश्च सर्वाभीष्टं पूरयितुं शक्नुवन्ति, अतस्तस्य धनार्जनसाधकत्वमिति भावः; कापालिकानां धर्माचारादिकं प्रबोधचन्द्रोदयनाटकेऽप्युक्तम्; यथा.—"नराश्रिमालालङ्कृतभाङ्गभूषणः श्मशानवासी कृतपानभाजनः" इति (३य अ० १२ श्लोकः) "नरास्थ

महान्त एव महतामर्थं साधयितुं क्षमाः।
ऋते समुद्रादन्यः को बिभर्त्ति बडवानलम् ?' ॥ ३५ ॥

भैरवानन्दोऽपि तेषां सिद्ध्यर्थं बहु (स) उपायं सिद्धवर्त्ति-चतुष्टयं कृत्वा आर्पयत्, आह च,—'गम्यतां हिमालयदिशि, तत्र सम्माप्तानां यत्र वर्त्तिः पतिष्यति, तत्र निधानम् असन्दिग्धं प्राप्स्यथ; तत् स्थानं खनित्वा निधिं गृहीत्वा व्याघुट्यताम्'। तथा अनुष्ठिते तेषां गच्छताम् एकतमस्य हस्तात् वर्त्तिर्निपपात। अथ असौ यावत् तं प्रदेशं खनति, तावत् ताम्रमयी भूमिः। ततः तेन अभिहितम्,—'अहो! गृह्यतां स्वेच्छया ताम्रम्'। अन्ये प्रोचुः,—'भो मूढ! किम् अनेन क्रियते, (ङ) यत् प्रभूतमपि दारिद्र्यं न नाशयति? तदुत्तिष्ठ, अग्रतो गच्छामः'। सोऽब्रवीत्,—'यान्तु भवन्तः, न अहमग्रे यास्यामि' एवम् अभिधाय ताम्रं यथेच्छया गृहीत्वा प्रथमो निवृत्तः। ते त्रयोऽपि अग्रे प्रस्थिताः। अथ किञ्चिन्मात्रं गतस्य (क) अग्रेसरस्य वर्त्तिः निपपात। सोऽपि यावत् खनि-

---

प्रदर्शिका इत्यर्थः. वर्त्तिः,—वर्त्तिकाविशेषः, [अत्र कर्मधारये पुंवद्भावो मन्तव्यः] तत्प्रस्थितानाम् एकतमः,—अन्यतमः।

महान्त इति।—महान्त एव श्रेष्ठजना एव, महतामर्थं कार्यं, साधयितुं सम्पादयितुं, क्षमाः शक्ताः। समुद्रात् ऋते विना, अन्यः कः बडवानलं बिभर्त्ति? धारयति? न कोऽपि इत्यर्थः। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥३५॥

(स) उपायं—साधनं, अनाञ्जनसाधनमित्यर्थः। सिद्धेति।—सिद्धा—सिद्धकृता, अमोघा इत्यर्थः, या वर्त्तिः,—वर्त्तिकाकृतिद्रव्यविशेषः, तासां चतुष्टयम्। सम्माप्तानाम्—उपस्थितानां, युष्माकं इत्यादिति शेषः। निधानं—रत्नविशेषः। असन्दिग्धं—निश्चितम्। व्याघुट्यतां—प्रत्यागम्यताम्; [विपूर्वकस्य आङ्पूर्वकस्य च "घोटते" इत्यस्य भावे घोटि रूपम्]।

(ङ) यदिति।—प्रभूतमपि—प्रचुरमपि, यत्—तावं, दारिद्र्यं न नाशयति, अल्पमूल्यत्वादिति भावः।

(क) अग्रेसरस्य—अग्रयायिनः, [अग्रे सरति गच्छति इति अग्रोपपदात्

तुम् आरब्धः, तावत् रूप्यमयी क्षितिः। ततः प्रहर्षितः प्राह यत्,—'भोः! गच्छतां यथेच्छया रूप्यं, न अग्रे गन्तव्यम्'। तौ ऊचतुः,—'भोः! पृष्ठतः ताम्रमयी भूमिः!! अग्रतो रूप्यमयी!! तत् नूनम् अग्रे सुवर्णमयी भविष्यति; किञ्च, अनेन प्रभूतेनापि दारिद्र्यनाशो न भवति, अतः आवाम् अग्रे यास्यावः' एवमुक्त्वा द्वौ अपि अग्रे प्रस्थितौ। स च स्वशक्त्या रूप्यम् आदाय निवृत्तः। अथ तयोरपि गच्छतोः एकस्य अग्रे वह्निः पपात। सोऽपि प्रहृष्टो यावत् खनति, तावत् सुवर्णभूमिं दृष्ट्वा द्वितीयं प्राह,—'भोः! गच्छतां स्वेच्छया सुवर्णं, सुवर्णादन्यत् न किञ्चित् उत्तमं भविष्यति'। स प्राह,—'मूढ! न किञ्चित् वेत्सि!! प्राक् ताम्रं, ततो रूप्यं, ततः सुवर्णं, तन्नूनमतः परं रत्नानि भविष्यन्ति, येषाम् एकतमेनापि दारिद्र्यनाशो भवति, तदुत्तिष्ठ, अग्रे गच्छावः, किमनेन भारभूतेनापि प्रभूतेन?' स आह,—'गच्छतु भवान्, अहमत्र स्थितस्त्वां (ख) प्रतिपालयिष्यामि'। तथाऽनुष्ठिते, सोऽपि गच्छन् एकाकी (ग) ग्रीष्मार्कप्रतापसन्तप्ततनुः पिपासाकुलितः सिद्धिमार्गच्युत इतश्चेतश्च बभ्राम। अथ एवं भ्राम्यन् (घ) तत्रैव प्रदेशे पुरुषमेकं रुधिरप्लावितगात्रं भ्रमच्चक्रमस्तकमपश्यत्। ततो द्रुततरं गत्वा तम् अवोचत्,—'भोः! को भवान्? किमेवं चक्रेण भ्रमता

सुधाटीः "पूरोऽयतोऽयेषु सर्वे."(३।२।१८ पा०) इति ट-प्रत्ययः, सप्तम्या लुगभावश्च]।

(ख) प्रतिपालयिष्यामि—प्रतीक्षिष्ये इत्यर्थः।

(ग) ग्रीष्मेति।—ग्रीष्मार्कस्य—निदाघसूर्यस्य, प्रतापेन—प्रभावेण, सन्तप्ता—खेदिता, तनुः,—शरीरं यस्य सः। पिपासाकुलितः,—तृष्णार्तः। सिद्धिमार्गच्युतः,—सिद्धिपथात भ्रष्टः, रक्तस्रावकृपात सद्देशात विच्युत इत्यर्थः, रौद्रपीडितत्वात् पिपासाकुलितत्वाच्च विमूढधीतया लक्ष्यभ्रष्ट इति भावः।

(घ) तत्रैव प्रदेशे—यत्र ब्राह्मणचतुष्टयानामस्थानम्; भ्रमति, तस्मिन्नेव स्थाने इत्यर्थः। भ्रमदिति।—भ्रमत् चक्रं यस्मिन् तादृशं मस्तकं यस्य तथोक्तं भ्रमच्चक्रमस्तकम्।

शिरसि तिष्ठसि ? कथय मे, यदि कुत्रचित् जलमस्ति ?' एवं तस्य प्रवदतः तच्चक्रं तत्क्षणात् तस्य शिरसो ब्राह्मणमस्तके (ङ) चटितम्। स आह,—'भद्र ! किमेतत् ?' स आह,—(च) 'यन्ममापि एवमेव एतत् शिरसि चटितम्'। स आह,—'तत् कथय, कदा एतत् (छ) उत्तरिष्यति ? महती मे वेदना वर्त्तते'। स आह,—'यदा त्वमिव कश्चित् (ज) धृतसिद्धवर्त्तिः एवमागत्य त्वाम् आलापयिष्यति, तदा तस्य मस्तके चटिष्यति'। स आह,—'कियान् कालस्तव एवं स्थितस्य ?' स आह,—'साम्प्रतं को राजा धरणीतले ?' स आह,—'वीणावत्सराजः'। स आह,—'अहं तावत् कालसङ्ख्यां न जानामि ; परं यदा रामो राजा आसीत् तदाऽहं दारिद्र्योपहतः सिद्धवर्त्तिम् आदाय अनेन पथा समायातः ; ततो मया अन्यो नरो मस्तकधृतचक्रो दृष्टः पृष्टश्च ; ततश्च एतत् (झ) ज्ञातम्'। स आह,—'भद्र ! कथं तव एवंस्थितस्य भोजनजलप्राप्तिः आसीत् ?' स आह,—'भद्र ! (ञ) धनदेन निधानहरणभयात् सिद्धानामेतच्चक्रपतनरूपं भयं दर्शितं, तेन कश्चिदपि न आगच्छति ; यदि कश्चित् आयाति, स क्षुत्पिपासानिद्रारहितो

(ङ) चटितं—पतितम्, आरूढं वा।

(च) यत्—यस्मात् कारणात्, मदागमनात् प्राक् अत्र स्थितेन मम आलपनात् इत्यर्थः। एवमेव—त्वन्मस्तकारोहणप्रकारेणैव, ममापि शिरसि एतत् चटितं, तस्मादेव तवापि शिरसि एतत् चटितमिति भावः ; यद्वा,—यत्—यथा, येन प्रकारेणेत्यर्थः।

(छ) उत्तरिष्यति—मम मस्तकात् अपसरिष्यति इत्यर्थः।

(ज) धृतेति।—धृता सिद्धवर्त्तिर्येन तथोक्तः।

(झ) ज्ञातं—सञ्जातम् इत्यर्थः।

(ञ) धनदेन—कुबेरेण। निधानहरणभयात्—निधिहरणभयात्।

जरामरणवर्जितः केवलमेवं वेदनाम् अनुभवतीति। तदाज्ञापय मां स्वस्थाय' इत्युक्त्वा गतः।

अथ तस्मिन् चिरयति सः (ट)सुवर्णसिद्धिः तस्य अन्वेषणपरः तत्पदपङ्क्त्या यावत् किञ्चित् वनान्तरम् आगच्छति, तावत् रुधिरप्लावितशरीरः तीक्ष्णचक्रेण मस्तके भ्रमता सवेदनः क्वणन् उपविष्टः तिष्ठतीति ददर्श। ततः तत्समीपवर्त्तिना भूत्वा सवार्ष्यं पृष्टः,—'भद्र! किमेतत्?' स आह,—(ठ) 'विधिनियोगः'। स आह,—'कथं तत्? कथय कारणमेतस्य'। सोऽपि तेन पृष्टः सर्वं चक्रहस्तान्तम् अकथयत्। तत् श्रुत्वा असौ तं (ड) विगर्हयन् इदमाह,—'भोः लोभात्मन्! अदूरदर्शिन्! निषिद्धः त्वं मया अनेकशो न अशृणोः मे वाक्यम्; तत् किं क्रियते? विद्यावानपि कुलीनोऽपि परं बुद्धिरहितः लोभाभिभूतस्त्वमेवं पराभवमलब्धाः। अथवा साधु इदमुच्यते,—

वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा।
बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः' ॥ २६ ॥

चक्रधर आह,—'कथमेतत्?' सुवर्णसिद्धिः आह,—

(ट) सुवर्णसिद्धिः,—सुवर्णेन—प्रभूतसुवर्णप्राप्त्या, सिद्धिः,—कार्यसिद्धिर्यस्य सः, प्रभूतसुवर्णप्राप्त्या सिद्धकामः इत्यर्थः। तत्पदपङ्क्त्या—चतुर्थब्राह्मणतनयस्य पदचिह्नरेखानानुसृत्येत्यर्थः। सवेदनः,—वेदनया सत्पीडितः। क्वणन्—शब्दायमानः, वेदनाव्यञ्जकाव्यक्तशब्दं कुर्वन् इत्यर्थः।

(ठ) विधिनियोगः,—दुर्दैवाज्ञा।

(ड) विगर्हयन्—निन्दयन्।

वरमिति।—बुद्धिर्वरं, सा तादृशी, बुद्धिहीना इत्यर्थः, विद्या न, वरनिश्चयवतः, बुद्धिः विद्यायाः विज्ञानपेक्ष्य, उत्तमा श्रेष्ठा, [विद्यायाः इत्यत्र "पञ्चमी विभक्ते" (२।३।४२ पा०) इत्यनेन निर्द्धार्यमाणस्य भेदबोधात् पञ्चमी]; बुद्धिहीनाः, जनाः इति शेषः, ते सिंहकारकाः; सिंहक्रियायकाः, यथा, तथेति शेषः, विनश्यन्ति विनाशं प्राप्नुवन्ति इत्यर्थः ॥ २६ ॥

कथा ३।

'कस्मिंश्चित् अधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रभावम् उपगता वसन्ति स्म। तेषां त्रयः शास्त्रपारं गताः, परन्तु बुद्धिरहिताः। एकस्तु बुद्धिमान्, केवलं (ढ) शास्त्रपराङ्मुखः। अथ तैः कदाचित् मित्रैः मन्त्रितं,—'को गुणो विद्यायाः, (ण) येन देशान्तरं गत्वा भूपतीन् परितोष्य अर्थोपार्जना न क्रियते? तत् पूर्वदेशं गच्छामः'। तथाऽनुष्ठिते, किञ्चिन्मार्गं गत्वा तेषां ज्येष्ठतरः प्राह,—'अहो! अस्माकमेकः चतुर्थो मूढः, केवलं बुद्धिमान्, न च (त) राजप्रतिग्रहः केवलबुद्ध्या लभ्यते विद्यां विना; तत्र अस्मै स्वोपार्जितं दास्यामि; तद्गच्छतु गृहम्'। ततो द्वितीयेन अभिहितं,—'भोः सुबुद्धे! गच्छ त्वं स्वगृहे, यतः ते विद्या नास्ति'। ततः तृतीयेन अभिहितम्,—'अहो! न युज्यते एवं कर्त्तुं, यतो वयं बाल्यात् प्रभृति एकत्र क्रीडिताः; तत् आगच्छतु महानुभावः, अस्मदुपार्जितवित्तस्य समभागी भविष्यतीति। उक्तञ्च,—

किं तया क्रियते लक्ष्म्या या वधूरिव केवला।
या न वेश्येव सामान्या पथिकैरुपभुज्यते? ॥ ३७ ॥

(ढ) शास्त्रपराङ्मुखः,—शास्त्रात् पराक्—प्रत्याहृतं, मुखं यस्य सः, शास्त्रानभिज्ञः इत्यर्थः।

(ण) येन—येन हेतुना, यदि इत्यर्थः; यद्वा,—येन गुणेन इत्यर्थः।

(त) राजप्रतिग्रहः,—राज्ञः सकाशात् प्रतिग्रहः,—दानग्रहणं, दानप्राप्तिरित्यर्थः।

किमिति।—या केवला अन्यभोग्यवर्जितेति भावः, वधूरिव कुलस्त्रीव, तिष्ठति इति शेषः, या केवलं निजभोग्यार्थमेव भवतीत्यर्थः, या च सामान्या साधारणी, वेश्येव वारस्त्रीव, पथिकैः साधारणजनैरिति भावः, न उपभुज्यते, तया लक्ष्म्या सम्पदा, किं क्रियते? न किमपि प्रयोजनम् इत्यर्थः॥ ३७॥

तथा च,—अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ॥ ३८ ॥

तत् आगच्छतु एषोऽपि' इति। तथा अनुष्ठिते, तैः (थ) मार्गाश्रितैः अटव्यां कतिचित् अस्थीनि दृष्टानि। ततश्च एकेन अभिहितम्,—'अहो! अद्य (द) विद्याप्रत्ययः क्रियते, कतिचिदेतानि मृतसत्त्वस्य अस्थीनि तिष्ठन्ति, तत् विद्याप्रभावेण जीवनसहितं कुर्मः; अहम् अस्थिसञ्चयं करोमि'। ततश्च तेन (ध) औत्सुक्यात् अस्थिसञ्चयः कृतः; द्वितीयेन चर्ममांसरुधिरं संयोजितम्; तृतीयोऽपि यावत् जीवनं सञ्चारयति, तावत् सुबुद्धिना निषिद्धः,—'भोः! तिष्ठतु भवान्, एष सिंहो

अयमिति।—अयं जनः, निजः आत्मीयः, परः अनात्मीयः वा, इति इत्थं, लघुचेतसां क्षुद्रचित्तानाम्, अनुदाराणामित्यर्थः, गणना विचारः; तु किन्तु, उदारं महत्, ("उदारो दातृमहतोर्दक्षिणे चाभिधेयवत्" इति मेदिनी) चरितं येषां तथोक्तानां जनानां, महात्मनामित्यर्थः, वसुधा एव पृथिवीव्याप्तजनसमाजमेव इत्यर्थः, कुटुम्बकं परिवारसमूहः, स्वजनः इत्यर्थः; "आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः" इति भावः ॥३८॥

(थ) मार्गाश्रितैः,—अध्वगामिभिः। अटव्यां—कानने, ("अटव्यरण्यं विपिनं गहनं काननं वनम्" इत्यमरः)।

(द) विद्याप्रत्ययः,—विद्यायाः,—शास्त्रसिद्धाया इति भावः, प्रत्ययः,—ज्ञानं, सिद्धिता विद्या फलदायिनी न वा इति ज्ञानार्थं परीक्षणमित्यर्थः, यद्वा—विद्यायां—ज्ञाने, अधीतविषये इत्यर्थः, प्रत्ययः,—विश्वासः, अमुकमन्त्रादिकं फलप्रदं न वा इति मन्दैहिनिरसनमित्यर्थः, ("प्रत्ययः प्रथितज्ञे च मन्त्रादिज्ञानधीरपि। आचारे शपथे दक्षविश्वासाधीनहेतुषु ॥" इति मेदिनी)। मृतसत्त्वस्य—मृतः,—विगतप्राणः, सत्त्वः,—जन्तुः, जीवविशेषः इति यावत्, ("सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः। आत्मतत्त्वे व्यवसायासुचिसत्त्वेषु तु जन्तुषु ॥" इति मेदिनी) तस्य। जीवनसहितं—प्राणसंयुक्तं, सजीवमित्यर्थः। अस्थिसञ्चयम्—अस्थां—कङ्कालानां, सञ्चयं—संयोजनम्।

(ध) औत्सुक्यात्—उत्सुकः,—दृष्टसाधनार्थमुद्युक्तः, तस्य भावस्तत्त्वात्, तत्त्वविशेषस्य प्राणसंयोजनविषये कुतूहलित्वादित्यर्थः, ("दृष्टार्थोद्युक्त उत्सुकः" इत्यमरः)। चर्ममांसरुधिरं—चर्म च मांसञ्च रुधिरञ्च तत्, [इति द्वन्द्वे "द्वन्द्व

निष्पाद्यते !! यदि एनं सजीवं करिष्यति, ततः सर्वानपि व्यापादयिष्यति'। इति तेन अभिहितः स आह,—'धिक् मूर्ख ! नाहं विद्याया विफलतां करोमि'। ततः तेनाभिहितं,—'तर्हि (न) प्रतीक्षस्व क्षणं, यावदहं वृक्षमारोहामि'। तथाऽनुष्ठिते, यावत् सजीवः कृतः, तावत् ते त्रयोऽपि सिंहेन उत्थाय व्यापादिताः ; स च पुनः वृक्षात् अवतीर्य गृहे गतः। अतोऽहं ब्रवीमि,—'वरं बुद्धिर्न सा विद्या' इत्यादि'। अतः परमुक्तश्च सुवर्णसिद्धिना,—

'अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः।
सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः' ॥३९॥

चक्रधर आह,—'कथमेतत् ?' सोऽब्रवीत्,—

कथा ४।

'कस्मिंश्चित् अधिष्ठाने चत्वारो ब्राह्मणाः परस्परं मित्रत्वम् आपन्ना वसन्ति स्म। (प) बालभावे तेषां मतिः अजायत यत्,—'देशान्तरं गत्वा विद्याया उपार्जनं क्रियते' इति। अथ अन्यस्मिन् दिवसे ते ब्राह्मणाः परस्परं निश्चयं कृत्वा विद्योपार्जनार्थं

प्रायश्चित्तार्थसेनाङ्गानाम्" (२।४।२पा०) इति प्राप्तकृत्वादेरभावः]। संयोजितं—सम्यग्योजितं, मन्त्रशक्त्या चर्मादियुक्तं कृतमित्यर्थः। निष्पाद्यते—क्रियते इत्यर्थः। सजीवं—जीवनसहितम्।

(न) प्रतीक्षस्व—अपेक्षस्व, विलम्बं कुरु इत्यर्थः।

अपीति।—ये शास्त्रेषु हितानुशासनग्रन्थेषु, [शिष्यते अनेनेति शास्त्रं, शासु अनुशिष्टौ; "सर्वधातुभ्यः ष्ट्रन्" (उणा० ४पा० १५८ सू०) इत्यौणादिकः ष्ट्रन्-प्रत्ययः] कुशला निपुणाः अपि, लोकाचारविवर्जिताः लौकिकव्यवहारानभिज्ञाः, भवन्तीति शेषः, ते सर्वे, ते प्रसिद्धा इत्यर्थः, मूर्खाश्च ते पण्डिताश्चेति मूर्खपण्डिताः, यथा, तथा हास्यताम् उपहासास्पदत्वं, यान्ति ॥ ३९ ॥

(प) बालभावे—शैशवे।

कान्यकुब्जे गताः ; तत्र च (फ) विद्यामठे गत्वा पठन्ति। एवं द्वादशाब्दान् यावत् एकचित्ततया विद्याकुशलास्ते सर्वे सञ्जाताः। ततः तैः चतुर्भिर्मिलित्वा उक्तं,—'वयं सर्वविद्यापारं गताः, तदुपाध्यायम् (ब)उत्कलापयित्वा स्वदेशे गच्छामः'। एवं मन्त्रयित्वा ब्राह्मणा उपाध्यायमुत्कलापयित्वा, अनुज्ञां लब्ध्वा च पुस्तकानि नीत्वा प्रचलिताः यावत् किञ्चित् मार्गं यान्ति, तावत् द्वौ पन्थानौ समायातौ दृष्ट्वा उपविष्टाः सर्वे। तत्रैकः प्रोवाच,—'केन मार्गेण गच्छामः ?' एतस्मिन् समये तस्मिन् (भ) पत्तने कश्चित् वणिक्पुत्रो मृतः, तस्य दाहार्थं (म) महाजनो गतोऽभूत्। ततः चतुर्णां मध्यात् एकेन पुस्तके अवलोकितं,—(य) 'महाजनो येन गतः स पन्थाः' इति ; ततस्तेन अभिहितं—'तत् महाजनमार्गेण गच्छामः' इति। अथ ते पण्डिता यावत् (र) महाजनमेलापथिकेन सह

(फ) विद्यामठे—विद्यायै—विद्यालाभार्थं, मठः,—छात्रनिलयः, छात्रावास इत्यर्थः, ("मठस्छात्रादिनिलयः" इत्यमरः) तत्र. चतुष्पाठ्यामित्यर्थः।

(ब) उत्कलापयित्वा—उत्कैः—तेषां स्वदेशगमनोद्यमाद्धेतोः शिष्यवत्सलत्वेन उत्पन्नस्नेहेन गुरुणा सह, लापः,—भाषणम्, अनुमतिप्रार्थनाद्यपनित्यर्थः, तथा कृत्वा, स्वदेशगमनाय गुरोरनुमतिग्रहणं कृत्वेत्यर्थः, [करोत्यर्थे णिचि पश्चात् त्वा-प्रत्ययेन साध्यम्]। उक्तं लापयित्वा इति पाठस्तरण सुगमार्थकम ; उक्तम्—उत्कण्ठितं गुरुं, लापयित्वा—याचयित्वा, धनादिकमिति शेषः, धनादिदानेन सन्तोष्येत्यर्थः।

(भ) पत्तने—नगरे, ("पुः स्त्री पुरोनगर्यौ वा पत्तनं पुटभेदनम्" इत्यमरः)।

(म) महाजनः,—बहुसङ्ख्यकलोकः।

(य) महाजनो येनेति।—महान् जनः,—महापण्डित-ऋषिसमूहः इत्यर्थः, तथा चोक्तं,—"पतञ्जलि-व्यास-कणाद-गौतमाः, महाजनाश्च कपिलश्च जैमिनिः" इति, साधुजन इति यावत्, येन—येन मार्गेण, याद्दशाचारेणेत्यर्थः, गतः,—प्रचलितः, स पन्थाः,—मार्गः, आचरणीय इत्यर्थः। महाजनमार्गेण—महान्—प्रभूतः, जनः,—कृतधनिकपुत्रानुगामिलोक इत्यर्थः, तस्य मार्गेण—पथा, तदनुसरणक्रमेणेत्यर्थः।

(र) महाजनेति।—महाजनानां मेला—तथाविधमिलनं, तस्य पन्थाः,—मार्गः, तमनुसरति यः तेन, दाहार्थं समवेतानां जनसमूहम् अनुयायिना जनेन।

यान्ति, तावत् रासभः कश्चित् तत्र श्मशाने दृष्टः । अथ द्वितीयेन पुस्तकम् उद्घाट्य अवलोकितम्, उक्तञ्च,—

'उत्सवे व्यसने प्राप्ते दुर्भिक्षे शत्रुसङ्कटे ।

राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥४०॥ इति ।

तत् अहो ! अस्मदीयो बान्धवः' । ततः कश्चित् तस्य ग्रीवायां लगति, कोऽपि पादौ प्रक्षालयति । अथ तैः पण्डितैः दिशाम् अवलोकनं कुर्वद्भिरेव कश्चित् उष्ट्रो द्रुतं गच्छन् दृष्टः । तैश्च उक्तम्,—'एतत् किम् ?' ततः तृतीयेन पुस्तकम् उद्घाट्य उक्तं —'धर्मस्य त्वरिता गतिः' इति ; 'तन्नूनमेष धर्मः साक्षात् !!' चतुर्थेन उक्तम्,—(ल) 'दृष्टं धर्मेण योजयेत्' इति ; 'तत् बान्धवोऽयमस्माकं धर्मेण नियुज्यताम्' । अथ तैः (व) रासभ उष्ट्रग्रीवायां बद्धः । तत्त्र केनचित् तत्स्वामिनः रजकस्य अग्रे कथितम् । श्रुत्वा च असौ रजकः तेषां मूर्खपण्डितानां प्रहारकरणाय समायातः, दृष्ट्वा च तं दूरत एव ते (श) प्रनष्टाः ; ततः स्तोकं पन्थानमतिक्रम्य प्रधावद्भिस्तैः काचित् नदी समासादिता ; तस्यां जलमध्ये पलाशपत्रम् आयातं दृष्ट्वा पण्डितेन एकेन उक्तम्,—'आगमिष्यति यत् पत्रं तदस्मांस्तारयिष्यति'

उत्सवे इति ।—यः प्राप्ते उपस्थिते उत्सवे मङ्गलिके आनन्दजनकव्यापारे, व्यसने विपदि, ("व्यसनं विपदि भ्रंशे दोषे कामजकोपजे" इत्यमरः) दुर्भिक्षे अन्नकष्टसमये, शत्रुसङ्कटे वैरिसमागमे, राजद्वारे राजसमीपे इत्यर्थः, व्यवहारादौ इति शेषः, तथा श्मशाने शवदाहनयोग्यस्थाने, च तिष्ठति साहाय्यं करोति, स बान्धवः सुहृत् ॥४०॥

(ल) दृष्टं—प्रियम् ।

(व) रासभः,—गर्दभः ; श्मशाने अवस्थानात् बान्धवत्वेन मननात् इष्टभूत इति भावः ।

(श) प्रनष्टाः,—पलायिताः [प्रपूर्वात् नशधातोः क्तप्रत्ययेन सिद्धम् ; "नशेः षान्तस्य" (८।४।३६ पा०) इति षत्वाभावः]। स्तोकम्—अल्पमात्रम् । तस्याः,—नद्या इत्यर्थः । पलाशपत्रं—किंशुकाख्यतरोः पत्रम् ।

इत्येतत् कथयित्वा तत्पत्रस्य उपरि पतितो यावत् नद्या नीयते, तावत् तं नीयमानम् अवलोक्य अन्येन पण्डितेन केशान्तं गृहीत्वा उक्तम्,—

'सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः।
अर्धेन कुरुते कार्यं सर्वनाशो हि दुःसहः' ॥ ४१ ॥

इत्युक्त्वा तस्य शिरश्छेदो विहितः। अथ तैः पश्चात् गत्वा कश्चिद्ग्रामः आसादितः, (घ) ग्रामीणैः निमन्त्रिताश्च पृथक् पृथक् गृहेषु नीताः। ततः एकस्य (ङ) सूत्रिका घृत-खण्डसंयुक्ता भोजने दत्ता। दृष्ट्वा च तां विचिन्त्य पण्डितेन उक्तं यत्,—(च) 'दीर्घसूत्रो विनश्यति' इति; एवमुक्त्वा भोजनं परित्यज्य गतः। तथा द्वितीयस्य (छ) मण्डका दत्ताः।

सर्वेति।—पण्डितो जनः सर्वनाशे सर्वस्य निखिलस्य, नाशे ध्वंसे, समुत्पन्ने समुपस्थिते सति, अर्धं त्यजति, अर्धेन च कार्यं कुरुते, हि यतः, सर्वनाशः दुःसहः सोढुमशक्यः, [दुःखेन सह्यते इति दुरुपपदात् सहधातोः "दुःसहदुःसुधकृच्छ्राकृच्छ्रार्थेषु खल्" (३।३।१२६ पा०) इति खल्-प्रत्ययः] ॥ ४१ ॥

(घ) ग्रामीणैः,—ग्रामे भवा इति तैः, ग्रामवासिभिरित्यर्थः, ["ग्रामात् य-खञौ" (४।२।८४ पा०) इत्यनेन खञ्। "ग्रामीणा गोलिकायां स्त्री ग्रामीणेऽभिधेयवत्" इति मेदिनी]।

(ङ) सूत्रिका—सूत्राकारः अपूपभेदः, ("सिमाइ" इति भाषा)। घृत-खण्डेति।—घृतेन—सार्पषा, खण्डेन—इक्षुविकारेण च, संयुक्ता, घृत-शर्करा-मिश्रिता इत्यर्थः।

(च) दीर्घसूत्रो—दीर्घेण—दीर्घकालेन, सूत्रयति—कर्त्तव्यं कर्म करोतीति तथोक्तः; यद्वा,—दीर्घं सूत्रं—व्यवस्था अथाऽऽलीति तथोक्तः, ("सूत्रं तन्तुव्यवस्थयोः" इति विश्वः) चिरक्रियः इत्यर्थः। विनश्यति—विनाशं प्राप्नोति, विफलमनोरथो भवतीति भावः।

(छ) मण्डकाः,—पिष्टकभेदाः, "वारिणा कोमलां कृत्वा समितां साधु मर्दयेत्। इक्षुचालनया तत्रा स्त्रीपूं सम्यक् प्रसारयेत् ॥ अधोमुखघटस्थेतां विस्तृतां प्रक्षिपेत् वह्निः। मृदुना वह्निना साध्यः सिद्धो मण्डक उच्यते ॥" इति भावप्रकाशः।

तेनापि,—(ख) 'अतिविस्तारविस्तीर्णं न तद्भवेत् चिरायुषम्' इत्युक्त्वा भोजनं त्यक्त्वा गतः। अथ तृतीयस्य (ग) वटिकाभोजनं दत्तम्। तत्रापि पण्डितेन उक्तं,—(घ) 'छिद्रेष्वनर्था बहुलीभवन्ति'। एवं ते त्रयोऽपि पण्डिताः क्षुत्क्षामकण्ठाः लोकैः (ङ) हस्यमानाः ततः स्थानात् स्वदेशं प्रत्यागताः'।

अथ सुवर्णसिद्धिः आह,—'यत् त्वं (च) लोकव्यवहारम् अजानन् मया वार्य्यमाणोऽपि न स्थितः, तेन दृष्टपीम् अवस्थाम् उपगतः। अतोऽहं ब्रवीमि,—'अपि शास्त्रेषु कुशलाः'इत्यादि'।

तत् श्रुत्वा चक्रधर आह,—'अहो! अकारणमेतत्,—

सुबुद्धयोऽपि नश्यन्ति दुष्टदैवेन नाशिताः।
स्वल्पधीरपि तस्मिंस्तु कुले नन्दति सन्ततम्॥ ४२॥

(ख) अतीति।—अतिविस्तारेण विस्तीर्णं—विस्तारयुक्तं, वृहदाकारमित्यर्थः, यद्भोज्यमिति शेषः, तत् चिरायुषं—दीर्घजीवनप्रदं, न भवेत्। वृहदाकारद्रव्यविशेषो न चिरस्थायी भवेदिति प्रकृतार्थः।

(ग) वटिकेति।—वटिका—कलायप्रभृत-पिष्टकभेदः, सा एव भोजनं—भोज्यम्।

(घ) छिद्रेष्विति।—छिद्रेषु—छिद्रयुक्तेषु, सच्छिद्रपिष्टकविशेषेषु इति भावः, [छिदधातोः "स्फायितञ्चिवञ्चि—" (उणा० २ पा० १३ सू०) इत्यादिना रक्-प्रत्ययः] विपदवसरेष्विति प्रकृतार्थः। अनर्थाः,—विपदः, बहुलीभवन्ति—विस्तारं गच्छन्ति।

(ङ) हस्यमानाः,—उपहस्यमानाः इत्यर्थः।

(च) लोकव्यवहारं—लोकप्रसिद्धाचारं, "गन्तव्यं पञ्चभिः सार्द्धं" "नेकः शून्याटवीं गच्छेत्" "अतिलोभो न कर्त्तव्यः" "सुहृदां हितकामानां न शृणोति च यो वचः" इत्यादिरूपमित्यर्थः; यद्वा,—सज्जनसम्प्रदायसिद्धं सदाचरणं, लुब्धस्य चेतसः प्रथमोपात्तवस्तुना स्वैर्य्यविधानरूपमिति यावत्। स्थितः,—गमनान्निवृत्तः इत्यर्थः।

सुबुद्धय इति।—यस्मिन् कुले इति पदमत्रोह्यम्; सुबुद्धयः महामतयः अपि, दुष्टदैवेन दुर्दैवेन, नाशिताः भक्षिताः इति भावः, नश्यन्ति विपद्यन्ते इत्यर्थः, तस्मिंस्तु कुले तस्मिन्नेव गोत्रे,("कुलं जनपदे गोत्रे सजातीयगणेऽपि च। भवने च तनौ क्लीबम्"

उक्तञ्च,—अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः
कृतप्रयत्नोऽपि गृहे न जीवति ॥ ४३ ॥

तथा च,—शतबुद्धिः शिरःस्थोऽयं लम्बते च सहस्रधीः ।
एकबुद्धिरहं भद्रे ! क्रीड़ामि विमले जले' ॥ ४४ ॥

सुवर्णसिद्धिः आह,—'कथमेतत् ?' स आह,—

कथा ५ ।

'कस्मिंश्चित् जलाशये शतबुद्धिः सहस्रबुद्धिश्च द्वौ मत्स्यौ निवसतः स्म । अथ तयोः एकबुद्धिर्नाम मण्डूको मित्रतां गतः । एवं ते त्रयोऽपि कञ्चित् कालं (क) वेलायां सुभाषित-सुखम् अनुभूय भूयोऽपि सलिलं प्रविशन्ति । अथ कदाचित् (ज) तेषां गोष्ठीगतानां जालहस्तधीवराः प्रभूतैः मत्स्यैः व्यापादितः मस्तके विधृतैः अस्तमनवेलायां तस्मिन् जलाशये समायाताः । ततः सलिलाशयं दृष्ट्वा (झ) मिथः प्रोचुः,—'अहो ! बहुमत्स्योऽयं ह्रदो दृश्यते स्वल्पसलिलश्च, तत् प्रभाते

इति मेदिनी) स्वल्पधीरपि अल्पबुद्धिरपि, अनुकूलदैव इति भावः, सन्ततं निरन्तरं, लभते वाञ्छितार्थसिद्धेः सुखीभवति इत्यर्थः; सुदैवमेव सर्वोपरि वर्तत इति भावः ॥४२॥

अरक्षितमिति ।—१५५ पृष्ठे ३५१ सङ्ख्याकश्लोके व्याख्यातोऽयम् ॥ ४३ ॥

शतबुद्धिरिति ।—हे भद्रे ! अयं शतबुद्धिः तदाख्यः मत्स्यः, शिरःस्थः शिरसि तिष्ठति इति तथोक्तः. [शिर-उपपदात् स्थाधातोः "सुपि स्थः" (३।२।४ पा०) इति कः;] सहस्रधीः तदभिधानो मत्स्यश्च, लम्बते लम्बमानो भवति इत्यर्थः ; अहन्तु एकबुद्धिः तन्नामा मण्डूकः, विमले निर्मले, जले क्रीड़ामि विहरामि ॥ ४४ ॥

(क) वेलायां—जलाशयतीरे, ("वेला स्यात् भोदनीरयोः" इति वैजयन्ती) ।

(ज) तेषां—मित्रत्रयाणां, गोष्ठीगतानां—सभागतानां, संलपतामित्यर्थो वा, ("गोष्ठी सभासंलापयोः स्त्रियाम्" इति मेदिनी) जलाशये इति शेषः ।

(झ) मिथः,—परस्परम् ।

अत्र आगमिष्यामः' एवमुक्त्वा स्वगृहं गताः। मत्स्याश्च विषण्णवदना मिथो मन्त्रं चक्रुः। ततो मण्डूक आह,—'भोः! शतबुद्धे! श्रुतं धीवरोक्तं भवता? तत् किमत्र युज्यते कर्त्तुम्? पलायनम् (ञ) अवष्टम्भो वा? यत् कर्त्तुं युक्तं भवति, तत् आदिश्यताम् अद्य'। तत् श्रुत्वा सहस्रबुद्धिः प्रहस्य प्राह,—'भो मित्र! मा भैषीः, यतो वचनश्रवणमात्रादेव भयं न कार्य्यम्। उक्तञ्च,—

सर्पाणाञ्च खलानाञ्च सर्वेषां दुष्टचेतसाम्।
अभिप्राया न सिध्यन्ति तेनेदं वर्त्तते जगत् ॥४५॥

तत् तावत् तेषाम् आगमनमपि न सम्पत्स्यते, भविष्यति वा, तर्हि त्वां बुद्धिप्रभावेण आत्मसहितं रचयिष्यामि; यतः अनेकां (ट) सलिलगतिचर्य्याम् अहं जानामि'। तत् आकर्ण्य शतबुद्धिः आह,—'भोः! युक्तमुक्तं भवता, सहस्रबुद्धिरेव भवान्। अथवा साधु इदमुच्यते,—

बुद्धेर्बुद्धिमतां लोके नास्त्यगम्यं हि किञ्चन।
बुद्ध्या यतो हृता नन्दाश्चाणक्येनासिपाणयः ॥ ४६ ॥

(ञ) अवष्टम्भः,—लज्जीभूय अवज्ञितभावेनावस्थानम् इत्यर्थः, लम्बदण्डावस्थानं वा।

सर्पाणामिति।—सर्पाणां भुजङ्गानां, खलानां धूर्त्तानां, तथा सर्वेषां दुष्टचेतसां दुर्जनानाञ्च इत्यर्थः, अभिप्रायाः अभिलाषाः, लोकनिर्य्यातनेच्छा इत्यर्थः, न सिध्यन्ति न सफला भवन्ति, तेन इदं जगत् विश्वं, [गच्छति विषयं याति इत्यर्थे गमधातोः "अतिगमिजुहोतीनां डे च" इति वार्त्तिकसूत्रेण क्विप्-प्रत्ययान्तो निपातनीयः] वर्त्तते तिष्ठति; यदि एषामभिलाषः सर्वं एव सिध्यति, तदा जगत् त्वरितमेव नश्यतीति भावः ॥ ४५ ॥

(ट) सलिलगतिचर्य्यां—सलिले—जले, गतौ—गमने, चर्य्यां—अनुष्ठानं, विहरणप्रक्रियामित्यर्थः।

बुद्धेरिति।—लोके जगति, बुद्धिमतां बुद्धेः अगम्यम् अविषयम् इत्यर्थः, [नञ्-

तथा च,—न यत्रास्ति गतिर्वायो रश्मीनाञ्च विवस्वतः।
तत्रापि प्रविशत्याशु बुद्धिर्बुद्धिमतां सदा ॥४७॥

ततो वचनश्रवणमात्रादपि (ठ) पितृपर्य्यायाऽऽगतं जन्मस्थानं त्यक्तुं न शक्यते। उक्तञ्च,—

न तत् स्वर्गेऽपि सौख्यं स्यात् दिव्यस्पर्शनशोभने।
कुस्थानेऽपि भवेत् पुंसां जन्मनो यत्र सम्भवः ॥४८॥

तत्र कदाचिदपि गन्तव्यम्। अहं त्वां सुबुद्धिप्रभावेण रक्षयिष्यामि'। मण्डूक आह,—'भट्टौ! मम तावत् एका एव बुद्धिः पलायनपरा, तत् अहम् अन्यं जलाशयम् अद्य एव सभार्य्यो यास्यामि'। एवमुक्त्वा स मण्डूको रात्रौ एव अन्यजलाशयं गतः। (ड) धीवरैः अपि प्रभाते आगत्य जघन्यमध्यमोत्तमजलचरा मत्स्यकूर्ममण्डूककर्कटादयो गृहीताः, तौ अपि शतबुद्धिसहस्र-

पूर्वादृगम्यातीः "पीरदुपधात्" (३।१।८८ पा०) इति स्वतोऽपवादः यत-प्रत्ययः] किञ्चन किमपि, वस्तु इति शेषः, नास्ति हि नास्त्येव, यतः चाक्षुषेण निरस्तेऽपि इति भावः, बुद्ध्या बुद्धिप्रभावेण, असिपाणयः खड्गधारिणः, [पाणौ असयो येषां ते इति बहुव्रीहौ "प्रहरणार्थेभ्यः परे निष्ठासदृश्यो" इति वार्त्तिकसूत्रेण पूर्वनिपातः] नन्दाः नन्दवंशीया नव राजानः, हताः विनाशं नीताः ॥ ४६ ॥

नेति।—यत्र वायोः पवनस्य, विवस्वतः सूर्यस्य, रश्मीनाञ्च गतिः प्रवेशः, न अस्ति, बुद्धिमतां बुद्धिः तत्रापि आशु शीघ्रं, सदा प्रविशति ॥ ४७ ॥

(ठ) पितृपर्य्यायाऽऽगतं—पितृक्रमाऽऽयातं, पितृपैतामहिकमित्यर्थः।

नेति।—यत्र यस्मिन् स्थाने जन्मनः सम्भवः उत्पत्तिरित्यर्थः, आदिति शेषः, तस्मिन् कुस्थानेऽपि व्याधिशोकभयादिकारणानां बाहुल्यतया सङ्क्लेशकुदेशेऽपीति भावः, पुंसां यत् सौख्यं भवेत्, दिव्यस्पर्शनशोभने दिव्यानां दिवि भवानां, स्वर्गीयाणामित्यर्थः, शब्दनामिति शेषः,[दिव्शब्दात् भवार्थे यत्-प्रत्ययः] स्पर्शनेन शोभने मनोरमे, स्वर्गेऽपि तत् सौख्यं, [सुखमेव सौख्यं, सुखशब्दात् "चतुर्वर्णादीनां स्वार्थे उपसङ्ख्यानम्" इति वार्त्तिकसूत्रेण अञ्-प्रत्ययः] न स्यात् ॥ ४८ ॥

(ड) धीवरैः,—जालजीविभिः।

बुद्धौ सभार्य्यौ पलायमानौ चिरम् आत्मानं गतिविशेषविज्ञानैः कुटिलचारेण रक्षन्तौ अपि जाले पतितौ व्यापादितौ च। अथ अपराह्णसमये प्रहृष्टास्ते धीवराः स्वगृहं प्रति प्रस्थिताः। गुरुत्वाच्च एकेन शतबुद्धिः स्कन्धे कृतः, सहस्रबुद्धिः प्रलम्बमानो नीयते। ततश्च (ढ) वापीकण्ठोपगतेन मण्डूकेन तौ तथा नीयमानौ दृष्ट्वा अभिहिता स्वपत्नी,—'प्रिये! पश्य पश्य,—

शतबुद्धिः शिरस्थोऽयं लम्बते च सहस्रधीः।
एकबुद्धिरहं भद्रे! क्रीडामि विमले जले' ॥ ४९ ॥

अतश्च 'वरं बुद्धिर्न सा विद्या' इत्यादि यत् भवता उक्तं, तत्रेयं मे मतिः यत्, (ण) न एकान्ते बुद्धिरपि प्रमाणम्'। सुवर्णसिद्धिः आह,—'यद्यपि एतदस्ति, तथाऽपि मित्रवचनम् अनुल्लङ्घनीयम्। परं किं क्रियते? निवारितोऽपि मया न स्थितोऽतिलौल्यात् विद्याऽहङ्काराच्च। अथवा साधु इदमुच्यते,—

साधु मातुल! गीतेन मया प्रोक्तोऽपि न स्थितः।
अपूर्वोऽयं मणिर्लब्धः मम्माणं गीतलक्षणम्' ॥ ५० ॥

चक्रधर आह,—"कथमेतत्?" सोऽब्रवीत्,—

(ढ) वापीति।—वाप्याः,—दीर्घिकायाः, कण्ठः,—सन्निधानं, समीपमित्यर्थः, ("कण्ठो गले सन्निधाने ध्वनौ मदनपादपे" इति मेदिनी) तम् उपगतः तेन।

शतबुद्धिरिति।—५२६ पृष्ठे व्याख्यातोऽयं प्राक् ॥ ४९ ॥

(ण) न एकान्ते इति।—एकान्ते—एकान्ततः, केवलमेव इत्यर्थः, बुद्धिरपि न प्रमाणं—प्रमाणतया गण्यते; दैवस्यैव बलीयस्त्वादिति भावः।

साध्विति।—हे मातुल! साधु भद्रमस्तु, ते इति शेषः, मया प्रोक्तोऽपि सङ्केतितोऽपीत्यर्थः, गीतेन गानप्रियतया इत्यर्थः, ["हेतौ" (२।३।२३ पा०) इति हेत्वर्थे टतीया] न स्थितः न निहतः, न तूष्णीमासीरित्यर्थः, तेन यतः, खेचपतिनेति शेषः; अयं गरुडेशस्य, अपूर्वो मणिः अदृष्टचरमिति भावः, गीतलक्षणं गीतञ्च चिह्नं, पुरस्कारभूतमिति भावः, ("लक्षणं नामि चिह्ने च" इति मेदिनी) सम्माणं सम्मानं; लोके यथा मधरसङ्गीतश्रवणेन परितुष्टाः केचित् गायकाय अभिज्ञानपट्टकादिकं

कथा ६ ।

'कस्मिंश्चित् अधिष्ठाने उद्धतो नाम गर्दभः प्रतिवसति स्म। स सदैव रजकगृहे भारोद्वहनं कृत्वा रात्रौ स्वेच्छया पर्य्यटति, ततः प्रत्यूषे बन्धनभयात् स्वयमेव रजकगृहम् आयाति। रजकोऽपि ततस्तं बन्धनेन नियुनक्ति। अथ तस्य रात्रौ पर्य्यटतः क्षेत्राणि कदाचित् शृगालेन सह मैत्री सञ्जाता। स च (त) पौवरत्वात् वृतिभङ्गं कृत्वा कर्कटिकाक्षेत्रे शृगालसहितः प्रविशति। एवं तौ यदृच्छया (थ) चिर्भटिकाभक्षणं कृत्वा प्रत्यहं प्रत्यूषे स्वस्थानं व्रजतः।

अथ कदाचित् तेन मदोद्धतेन रासभेन क्षेत्रमध्यस्थितेन शृगालोऽभिहितः,—'भो भगिनीसुत! पश्य पश्य!! अतीव निर्मला रजनी; तदहं गीतं करिष्यामि; तत् कथय (द) कतमेन रागेण करोमि?' स आह,—'मातुल! किमनेन वृथा (ध) अनर्थप्रचालनेन? यतः चौरकर्मप्रवृत्तौ आवाम्; निभृतैश्च चौरजारैः अत्र स्थातव्यम्। उक्तञ्च,—

प्रयच्छन्ति, तथा तस्यापि क्षेत्रपतिरिदमुदूखलमिति भावः। सम्यक्: गीतलक्षणः इति पाठो यूक्तः, गीतलक्षणः सम्यक्: अयमपूर्वो मणिबन्धः इति तदर्थः॥ ५०॥

(त) पौवरत्वात्—खुल्लकायत्वात्, ['पा पाने' इति धातोः "छित्वरछत्वरपौवर—"(उणा० ३ पा० १ सू०) इत्यादिना क्वरच्-प्रत्ययः, निपातनादीकारागमश्च। पौवरस्य भावः "तस्य भावस्त्वतलौ"(५।१।११९ पा०)इति त्व-प्रत्ययात् पौवरत्वं, तस्मात्]। वृतिभङ्गं—वृत्तिप्राकारबंशादिकृतप्राचीरभेदम्। कर्कटिकाक्षेत्रे—कर्कटिका नाम फलविशेषः, ("काँकुड़" इति वङ्गभाषा) तस्याः क्षेत्रे, चिर्भटीभूमौ इति यावत्।

(थ) चिर्भटिकाभक्षणं—कर्कटिकाभोजनम्।

(द) कतमेन—बहुषु रागेषु केन, ["वा बहूनां जातियरिप्रश्ने डतमच्"(५।३।९२ पा०)इति किंशब्दात् डतमच्-प्रत्ययेन सिद्धम्]। रागेण—गान्धारादिस्वरग्रामेण,("रागस्तु गात्रयोर्लोहितादिषु। क्षेत्रादावनुरागे च गान्धारादौ नृपेऽपि च॥" इति मेदिनी)।

(ध) अनर्थप्रचालनेन—अनर्थानां—विपदां, प्रचालनं—वहनम्, आहृय

कासयुक्तस्त्यजेत् चौर्यं निद्रालुस्त्यजेत् स पुंश्चलीम् ।
जिह्वालौल्यं कजाऽऽक्रान्तो जीवितं योऽत्र वाञ्छति ॥५१॥

अपरं, त्वदीयं गीतं न मधुरस्वरं, (न) भङ्कृशब्दानुकारं दूरादपि श्रूयते । अत्र क्षेत्रे रक्षापुरुषाः सन्ति ; ते उत्थाय बधं बन्धं वा करिष्यन्ति ; तत् भक्षय तावत् (प) अमृतमयीः चिर्भटीः, मा त्वम् अत्र गीतव्यापारपरो भव' । तत् श्रुत्वा रासभ आह,— 'भोः ! वनाश्रयत्वात् त्वं गीतरसं न वेत्सि ; तेन एतत् ब्रवीषि । उक्तञ्च,—शरज्ज्योत्स्नाहते दूरं तमसि प्रियसन्निधौ ।
धन्यानां विशति श्रोत्रे गीतझङ्कारजा सुधा' ॥ ५२ ॥

आनयनमित्यर्थः, तच्छब्दवाच्यमिति यावत्, तेन । निर्गतैः,—निःशब्दैः, चौरजातैः,—तस्करोपपतिभिरित्यर्थः । अत्र—संसारे ।

कासेति ।—अत्र संसारे, यः जीवितं वाञ्छति अभिलषति, स कासयुक्तः कास-रोगाक्रान्तस्त्यजेत्, चौर्यम् ; निद्रालुस्त्यजेत् निद्रातुरस्त्यजेत् [निद्रालुरिति निपूर्वकात् टुधातोः "स्फिग्पटिपतिदयिनिद्रातन्द्राकृद्भ्य आलुच्" (३।२।१५८ पा०) इति सूत्रेण शीलार्थे आलुच्-प्रत्ययः] पुंश्चलीं कुलटां, प्रच्छन्नव्यभिचारिणीमित्यर्थः, "छिनाल" इति बङ्गभाषा, [पुंसः,—भर्तृसकाशात्, चलति—पुरुषान्तरं गच्छति इति चल्धातोः पचाद्यच्, ततः पुंश्चलशब्दात् "विशेषाद्विधवे" (४।१।४१ पा०) इति स्त्रियां ङीष्-प्रत्ययः । "पुंश्चली धर्षिणी बन्धक्रमती कुलटेत्वरी । स्वैरिणी पांसुला च स्यात्" इत्यमरः]; तथा कजाऽऽक्रान्तः रोगी चेत्, जिह्वालौल्यं रसनाचाञ्चल्यं, लोभमिति यावत्, त्यजेत् त्यजतः ; चौर्यं प्रवृत्ते यदि तदानीं कासोपस्थितिः स्यात्, तदा गृहस्थस्य निद्राभङ्गेन महान् अनर्थः स्यात् ; निद्रातुरस्येव तारकर्मणि मृर्धोदयादिसम्भवे सति महाननर्थः स्यात्, तथा रोगसक्ते लोभात् आहारव्यतिक्रमे सति महद्वा मृत्युरपि सम्भवेदिति भावः ॥५१॥

(न) भङ्केति ।—भङ्कृशब्दम् अनुकरोतीति तादृशं, भङ्कध्वनिसदृशमित्यर्थः, कर्कशमिति यावत् ।

(प) अमृतमयीः,—पीयूषरूपाः, सुरसाः इति यावत् ।

शरज्ज्योत्स्नेति ।—तमसि तिमिरे, दूरम् अत्यर्थं यथा तथा, अरहि वा ज्योत्स्ना चन्द्रातपः, चन्द्रकिरणः इत्यर्थः, [ज्योतिरस्यास्तीति ज्योतिःशब्दात् "ज्योत्स्ना-तमिस्रा—" (५।२।११४ पा०) इत्यादिना निपातनात् न-प्रत्ययः, उपधालोपश्च ।

शृगाल आह,—'भ्राम ! अस्ति एतत्, परं न वेत्ति त्वं गीतं, केवलम् (फ) उन्नदसि ; तत् किं तेन स्वार्थभ्रंशकेन ?' रासभ आह,—'धिक् धिक् मूर्ख ! किमहं न जानामि गीतम् !! तत् यथा (ब) तस्य भेदाः, शृणु,—

सप्त स्वरास्त्रयो ग्रामा मूर्च्छनाश्चैकविंशतिः ।
तानास्त्वेकोनपञ्चाशत् तिस्रो मात्रा लयास्त्रयः ॥ ५३ ॥
स्थानत्रयं यतिपञ्च षड्जाद्यानि रसा नव ।
रागाः षट्त्रिंशतिर्भाषास्त्वारिंशत् ततः स्मृताः ॥ ५४ ॥
पञ्चाशीत्यधिकं श्लोकज्ञोताङ्गानां शतं स्मृतम् ।
स्वयमेव पुरा प्रोक्तं भरतेन श्रुतेः परम् ॥ ५५ ॥

"ज्योत्स्ना चन्द्रातपेऽपि स्यात् ज्योत्स्नायुक्तानिशि श्रुता" इति मेदिनी] मया हते नाशिते सति, प्रियसखिषो प्रेमास्पदजनसमीपे, गीतस्य झङ्कारः स्वनः, तस्मात् लाभा उद्भूता, सुधा अमृतं, धन्यानां पुण्यभाजामिव, [धनं लब्धा इति धनमस्मात् "धनगणं लब्धा" (४।४।८४ पा०) इति यत्-प्रत्ययः] श्रोत्रे कर्णविवरे, विशति ; अकृतपुण्यजनदां न खलु सङ्गीतरसास्वादः सम्भवतीति भावः ॥ ५२ ॥

(फ) उन्नदसि—उच्चैः शब्दायसे । तेन—गीतव्यापारेणेत्यर्थः । स्वार्थभ्रंशकेन—स्वकार्यध्वंसिना ।

(ब) तस्य—गीतस्य । भेदाः,—प्रकाराः ।

सप्तेत्यादि ।—स्वराः निषादादयः, सप्त, ("निषादर्षभगान्धार-षड्जमध्यमधैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥" इत्यमरः) ग्रामाः त्रयः,—"यथा कूटस्थितः सर्वेऽप्येकीभूता भवन्ति हि । तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते ॥ षड्जग्रामो भवेदादौ मध्यमग्राम एव च । निषादग्राम इत्येतत् ग्रामत्रयमुदाहृतम् ॥" इति । एकविंशतिः मूर्च्छनाः स्वराणाम् चतुर्दशचतुर्दशकमभेदाः, "क्रमात् स्वराणां सप्तानामारोह्यवरोहणम् । सा मूर्च्छेत्युच्यते ग्रामस्था एताः सप्त सप्त च ॥" इत्युक्तेः । तानास्तु एकोनपञ्चाशत् । मात्राः तिस्रः । लयाः त्रयः । स्थानानाम् उदात्तादीनां, त्रयम् । यतीनां विरामाणां, पञ्च स्थानानि । आद्यानि मुखानि, षट् । रसाः शृङ्गारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतशान्ताख्याः, नव । रागाः षट्त्रिंशतिः । ततः भाषाः चत्वारिंशत् स्मृताः. एतद्धि गीतस्य अङ्गानां पञ्चाशीत्यधिकं शतं श्रुतम् ।

नान्यद्गीतात् प्रियं लोके देवानामपि दृश्यते।
शुष्कस्नायुखरास्थादात् त्रायं जघाड रावणः॥ ५६॥

तत् कथं भगिनीसुत! माम् अनभिज्ञं वदन् निवारयसि?' शृगाल आह,—'माम! यदि एवं, तदहं तावत् हृतेः द्वारस्थितः क्षेत्रपालम् अवलोकयामि, त्वं पुनः स्वेच्छया गीतं कुरु'। तथा अनुष्ठिते (भ) रासभरटनम् आकर्ण्य क्षेत्रपः क्रोधात् दन्तान् घर्षयन् प्रधावितः; ततो यावत् तेन रासभो दृष्टः, तावत् लगुडप्रहारैः तथा आहतः, यथा प्रताडितो भूपृष्ठे पतितः। ततश्च सच्छिद्रम् (म) उदूखलं तस्य गले बद्ध्वा क्षेत्रपालः प्रसुप्तः। रासभोऽपि स्वजातिस्वभावात् गतवेदनः क्षणेन अभ्युत्थितः। उक्तञ्च,—सारमेयस्य चाश्वस्य रासभस्य विशेषतः।

मुहूर्त्तात् परतो न स्यात् प्रहारजनिता व्यथा॥ ५७॥

ततः तमेव उदूखलम् आदाय हृतिं चूर्णयित्वा पलायितुम्

पुरा भरतेन नाट्यशास्त्रप्रणेता तदाख्येन मुनिना, स्वयमेव श्रुतेः वेदस्य, परम् उत्कृष्टं, सारांशमित्यर्थः, एतत् गीताङ्गमिति शेषः, प्रोक्तम्। लोके जगति, देवानामपि गीतात् अन्यत् प्रियं प्रीतिकरं, न दृश्यते, तथा हि, रावणः मृगाः, कठिनतपश्चरणात् नीरसाः, स्नायवः सूक्ष्मशिराजालभेदा यस्य तथाभूतस्य, शरीरस्य इत्यर्थः, यः खरः सुस्वरः कण्ठध्वनिविशेषः इत्यर्थः, यद्वा,—शुष्काः नीरसाः, याः स्नायवः स्नायुनाम्न्यः धातवस्ताः इत्यर्थः, तासां खराः तन्नाम्न्यध्वनिविशेषाः इत्यर्थः, वीणावादनपूर्वकस्तुतिगीतानीति यावत्, तेन तैर्वा आह्लादात् आनन्दात्, आनन्दजननादिति भावः, त्रायं त्रिशीर्षकं, [त्रीणि शीर्षाणि यस्य तं "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" (५।४।११३ पा०) इति सूत्रेण षच्] जघाड भक्षितवान्; स्तुतिसूचकगानेन हरं प्रीणयामासेति भावः॥५३—५६॥

(भ) रासभरटनं—गर्दभचीत्कारम्। क्षेत्रपः,—क्षेत्रस्वामी। घर्षयन्—दन्तान्निर्घर्षयन्नित्यर्थः, ("दाँत किड़निड़ि" इति बङ्गभाषा)।

(म) उदूखलं—धान्यादिशुण्डनसाधनं काष्ठमयं पात्रम्। तत्र—रासभस्य।

सारमेयस्येति।—सारमेयस्य कुक्कुरस्य, अश्वस्य विशेषतः रासभस्य गर्दभस्य च, प्रहारजनिता व्यथा मुहूर्त्तात् परतः अर्द्धात् परं, न स्यात् न तिष्ठेत्॥ ५७॥

आरब्धः। अत्रान्तरे मृगालोऽपि दूरादेव तं दृष्ट्वा सस्मितम् आह,—'साधु मातुल ! गीतेन' इत्यादि।

तत् भवानपि मया वार्यमाणोऽपि (य) न स्थितः। अथवा साधु इदमुच्यते,—

यस्य नास्ति स्वयं प्रज्ञा मित्रोक्तं न करोति यः।
स एव निधनं याति यथा मन्थरकौलिकः' ॥ ५८ ॥

चक्रधर आह,—'कथमेतत् ?' सोऽब्रवीत्,—

कथा ७।

'कस्मिंश्चित् अधिष्ठाने मन्थरको नाम (र) कौलिकः प्रतिवसति स्म। तस्य कदाचित् (ल) षट्कर्माणि कुर्वतः सर्वषट्कर्मकाष्ठानि भग्नानि। ततः स कुठारम् आदाय वने काष्ठार्थं गतः। स च समुद्रतटं यावत् भ्रमन् प्रयातः, तावत् तत्र शिंशपापादपस्तेन दृष्टः। ततः चिन्तितवान्,—'महान् अयं वृक्षो दृश्यते ; तदनेन (व) कर्त्तितेन प्रभूतानि षट्कर्मोपकरणानि भविष्यन्ति' इति अवधार्य तस्योपरि कुठारमुत्क्षिप्तवान्। अथ तत्र वृक्षे कश्चित् (श) व्यन्तरः समाश्रित आसीत् ; तेन अभिहितं,—'भोः ! मदाश्रयोऽयं

(य) न स्थितः,—रक्षणप्राप्त्याश्रया अपगमनान्न स्थितः, मम वाक्यं न शृतवानिति भावः।

यस्येति।—यस्य स्वयम् आत्मना, आत्मन इत्यर्थः, प्रज्ञा बुद्धिः, नास्ति, यश्च मित्रोक्तं बन्धुवाक्यं, न करोति, स एव मन्थरकौलिको यथा मन्थराख्यतन्तुवायवदित्यर्थः, निधनं नाशं, याति प्राप्नोति ॥५८॥

(र) कौलिकः,—तन्तुवायः।

(ल) षट्कर्माणि—वस्त्रवयनकाष्ठानि। सर्वेति।—सर्वाणि षट्कर्मकाष्ठानि—वस्त्रवयनयन्त्रदारूणि।

(व) कर्त्तितेन—खण्डितेन।

(श) व्यन्तरः,—अत्यौत्कटमक्लिष्टसम्पन्नदेवयोनिविशेषः। मदाश्रयः,—मत्स्थानवासः।

पादपः सर्वथा रक्षणीयः, यतोऽहम् अत्र महासौख्येन तिष्ठामि समुद्रकल्लोलस्पर्शनात् शीतवायुना आप्यायितः'। कौलिक आह,—'भोः! किमहं करोमि? (ष) दारुसामग्रीं विना मे कुटुम्बकदम्बं बुभुक्षया पीड्यते; तस्मात् अन्यत्र शीघ्रं गम्यताम्, अहम् एनं कर्त्तयिष्यामि'। व्यन्तर आह,—'भोः! (स) तुष्टः तव अहम्; तत् प्रार्थ्यताम् अभीष्टं किञ्चित्, रक्षेनं पादपम्' इति। कौलिक आह,—'यदि एवं, तदहं स्वगृहं गत्वा स्वमित्रं स्वभार्य्याञ्च पृष्ट्वा आगमिष्यामि, ततः त्वया देयम्'।

अथ 'तथा' इति प्रतिज्ञाते व्यन्तरेण, स कौलिकः प्रहृष्टः स्वगृहं प्रति निहृत्तः यावत् अग्रे गच्छति, तावत् ग्रामप्रवेशे निजसुहृदं नापितम् अपश्यत्। ततस्तस्य व्यन्तरवाक्यं निवेदयामास यत्,—'अहो मित्र! मम कश्चित् व्यन्तरः सिद्धः; तत् कथय, किं प्रार्थये? अहं त्वां प्रष्टुम् आगतः'। नापित आह,—'भद्र! यदि एवं, तत् राज्यं प्रार्थय, येन त्वं राजा भवसि, अहञ्च त्वन्मन्त्री। द्वौ अपि इह सुखमनुभूय परलोकसुखम् अनुभवावः। उक्तञ्च,—

राजा दानपरो नित्यमिह कीर्त्तिमवाप्य च।
तत्प्रभावात् पुनः स्वर्गे स्थास्यते त्रिदशैः सह' ॥ ५९ ॥

पादपः,—वृक्षः। समुद्रेति।—समुद्रकल्लोलानां—सागरतरङ्गाणां, स्पर्शनात्—स्पर्शादित्यर्थः। आप्यायितः,—पोषितः।

(ष) दारुसामग्रीं—काष्ठमयोपकरणम्। कुटुम्बकदम्बं—परिजनवर्गः। बुभुक्षया—क्षुधया।

(स) तुष्टः,—प्रीतः।

राजेति।—नित्यं सततं, दानपरः त्यागशीलः, राजा इह संसारे, कीर्त्तिं यशः, अवाप्य लब्ध्वा, तत्प्रभावात् तस्य दानस्य माहात्म्यात्, पुनः स्वर्गे त्रिदशैः देवैः, [त्रिः तीया यौवनाख्या दशा सदा येषाम्; यद्वा,—त्रिदशं परिमाणमेषामिति "सङ्ख्या-

कौलिक आह,—'अस्ति एतत् परं, तथाऽपि गृहिणीं पृच्छामि'। स आह,—'भद्र! शास्त्रविरुद्धमेतत्, यत् स्त्रिया सह मन्त्रः; यतस्ताः स्वल्पमतयो भवन्ति। उक्तञ्च,—

भोजनाच्छादने दद्यात् ऋतुकाले च सङ्गमम्।
भूषणाद्यञ्च नारीणां न ताभिर्मन्त्रयेत् सुधीः॥ ६०॥
यत्र स्त्री यत्र कितवो बालो यत्राप्रशासितः।
तत् गृहं क्षयमायाति भार्गवो ह्यदमब्रवीत्॥ ६१॥
तावत् स्यात् सुप्रसन्नाऽऽस्यस्तावत् गुरुजने रतिः।
पुरुषो योषितां यावन्न शृणोति वचो रहः॥ ६२॥

ऽव्ययी—" (२।२।२५ पा०) इत्यादिना बहुव्रीहिः, "बहुव्रीहौ सक्थ्यक्ष्णः—" (५।४।७३ पा०) इत्यादिना डच्। केचित्तु,—त्रीन् तापान् दशन्ति इति "दन्श दंशने" इत्यस्मात् मूलविभुजादित्वात् क-प्रत्यये सिद्धमिति मन्यन्ते। "अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः" इत्यमरः] सह अर्हन्ते देवानां प्रतिअर्हा भवति इत्यर्थः; दानादीनां स्वर्गादिसाधकत्वात् तेषाञ्च वित्तमूलकत्वात् राजपदमेव प्रार्थयितव्यमिति भावः॥५८॥

भोजनेति।—सुधीः पण्डितो जनः, [सु सुष्ठु, ध्यायति चिन्तयति इति सुधीः, सुपूर्वकात् "ध्यै चिन्तायाम्" इत्यस्मात् "ध्यायतेः सम्प्रसारणञ्च" (वा०) इति क्विप् सम्प्रसारणञ्च। "विद्वान् विपश्चित् दोषज्ञः सन् सुधीः कोविदो बुधः।.....पण्डितः कविः" इत्यमरः] नारीणां भोजनाच्छादने अन्नवस्त्रे, भूषणाद्यञ्च अलङ्कारादिकञ्च, दद्यात्, ऋतुकाले रजःप्रवृत्तिसमये च, रजोदर्शनात् दिनानन्तरमिति भावः, सङ्गमं, कुर्यात् इति शेषः, किन्तु ताभिः सह न मन्त्रयेत् न मन्त्रणां कुर्यात्॥ ६०॥

यत्रेति।—यत्र स्त्री मन्त्रणादायिनीति भावः, यत्र कितवः धूर्तः, वञ्चक इति यावत्, ("कितवो धूर्तवञ्चके वञ्चके कलकाङ्क्षिये" इति विश्वः) वसतीति शेषः, यत्र बालश्च अप्रशासितः अदमितः, तिष्ठतीति शेषः, हि नूनं, तत् गृहं क्षय ध्वंसं आयाति प्राप्नोति, इदं भार्गवः भृगुतनयः शुक्रः, [भृगोरपत्यमिति भृगुशब्दात् "कृत्यल्युटोबहुलम्" (४।१।११४ पा०) इत्यण्। "भार्गवो गजधन्विनोः। शुक्र परशुरामे च" इति मेदिनी] अब्रवीत्। ["बालो यत्र प्रशासिता" इति पाठे—प्रशासिता प्रशासकः, इत्येवं व्याख्येयम]॥ ६१॥

तावदिति।—पुरुषः यावत् रहः निर्जने, योषितां वचः न शृणोति स्त्रियाः

एताः स्वार्थपरा नार्य्यः केवलं स्वसुखे रताः।
न तासां वल्लभः कोऽपि सुतोऽपि स्वसुखं विना' ॥ ६१ ॥

कौलिक आह,—'तथाऽपि प्रष्टव्या सा मया, यतः पतिव्रता सा। अपरं, ताम् अपृष्ट्वा अहं न किञ्चित् करोमि'। एवं तमभिधाय सत्वरं गत्वा ताम् उवाच,—'प्रिये! अद्य अस्माकं कश्चित् व्यन्तरः सिद्धः, स वाञ्छितं प्रयच्छति, तद्गृहं त्वां प्रष्टुम् आगतः, कथय, किं प्रार्थये? एष तावत् मम मित्रं नापितो वदति एवं यत्, 'राज्यं प्रार्थयस्व' इति'। सा आह,—'आर्य्यपुत्र! का मतिर्नापितानाम्! तत् न कार्य्यं तद्वचः। उक्तञ्च,—

चारणैर्बन्दिभिर्नीचैर्नापितैर्बालकैस्तथा।
न मन्त्रं मतिमान् कुर्य्यात् सार्द्धं भिक्षुभिरेव च ॥ ६४ ॥

गुरूपदेशेन न चलतीत्यर्थः, तावत् सुप्रसन्नम् आस्यं सुखं यस्य तादृशः स्यात्, तावच्च अस्य गुरुजने पितरीव, रतिः अनुरागः, भक्तिरिति यावत्, तिष्ठतीति शेषः; रसज्ञोऽन्यपरिचालितस्तु पोष्यवर्गं कृपोष्यं मत्वा सदा पेषकगम्भीरमुखः गुर्वादौ भक्तिशून्यश्च दृश्यते इति तात्पर्य्यम ॥ ६२ ॥

एता इति।—एताः नार्य्यः केवलं स्वार्थपराः स्वकार्य्यसाधनपरायणाः, अस्य आत्मनः, सुखे रताश्च, भवन्तीति शेषः, स्वसुखम् आत्मसुखं विना, कोऽपि जनः, तासां नारीणां, वल्लभः प्रियः, दयित इति यावत्, ["वल्ल संवरणे" इति वल्लधातोः "रासिवल्लिभ्याञ्च" (उणा० ३ पा० १२५ सू०) इत्यभच्-प्रत्ययः। "वल्लभो दयिते-ऽश्वे सङ्घचषचतुरङ्गने" इति विश्वः] न, किं बहुना? सुतोऽपि पुत्रोऽपि, न वल्लभ इत्यनुषङ्गः ॥ ६३ ॥

चारणैरिति।—मतिमान् बुद्धिमान् जनः, चारणैः नटवृत्तिभिः कुशीलवैरित्यर्थः, [चक्षयन्ति कीर्त्तिम् इति चरधातोः णिजन्तात् "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (३।१।१३४ पा०) इति ल्युः। "चारणास्तु कुशीलवाः" इत्यमरः] बन्दिभिः स्तुतिपाठकैः, [बन्दते स्तुवन्ति इति बदिधातोः ग्रहादित्वात् "नन्दिग्रहि—" इत्यादिना णिनिः। "बन्दिनः स्तुतिपाठकाः" इत्यमरः] नीचैः क्षुद्रैः, नापितैः बालकैः तथा भिक्षुभिश्च याचकैश्च, [भिक्षधातोः "गवाश्वप्रभृतिभ्य उः" (३।२।१६८ पा०) इति उ-प्रत्ययः] सार्द्धं सह, मन्त्रं न कुर्य्यादेव; प्रकाशभीत्येत्यभिप्रायः ॥ ६४ ॥

अपरं, महती (ह) क्लेशपरम्परा एषा राज्यस्थितिः, सन्धिविग्रहयानाऽऽसनसंश्रयद्वैधीभावादिभिः कदाचित् पुरुषस्य सुखं न प्रयच्छतीति । यतः,—

(ह) क्लेशपरम्परा—क्लेशनिचयः, दुःखानुबन्धिनी इत्यर्थः । राज्यस्थितिः,—राज्यपालनम् । सन्धीति ।—सन्धिः,—बलवता विगृह्यतेन नृपेण स्वशक्तिपूरणाय कालातिवाहनार्थं कृतेन पणबन्धेन सम्मेलनम् ; विग्रहः,—युद्धम् ; यानं—बलवीर्यसम्पन्नस्य विजिगीषोः शत्रुं प्रति यात्रा ; आसनम्—अविविजिगीष्वोः परस्परं तुल्यशक्तिमत्त्वात् आक्रमणानन्तरमुपेक्षया अवस्थानं, सन्धिः प्रतिबद्धशत्रोः कालप्रतीक्षया तूष्णीमवस्थानमिति यावत् ; संश्रयः,—बलिना स्वदेशात् निष्काश्यमानस्य प्रतीकारासमर्थस्य च तस्मात् शत्रोः बलवतः आश्रयणम् ; द्वैधीभावः,—बलवतोर्द्वयोः शत्रोः समीपं 'इदं राज्यमदृष्ट तवाधीनः' इत्येवमुभयोरेव परस्परात्मातत्त्वयोः कालाविवदलक्षिततया वाचा आत्मसमर्पणपूर्वकं दुर्गाश्रयेणावस्थानमित्यर्थः ; अथायमाशयः,—यथा एकस्य कालक्षपणात् प्रयोजनवशात् द्वयोरविविजिगीषुकयोः कस्मिन् गोलके सत्ता दृष्टा कैश्चिदपि निर्णेतुं न शक्यते, तथा प्रयोजनवशात् उभयोरेव शत्रोः कपटतया अलक्षितावस्थानम् इति ; बलवति शत्रौ केवलं कापट्येन वाचिकमात्मसमर्पणं कृत्वा अलक्षितभावेनावस्थानमिति वा; बलवता शत्रुणा, 'अयं मयि आत्मानं सर्वथा समर्पितवान् । अत एवास्मिन्नेव केवलम् आत्मानं समर्पितवान् इति वदन्त' एतत् यथा न ज्ञात्वा शत्रुः, तथा कृत्वा कृत्रिमम् अवस्थानमिति शत्रुः ; स च द्वैधीभावः द्विविधः,—एकः स्वतन्त्रः, परतन्त्रश्च ; तयोः स्वतन्त्रः उक्तविधः ; परतन्त्रस्तु—यः प्रथमं अविविजिगीष्वोरुभयोरेव सकाशात् वेतनमादत्ते कालाविवदलक्षितभावेन उभयत्रैव वर्तते, स परकर्मप्रधानत्वात् परतन्त्रः, तदादिभिः,—तन्त्रप्रभृतिभिः । षाड्गुण्यमुक्तं कामन्दकीये यथा,—"बलिना विगृहीतः सन् नृपोऽनवप्रतिक्रियः । आपन्नः सन्धिमन्विच्छेत् कुर्वाणः कालयापनम् ॥" "अनर्थोपगृहीतानां सन्धुमुत्पन्नचेतसाम् । परस्परापकारेण पुंसां भवति विग्रहः ॥ आत्मनोऽभ्युदयाकाङ्क्षी पीड्यमानः परेण वा । हीयमानबलोपेतः प्रारभेतैव विग्रहम् ॥" "उत्कृष्टबलवीर्यस्य विजिगीषोर्जयैषिणः । गुणानुरक्तप्रकृतेर्यात्रा यानमिति स्मृतम् ॥" "परस्परस्य सामर्थ्याविघातादासनं स्मृतम् । परस्य विजिगीषोश्च—॥" "बलिनोर्विग्रहीतोर्द्वयोर्यच्चाऽऽत्मानं समर्पयन् । द्वैधीभावेन वर्तेत कालाविवदलक्षितः ॥ द्वैधीभावो द्विधा प्रोक्तः स्वतन्त्रपरतन्त्रयोः । स्वतन्त्र उक्तो ह्यन्यस्तु यः स्यादुभयवेतनः ॥" "उच्छिद्यमानो

यदैव राज्ये क्रियतेऽभिषेकस्तदैव याति व्यसनेषु बुद्धिः।
घटा नृपाणामभिषेककाले सद्भाग्यसेवापटमुद्भिरन्ति ॥६५॥

तथा च,—रामस्य व्रजनं वने निधनं पाण्डोः सुतानां वनं
द्रुणीनां निधनं नलस्य नृपतेः राज्यात् परिभ्रंशनम्।
सौदासं तदवस्थमर्जुनवधं सञ्चिन्त्य लङ्केश्वरं
दृष्ट्वा राज्यकृते विडम्बनगतं तस्मान्न तत् वाञ्छयेत् ॥६६॥
यदर्थं भ्रातरः पुत्रा अपि वाञ्छन्ति ये निजाः।
बधं राज्यकृतां राज्ञां तद्राज्यं दूरतस्त्यजेत्' ॥६७॥

बलिना निहतायप्रतिक्रियः। कलीङ्गतं मत्तमातंगमाश्रयेत यमोत्कटम॥" इति। एवाच्च बहवो भेदा विस्तरभयान्नात्र उल्लिखिताः, जिज्ञासुभिः तत्रैव अनुसन्धेयाः।

यदैवेति।—४२६ पृष्ठे व्याख्यातः। पाठान्तरत्वात् अथायं विशेषः,—याति गच्छति, व्यसननिरता भवति इत्यर्थः, द्यूतयादिषु कामक्रोधादिजेषु दोषेषु वा नृपाणां बुद्धिरासज्यते इति निष्कर्षः। अथवा यदैव यदैव अभ्राणि उद्भिरन्ति, तदैव इत्यर्थः, आपदमपि उद्भिरन्ति ॥६५॥

रामस्येति।—रामस्य दाशरथेरिति यावत्, व्रजनं प्रयाणं, निर्वासनमित्यर्थः, तथा वने निधनम् अवस्थानम्; चतुर्दशवर्षमिति यावत्; सौदासं कल्माषपादाभिधानं सूर्यवंशीयराजविशेषं, तदवस्थं गुरोरभिशापात् राक्षसयोनिमापन्नमिति भावः; तथा अर्जुनवधं कार्त्तवीर्यार्जुननिधनं, परशुरामेणेति भावः; तथा लङ्केश्वरं रावणञ्च, राज्यकृते राज्यार्थं, विडम्बनगतं प्राप्तविडम्बनम्, अनुभूतक्लेशमित्यर्थः, सञ्चिन्त्य संस्मृत्य, दृष्ट्वा च, पुराणादौ इति भावः, प्राप्तप्रबोधोऽभूदिति शेषः; तस्मात् राज्यस्य विडम्बनहेतुत्वात्, तत् राज्यं, न वाञ्छयेत न कामयेत, बुद्धिमानिति शेषः। अवशिष्टः ४२७ पृष्ठे व्याख्यातः ॥६६॥

यदर्थमिति।—ये निजाः स्वकीयाः, भ्रातरः सोदराः इत्यर्थः, तथा ये च पुत्राः, ते अपि यदर्थे यस्य राज्यस्य कृते, राज्यकृतां राज्यं पालयतां, राज्ञां ["कर्तृकर्मणोः कृति" (२।३।६५ पा०) इति कर्मणि षष्ठी] बधं निधनं, [हन्यतेः: "हनस्च बधः" (३।३।७६ पा०) इति भावे अप्, बधादेशश्च, पक्षे,—वधमपि, यथा—घातः] वाञ्छन्ति प्रार्थयन्ते, तत् राज्यं दूरतः दूरे क्षिप्त्वा, त्यजेत् परिहरेत्; परलोकोत्तिलतो बन्धवोऽपि यदर्थं शत्रवो भवन्ति, तत्तु न सृशेदिति भावः ॥६७॥

कौलिक आह,—'सत्यमुक्तं भवत्या ; तत् कथय, किं प्रार्थये ?' सा आह,—'त्वं तावटेकं (क) पटं नित्यमेव निष्पादयसि, तेन सर्वा व्ययगुद्धिः सम्पद्यते। इदानीं त्वम् आत्मनोऽन्यत् बाहुयुगलं द्वितीयं शिरश्च याचस्व, येन पटद्वयं सम्पादयामि (ख) पुरतः पृष्ठतश्च। एकस्य मूल्येन गृहे यथापूर्वं व्ययं सम्पादयिष्यसि, द्वितीयस्य मूल्येन (ग) विशेषकृत्यानि करिष्यसि, एवं सौख्येन स्वजातिमध्ये (घ) श्राघ्यमानस्य कालो यास्यति, लोकद्वयस्य च उपार्जना भविष्यति'। सोऽपि तदाकर्ण्य प्रहृष्टः प्राह,—'साधु पतिव्रते ! साधु, युक्तमुक्तं भवत्या ; तदेवं करिष्यामि, एष मे निश्चयः'। ततोऽसौ गत्वा व्यन्तरं प्रार्थयाञ्चक्रे,—'भोः ! यदि मम ईप्सितं प्रयच्छसि, तत् देहि मे द्वितीयं बाहुयुगलं शिरश्च'। एवम् अभिहिते तत्क्षणादेव द्विशिराः चतुर्बाहुश्च सञ्जातः। ततो हृष्टमना यावत् गृहम् आगच्छति, तावत् लोकैः 'राक्षसोऽयम्' इति मन्यमानैः लगुडपाषाणप्रहारैः ताडितो मृतश्च। अतोऽहं ब्रवीमि,—'यस्य नास्ति स्वयं प्रज्ञा' इत्यादि'।

चक्रधरः आह,—'भोः ! सत्यमेतत्, सर्वोऽपि जनः (ङ) अश्रद्धेयामाशापिशाचिकां प्राप्य हास्यपदवीं याति। अथवा साधु इदमुच्यते केनापि,—

(क) पटं—वस्त्रम्। निष्पादयसि—वयसि इत्यर्थः। व्ययगुद्धिः,—व्ययनिर्वाहः।

(ख) पुरतः,—वनचम्। पृष्ठतः,—पश्चाद्भागे।

(ग) विशेषकृत्यानि—दानादीनि फलाधिक्यानि कार्याणीत्यर्थः।

(घ) श्राघ्यमानस्य—प्रशस्यमानस्य। लोकद्वयस्य—ऐहिकपारत्रिकरूपस्य। उपार्जना—संसाधनम्।

(ङ) अश्रद्धेयां—अश्रद्धानहीं, वृथामित्यर्थः, आशापिशाचिकां—दुराशारूपिणीं पिशाचीम्।

अनागतवतीं चिन्तामसम्भाव्यां करोति यः।
स एव पाण्डुरः शेते सोमशर्मपिता यथा' ॥ ६८ ॥

सुवर्णसिद्धिः आह,—'कथमेतत् ?' सोऽब्रवीत्,—

कथा ८।

'कस्मिंश्चित् नगरे कश्चित् स्वभावकृपणो नाम ब्राह्मणः प्रतिवसति स्म ; तेन भिक्षार्जितैः (च) शक्तुभिः भुक्तशेषैः कलसः सम्पूरितः। तच्च घटं (छ) नागदन्ते अवलम्ब्य तस्य अधस्तात् खट्वां निधाय सततम् एकदृष्ट्या तम् अवलोकयति। अथ कदाचित् रात्रौ (ज) सुप्तः चिन्तयामास यत्,—'परिपूर्णोऽयं घटस्तावत् शक्तुभिः वर्त्तते !! तत् यदि दुर्भिक्षं भवति, तदा अनेन रूपकाणां शतमुत्पद्यते ; ततस्तेन मया (झ) अजाद्वयं ग्रहीतव्यम्। ततः (ञ) षाण्मासिकप्रसववशात् ताभ्यां यूथं

अनागतवतीमिति।—यः अनागतवतीम् अनुपस्थिताम्, असम्भाव्यां सम्भावनारहितां, चिन्तां करोति, स सोमशर्मणः पिता यथा, तथा पाण्डुरः पीताङ्गनिश्चितश्वेतवर्णविशिष्टः, पाण्डुवर्णः सन् इति यावत्, [पाण्डुवर्णोऽस्यास्तीति पाण्डुशब्दात् "तत्पाण्डुपाण्डुभ्यश्च" (वा०) इति रः। "पाण्डुस्तु पीतभागार्द्धकेतकीधूलिसन्निभः" इति शब्दार्णवः। "हरिणः पाण्डुरः पाण्डुः" इत्यमरश्च] शेते एव म्रियते; सन् दुःखमनुभवत्येवेत्यर्थः॥ ६८ ॥

(च) शक्तुभिः,—भृष्टयवचूर्णैः। भुक्तशेषैः,—भक्षितावशिष्टैः, खट्वैः खच्छिद्रैर्वा।

(छ) नागदन्ते—खट्वाङ्गिगतदारुणि, खट्वभित्तौ प्रोते दृढविशेषे इत्यर्थः, ("नागदन्तो द्विपरदे खट्वाङ्गिगतदारुणि" इति मेदिनी)।

(ज) सुप्तः,—शयितः,, ("स्वापः शयननिद्रयोः" इति मेदिनी)। रूपकाणां शतं—शतं रौप्यमुद्रा इत्यर्थः।

(झ) अजाद्वयं—छागीयुगलम्। ग्रहीतव्यं—क्रेतव्यमित्यर्थः।

(ञ) षाण्मासिकेति।—षड्भिः मासैः निष्पन्नः षाण्मासिकः, ["षण्मासाच्च्यच्" (५।१।८२ पा०) इति ठक्] स आजौ प्रसववेति, तस्मात्—तत्रैतीः ; छागी हि षड्भिर्मासैरपत्यं प्रसूयते इति प्रसिद्धिः।

भविष्यति। ततोऽजाभिः प्रभूता गाः ग्रहीष्यामि; गोभिः महिषीः, महिषीभिः (ट) बड़वाः, बड़वाप्रसवतः प्रभूता अश्वा भविष्यन्ति; तेषां विक्रयात् प्रभूतं सुवर्णं भविष्यति; सुवर्णेन चतुःशालं गृहं सम्पत्स्यते; ततः कश्चित् ब्राह्मणो मम गृहम् आगत्य प्राप्तवयस्कां (ठ) रूपाढ्यां कन्यां दास्यति; तत्-सकाशात् पुत्रो मे भविष्यति, तस्य अहं सोमशर्मेति नाम करिष्यामि। ततः तस्मिन् (ड) जानुचलनयोग्ये सञ्जातेऽहं पुस्तकं गृहीत्वा अश्वशालायाः पृष्ठदेशे उपविष्टः तदवधारयिष्यामि। अत्रान्तरे सोमशर्मा मां दृष्ट्वा (ढ) जनन्युत्सङ्गात् जानु-प्रचलनपरः अश्वखुरान्तरवर्त्ती मत्समीपम् आगमिष्यति। ततोऽहं ब्राह्मणीं कोपाविष्टोऽभिधास्यामि,—'गृहाण तावत् बालकम्'। साऽपि गृहकर्मव्यग्रतया अस्मद्वचनं न श्रोष्यति, ततोऽहं समुत्थाय तां पादप्रहारेण ताड़यिष्यामि'। एवं तेन (ण) ध्यानस्थितेन तथा एव पादप्रहारो दत्तः, यथा स घटो भग्नः शक्तुभिः पाण्डुरतां गतः। अतोऽहं ब्रवीमि,—'अनागतवतीं चिन्ताम्' इत्यादि'।

सुवर्णसिद्धिः आह—'एवमेतत्, कस्ते दोषः? यतः सर्वोऽपि लोभेन (त) विड़म्बितो बाध्यते। उक्तञ्च,—

(ट) बड़वाः,—अश्वाः। चतुःशालं—चतसृषु दिक्षु शालाः,—गृहाणि यस्य तादृशं, परस्पराभिमुखगृहचतुष्टयसम्पन्नभवनमित्यर्थः, ईर्ष्यम् इति भावः।

(ठ) रूपाढ्यां—सौन्दर्यसम्पन्नाम। तत्सकाशात्—तस्याम् इत्यर्थः।

(ड) जानुचलनयोग्ये—जानुभ्यां—जानुद्वयबलाभ्यामित्यर्थः, चलनयोग्ये—समर्थे। तदवधारयिष्यामि—पुस्तकं वाचयिष्यामि इत्यर्थः।

(ढ) जनन्युत्सङ्गात्—मातुः क्रोड़ात्। जानुप्रचलनपरः,—जानुभ्यां विहरण-प्रयासवः। अन्तेति।—घोटकखुरसमीपस्थो भूत्वा इत्यर्थः।

(ण) ध्यानस्थितेन—चिन्तामग्नेन। पाण्डुरतां—पाण्डुवर्णतां, क्षयमिति शेषः।

(त) विड़म्बितः,—प्रतारितः इत्यर्थः। बाध्यते—पीड्यते।

यो लौल्यात् कुरुते कर्म नैवोदर्कमवेक्षते।
विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः' ॥ ६९ ॥

चक्रधर आह,—'कथमेतत् ?' स आह,—

कथा ९।

'कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्रा वानरक्रीड़ारताः वानरयूथं नित्यमेव अनेकभोजन-भक्ष्यादिभिः पुष्टिं नयन्ति स्म। अथ वानरयूथाधिपो यः, स (थ) औशनस-बार्हस्पत्य-चाणक्यमतवित्, तदनुष्ठाता च तान् सर्वानपि अध्यापयति स्म। अथ तस्मिन् राजगृहे (द) लघु-कुमारवाहनयोग्यं मेषयूथमस्ति; तच्चाध्यात् एको जिह्वालौल्यात् अहर्निशं निःशङ्कं महानसे प्रविश्य यत् यत् पश्यति तत् सर्वं भक्षयति। ते च (ध) सूपकाराः यत्किञ्चित् काष्ठं मृन्मयं

य इति।—यः लौल्यात् चापल्यात्, लोभादित्यर्थः, कर्म कुरुते, उदर्कम् औत्तर-कालिकं फलं, परिणामम् इत्यर्थः, ("उदर्कः फलमुत्तरम्" इत्यमरः) नैव अवेक्षते न च पश्यति, न आलोचयति इत्यर्थः, स चन्द्रभूपतिर्यथा चन्द्राख्यनृपतिरिव, विडम्बनां तिरस्कारं, क्लेशमिति यावत्, अवाप्नोति लभते ॥ ६९ ॥

(थ) औशनसेति।—उशनसा प्रोक्तम् औशनसं—युक्तप्रोक्तम् इत्यर्थः, ["तेन प्रोक्तम्" (४।३।१०१ पा०) इति अण्-प्रत्ययः] बृहस्पतिना प्रोक्तं बार्हस्पत्यं—बृहस्पतिप्रोक्तम् इत्यर्थः, ["तेन प्रोक्तम्" इति यञ्:] चाणक्येन प्रोक्तं [पूर्ववदण्-प्रत्ययः] यन्मतं तत् वेत्तीति तद्वित्, विविधनीतिशास्त्रज्ञ इत्यर्थः, तदनुष्ठाता—औशनसादिप्रोक्तनयमार्गानुसारी इत्यर्थः। [उशनस्-शब्दस्य प्रथमायाम् "उशना" इति निर्वचने पदम्; सम्बोधने च—"हे उशन उशनन् उशनः" इति पदत्रयं भवति]। तान् सर्वान्—वानरानित्यर्थः।

(द) तच्चिति।—तच्च—क्षुद्राणां, कुमाराणां—शिशूनां, वाहनयोग्यं—यानोपयोगि। एकः, सेव इति शेषः। जिह्वालौल्यात्—रसनाचापल्यात्, लोभात् इत्यर्थः। महानसे—पाकस्थाने, रन्धनशालायामित्यर्थः, ("रसवत्यान्तु पाक-स्थानमहानसे" इत्यमरः)।

(ध) सूपकाराः,—पाचकाः। मृन्मयं—मृत्तिकानिर्मितमित्यर्थः, [मृदो विकारः इति मयट्, पदान्तलात् यलोपाभावः]।

भाजनं कांस्यपात्रं ताम्रपात्रं वा पश्यन्ति, तेनाशु ताड़यन्ति। सोऽपि वानरयूथपः तद्दृष्ट्वा व्यचिन्तयत्,—'अहो! मेषसूपकार-कलहोऽयं वानराणां (न) क्षयाय भविष्यति; यतो अन्नास्वाद-लम्पटोऽयं मेषः, महाकोपाश्च सूपकाराः यथासन्नवस्तुना प्रहरन्ति; तत् यदि वस्तुनोऽभावात् कदाचित् (प) उल्मुकेन ताड़यिष्यन्ति, तदा ऊर्णाप्रचुरोऽयं मेषः क्षणेनैव वह्निना प्रज्वलिष्यति, दह्यमानः पुनः अग्रकुट्यां समीपवर्त्तिन्यां प्रवेक्ष्यति, (फ) साऽपि तृणप्राचुर्य्यात् ज्वलिष्यति; ततोऽस्मा वह्निदाहम् अवाप्स्यन्ति। (ब) ग्रालिहोत्रेण पुनः एतदुक्तं यत्, —'वानरवसया अग्नानां वह्निदाहदोषः प्रशाम्यति' तत् नूनम् एतेन भाव्यम् अत्र निश्चयः'। एवं निश्चित्य सर्वान् वानरान् आहूय रहसि प्रोवाच। यतः,—

'मेषेण सूपकाराणां कलहो यत्र जायते।
स भविष्यत्यसन्दिग्धं वानराणां क्षयावहः॥ ७०॥

(न) क्षयाय—विनाशाय। अन्नेति।—अन्नस्य आस्वादे लम्पटः,—लालसः, लुब्ध इत्यर्थः, अत एव अयं कामं प्रहृतोऽपि नास्मात् कदाऽपि निवर्त्तिष्यते इत्याशयः। यथासन्नवस्तुना—निकटस्थेन येन केनाऽपि वस्तुना इत्यर्थः।

(प) उल्मुकेन—अङ्गारेण, ज्वलत्काष्ठेन इत्यर्थः, ("अथ न स्त्री खादङ्गारी-ऽलातमुल्मुकम्" इत्यमरः) ऊर्णाप्रचुरः,—लोमबहुलः, ("ऊर्णा मेषादिलोम्नि स्यात्" इत्यमरः)। अग्रकुट्याम्—अग्रशालायाम्।

(फ) साऽपि—अग्रकुटी। तृणप्राचुर्यात्—तृणबाहुल्यात्।

(ब) ग्रालिहोत्रेण—केनचित् अग्निहोत्राग्राह्मणेन। वानरवसया—वानरमेदसा। एतेन—एवंविधेन आग्नेयेन।

मेषेणेति।—यत्र मेषेण, सह इति शेषः, सूपकाराणां पाचकानां, [सूपं कुर्वन्ति इति सूपोपपदात् कृञः "कर्मण्यण्" (३।२।१ पा०) इत्यण्] कलहः जायते, ("दृश्यते" इति पाठान्तरम्) तत्र सः, कलह इति शेषः, असन्दिग्धं निःसंशयं, वानराणां क्षयावहः विनाशप्रदः, भविष्यति॥ ७०॥

तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः ।
तत् गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत् ॥ ७१ ॥

तथा च,—कलहान्तानि हर्म्याणि कुवाक्यान्तश्च सौहृदम् ।
कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् ॥ ७२ ॥

तत्र यावत् सर्वेषां सङ्गत्यो भवति, तावदेतत् राजगृहं सन्त्यज्य वनं गच्छामः' । अथ तत् तस्य वचनम् अश्रद्धेयं श्रुत्वा मदोद्धता वानराः प्रहस्य प्रोचुः,—'भोः ! भवतो हृदभावात् (भ) बुद्धिवैकल्यं सञ्जातं, येन एतत् ब्रवीषि । उक्तञ्च,—

वदनं दशनैर्हीनं लाला स्रवति नित्यशः ।
न मतिः स्फुरति क्वापि बाले वृद्धे विशेषतः ॥ ७३ ॥

न वयं स्वर्गसमानोपभोगान् नानाविधान् भक्ष्यविशेषान्

तस्मादिति ।—तस्मात् कलहस्य अनिष्टकरत्वात्, यत्र गृहे नित्यं सततम्, अकारणः निरर्थकः, कलहः स्यात्, जीवितं वाञ्छन् इच्छन्, जनः इति शेषः, तत् गृहं दूरतः परिवर्जयेत् परित्यजेत् ; तत्र गृहे न तिष्ठेदित्यर्थः ॥ ७१ ॥

कलहान्तानीति ।—हर्म्याणि धनवतां वासगृहाणि, अट्टालिकाः इति यावत्, कलहेन अन्तः अवसानं येषां तानि, यत्र हर्म्ये कलहश्चलति, तत् शीघ्रं क्षयं यातीत्यर्थः, हर्म्याधिकारिणः परस्परं विवदमानाः स्वं स्वमंशं विभज्य यदृच्छात् हर्म्यविनाशः वेदितव्यः ; सौहृदं मैत्रं, कुवाक्येन अन्तः नाशः यस्य तथोक्तं, कुवाक्यन सौहार्दं नश्यतीत्यर्थः ; राष्ट्राणि कुराजान्तानि कुराजेन अन्तो नाशो येषां तादृशानि, राजदोषेणैव राष्ट्रं ध्वंसं गच्छतीत्यर्थः ; नृणां यशः कुकर्मान्तं कुकर्मणा अन्तो यस्य तादृशं, दुष्कर्मणा यशो नश्यतीत्यर्थः ॥ ७२ ॥

(भ) बुद्धिवैकल्यं—मतिभ्रंशः ।

वदनमिति ।—वदनं मुखं, वृद्धस्य बालकस्य चेति शेषः, दशनैः दन्तैः, हीनं शून्यं, पतनादशून्यमाहेति भावः, नित्यशः सततं, [नित्यं नित्यम इति वीप्सार्थे "सङ्ख्यैकवचनाच्च वीप्सायाम्" (५।४।४२ पा०) इति शस्-प्रत्ययः] लाला स्रवति क्षरति, वदनादिति शेषः ; तथा बाले शिशौ, विशेषतः वृद्धे क्वापि कुत्रचिदपि, मतिः बुद्धिः, न स्फुरति न विलसति ॥७३॥

राजपुत्रैः स्वहस्तदत्तान् अमृतकल्पान् परित्यज्य तत्र अटव्यां कषायकटुतिक्तक्षाररूक्षफलानि भक्षयिष्यामः'। तत् श्रुत्वा (म) अश्रुकलुषां दृष्टिं कृत्वा स प्रोवाच,—'रे रे मूर्खाः! यूयम् एतस्य सुखस्य परिणामं न जानीथ; किं न (य) पापरसास्वादनप्रायम् एतत् सुखं परिणामे विषवत् भविष्यति? तदहं कुलक्षयं स्वयं न अवलोकयिष्यामि, साम्प्रतं वनं यास्यामि। उक्तञ्च,—मित्रं व्यसनसम्प्राप्तं स्वस्थानं परपीड़ितम्।

धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम्' ॥ ७४ ॥

एवम् अभिधाय सर्वान् तान् परित्यज्य स यूथाधिपोऽटव्यां गतः।

अथ तस्मिन् गतेऽन्यस्मिन् अहनि स मेषो महानसे प्रविष्टो यावत् सूपकारेण न अन्यत् किञ्चित् समासादितं, तावत् अर्धज्वलितकाष्ठेन ताड्यमानो जाज्वल्यमानशरीरः शब्दायमानः अग्नकुट्यां (र) प्रत्यासन्नवर्त्तिन्यां प्रविष्टः। तत्र तृणप्राचुर्ययुक्तायां क्षितौ तस्य प्रलुठतः सर्वत्रापि (ल) वाङ्ज्वालाः

(म) अश्रुकलुषां—नेत्रजलैराविलाम्। परिणामं—श्रेयफलमित्यर्थः।

(य) पापेत्यादि।—पापस्य—दुष्कर्मणः, लोभजस्येति भावः,य: रस:,—अनुभवप्रीतिरित्यर्थः, तस्य आस्वादनप्रायम्—आस्वादनसदृशम्; पापाचरणम् आपातत: सुखप्रदमपि परिणामे अतिविरसमिति भावः।

मित्रमिति।—यो जनाः, मित्रं बन्धुं, व्यसनसम्प्राप्तं विपदापन्नं, ("व्यसनं विपदि भ्रंशे" इत्यमरः) स्वस्थानं जन्मभूमिं, स्वदेशं वा, परैः अन्यैः, पीड़ितम् उपद्रुतं, देशभङ्गं, तथा कुलक्षयं वंशनाशं, न पश्यन्ति, ते धन्याः पुण्यवन्तः, ("धन्यं पुण्यवति त्रिषु" इति मेदिनी), अयमत्यन्तप्रतीकारं सम्भावितविपदमनात्मवं मित्रमप्रवृत्तिकं परित्यज्य स्थानान्तरगमनमेव श्रेयः, न तु तत्परावलीनमित्यभिप्रायः॥ ७४॥

(र) प्रत्यासन्नवर्त्तिन्यां—समीपस्थायाम्।

तथा समुत्थिताः, यथा केचिदन्धाः स्फुटितलोचनाः पञ्चत्वं गताः, केचित् बन्धनानि त्रोटयित्वा अर्द्धदग्धशरीरा इतश्चेतश्च क्षेपमाणा धावमानाः सर्वमपि जनसमूहम् आकुलीचक्रुः ।

अत्रान्तरे राजा सविषादः (व) शालिहोत्रमुखान् वैद्यान् आहूय प्रोवाच,—'भोः ! प्रोच्यताम् एषाम् अश्वानां कश्चित् दाहोपशमनोपायः' । तेऽपि शास्त्राणि सञ्चिन्त्य प्रोचुः,—'देव ! प्रोक्तमत्र विषये भगवता शालिहोत्रेण, यत्,—

'कपीनां मेदसा दोषो वह्निदाहसमुद्भवः ।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा' ॥ ७५ ॥

तत् क्रियताम् एतत् चिकित्सितं (श) द्राक्, यावत् एते न दाहदोषेण विनश्यन्ति' । सोऽपि तदाकर्ण्य समस्तवानरवधम् आदिष्टवान् । किं बहुना ? सर्वेऽपि ते वानरा विविधायुधलगुडपाषाणादिभिः व्यापादिता इति ।

अथ सोऽपि वानरयूथपः तं पुत्रपौत्रभ्रातृसुतभागिनेयादिसङ्क्षयं ज्ञात्वा परं विषादम् उपागतः त्यक्ताहारक्रियो वनात् वनं पर्य्यटत्, अचिन्तयच्च,—'कथमहं तस्य (ष) नृपापसदस्य अनृणताकृत्येन अपकृत्यं करिष्यामि ? उक्तञ्च,—

(ल) वह्निज्वालाः,—अग्निशिखाः । स्फुटितलोचनाः,—भिन्ननेत्राः, निःसृतकनीनिका इत्यर्थः । क्षेपमाणाः,—क्षेपाध्वानं कुर्वन्त इत्यर्थः ।

(व) शालिहोत्रमुखान्—अश्वचिकित्सकशालिहोत्रप्रणीतचिकित्साशास्त्राभिज्ञान् ।

कपीनामिति ।—अश्वानां वह्निदाहसमुद्भवः दोषः रोग इति यावत्, कपीनां वानराणां, मेदसा वसया, सूर्योदये तमो यथा अन्धकार इव, नाशम् उपशमम्, अभ्येति प्राप्नोति ॥ ७५ ॥

(श) द्राक्—झटिति,("झाग्झटित्यञ्जसाऽऽकाम द्राक्झङ् सपदि द्रुते"इत्यमरः) ।

(ष) नृपापसदस्य—राजाधमस्य । अनृणताकृत्येन—आनृण्यसम्पादनेन, वैरितारूपस्य ऋणस्य परिशोधार्थमित्यर्थः । अपकृत्यम्—अपकारं, वैरनिर्यातनमिति भावः ।

*मर्षयेद्दर्षणां योऽत्र वंशजां परनिर्मिताम् ।
भयाद्वा यदि वा कामात् स ज्ञेयः पुरुषाधमः' ॥ ७६ ॥

अथ तेन वृद्धवानरेण कुत्रचित् पिपासाकुलेन भ्रमता (स) पद्मिनीषण्डमण्डितं सरः समासादितम् । (ह) तत् यावत् सूक्ष्मेक्षिकया अवलोकयति, तावत् वनचरमनुष्याणां पदपङ्क्तिप्रवेशोऽस्ति, न निष्क्रमणम् इति अवलोकितवान् । ततः चिन्तितं,—'नूनम् अत्र (क) जलान्ते दुष्टग्राहेण भाव्यम् ; तत् पद्मिनीनालम् आदाय दूरस्थोऽपि जलं पिबामि' । (ख) तथाऽनुष्ठिते तस्मध्यात् राक्षसो निष्क्रम्य रत्नमालाविभूषितकण्ठः तमुवाच,—'भोः ! अत्र यः सलिले प्रवेशं करोति, स मे भक्ष्य इति ; तत् नास्ति धूर्त्ततरस्त्वत्समोऽन्यः, यः पानीयम् अनेन विधिना

मर्षयेदिति ।—अत्र संसारे, यः भयाद्वा त्रासाद्वा, यदि वा कामात् स्वस्य इच्छया इत्यर्थः, उपेक्षावशादिति यावत्, ("कामः स्मरेच्छयोः पुमान् । रतस्यापि निकामे च काम्येऽपि स्यान्नपुंसकम् ॥" इति मेदिनी) परानिर्मितां अन्यकृतां, वंशजां कुलसङ्घातात् इत्यर्थः, मर्षणं मर्षः, परिभवनमित्यर्थः, ["मर्षणं स्यात् परिभवे" इति मेदिनी । मृष्धातोः "भाषायां शासियुधिदृशिमृषिसहिधर्षो युच् वाच्यः" इति वार्त्तिकसूत्रेण युच्-प्रत्यये स्त्रियाम् आ-प्रत्यये च मर्षणा इति सिद्धम] मर्षयेत् क्षमेत, स पुरुषाधमः ज्ञेयः ॥७६॥

(स) पद्मिनीति ।—पद्मिनीना षण्ड—समूहः, तेन मण्डितं—शोभितम् ।

(ह) तत्—सरः । सूक्ष्मेक्षिकया—सूक्ष्मदृष्ट्या । वनचरमनुष्याणाम्—अरण्यवासिनां नराणाम् । पदपङ्क्तिप्रवेशः,—पदचिह्नश्रेणीनां जलान्तर्गमनमित्यर्थः । निष्क्रमणं—बहिरागमनं, प्रत्यावर्त्तनमित्यर्थः ।

(क) जलान्ते—जलमध्ये । दुष्टग्राहेण—दुष्टेन—दारुणेन, ग्राहेण—जलचरविशेषेण । भाव्यं—स्थातव्यम् इत्यर्थः ।

(ख) तथा—तस्मिन् प्रकारे, अनुष्ठिते—कृते सति, पद्मिनीनालेन जले पीते सति इत्यर्थः, तस्मध्यात्—जलमध्यात्, राक्षसो निष्क्रम्य—निर्गत्य । रत्नेत्यादि ।—रत्नमालया—रत्नहारेण, विभूषितः,—शोभितः, कण्ठो यस्य स तथोक्तः । तत्—तस्मात् । धूर्त्ततरः,—अतिधूर्त्तः । त्वत्समः,—त्वत्तुल्यः । विधिना—प्रकारेण,

पिबति ; ततः तुष्टोऽहम् ; प्रार्थयस्व हृदयवाञ्छितम्'। कपिराह, —'भोः ! कियती ते भक्षणशक्तिः ?' स आह,—'शतसहस्रायुत-लक्षाणि अपि जलप्रविष्टानि भक्षयामि,(ग) वाञ्छतः शृगालोऽपि मां दूषयति'। वानर आह,—'अस्ति मे केनचित् भूपतिना सह अत्यन्तं वैरम् ; यदि एनां रत्नमालां मे प्रयच्छसि, तदा सपरि-वारमपि तं भूपतिं (घ) वाक्प्रपञ्चेन लोभयित्वा अत्र सरसि प्रवेशयामि'। सोऽपि अहेयं वचस्तस्य श्रुत्वा रत्नमालां दत्त्वा प्राह,—'भो मित्र ! यत् समुचितं भवति, तत् कर्त्तव्यम्' इति। वानरोऽपि रत्नमालाविभूषितकण्ठः (ङ) हृद्यप्रासादेषु परि-भ्रमन् जनैः दृष्टः पृष्टश्च,—'भो यूथप ! भवान् इयन्तं कालं कुत्र स्थितः ? भवता ईदृशी रत्नमाला कुत्र लब्धा, या दीप्त्या सूर्य्यमपि तिरस्करोति ?' वानरः प्राह,—'अस्ति कुत्रचित् अरण्ये(च)गुप्ततरं महत् सरो धनदनिर्मितं, तत्र सूर्य्येऽर्द्धोदिते रविवारे यः कश्चित् निमज्जति, स धनदप्रसादात् ईदृक् रत्नमालाविभूषितकण्ठो निःसरति'। अथ भूभुजा तदाकर्ण्य, स वानरः समाहूतः पृष्टश्च, —'भो यूथाधिप ! किं सत्यमेतत्,(छ) रत्नमालामनाथं सरोऽस्ति क्वापि ?' कपिराह,—'स्वामिन् ! एष प्रत्यक्षतया मत्कण्ठ-स्थितया रत्नमालया (ज) प्रत्ययस्ते ; तत् यदि रत्नमालया

पाश्चात्यनीलाम्बुजषण्डेनेति भावः। हृदयवाञ्छितं—मनोऽभिलषितम्।

(ग) वाञ्छतः,—वाञ्छाप्रदेशं, स्थलं इत्यर्थः। दूषयति—पराभवति।

(घ) वाक्प्रपञ्चेन—वाग्जालेन।

(ङ) हृद्यप्रासादेषु—हृद्येषु प्रासादेषु राजभवनेषु च। तिरस्करोति—अभि-भवति, आच्छादयतीत्यर्थः।

(च) गुप्ततरम्—अन्यैरज्ञातं, सुरक्षितं वा। धनदनिर्मितं—कुबेरकृतम्।

(छ) रत्नमालासनाथं—रत्नहारसंहितम्।

(ज) प्रत्ययः,—विश्वासः, भवतु इति शेषः ; मत्कण्ठे प्रत्यक्षदृष्टया एतया रत्नमालया ते विश्वासो भवतु यत् ईदृशं सरोऽपि इति भावः।

प्रयोजनं, तदा मया सह कमपि प्रेषय, येन दर्शयामि'। तत् श्रुत्वा नृपतिः आह,—'यदि एवं, तदहं सपरिजनः स्वयम् (झ) एष्यामि, येन प्रभूता रत्नमालाः सम्पद्यन्ते'। वानर आह, —'एवं क्रियताम्'। तथा अनुष्ठिते भूपतिना सह रत्नमालालोभेन सर्वे कलत्रभृत्याः प्रस्थिताः। वानरोऽपि राज्ञा (ञ) दोलाऽधिरूढेन स्वोत्सङ्गे आरोपितः सुखेन प्रीतिपूर्वम् आनीयते। अथवा साधु इदमुच्यते,—

तृष्णे देवि! नमस्तुभ्यं यया वित्तान्विता अपि।
अन्नत्येषु नियोज्यन्ते भ्राम्यन्ते दुर्गमेष्वपि ॥ ७७ ॥

तथा च,—इच्छति शती सहस्रं सहस्री लक्षमीहते।
लक्षाधिपस्तथा राज्यं राज्यस्थः स्वर्गमीहते ॥ ७८ ॥

(झ) एष्यामि—गमिष्यामि। सम्पद्यन्ते—सम्भवन्ति इत्यर्थः।

(ञ) दोलाऽधिरूढेन—दोलामधिष्ठितेन। स्वोत्सङ्गे—आत्मक्रोडे। आरोपितः,—नीतः, उपवेशित इत्यर्थः, [आरोपितः इति आ-पूर्वात् रुहधातोः णिचि कर्मणि क्तः, "रुहः पोऽन्यतरस्याम्" (७।३।४३ पा०) इति सूत्रेण प-आदेशे सिद्धम्]।

तृष्णे इति।—हे तृष्णे! सृष्टे! आशे! इत्यर्थः, ("तृष्णे सृष्टापिपासे हे" इत्यमरः) देवि! तुभ्यं नमः त्वा प्रणमामि इत्यर्थः, यया, त्वयेति शेषः, [प्रयोजककर्तरि तृतीया] वित्तान्विता धनवन्तोऽपि, अन्नत्येषु अकरणीयेषु विषयेषु, अन्याय्यकार्येषु इत्यर्थः, नियोज्यन्ते प्रवर्त्यन्ते, नियुक्ताः क्रियन्ते इत्यर्थः, [नि-पूर्वकात् युज्धातोः "हेतुमति च" (३।१।२६ पा०) इति णिच्, ततः "सार्वधातुके यक्" (३।१।६७ पा०) इति कर्मणि यक्-प्रत्यये लटि रूपम्] तथा दुर्गमेषु अगम्येषु अपि स्थानेषु, भ्राम्यन्ते भ्रान्ताः क्रियन्ते, [स्थानात् धनवतोः पूर्ववत् कर्मणि लटि रूपम्] ॥ ७७ ॥

इच्छतीति।—शती शतसङ्ख्याधनवान्, [शतमस्यास्तीति इनिः] सहस्रं सहस्रसङ्ख्याधनम्, इच्छति, सहस्री सहस्रसङ्ख्याधनवान्, [सहस्रमस्यास्तीति इनिः] लक्षम् ईहते अर्जयितुं वाञ्छति, लक्षाधिपः लक्षसङ्ख्याधनेश्वरः, राज्यं, तथा राज्यस्थः राज्येश्वरः, स्वर्गं स्वर्गाधिपत्यमित्यर्थः, ईहते अभिलषति; प्रचुरतरविभवप्राप्तावपि अर्थाकाङ्क्षाया दुर्विषा लक्षणमेव इव भूयसा अभिवर्द्धनात्तथादिति भावः। प्रथमार्द्धे उक्तम् ॥ ७८ ॥

जीर्य्यन्ते जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः।
जीर्य्यतश्चक्षुषी श्रोत्रे तृष्णैका तरुणायते ॥ ७९ ॥

अथ तत् सरः समासाद्य वानरः प्रत्यूषसमये राजानम् उवाच,—'देव! अर्द्धोदिते सूर्य्येऽत्र प्रविष्टानां सिद्धिर्भवति; तत् सर्वोऽपि जन एकदा एव प्रविशतु, त्वया पुनः मया सह प्रवेष्टव्यम्; येन पूर्वदृष्टस्थानम् आसाद्य प्रभूताः ते रत्नमाला दर्शयामि'।

अथ प्रविष्टाः ते लोकाः सर्वे भक्षिता राक्षसेन। ततः तेषु चिरायमाणेषु राजा वानरमाह,—'भो यूथाधिप! किमिति चिरयति मे परिजनः?' तत् श्रुत्वा वानरः सत्वरं द्रुतम् आरुह्य राजानम् उवाच,—'भो दुष्टनरपते! राक्षसेन अन्तःसलिलस्थितेन भक्षितास्ते परिजनः, साधितं मया कुलक्षयजं वैरम्; तत् गम्यताम्। त्वं स्वामीति मत्वा न अत्र प्रवेशितः। उक्तञ्च,—

कृते प्रतिकृतं कुर्य्याद्धिंसिते प्रतिहिंसनम्।
न तत्र दोषं पश्यामि दुष्टे दुष्टं समाचरेत् ॥ ८० ॥

यत् त्वया मम कुलक्षयः कृतः, मया पुनस्तव' इति। अथ एतदाकर्ण्य राजा कोपाविष्टः (ट) पदातिः एकाकी यथाऽऽयात-

---

जीर्य्यन्ते इति।—५११ पृष्ठे पूर्वं व्याख्यातोऽयं श्लोकः ॥ ७९ ॥

कृते इति।—कृते उपकारे अपकारे वा इति भावः, प्रतिकृतं प्रतिकारं, प्रत्युपकारं प्रत्यपकारं वा इत्यर्थः, तथा हिंसिते हिंसायां कृतायां, प्रतिहिंसनं प्रतिहिंसासाधनं, कुर्य्यात्; तत्र प्रतिहिंसने इत्यर्थः, दोषं न पश्यामि, यतः दुष्टे कृतापकारे, जने इति शेषः, दुष्टं प्रत्यपकारमित्यर्थः, समाचरेत् अनुतिष्ठेत्; अत्र आर्ष्यं समाचरेदिति भावः ॥ ८० ॥

(ट) पदातिः,—पदेन, पादचारीत्यर्थः, [पादाभ्याम् अतति गच्छति' इति पादोपपदात् "अत सातत्यगमने" इत्यस्माद्धातोः "अत्यतिभ्याच" (उणा० ४ पा० १२० सू०) "पादे च" (उणा० ४ पा० १२१ सू०) इति सूत्रेण इथि कृते "पादस्य

मार्गेण निष्क्रान्तः। अथ तस्मिन भूपतौ गते राक्षसः क्षणो जलात् निष्क्रम्य सानन्दम् इदमाह,—

'इतः शत्रुः कृतं मित्रं रत्नमाला न हारिता।
नालेन पिबता तोयं भवता साधु वानर!' ॥ ८१ ॥

अतोऽहं ब्रवीमि,—'यो लौल्यात् कुरुते' इत्यादि'।

एवमुक्त्वा भूयोऽपि स चक्रधरमाह,—'भो मित्र! प्रेषय मां, येन स्वगृहं गच्छामि'। चक्रधर आह,—'भद्र! आपदर्थं धनमित्रसङ्ग्रहः क्रियते, तत् माम् एवंविधं त्यक्त्वा क्व यास्यसि? उक्तञ्च,—

यस्त्यक्त्वा सापदं मित्रं याति निष्ठुरतां सुहृत्।
कृतघ्नस्तेन पापेन नरके यात्यसंशयम् ॥ ८२ ॥

पदाद्व्याप्तिगीपहृतेषु" (६।३।५२ पा०) इति पादस्य पदादेशः]। यथाऽऽयात-मार्गेण—येन मार्गेण आगतः, तेनैव पथा इत्यर्थः।

इत इति।—हे वानर! नालेन पद्मदण्डेन, [नलति इति नालं "अल् बन्धे" इति भौवादिकात् अल्धातोः "ज्वलितिकसन्तेभ्यो णः" (३।१।१४० पा०) इति ण-प्रत्ययः। "नालं न ना पद्मदण्डे" इति विश्वः] तोयं जलं, पिबता भवता साधु सुष्ठु यथा तथा, अनायासेनेत्यर्थः, अरिः इतः विनाशितः, मित्रं सुहृत्, कृतं कृत्यमित्यर्थः; रत्नमाला, महत्तेति भावः, न हारिता न विनाशिता, न याचिता इत्यर्थः, अपरैरिति शेषः, [ख्यन्तात् हृधातोः कर्मणि निष्ठाप्रत्ययः, "हृक्रोरन्यतरस्याम्" (१।४।५३ पा०) इति विकल्पत्वात प्रयोज्यकर्तुः न कर्मत्वम्] ॥ ८१ ॥

य इति।—यः सुहृत् सापदम् आपद्ग्रस्तं, मित्रं त्यक्त्वा निष्ठुरतां याति गच्छति, स कृतघ्नः तेन पापेन असंशयं नरके निरये, [वृधातोः "कृवापाजिमि-स्वदिसाध्यशूभ्य उण्" (उ० १ पा० ३५ सू०) इत्यादिना उण्। "नरकः पुंसि निरय-देवादप्रतिप्रभेदयोः" इति विश्वमेदिन्यौ] यांति गच्छति। ["सापदम्" इत्यत्र केचित् क्लीबलिङ्ग-निरूपणशब्दस्य विशेषणत्वात् 'आपत्'-शब्दस्य व्यञ्जनान्तत्वात् "सापत्" इति साधु इति ब्रुवते; केचित्तु,—आङ्पूर्वपदधातोरस्-प्रत्ययान्त "आपद्"-स्वरान्तशब्दस्य रूपमिति; अन्ये तु,—व्यञ्जनान्तत्वात् "आपत्"-शब्दात् स्त्रियां विभाषितटाप्-प्रत्ययं विधाय "आपदया सह

सुवर्णसिद्धिः आह,—'भोः ! सत्यमेतत्, यदि (ठ) गम्यस्थाने शक्तिर्भवति ; एतत् पुनः मनुष्याणाम् अगम्यस्थानम् ; नास्ति कस्यापि त्वाम् उन्मोचयितुं शक्तिः । अपरं, यथा यथा चक्रभ्रमवेदनया तव मुखविकारं पश्यामि, तथा तथा अहमेतत् जानामि यत्, द्राक् गच्छामि, मा कथित् ममापि (ड) अनर्थो भवतु । यतः,—

यादृशो वदनच्छाया दृश्यते तव वानर ! ।
विकालेन गृहीतोऽसि यः परैति स जीवति' ॥ ८२ ॥

चक्रधर आह,—'कथमेतत् ?' सोऽब्रवीत्,—

कथा १० ।

'कस्मिंश्चित् नगरे भद्रसेनो नाम राजा प्रतिवसति स्म । तस्य सर्वलक्षणसम्पन्ना रत्नवती नाम कन्या अस्ति, तां

वर्णनाम;" इति विग्रहम् आहुः ; अपरे पुनः,—"शब्दा गच्छन्ति शब्दस्य लिङ्गमर्थस्य कुत्रचित्" इत्यादुक्त्या निवशब्दश्च क्लीवेऽपि तदर्थस्य पुंस्त्वमाश्रित्य "दारान् पश्यति शोभनाः" इत्यादौ पुंविशेषणत्वं शोभनशब्दस्य स्त्रिया प्रयोगवत पुनर्थस्य निवशब्दस्य विशेषणतया सापेक्षत्वात् पुंसि प्रयोगं साधु मन्यन्ते] ॥ ८२ ॥

(ठ) गम्यस्थाने—सुलभप्रदेशे । शक्तिः, विपक्षं प्रति विपदः मोचयितुमिति शेषः ।

(ड) अनर्थः,—अनिष्टपातः ।

याहशीति ।—हे वानर ! तव वदनस्य कुत्रस्य, छाया कान्तिः, ("छाया सूर्यप्रिया कान्तिः प्रतिबिम्बसनातपः" इत्यमरः) याहशी दृश्यते, मयेति शेषः, 'तेन त्वम्' इति पदद्वयमत्र अध्याहरणीयम् ; विकालेन वि विशेषेण, कालः यममहश इत्यर्थः, तेन, तद्रूपदेशिना केनचित् भीषणसत्त्वविशेषेण इति यावत् ; अथ च—विपरीतसमयेन, दौर्भाग्यवशेति यावत्, यद्वा—रत्नयोरभेदात् विकालेन केनचित् विकारेणेत्यर्थः, गृहीतोऽसि आक्रान्तोऽसि, इति मन्ये इति शेषः, तस्मात् यः परैति पलायते, [परापूर्वात् "इ गतौ" इत्यस्मात् धातोः लट्-ति] स जीवति प्राणिति, मुक्तो भवतीति भावः ॥ ८२ ॥

कश्चित् राक्षसः (ढ) जिहीर्षति, रात्रौ आगत्य उपभुङ्क्ते च, परं कृतरक्षोपधानां हर्त्तुं न शक्नोति। साऽपि (ण) तत्समये रक्षःसान्निध्यजामवस्थाम् अनुभवति कम्पादिभिः। एवम् अतिक्रामति काले कदाचित् स राक्षसो मध्यनिशायां गृहकोणे स्थितः। साऽपि राजकन्या स्वसखीम् उवाच,—'सखि! पश्य, एषः (त) विकालः समये नित्यमेव मां कदर्थयति; अस्ति तस्य दुरात्मनः (थ) प्रतिषेधोपायः कश्चित्?' तत् श्रुत्वा राक्षसोऽपि व्यचिन्तयत्,—'नूनं यथा अहं, तथा अन्योऽपि कश्चित् विकालनामा अस्या हरणाय नित्यमेव आगच्छति; परं सोऽपि एनां हर्त्तुं न शक्नोति; तत् तावत् अक्षरूपं कृत्वा अक्षमध्यगतो निरीक्षयामि, किंरूपः सः, किंप्रभावश्च' इति। एवं राक्षसोऽक्षरूपं कृत्वा अक्षानां मध्ये तिष्ठति। तथाऽनुष्ठिते, निशीथसमये राजगृहे कश्चित् अक्षचौरः प्रविष्टः। स च सर्वान् अक्षान् अवलोक्य तं राक्षसम् अक्षतमं विज्ञाय अधिरूढः। अत्रान्तरे राक्षसः चिन्तयामास,—'नूनमेष विकालनामा मां

(ढ) जिहीर्षति—हर्त्तुमिच्छति। उपभुङ्क्ते—रमते इत्यर्थः। कृतेत्यादि।—कृतं रक्षार्थं उपधानम्—उपबर्हः, रक्षोनिवारकमन्त्रपूतमौषधपूर्णं वा शिरोनिधानम् इति यावत्; ("उपधानं तूपबर्हः" इत्यमरः) यद्वा,—उपधानं—गन्धः, यन्त्रविशेष इत्यर्थः, रक्षोभयनिवारणार्थं तदेतैर्भिः बस्त्रादौ केशादौ वा विहितमिति भावः; ("उपधानं विषे गन्धौ प्रणयेऽपि नपुंसकम्" इति मेदिनी) यद्वा: तथोक्तम्; यद्वा,—कृतं—गृहीतमित्यर्थः, उपधानं—व्रतभेदः, आत्मरक्षार्थम् उपायविशेष इत्यर्थः, यया तथोक्तम्।

(ण) तत्समये—राक्षससन्निधानकाले। रक्ष इत्यादि।—रक्षसः,—राक्षसस्य, सान्निध्यजां—संसर्गजनिताम्, अवस्थां—दशाम्।

(त) विकालः,—वि—विशेषेण, विरूपो वा, कालः,—यमप्रायः, यमरूपो दुरात्मा: कश्चित् सत्त्वविशेष इत्यर्थः, कम्पादिरूपविकारविशेष इत्यर्थो वा। समये—सन्ध्याकाले, रात्रौ इत्यर्थः। कदर्थयति—क्लेशयति इत्यर्थः।

(थ) प्रतिषेधोपायः,—निवारणोपायः।

चौरं मत्वा कोपात् निहन्तुम् आगतः ; ततः किं करोमि ?' एवं चिन्तयन् सोऽपि (द) तेन खलीनं मुखे निधाय कशाघातेन ताडितः ।

अथ असौ भयत्रस्तमनाः प्रधावितुम् आरब्धः । चौरोऽपि दूरं गत्वा खलीनाकर्षणेन तं स्थिरं कर्त्तुम् आरब्धवान् । स तु केवलं वेगात् वेगतरं गच्छति ।

अथ (ध) तं तथा अगणितखलीनाकर्षणं मत्वा चौरः चिन्तयामास,—'अहो ! न एवंविधा वाजिनो भवन्ति अगणितखलीनाः !! तत् नूनम् अनेन अश्वरूपेण राक्षसेन भवितव्यम् ; तत् यदि कश्चित् (न) पांशुलं भूमिदेशम् अवलोकयामि, तदा आत्मानं तत्र पातयामि, न अन्यथा मे जीवितव्यमस्ति' ।

एवं चिन्तयत इष्टदेवतां स्मरतस्तस्य सोऽश्वो वटवृक्षस्य तले (प) निष्क्रान्तः । चौरोऽपि (फ) वटप्ररोहम् आसाद्य तत्रैव विलग्नः । ततो द्वौ अपि तौ पृथग्भूतौ परमानन्दभाजौ जीवितविषये लब्धप्रत्याशौ सम्पन्नौ ।

(द) तेन—अश्वचौरेण । खलीनं—कविकाम्, अश्वमुखे देयं लौहमययन्त्रविशेषमित्यर्थः, खलीनविवहनखानीति यावत् । कशाघातेन—कशा—अश्वादेर्लाङ्गोपकरणविशेषः, ("अश्वादेर्लाङ्गनी कशा" इत्यमरः) तस्या आघातेन—प्रहारेण ।

(ध) तम्—अश्वरूपिराक्षसम् । अगणितेति ।—अगणितम्—अलक्षितम्, अवहेलितमित्यर्थः, खलीनेन—अश्वमुखरज्ज्वा इति भावः, आकर्षणं येन ताडनम् ।

(न) पांशुलं—धूलिपूर्णं, धूलिराशेरुपरि पातो न स्यात् शरीरस्यथा भवतीति भावः । अन्यथा—अपतने । जीवितव्यं—प्राप्तितव्य, जीवनसम्भावना इत्यर्थः ।

(प) निष्क्रान्तः,—उपस्थितः इत्यर्थः ।

(फ) वटप्ररोहं—न्यग्रोधवरोहं, वटवृक्षस्य स्थूलशाखातः अधोलम्बनशीलम् अंशविशेषम् इत्यर्थः, "वटेर बोया" इति बङ्गभाषा । आसाद्य—अवलम्ब्य । विलग्नः,—संसक्तः, अश्वं परित्यज्य स्थित इत्यर्थः, [विपूर्वकात् 'ओ खजी' इति खञ्जधातोः क्त-प्रत्ययः, "श्वीदितो निष्ठायाम्" (७ २ १४ पा०) इतीट्प्रतिषेधः, "ओदितश्च" (८ २ ४५ पा०) इति निष्ठातस्य नकारः ; अत्र केचिदाहुः,—'खजी सङ्गे' इति

अथ तत्र वटे कश्चित् राक्षससुकृत् वानरः स्थितः आसीत्। तेन राक्षसं त्रस्तम् आलोक्य व्याकृतं,—'भो मित्र! किमेवं पलाय्यतेऽलीकभयेन? त्वद्भक्ष्योऽयं मानुषः, भक्ष्यताम्'। सोऽपि वानरवचो निशम्य स्वरूपम् (ब) आधाय शङ्कितमनाः स्खलितगतिः निवृत्तः। चौरोऽपि तं वानरावृतं ज्ञात्वा कोपात् तस्य लाङ्गूलं लम्बमानं मुखे निधाय चर्बितवान्। वानरोऽपि तं राक्षसाभ्यधिकं मन्यमानो भयात् न किञ्चिदुक्तवान्, केवलं व्यथार्त्तो निमीलितनयनः तिष्ठति। राक्षसोऽपि तं तथाभूतम् अवलोक्य श्लोकमेनम् अपठत्,—

'यादृशो वदनच्छाया दृश्यते तव वानर!।
विकालेन ग्रहीतोऽसि यः परेति स जीवति' ॥८४॥इति।

तत् प्रेषय मां, येन ममापि कश्चिदनर्थो न भवेत्, त्वरितमेव च गृहं गच्छामि। त्वं पुनः अनुभुङ्क्ष्व अत्र स्थित एव लोभवृक्षफलम्'। वक्रधरः प्राह,—'भोः! अकारणमेतत्, दैववशात् सम्पद्यते नृणां शुभाशुभम्। उक्तञ्च,—

दुर्गाश्रिकूटः परिखा ममृद्धा
रक्षांसि योधा धनदाच्च वित्तम्।

भीवादिलक्षणघातोः, क्त-प्रत्यये "दृश्यत्वाक्त्वाक्तवतु—" (७।२।१८ पाः०) इत्यादिना सकारे निपातनात् इट्प्रतिषेधः, तस्य तथ इति; तथा च काशिकायां,—"क्तप्रत्यये भवति सकारश्चेत्, क्षुधितमन्यत"]।

(ब) आधाय—धृत्वा इत्यर्थः। स्खलितगतिः,—प्रस्खलितगमनव्यापारः, भयचरणः इत्यर्थः।

याद्दशीति।—पूर्वार्द्ध दृष्टे व्याख्यातपूर्वोऽयं श्लोकः॥ ८४॥

दुर्ग इति।—यस्य त्रिकूटः सदाक्ष्यो गिरिः, दुर्गः कोट्टः, ('किल्ला' इति वङ्गभाषा) यः परेण लङ्घितुं शक्यते इति भावः, [दुःखेन गन्तव्यम् इति दुर्गपदात् गम-धातोः आधारे ड.] समृद्धः परिखा खेयं, दुर्गेषत्वाच्चैष स्थितः खातः इत्यर्थः, या शत्रुभिः न खनितुं शक्यते इति भावः,[परितः खन्यते इति खन्-धातोः "खन्योऽपि दृश्यते"

शास्त्रञ्च यच्छोशनसा प्रणीतं
स रावणो देवबलादिपन्नः ॥ ८५ ॥

तथा च,—अन्धकः कुलजश्चैव त्रिस्तनो राजकन्यका।
त्रयोऽप्यन्यायतः सिद्धाः सम्मुखे कर्मणि स्थिते' ॥८६॥

सुवर्णसिद्धिः आह,—'कथमेतत्?' सोऽब्रवीत्,—

कथा ११।

'अस्ति उत्तरापथे मधुपुरं नाम नगरम्। तत्र मधुसेनो नाम राजा बभूव; तस्य कदाचित् विषयसुखम् अनुभवतः त्रिस्तनो कन्या बभूव। अथ तां त्रिस्तनीं जातां श्रुत्वा स राजा कञ्चुकिनः प्रोवाच यत्,—'भोः! त्यज्यतामियं त्रिस्तनी गत्वा दूरेऽरण्ये, यथा कश्चित् न जानाति'। तत् श्रुत्वा कञ्चुकिनः प्राहुः,—'महाराज! श्रूयते यत् अनिष्टकारिणी त्रिस्तनी कन्या भवति; तथाऽपि ब्राह्मणा आहूय प्रष्टव्याः, येन (भ) लोकद्वयं न विरुध्यते। यतः,—

(बा०) इति ङः। "खेषन्तु परिखा' इत्यमरः] रक्षांसि राक्षसाः, योधाः सैन्यानि, धनदात् कुबेरात्, वित्तं धनम्, अधिकम् इति शेषः; यद्वा,—धनदात् कुबेरात्, कुबेरं विजिग्येत्यर्थः, [ल्यब्लोपे पञ्चमी] वित्त, गृहीतमिति शेषः; उशनसा शुक्रेण, ("शुक्रो दैत्यगुरुः काव्यः उशना भार्गवः कविः" इत्यमरः) प्रणीतं शास्त्रं नीतिशास्त्रम् इत्यर्थः, यो हि शुक्रनीतेरध्येता अनुज्ञाता चेत्यर्थः, स रावणः आप दैवबलात् विपन्नः नाम गत इत्यर्थः; प्रभूतपुरुषकारसम्पन्नानामपि दैवप्रतिकूलत्वेन विपदागमो दृश्यते, का कथा साधारणजनानाम? इति भावः। उपजाति, छन्दः॥ ८५॥

अन्धक इति।—कर्मणि प्राक्तनकर्मणि, दैवे इत्यर्थः, सम्मुखे अभिमुखे, अनुकूले इत्यर्थः, स्थित सति, अन्धकः अन्धनदीनः, कुलजः कुलः, तथा त्रिस्तनी स्तनवयवसम्पन्ना, राजकन्यका एते त्रयोऽपि, अन्यायतः अन्यायेन, अवैधरूपेण इत्यर्थः, अतर्कितभावेन इति यावत्, सिद्धाः सिद्धिं गताः, दैवानुकूल्येन सुखवैकल्यात् मुक्ताः' इति यावत्॥ ८६॥

(भ) लोकद्वयं न विरुध्यते—यथा इह लोके निन्दा न भवेत्, परत्र च नरकपातो न स्यादिति भावः

यः सततं परिपृच्छति शृणोति सञ्चारयत्यनिशम् ।
तस्य दिवाकरकिरणैर्नलिनीव विवर्धते बुद्धिः ॥ ८७ ॥

तथा च,—प्रच्छकेन सदा भाव्यं पुरुषेण विजानता ।
राक्षसेन्द्रगृहीतोऽपि प्रश्नाक्षरो द्विजः पुरा' ॥ ८८ ॥

राजा आह,—'कथमेतत् ?' ते प्रोचुः,—

कथा १२ ।

'देव ! कस्मिंश्चित् वनोद्देशे चण्डकर्मा नाम राक्षसः प्रतिवसति स्म । एकदा तेन भ्रमता अटव्यां कश्चित् ब्राह्मणः समासादितः । ततः तस्य स्कन्धमारुह्य स राक्षसः प्रोवाच,—'भोः ! अग्रेसरो गच्छ' । ब्राह्मणोऽपि भयत्रस्तमनाः तमादाय प्रस्थितः ।

अथ तस्य (म) कमलोदरकोमलौ पादौ दृष्ट्वा ब्राह्मणो राक्षसम् अपृच्छत्,—'भोः ! किमेवंविधौ ते पादौ अति-

---

य इति ।—यः जनः, सततं नित्यं, सर्वविधकर्मसम्पादनकाले इत्यर्थः, परिपृच्छति ज्ञानिसन्निधौ जिज्ञासते इत्यर्थः, संशयनिर्णयार्थमिति भावः; शृणोति, तेषां सदुपदेशवचनमिति शेषः, अनिशं सततं, सञ्चारयति सदुपदेशं चेतसि अभिनिवेशेन धारयति इत्यर्थः, दिवाकरकिरणैः सूर्यमयूखैः, नलिनीव पद्मिनीव, तस्य जनस्य, बुद्धिः धीः, मतिरित्यर्थः, [बुध्यतेऽनया इति बुध्यातेः "स्त्रियां क्तिन्" (३।३।९४ पा०) इति क्तिन्-प्रत्ययः । "बुद्धिर्मनीषा धिषणा धीः प्रज्ञा प्रेक्षणी मतिः" इत्यमरः] विवर्धते विशेषेण वृद्धिं गच्छति । आर्या छन्दः ॥ ८७ ॥

प्रच्छकेनेति ।—विजानता विज्ञेन, [अपिरत्राध्याहार्यः] पुरुषेण सदा प्रच्छकेन प्रश्नकारिणा, जिज्ञासुना इत्यर्थः, भाव्यं भवितुं योग्यम् । कथम् ? इत्याकाङ्क्षायामाह, राक्षसेन्द्रेति ।—पुरा पूर्वं, राक्षसेन्द्रेण केनापि राक्षसश्रेष्ठेनेत्यर्थः, गृहीतोऽपि आक्रान्तोऽपि, द्विजः कश्चित् ब्राह्मणः, प्रश्नात् प्रश्नेन राक्षसस्य गूढरहस्यज्ञानादित्यर्थः, मुक्तः निष्कृतिं गत इत्यर्थः ॥ ८८ ॥

(म) कमलेति ।—कमलोदरवत्—पद्माभ्यन्तरवत्किञ्जल्कवत् ; यद्वा,—पद्मानां गर्भस्थसूक्ष्मदलवत्, कोमलौ—मृदू ।

कोमलौ ?' राक्षस आह,—'भोः ! (य) व्रतमस्ति, नाहम् आर्द्रपादो भूमिं स्पृशामि'। स च तत् श्रुत्वा आत्मनः (र) मोचोपायं चिन्तयन् सरः प्राप्तः। ततो राक्षसेन अभिहितं,—'भोः ! यावदहं स्नानं कृत्वा देवताऽर्चनविधिं विधाय आगच्छामि, तावत् त्वया अतः स्थानात् अन्यत्र न गन्तव्यम्'। तथाऽनुष्ठिते द्विजः चिन्तयामास,—'नूनं देवताऽर्चनविधेरूर्ध्वं मामेष भक्षयिष्यति ; तत् द्रुततरं गच्छामि, येन एष आर्द्रपादो न मम पृष्ठम् एष्यति'। तथाऽनुष्ठिते राक्षसो व्रतभङ्गभयात् तस्य पृष्ठं न गतः। अतो वयं ब्रूमः,—'प्रच्छन्नेन सदा भाव्यम्' इत्यादि'।

अथ तेभ्यः तत् श्रुत्वा राजा द्विजान् आहूय प्रोवाच,—'भो ब्राह्मणाः ! त्रिस्तनी मे कन्या समुत्पन्ना, तत् किं तस्याः प्रतिविधानम् अस्ति ? न वा ?' ते प्रोचुः,—'देव ! श्रूयताम्,—

हीनाङ्गी वाऽधिकाङ्गी वा या भवेत् कन्यका नृणाम्।
भर्तुः स्यात् सा विनाशाय स्वशीलनिधनाय च ॥ ८९ ॥
या पुनस्त्रिस्तनी कन्या याति लोचनगोचरम्।
पितरं नाशयत्येव मा द्रुतं नात्र संशयः ॥ ९० ॥

(य) व्रतं—नियमः। आर्द्रपादः,—सिक्तचरणः ; राक्षसाक्रान्तब्राह्मणस्य मुक्त्युपायप्रदर्शनार्थं यत्नवता "नाहमार्द्रपादः" इत्यादिकौशलमुद्भावितमिति मन्ये, आर्द्रपादेन भूमिस्पर्शात् चरणकाठिन्यसम्भावनायाः मोक्षेऽदर्शनादिति ; यद्वा—बहुक्षणं ध्यात्वा शीतस्पृष्टस्य कठिनीभवति इति लोके दृश्यते, एवञ्च आर्द्रत्वात् कठिनीभूताभ्यां चरणाभ्यां कठिनभूमिस्पर्शात् तयोरधिकतरं काठिन्यमेव जायते इति वक्तुराशयः।

(र) मोचोपायम्—उद्धारोपायम्। सरः,—तडागम्।

हीनाङ्गीति।—नृणां नराणां, हीनाङ्गी कैमपिचिदङ्गेन रहिता वा, अधिकाङ्गी अतिरिक्तेन कैमपिचिदङ्गेन उपलक्षिता वा, या कन्यका भवेत, सा कन्या भर्तुः स्वामिनः, विनाशाय मरणाय, तथा स्वस्य शीलं चरित्रं, तस्य निधनाय ध्वंसाय च, स्यात् ॥८९॥

येति।—या पुनः त्रिस्तनी कन्या लोचनगोचरं दृष्टिविषयं, पितुरिति शेषः, याति गच्छति, सा द्रुतं शीघ्रं पितरं नाशयति एव, अत्र संशयो न, अकीर्तिः शेषः ॥९०॥

तस्मात् अस्या दर्शनं (ल) परिहरतु देवः ! तथा यदि कश्चित् उद्वाहयति, तदेनां तस्मै दत्त्वा देशत्यागेन नियोजयितव्य इति ; एवं कृते लोकद्वयाविरुद्धता भवति'।

अथ तेषां तद्वचनम् आकर्ण्य स राजा (व) पटहशब्देन सर्वत्र घोषणाम् आज्ञापयामास,—'अहो ! त्रिस्तनीं राजकन्यां यः कश्चित् उद्वाहयति, स सुवर्णलक्षम् आप्नोति देशत्यागञ्च'। एवं तस्याम् आघोषणायां क्रियमाणायां महान् कालो व्यतीतः, न कश्चित् तां प्रतिगृह्णाति। साऽपि यौवनोन्मुखी सञ्जाता सुगुप्तस्थानस्थिता यत्नेन रक्ष्यमाणा तिष्ठति।

अथ तत्रैव नगरे कश्चित् (श) चिरान्धः तिष्ठति, तस्य च मन्थरकनामा कुब्जोऽग्रेसरः यष्टिग्राही। ताभ्यां तं पटहशब्दम् आकर्ण्य (ष) मिथो मन्त्रितं,—'स्पृश्यतेऽयं पटहो यदि कथमपि दैवात्,तदा कन्या लभ्यते,तथा सुवर्णप्राप्तिश्च भवति,सुखेन सुवर्णप्राप्त्या कालो व्रजति च। अथ यदि (स) तस्या दोषतो मृत्युर्भवति, दारिद्र्योपात्तस्य अस्य क्लेशस्य पर्यन्तो भवति। उक्तञ्च,—

लज्जा स्नेहः स्वरमधुरता बुद्धयो यौवनश्रीः
कान्तासङ्गः स्वजनममता दुःखहानिर्विलासः।

(ल) परिहरतु—परित्यजतु। उद्वाहयति—उद्वाहेन ग्रहीतुमिच्छति इत्यर्थः। तत्—तदा। नियोजयितव्यः,—आदेशयितव्य इत्यर्थः।

(व) पटहशब्देन—वाद्यावशेषध्वनिना सह ; "ढाँढा" इति बङ्गभाषा।

(श) चिरान्धः,—बहुवर्षं व्याप्त दृष्टिशक्तिहीनः, न तु जातान्धः। यष्टिग्राही—यष्टिधरः, अन्धस्य यष्ट्यग्रं गृह्णाति यः तं स्थानात् स्थानान्तरं नयति, स इत्यर्थः।

(ष) मिथः,—परस्परम्। स्पृश्यते—धार्य्यते, मया इति शेषः ; घोषणाडिण्डिमं श्रुत्वा यो घोषणां निवारयति, स एव तत कार्य्यं करिष्यति इति प्रसिद्धेः।

(स) तस्याः,—त्रिस्तन्याः कन्यायाः। दोषतः,—स्तनत्रयरूपदुर्लक्षणादित्यर्थः। दारिद्र्योपात्तस्य—दैन्येन प्राप्तस्य, दारिद्र्यजनितस्येत्यर्थः। पर्यन्तः,—अवसानम्।

धर्मः शास्त्रं सुरगुरुमतिः शौचमाचारचिन्ता
पूर्णे सर्वे जठरपिठरे प्राणिनां सम्भवन्ति' ॥ ८१ ॥

एवमुक्त्वा अन्धेन गत्वा स पटहः स्पृष्टः, उक्तञ्च,—'भोः ! अहं तां कन्याम् उद्वाहयामि, यदि राजा मे प्रयच्छति'। ततस्तैः राजपुरुषैः गत्वा राज्ञे निवेदितं,—'देव ! अन्धकेन केनचित् पटहः स्पृष्टः। तदत्र विषये देवः प्रमाणम्'। राजा प्राह,—

'अन्धो वा बधिरो वाऽपि कुष्ठी वाऽप्यङ्गजोऽपि वा।
प्रतिगृह्णातु तां कन्यां सलक्षां स्याद्विदेशगः' ॥ ८२ ॥

अथ राजादेशात् तैः रक्षापुरुषैः तं नदीतीरे नीत्वा सुवर्ण-

लक्षेति।—जठरापठर उदररूपे स्थालीविशेषे, पूर्णे भक्ष्यपेयादिभिः पूरिते सति इत्यर्थः, ["पूरी आप्यायने" इति पूर्धातोः क्विपि रूपं,"वा दान्तशान्तपूर्ण—"(७।२।२१ पा०) इत्यनेन निपातनात् सिद्धम् ; पक्षे,—पूरित इति। "पूर्णः क्लीबे पूरिते च"इति हैमः] प्राणिनां जन्तूनां वपा,अकार्यकरणजनिता इति भावः, स्नेहः प्रियता, पुत्रादिषु वात्सल्यमित्यर्थः, ("प्रेमा ना प्रियता स्नेहे प्रेम स्नेहः" इत्यमरः) भक्ष्याभावे तु तानपि अप्रियानेव मन्यन्ते इति भावः ; स्वरमधुरता, वृद्धयः मतयः, यौवनश्रीः यौवनस्य तारुण्यस्य, श्रीः शोभा, [धृवनशब्दात् "हायनान्तयुवादिभ्यः अण्" (५।१।१३० पा०) इत्यनेन अण्। "तारुण्यं यौवने समे" इत्यमरः] कान्तासङ्गः कान्तया मैथुनं,स्वजनममता स्वजनेषु आत्मीयजनेषु, ममता मदीयत्वबोधः, दुःखहानिः क्लेशोपशमः, विश्वासः मुखाभिलाषः, धर्मः धरति लोकानिति व्युत्पत्त्या वेदविहितयागाद्यनुष्ठानं, शास्त्रं हितानुशासनग्रन्थविशेषोक्तनियमपालनमित्यर्थः, सुरगुरुमतिः देवतागुरुजनेषु भक्तिः ; यद्वा,—सुरगुरुवत् इन्द्रस्यातिरिव, मतिः बुद्धिः, शौचं पवित्रता, [शुचेर्भावः इति शुचिशब्दात् "इगन्ताच्च लघुपूर्वात्" (५।१।१३१ पा०) इत्यण्] आचारचिन्ता सदाचारानुष्ठानम् इत्यर्थः, एते सर्वे सम्भवन्ति ; बुभुक्षया परिपीडितस्य तु विद्यमानेष्वपि खाद्यादिकेषु तद्रक्षणासम्भवादिति भावः। मन्दाक्रान्ता वृत्तम् ॥ ८१ ॥

अन्ध इति।—अन्धो वा, बधिरो वा, कुष्ठी कुष्ठरोगयुक्तो वा, अङ्गजः नीचकुलोत्पन्नो वा, स्यात् यः कोऽपि भवेद्वा, स विदेशगः देशत्यागी सन्, सलक्षां लक्षमुद्रासमेतां, तां कन्यां प्रतिगृह्णातु स्वीकरोतु ; यद्वा,—यः तां कन्यां प्रतिगृह्णातु , सः विदेशगः स्यादित्यन्वयः ॥ ८२ ॥

लक्षेण समं विवाहविधिना स्त्रियं तस्मै दत्त्वा (ङ) जलयाने निधाय कैवर्त्ताः प्रोक्ताः,—'भोः ! देशान्तरं नीत्वा कस्मिंश्चित् अधिष्ठाने अन्धः सपत्नीकः कुब्जकेन सह मोचनीयः'। तथा अनुष्ठिते विदेशम् आसाद्य कस्मिंश्चित् अधिष्ठाने कैवर्त्तदर्शिते त्रयोऽपि सूखेन गृहं प्राप्ताः सुखेन कालं नयन्ति स्म। केवलम् अन्धः पर्य्यङ्के सुप्तः तिष्ठति, गृहव्यापारं मन्थरकः करोति। एवं गच्छता कालेन स्त्रियाः कुब्जकेन सह (क) विकृतिः समपद्यत। अथवा साधु इदमुच्यते,—

यदि स्यात् शौतलो वह्निश्चन्द्रमा दहनात्मकः।
सुखादः सागरः क्षोणां तत् सतीत्वं प्रजायते ॥ ९१ ॥

अथ अन्येद्युः स्त्रियाः मन्थरकोऽभिहितः,—'भोः सुभग ! यदि एषः अन्धः कथञ्चित् व्यापाद्यते, तदा आवयोः सुखेन कालो याति; तदन्विष्यतां कुत्रचित् विषं, येन अस्मै तत् प्रदाय सुखिनौ भवामि'।

अन्यदा कुब्जकेन परिभ्रमता मृतः कृष्णसर्पः प्राप्तः। तं गृहीत्वा प्रहृष्टमना गृहमभ्येत्य तामाह,—'सुभगे ! लब्धोऽयं कृष्णसर्पः; तदेनं खण्डशः कृत्वा (ख) प्रभूतगुडादिभिः संस्कार्य्य अस्मै विकलनेत्राय मत्वामिषं भणित्वा प्रयच्छ, येन द्राक्

(ङ) जलयाने—नौकायाम्। कैवर्त्ताः,—धीवराः, नौजीविनः कर्णधारादयः इत्यर्थः।

(क) विकृतिः,—स्वभावस्य अन्यथाभावः, व्यभिचार इत्यर्थः।

यदीति।—यदि वह्निः शौतलः, चन्द्रमाः चन्द्रः, दहनात्मकः दहनशक्तिमान्, तथा सागरः समुद्रजलमित्यर्थः, सुखादः सुखपेयः, स्यात्, तत् तदा, स्त्रीणां सतीत्वं प्रजायते सम्भवति, वह्न्यादीनां शौतलत्वादिकं यथा असम्भवं, तथा स्त्रीणामपि सतीत्वमिति भावः॥ ९१ ॥

(ख) प्रभूतगुडादिभिः,—प्रभूतैः—बहुभिः, गुडति कफमिति गुडो—कफित-गुडादिभिरित्यर्थः, तदादिभिः,—तत्प्रभृतिभिः, सहेति शेषः, संस्कार्य्य—पाचयित्वा।

विनश्यति; यतोऽस्य मत्स्यामिषं सदा प्रियम्' एवमुक्त्वा मन्थरको वाह्यं गतः। सोऽपि प्रदीप्ते वह्नौ कृष्णसर्पं खण्डशः कृत्वा तक्रम् (ग) आदाय गृहव्यापाराकुला तं विकलाक्षं सप्रश्रयम् उवाच, —'आर्यपुत्र! तव अभीष्टं मत्स्यमांसं समानीतं, यतः त्वं सदा एव तत् पृच्छसि; ते च मत्स्या वह्नौ पाचनाय तिष्ठन्ति; तत् यावत् अहं गृहकृत्यं करोमि, तावत् त्वं दर्वीम् आदाय क्षणमेकं तान् प्रचालय'। सोऽपि तदाकर्ण्य हृष्टमनाः (घ) सक्तणौ परिलिहन् द्रुतम् उत्थाय दर्वीम् आदाय प्रमथितुम् आरब्धः।

अथ (ङ) तस्य तदामिषं मथतो विषगर्भवाष्पेण संस्पृष्टं नीलपटलं चक्षुर्भ्याम् अगलत्। असौ अपि अन्धः (च) बहुगुणं मन्यमानो विशेषात् नेत्राभ्यां वाष्पग्रहणम् अकरोत्, ततो लब्धदृष्टिः यावत् पश्यति, तावत् तक्रमध्ये कृष्णसर्पखण्डानि केवलानि एव अवलोकयति। ततो व्यचिन्तयत्,— 'अहो! किमेतत्!! मम मत्स्यामिषं कथितम् आसीत् अनया, एतानि तु कृष्णसर्पखण्डानि; तत् तावत् विजानामि सम्यक्

विकलनेत्राय—अन्धाय। मत्स्यामिष—मत्स्यस्य मांसं, ("पिशितं तरसं मांसं पलं क्रव्यमानवम्" इत्यमरः)। भणित्वा—उक्त्वा।

(ग) आदाय—सम्यक् दत्त्वा। सप्रश्रयं—सविनयम्। पाचनाय तिष्ठन्ति—पच्यन्ते इत्यर्थः। गृहकृत्यं—गेहकार्यम्। दर्वीं—पाकद्रव्यप्रक्षालनयन्त्रम्; ('डाता' इति बङ्गभाषा)।

(घ) सक्तणौ—ओष्ठपार्श्वौ, ("पार्श्वावोष्ठस्य सक्तणी" इत्यमरः)। परिलिहन्—जिह्वया पुनः पुनः परिस्पृशन्नित्यर्थः, मत्स्यभक्षणलोभादिति भावः। प्रमथितुं—चालयितुम्।

(ङ) तस्य—अन्धस्य। मथतः,—प्रचालयतः। [भ्वादिगणीय "मन्थ्" धातोः रूपम्]। विषगर्भवाष्पेण—अन्तर्गरलधूमेन, सर्पमांसादुत्थितेन इति भावः। नीलपटलं—कालिमचयः, दृष्टिमण्डलावरकमिति शेषः।

(च) बहुगुणं—प्रभूतगुणकरं, तत् वाष्पमिति शेषः।

त्रिस्तन्याः चेष्टितं किं मम वधोपायक्रमः ? कुब्जस्य वा ? उताहो अन्यस्य वा कस्यचित् ?' एवं विचिन्त्य साकारं (छ) गूहन् अन्यवत् कर्म करोति यथा पुरा ।

अत्रान्तरे कुब्जः समागत्य निःशङ्कतया आलिङ्गनचुम्बनादिभिः त्रिस्तनीं सेवितुम् उपचक्रमे । सोऽपि अन्यः तम् अवलोकयन् अपि (ज) यावत् न किञ्चित् शस्त्रं पश्यति, तावत् कोपव्याकुलमनाः पूर्ववत् शयनं गत्वा कुब्जं चरणाभ्यां सङ्गृह्य सामर्थ्यात् स्वमस्तकोपरि भ्रामयित्वा त्रिस्तनीं हृदये व्यताडयत् । अथ कुब्जप्रहारेण तस्याः तृतीयः स्तनः (ञ) उरसि प्रविष्टः ; तथा बलात् मस्तकोपरि भ्रामणेन कुब्जः प्राञ्जलतां गतः । अतोऽहं ब्रवीमि,—'अन्धकः कुब्जकश्चैव' इत्यादि' ।

सुवर्णसिद्धिः आह,—'भोः ! सत्यमेतत्, दैवानुकूलतया सर्वं कल्याणं सम्पद्यते, तथापि पुरुषेण (ट) सतां वचनं कार्यम् ; न पुनः असंहतेन कदाचिदपि भवितव्यम् ; यः खलु एवमेव वर्त्तते, स त्वमिव नूनं विनश्यति ।

तथा च,—एकोदराः पृथग्ग्रीवा अन्योऽन्यफलभक्षिणः ।

असंहता विनश्यन्ति भारण्डा इव पक्षिणः' ॥ ८४ ॥

(छ) गूहन्—गोपायन्, अप्रकाशयन् इत्यर्थः ।

(ज) यावत्—यदा इत्यर्थः । तावत्—तदा इत्यर्थः । पूर्ववत्—प्रागिव, अन्यदशायां यथा शस्त्रपरामर्शेन गच्छति, तथा इत्यर्थः । सामर्थ्यात्—बलात्, बलपूर्वकमित्यर्थः । व्यताडयत्—निर्दयं प्रहृतवान् ।

(ञ) उरसि—वक्षसि, तदभ्यन्तरे इत्यर्थः, सा द्विस्तनी जातेति भावः । प्राञ्जलतां—सरलतां, कुब्जतादोषरहितोऽभवदिति भावः ।

(ट) सतां वचनं—"नैकः गुल्माटवीं गच्छेत्" इत्यादिरूपानुशासनम् ; तस्य पृथक्संघस्यापृष्टे स्फुटीभविष्यति । असंहतेन—मिथो वियुक्तेन, एकाकिना इत्यर्थः । सः,—पृथक् ।

एकोदरा इति ।—असंहताः संहताः सङ्गताः न भवन्तीति असंहताः अस-

चक्रधर आह,—'कथमेतत्?' सोऽब्रवीत्,—

कथा १३।

'कस्मिंश्चित सरोवरे भारण्डनामा पक्षी एकोदरः पृथग्-ग्रीवः प्रतिवसति स्म। तेन च समुद्रतीरे परिभ्रमता किञ्चित् फलम् (ट) अमृतकल्पं तरङ्गाक्षिप्तं समासादितम्। स च तत् भक्षयन् इदमाह,—'अहो! बहूनि मया अमृतप्रायाणि समुद्रकल्लोला-हृतानि फलानि भक्षितानि, (ठ) परम् अपूर्वोऽस्य आस्वादः; तत् किं पारिजातहरिचन्दनतरुसम्भवम्!! किंवा किञ्चित् अमृत-मयफलम् अव्यक्तेनापि विधिना आपतितम्!!' एवं तस्य ब्रुवतो द्वितीयमुखेन अभिहितं,—'भोः! यदि एवं, तत् ममापि स्तोकं प्रयच्छ, येन जिह्वासौख्यम् अनुभवामि'। ततो विहस्य प्रथम-वक्त्रेण अभिहितम्,—'आवयोः तावदेकम् उदरम्, एका तृप्तिश्च भवति; तत् किं पृथक् भक्षितेन? वरमनेन (ड) शेषेण प्रिया तोष्यते' एवम् अभिधाय तेन शेषं भारण्डायाः प्रदत्तम्। साऽपि

कृताः, अभिलिताः इत्यर्थः, एकताविरहिता इति यावत्, ("संहतं सङ्कते दृढे" इति हैम.) ग्रीवाः इति शेषः, एकोदरा: अभिन्नकुक्षयः, पृथग्ग्रीवा. हिंसका: इति भावः, परन्तु अन्योऽन्यफलभक्षिणः परस्परफलभोजनाभिलाषिणः, भारण्डाः तदाख्याः, प्राक्तन इव विनश्यन्ति विनाशं गच्छन्ति ॥ ८४ ॥

(ट) अमृतकल्पम्—अमृततुल्यम्, अमृतादीषदूनमित्यर्थः, ["ईषदसमाप्तौ कल्पब्देश्यदेशीयर." (५।३।६७ पा०) इति सूत्रेण कल्पप्]। तरङ्गाक्षिप्तं—तरङ्-गताडनेन वेलाम आनीतम इत्यर्थः।

(ठ) परं—किन्तु। अव्यक्तेन—अस्पष्टेन, अलक्षितेन इत्यर्थः, ("अव्यक्तः प्राकृते विष्णावलक्ष्ये सदृशादिके। आत्मन्यपि व्यादलक्ष्यकस्पष्टे त्रिभिधेयवत्।" इति विश्वः) विधिना—दैवेन, मम सुभाग्येन इत्यर्थः। आपतितं—प्रेरितमित्यर्थः।

(ड) शेषेण—भुक्तावशिष्टेन इत्यर्थः। प्रिया—भार्या। भारण्ड्याः,—स्त्रियायाः, [षष्ठ्यर्थविवक्षया षष्ठी]।

तत् आस्वाद्य प्रहृष्टतया (ढ) आलिङ्गन-चुम्बन-सम्भावनाद्यनेक-चाटुपरा बभूव। द्वितीयं मुखं तद्दिनादेव प्रभृति (ण) सोद्वेगं सविषादञ्च तिष्ठति।

अथ अन्येद्युः द्वितीयमुखेन विषफलं प्राप्तम्। तत् दृष्ट्वा (त) अपरमाह,—'भोः! निर्लिङ्ग! पुरुषाधम! निरपेक्ष! मया विषफलम् आस्वादितम्; तत् तवापमानात् भक्षयामि'। अपरेण अभिहितं,—'मूर्ख! मा मा एवं कुरु, एवं कृते द्वयोरपि विनाशो भविष्यति'। अथ एवं वदन्तमपि तेन पूर्वापमानात् फलं भक्षितम्; किं बहुना? द्वौ अपि विनष्टौ। अतोऽहं ब्रवीमि,—'एकोदराः पृथग्ग्रीवाः' इत्यादि'।

चक्रधर आह,—'सत्यमेतत्, त्वद्वचनमनाकर्ण्य त्वां परित्यज्य च एकाकिना आगच्छता मया दुःखमेतदनुभूयते; तत् गच्छ गृहम्'। एवं श्रुत्वा सुवर्णसिद्धिस्तमनुज्ञाप्य स्वगृहं प्रति निवृत्तः'।

अथ ब्राह्मणो एवमुक्त्वा पुनः ब्राह्मणम् आह,—'यत् त्वयाऽपि अतिलुब्धेन न कृतं महत्, तेनैव दृष्टयो अवस्था उपागता। अतोऽहं ब्रवीमि,—'अतिलोभो न कर्त्तव्यः' इत्यादि'।

तत् श्रुत्वा देवशर्मा कथयति,—'यस्य गृहे अशनजातं किमपि नास्ति, तस्य जीविकार्थं भिक्षाटनं न पुनरतिलोभकारणं

(ढ) आलिङ्गनेत्यादि।—आलिङ्गनम्—आश्लेषः, चुम्बनम्—अधरास्वादनं, सम्भावनम्—आदरप्रदर्शनमित्यर्थः, तानि आदीनि येषां तादृशाः, अनेकाः,—विविधाः, चाटवः,—प्रियाचरणानीत्यर्थः, तत्परा—तत्प्रवणा।

(ण) सोद्वेगं—व्याकुलचित्तम्। सविषादं—सदुःखम।

(त) अपरं—प्रथममुखम्। निर्लिङ्ग!—निर्दय! ("निर्लिङ्गः खले ना निर्दये त्रिषु" इति मेदिनी)। पुरुषाधम!—पुरुषेषु अधमः,—नीचः, तत्सम्बुद्धौ। निरपेक्ष!—अपरसुखज्ञानपेक्षारहित इत्यर्थः।

भवितुमर्हति। त्वमेव अपरीक्षितकारिणी, येन चिरं पुत्रवत् (थ) स्निह्यमानं, सुखप्रसुप्तस्य स्वपुत्रस्य कृष्णसर्पात् रक्षितारम्, अमुं नकुलं सविशेषमज्ञात्वैव सहसा विनाशयन्त्या त्वया अतीव अकार्यमनुष्ठितम्'। सा तु तथाविधं भर्तृवाक्यं निशम्य अपरीक्षितकारितायाः दोषं विभाव्य च नकुलार्थं परं सन्तापमाययौ, तद्वियोगेन च प्रमुक्तकण्ठं चिरमरुदत्। अतोऽस्माभिरुच्यते,—'अपरीक्ष्य न कर्त्तव्यम्' इत्यादि"।

मणिभद्र आह,—"सत्यमेतत्, सम्यगुपदिष्टम् अत्रभवद्भिः, साम्प्रतमनुमन्यतामयं जनः स्वगृहगमनाय"। ततो धर्माधिकारिभिरुक्तं—"गच्छतु स्वगृहं भवान्, परमेकाकिना न गन्तव्यम्। उक्तञ्च,—

एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात्।
एको न गच्छेदध्वानं नैकश्चार्थान् प्रचिन्तयेत् ॥ ८५ ॥

(थ) स्निह्यमानं—प्रीयमाणं, प्रियबुद्ध्या पाल्यमानमित्यर्थः।

एक इति।—एकः एकाकी, अन्येभ्यः अदत्वा इत्यर्थः, स्वादु सुस्वादं द्रव्यं, न भुञ्जीत, स्वादुद्रव्यम् आश्रितेभ्यः किञ्चित् किञ्चित दत्वा भक्षितव्यमित्यर्थः, एकाकी यदि कथित् सकृद्भुञ्जीत तदा एकाहोपवासः कार्यः, यथोक्तं प्रायश्चित्तविवेके,—"अथैकाकिनिष्टान्नभक्षणप्रायश्चित्तम्; तत्र निन्दायां मनुः,—"एकाकी मिष्टमश्नाति यश्चयित्वा सुहृत-सुताम्। दारान् भृत्यांतथैवेच्छं तथा सम्बन्धिबान्धवान्॥ उच्छन्नपितृदेवेज्यः पशुघ्नात्मा च यो नरः। लालपनरकं घोरं दुर्गन्धं पाप्यते नरः॥" अत्र प्रायश्चित्तविशेषाश्रवणात् "नैकाकी मिष्टान्नमश्नाति" इति श्रुतराचारातिक्रमप्रायश्चित्तम्। वेदोदितानामनियमेन मनुनोक्त एकाहोपवासः कार्यः, एतत् सकृत्, अभ्यासे तु द्वैगुण्यादिकमूहनीयम्" इति। सुप्तेषु निद्रितेषु जनेषु मध्ये, एको जनः, न जागृयात् न जागरितः तिष्ठेत्; सुप्तजनानां हि अपहृते सति कस्मिन्नपि वस्तुनि कारणान्तरेण सते वा कस्मिंश्चित् जायतः एव तदपराधारोपसम्भावनया, यदा,—निद्रायानाम् उत्सन्नप्रायप्राणानां विविधभीतिव्यञ्जकवाक्चेष्टादिभ्यः वञ्चक आगतः प्राणवियोगायनिष्टशङ्कया इति भावः; एक एकाकी, अवहायः सन्निधयः, अभ्यागं

अपि च,—अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः ।
कर्कटेन द्वितीयेन जीवितं परिरक्षितम्" ॥ ८६ ॥
मणिभद्र आह,—"कथमेतत् ?" धर्माधिकारिणः प्रोचुः,—

कथा १४ ।

"कस्मिंश्चित् अधिष्ठाने ब्रह्मदत्तनामा ब्राह्मणः प्रतिवसति स्म ; स च प्रयोजनवशात् (ङ) ग्रामं प्रस्थितः स्वमात्रा अभिहितः,—'वत्स ! कथमेकाकी व्रजसि ? अन्विष्यता कश्चित् द्वितीयः सहायः' । स आह,—'अम्ब ! मा भैषीः ; (घ) निरुपद्रवोऽयं मार्गः, कार्यवशात् एकाकी गमिष्यामि' । अथ तस्य तं निश्चयं ज्ञात्वा समीपस्थवाप्याः सकाशात् (च) कर्कटमेकम् आदाय मात्रा अभिहितः,—'वत्स ! अवश्यं यदि गन्तव्यं, तदा एष कर्कटोऽपि सहायः भवतु ; तत् एनं गृहीत्वा गच्छ' । सोऽपि मातृवचनात् उभाभ्यां पाणिभ्यां तं सङ्गृह्य (छ) कर्पूरपुटिकामध्ये निधाय पात्रमध्ये संस्थाप्य च ग्रामं प्रस्थितः ।

पन्थानं न गच्छत, विपदि सप्तपदीसख्यायाः साहाय्यप्राप्तेरसम्भवादिति भावः ; अपि च, एको जनः, अर्थात् प्रयोजनात्, प्रयोजनौचित्यादिति यत् इत्यर्थः, न प्रचलनेत् अपरेण सम्मन्त्र्य कार्यं कुर्यादित्यर्थः, कदाचित् स्वस्य मोहिवशात् प्रकृतकार्यौचित्यमसम्भावनयति भावः, "गन्तव्यं पथिक, सार्थेन गन्तव्यं पथ्यामः सह" इत्यादि स्मरणात् ॥ ८५ ॥

सहायकगमनस्य गुणं वर्णयितुम् दृष्टान्तमुपन्यस्तुमाह, अपीति ।—मार्गे पथि, कापुरुषोऽपि अक्षमोऽपि, द्वितीयः सहाय इत्यर्थः, तिष्ठति चेत् तर्हीति शेषः, क्षेमकारकः क्षेमकरः, भवेदिति शेषः, तथा हि, द्वितीयेन सहायेन इत्यर्थः, कर्कटेन कुलीरेण, जीवितं, कस्यचित् पान्थस्येति शेषः, परिरक्षितं परित्राणं, कृतमिति भावः ॥ ८६ ॥

(ङ) ग्रामं—कस्मिंश्चित् ग्रामान्तरे इत्यर्थः । ङ्ग ः ग—निजप्रयोजनात् ।

(घ) निरुपद्रवः,—उपद्रवरहितः, प्रत्यूहा अनास्पदम् इत्यर्थः ।

(च) कर्कटं—कुलीरं, ("स्यात् कुलीरः कर्कटश्च." इत्यमरः) । कर्कटोऽपि —कर्कटः पुनः ।

(छ) कर्पूरपुटिकामध्ये—कर्पूराधारमध्ये इत्यर्थः ।

अथ गच्छन् (फ) ग्रीष्मोष्मणा सन्तप्तः कञ्चित् मार्गस्थं हृदम् आसाद्य तत्रैव प्रसुप्तः। अत्रान्तरे हृदकोटरात् निर्गत्य कृष्णसर्पस्तत्समीपम् आगतः, स च (ब) कर्पूरसुगन्धसहजप्रियत्वात् तं परित्यज्य वस्त्रं विदार्य्य अभ्यन्तरगतां कर्पूरपुटिकाम् अतिलौल्यात् अभक्षयत्। सोऽपि कर्कटः तत्रैव स्थितः सन् सर्पप्राणान् अपाहरत्। ततो ब्राह्मणः प्रबुद्धः पश्यति यत्, एको मृतः कृष्णसर्पो निजपार्श्वे कर्पूरपुटिकोपरि स्थितः तिष्ठति। तं दृष्ट्वा व्यचिन्तयत्,—'कर्कटेन अयं हतः' इति प्रसन्नो भूत्वा अब्रवीत्,—'भोः! सत्यम् अभिहितं मम मात्रा यत्—'पुरुषेण कोऽपि सहायः कार्य्यः, न एकाकिना गन्तव्यम्'। यतो मया (भ) श्रद्धापूरितचेतसा तद्वचनम् अनुष्ठितं, तेनाहं कर्कटेन सर्पव्यापादनात् रक्षितः। अथवा साधु इदमुच्यते—

क्षीणः स्रवति शरीरविबुद्धैर्वर्द्धयति पयसां नाथम्।
अन्ये विपदि सहाया धनिनां श्रियमनुभवन्त्यन्ये ॥१९॥

(फ) ग्रीष्मोष्मणा—निदाघतापेन।

(ब) कर्पूरेति।—कर्पूरस्य थः सुगन्धः,—शोभनो गन्धः, तांश्चन् सहजप्रियः,—स्वाभाविकप्रीतिमान्, तस्य भावः तत्त्वात्। तं—ब्राह्मणम्। अतिलौल्यात्—अतिलोभात्।

(भ) श्रद्धापूरितचेतसा—सुजनत्वादित्यत्वात् सादरविशुद्धमनसा। अनुष्ठितं—प्रतिपालितम्। तेन—मातृवचनानुष्ठानेन। सर्पव्यापादनात्—सर्पेण व्यापादनात्—मारणात्, सर्पकर्तृकहननाद्वेत्यर्थः, कर्कटेन—कृत्वा, अहं रक्षित इत्यन्वयः; यद्वा,—कर्कटेन सर्पस्य व्यापादनात्—हननात्, अहं रक्षितः, कर्कटेनेति पूर्वानुषङ्गः।

सहायस्य प्रशंसनाय प्रतिपादयितुमाह, क्षीण इति।—क्षीणः क्षयः, क्षुद्र इत्यर्थः, विक्षुभितं जलमयीव भावः, कायस्थ इव ध्वनिः, शरीरावबुद्धैः शरीरस्थ जलमयैर्देहस्रोतोभिरित्यर्थः, विवर्द्धयति वर्द्धनाय, तडागादीनामित्र भावः, स्रवति क्षरति, आकाशात् प्रसृतः तत्र मिलतीत्यर्थः, तथा पयसां नाथं वारिधिं यथा तथा।

मन्त्रे तीर्थे द्विजे दैवे दैवज्ञे भेषजे गुरौ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ ८८ ॥

क्षामरवादित्यर्थः, क्षुद्रं क्षणाग्रयमपि महान्तं क्षणाधारं क्षपयतीति भावः; वज्राकरवत् धनवन्तमिति ध्वनिः; वर्द्धयति वर्द्धयितुं शक्नोति, क्षुद्रादपि सहायेन क्षुद्रान्तरं महान्तं कर्तुं शक्नोतीति इति समुदितार्थः; तथा हि,—अन्ये अपरे, विपदि आपदि, सहायाः अनुकूलाः, भवन्ति भवेदिति शेषः, तदा अन्ये सहाययुक्ता इत्यर्थः, धनिना धनवता, श्रियं सम्पदं, सौभाग्यमित्यर्थः, अनुभवन्ति भुञ्जते, धनवन्तो भवन्तीत्यर्थः; यथा,—शरीरविवृद्धौ शरीरस्य दृष्टस्य, जलमयस्येति भावः, वारिधेरिति शेषः, विवृद्धौ विशेषेण वर्द्धनाय, क्षीणः क्षयरोगयुक्तः, चन्द्र इत्यर्थः, ["चतुर्दशसु यासु क्षीणो भवति चन्द्रमाः" इति स्मृतिः। क्षियातीः कर्तरि क्त-प्रत्यये "क्षियो दीर्घात्" (८।२।४६ पा०) इति सूत्रेण निष्ठातस्य नकारः, "निष्ठायामण्यदर्थे" (६।४।६० पा०) इति सूत्रेण दीर्घत्वं, "यद्यदर्थः भावकर्मणि तात्पर्यमत्र या निष्ठा तस्यां क्षियो दीर्घो भवति" इति काशिकोक्तेः भावे कर्मणि च क्षितमिति भवितव्यम। चन्द्रस्य क्षयरोगवत्त्वे प्रमाणं यथा चरके,—"रोहिण्यामतिसक्तस्य शशिनं नाक्षतः। आजगामाक्षयता निन्दोर्दक्षः क्षयमवाप्तवान् ॥ दुहितॄणामसङ्गेन शेषाणाञ्च प्रजापतेः। क्रोधो निश्वासरूपेण मूर्त्तिमान् निःसृतो मुखात् ॥ प्रजापतेर्हि दुहितॄरष्टाविंशतिसंमितान्। भाग्यार्थे प्रतिजग्राह न च सर्वास्ववर्त्तत ॥ गुरुणा तमवध्याते भार्यासङ्गमवर्त्तिनम्। रक्षोऽस्यमवलं क्षीणं यक्ष्मा प्रविशमाविशत् ॥ ..... । यस्मात् स राज्ञः प्रागासीत् राजयक्ष्मा ततो मतः ॥" इति चिकित्सितस्थाने अष्टमाध्याये २.....९ सङ्ख्यक श्लोकाः] क्षरति क्षरेत्, किरणान्तं यदा वर्षतीत्यर्थः, समुदपुष्टिसाधनार्थं सहायतां विदधातीति भावः; तदा पयसां नाथम् अपां पतिं, समुद्रमित्यर्थः, वर्द्धयति पूरयति, वर्द्धयितुं शक्नोतीत्यर्थः; चन्द्रोदये समुदस्य वृद्धिः लोकप्रसिद्धा एव; क्षीणस्यापि अग्निः सहायतासम्पादेन वज्राकरस्यापि वृद्धिं सम्पादयतीति भावः; एतदेव दृढयति, अन्ये इति।—धनिनां धनवतामपि इत्यर्थः, विपदि आपदि उपस्थितायां सत्यामित्यर्थः, अन्ये अपरे, सहायाः अनुकूलाः भवन्ति भवेदिति शेषः, तदा अन्ये अपरे, ते धनिनः इत्यर्थः, श्रियं सम्पदम्, अनुभवन्ति भुञ्जते; सम्पदभिलाषिभिः सुधीभिरेव सहायैर्भवितव्यमिति भावः ॥ ८७ ॥

"यतो मया सहापूरितभोजसा" इत्यादिना चूर्णकेन यदुक्तं, तस्यैव समर्थनाय दृष्टान्तं, मन्त्रे इति।—मन्त्रे द्विजादीनां साधने, अन्ये इत्यर्थः, वेदविशेषे वा, ("मन्त्रो

एवमुक्त्वा असौ ब्राह्मणो (म) यथाऽभिप्रेतं गतः। अतोऽस्माभिरुच्यते—'अपि कापुरुषो मार्गे' इत्यादि"। सोऽपि

वेदविशेषे आहेत्यादीनाञ्च साधने। गुह्यवादेऽपि च पुमान्—"इति मेदिनी) तीर्थे पुण्यक्षेत्रे, द्विजे ब्राह्मणे, देवे देवताया, देवज्ञे ज्योतिर्विदे, भेषजे औषधे, तथा गुरौ पूजार्हे पित्रादौ, यस्य जनस्य, यादृशी यादृग्विधा, भावना चिन्ता, [सा च ब्रह्म-कर्म तदुभयभेदात् त्रिविधा, यथोक्तं विष्णुपुराणे,—"त्रिविधा भावना भूप! विश्वमेतत्त्रिबोधं मे। ब्रह्माख्या कर्मसंज्ञा च तथा चैवोभयात्मिका॥" (६ अंशः ७ अ० ४८ श्लोकः) इति; तत्र "सर्वं खल्विदं ब्रह्म" (छान्दो० उप० ३ अ० १४ खं० १ मन्त्रः) इत्येवं भावना प्रथमा; ["सर्वं कर्ममयम्" इत्येवं द्वितीया भावना; उभयात्मिका च तृतीया] तस्य तादृशी तादृग्विधा, सिद्धिः फलमिति यावत्, भवति; जपेनानेन मन्त्रेण अवश्यमेवाहं सिद्धकामो भविष्यामि, मन्त्रं चेत् साधकस्य एवं दृढविश्वासः, तदा अवश्यमेव तस्य फलसिद्धिर्जायते; अनेन मन्त्रेण सिद्धिर्भविष्यति न वा? किं वा भवति? इत्येवं सन्दिग्धानस्य फलसिद्धिर्न भवतीति भावः। अन्धस्य ब्रह्मखण्डत्वात् यस्तु "मन्त्र एव ब्रह्म" इति विभावयन् मन्त्रं जपति, तस्य मन्त्रजपेन तेन पुण्योदयात् स्वर्गादिसिद्धिः ऐहिकसिद्धिर्वा भवति; यस्तु "सर्वं कर्म" इत्यभिसन्धाय मन्त्रं जपति, तस्य कर्मसिद्धिः स्यात्; यश्च "ऐहिकसुखानन्तरं ब्रह्मप्राप्तिः" इति विभाव्य जपति, तस्य उभयसिद्धिः भवति; एवं "तीर्थं ब्रह्म तिष्ठति, तद्दर्शने ब्रह्मदर्शनं भवति" इति भावनया यः तीर्थं याति, तस्य ब्रह्मसिद्धिः; श्रुतौ तीर्थगमनस्य सुखापादकत्वमाकर्ण्य तदुद्दिश्य यस्तीर्थं याति तस्य कर्मसिद्धिः; तीर्थदर्शने ब्रह्मदर्शनफलं सुखञ्च स्यादिति सञ्चिन्त्य यस्तीर्थं याति, तस्योभयसिद्धिर्भवतीति; एवमेव द्विजादावपि इति निष्कर्षः। "एष कर्कटोऽपि ते सहायो भवतु" इति मातृवचसि श्रद्धावत्त्वात् क्षुद्रोऽपि अयं कर्कटः अवश्यमेव मां पथि विपदः रक्षितुं शक्ष्यति इति दृढमन्यत्वात् ब्राह्मणः पथि सहायेन कर्कटेन सर्पदंशनात् रक्षां प्राप्तवान् इति तात्पर्यम्॥ ९८॥

(म) यथाऽभिप्रेतम्—अभिप्रेतम्—अभिलषितस्थाननमनतिक्रम्येत्यर्थे, "अव्ययं विभक्ति—" (२।१।६ पा०) इति यथार्थेऽव्ययीभावः; "योग्यतावीप्सापदार्थानतिवृत्ति-सादृश्यानि यथार्थाः" इति दीक्षितोक्तेः, यत् स्थानं प्रतिष्ठाशीलब्राह्मणस्याभीप्सितमासीत् तत् स्थानमिति यावत्।

अथ भद्रस्तेषामेतदुपदेशवचनमाकर्ण्य तानभ्युपाध्य केनचित् सहायेन स्वगृहं गत्वा सुखेन भोगं (य) भुञ्जानस्तिष्ठौ ।

इति श्रीविष्णुशर्मविरचिते पञ्चतन्त्रे अपरीक्षितकारकं नाम पञ्चमं तन्त्रम् ॥ ५ ॥

(य) भुञ्जानः,—सेवमानः, सकृच्चन्दनवनितादिविषयजातानामुपभोगजन्यः प्रीतिरित्यर्थः; ["ताच्छील्यवयोवचनशक्तिषु चानश्" (३।२।१२९ पा०) इति भुजेः ताच्छील्ये शीले कर्तरि चानश्-प्रत्यय इत्यवधेयम्]।

इत्थंशमाम्नाटवोसत्वरचपत्तालनेन बाल्यवयावर्तमेन पण्डितकुलपतिना वि, ष्णु, शर्माधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचिता, तदात्मजाभ्यां पण्डितश्रीनदाराधीविद्याभूषण-पण्डितश्रीमाधवचन्द्र-विद्यारत्नाभ्यां पारवार्हता प्रतिसंस्कृता च पञ्चतन्त्रव्याख्या ।

